00046251

NOT TO BE ISSUED
OUT OF THE LIBRARY.

BOMBAY BRANCH
OF THE
ROYAL ASIATIC SOCIETY.
TOWN HALL, BOMBAY.

Digitized with financial assistance from
Hermès India
a project facilitated by the Rotary Club of Bombay
on 10 August, 2018

THE

OF THE RIG-VEDA

IN THE

SAMHITA TEXT.

REPRINTED FROM THE EDITIO PRINCEPS.

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

BY

F. MAX MÜLL

MEMBRE ÉTRANGER DE L'INSTIT

LONDON:

TRÜBNER & CO., 57 AND 59, L

1873.

V
294.1
Ved/Hym
46251

00046251

Gardner, E. Pickard Hall and J. H. Stacy,
the Clarendon Press, Oxford,
and
hen Austin and Sons, Hertford.
1873.

DX _ E _ 2

462

a

DEDICATED TO

M. ADOLPHE REGNIER,

MEMBRE DE L'INSTITUT DE FRANCE,

AS A TOKEN OF SINCERE ADMIRATION

FOR THE THOROUGHNESS OF HIS SCHOLARSHIP,

THE ELEVATION OF HIS CHARACTER,

AND HIS LIFE-LONG DEVOTION TO HIS CONVICTIONS.

BY

MAX MÜLLER.

PREFACE.

This edition of the text of the Rig-Veda, the first complete edition of that ancient text in both the Sa*m*hitā and Pada forms, is chiefly intended to answer the requirements of students in India. The Rig-Veda, the oldest book of Indian literature, has very properly been made one of the principal class-books for those who study Sanskrit in the schools and colleges in India, and though at present a scholar-like knowledge of the Vedic hymns is in the examinations required of the more advanced students only, yet, as soon as editions, translations, grammars, and dictionaries shall have rendered the study of these ancient documents more accessible, I doubt not that the time will come when no one in India will call himself a Sanskrit scholar, who cannot construe the hymns of the ancient Rishis of his country. What should we think of a Greek scholar who could read Euripides or Anakreon, but could not construe Homer? Yet that is, or, at all events, will be the position of a Sanskrit scholar who professes to pass in *S*akuntalā and Amaru, but is unable to understand the best hymns of the Rig-Veda.

When this new demand for a complete edition of the Rig-Veda arose, it was clearly impossible to meet it by a reprint of my large edition, containing both text and commentary. The first volume of that edition is nearly out of print, and, without the liberal assistance of the Government, no reprint of it could be brought out, except at a price that would place the book beyond the reach of most scholars. All that might be done, would be to reprint the first Adhyāya for schools; for it may be safely said, to use the words of Sāya*n*a, that he who has honestly worked his way through that first book, is able to understand all the rest of Sāya*n*a's commentary.

But even a reprint of the text only of the Rig-Veda was by no means an easy undertaking. I have sometimes been blamed for not having published such an edition long ago. All that I can say is that I was most anxious, but that I was too poor to do it. I began an edition of the two texts of the Rig-Veda in the year 1856, but, though everything was ready, the expense of the undertaking proved

too great to allow the German publisher to continue the work to the end. It was only with the assistance of the German Oriental Society, and through the liberality of a Royal Academy, that the Editor of the "Indische Studien" was enabled to publish a transcript into Roman letters by Prof. Aufrecht, and this for the Sa*m*hitā-text only, with extracts from the Pada-text. In answer to certain ill-natured misrepresentations reflecting on the promoters of that undertaking, I can only say that if I did not complain because the text of two out of ten Ma*nd*alas might thus seem to have been snatched from my edition, it was hardly for others to complain in my name. What I said in the preface to the first volume of my translation of the Rig-Veda, I say here again: "No one could have rejoiced more sincerely than I did at the publication of the Romanised transliteration of the Rig-Veda, carried out with so much patience and accuracy by Prof. Aufrecht. It showed that there was a growing interest in this, the only true Veda; it showed that even those who could not read Sanskrit in the original Devanāgarī, wished to have access to the original text of these ancient hymns; it showed that the study of the Veda had a future before it like no other book of Sanskrit literature. My learned friend Prof. Aufrecht has been most unfairly charged with having printed his Romanised text *me insciente vel invito*. My edition of the Rig-Veda is *publici juris*, like any edition of Homer or Plato, and anybody might have reprinted it, either in Roman or Devanāgarī letters. But far from keeping me in ignorance of his useful enterprise, Prof. Aufrecht applied to me for the loan of the MSS. of the two Ma*nd*alas which I had not yet published, and I lent them to him most gladly, because, by seeing them printed at once, I felt far less guilty in delaying the publication of the last volumes of my edition of the text and commentary." And, in order to remove all possible misunderstandings, I take this opportunity of stating, that when Professor Aufrecht applied to me, I lent him, not my transcript of these MSS., but the MSS. themselves on which my text is founded (see Preface to the first volume of my edition, 1849, pp. vii–x), because without them, as he wrote to me, he found it impossible to give a correct text of that portion which I had not yet published.

An edition of the Rig-Veda in Roman letters, however useful in Europe, was of course of little assistance in India. It had no doubt the advantage of being cheap, and this chiefly owing to the liberal subsidy from two learned societies; but it proved again, what was known before, that it is physically impossible to avoid a large number of mistakes and misprints in transcribing Sanskrit texts, more particularly with accents, in any European alphabet.

After the reprint of the Sa*m*hitā and Pada-texts which I had begun in 1856 at Leipzig had to be discontinued, a complete edition of the Rig-Veda in Devanāgarī characters remained for a long time a desideratum, till at last Mr. Trübner, encouraged by promises of support from Indian and European subscribers, declared himself ready to undertake the risk. I gladly promised to supply the MS. with all the corrections marked in my own copy during the last twenty years, and I only stipulated that I should be relieved from the task of correcting the proof-sheets. All promised well, when the printing was interrupted, twice by strikes, and again by the war, which delayed the delivery of new types from Germany. By these untoward accidents not only was the publication unavoidably retarded, but the estimated expense of the undertaking nearly doubled. Subscribers, however, will receive their copies at the price which was fixed before these strikes, and which even then would only have been sufficient to cover the real outlay, without allowing any remuneration either to the publisher or to the editor. The large pecuniary loss thus incurred will have to be borne by Mr. Trübner and myself. It will be seen that to subscribers the price of each copy in Devanāgarī letters is no more than the price of the reprint in Roman letters, published at Berlin.

In order to secure the greatest possible amount of correctness in reprinting the two texts of the Rig-Veda, a young, but already distinguished Sanskrit scholar, Dr. Thibaut, was engaged to read the proof-sheets. They were read three or even four times before they were finally ordered for press, and I have that confidence in his accuracy that I believe few texts, particularly texts with accents, will prove so free from misprints as the present. While all the credit for this part of the work belongs to him, he gratefully acknowledges the zeal of the printers, both at Oxford and Hertford, who vied with each other in producing the most faultless proof-sheets. However, there is nothing perfect on earth, and I am bound to confess that, during the printing, some letters have here and there been spoiled, and some accents broken,—a mishap against which even the gods fight in vain.

The plan followed in reprinting the two texts has been to begin with the Pada-text, as requiring far more space than the Sa*m*hitā-text, to print the former as close as possible, and then to set up the Sa*m*hitā-text, so as to make each page of Pada correspond to a page of Sa*m*hitā. In order to preserve the parallelism of the pages, it was necessary to leave out the small lines which separate the padas, also the *iti's*, and the *iti's* with the repetition of the words. The omission of the separating lines was of no consequence, but

when the MSS. give an *iti*, I have used instead the sign •, when they give *iti* and repeat the word, I have marked this by the sign °. As there was still some space over on the Sa*m*hitā page, the number of verses of each hymn, the names of the authors, deities, and metres were added, as much as possible in the words of the Sarvānukrama, and we have thus succeeded in the difficult task of producing an edition in which, from beginning to end, one page of Pada corresponds to one page of Sa*m*hitā-text. Had I printed the Sa*m*hitā-text by itself, the saving of space would have been considerable; but it will be seen that even thus the number of pages occupied by the Sa*m*hitā-text, printed in the largest Devanāgarī characters, is less than that of the Romanised transcript. No one who knows the peculiarity of the Sanskrit alphabet would suppose that a Roman transcript could ever occupy less space than the original Devanāgarī. We have here used the largest Devanāgarī types, we have lost much space in having to print the accents above and below the letters, and had thus only twenty-four lines on each page against twenty-seven lines in the Romanised text (exclusive of notes), and yet the sum total of our pages is only 844, against 920 pages required for the transcript in Roman letters. The expense of printing with Devanāgarī letters is unfortunately becoming greater every year, and with the competition of native publishers in India, it will soon become impossible to print any Sanskrit texts in Europe. I am, however, authorized to state by Mr. Trübner, who undertook this work from a purely literary interest, that as soon as the loss which we have incurred shall be covered, the price of the work will be considerably reduced, so as to make it the cheapest Sanskrit text ever published.

I had prepared an index of the names of the authors, deities, metres, the beginnings of each verse, also a long list of errata which may be useful to those who possess either my original edition of the Rig-Veda or Professor Aufrecht's transcript, enabling them in each passage to see (1) the errata in the editio princeps, (2) the errata either repeated or corrected in Professor Aufrecht's reprint, (3) the errata, now corrected for the first time in this edition, either on the authority of Prâtisâkhya, or of the best MSS. All this, however, must wait for the present, till there are new funds available for printing.

M. M.

Oxford,
March, 1873.

॥ संहितापाठः ॥

॥ ओं ॥

॥ १ ॥ १–९ मधुच्छंदा वैश्वामित्रः ॥ अग्निः ॥ गायत्री ॥

॥१॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं । होतारं
रत्नधातमं ॥१॥ अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स
देवाँ एह वक्षति ॥२॥ अग्निना रयिमश्नवत्पोषमेव दिवेदिवे ।
यशसं वीरवत्तमं ॥३॥ अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।
स इद्देवेषु गच्छति ॥४॥ अग्निर्होता कविक्रतुः सत्यश्चित्रश्रव-
स्तमः । देवो देवेभिरा गमत् ॥५॥१॥ यदंग दाशुषे त्वमग्ने
भद्रं करिष्यसि । तवेत्तत्सत्यमंगिरः ॥६॥ उप त्वाग्ने दिवेदिवे दो-
षावस्तर्धिया वयं । नमो भरंत एमसि ॥७॥ राजंतमध्वराणां
गोपामृतस्य दीदिविं । वर्धमानं स्वे दमे ॥८॥ स नः पितेव
सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥९॥२॥

॥२॥ १–९ मधुच्छंदा वैश्वामित्रः ॥ १–३ वायुः । ४–६ इंद्रवायू । ७–९ मित्रावरुणौ ॥ गायत्री ॥

॥२॥ वायवा याहि दर्शतेमे सोमा अरंकृताः । तेषां
पाहि श्रुधी हवं ॥१॥ वाय उक्थेभिर्जरंते त्वामच्छा जरि-
तारः । सुतसोमा अहर्विदः ॥२॥ वायो तव प्रपृंचती धेना
जिगाति दाशुषे । उरूची सोमपीतये ॥३॥ इंद्रवायू इमे
सुता उप प्रयोभिरा गतं । इंदवो वामुशंति हि ॥४॥
वायविंद्रश्च चेतथः सुतानां वाजिनीवसू । तावा यातमुप

द्रवत् ॥ ५ ॥ ३ ॥ वायविंद्रश्च सुन्वत आ यातमुप निष्कृतं ।
मक्ष्वि१त्था धिया नरा ॥ ६ ॥ मित्रं हुवे पूतदक्षं वरुणं च
रिशादसं । धियं घृताचीं साधंता ॥ ७ ॥ ऋतेन मित्रावरुणावृता-
वृधावृतस्पृशा । क्रतुं बृहंतमाशाथे ॥ ८ ॥ कवी नो मित्रावरुणा
तुविजाता उरुक्षया । दक्षं दधाते अपसं ॥ ९ ॥ ४ ॥

॥ ३ ॥ १–१२ मधुच्छंदा वैश्वामित्रः ॥ १–३ अश्विनौ । ४–६ इंद्रः । ७–९ विश्वे देवाः ।
१०–१२ सरस्वती ॥ गायत्री ॥

॥ ३ ॥ अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती । पुरु-
भुजा चनस्यतं ॥ १ ॥ अश्विना पुरुदंससा नरा शवीरया धिया ।
धिष्ण्या वनतं गिरः ॥ २ ॥ दस्रा युवाकवः सुता नासत्या वृक्त-
बर्हिषः । आ यातं रुद्रवर्तनी ॥ ३ ॥ इंद्रा याहि चित्रभानो सुता
इमे त्वायवः । अण्वीभिस्तना पूतासः ॥ ४ ॥ इंद्रा याहि धिये-
षितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥ ५ ॥ इंद्रा
याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥ ६ ॥ ५ ॥
ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वांसो दाशुषः
सुतं ॥ ७ ॥ विश्वे देवासो अप्तुरः सुतमा गंत तूर्णयः । उस्रा इव
स्वसराणि ॥ ८ ॥ विश्वे देवासो अस्रिध एहिमायासो अद्रुहः ।
मेधं जुषंत वह्नयः ॥ ९ ॥ पावका नः सरस्वती वाजेभिर्वाजिनी-
वती । यज्ञं वष्टु धियावसुः ॥ १० ॥ चोदयित्री सूनृतानां चेतंती
सुमतीनां । यज्ञं दधे सरस्वती ॥ ११ ॥ महो अर्णः सरस्वती प्र
चेतयति केतुना । धियो विश्वा वि राजति ॥ १२ ॥ ६ ॥ १ ॥

॥ ४ ॥ १–१० मधुच्छंदा वैश्वामित्रः ॥ इंद्रः ॥ गायत्री ॥

॥ ४ ॥ सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि
द्यविद्यवि ॥ १ ॥ उप नः सवना गहि सोमस्य सोमपाः

पिब गोदा इद्रेवतो मदः ॥ २ ॥ अथा ते अंतमानां विद्याम
सुमतीनां । मा नो अति ख्य आ गहि ॥ ३ ॥ परेहि विग्रमस्तृ-
तमिंद्रं पृच्छा विपश्चितं । यस्ते सखिभ्य आ वरं ॥ ४ ॥ उत ब्रुवंतु
नो निदो निरन्यतश्चिदारत । दधाना इंद्र इद्दुवः ॥ ५ ॥ ७ ॥ उत
नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः । स्यामेदिंद्रस्य शर्मणि ॥ ६ ॥
एमाशुमाशवे भर यज्ञश्रियं नृमादनं । पतयन्मंदयत्सखं ॥ ७ ॥
अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः । प्रावो वाजेषु
वाजिनं ॥ ८ ॥ तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो ।
धनानामिंद्र सातये ॥ ९ ॥ यो रायो३वनिर्महान्त्सुपारः
सुन्वतः सखा । तस्मा इंद्राय गायत ॥ १० ॥ ८ ॥

॥ ५ ॥ १–१० मधुच्छंदा वैश्वामित्रः ॥ इंद्रः ॥ गायत्री ॥

॥ ५ ॥ आ त्वेता नि षीदतेंद्रमभि प्र गायत । सखायः
स्तोमवाहसः ॥ १ ॥ पुरूतमं पुरूणामीशानं वार्याणां । इंद्रं
सोमे सचा सुते ॥ २ ॥ स घा नो योग आ भुवत्स राये स
पुरंध्यां । गमद्वाजेभिरा स नः ॥ ३ ॥ यस्य संस्थे न वृण्वते
हरी समत्सु शत्रवः । तस्मा इंद्राय गायत ॥ ४ ॥ सुतपाव्ने
सुता इमे शुचयो यंति वीतये । सोमासो दध्याशिरः ॥ ५ ॥ ९ ॥
त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः । इंद्र ज्यैष्ठ्याय सुक्र-
तो ॥ ६ ॥ आ त्वा विशंत्वाशवः सोमास इंद्र गिर्वणः । शं ते
संतु प्रचेतसे ॥ ७ ॥ त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो ।
त्वां वर्धंतु नो गिरः ॥ ८ ॥ अक्षितोतिः सनेदिमं वाजमिंद्रः
सहस्रिणं । यस्मिन्विश्वानि पौंस्या ॥ ९ ॥ मा नो मर्ता अभि
द्रुहन्तनूनामिंद्र गिर्वणः । ईशानो यवया वधं ॥ १० ॥ १० ॥

॥ ६ ॥ १–१० मधुच्छंदा वैश्वामित्रः ॥ १–३ इंद्रः । ४. ६. ८. ९ मरुतः । ५. ७ मरुत इंद्रश्च । १० इंद्रः ॥ गायत्री ॥

॥ ६ ॥ युंजंति ब्रध्नमरुषं चरंतं परि तस्थुषः । रोचंते रोचना दिवि ॥ १ ॥ युंजंत्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ २ ॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ ३ ॥ आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियं ॥ ४ ॥ वीळु चिदारुजत्नुभिर्गुहा चिदिंद्र वह्निभिः । अविंद उस्रिया अनु ॥ ५ ॥ ११ ॥ देवयंतो यथा मतिमच्छा विदद्वसुं गिरः । महामनूषत श्रुतं ॥ ६ ॥ इंद्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा । मंदू समानवर्चसा ॥ ७ ॥ अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति । गणैरिंद्रस्य काम्यैः ॥ ८ ॥ अतः परिज्मन्ना गहि दिवो वा रोचनादधि । समस्मिन्नृंजते गिरः ॥ ९ ॥ इतो वा सातिमीमहे दिवो वा पार्थिवादधि । इंद्रं महो वा रजसः ॥ १० ॥ १२ ॥

॥ ७ ॥ १–१० मधुच्छंदा वैश्वामित्रः ॥ इंद्रः ॥ गायत्री ॥

॥ ७ ॥ इंद्रमिद्गाथिनो बृहदिंद्रमर्केभिरर्किणः । इंद्रं वाणीरनूषत ॥ १ ॥ इंद्र इद्धर्योः सचा संमिश्ल आ वचोयुजा । इंद्रो वज्री हिरण्ययः ॥ २ ॥ इंद्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥ ३ ॥ इंद्र वाजेषु नोऽव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥ ४ ॥ इंद्रं वयं महाधन इंद्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणं ॥ ५ ॥ १३ ॥ स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि । अस्मभ्यमप्रतिष्कुतः ॥ ६ ॥ तुंजेतुंजे य उत्तरे स्तोमा इंद्रस्य वज्रिणः । न विंधे अस्य सुष्टुतिं ॥ ७ ॥ वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा । ईशानो अप्रतिष्कुतः ॥ ८ ॥ य एकश्चर्षणीनां

वसूनामिरज्यति। इंद्रः पंच क्षितीनां॥९॥ इंद्रं वो विश्वतस्परि
हवामहे जनेभ्यः। अस्माकमस्तु केवलः॥१०॥१४॥२॥

॥ ८ ॥ १–१० मधुच्छंदा वैश्वामित्रः ॥ इंद्रः ॥ गायत्री ॥

॥८॥ एंद्र सानसिं रयिं सजित्वानं सदासहं। वर्षिष्ठमूतये
भर॥१॥ नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै। त्वोतासो
न्यर्वता॥२॥ इंद्र त्वोतास आ वयं वज्रं घना ददीमहि। जयेम सं
युधि स्पृधः॥३॥ वयं शूरेभिरस्तृभिरिंद्र त्वया युजा वयं। सा-
सह्याम पृतन्यतः॥४॥ महाँ इंद्रः परश्च नु महित्वमस्तु वज्रिणे।
द्यौर्न प्रथिना शवः॥५॥१५॥ समोहे वा य आशत नरस्तोकस्य
सनितौ। विप्रासो वा धियायवः॥६॥ यः कुक्षिः सोमपातमः
समुद्र इव पिन्वते। उर्वीरापो न काकुदः॥७॥ एवा ह्यस्य सूनृता
विरप्शी गोमती मही। पक्वा शाखा न दाशुषे॥८॥ एवा हि ते
विभूतय ऊतय इंद्र मावते। सद्यश्चित्संति दाशुषे॥९॥ एवा ह्यस्य
काम्या स्तोम उक्थं च शंस्या। इंद्राय सोमपीतये॥१०॥१६॥

॥ ९ ॥ १–१० मधुच्छंदा वैश्वामित्रः ॥ इंद्रः ॥ गायत्री ॥

॥९॥ इंद्रेहि मत्स्यंधसो विश्वेभिः सोमपर्वभिः। महाँ
अभिष्टिरोजसा॥१॥ एमेनं सृजता सुते मंदिमिंद्राय
मंदिने। चक्रिं विश्वानि चक्रये॥२॥ मत्स्वा सुशिप्र
मंदिभिः स्तोमेभिर्विश्वचर्षणे। सचैषु सवनेष्वा॥३॥ असृ-
ग्रमिंद्र ते गिरः प्रति त्वामुदहासत। अजोषा वृषभं
पतिं॥४॥ सं चोदय चित्रमर्वाग्राध इंद्र वरेण्यं। अस-
दित्ते विभु प्रभु॥५॥१७॥ अस्मान्त्सु तत्र चोदयेंद्र राये

रभस्वतः। तुविद्युम्न यशस्वतः ॥६॥ सं गोमदिंद्र वाजवदस्मे पृथु श्रवो बृहत्। विश्वायुर्धेह्यक्षितं ॥७॥ अस्मे धेहि श्रवो बृहद्द्युम्नं सहस्रसातमं। इंद्र ता रथिनीरिषः॥८॥ वसोरिंद्रं वसुपतिं गीर्भिर्गृणंत ऋग्मियं। होम गंतारमूतये ॥९॥ सुतेसुते न्योकसे बृहद्बृहत एदरिः। इंद्राय शूषमर्चति ॥१०॥१८॥

॥ १० ॥ १–१२ मधुच्छंदा वैश्वामित्रः ॥ इंद्रः ॥ अनुष्टुप् ॥

॥१०॥ गायंति त्वा गायत्रिणोऽर्चंत्यर्कमर्किणः। ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥१॥ यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वं। तदिंद्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥ युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा। अथा न इंद्र सोमपा गिरामुपश्रुतिं चर ॥३॥ एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव। ब्रह्म च नो वसो सचेंद्र यज्ञं च वर्धय ॥४॥ उक्थमिंद्राय शंस्यं वर्धनं पुरुनिष्षिधे। शक्रो यथा सुतेषु णो रारणत्सख्येषु च ॥५॥ तमित्सखित्व ईमहे तं राये तं सुवीर्ये। स शक्र उत नः शकदिंद्रो वसु दयमानः ॥६॥१९॥ सुविवृतं सुनिरजमिंद्र त्वादातमिद्यशः। गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥७॥ नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः। जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥८॥ आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः। इंद्र स्तोममिमं मम कृष्वा युजश्चिदंतरं ॥९॥ विद्मा हि त्वा वृषंतमं वाजेषु हवनश्रुतं। वृषंतमस्य हूमह ऊतिं सहस्रसातमां ॥१०॥ आ तू न इंद्र कौशिक मंदसानः सुतं पिब। नव्यमायुः प्र सू तिर कृधी सहस्रसा-

मृषिं ॥११॥ परि त्वा गिर्वणो गिर इमा भवंतु विश्वतः। वृद्धायुमनु वृद्धयो जुष्टा भवंतु जुष्टयः ॥१२॥२०॥

॥ ११ ॥ १-८ जेता माधुच्छंदसः ॥ इंद्रः ॥ अनुष्टुप् ॥

॥११॥ इंद्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः। रथीतमं रथीनां वाजानां सत्पतिं पतिं ॥१॥ सख्ये त इंद्र वाजिनो मा भेम शवसस्पते। त्वामभि प्र णोनुमो जेतारमपराजितं ॥२॥ पूर्वीरिंद्रस्य रातयो न वि दस्यंत्यूतयः। यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघं ॥३॥ पुरां भिंदुर्युवा कविरमितौजा अजायत। इंद्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥४॥ त्वं वलस्य गोमतोऽपावरद्रिवो बिलं। त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥५॥ तवाहं शूर रातिभिः प्रत्यायं सिंधुमावदन्। उपातिष्ठंत गिर्वणो विदुष्टे तस्य कारवः ॥६॥ मायाभिरिंद्र मायिनं त्वं शुष्णमवातिरः। विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥७॥ इंद्रमीशानमोजसाभि स्तोमा अनूषत। सहस्रं यस्य रातय उत वा संति भूयसीः ॥८॥२१॥३॥

॥१२॥ १-१२ मेधातिथिः काण्वः ॥ अग्निः। ६ अग्निर्निर्मथ्योऽग्निराहवनीयश्च ॥ गायत्री ॥

॥१२॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं। अस्य यज्ञस्य सुक्रतुं ॥१॥ अग्निमग्निं हवीमभिः सदा हवंत विश्पतिं। हव्यवाहं पुरुप्रियं ॥२॥ अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे। असि होता न ईड्यः ॥३॥ ताँ उशतो वि बोधय यदग्ने यासि दूत्यं। देवैरा सत्सि बर्हिषि ॥४॥ घृताहवन दीदिवः प्रति ष्म रिषतो दह। अग्ने त्वं रक्षस्विनः ॥५॥ अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड् जुह्वा-

स्यः ॥६॥२२॥ क॒विम॒ग्निमुप॑ स्तुहि स॒त्यध॑र्माणमध्व॒रे । दे॒वम॑-
मीव॒चात॑नं ॥७॥ यस्त्वाम॑ग्ने ह॒विष्प॑तिर्दू॒तं दे॑व सप॒र्यति॑ । तस्य॑
स्म प्राव‍ि॒ता भ॑व ॥८॥ यो अ॒ग्निं दे॒ववी॑तये ह॒विष्माँ॑ आ॒विवा॑-
सति । तस्मै॑ पावक मृळय ॥९॥ स नः॑ पावक दीदि॒वोऽग्ने॑ दे॒वाँ
इ॒हा व॑ह । उप॑ य॒ज्ञं ह॒विश्च॑ नः ॥१०॥ स नः॒ स्तवा॑न॒ आ भ॑र गा-
य॒त्रेण॒ नवी॑यसा । र॒यिं वी॒रव॑ती॒मिषं॑ ॥११॥ अग्ने॑ शु॒क्रेण॑ शो-
चिषा॒ विश्वा॑भिर्दे॒वहू॑तिभिः । इ॒मं स्तोमं॑ जुषस्व नः ॥१२॥२३॥

॥१३॥ मेधातिथिः काण्वः ॥ आप्रीसूक्तं । १ इध्मः समिद्धो वाग्निः । २ तनूनपात् । ३ नराशंसः । ४ इळः । ५ बर्हिः । ६ देवीर्द्वारः । ७ उषासानक्ता । ८ दैव्यौ होतारौ प्रचेतसौ । ९ तिस्रो देव्यः सरस्वतीळाभारत्यः । १० त्वष्टा । ११ वनस्पतिः । १२ स्वाहाकृतयः ॥ गायत्री ॥

॥१३॥ सुस॑मिद्धो न॒ आ व॑ह दे॒वाँ अ॑ग्ने ह॒विष्म॑ते । होत॑ः
पावक॒ यक्षि॑ च ॥१॥ मधु॑मन्तं तनूनपाद्य॒ज्ञं दे॒वेषु॑ नः कवे ।
अ॒द्या कृ॑णुहि वी॒तये॑ ॥२॥ नरा॒शंस॑मि॒ह प्रि॒यम॒स्मिन्य॒ज्ञ उप॑
ह्वये । मधु॑जिह्वं हवि॒ष्कृत॑ं ॥३॥ अग्ने॑ सु॒खत॑मे॒ रथे॑ दे॒वाँ ई॑ळि॒त
आ व॑ह । असि॒ होता॒ मनु॑र्हितः ॥४॥ स्तृ॒णी॒त ब॒र्हिरा॑नु॒षग्घृ॒त-
पृ॑ष्ठं मनीषिणः । यत्रा॒मृत॑स्य॒ चक्ष॑णं ॥५॥ वि श्र॑यन्तामृता-
वृधो॒ द्वारो॑ दे॒वीर॑स॒श्चत॑ः । अ॒द्या नू॒नं च॒ यष्ट॑वे ॥६॥२४॥
नक्तो॒षासा॑ सु॒पेश॑सा॒स्मिन्य॒ज्ञ उप॑ ह्वये । इ॒दं नो॑ ब॒र्हिरा॒सदे॑ ॥७॥
ता सु॑जि॒ह्वा उप॑ ह्वये॒ होता॑रा॒ दैव्या॑ क॒वी । य॒ज्ञं नो॑ यक्षता-
मि॒मं ॥८॥ इळा॒ सर॑स्वती म॒ही ति॒स्रो दे॒वीर्म॑यो॒भुव॑ः । ब॒र्हिः
सी॑दन्त्व॒स्रिध॑ः ॥९॥ इ॒ह त्वष्टा॑रमग्रि॒यं वि॒श्वरू॑प॒मुप॑ ह्वये । अ॒स्मा-
क॑मस्तु॒ केव॑लः ॥१०॥ अव॑ सृजा वनस्पते॒ देव॑ दे॒वेभ्यो॑ ह॒विः ।
प्र दा॒तुर॑स्तु॒ चेत॑नं ॥११॥ स्वाहा॑ य॒ज्ञं कृ॑णोत॒नेन्द्रा॑य॒ यज्व॑नो
गृ॒हे । तत्र॑ दे॒वाँ उप॑ ह्वये ॥१२॥२५॥

॥ १४ ॥ १–१२ मेधातिथिः काण्वः ॥ विश्वे देवाः ॥ गायत्री ॥

॥१४॥ ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये। देवे-
भिर्याहि यक्षि च ॥१॥ आ त्वा कण्वा अहूषत गृणंति विप्र ते
धियः। देवेभिरग्न आ गहि ॥२॥ इंद्रवायू बृहस्पतिं मित्राग्निं
पूषणं भगं। आदित्यान्मारुतं गणं ॥३॥ प्र वो भ्रियंत इंदवो
मत्सरा मादयिष्णवः। द्रप्सा मध्वश्चमूषदः ॥४॥ ईळते त्वामव-
स्यवः कण्वासो वृक्तबर्हिषः। हविष्मंतो अरंकृतः ॥५॥ घृतपृष्ठा
मनोयुजो ये त्वा वहंति वह्नयः। आ देवान्सोमपीतये ॥६॥२६॥
तान्यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि। मध्वः सुजिह्व पा-
यय ॥७॥ ये यजत्रा य ईड्यास्ते ते पिबंतु जिह्वया। मधोरग्ने
वषट्कृति ॥८॥ आकीं सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः। वि-
प्रो होतेह वक्षति ॥९॥ विश्वेभिः सोम्यं मध्वग्न इंद्रेण वायुना।
पिबा मित्रस्य धामभिः ॥१०॥ त्वं होता मनुर्हितोऽग्ने यज्ञेषु
सीदसि। सेमं नो अध्वरं यज ॥११॥ युक्ष्वा ह्यरुषी रथे हरितो
देव रोहितः। ताभिर्देवाँ इहा वह ॥१२॥२७॥

॥ १५ ॥ १–१२ मेधातिथिः काण्वः ॥ ऋतवः । १ इंद्रः । २ मरुतः । ३ त्वष्टा । ४ अग्निः ।
५ इंद्रः । ६ मित्रावरुणौ । ७–१० द्रविणोदाः । ११ अश्विनौ । १२ अग्निः ॥ गायत्री ॥

॥१५॥ इंद्र सोमं पिब ऋतुना त्वा विशंत्विंदवः। मत्सरासस्त-
दोकसः ॥१॥ मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन। यूयं हि
ष्ठा सुदानवः ॥२॥ अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतु-
ना। त्वं हि रत्नधा असि ॥३॥ अग्ने देवाँ इहा वह सादया योनिषु
त्रिषु। परि भूष पिब ऋतुना ॥४॥ ब्राह्मणादिंद्र राधसः पिबा
सोममृतूँरनु। तवेद्धि सख्यमस्तृतं ॥५॥ युवं दक्षं धृतव्रत मित्रा-
वरुण दूळभं। ऋतुना यज्ञमाशाथे ॥६॥२८॥ द्रविणोदा द्रविणसो

यावहस्तासो अध्वरे। यज्ञेषु देवमीळते ॥७॥ द्रविणोदा ददातु नो वसूनि यानि शृण्विरे। देवेषु ता वनामहे ॥८॥ द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत ॥९॥ यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे। अध स्मा नो ददिर्भव ॥१०॥ अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता। ऋतुना यज्ञवाहसा ॥११॥ गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि। देवान्देवयते यज ॥१२॥२९॥

॥ १६ ॥ १–९ मेधातिथिः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥१६॥ आ त्वा वहंतु हरयो वृषणं सोमपीतये। इंद्र त्वा सूरचक्षसः ॥१॥ इमा धाना घृतस्नुवो हरी इहोप वक्षतः। इंद्रं सुखतमे रथे ॥२॥ इंद्रं प्रातर्हवामह इंद्रं प्रयत्यध्वरे। इंद्रं सोमस्य पीतये ॥३॥ उप नः सुतमा गहि हरिभिरिंद्र केशिभिः। सुते हि त्वा हवामहे ॥४॥ सेमं नः स्तोममा गह्युपेदं सवनं सुतं। गौरो न तृषितः पिब ॥५॥३०॥ इमे सोमास इंदवः सुतासो अधि बर्हिषि। ताँ इंद्र सहसे पिब ॥६॥ अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः। अथा सोमं सुतं पिब ॥७॥ विश्वमित्सवनं सुतमिंद्रो मदाय गच्छति। वृत्रहा सोमपीतये ॥८॥ सेमं नः काममा पृण गोभिरश्वैः शतक्रतो। स्तवाम त्वा स्वाध्यः ॥९॥३१॥

॥ १७ ॥ १–९ मेधातिथिः काण्वः ॥ इंद्रावरुणौ ॥ १–३. ६–९ गायत्री । ४. ५ पादनिचृत् ॥

॥१७॥ इंद्रावरुणयोरहं सम्राजोरव आ वृणे। ता नो मृळात ईदृशे ॥१॥ गंतारा हि स्थोऽवसे हवं विप्रस्य मावतः। धर्तारा चर्षणीनां ॥२॥ अनुकामं तर्पयेथामिंद्रावरुण राय आ। ता वां नेदिष्ठमीमहे ॥३॥ युवाकु हि शचीनां युवाकु

सुमतीनां। भूयाम वाजदाव्नां ॥४॥ इंद्रः सहस्रदाव्नां वरुणः शंस्यानां। क्रतुर्भवत्युक्थ्यः ॥५॥३२॥ तयोरिदवसा वयं सनेम नि च धीमहि। स्यादुत प्ररेचनं ॥६॥ इंद्रावरुण वामहं हुवे चित्राय राधसे। अस्मान्त्सु जिग्युषस्कृतं ॥७॥ इंद्रावरुण नू नु वां सिषासंतीषु धीष्वा। अस्मभ्यं शर्म यच्छतं ॥८॥ प्र वामश्नोतु सुष्टुतिरिंद्रावरुण यां हुवे। यामृधाथे सधस्तुतिं ॥९॥३३॥४॥

॥ १८ ॥ १–९ मेधातिथिः काण्वः ॥ १–३ ब्रह्मणस्पतिः । ४ ब्रह्मणस्पतिरिंद्रश्च सोमश्च । ५ ब्रह्मणस्पतिर्दक्षिणा च । ६–८ सदसस्पतिः । ९ सदसस्पतिर्नराशंसो वा ॥ गायत्री ॥

॥१८॥ सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवंतं य औशिजः ॥१॥ यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः ॥२॥ मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य। रक्षा णो ब्रह्मणस्पते ॥३॥ स घा वीरो न रिष्यति यमिंद्रो ब्रह्मणस्पतिः। सोमो हिनोति मर्त्यं ॥४॥ त्वं तं ब्रह्मणस्पते सोम इंद्रश्च मर्त्यं। दक्षिणा पात्वंहसः ॥५॥३४॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं। सनिं मेधामयासिषं ॥६॥ यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन। स धीनां योगमिन्वति ॥७॥ आदृध्नोति हविष्कृतिं प्रांचं कृणोत्यध्वरं। होत्रा देवेषु गच्छति ॥८॥ नराशंसं सुधृष्टममपश्यं सप्रथस्तमं। दिवो न सद्ममखसं ॥९॥३५॥

॥ १९ ॥ १–९ मेधातिथिः काण्वः ॥ अग्निर्मरुतश्च ॥ गायत्री ॥

॥१९॥ प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे। मरुद्भिरग्न आ गहि ॥१॥ नहि देवो न मर्त्यो महस्तव क्रतुं परः। मरुद्भिरग्न आ गहि ॥२॥ ये महो रजसो विदुर्विश्वे देवासो अद्रुहः। मरुद्भिरग्न आ गहि ॥३॥ य उग्रा अर्कमा-

नृचुरनाधृष्टास ओजसा । मरुद्भिरग्न आ गहि ॥४॥ ये शुभ्रा
घोरवर्पसः सुक्षत्रासो रिशादसः । मरुद्भिरग्न आ गहि ॥५॥३६॥
ये नाकस्याधि रोचने दिवि देवास आसते । मरुद्भिरग्न आ
गहि ॥६॥ य ईंखयंति पर्वतान् तिरः समुद्रमर्णवं । मरुद्भिरग्न
आ गहि ॥७॥ आ ये तन्वंति रश्मिभिस्तिरः समुद्रमोजसा ।
मरुद्भिरग्न आ गहि ॥८॥ अभि त्वा पूर्वपीतये सृजामि सोम्यं
मधु । मरुद्भिरग्न आ गहि ॥९॥३७॥१॥

॥ २० ॥ १–८ मेधातिथिः काण्वः ॥ ऋभवः ॥ गायत्री ॥

॥२०॥ अयं देवाय जन्मने स्तोमो विप्रेभिरासया । अकारि
रत्नधातमः ॥१॥ य इंद्राय वचोयुजा ततक्षुर्मनसा हरी ।
शमीभिर्यज्ञमाशत ॥२॥ तक्षन्नासत्याभ्यां परिज्मानं सुखं रथं ।
तक्षन्धेनुं सबर्दुघां ॥३॥ युवाना पितरा पुनः सत्यमंत्रा ऋजू-
यवः । ऋभवो विष्ट्यक्रत ॥४॥ सं वो मदासो अग्मतेंद्रेण च
मरुत्वता । आदित्येभिश्च राजभिः ॥५॥१॥ उत त्यं चमसं नवं
त्वष्टुर्देवस्य निष्कृतं । अकर्त चतुरः पुनः ॥६॥ ते नो रत्नानि
धत्तन त्रिरा साप्तानि सुन्वते । एकमेकं सुशस्तिभिः ॥७॥ अधा-
रयंत वह्नयोऽभजंत सुकृत्यया । भागं देवेषु यज्ञियं ॥८॥२॥

॥ २१ ॥ १–६ मेधातिथिः काण्वः ॥ इंद्राग्नी ॥ गायत्री ॥

॥२१॥ इहेंद्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि । ता
सोमं सोमपातमा ॥१॥ ता यज्ञेषु प्र शंसतेंद्राग्नी शुंभता
नरः । ता गायत्रेषु गायत ॥२॥ ता मित्रस्य प्रशस्तय इंद्राग्नी
ता हवामहे । सोमपा सोमपीतये ॥३॥ उग्रा संता हवामह
उपेदं सवनं सुतं । इंद्राग्नी एह गच्छतां ॥४॥ ता महांता

सदस्पती इंद्राग्नी रक्ष उब्जतं । अप्रजाः संत्वत्रिणः ॥५॥ तेन
सत्येन जागृतमधि प्रचेतुने पदे । इंद्राग्नी शर्म यच्छतं ॥६॥३॥

॥ २२ ॥ १–२१ मेधातिथिः काण्वः ॥ १–४ अश्विनौ । ५–८ सविता । ९. १० अग्निः । ११ देव्यः ।
१२ इंद्राणीवरुणान्यग्नाय्यः । १३. १४ द्यावापृथिव्यौ । १५ पृथिवी । १६ विष्णुर्देवा वा ।
१७–२१ विष्णुः ॥ गायत्री ॥

॥२२॥ प्रातर्युजा वि बोधयाश्विनावेह गच्छतां । अस्य सोम-
स्य पीतये ॥१॥ या सुरथा रथीतमोभा देवा दिविस्पृशा । अश्वि-
ना ता हवामहे ॥२॥ या वां कशा मधुमत्यश्विना सूनृतावती । तया
यज्ञं मिमिक्षतं ॥३॥ नहि वामस्ति दूरके यत्रा रथेन गच्छथः ।
अश्विना सोमिनो गृहं ॥४॥ हिरण्यपाणिमूतये सवितारमुप
ह्वये । स चेत्ता देवता पदं ॥५॥४॥ अपां नपातमवसे सवितारमुप
स्तुहि । तस्य व्रतान्युश्मसि ॥६॥ विभक्तारं हवामहे वसोश्चित्रस्य
राधसः । सवितारं नृचक्षसं ॥७॥ सखाय आ नि षीदत सविता
स्तोम्यो नु नः । दाता राधांसि शुंभति ॥८॥ अग्ने पत्नीरिहा वह
देवानामुशतीरुप । त्वष्टारं सोमपीतये ॥९॥ आ ग्ना अग्न इहावसे
होत्रां यविष्ठ भारतीं । वरूत्रीं धिषणां वह ॥१०॥५॥ अभि नो
देवीरवसा महः शर्मणा नृपत्नीः । अच्छिन्नपत्राः सचंतां ॥११॥
इहेंद्राणीमुप ह्वये वरुणानीं स्वस्तये । अग्नायीं सोमपीतये ॥१२॥
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां । पिपृतां नो भरी-
मभिः ॥१३॥ तयोरिद्घृतवत्पयो विप्रा रिहंति धीतिभिः । गंधर्वस्य
ध्रुवे पदे ॥१४॥ स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः
शर्म सप्रथः ॥१५॥६॥ अतो देवा अवंतु नो यतो विष्णुर्वि-
चक्रमे । पृथिव्याः सप्त धामभिः ॥१६॥ इदं विष्णुर्वि चक्रमे त्रेधा
नि दधे पदं । समूळ्हमस्य पांसुरे ॥१७॥ त्रीणि पदा वि चक्रमे

विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥१८॥ विष्णोः
कर्माणि पश्यत यतो व्रतानि पस्पशे । इंद्रस्य युज्यः सखा ॥१९॥
तद्विष्णोः परमं पदं सदा पश्यंति सूरयः । दिवीव चक्षुरा-
ततं ॥२०॥ तद्विप्रासो विपन्यवो जागृवांसः समिंधते ।
विष्णोर्यत्परमं पदं ॥२१॥७॥

॥ २३ ॥ १–२४ मेधातिथिः काण्वः ॥ १ वायुः । २.३ इंद्रवायू । ४–६ मित्रावरुणौ । ७–९ इंद्रो मरुत्वान् । १०–१२ विश्वे देवाः । १३–१५ पूषा । १६–२३[1] आपः । २३[2]–२४ अग्निः ॥ १–१८ गायत्री । १९ पुरउष्णिक् । २० अनुष्टुप् । २१ प्रतिष्ठा । २२–२४ अनुष्टुप् ॥

॥२३॥ तीव्राः सोमास आ गह्याशीर्वंतः सुता इमे । वायो
तान्प्रस्थितान्पिब ॥१॥ उभा देवा दिविस्पृशेंद्रवायू हवामहे ।
अस्य सोमस्य पीतये ॥२॥ इंद्रवायू मनोजुवा विप्रा हवंत ऊतये ।
सहस्राक्षा धियस्पती ॥३॥ मित्रं वयं हवामहे वरुणं सोमपीतये ।
जज्ञाना पूतदक्षसा ॥४॥ ऋतेन यावृतावृधावृतस्य ज्योतिष-
स्पती । ता मित्रावरुणा हुवे ॥५॥८॥ वरुणः प्राविता भुवन्मित्रो
विश्वाभिरूतिभिः । करतां नः सुराधसः ॥६॥ मरुत्वंतं हवामह
इंद्रमा सोमपीतये । सजूर्गणेन तृंपतु ॥७॥ इंद्रज्येष्ठा मरुद्गणा
देवासः पूषरातयः । विश्वे मम श्रुता हवं ॥८॥ हत वृत्रं सुदानव
इंद्रेण सहसा युजा । मा नो दुःशंस ईशत ॥९॥ विश्वान्देवान्हवा-
महे मरुतः सोमपीतये । उग्रा हि पृश्निमातरः ॥१०॥९॥ जयतामिव
तन्यतुर्मरुतामेति धृष्णुया । यच्छुभं याथना नरः ॥११॥
हस्काराद्विद्युतस्पर्यतो जाता अवंतु नः । मरुतो मृळयंतु
नः ॥१२॥ आ पूषञ्चित्रबर्हिषमाघृणे धरुणं दिवः । आजा नष्टं
यथा पशुं ॥१३॥ पूषा राजानमाघृणिरपगूळ्हं गुहा हितं । अविं-
दच्चित्रबर्हिषं ॥१४॥ उतो स मह्यमिंदुभिः षड्युक्ताँ अनुसे-

षिंधत्। गोभिर्यवं न चर्कृषत् ॥१५॥१०॥ अंबयो यंत्यध्वभिर्जा-
मयो अध्वरीयतां। पृंचतीर्मधुना पयः ॥१६॥ अमूर्या उप सूर्ये
याभिर्वा सूर्यः सह। ता नो हिन्वंत्वध्वरं॥१७॥ अपो देवीरुप ह्वये
यत्र गावः पिबंति नः। सिंधुभ्यः कर्त्वं हविः ॥१८॥ अप्स्व१ंत-
रमृतमप्सु भेषजमपामुत प्रशस्तये। देवा भवत वाजिनः ॥१९॥
अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा। अग्निं च विश्वशं-
भुवमापश्च विश्वभेषजीः ॥२०॥११॥ आपः पृणीत भेषजं वरूथं
तन्वे३ मम। ज्योक् च सूर्यं दृशे ॥२१॥ इदमापः प्र वहत यत्किं च
दुरितं मयि। यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं ॥२२॥ आपो
अद्यान्वचारिषं रसेन समगस्महि। पयस्वानग्न आ गहि तं मा
सं सृज वर्चसा ॥२३॥ सं माग्ने वर्चसा सृज सं प्रजया समायुषा।
विद्युर्मे अस्य देवा इंद्रो विद्यात्सह ऋषिभिः ॥२४॥१२॥५॥

॥ २४ ॥ १–१५ शुनःशेप आजीगर्तिः (कृत्रिमो वैश्वामित्रो देवरातः) ॥ १ प्रजापतिः । २ अग्निः । ३–५ सविता भगो वा । ६–१५ वरुणः ॥ १. २. ६–१५ त्रिष्टुप् । ३–५ गायत्री ॥

॥२४॥ कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य
नाम। को नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं
च ॥१॥ अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य
नाम। स नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं
च ॥२॥ अभि त्वा देव सवितरीशानं वार्याणां। सदावन्भा-
गमीमहे ॥३॥ यश्चिद्धि त इत्था भगः शशमानः पुरा निदः।
अद्वेषो हस्तयोर्दधे ॥४॥ भगभक्तस्य ते वयमुदशेम तवा-
वसा। मूर्धानं राय आरभे ॥५॥१३॥ नहि ते क्षत्रं न
सहो न मन्युं वयश्चनामी पतयंत आपुः। नेमा आपो

अनिमिषं चरंतीर्न ये वातस्य प्रमिनंत्यभ्वं ॥६॥ अबुध्ने
राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः। नीचीनाः स्थुरु-
परि बुध्न एषामस्मे अंतर्निहिताः केतवः स्युः ॥७॥ उरुं
हि राजा वरुणश्चकार सूर्याय पंथामन्वेतवा उं। अपदे पादा
प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥८॥ शतं ते रा-
जन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु। बाधस्व दूरे
निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥९॥ अमी
य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चंद्रमा नक्तमे-
ति ॥१०॥१४॥ तत्त्वा यामि ब्रह्मणा वंदमानस्तदा शास्ते
यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशंस मा न
आयुः प्र मोषीः ॥११॥ तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो
हृद आ वि चष्टे। शुनःशेपो यमह्वद्गृभीतः सो अस्मान्राजा
वरुणो मुमोक्तु ॥१२॥ शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं
द्रुपदेषु बद्धः। अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो
वि मुमोक्तु पाशान् ॥१३॥ [अव ते हेळो वरुण नमो-
भिरव यज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेता
राजन्नेनांसि शिश्रथः कृतानि ॥]१४॥ उदुत्तमं वरुण पाश-
मस्मदवाधमं वि मध्यमं श्रथाय। अथा वयमादित्य व्रते
तवानागसो अदितये स्याम ॥१५॥१५॥

॥ २५ ॥ १-२१ शुनःशेप आजीगर्तिः ॥ वरुणः ॥ गायत्री ॥

॥२५॥ यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतं। मिनी-
मसि द्यविद्यवि ॥१॥ मा नो वधाय हत्नवे जिहीळानस्य

रीरधः। मा हृणानस्य मन्यवे॥२॥ वि मृळीकाय ते मनो
रथीरश्वं न संदितं। गीर्भिर्वरुण सीमहि॥३॥ परा हि
मे विमन्यवः पतंति वस्यइष्टये। वयो न वसतीरुप॥४॥
कदा क्षत्रश्रियं नरमा वरुणं करामहे। मृळीकायोरुचक्ष-
सं॥५॥१६॥ तदित्समानमाशाते वेनंता न प्र युच्छतः।
धृतव्रताय दाशुषे॥६॥ वेदा यो वीनां पदमंतरिक्षेण पत-
तां। वेद नावः समुद्रियः॥७॥ वेद मासो धृतव्रतो द्वादश
प्रजावतः। वेदा य उपजायते॥८॥ वेद वातस्य वर्तनिमु-
रोर्ऋष्वस्य बृहतः। वेदा ये अध्यासते॥९॥ नि षसाद
धृतव्रतो वरुणः पस्त्या३स्वा। साम्राज्याय सुक्रतुः॥१०॥१७॥
अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति। कृतानि या
च कर्त्वा॥११॥ स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत्।
प्र ण आयूंषि तारिषत्॥१२॥ बिभ्रद्द्रापिं हिरण्ययं वरुणो
वस्त निर्णिजं। परि स्पशो नि षेदिरे॥१३॥ न यं दिप्संति
दिप्सवो न द्रुह्वाणो जनानां। न देवमभिमातयः॥१४॥ उत
यो मानुषेष्वा यशश्चक्रे असाम्या। अस्माकमुदरेष्वा॥१५॥१८॥
परा मे यंति धीतयो गावो न गव्यूतीरनु। इच्छंतीरुरुच-
क्षसं॥१६॥ सं नु वोचावहै पुनर्यतो मे मध्वाभृतं। होतेव
क्षदसे प्रियं॥१७॥ दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि।
एता जुषत मे गिरः॥१८॥ इमं मे वरुण श्रुधी हवमद्या
च मृळय। त्वामवस्युरा चके॥१९॥ त्वं विश्वस्य मेधिर
दिवश्च ग्मश्च राजसि। स यामनि प्रति श्रुधि॥२०॥
उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत। अवाधमानि
जीवसे॥२१॥१९॥

॥ २६ ॥ १–१० शुनःशेप आजीगर्तिः ॥ अग्निः ॥ गायत्री ॥

॥२६॥ वसिष्वा हि मियेध्य वस्त्राण्यूर्जां पते। सेमं नो अध्वरं
यज॥१॥ नि नो होता वरेण्यः सदा यविष्ठ मन्मभिः। अग्ने दि-
वित्मता वचः॥२॥ आ हि ष्मा सूनवे पितापिर्यजत्यापये। सखा
सख्ये वरेण्यः॥३॥ आ नो बर्ही रिशादसो वरुणो मित्रो अर्य-
मा। सीदंतु मनुषो यथा॥४॥ पूर्व्य होतरस्य नो मंदस्व सख्यस्य
च। इमा उ षु श्रुधी गिरः॥५॥२०॥ यच्चिद्धि शश्वता तना देवंदेवं
यजामहे। त्वे इद्धूयते हविः॥६॥ प्रियो नो अस्तु विश्पतिर्होता
मंद्रो वरेण्यः। प्रियाः स्वग्नयो वयं॥७॥ स्वग्नयो हि वार्यं देवा-
सो दधिरे च नः। स्वग्नयो मनामहे॥८॥ अथा न उभयेषाममृत
मर्त्यानां। मिथः संतु प्रशस्तयः॥९॥ विश्वेभिरग्ने अग्निभिरिमं
यज्ञमिदं वचः। चनो धाः सहसो यहो॥१०॥२१॥

॥ २७ ॥ १–१३ शुनःशेप आजीगर्तिः ॥ १–१२ अग्निः । १३ विश्वे देवाः ॥
१–१२ गायत्री । १३ त्रिष्टुप् ॥

॥२७॥ अश्वं न त्वा वारवंतं वंदध्या अग्निं नमोभिः। सम्राजं-
तमध्वराणां॥१॥ स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः।
मीढ्वाँ अस्माकं बभूयात्॥२॥ स नो दूराच्चासाच्च नि मर्त्यादघा-
योः। पाहि सदमिद्विश्वायुः॥३॥ इममू षु त्वमस्माकं सनिं गा-
यत्रं नव्यांसं। अग्ने देवेषु प्र वोचः॥४॥ आ नो भज परमेष्वा
वाजेषु मध्यमेषु। शिक्षा वस्वो अंतमस्य॥५॥२२॥ विभक्तासि
चित्रभानो सिंधोरूर्मा उपाक आ। सद्यो दाशुषे क्षरसि॥६॥
यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः। स यंता शश्वती-
रिषः॥७॥ नकिरस्य सहंत्य पर्येता कयस्य चित्। वाजो अस्ति
श्रवाय्यः॥८॥ स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता। विप्रेभिर-

स्तु सनिता ॥९॥ जराबोध तद्विविड्ढि विशेविशे यज्ञियाय।
स्तोमं रुद्राय दृशीकं ॥१०॥२३॥ स नो महाँ अनिमानो धूम-
केतुः पुरुश्चंद्रः। धिये वाजाय हिन्वतु ॥११॥ स रेवाँ इव विश्प-
तिर्दैव्यः केतुः शृणोतु नः। उक्थैरग्निर्बृहद्भानुः ॥१२॥ नमो
महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः। यजाम
देवान्यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः ॥१३॥२४॥

॥ २८ ॥ १–९ शुनःशेप आजीगर्तिः ॥ १–४ इंद्रः। ५.६ उलूखलं। ७.८ उलूखलमुसलौ।
९ हरिश्चंद्र अधिषवणचर्म वा सोमो वा ॥ १–६ अनुष्टुप्। ७–९ गायत्री ॥

॥२८॥ यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे। उलूखल-
सुतानामवेद्विंद्र जल्गुलः ॥१॥ यत्र द्वाविव जघनाधिषवण्या
कृता। उलूखलसुतानामवेद्विंद्र जल्गुलः ॥२॥ यत्र नार्यपच्य-
वमुपच्यवं च शिक्षते। उलूखलसुतानामवेद्विंद्र जल्गुलः ॥३॥
यत्र मंथां विबध्नते रश्मीन्यमितवा इव। उलूखलसुताना-
मवेद्विंद्र जल्गुलः ॥४॥ यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे।
इह द्युमत्तमं वद जयतामिव दुंदुभिः ॥५॥२५॥ उत स्म ते वन-
स्पते वातो वि वात्यग्रमित्। अथो इंद्राय पातवे सुनु सोममुलू-
खल ॥६॥ आयजी वाजसातमा ता ह्युच्चा विजर्भृतः। हरी
इवांधांसि बप्सता ॥७॥ ता नो अद्य वनस्पती ऋष्वावृष्वेभिः
सोतृभिः। इंद्राय मधुमत्सुतं ॥८॥ उच्छिष्टं चम्वोर्भर सोमं
पवित्र आ सृज। नि धेहि गोरधि त्वचि ॥९॥२६॥

॥ २९ ॥ १–७ शुनःशेप आजीगर्तिः ॥ इंद्रः ॥ पंक्तिः ॥

॥२९॥ यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि।
आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥१॥

शिप्रिन्वाजानां पते शचीवस्तव दंसना । आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥२॥ नि ष्वापया मिथूदृशा सस्तामबुध्यमाने । आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥३॥ ससंतु त्या अरातयो बोधंतु शूर रातयः । आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥४॥ समिंद्र गर्दभं मृण नुवंतं पापयामुया । आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥५॥ पताति कुंडृणाच्या दूरं वातो वनादधि । आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥६॥ सर्वं परिक्रोशं जहि जंभया कृकदाश्वं । आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥७॥२७॥

॥३०॥ १–२२ शुनःशेप आजीगर्तिः ॥ १–१६ इंद्रः । १७–१९ अश्विनौ । २०–२२ उषाः ॥
१–१०. १२–१५. १७–२२ गायत्री । ११ पादनिचृद्गायत्री । १६ त्रिष्टुप् ॥

॥३०॥ आ व इंद्रं क्रिविं यथा वाजयंतः शतक्रतुं । मंहिष्ठं सिंच इंदुभिः ॥१॥ शतं वा यः शुचीनां सहस्रं वा समाशिरां । एदु निम्नं न रीयते ॥२॥ सं यन्मदाय शुष्मिण एना ह्यस्योदरे । समुद्रो न व्यचो दधे ॥३॥ अयमु ते समतसि कपोत इव गर्भधिं । वचस्तच्चिन्न ओहसे ॥४॥ स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते । विभूतिरस्तु सूनृता ॥५॥२८॥ ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो । समन्येषु ब्रवावहै ॥६॥ योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इंद्रमूतये ॥७॥ आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः । वाजेभिरुप नो हवं ॥८॥ अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरं । यं ते पूर्वं पिता हुवे ॥९॥ तं त्वा वयं विश्ववारा शास्महे पुरुहूत । सखे वसो जरि-

तृभ्यः ॥ १० ॥ २९ ॥ अस्माकं शिप्रिणीनां सोमपाः सोम-
पाव्नां । सखे वज्रिन्त्सखीनां ॥ ११ ॥ तथा तदस्तु सोमपाः
सखे वज्रिन्तथा कृणु । यथा त उश्मसीष्टये ॥ १२ ॥ रेवतीर्नः
सधमाद इंद्रे संतु तुविवाजाः । क्षुमंतो याभिर्मदेम ॥ १३ ॥
आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः । ऋणोरक्षं
न चक्र्योः ॥ १४ ॥ आ यद्दुवः शतक्रतवा कामं जरितॄणां ।
ऋणोरक्षं न शचीभिः ॥ १५ ॥ ३० ॥ शश्वदिंद्रः पोप्रुथद्भिर्जि-
गाय नानदद्भिः शाश्वसद्भिर्धनानि । स नो हिरण्यरथं दंस-
नावान्त्स नः सनिता सनये स नोऽदात् ॥ १६ ॥ आश्विना-
वश्वावत्येषा यातं शवीरया । गोमद्दस्रा हिरण्यवत् ॥ १७ ॥
समानयोजनो हि वां रथो दस्रावमर्त्यः । समुद्रे अश्विने-
यते ॥ १८ ॥ न्य१घ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः । परि
द्यामन्यदीयते ॥ १९ ॥ कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये ।
कं नक्षसे विभावरि ॥ २० ॥ वयं हि ते अमन्मह्यांतादा
पराकात् । अश्वे न चित्रे अरुषि ॥ २१ ॥ त्वं त्येभिरा गहि
वाजेभिर्दुहितर्दिवः । अस्मे रयिं नि धारय ॥ २२ ॥ ३१ ॥ ६ ॥

॥ ३१ ॥ १–१८ हिरण्यस्तूप आंगिरसः ॥ अग्निः ॥ १–७. ९–१५. १७ जगती । ८. १६. १८ त्रिष्टुप् ॥

॥ ३१ ॥ त्वमग्ने प्रथमो अंगिरा ऋषिर्देवो देवानामभवः
शिवः सखा । तव व्रते कवयो विद्मनापसोऽजायंत मरुतो
भ्राजदृष्टयः ॥ १ ॥ त्वमग्ने प्रथमो अंगिरस्तमः कविर्देवा-
नां परि भूषसि व्रतं । विभुर्विश्वस्मै भुवनाय मेधिरो
द्विमाता शयुः कतिधा चिदायवे ॥ २ ॥ त्वमग्ने प्रथमो मा-
तरिश्वन आविर्भव सुक्रतूया विवस्वते । अरेजेतां रोदसी

होतृवूर्येऽसंघ्नोर्भारमयजो महो वसो ॥ ३ ॥ त्वमग्ने मनवे
द्यामवाशयः पुरूरवसे सुकृते सुकृत्तरः । श्वात्रेण यत्पि-
त्रोर्मुच्यसे पर्या त्वा पूर्वमनयन्नापरं पुनः ॥ ४ ॥ त्वमग्ने
वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः । य आहु-
तिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवास-
सि ॥ ५ ॥ ३२ ॥ त्वमग्ने वृजिनवर्तनिं नरं सक्मन्पिपर्षि
विदथे विचर्षणे । यः शूरसाता परितक्म्ये धने दभ्रे-
भिश्चित्समृता हंसि भूयसः ॥ ६ ॥ त्वं तमग्ने अमृतत्व उत्तमे
मर्तं दधासि श्रवसे दिवेदिवे । यस्तातृषाण उभयाय जन्मने
मयः कृणोषि प्रय आ च सूरये ॥ ७ ॥ त्वं नो अग्ने सनये
धनानां यशसं कारुं कृणुहि स्तवानः । ऋध्याम कर्मापसा
नवेन देवैर्द्यावापृथिवी प्रावतं नः ॥ ८ ॥ त्वं नो अग्ने पित्रो-
रुपस्थ आ देवो देवेष्वनवद्य जागृविः । तनूकृद्बोधि प्रमतिश्च
कारवे त्वं कल्याण वसु विश्वमोपिषे ॥ ९ ॥ त्वमग्ने प्रम-
तिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयं । सं त्वा रायः
शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य ॥ १० ॥ ३३ ॥
त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिं ।
इळामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जा-
यते ॥ ११ ॥ त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च
वंद्य । त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाण-
स्तव व्रते ॥ १२ ॥ त्वमग्ने यज्यवे पायुरंतरोऽनिषंगाय चतु-
रक्ष इध्यसे । यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मंत्रं
मनसा वनोषि तं ॥ १३ ॥ त्वमग्न उरुशंसाय वाघते
स्पार्हं यद्रेक्णः परमं वनोषि तत् । आध्रस्य चित्प्रमति-

रुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः ॥ १४ ॥ त्वमग्ने
प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः । स्वा-
दुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोपमा दि-
वः ॥ १५ ॥ ३४ ॥ इमामग्ने शरणिं मीमृषो न इममध्वानं
यमगाम दूरात् । आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृ-
षिकृन्मर्त्यानां ॥ १६ ॥ मनुष्वदग्ने अंगिरस्वदंगिरो ययाति-
वत्सदने पूर्ववच्छुचे । अच्छ याह्या वहा दैव्यं जनमा सादय
बर्हिषि यक्षि च प्रियं ॥ १७ ॥ एतेनाग्ने ब्रह्मणा वावृधस्व
शक्ती वा यत्ते चकृमा विदा वा । उत प्र णेष्यभि वस्यो
अस्मान्त्सं नः सृज सुमत्या वाजवत्या ॥ १८ ॥ ३५ ॥

॥ ३२ ॥ १—१५ हिरण्यस्तूप आंगिरसः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ३२ ॥ इंद्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि
वज्री । अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वता-
नां ॥ १ ॥ अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं
ततक्ष । वाश्रा इव धेनवः स्यंदमाना अंजः समुद्रमव जग्मु-
रापः ॥ २ ॥ वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सु-
तस्य । आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजाम-
हीनां ॥ ३ ॥ यदिंद्राहन्प्रथमजामहीनामान्मायिनाममिनाः
प्रोत मायाः । आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं
न किला विवित्से ॥ ४ ॥ अहन्वृत्रं वृत्रतरं व्यंसमिंद्रो
वज्रेण महता वधेन । स्कंधांसीव कुलिशेना विवृक्णा-
हिः शयत उपपृक्पृथिव्याः ॥ ५ ॥ ३६ ॥ अयोद्धेव दुर्मद
आ हि जुह्वे महावीरं तुविबाधमृजीषं । नातारीद-

स्य सम्‌तिं वधानां सं रुजानाः पिपिष इंद्रशत्रुः ॥ ६ ॥ अपादहस्तो अपृतन्यदिंद्रमास्य वज्रमधि सानौ जघान । वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥ ७ ॥ नदं न भिन्नममुया शयानं मनो रुहाणा अति यंत्यापः । याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतःशीर्बभूव ॥ ८ ॥ नीचावया अभवद्वृत्रपुत्रेंद्रो अस्या अव वधर्जभार । उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः ॥ ९ ॥ अतिष्ठंतीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरं । वृत्रस्य निण्यं वि चरंत्यापो दीर्घं तम आशयदिंद्रशत्रुः ॥ १० ॥ ३७ ॥ दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः । अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥ ११ ॥ अश्व्यो वारो अभवस्तदिंद्र सृके यत्त्वा प्रत्यहन्देव एकः । अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिंधून् ॥ १२ ॥ नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च । इंद्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये ॥ १३ ॥ अहेर्यातारं कमपश्य इंद्र हृदि यत्ते जघ्नुषो भीरगच्छत् । नव च यन्नवतिं च स्रवंतीः श्येनो न भीतो अतरो रजांसि ॥ १४ ॥ इंद्रो यातोऽवसितस्य राजा शमस्य च शृंगिणो वज्रबाहुः । सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥ १५ ॥ ३८ ॥ २ ॥

॥ ३३ ॥ १–१५ हिरण्यस्तूप आंगिरसः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ३३ ॥ एतायामोप गव्यंत इंद्रमस्माकं सु प्रमतिं वावृधाति । अनामृणः कुविदादस्य रायो गवां केतं परमा-

वर्जते नः ॥१॥ उपेदहं धनदामप्रतीतं जुष्टां न श्येनो
वसतिं पतामि । इंद्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो
हव्यो अस्ति यामन् ॥२॥ नि सर्वसेन इषुधीँरसक्त
समर्यो गा अजति यस्य वष्टि । चोष्कूयमाण इंद्र भूरि
वामं मा पणिर्भूरस्मदधि प्रवृद्ध ॥३॥ वधीर्हि दस्युं
धनिनं घनेनँ एकश्चरन्नुपशाकेभिरिंद्र । धनोरधि विषु-
णक्ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः ॥४॥ परा
चिच्छीर्षा ववृजुस्त इंद्रायज्वानो यज्वभिः स्पर्धमानाः ।
प्र यद्दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोद-
स्योः ॥५॥१॥ अयुयुत्सन्ननवद्यस्य सेनामयातयंत क्षितयो
नवग्वाः । वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिं-
द्राच्चितयंत आयन् ॥६॥ त्वमेतान्रुदतो जक्षतश्चायोधयो
रजस इंद्र पारे । अवादहो दिव आ दस्युमुच्चा प्र सुन्वतः
स्तुवतः शंसमावः ॥७॥ चक्राणासः परीणहं पृथिव्या
हिरण्येन मणिना शुंभमानाः । न हिन्वानासस्तितिरुस्त इंद्रं
परि स्पशो अदधात्सूर्येण ॥८॥ परि यदिंद्र रोदसी उभे
अबुभोजीर्महिना विश्वतः सीं । अमन्यमानाँ अभि मन्य-
मानैर्निर्ब्रह्मभिरधमो दस्युमिंद्र ॥९॥ न ये दिवः पृथिव्या
अंतमापुर्न मायाभिर्धनदां पर्यभूवन् । युजं वज्रं वृषभश्चक्र
इंद्रो निर्ज्योतिषा तमसो गा अदुक्षत् ॥१०॥२॥ अनु
स्वधामक्षरन्नापो अस्यावर्धत मध्य आ नाव्यानां । सध्रीची-
नेन मनसा तमिंद्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ॥११॥
न्याविध्यदिलीबिशस्य दृळ्हा वि शृंगिणमभिनच्छुष्ण-
मिंद्रः । यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः

पृतन्युं ॥१२॥ अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन
वृषभेणा पुरोऽभेत् । सं वज्रेणासृजद्वृत्रमिंद्रः प्र स्वां मति-
मतिरच्छाशदानः ॥१३॥ आवः कुत्समिंद्र यस्मिंचाकन्प्रा-
वो युध्यंतं वृषभं दशद्युं । शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो
नृषाह्याय तस्थौ ॥१४॥ आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे
मघवञ्छ्वित्र्यं गां । ज्योक् चिदत्र तस्थिवांसो अक्रञ्छत्रू-
यतामधरा वेदनाकः ॥१५॥३॥

॥ ३४ ॥ १–१२ हिरण्यस्तूप आंगिरसः ॥ अश्विनौ ॥ १–८. १०. ११ जगती । ९. १२ त्रिष्टुप् ॥

॥३४॥ त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत
रातिरश्विना । युवोर्हि यंत्रं हिम्येव वाससोऽभ्यायंसेन्या
भवतं मनीषिभिः ॥१॥ त्रयः पवयो मधुवाहने रथे सोमस्य
वेनामनु विश्व इद्विदुः । त्रयः स्कंभासः स्कभितास आरभे
त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा ॥२॥ समाने अहन्त्रिरवद्य-
गोहना त्रिरद्य यज्ञं मधुना मिमिक्षतं । त्रिर्वाजवती-
रिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतं ॥३॥
त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतं ।
त्रिर्नान्द्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्व-
तं ॥४॥ त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताता त्रिरुता-
वतं धियः । त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे
दुहिता रुहद्रथं ॥५॥ त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः
पार्थिवानि त्रिरु दत्तमद्भ्यः । ओमानं शंयोर्ममकाय सूनवे
त्रिधातु शर्म वहतं शुभस्पती ॥६॥४॥ त्रिर्नो अश्विना
यजता दिवेदिवे परि त्रिधातु पृथिवीमशायतं । तिस्रो

नासत्या रथ्या परावतं आत्मेव वातः स्वसराणि गच्छतं ॥७॥ त्रिरश्विना सिंधुभिः सप्तमातृभिस्त्रय आहावास्त्रेधा हविष्कृतं । तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितं ॥८॥ क्व१त्री चक्रा त्रिवृतो रथस्य क्व१त्रयो वंधुरो ये सनीळाः । कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः ॥९॥ आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः । युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवंतमिष्यति ॥१०॥ आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना । प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥११॥ आ नो अश्विना त्रिवृता रथेनार्वाचं रयिं वहतं सुवीरं । शृण्वंता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥१२॥५॥

॥ ३५ ॥ १–११ हिरण्यस्तूप आंगिरसः ॥ १ अग्निर्मित्रावरुणौ रात्री सविता ।
२–११ सविता ॥ १. ९ जगती । २–८. १०. ११ त्रिष्टुप् ॥

॥३५॥ ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे । ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये ॥१॥ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥२॥ याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्यां । आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥३॥ अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहंतं । आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः ॥४॥ वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहंतः । शश्व-

द्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ॥५॥ तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट्। आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ॥६॥६॥ [वि सुपर्णो अंतरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः। क्वे३दानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥७॥ अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिंधून्। हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥८॥ हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अंतरीयते। अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥९॥ हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ्। अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥१०॥ ये ते पंथाः सवितः पूर्व्यासोऽरेणवः सुकृता अंतरिक्षे। तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥११॥७॥७॥

॥ ३६ ॥ १–२० कण्वो घौरः ॥ १–१२. १५–२० अग्निः। १३. १४ यूपः ॥ प्रागाथं बार्हतं ॥

॥३६॥ प्र वो यह्वं पुरूणां विशां देवयतीनां। अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईळते ॥१॥ जनासो अग्निं दधिरे सहोवृधं हविष्मंतो विधेम ते। स त्वं नो अद्य सुमना इहाविता भवा वाजेषु संत्य ॥२॥ प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसं। महस्ते सतो वि चरंत्यर्चयो दिवि स्पृशंति भानवः ॥३॥ देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिंधते। विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥४॥ मंद्रो होता गृहपतिरग्ने दूतो विशामसि। त्वे

विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥५॥८॥ त्वे
इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः। स त्वं नो अद्य
सुमना उतापरं यक्षि देवान्त्सुवीर्या ॥ ६ ॥ तं घेमित्था
नमस्विन उप स्वराजमासते। होत्राभिरग्निं मनुषः समिं-
धते तितिर्वांसो अति स्रिधः ॥ ७ ॥ घ्नंतो वृत्रमतरन्रोदसी
अप उरु क्षयाय चक्रिरे। भुवत्कण्वे वृषा द्युम्न्याहुतः क्रंद-
दश्वो गविष्टिषु ॥ ८ ॥ सं सीदस्व महाँ असि शोचस्व
देववीतमः। वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्श-
तं ॥ ९ ॥ यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन। यं
कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥ १० ॥ ९ ॥
यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि। तस्य प्रेषो
दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ॥ ११ ॥ रायस्पूर्धि
स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यं। त्वं वाजस्य श्रुत्यस्य
राजसि स नो मृळ महाँ असि ॥ १२ ॥ ऊर्ध्व ऊ षु णः ऊतये
तिष्ठा देवो न सविता। ऊर्ध्वो वाजस्य सनिता यदंजि-
भिर्वाघद्भिर्विह्वयामहे ॥ १३ ॥ ऊर्ध्वो नः पाह्यंहसो नि
केतुना विश्वं समत्रिणं दह। कृधी न ऊर्ध्वाञ्चरथाय जीवसे
विदा देवेषु नो दुवः ॥ १४ ॥ पाहि नो अग्ने रक्षसः पाहि
धूर्तेरराव्णः। पाहि रीषत उत वा जिघांसतो बृहद्भानो
यविष्ठ्य ॥ १५ ॥ १० ॥ घनेव विष्वग्वि जह्यराव्णस्तपुर्जंभ
यो अस्मध्रुक्। यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः
स रिपुरीशत ॥ १६ ॥ अग्निर्वव्ने सुवीर्यमग्निः कण्वाय
सौभगं•। अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः सा-
ता उपस्तुतं ॥ १७ ॥ अग्निना तुर्वशं यदुं परावत

उ॒ग्रादे॒वं ह॑वामहे। अ॒ग्निर्न॑य॒न्नव॑वास्त्वं बृ॒हद्र॑थं तु॒र्वीतिं॒ दस्य॑वे
सहः॑ ॥१८॥ नि त्वाम॑ग्ने॒ मनु॑र्दधे॒ ज्योति॒र्जना॑य॒ शश्व॑ते। दीदे॑थ॒
कण्व॑ ऋ॒तजा॑त उक्षि॒तो यं न॑म॒स्यंति॑ कृ॒ष्टयः॑ ॥१९॥ त्वे॒षासो॑
अ॒ग्नेरम॑वंतो अ॒र्चयो॑ भी॒मासो॒ न प्रती॑तये। र॒क्ष॒स्विनः॒ सद॒-
मिद्या॑तु॒माव॑तो॒ विश्वं॒ सम॒त्रिणं॑ दह ॥२०॥११॥

॥ ३७ ॥ १–१५ कण्वो घौरः ॥ मरुतः ॥ गायत्री ॥

॥३७॥ क्री॒ळं वः॒ शर्धो॒ मारु॑तमन॒र्वाणं॑ रथे॒शुभं॑। कण्वा॑
अ॒भि प्र गा॑यत ॥१॥ ये पृष॑तीभिर्ऋ॒ष्टिभिः॑ सा॒कं वाशी॑भिर॒-
ञ्जिभिः॑। अजा॑यंत॒ स्वभा॑नवः ॥२॥ इ॒हेव॑ शृण्व एषां॒ कशा॒
हस्ते॑षु॒ यद्वदा॑न्। नि याम॑ञ्चि॒त्रमृं॑जते ॥३॥ प्र वः॒ शर्धा॑य॒ घृष्व॑ये
त्वे॒षद्यु॑म्नाय शु॒ष्मिणे॑। दे॒वत्तं॒ ब्रह्म॑ गायत ॥४॥ प्र शं॑सा॒ गोष्वघ्न्यं॑
क्री॒ळं यच्छर्धो॒ मारु॑तं। जंभे॒ रस॑स्य वावृधे ॥५॥१२॥ को वो॒
वर्षि॑ष्ठ॒ आ न॑रो दि॒वश्च॒ ग्मश्च॑ धूतयः। यत्सी॒मंतं॒ न धू॑नु॒थ ॥६॥
नि वो॒ यामा॑य॒ मानु॑षो द॒ध्र उ॒ग्राय॑ म॒न्यवे॑। जिही॑त॒ पर्व॑तो
गि॒रिः ॥७॥ येषा॒मज्मे॑षु पृथि॒वी जु॑जु॒र्वाँ इ॑व वि॒श्पतिः॑। भि॒या
यामे॑षु॒ रेज॑ते ॥८॥ स्थि॒रं हि जान॑मेषां॒ वयो॑ मा॒तुर्निरे॑तवे।
यत्सी॒मनु॑ द्वि॒ता शवः॑ ॥९॥ उदु॒ त्ये सू॒नवो॒ गिरः॒ काष्ठा॒
अज्मे॑ष्वत्नत। वा॒श्रा अ॑भि॒ज्ञु यात॑वे ॥१०॥१३॥ त्यं चि॑द्घा
दी॒र्घं पृ॒थुं मि॒हो नपा॑त॒ममृ॑ध्रं। प्र च्या॑वयंति॒ याम॑भिः ॥११॥
मरु॑तो॒ यद्ध॑ वो॒ बलं॒ जनाँ॑ अचुच्यवीतन। गि॒रीँर॑चुच्य-
वीतन ॥१२॥ यद्ध॒ यांति॑ म॒रुतः॒ सं ह॑ ब्रुव॒तेऽध्व॒न्ना।
शृ॒णोति॒ कश्चि॑देषां ॥१३॥ प्र या॑त॒ शीभ॑मा॒शुभिः॒ संति॒
कण्वे॑षु वो॒ दुवः॑। तत्रो॒ षु मा॑दयाध्वै ॥१४॥ अस्ति॒ हि ष्मा॒

मदाय वः स्मसि ष्मा वयमेषां । विश्वं चिदायुर्जीवसे ॥ १५ ॥ १४ ॥

॥ ३८ ॥ १—१५ कण्वो घौरः ॥ मरुतः ॥ गायत्री ॥

॥३८॥ कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः । दधिध्वे वृक्तबर्हिषः ॥१॥ क्व नूनं कद्वो अर्थं गंता दिवो न पृथिव्याः । क्व वो गावो न रण्यंति ॥२॥ क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता । क्वो३ विश्वानि सौभगा ॥३॥ यद्यूयं पृश्निमातरो मर्तासः स्यातन । स्तोता वो अमृतः स्यात् ॥४॥ मा वो मृगो न यवसे जरिता भूदजोष्यः । पथा यमस्य गादुप ॥५॥१५॥ मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत् । पदीष्ट तृष्णया सह ॥६॥ सत्यं त्वेषा अमवंतो धन्वञ्चिदा रुद्रियासः । मिहं कृण्वंत्यवातां ॥७॥ वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि ॥८॥ दिवा चित्तमः कृण्वंति पर्जन्येनोदवाहेन । यत्पृथिवीं व्युंदंति ॥९॥ अध स्वनान्मरुतां विश्वमा सद्म पार्थिवं । अरेजंत प्र मानुषाः ॥१०॥१६॥ मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु । यातेमखिद्रयामभिः ॥११॥ स्थिरा वः संतु नेमयो रथा अश्वास एषां । सुसंस्कृता अभीशवः ॥१२॥ अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिं । अग्निं मित्रं न दर्शतं ॥१३॥ मिमीहि श्लोकमास्ये पर्जन्य इव ततनः । गाय गायत्रमुक्थ्यं ॥१४॥ वंदस्व मारुतं गणं त्वेषं पनस्युमर्किणं । अस्मे वृद्धा असन्निह ॥१५॥१७॥

॥ ३९ ॥ १—१० कण्वो घौरः ॥ मरुतः ॥ प्रागाथं बार्हतं ॥

॥३९॥ प्र यदित्था परावतः शोचिर्न मानमस्यथ । कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः ॥१॥ स्थिरा वः

संत्वायुधा पराणुदे वीळू उत प्रतिष्कभे। युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥२॥ परा ह यत्स्थिरं हथ नरो वर्तयथा गुरु। वि याथन वनिनः पृथिव्या व्याशाः पर्वतानां ॥३॥ नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः। युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे ॥४॥ प्र वेपयंति पर्वतान्वि विंचंति वनस्पतीन्। प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ॥५॥१८॥ उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः। आ वो यामाय पृथिवी चिदश्रोदबीभयंत मानुषाः ॥६॥ आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे। गंता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥७॥ युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते। वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ॥८॥ असामि हि प्रयज्यवः कण्वं दद प्रचेतसः। असामिभिर्मरुत आ न ऊतिभिर्गंता वृष्टिं न विद्युतः ॥९॥ असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः। ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषं ॥१०॥१९॥

॥ ४० ॥ १–८ कण्वो घौरः ॥ ब्रह्मणस्पतिः ॥ प्रागाथं बार्हतं ॥

॥४०॥ उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वेमहे। उप प्र यंतु मरुतः सुदानव इंद्र प्राशूर्भवा सचा ॥१॥ त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते। सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ॥२॥ प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता। अच्छा वीरं नर्यं पंक्तिराधसं देवा यज्ञं नयंतु नः ॥३॥ यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः।

तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसं ॥४॥ प्र नूनं
ब्रह्मणस्पतिर्मंत्रं वदत्युक्थ्यं। यस्मिन्निंद्रो वरुणो मित्रो अर्यमा
देवा ओकांसि चक्रिरे ॥५॥२०॥ तमिद्वोचेमा विदथेषु शंभुवं
मंत्रं देवा अनेहसं। इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा
वो अश्नवत् ॥६॥ को देवयंतमश्नवज्जनं को वृक्तबर्हिषं। प्रप्र
दाश्वान्पस्त्याभिरस्थितांतर्वावत्क्षयं दधे ॥७॥ उप क्षत्रं पृंचीत
हंति राजभिर्भये चित्सुक्षितिं दधे। नास्य वर्ता न तरुता महा-
धने नार्भे अस्ति वज्रिणः ॥८॥२१॥

॥४१॥ १–९ कण्वो घौरः ॥ १–३. ७–९ वरुणमित्रार्यमणः। ४–६ आदित्याः ॥ गायत्री ॥

॥४१॥ यं रक्षंति प्रचेतसो वरुणो मित्रो अर्यमा। नू चित्स
दभ्यते जनः ॥१॥ यं बाहुतेव पिप्रति पांति मर्त्यं रिषः। अरिष्टः
सर्व एधते ॥२॥ वि दुर्गा वि द्विषः पुरो घ्नंति राजान एषां।
नयंति दुरिता तिरः ॥३॥ सुगः पंथा अनृक्षर आदित्यास ऋतं
यते। नात्रावखादो अस्ति वः ॥४॥ यं यज्ञं नयथा नर आदित्या
ऋजुना पथा। प्र वः स धीतये नशत् ॥५॥२२॥ स रत्नं मर्त्यो
वसु विश्वं तोकमुत त्मना। अच्छा गच्छत्यस्तृतः ॥६॥ कथा रा-
धाम सखायः स्तोमं मित्रस्यार्यम्णः। महि प्सरो वरुणस्य ॥७॥
मा वो घ्नंतं मा शपंतं प्रति वोचे देवयंतं। सुम्नैरिद्व आ वि-
वासे ॥८॥ चतुरश्चिद्ददमानाद्बिभीयादा निधातोः। न दुरुक्ताय
स्पृहयेत् ॥९॥२३॥

॥४२॥ १–१० कण्वो घौरः ॥ पूषा ॥ गायत्री ॥

॥४२॥ सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात्।
सक्ष्वा देव प्र णस्पुरः ॥१॥ यो नः पूषन्नघो वृको दुःशेव

आदिदेशति। अप स्म तं पथो जहि ॥२॥ अप त्यं परिपंथिनं मुषीवाणं हुरश्चितं। दूरमधि सुतेरज ॥३॥ त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित्। पदाभि तिष्ठ तपुषिं ॥४॥ आ तत्ते दस्र मंतुमः पूषन्नवो वृणीमहे। येन पितॄनचोदयः ॥५॥२४॥ अधा नो विश्वसौभग हिरण्यवाशीमत्तम। धनानि सुषणा कृधि ॥६॥ अति नः सश्चतो नय सुगा नः सुपथा कृणु। पूषन्निह क्रतुं विदः ॥७॥ अभि सूयवसं नय न नवज्वारो अध्वने। पूषन्निह क्रतुं विदः ॥८॥ शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरं। पूषन्निह क्रतुं विदः ॥९॥ न पूषणं मेथामसि सूक्तैरभि गृणीमसि। वसूनि दस्ममीमहे ॥१०॥२५॥

॥४३॥ १—९ कण्वो घौरः ॥ १. २. ४—६ रुद्रः। ३ मित्रावरुणौ। ७—९ सोमः ॥ १—८ गायत्री। ९ अनुष्टुप् ॥

॥४३॥ कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे। वोचेम शंतमं हृदे ॥१॥ यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे। यथा तोकाय रुद्रियं ॥२॥ यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति। यथा विश्वे सजोषसः ॥३॥ गाथपतिं मेधपतिं रुद्रं जलाषभेषजं। तच्छंयोः सुम्नमीमहे ॥४॥ यः शुक्र इव सूर्यो हिरण्यमिव रोचते। श्रेष्ठो देवानां वसुः ॥५॥२६॥ शं नः करत्यर्वते सुगं मेषाय मेष्ये। नृभ्यो नारिभ्यो गवे ॥६॥ अस्मे सोम श्रियमधि नि धेहि शतस्य नृणां। महि श्रवस्तुविनृम्णं ॥७॥ मा नः सोमपरिबाधो मारातयो जुहुरंत। आ न इंदो वाजे भज ॥८॥ यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य। मूर्धा नाभा सोम वेन आभूषंतीः सोम वेदः ॥९॥२७॥८॥

॥ ४४ ॥ १–१४ प्रस्कण्वः काण्वः ॥ १. २ अग्निरश्विनावुषाः । ३–१४ अग्निः ॥
प्रागाथं बार्हतं ॥

॥४४॥ अग्ने॒ विव॑स्वदु॒षस॑श्चि॒त्रं राधो॑ अमर्त्य । आ दा॒शुषे॑ जातवेदो वहा॒ त्वम॒द्या दे॒वाँ उ॑ष॒र्बुधः॑ ॥१॥ जुष्टो॒ हि दू॒तो असि॑ हव्य॒वाह॒नोऽग्ने॑ र॒थीर॑ध्व॒राणा॑म् । स॒जूर॒श्विभ्या॑मु॒षसा॑ सु॒वीर्य॑म॒स्मे धे॑हि॒ श्रवो॑ बृ॒हत् ॥२॥ अ॒द्या दू॒तं वृ॑णीमहे॒ वसु॑म॒ग्निं पु॑रुप्रि॒यं । धू॒मके॑तुं॒ भाऋ॑जीकं॒ व्यु॑ष्टिषु य॒ज्ञाना॑मध्व॒रश्रिय॑म् ॥३॥ श्रेष्ठं॒ यवि॑ष्ठ॒मति॑थिं॒ स्वा॑हुतं॒ जुष्टं॒ जना॑य दा॒शुषे॑ । दे॒वाँ अच्छा॒ यात॑वे जा॒तवे॑दसम॒ग्निमी॑ळे॒ व्यु॑ष्टिषु ॥४॥ स्त॒वि॒ष्यामि॒ त्वाम॒हं विश्व॑स्यामृत भोजन । अग्ने॑ त्रा॒तार॑म॒मृतं॑ मियेध्य॒ यजि॑ष्ठं हव्यवाहन ॥५॥२८॥ सु॒शंसो॑ बोधि गृण॒ते य॑विष्ठ्य॒ मधु॑जिह्वः॒ स्वा॑हुतः । प्रस्क॑ण्वस्य प्रति॒रन्नायु॑र्जी॒वसे॑ नम॒स्या दैव्यं॒ जन॑म् ॥६॥ होता॑रं वि॒श्ववे॑दसं॒ सं हि त्वा॒ विश॑ इ॒न्धते॑ । स आ व॑ह पुरुहूत॒ प्रचे॑तसोऽग्ने॑ दे॒वाँ इ॒ह द्र॒वत् ॥७॥ स॒वि॒तार॑मु॒षस॑म॒श्विना॒ भग॑म॒ग्निं व्यु॑ष्टिषु॒ क्षपः॑ । कण्वा॑सस्त्वा सु॒तसो॑मास इन्धते हव्य॒वाहं॑ स्वध्वर ॥८॥ पति॒र्ह्य॑ध्व॒राणा॒मग्ने॑ दू॒तो वि॒शामसि॑ । उ॒ष॒र्बुध॒ आ व॑ह॒ सोम॑पीतये दे॒वाँ अ॒द्य स्व॒र्दृशः॑ ॥९॥ अग्ने॒ पूर्वा॒ अनू॒षसो॑ विभावसो दी॒देथ॑ वि॒श्वद॑र्शतः । असि॒ ग्रामे॑ष्ववि॒ता पु॒रोहि॒तोऽसि॑ य॒ज्ञेषु॒ मानु॑षः ॥१०॥२९॥ नि त्वा॑ य॒ज्ञस्य॒ साध॑नमग्ने॒ होता॑रमृ॒त्विज॑म् । म॒नु॒ष्वद्दे॑व धीमहि॒ प्रचे॑तसं जी॒रं दू॒तमम॑र्त्यम् ॥११॥ यद्दे॒वानां॑ मित्रमहः पु॒रोहि॒तोऽन्त॑रो॒ यासि॑ दू॒त्य॑म् । सिन्धो॑रिव॒ प्रस्व॑नितास ऊ॒र्मयो॒ऽग्नेर्भ्राज॑न्ते अ॒र्चयः॑ ॥१२॥ श्रु॒धि श्रु॑त्कर्ण॒ वह्नि॑भिर्दे॒वैर॑ग्ने स॒याव॑भिः । आ सी॑दन्तु ब॒र्हिषि॑ मि॒त्रो अ॑र्य॒मा प्रा॑त॒र्यावा॑णो अध्व॒रम् ॥१३॥ शृ॒ण्वन्तु॒ स्तोमं॑

मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः। पिबंतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः ॥१४॥३०॥

॥ ४५ ॥ १–१० प्रस्कण्वः काण्वः ॥ १–१०[1] अग्निः । १०[2] देवाः ॥ अनुष्टुप् ॥

॥४५॥ त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत। यजा स्वध्वरं जनं मनुजातं घृतप्रुषं ॥१॥ श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः। तान्रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह ॥२॥ प्रियमेधवदत्रिवज्जातवेदो विरूपवत्। अंगिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवं ॥३॥ महिकेरव ऊतये प्रियमेधा अहूषत। राजंतमध्वराणामग्निं शुक्रेण शोचिषा ॥४॥ घृताहवन संत्येमा उ षु श्रुधी गिरः। याभिः कण्वस्य सूनवो हवंतेऽवसे त्वा ॥५॥३१॥ त्वां चित्रश्रवस्तम हवंते विक्षु जंतवः। शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥६॥ नि त्वा होतारमृत्विजं दधिरे वसुवित्तमं। श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥७॥ आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः। बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ॥८॥ प्रातर्यावः सहस्कृत सोमपेयाय संत्य। इहाद्य दैव्यं जनं बर्हिरा सादया वसो ॥९॥ अर्वांचं दैव्यं जनमग्ने यक्ष्व सहूतिभिः। अयं सोमः सुदानवस्तं पात तिरोअह्न्यं ॥१०॥३२॥

॥ ४६ ॥ १–१५ प्रस्कण्वः काण्वः ॥ अश्विनौ ॥ गायत्री ॥

॥४६॥ एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः। स्तुषे वामश्विना बृहत् ॥१॥ या दस्रा सिंधुमातरा मनोतरा रयीणां। धिया देवा वसुविदा ॥२॥ वच्यंते वां ककुहासो

जूर्णायामधि विष्टपि । यद्वां रथो विभिष्पतात् ॥३॥ हविषा
जारो अपां पिपर्ति पपुरिर्नरा । पिता कुटस्य चर्षणिः ॥४॥
आदारो वां मतीनां नासत्या मतवचसा । पातं सोमस्य धृष्णु-
या ॥५॥३३॥ या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः ।
तामस्मे रासाथामिषं ॥६॥ आ नो नावा मतीनां यातं पाराय
गंतवे । युंजाथामश्विना रथं ॥७॥ अरित्रं वां दिवस्पृथु तीर्थे सिं-
धूनां रथः । धिया युयुज्र इंदवः ॥८॥ दिवस्कण्वास इंदवो वसु
सिंधूनां पदे । स्वं वव्रिं कुह धित्सथः ॥९॥ अभूदु भा उ अंशवे
हिरण्यं प्रति सूर्यः । व्यख्यज्जिह्वयासितः ॥१०॥३४॥ अभूदु पा-
रमेतवे पंथा ऋतस्य साधुया । अदर्शि वि स्रुतिर्दिवः ॥११॥ तत्त-
दिदश्विनोरवो जरिता प्रति भूषति । मदे सोमस्य पिप्रतोः ॥१२॥
वावसाना विवस्वति सोमस्य पीत्या गिरा । मनुष्वच्छंभू आ
गतं ॥१३॥ युवोरुषा अनु श्रियं परिज्मनोरुपाचरत् । ऋता
वनथो अक्तुभिः ॥१४॥ उभा पिबतमश्विनोभा नः शर्म
यच्छतं । अविद्रियाभिरूतिभिः ॥१५॥३५॥३॥

॥४७॥ १—१० प्रस्कण्वः काण्वः ॥ अश्विनौ ॥ प्रागाथं बार्हतं ॥

॥४७॥ अयं वां मधुमत्तमः सुतः सोम ऋतावृधा ।
तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥१॥ त्रिवं-
धुरेण त्रिवृता सुपेशसा रथेना यातमश्विना । कण्वासो
वां ब्रह्म कृण्वंत्यध्वरे तेषां सु शृणुतं हवं ॥२॥ अश्विना मधु-
मत्तमं पातं सोममृतावृधा । अथाद्य दस्रा वसु बिभ्रता
रथे दाश्वांसमुप गच्छतं ॥३॥ त्रिषधस्थे बर्हिषि विश्ववेदसा
मध्वा यज्ञं मिमिक्षतं । कण्वासो वां सुतसोमा अभिद्यवो

युवां हवंते अश्विना ॥४॥ याभिः कण्वमभिष्टिभिः प्रावतं युव-
मश्विना। ताभिः ष्व१स्माँ अवतं शुभस्पती पातं सोममृतावृ-
धा ॥५॥१॥ सुदासे दस्रा वसु बिभ्रता रथे पृक्षो वहतमश्विना।
रयिं समुद्रादुत वा दिवस्पर्यस्मे धत्तं पुरुस्पृहं ॥६॥ यन्नासत्या
परावति यद्वा स्थो अधि तुर्वशे। अतो रथेन सुवृता न आ गतं
साकं सूर्यस्य रश्मिभिः ॥७॥ अर्वाञ्चा वां सप्तयोऽध्वरश्रियो
वहंतु सवनेदुप। इषं पृंचंता सुकृते सुदानव आ बर्हिः सीदतं
नरा ॥८॥ तेन नासत्या गतं रथेन सूर्यत्वचा। येन शश्वदूहथुर्दा-
शुषे वसु मध्वः सोमस्य पीतये ॥९॥ उक्थेभिरर्वागवसे पुरू-
वसू अर्कैश्च नि ह्वयामहे। शश्वत्कण्वानां सदसि प्रिये हि कं
सोमं पपथुरश्विना ॥१०॥२॥

॥ ४८ ॥ १–१६ प्रस्कण्वः काण्वः ॥ उषाः ॥ प्रागाथं बार्हतं ॥

॥४८॥ सह वामेन न उषो व्युच्छा दुहितर्दिवः। सह
द्युम्नेन बृहता विभावरि राया देवि दास्वती ॥१॥ अश्वाव-
तीर्गोमतीर्विश्वसुविदो भूरि च्यवंत वस्तवे। उदीरय प्रति मा
सूनृता उषश्चोद राधो मघोनां ॥२॥ उवासोषा उच्छाच्च
नु देवी जीरा रथानां। ये अस्या आचरणेषु दध्रिरे समुद्रे
न श्रवस्यवः ॥३॥ उषो ये ते प्र यामेषु युंजते मनो दानाय
सूरयः। अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति
नृणां ॥४॥ आ घा योषेव सूनर्युषा याति प्रभुंजती। जरयंती
वृजनं पद्वदीयत उत्पातयति पक्षिणः ॥५॥३॥ वि या
सृजति समनं व्य१र्थिनः पदं न वेत्योदती। वयो नकिष्टे
पप्तिवांस आसते व्युष्टौ वाजिनीवति ॥६॥ एषायुक्त

परावतः सूर्यस्योदयनादधि । शतं रथेभिः सुभगोषा इयं वि
यात्यभि मानुषान् ॥७॥ विश्वमस्या नानाम चक्षसे जगज्ज्यो-
तिष्कृणोति सूनरी । अप द्वेषो मघोनी दुहिता दिव उषा
उच्छदप स्रिधः ॥८॥ उष आ भाहि भानुना चंद्रेण दुहितर्दिवः ।
आवहंती भूर्यस्मभ्यं सौभगं व्युच्छंती दिविष्टिषु ॥९॥ विश्वस्य
हि प्राणनं जीवनं त्वे वि यदुच्छसि सूनरि । सा नो रथेन बृहता
विभावरि श्रुधि चित्रामघे हवं ॥१०॥४॥ उषो वाजं हि वंस्व
यश्चित्रो मानुषे जने । तेना वह सुकृतो अध्वराँ उप ये त्वा
गृणंति वह्नयः ॥११॥ विश्वान्देवाँ आ वह सोमपीतयेऽंतरि-
क्षादुषस्त्वं । सास्मासु धा गोमदश्वावदुक्थ्य१मुषो वाजं सु-
वीर्यं ॥१२॥ यस्या रुशंतो अर्चयः प्रति भद्रा अदृक्षत । सा
नो रयिं विश्ववारं सुपेशसमुषा ददातु सुग्म्यं ॥१३॥ ये चिद्धि
त्वामृषयः पूर्व ऊतये जुहूरेऽवसे महि । सा नः स्तोमाँ अभि
गृणीहि राधसोषः शुक्रेण शोचिषा ॥१४॥ उषो यदद्य भानुना
वि द्वारावृणवो दिवः । प्र नो यच्छतादवृकं पृथु च्छर्दिः प्र
देवि गोमतीरिषः ॥१५॥ सं नो राया बृहता विश्वपेशसा
मिमिक्ष्वा समिळाभिरा । सं द्युम्नेन विश्वतुरोषो महि सं
वाजैर्वाजिनीवति ॥१६॥५॥

॥४९॥ १–४ प्रस्कण्वः काण्वः ॥ उषाः ॥ अनुष्टुप् ॥

॥४९॥ उषो भद्रेभिरा गहि दिवश्चिद्रोचनादधि ।
वहंत्वरुणप्सव उप त्वा सोमिनो गृहं ॥१॥ सुपेशसं सुखं
रथं यमध्यस्था उषस्त्वं । तेना सुश्रवसं जनं प्रावाद्य
दुहितर्दिवः ॥२॥ वयश्चित्ते पतत्रिणो द्विपच्चतुष्प-

दर्शनि। उषः प्रारन्नृतूँरनु दिवो अंतेभ्यस्परि ॥३॥ व्युच्छंती हि रश्मिभिर्विश्वमाभासि रोचनं । तां त्वामुषर्वसूयवो गीर्भिः कण्वा अहूषत ॥४॥६॥

॥५०॥ १–१३ प्रस्कण्वः काण्वः ॥ सूर्यः ॥ १–९ गायत्री । १०–१३ अनुष्टुप् ॥

॥५०॥ उदु त्यं जातवेदसं देवं वहंति केतवः। दृशे विश्वाय सूर्यं॥१॥ अप त्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः। सूराय विश्वचक्षसे॥२॥ अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु। भ्राजंतो अग्नयो यथा॥३॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचनं॥४॥ प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्। प्रत्यङ्विश्वं स्वर्दृशे॥५॥७॥ येना पावक चक्षसा भुरण्यंतं जनाँ अनु। त्वं वरुण पश्यसि॥६॥ वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः। पश्यञ्जन्मानि सूर्य॥७॥ सप्त त्वा हरितो रथे वहंति देव सूर्य। शोचिष्केशं विचक्षण॥८॥ अयुक्त सप्त शुंध्युवः सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः॥९॥ उद्वयं तमसस्परि ज्योतिष्पश्यंत उत्तरं। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं॥१०॥ उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं। हृद्रोगं मम सूर्य हरिमाणं च नाशय॥११॥ शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि॥१२॥ उदगादयमादित्यो विश्वेन सहसा सह। द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं॥१३॥८॥९॥

॥५१॥ १–१५ सव्य आंगिरसः ॥ इंद्रः ॥ १–१३ जगती । १४. १५ त्रिष्टुप् ॥

॥५१॥ अभि त्यं मेषं पुरुहूतमृग्मियमिंद्रं गीर्भिर्मदता वस्वो अर्णवं। यस्य द्यावो न विचरंति मानुषा भुजे मंहिष्ठम-

भि विप्रमर्चत ॥ १ ॥ अभीमवन्वन्त्स्वभिष्टिमूतयोऽंतरि-
क्षप्रां तविषीभिरावृतं । इंद्रं दक्षास ऋभवो मदच्युतं
शतक्रतुं जवनी सूनृतारुहत् ॥ २ ॥ त्वं गोत्रमंगिरो-
भ्योऽवृणोरपोतात्रये शतदुरेषु गातुवित् । ससेन चिद्वि-
मदायावहो वस्वाजावद्रिं वावसानस्य नर्तयन् ॥ ३ ॥
त्वमपामपिधानावृणोरपाधारयः पर्वते दानुमद्वसु । वृत्रं
यदिंद्र शवसावधीरहिमादित्सूर्यं दिव्यारोहयो दृशे ॥ ४ ॥
त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये अधि शुप्ता-
वजुह्वत । त्वं पिप्रोर्नृमणः प्रारुजः पुरः प्र ऋजि-
श्वानं दस्युहत्येष्वाविथ ॥ ५ ॥ ९ ॥ त्वं कुत्सं शुष्णहत्येष्वा-
विथारंधयोऽतिथिग्वाय शंबरं । महांतं चिदर्बुदं नि
क्रमीः पदा सनादेव दस्युहत्याय जज्ञिषे ॥ ६ ॥ त्वे विश्वा
तविषी सध्र्यग्घिता तव राधः सोमपीथाय हर्षते ।
तव वज्रश्चिकिते बाह्वोर्हितो वृश्चा शत्रोरव विश्वानि
वृष्ण्या ॥ ७ ॥ वि जानीह्यार्यान्ये च दस्यवो बर्हिष्मते
रंधया शासदव्रतान् । शाकी भव यजमानस्य चोदिता
विश्वेत्ता ते सधमादेषु चाकन ॥ ८ ॥ अनुव्रताय रंध-
यन्नपव्रतानाभूभिरिंद्रः श्नथयन्ननाभुवः । वृद्धस्य चिद्वर्ध-
तो द्यामिनक्षतः स्तवानो वम्रो वि जघान संदिहः ॥ ९ ॥
तक्षद्यत्त उशना सहसा सहो वि रोदसी मज्मना बाधते
शवः । आ त्वा वातस्य नृमणो मनोयुज आ पूर्यमाणमवहन्न-
भि श्रवः ॥ १० ॥ १० ॥ मंदिष्ट यदुशने काव्ये सचाँ इंद्रो वंकू
वंकुतराधि तिष्ठति । उग्रो ययिं निरपः स्रोतसासृजद्वि
शुष्णस्य दृंहिता ऐरयत्पुरः ॥ ११ ॥ आ स्मा रथं वृषपाणेषु

तिष्ठसि शार्यातस्य प्रभृता येषु मंदसे । इंद्र यथा सुतसोमेषु चाकनोऽनर्वाणं श्लोकमा रोहसे दिवि ॥ १२ ॥ अददा अर्भां महते वचस्यवे कक्षीवते वृचयामिंद्र सुन्वते । मेनाभवो वृषणश्वस्य सुक्रतो विश्वेत्ता ते सवनेषु प्रवाच्या ॥ १३ ॥ इंद्रो अश्रायि सुध्यो निरेके पज्रेषु स्तोमो दुर्यो न यूपः । अश्वयुर्गव्यू रथयुर्वसूयुरिंद्र इद्रायः क्षयति प्रयंता ॥ १४ ॥ इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि । अस्मिन्निंद्र वृजने सर्ववीराः स्मत्सूरिभिस्तव शर्मन्स्याम ॥ १५ ॥ ११ ॥

॥ ५२ ॥ १–१५ सव्य आंगिरसः ॥ इंद्रः ॥ १–१२. १४ जगती । १३. १५ त्रिष्टुप् ॥

॥ ५२ ॥ त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते । अत्यं न वाजं हवनस्यदं रथमेंद्रं ववृत्यामवसे सुवृक्तिभिः ॥ १ ॥ स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे । इंद्रो यद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसि जर्हृषाणो अंधसा ॥ २ ॥ स हि द्वरो द्वरिषु वव्र ऊधनि चंद्रबुध्नो मदवृद्धो मनीषिभिः । इंद्रं तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरंधसः ॥ ३ ॥ आ यं पृणंति दिवि सद्मबर्हिषः समुद्रं न सुभ्व१ः स्वा अभिष्टयः । तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इंद्रमवाता अह्रुतप्सवः ॥ ४ ॥ अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः । इंद्रो यद्वज्री धृषमाणो अंधसा भिनद्वलस्य परिधींरिव त्रितः ॥ ५ ॥ १२ ॥ परीं घृणा चरति तित्विषे शवोऽपो वृत्वी रजसो बुध्नमाशयत् । वृत्रस्य यत्प्रवणे दुर्गृभिश्वनो निजघंथ हन्वोरिंद्र तन्यतुं ॥ ६ ॥ ह्रदं न हि त्वा न्यृषंत्यूर्मे-

यो ब्रह्माणींद्र तव यानि वर्धना । त्वष्टा चित्ते युज्यं वावृधे
शवस्ततक्ष वज्रमभिभूत्योजसं ॥ ७ ॥ जघन्वाँ उ हरिभिः
संभृतक्रतविंद्र वृत्रं मनुषे गातुयन्नपः । अयच्छथा बाह्वोर्वज्र-
मायसमधारयो दिव्या सूर्यं दृशे ॥ ८ ॥ बृहत्स्वश्चंद्रममं-
वद्यदुक्थ्य१मकृण्वत भियसा रोहणं दिवः । यन्मानुषप्रधना
इंद्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु ॥ ९ ॥ द्यौश्चिदस्या-
मवाँ अहेः स्वनादयोयवीद्भियसा वज्र इंद्र ते । वृत्रस्य
यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः ॥ १० ॥ १३ ॥
यदिन्निंद्र पृथिवी दशभुजिरहानि विश्वा ततनंत कृष्टयः ।
अत्राह ते मघवन्विश्रुतं सहो द्यामनु शवसा बर्हणा
भुवत् ॥ ११ ॥ त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा
अवसे धृषन्मनः । चकृषे भूमिं प्रतिमानमोजसोऽपः
स्वः परिभूरेष्या दिवं ॥ १२ ॥ त्वं भुवः प्रतिमानं पृथिव्या
ऋष्ववीरस्य बृहतः पतिर्भूः । विश्वमाप्रा अंतरिक्षं महि-
त्वा सत्यमद्धा नकिरन्यस्त्वावान् ॥ १३ ॥ न यस्य द्या-
वापृथिवी अनु व्यचो न सिंधवो रजसो अंतमानशुः ।
नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्व-
मानुषक् ॥ १४ ॥ आर्चन्नत्र मरुतः सस्मिन्नाजौ विश्वे
देवासो अमदन्ननु त्वा । वृत्रस्य यद्भृष्टिमता वधेन नि
त्वमिंद्र प्रत्यानं जघंथ ॥ १५ ॥ १४ ॥

॥ ५३ ॥ १–११ सव्य आंगिरसः ॥ इंद्रः ॥ १–९ जगती । १०.११ त्रिष्टुप् ॥

॥ ५३ ॥ न्यू३ षु वाचं प्र महे भरामहे गिर इंद्राय सदने
विवस्वतः । नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्र-

विणोदेषु शस्यते ॥ १ ॥ दुरो अश्वस्य दुर इंद्र गोरसि
दुरो यवस्य वसुन इनस्पतिः । शिक्षानरः प्रदिवो अका-
मकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥ २ ॥ शचीव
इंद्र पुरुकृद्द्युमत्तम तवेदिदमभितश्चेकिते वसु । अतः
संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममून-
यीः ॥ ३ ॥ एभिर्द्युभिः सुमना एभिरिंदुभिर्निरुंधानो अमं-
तिं गोभिरश्विना । इंद्रेण दस्युं दरयंत इंदुभिर्युतद्वेषसः
समिषा रभेमहि ॥ ४ ॥ समिंद्र राया समिषा रभेमहि
सं वाजेभिः पुरुश्चंद्रैरभिद्युभिः । सं देव्या प्रमत्या वीर-
शुष्मया गोअग्रयाश्वावत्या रभेमहि ॥ ५ ॥ १५ ॥ ते त्वा
मदा अमदन्तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत्कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्ह-
यः ॥ ६ ॥ युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं
हंस्योजसा । नम्या यदिंद्र सख्या परावति निबर्हयो
नमुचिं नाम मायिनं ॥ ७ ॥ त्वं करंजमुत पर्णयं वधीस्ते-
जिष्ठयातिथिग्वस्य वर्तनी । त्वं शता वंगृदस्याभिनत्पु-
रोऽनानुदः परिषूता ऋजिश्वना ॥ ८ ॥ त्वमेताञ्जनराज्ञो
द्विर्दशाबंधुना सुश्रवसोपजग्मुषः । षष्टिं सहस्रा नवतिं
नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ॥ ९ ॥ त्वमाविथ
सुश्रवसं तवोतिभिस्तव त्रामभिरिंद्र तूर्वयाणं । त्वमस्मै
कुत्समतिथिग्वमायुं महे राज्ञे यूने अरंधनायः ॥ १० ॥
य उद्दचींद्र देवगोपाः सखायस्ते शिवतमा असाम ।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधा-
नाः ॥ ११ ॥ १६ ॥

॥ ५४ ॥ १–११ सव्य आंगिरसः ॥ इंद्रः ॥ १–५. ७. १० जगती । ६. ८. ९. ११ त्रिष्टुप् ॥

॥५४॥ मा नो अस्मिन्मघवन्पृत्स्वंहसि नहि ते अंतः
शवसः परीणशे। अक्रंदयो नद्यो३ रोरुवद्वना कथा न क्षो-
णीर्भियसा समारत ॥१॥ अर्चा शक्राय शाकिने शचीवते
शृण्वंतमिंद्रं महयन्नभि ष्टुहि। यो धृष्णुना शवसा रोदसी उभे
वृषा वृषत्वा वृषभो न्यृंजते ॥२॥ [अर्चा दिवे बृहते शूष्यं१ वचः
स्वक्षत्रं यस्य धृषतो धृषन्मनः। बृहच्छ्रवा असुरो बर्हणा कृतः
पुरो हरिभ्यां वृषभो रथो हि षः ॥]३॥ त्वं दिवो बृहतः सानु को-
पयोऽव त्मना धृषता शंबरं भिनत्। यन्मायिनो व्रंदिनो मंदि-
ना धृषच्छितां गभस्तिमशनिं पृतन्यसि ॥४॥ नि यद्वृणक्षि
श्वसनस्य मूर्धनि शुष्णस्य चिद्व्रंदिनो रोरुवद्वना। प्राचीनेन
मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि ॥५॥१७॥
त्वमाविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो। त्वं रथमे-
तशं कृत्व्ये धने त्वं पुरो नवतिं दंभयो नव ॥६॥ स घा राजा
सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति। उक्था
वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दि-
वः ॥७॥ असमं क्षत्रमसमा मनीषा प्र सोमपा अपसा संतु
नेमे। ये त इंद्र ददुषो वर्धयंति महि क्षत्रं स्थविरं वृष्ण्यं च ॥८॥
तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इंद्रपानाः। व्यश्नुहि
तर्पया काममेषामथा मनो वसुदेयाय कृष्व ॥९॥ अपा-
मतिष्ठद्धरुणह्वरं तमोऽंतर्वृत्रस्य जठरेषु पर्वतः। अभी-
मिंद्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्न-
ते ॥१०॥ स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषा-

च्छिंद्र तव्यं। रक्षा च नो मघोनः पाहि सूरीन्राये च नः स्वपत्या इषे धाः ॥११॥१८॥

॥ ५५ ॥ १–८ सव्य आंगिरसः ॥ इंद्रः ॥ जगती ॥

॥५५॥ दिवश्चिदस्य वरिमा वि पप्रथ इंद्रं न मह्ना पृथिवी चन प्रति। भीमस्तुविष्माञ्चर्षणिभ्य आतपः शिशीते वज्रं तेजसे न वंसगः॥१॥ सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः। इंद्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते॥२॥ त्वं तमिंद्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि। प्र वीर्येण देवतांति चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः॥३॥ स इद्वने नमस्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इंद्रियं। वृषा छंदुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति॥४॥ स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः। अधा चन श्रद्दधति त्विषीमत इंद्राय वज्रं निघनिघ्नते वधं॥५॥१९॥ स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन्। ज्योतींषि कृण्वन्नवृकाणि यज्यवेऽव सुक्रतुः सर्तवा अपः सृजत्॥६॥ दानाय मनः सोमपावन्नस्तु तेऽर्वांचा हरी वंदनश्रुदा कृधि। यमिष्ठासः सारथयो य इंद्र ते न त्वा केता आ दभ्नुवंति भूर्णयः॥७॥ अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे। आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इंद्र भूरयः॥८॥२०॥

॥ ५६ ॥ १–६ सव्य आंगिरसः ॥ इंद्रः ॥ जगती ॥

॥५६॥ एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः। दक्षं महे पाययते हिरण्ययं रथमावृत्या

हरिर्योगमृभ्वसं ॥१॥ तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः । पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा ॥२॥ स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः । येन शुष्णं मायिनमायसो मदे दुध्र आभूषु रामयन्नि दामनि ॥३॥ देवी यदि तविषी त्वावृधोतय इंद्रं सिषक्त्युषसं न सूर्यः । यो धृष्णुना शवसा बाधते तम इयर्ति रेणुं बृहदर्हरिष्वणिः ॥४॥ वि यत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा । स्वर्मीळ्हे यन्मद इंद्र हर्ष्याहन्वृत्रं निरपामौब्जो अर्णवं ॥५॥ त्वं दिवो धरुणं धिष ओजसा पृथिव्या इंद्र सदनेषु माहिनः । त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यारुजः ॥६॥२१॥

॥५७॥ १—६ सव्य आंगिरसः ॥ इंद्रः ॥ जगती ॥

॥५७॥ प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे । अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतं ॥१॥ अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः । यत्पर्वते न समशीत हर्यत इंद्रस्य वज्रः श्नथिता हिरण्ययः ॥२॥ अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे । यस्य धाम श्रवसे नामेंद्रियं ज्योतिरकारि हरितो नायसे ॥३॥ इमे त इंद्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो । नहि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति नो हर्य तद्वचः ॥४॥ भूरि त इंद्र वीर्यं१ तव स्मस्यस्य स्तोतुर्मघवन्काममा पृण । अनु ते द्यौर्बृहती वीर्यं मम इयं च ते पृथिवी

नेम ओजसे ॥ ५ ॥ त्वं तमिंद्र पर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ । अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥ ६ ॥ २२ ॥ १० ॥

॥ ५८ ॥ १–९ नोधा गौतमः ॥ अग्निः ॥ १–५ जगती । ६–९ त्रिष्टुप् ॥

॥ ५८ ॥ नू चित्सहोजा अमृतो नि तुंदते होता यद्दूतो अभवद्विवस्वतः । वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति ॥ १ ॥ आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति । अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत् ॥ २ ॥ क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः । रथो न विक्ष्वृंजसान आयुषु व्यानुषग्वार्या देव ऋण्वति ॥ ३ ॥ वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः । तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ॥ ४ ॥ तपुर्जंभो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः । अभिव्रजन्नक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः ॥ ५ ॥ २३ ॥ दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः । होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने ॥ ६ ॥ होतारं सप्त जुह्वो३ यजिष्ठं यं वाघतो वृणते अध्वरेषु । अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नं ॥ ७ ॥ अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ । अग्ने गृणंतमंहस उरुष्योर्जो नपात्पूर्भिरायसीभिः ॥ ८ ॥ भवा वरूथं गृणते विभावो भवा मघवन्मघवद्भ्यः शर्म । उरुष्याग्ने अंहसो गृणंतं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ९ ॥ २४ ॥

॥ ५९ ॥ १–७ नोधा गौतमः ॥ अग्निर्वैश्वानरः ॥ त्रिष्टुप् ॥

॥५९॥ वया इदग्ने अग्नयस्ते अन्ये त्वे विश्वे अमृता मादयंते। वैश्वानर नाभिरसि क्षितीनां स्थूणेव जनाँ उपमिद्ययंथ॥१॥ मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः। तं त्वा देवासोऽजनयंत देवं वैश्वानर ज्योतिरिदार्याय॥२॥ आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि। या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा॥३॥ बृहती इव सूनवे रोदसी गिरो होता मनुष्योऽ३न दक्षः। स्वर्वते सत्यशुष्माय पूर्वीर्वैश्वानराय नृतमाय यह्वीः॥४॥ दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्र रिरिचे महित्वं। राजा कृष्टीनामसि मानुषीणां युधा देवेभ्यो वरिवश्चकर्थ॥५॥ प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचंते। वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शंबरं भेत्॥६॥ वैश्वानरो महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा। शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान्॥७॥२५॥

॥ ६० ॥ १–५ नोधा गौतमः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥६०॥ वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थं। द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा॥१॥ अस्य शासुरुभयासः सचंते हविष्मंत उशिजो ये च मर्ताः। दिवश्चित्पूर्वो न्यसादि होतापृच्छ्यो विश्पतिर्विक्षु वेधाः॥२॥ तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः। यमृत्विजो वृजने मानुषासः प्रयस्वंत आयवो जीजनंत॥३॥ उशिक्पावको वसुर्मानुषेषु

वरेण्यो होताधायि विक्षु । दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणां ॥४॥ तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः । आशुं न वाजंभरं मर्जयंतः प्रातर्मक्षू धियावसुर्जगम्यात् ॥५॥२६॥

॥ ६१ ॥ १–१६ नोधा गौतमः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥६१॥ अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहि-
नाय । ऋचीषमायाध्रिगव ओहमिंद्राय ब्रह्माणि राततमा ॥१॥
अस्मा इदु प्रय इव प्र यंसि भराम्यांगूषं बाधे सुवृक्ति । इंद्राय
हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयंत ॥२॥ अस्मा
इदु त्यमुपमं स्वर्षां भराम्यांगूषमास्येन । मंहिष्ठमच्छोक्ति-
भिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥३॥ अस्मा इदु स्तोमं
सं हिनोमि रथं न तष्टेव तत्सिनाय । गिरश्च गिर्वाहसे
सुवृक्तींद्राय विश्वमिन्वं मेधिराय ॥४॥ अस्मा इदु सप्तिमिव
श्रवस्येंद्रायार्कं जुह्वा३ समंजे । वीरं दानौकसं वंदध्यै पुरां
गूर्तश्रवसं दर्माणं ॥५॥२७॥ अस्मा इदु त्वष्टा तक्षद्वज्रं
स्वपस्तमं स्वर्यं१ रणाय । वृत्रस्य चिद्विदद्येन मर्म तुजन्नी-
शानस्तुजता कियेधाः ॥६॥ अस्येदु मातुः सवनेषु सद्यो
महः पितुं पपिवाञ्चार्वन्ना । मुषायद्विष्णुः पचतं सहीं-
यान्विध्यद्वराहं तिरो अद्रिमस्ता ॥७॥ अस्मा इदु ग्ना-
श्चिद्देवपत्नीरिंद्रायार्कमहिहत्य ऊवुः । परि द्यावापृथिवी
जभ्र उर्वी नास्य ते महिमानं परि ष्टः ॥८॥ अस्येदेव
प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यंतरिक्षात् । स्वरा-
ळिंद्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥९॥

अस्येदेव शवसा शुषंतं वि वृश्चद्वज्रेण वृत्रमिंद्रः। गा न व्राणा अवनीरमुंचदभि श्रवो दावने सचेताः ॥१०॥२८॥ अस्येदु त्वेषसा रंत सिंधवः परि यद्वज्रेण सीमयच्छत्। ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः ॥११॥ अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः। गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥१२॥ अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः। युधे यदिष्णान आयुधान्यृघायमाणो निरिणाति शत्रून् ॥१३॥ अस्येदु भिया गिरयश्च दृळ्हा द्यावा च भूमा जनुषस्तुजेते। उपो वेनस्य जोगुवान ओणिं सद्यो भुवद्वीर्याय नोधाः ॥१४॥ अस्मा इदु त्यदनु दाय्येषामेको यद्वव्ने भूरेरीशानः। प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिंद्रः ॥१५॥ एवा ते हारियोजना सुवृक्तींद्र ब्रह्माणि गोतमासो अक्रन्। ऐषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥१६॥२९॥४॥

॥ ६२ ॥ १–१३ नोधा गौतमः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥६२॥ प्र मंन्महे शवसानाय शूषमांगूषं गिर्वणसे अंगिरस्वत्। सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥१॥ प्र वो महे महि नमो भरध्वमांगूष्यं शवसानाय साम। येना नः पूर्वे पितरः पदज्ञा अर्चंतो अंगिरसो गा अविंदन् ॥२॥ इंद्रस्यांगिरसां चेष्टौ विदत्सरमा तनयाय धासिं। बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशंत नरः ॥३॥ स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः। सरण्युभिः फलिगमिंद्र शक्र वलं

रवेण दरयो दशग्वैः॥४॥ गृणानो अंगिरोभिर्दस्म वि वरुषसा
सूर्येण गोभिरंधः। वि भूम्या अप्रथय इंद्र सानु दिवो रज
उपरमस्तभायः॥५॥१॥ तदु प्रयक्षतममस्य कर्म दस्मस्य
चारुतममस्ति दंसः। उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो
नद्य१श्चतस्रः॥६॥ द्विता वि वव्रे सनजा सनीळे अयास्यः
स्तवमानेभिरर्कैः। भगो न मेने परमे व्योमन्नधारयद्रोदसी
सुदंसाः॥७॥ सनाद्दिवं परि भूमा विरूपे पुनर्भुवा
युवती स्वेभिरेवैः। कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो
अन्यान्या॥८॥ सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा
सुदंसाः। आमासु चिद्दधिषे पक्वमंतः पयः कृष्णासु रुश-
द्रोहिणीषु॥९॥ सनात्सनीळा अवनीरवाता व्रता रक्षंते
अमृताः सहोभिः। पुरू सहस्रा जनयो न पत्नीर्दुवस्यंति
स्वसारो अह्रयाणं॥१०॥२॥ सनायुवो नमसा नव्यो अर्कैर्व-
सूयवो मतयो दस्म दद्रुः। पतिं न पत्नीरुशतीरुशंतं स्पृशंति
त्वा शवसावन्मनीषाः॥११॥ सनादेव तव रायो गभस्तौ
न क्षीयंते नोप दस्यंति दस्म। द्युमाँ असि क्रतुमाँ इंद्र धीरः
शिक्षा शचीवस्तव नः शचीभिः॥१२॥ सनायते गोतम इंद्र
नव्यमतक्षद्ब्रह्म हरियोजनाय। सुनीथाय नः शवसान नोधाः
प्रातर्मक्षू धियावसुर्जगम्यात्॥१३॥३॥

॥६३॥ १—९ नोधा गौतमः॥ इंद्रः॥ त्रिष्टुप्॥

॥६३॥ त्वं महाँ इंद्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी
अमे धाः। यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः
किरणा नैजन्॥१॥ आ यद्धरी इंद्र विव्रता वेरा ते

वज्रं जरिता बाह्वोर्धात् । येनाविहर्यतक्रतो अमित्रान्पुर
इष्णासि पुरुहूत पूर्वीः ॥ २॥ त्वं सत्य इंद्र धृष्णुरेतान्त्वमृ-
भुक्षा नर्यस्त्वं षाट् । त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय
द्युमते सचाहन् ॥ ३॥ त्वं ह त्यदिंद्र चोदीः सखा वृत्रं यद्वज्रिन्वृ-
षकर्मन्नुभ्नाः । यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो
वृथाषाट् ॥ ४॥ त्वं ह त्यदिंद्रारिषण्यन्दृळ्हस्य चिन्मर्ता-
नामजुष्टौ । व्य१स्मदा काष्ठा अर्वते वर्घनेव वज्रिञ्छ्न-
थिह्यमित्रान् ॥ ५॥ ४॥ त्वां ह त्यदिंद्रार्णसातौ स्वर्मीळ्हे
नर आजा हवंते । तव स्वधाव इयमा समर्य ऊतिर्वा-
जेष्वतसाय्या भूत् ॥ ६॥ त्वं ह त्यदिंद्र सप्त युध्यन्पुरो
वज्रिन्पुरुकुत्साय दर्दः । बर्हिर्न यत्सुदासे वृथा वर्गंहो
राजन्वरिवः पूरवे कः ॥ ७॥ त्वं त्यां न इंद्र देव चित्रामि-
षमापो न पीपयः परिज्मन् । यया शूर प्रत्यस्मभ्यं यंसि
त्मनमूर्जं न विश्वध क्षरध्यै ॥ ८॥ अकारि त इंद्र गोतमे-
भिर्ब्रह्माण्योक्ता नमसा हरिभ्यां । सुपेशसं वाजमा भरा नः
प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ९॥ ५॥

॥ ६४ ॥ १–१५ नोधा गौतमः ॥ मरुतः ॥ १–१४ जगती । १५ त्रिष्टुप् ॥

॥ ६४ ॥ वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिं प्र भरा
मरुद्भ्यः । अपो न धीरो मनसा सुहस्त्यो गिरः समंजे विद-
थेष्वाभुवः ॥ १॥ ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या
असुरा अरेपसः । पावकासः शुचयः सूर्या इव सत्वानो न
द्रप्सिनो घोरवर्पसः ॥ २॥ युवानो रुद्रा अजरा अभोग्घनो
ववक्षुरध्रिगावः पर्वता इव । दृळ्हा चिद्विश्वा भुवनानि

पार्थिवा प्र च्यावयंति दिव्यानि मज्मना ॥ ३ ॥ चित्रैरंजि-
भिर्वपुषे व्यंजते वक्षःसु रुक्माँ अधि येतिरे शुभे । अंसेष्वेषां
नि मिमृक्षुर्ऋष्टयः साकं जज्ञिरे स्वधया दिवो नरः ॥ ४ ॥
ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिर-
क्रत । दुहंत्यूधर्दिव्यानि धूतयो भूमिं पिन्वंति पयसा
परिज्रयः ॥ ५ ॥ ६ ॥ पिन्वंत्यपो मरुतः सुदानवः पयो
घृतवद्विदथेष्वाभुवः । अत्यं न मिहे वि नयंति वाजिन-
मुत्सं दुहंति स्तनयंतमक्षितं ॥ ६ ॥ महिषासो मायिनश्चित्र-
भानवो गिरयो न स्वतवसो रघुष्यदः । मृगा इव
हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वं ॥ ७ ॥
सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववे-
दसः । क्षपो जिन्वंतः पृषतीभिर्ऋष्टिभिः समित्सबाधः
शवसाहिमन्यवः ॥ ८ ॥ रोदसी आ वदता गणश्रियो
नृषाचः शूराः शवसाहिमन्यवः । आ वंधुरेष्वमतिर्न दर्श-
ता विद्युन्न तस्थौ मरुतो रथेषु वः ॥ ९ ॥ विश्ववेदसो
रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ।
अस्तार इषुं दधिरे गभस्त्योरनंतशुष्मा वृषखादयो
नरः ॥ १० ॥ ७ ॥ हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नंत
आपथ्यो३न पर्वतान् । मखा अयासः स्वसृतो ध्रुवच्युतो
दुध्रकृतो मरुतो भ्राजदृष्टयः ॥ ११ ॥ घृषुं पावकं वनिनं
विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि । रजस्तुरं तवसं
मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥ १२ ॥ प्र नू स
मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत ।
अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति

पुष्यति ॥१३॥ चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमंतं शुष्मं मघवत्सु धत्तन । धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ॥१४॥ नू ष्ठिरं मरुतो वीरवंतमृतीषाहं रयिमस्मासु धत्त । सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात् ॥१५॥८॥११॥

॥ ६५ ॥ १–५ पराशरः शाक्त्यः ॥ अग्निः ॥ द्विपदा विराट् ॥

॥६५॥ पश्वा न तायुं गुहा चतंतं नमो युजानं नमो वहंतं । सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः ॥१॥ ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम । वर्धंतीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातं ॥२॥ पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शंभु । अत्यो नाज्मन्त्सर्गप्रतक्तः सिंधुर्न क्षोदः क ईं वराते ॥३॥ जामिः सिंधूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति । यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥४॥ श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् । सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥५॥९॥

॥ ६६ ॥ १–५ पराशरः शाक्त्यः ॥ अग्निः ॥ द्विपदा विराट् ॥

॥६६॥ रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः । तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा ॥१॥ दाधार क्षेममोको न रण्वो यवो न पक्वो जेता जनानां । ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति ॥२॥ दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै । चित्रो यदभ्राट् श्वेतो न विक्षु रथो न रुक्मी त्वेषः

समत्सु ॥३॥ सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका। यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनां ॥४॥ तं वश्चराथा वयं वसत्यास्तं न गावो नक्षंत इद्धं। सिंधुर्न क्षोदः प्र नीचीरैनोन्नवंत गावः स्व१र्दृशीके ॥५॥१०॥

॥ ६७ ॥ १–५ पराशरः शाक्त्यः ॥ अग्निः ॥ द्विपदा विराट् ॥

॥६७॥ वनेषु जायुर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यं। क्षेमो न साधुः क्रतुर्न भद्रो भुवत्स्वाधीर्होता हव्यवाट् ॥१॥ हस्ते दधानो नृम्णा विश्वान्यमे देवान्धाद्गुहा निषीदन्। विंदंतीमत्र नरो धियंधा हृदा यत्तष्टान्मंत्राँ अशंसन् ॥२॥ अजो न क्षां दाधार पृथिवीं तस्तंभ द्यां मंत्रेभिः सत्यैः। प्रिया पदानि पश्वो नि पाहि विश्वायुरग्ने गुहा गुहं गाः ॥३॥ य ईं चिकेत गुहा भवंतमा यः ससाद धारामृतस्य। वि ये चृतंत्यृता सपंत आदिद्वसूनि प्र ववाचास्मै ॥४॥ वि यो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसूष्वंतः। चित्तिरपां दमे विश्वायुः सद्मेव धीराः संमाय चक्रुः ॥५॥११॥

॥ ६८ ॥ १–५ पराशरः शाक्त्यः ॥ अग्निः ॥ द्विपदा विराट् ॥

॥ ६८ ॥ श्रीणन्नुप स्थाद्दिवं भुरण्युः स्थातुश्चरथमक्तून्व्यूर्णोत्। परि यदेषामेको विश्वेषां भुवद्देवो देवानां महित्वा ॥१॥ आदित्ते विश्वे क्रतुं जुषंत शुष्काद्यद्देव जीवो जनिष्ठाः। भजंत विश्वे देवत्वं नाम ऋतं सपंतो अमृतमेवैः ॥२॥ ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः। यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकि-

त्वान्रयिं दयस्व ॥ ३ ॥ होता निषत्तो मनोरपत्ये स चिन्न्वासां पती रयीणां । इच्छंत रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः ॥ ४ ॥ पितुर्न पुत्राः क्रतुं जुषंत श्रोषन्ये अस्य शासं तुरासः । वि राय और्णोद्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः ॥ ५ ॥ १२ ॥

॥ ६९ ॥ १–५ पराशरः शाक्त्यः ॥ अग्निः ॥ द्विपदा विराट् ॥

॥ ६९ ॥ शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः । परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन् ॥ १ ॥ वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा पितूनां । जने न शेव आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे ॥ २ ॥ पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत् । विशो यदह्वे नृभिः सनीळा अग्निर्देवत्वा विश्वान्यश्याः ॥ ३ ॥ नकिष्ट एता व्रता मिनंति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ । तत्तु ते दंसो यदहन्त्समानैर्नृभिर्यद्युक्तो विवे रपांसि ॥ ४ ॥ उषो न जारो विभावोस्रः संज्ञातरूपश्चिकेतदस्मै । त्मना वहंतो दुरो व्यृण्वन्नवंत विश्वे स्व१र्दृशीके ॥ ५ ॥ १३ ॥

॥ ७० ॥ १–६ पराशरः शाक्त्यः ॥ अग्निः ॥ द्विपदा विराट् ॥

॥ ७० ॥ वनेम पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः । आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म ॥ १ ॥ गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथां । अद्रौ चिदस्मा अंतर्दुरोणे विशां न विश्वो अमृतः स्वाधीः ॥ २ ॥ स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः । एता चिकित्वो भूमा नि पाहि देवानां जन्म

मर्तांश्च विद्वान् ॥३॥ वर्धान्यं पूर्वीः क्षपो विरूपाः स्थातुश्च
रथमृतप्रवीतं । अराधि होता स्व१र्निषत्तः कृण्वन्विश्वान्यपांसि
सत्या ॥४॥ गोषु प्रशस्तिं वनेषु धिषे भरंत विश्वे बलिं स्वर्णः ।
वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जिव्रेर्वि वेदो भरंत ॥५॥
साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु ॥६॥१४॥

॥ ७१ ॥ १–१० पराशरः शाक्त्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७१॥ उप प्र जिन्वन्नुशतीरुशंतं पतिं न नित्यं जनयः
सनीळाः । स्वसारः श्यावीमरुषीमजुषूञ्चित्रमुच्छंतीमुषसं
न गावः ॥१॥ वीळु चिद्दृळ्हा पितरो न उक्थैरद्रिं
रुजन्नंगिरसो रवेण । चक्रुर्दिवो बृहतो गातुमस्मे अहः
स्वर्विविदुः केतुमुस्राः ॥२॥ दधन्नृतं धनयन्नस्य धीति-
मादिदर्यो दिधिष्वो३ विभृत्राः । अतृष्यंतीरपसो यंत्यच्छा
देवाञ्जन्म प्रयसा वर्धयंतीः ॥३॥ मथीद्यदीं विभृतो
मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत् । आदीं राज्ञे न
सहीयसे सचा सन्ना दूत्यं१ भृगवाणो विवाय ॥४॥ महे
यत्पित्र ईं रसं दिवे करव त्सरत्पृशन्यश्चिकित्वान् । सृजदस्ता
धृषता दिद्युमस्मै स्वायां देवो दुहितरि त्विषिं धात् ॥५॥१५॥
स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो
अनु द्यून् । वर्धो अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं
यं जुनासि ॥६॥ अग्निं विश्वा अभि पृक्षः सचंते समुद्रं न
स्रवतः सप्त यह्वीः । न जामिभिर्वि चिकिते वयो नो विदा
देवेषु प्रमतिं चिकित्वान् ॥७॥ आ यदिषे नृपतिं तेज
आनट् शुचि रेतो निषिक्तं द्यौरभीके । अग्निः शर्धमनवद्यं

युवानं स्वाध्यं जनयत्सूदयच्च ॥८॥ मनो न योऽध्वनः सद्य
एत्येकः सत्रा सूरो वस्व ईशे । राजाना मित्रावरुणा सुपाणी
गोषु प्रियममृतं रक्षमाणा ॥९॥ मा नो अग्ने सख्या
पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन् । नभो न रूपं
जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि ॥१०॥१६॥

॥ ७२ ॥ १—१० पराशरः शाक्त्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७२॥ नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरू-
णि । अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि
विश्वा ॥१॥ अस्मे वत्सं परि षंतं न विंदन्निच्छंतो विश्वे अमृता
अमूराः । श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः ॥२॥
तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः सपर्यान् । नामा-
नि चिद्दधिरे यज्ञियान्यसूदयंत तन्व१ः सुजाताः ॥३॥ आ रोदसी
बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः । विदन्मर्तो
नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसं ॥४॥ संजानाना
उप सीदन्नभिज्ञु पत्नीवंतो नमस्यं नमस्यन् । रिरिक्वांसस्तन्वः
कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः ॥५॥१७॥ त्रिः
सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः । तेभी रक्षंते
अमृतं सजोषाः पशूंश्च स्थातॄंश्चरथं च पाहि ॥६॥ विद्वाँ अग्ने
वयुनानि क्षितीनां व्यानुषक्छुरुधो जीवसे धाः । अंतर्विद्वाँ
अध्वनो देवयानानतंद्रो दूतो अभवो हविर्वाट् ॥७॥
स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृतज्ञा अजानन् ।
विदद्गव्यं सरमा दृळ्हमूर्वं येना नु कं मानुषी भोजते
विट् ॥८॥ आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृ-

तत्वार्य गातुं। मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रै-
रदितिर्धायसे वेः ॥९॥ अधि श्रियं नि दधुश्चारुमस्मिन्दिवो
यदक्षी अमृता अकृण्वन्। अध क्षरंति सिंधवो न सृष्टाः प्र
नीचीरग्ने अरुषीरजानन् ॥१०॥१८॥

॥७३॥ १–१० पराशरः शाक्त्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७३॥ रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो
न शासुः। स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि
तारीत् ॥१॥ देवो न यः सविता सत्यमन्मा क्रत्वा निपाति
वृजनानि विश्वा। पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो
दिधिषाय्यो भूत् ॥२॥ देवो न यः पृथिवीं विश्वधाया उपक्षेति
हितमित्रो न राजा। पुरःसदः शर्मसदो न वीरा अनवद्या
पतिजुष्टेव नारी ॥३॥ तं त्वा नरो दम आ नित्यमिद्धमग्ने सचंत
क्षितिषु ध्रुवासु। अधि द्युम्नं नि दधुर्भूर्यस्मिन्भवा विश्वायुर्ध-
रुणो रयीणां ॥४॥ वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो
ददतो विश्वमायुः। सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे
दधानाः ॥५॥१९॥ ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः
पीपयंत द्युभक्ताः। परावतः सुमतिं भिक्षमाणा वि सिंधवः
समया सस्रुरद्रिं ॥६॥ त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्रवो
दधिरे यज्ञियासः। नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णम-
रुणं च सं धुः ॥७॥ यान्राये मर्तान्त्सुषूदो अग्ने ते स्याम मघ-
वानो वयं च। छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान्रोदसी
अंतरिक्षं ॥८॥ अर्वद्भिरग्ने अर्वतो नृभिर्नॄन्वीरैर्वीरान्वं-
नुयामा त्वोताः। ईशानासः पितृवित्तस्य रायो वि

सूर्यः शतहिमा नो अश्युः ॥९॥ एता ते अग्न उचथानि वेधो जुष्टानि संतु मनसे हृदे च । शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः ॥१०॥२०॥१२॥

॥ ७४ ॥ १–९ गोतमो राहूगणः ॥ अग्निः ॥ गायत्री ॥

॥७४॥ उपप्रयंतो अध्वरं मंत्रं वोचेमाग्नये । आरे अस्मे च शृण्वते ॥१॥ यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु । अरक्षद्दाशुषे गयं ॥२॥ उत ब्रुवंतु जंतव उदग्निर्वृत्रहाजनि । धनंजयो रणेरणे ॥३॥ यस्य दूतो असि क्षये वेषि हव्यानि वीतये । दस्मत्कृणोष्यध्वरं ॥४॥ तमित्सुहव्यमंगिरः सुदेवं सहसो यहो । जना आहुः सुबर्हिषं ॥५॥२१॥ आ च वहासि ताँ इह देवाँ उप प्रशस्तये । हव्या सुश्चंद्र वीतये ॥६॥ न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन । यदग्ने यासि दूत्यं ॥७॥ त्वोतो वाज्यह्रयोऽभि पूर्वस्मादपरः । प्र दाश्वाँ अग्ने अस्थात् ॥८॥ उत द्युमत्सुवीर्यं बृहदग्ने विवाससि । देवेभ्यो देव दाशुषे ॥९॥२२॥

॥ ७५ ॥ १–५ गोतमो राहूगणः ॥ अग्निः ॥ गायत्री ॥

॥७५॥ जुषस्व सप्रथस्तमं वचो देवप्सरस्तमं । हव्या जुह्वान आसनि ॥१॥ अथा ते अंगिरस्तमाग्ने वेधस्तम प्रियं । वोचेम ब्रह्म सानसि ॥२॥ कस्ते जामिर्जनानामग्ने को दाश्वध्वरः । को ह कस्मिन्नसि श्रितः ॥३॥ त्वं जामिर्जनानामग्ने मित्रो असि प्रियः । सखा सखिभ्य ईड्यः ॥४॥ यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् । अग्ने यक्षि स्वं दमं ॥५॥२३॥

॥ ७६ ॥ १—५ गोतमो राहूगणः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७६॥ का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा। को वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम॥१॥ एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः। अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान् ॥ २॥ प्र सु विश्वान्रक्षसो धक्ष्यग्ने भवा यज्ञानामभिशस्तिपावा। अथा वह सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदाव्ने॥३॥ प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः। वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयंतर्जनितर्वसूनां ॥४॥ यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन्। एवा होतः सत्यतर त्वमद्याग्ने मंद्रया जुह्वा यजस्व ॥५॥२४॥

॥ ७७ ॥ १—५ गोतमो राहूगणः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७७॥ कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः। यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥१॥ यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वं। अग्निर्यद्वेर्मर्ताय देवान्त्स चा बोधाति मनसा यजाति ॥२॥ स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः। तं मेधेषु प्रथमं देवयंतीर्विश उप ब्रुवते दस्ममारीः ॥३॥ स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिं। तना च ये मघवानः शविष्ठा वाजप्रसूता इषयंत मन्म ॥४॥ एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः। स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान् ॥५॥२५॥

॥ ७८ ॥ १–५ गोतमो राहूगणः ॥ अग्निः ॥ गायत्री ।

॥७८॥ अभि त्वा गोतमा गिरा जातवेदो विचर्षणे ।
द्युम्नैरभि प्र णोनुमः ॥१॥ तमु त्वा गोतमो गिरा रायस्कामो
दुवस्यति । द्युम्नैरभि प्र णोनुमः ॥२॥ तमु त्वा वाजसातममंगि-
रस्वद्धवामहे । द्युम्नैरभि प्र णोनुमः ॥३॥ तमु त्वा वृत्रहंतमं यो
दस्यूँरवधूनुषे । द्युम्नैरभि प्र णोनुमः ॥४॥ अवोचाम रहूगणा
अग्नये मधुमद्वचः । द्युम्नैरभि प्र णोनुमः ॥५॥२६॥

॥ ७९ ॥ १–१२ गोतमो राहूगणः ॥ १–३ अग्निरग्निर्मध्यमो वा । ४–१२ अग्निः ॥
१–३ त्रिष्टुप् । ४–६ उष्णिक् । ७–१२ गायत्री ॥

॥७९॥ हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव
ध्रजीमान् । शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्युवो न
सत्याः ॥१॥ आ ते सुपर्णा अमिनंतँ एवैः कृष्णो नोनाव
वृषभो यदीदं । शिवाभिर्न स्मयमानाभिरागात्पतंति मिहः
स्तनयंत्यभ्रा ॥२॥ यदीमृतस्य पयसा पियानो नयन्नृतस्य प-
थिभी रजिष्ठैः । अर्यमा मित्रो वरुणः परिज्मा त्वचं पृंचं-
त्युपरस्य योनौ ॥३॥ अग्ने वाजस्य गोमत ईशानः सहसो
यहो । अस्मे धेहि जातवेदो महि श्रवः ॥४॥ स इधानो वसु-
ष्कविरग्निरीळेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ॥५॥
क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । स तिग्मजंभ रक्षसो
दह प्रति ॥६॥२७॥ अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि ।
विश्वासु धीषु वंद्य ॥७॥ आ नो अग्ने रयिं भर सत्रासाहं वरेण्यं ।
विश्वासु पृत्सु दुष्टरं ॥८॥ आ नो अग्ने सुचेतुना रयिं विश्वा-
युपोषसं । मार्डीकं धेहि जीवसे ॥९॥ प्र पूतास्तिग्मशोचिषे
वाचो गोतमाग्नये । भरस्व सुम्नयुर्गिरः ॥१०॥ यो नो अग्ने-

ऽभिदासत्यंति दूरे पदीष्ट सः । अस्माकमिद्वृधे भव ॥ ११ ॥
सहस्राक्षो विचर्षणिरग्नी रक्षांसि सेधति । होता गृणीत
उक्थ्यः ॥ १२ ॥ २८ ॥

॥ ८० ॥ १–१६ गोतमो राहूगणः ॥ इंद्रः ॥ पंक्तिः ॥

॥ ८० ॥ इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनं । शविष्ठ
वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यं ॥ १ ॥
स त्वामदद्वृषा मदः सोमः श्येनाभृतः सुतः । येना वृत्रं
निरद्भ्यो जघंथ वज्रिन्नोजसार्चन्ननु स्वराज्यं ॥ २ ॥ प्रेह्यभीहि
धृष्णुहि न ते वज्रो नि यंसते । इंद्र नृम्णं हि ते शवो हनो
वृत्रं जया अपोऽर्चन्ननु स्वराज्यं ॥ ३ ॥ निरिंद्र भूम्या अधि
वृत्रं जघंथ निर्दिवः । सृजा मरुत्वतीरव जीवधन्या इमा
अपोऽर्चन्ननु स्वराज्यं ॥ ४ ॥ इंद्रो वृत्रस्य दोधतः सानुं वज्रेण
हीळितः । अभिक्रम्याव जिघ्नतेऽपः सर्माय चोदयन्नर्चन्ननु
स्वराज्यं ॥ ५ ॥ २९ ॥ अधि सानौ नि जिघ्नते वज्रेण शत-
पर्वणा । मंदान इंद्रो अंधसः सखिभ्यो गातुमिच्छत्यर्चन्ननु
स्वराज्यं ॥ ६ ॥ इंद्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यं । यद्ध त्यं
मायिनं मृगं तमु त्वं माययावधीरर्चन्ननु स्वराज्यं ॥ ७ ॥ वि
ते वज्रासो अस्थिरन्नवतिं नाव्या३अनु । महत्त इंद्र वीर्यं
बाह्वोस्ते बलं हितमर्चन्ननु स्वराज्यं ॥ ८ ॥ सहस्रं साकमर्चत
परि ष्टोभत विंशतिः । शतैनमन्वनोनवुरिंद्राय ब्रह्मोद्य-
तमर्चन्ननु स्वराज्यं ॥ ९ ॥ इंद्रो वृत्रस्य तविषीं निरहन्त्स-
हसा सहः । महत्तदस्य पौंस्यं वृत्रं जघन्वाँ असृजदर्चन्ननु
स्वराज्यं ॥ १० ॥ ३० ॥ इमे चित्तव मन्यवे वेपेते भि-

यसा मही । यदिंद्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवधीरर्चन्ननु
स्वराज्यं ॥११॥ न वेपसा न तन्यतेंद्रं वृत्रो वि बीभयत् ।
अभ्येनं वज्र आयसः सहस्रभृष्टिरायतार्चन्ननु स्वराज्यं ॥१२॥
यद्वृत्रं तव चाशनिं वज्रेण समयोधयः । अहिमिंद्र जिघांसतो
दिवि ते बद्बधे शवोऽर्चन्ननु स्वराज्यं ॥१३॥ अभिष्टने ते
अद्रिवो यत्स्था जगच्च रेजते । त्वष्टा चित्तव मन्यव इंद्र
वेविज्यते भियार्चन्ननु स्वराज्यं ॥१४॥ नहि नु यादधीमसींद्रं
को वीर्या परः । तस्मिन्नृम्णमुत क्रतुं देवा ओजांसि सं
दधुरर्चन्ननु स्वराज्यं ॥१५॥ यामथर्वा मनुष्पिता दध्यङ्
धियमत्नत । तस्मिन्ब्रह्माणि पूर्वथेंद्र उक्था समग्मतार्चन्ननु
स्वराज्यं ॥१६॥३१॥५॥

॥ ८१ ॥ १–९ गोतमो राहूगणः ॥ इंद्रः ॥ पंक्तिः ॥

॥८१॥ इंद्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोऽवि-
षत् ॥१॥ असि हि वीर सेन्योऽसि भूरि परादिदः । असि
दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥२॥
यदुदीरत आजयो धृष्णवे धीयते धना । युक्ष्वा मदच्युता हरी
कं हनः कं वसौ दधोऽस्माँ इंद्र वसौ दधः ॥३॥ क्रत्वा महाँ
अनुष्वधं भीम आ वावृधे शवः । श्रिय ऋष्व उपाकयोर्नि
शिप्री हरिवान्दधे हस्तयोर्वज्रमायसं ॥४॥ आ पप्रौ पार्थिवं
रजो बद्बधे रोचना दिवि । न त्वावाँ इंद्र कश्चन न जातो न
जनिष्यतेऽति विश्वं ववक्षिथ ॥५॥१॥ यो अर्यो मर्तभोजनं
पराददाति दाशुषे । इंद्रो अस्मभ्यं शिक्षतु वि भजा भूरि ते वसु

भक्षीय तव राधसः ॥६॥ मदेमदे हि नो ददिर्यूथा गवामृजुक्र-
तुः । सं गृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय आ
भर ॥७॥ मादयस्व सुते सचा शवसे शूर राधसे । विद्मा हि त्वा
पुरूवसुमुप कामान्ससृज्महेऽथा नोऽविता भव ॥८॥ एते त
इंद्र जंतवो विश्वं पुष्यंति वार्यं । अंतर्हि ख्यो जनानामर्यो वेदो
अदाशुषां तेषां नो वेद आ भर ॥९॥२॥

॥ ८२ ॥ १–६ गोतमो राहूगणः ॥ इंद्रः ॥ १–५ पंक्तिः । ६ जगती ॥

॥८२॥ उपो षु शृणुही गिरो मघवन्मातथा इव । यदा नः
सूनृतावतः कर आदर्थयास इद्योजा न्विंद्र ते हरी ॥१॥ अक्षन्न-
मीमदंत ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा
नविष्ठया मती योजा न्विंद्र ते हरी ॥२॥ सुसंदृशं त्वा वयं मघ-
वन्वंदिषीमहि । प्र नूनं पूर्णवंधुरः स्तुतो याहि वशाँ अनु योजा
न्विंद्र ते हरी ॥३॥ स घा तं वृषणं रथमधि तिष्ठाति गोविदं । यः
पात्रं हारियोजनं पूर्णमिंद्र चिकेतति योजा न्विंद्र ते हरी ॥४॥
युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो । तेन जायामुप प्रियां
मंदानो याह्यंधसो योजा न्विंद्र ते हरी ॥५॥ युनज्मि ते ब्रह्मणा
केशिना हरी उप प्र याहि दधिषे गभस्त्योः । उत्त्वा सुतासो रभ-
सा अमंदिषुः पूषण्वान्वज्रिन्त्समु पत्न्यामदः ॥६॥३॥

॥ ८३ ॥ १–६ गोतमो राहूगणः ॥ इंद्रः ॥ जगती ॥

॥८३॥ अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिंद्र मर्त्य-
स्तवोतिभिः । तमित्पृणक्षि वसुना भवीयसा सिंधुमापो यथा-
भितो विचेतसः ॥१॥ आपो न देवीरुप यंति होत्रियमवः
पश्यंति विततं यथा रजः । प्राचैर्देवासः प्र णयंति देवयुं

ब्रह्मप्रियं जोषयंते वरा इव ॥२॥ अधि द्वयोरदधा उक्थ्यं१ वचो
यतस्रुचा मिथुना या सपर्यतः। असंयत्तो व्रते ते क्षेति पुष्यति
भद्रा शक्तिर्यजमानाय सुन्वते ॥३॥ आदंगिराः प्रथमं दधिरे वय
इद्धाग्नयः शम्या ये सुकृत्यया। सर्वं पणेः समविंदंत भोजनम-
श्वावंतं गोमंतमा पशुं नरः ॥४॥ यज्ञैरथर्वा प्रथमः पथस्तते
ततः सूर्यो व्रतपा वेन आजनि। आ गा आजदुशना काव्यः सचा
यमस्य जातममृतं यजामहे ॥५॥ बर्हिर्वा यत्स्वपत्याय वृज्य-
तेऽर्को वा श्लोकमाघोषते दिवि। ग्रावा यत्र वदति कारु-
रुक्थ्य१स्तस्येदिंद्रो अभिपित्वेषु रण्यति ॥६॥४॥

॥ ८४ ॥ १–२० गोतमो राहूगणः ॥ इंद्रः ॥ १–६ अनुष्टुप् । ७–९ उष्णिक् । १०–१२ पंक्तिः ।
१३–१५ गायत्री । १६–१८ त्रिष्टुप् । १९ बृहती । २० सतोबृहती ॥

॥८४॥ असावि सोम इंद्र ते शविष्ठ धृष्णवा गहि। आ त्वा
पृणक्त्विंद्रियं रजः सूर्यो न रश्मिभिः ॥१॥ इंद्रमिद्धरी वहतोऽप्र-
तिधृष्टशवसं। ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणां ॥२॥ आ
तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनं सु ते मनो ग्रावा
कृणोतु वग्नुना ॥३॥ इममिंद्र सुतं पिब ज्येष्ठममर्त्यं मदं। शुक्रस्य
त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥४॥ इंद्राय नूनमर्चतोक्थानि
च ब्रवीतन। सुता अमत्सुरिंदवो ज्येष्ठं नमस्यता सहः ॥५॥५॥
नकिष्ट्वद्रथीतरो हरी यदिंद्र यच्छसे। नकिष्ट्वानु मज्मना नकिः
स्वश्व आनशे ॥६॥ य एक इद्विदयते वसु मर्ताय दाशुषे। ईशानो
अप्रतिष्कुत इंद्रो अंग ॥७॥ कदा मर्तमराधसं पदा क्षुंपमिव
स्फुरत्। कदा नः शुश्रवद्गिर इंद्रो अंग ॥८॥ यश्चिद्धि त्वा बहुभ्य
आ सुतावाँ आविवासति। उग्रं तत्पत्यते शव इंद्रो अंग ॥९॥

स्वादोरित्था विषूवतो मध्वः पिबंति गौर्यः। या इंद्रेण सया-
वरीर्वृष्णा मदंति शोभसे वस्वीरनु स्वराज्यं॥१०॥६॥ ता अस्य
पृशनायुवः सोमं श्रीणंति पृश्नयः। प्रिया इंद्रस्य धेनवो वज्रं
हिन्वंति सायकं वस्वीरनु स्वराज्यं ॥११॥ ता अस्य नमसा
सहः सपर्यंति प्रचेतसः। व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये
वस्वीरनु स्वराज्यं॥१२॥ इंद्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कु-
तः। जघान नवतीर्नव॥१३॥ इच्छन्नश्वस्य यच्छिरः पर्वतेष्वप-
श्रितं। तद्विदच्छर्यणावति ॥१४॥ अत्राह गोरमन्वत नाम
त्वष्टुरपीच्यं। इत्था चंद्रमसो गृहे॥१५॥७॥ को अद्य युंक्ते धुरि
गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून्। आसन्निषून्हृत्स्व-
सो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥१६॥ क ईषते
तुज्यते को बिभाय को मंसते संतमिंद्रं को अंति। कस्तोकाय
क इभायोत रायेऽधि ब्रवत्तन्वे३ को जनाय॥१७॥ को अग्नि-
मीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः। कस्मै
देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः॥१८॥
त्वमंग प्र शंसिषो देवः शविष्ठ मर्त्यं। न त्वदन्यो मघवन्नस्ति
मर्डितेंद्र ब्रवीमि ते वचः॥१९॥ मा ते राधांसि मा त
ऊतयो वसोऽस्मान्कदा चना दभन्। विश्वा च न उपमि-
मीहि मानुष वसूनि चर्षणिभ्य आ॥२०॥८॥१३॥

॥ ८५ ॥ १–१२ गोतमो राहूगणः ॥ मरुतः ॥ १–४. ६–११ जगती। ५. १२ त्रिष्टुप्॥

॥८५॥ प्र ये शुंभंते जनयो न सप्तयो यामन्रुद्रस्य सूनवः
सुदंससः। रोदसी हि मरुतश्चक्रिरे वृधे मदंति वीरा विदथेषु
घृष्वयः॥१॥ त उक्षितासो महिमानमाशत दिवि रुद्रासो

अधि चक्रिरे सदः। अर्चंतो अर्कं जनयंत इंद्रियमधि श्रियो
दधिरे पृश्निमातरः ॥२॥ गोमातरो यच्छुभयंते अंजिभि-
स्तनूषु शुभ्रा दधिरे विरुक्मतः। बाधंते विश्वमभिमातिनमप
वर्त्मान्येषामनु रीयते घृतं ॥३॥ वि ये भ्राजंते सुमखास
ऋष्टिभिः प्रच्यावयंतो अच्युता चिदोजसा। मनोजुवो
यन्मरुतो रथेष्वा वृषव्रातासः पृषतीरयुग्ध्वं ॥४॥ प्र यद्र-
थेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयंतः। उतारुषस्य
वि ष्यंति धाराश्चर्मेवोदभिर्व्युंदंति भूम ॥५॥ आ वो
वहंतु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः।
सीदता बर्हिरुरु वः सदस्कृतं मादयध्वं मरुतो मध्वो
अंधसः ॥६॥९॥ तेऽवर्धंत स्वतवसो महित्वना नाकं
तस्थुरुरु चक्रिरे सदः। विष्णुर्यद्धावद्वृषणं मदच्युतं वयो
न सीदन्नधि बर्हिषि प्रिये ॥७॥ शूरा इवेद्युयुधयो न
जग्मयः श्रवस्यवो न पृतनासु येतिरे। भयंते विश्वा भुवना
मरुद्भ्यो राजान इव त्वेषसंदृशो नरः ॥८॥ त्वष्टा यद्वज्रं
सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत्। धत्त इंद्रो
नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौब्जदर्णवं ॥९॥ ऊर्ध्वं नुनु-
द्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतं। धमंतो
वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥१०॥
जिह्मं नुनुद्रेऽवतं तया दिशासिंचन्नुत्सं गोतमाय तृष्णजे।
आ गच्छंतीमवसा चित्रभानवः कामं विप्रस्य तर्पयंत
धामभिः ॥११॥ या वः शर्म शशमानाय संति त्रिधातूनि
दाशुषे यच्छताधि। अस्मभ्यं तानि मरुतो वि यंत रयिं नो
धत्त वृषणः सुवीरं ॥१२॥१०॥

॥ ८६ ॥ १—१० गोतमो राहूगणः ॥ मरुतः ॥ गायत्री ॥

॥८६॥ मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥१॥ यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनां । मरुतः शृणुता हवं ॥२॥ उत वा यस्य वाजिनोऽनु विप्रमतक्षत । स गंता गोमति व्रजे ॥३॥ अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु । उक्थं मदश्च शस्यते ॥४॥ अस्य श्रोषंत्वा भुवो विश्वा यश्चर्षणीरभि । सूरं चित्सस्रुषीरिषः ॥५॥११॥ पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयं । अवोभिश्चर्षणीनां ॥६॥ सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः । यस्य प्रयांसि पर्षथ ॥७॥ शशमानस्य वा नरः स्वेदस्य सत्यशवसः । विदा कामस्य वेनतः ॥८॥ यूयं तत्सत्यशवस आविष्कर्त महित्वना । विध्यता विद्युता रक्षः ॥९॥ गूहता गुह्यं तमो वि यात विश्वमत्रिणं । ज्योतिष्कर्ता यदुश्मसि ॥१०॥१२॥

॥ ८७ ॥ १—६ गोतमो राहूगणः ॥ मरुतः ॥ जगती ॥

॥८७॥ प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः । जुष्टतमासो नृतमासो अंजिभिर्व्यानज्रे के चिदुस्रा इव स्तृभिः ॥१॥ उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित्पथा । श्चोतंति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥२॥ प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युंजते शुभे । ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयंत धूतयः ॥३॥ स हि स्वसृत्पृषदश्वो युवा गणोऽ३या ईशानस्तविषीभिरावृतः । असि सत्य ऋणयावाऽनेद्योऽस्या धियः प्राविताथा वृषा गणः ॥४॥ पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा । यदीमिंद्रं शम्यृक्वाण

आशतादिन्नामानि यज्ञियानि दधिरे ॥५॥ श्रियसे कं भानुभिः
सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः । ते वाशीमंत
इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥६॥१३॥

॥ ८८ ॥ १–६ गोतमो राहूगणः ॥ मरुतः ॥ १. ६ प्रस्तारपंक्तिः । २–४ त्रिष्टुप् । ५ विराड्रूपा ॥

॥८८॥ आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भि-
रश्वपर्णैः । आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥१॥
तेऽरुणेभिर्वरमा पिशंगैः शुभे कं यांति रथतूर्भिरश्वैः । रुक्मो
न चित्रः स्वधितीवान्पव्या रथस्य जंघनंत भूम ॥२॥ श्रिये कं
वो अधि तनूषु वाशीर्मेधा वना न कृणवंत ऊर्ध्वा । युष्मभ्यं कं
मरुतः सुजातास्तुविद्युम्नासो धनयंते अद्रिं ॥३॥ अहानि गृध्राः
पर्या व आगुरिमां धियं वार्कार्यां च देवीं । ब्रह्म कृण्वंतो गोत-
मासो अर्कैरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै ॥४॥ एतत्त्यन्न योज-
नमचेति सस्वर्ह यन्मरुतो गोतमो वः । पश्यन्हिरण्यचक्रान-
योदंष्ट्रान्विधावतो वराहून् ॥५॥ एषा स्या वो मरुतोऽनुभर्त्री
प्रति ष्टोभति वाघतो न वाणी । अस्तोभयद्वृथासामनु स्वधां
गभस्त्योः ॥६॥१४॥

॥८९॥ १–१० गोतमो राहूगणः ॥ विश्वे देवाः ॥ १–५. ७ जगती । ६ विराट्स्थाना । ८–१० त्रिष्टुप् ॥

॥८९॥ आ नो भद्राः क्रतवो यंतु विश्वतोऽदब्धासो अप-
रीतास उद्भिदः । देवा नो यथा सदमिद्वृधे असन्नप्रायुवो
रक्षितारो दिवेदिवे ॥१॥ देवानां भद्रा सुमतिर्ऋजूयतां देवा-
नां रातिरभि नो नि वर्ततां । देवानां सख्यमुप सेदिमा वयं
देवा न आयुः प्र तिरंतु जीवसे ॥२॥ तान्पूर्वया निविदा हूमहे
वयं भगं मित्रमदितिं दक्षमस्रिधं । अर्यमणं वरुणं सोमम-

श्विना सरस्वती नः सुभगा मयस्करत् ॥३॥ तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः। तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवं ॥४॥ तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयं। पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥१५॥ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥ पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥७॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥८॥ शतमिन्नु शरदो अंति देवा यत्रा नश्चक्रा जरसं तनूनां। पुत्रासो यत्र पितरो भवंति मा नो मध्या रीरिषतायुर्गंतोः ॥९॥ अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पंच जना अदितिर्जातमदितिर्जनित्वं ॥१०॥१६॥

॥९०॥ १—९ गोतमो राहूगणः ॥ विश्वे देवाः ॥ १—८ गायत्री। ९ अनुष्टुप् ॥

॥९०॥ ऋजुनीती नो वरुणो मित्रो नयतु विद्वान्। अर्यमा देवैः सजोषाः ॥१॥ ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः। व्रता रक्षंते विश्वाहा ॥२॥ ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः। बाधमाना अप द्विषः ॥३॥ वि नः पथः सुवितायं चियंत्विंद्रो मरुतः। पूषा भगो वंद्यासः ॥४॥ उत नो धियो गोअग्राः पूषन्विष्णवेवयावः। कर्ता नः स्वस्तिमतः ॥५॥१७॥ मधु वाता ऋतायते मधु क्षरंति सिंधवः। माध्वीर्नः

संत्वोषधीः ॥६॥ मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु
द्यौरस्तु नः पिता ॥७॥ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः।
माध्वीर्गावो भवंतु नः ॥८॥ शं नो मित्रः शं वरुणः शं नो भव-
त्वर्यमा। शं न इंद्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥९॥१८॥

॥९१॥ १–२३ गोतमो राहूगणः ॥ सोमः ॥ १–४. १८–२३ त्रिष्टुप्। ५–१६ गायत्री। १७ उष्णिक् ॥

॥९१॥ त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषि
पंथाँ। तव प्रणीती पितरो न इंदो देवेषु रत्नमभजंत
धीराः ॥१॥ त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्व-
वेदाः। त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥२॥
राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥३॥
या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु।
तेभिर्नो विश्वैः सुमना अहेळन्राजन्त्सोम प्रति हव्या
गृभाय ॥४॥ त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा। त्वं
भद्रो असि क्रतुः ॥५॥१९॥ त्वं च सोम नो वशो जीवातुं न
मरामहे। प्रियस्तोत्रो वनस्पतिः ॥६॥ त्वं सोम महे भगं त्वं यून
ऋतायते। दक्षं दधासि जीवसे ॥७॥ त्वं नः सोम विश्वतो रक्षा
राजन्नघायतः। न रिष्येत्त्वावतः सखा ॥८॥ सोम यास्ते मयोभुव
ऊतयः संति दाशुषे। ताभिर्नोऽविता भव ॥९॥ इमं यज्ञमिदं
वचो जुजुषाण उपागहि। सोम त्वं नो वृधे भव ॥१०॥२०॥
सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः। सुमृळीको न
आ विश ॥११॥ गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः।
सुमित्रः सोम नो भव ॥१२॥ सोम रारंधि नो हृदि गावो न

यवसेष्वा । मर्य इव स्व ओक्ये ॥१३॥ यः सोम सख्ये तव रार-
णद्देव मर्त्यः । तं दक्षः सचते कविः ॥१४॥ उरुष्या णो अभिशस्तेः
सोम नि पाह्यंहसः । सखा सुशेव एधि नः ॥१५॥२१॥ आ प्यायस्व
समेतु ते विश्वतः सोम वृष्ण्यं । भवा वाजस्य संगथे ॥१६॥ आ
प्यायस्व मदिंतम सोम विश्वेभिरंशुभिः । भवा नः सुश्रवस्तमः
सखा वृधे ॥१७॥ सं ते पयांसि समु यंतु वाजाः सं वृष्ण्यान्यभि-
मातिषाहः । आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमा-
नि धिष्व ॥१८॥ या ते धामानि हविषा यजंति ता ते विश्वा
परिभूरस्तु यज्ञं । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा
सोम दुर्यान् ॥१९॥ सोमो धेनुं सोमो अर्वंतमाशुं सोमो वीरं
कर्मण्यं ददाति । साद्न्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशद-
स्मै ॥२०॥२२॥ अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य
गोपां । भरेषुजां सुक्षितिं सुश्रवसं जयंतं त्वामनु मदेम सोम ॥२१॥
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः । त्वमा
ततंथोर्वं१तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥२२॥ देवेन नो
मनसा देव सोम रायो भागं सहसावन्नभि युध्य । मा त्वा तनदी-
शिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥२३॥२३॥

॥ ९२ ॥ १–१८ गोतमो राहूगणः ॥ १–१५ उषाः । १६–१८ अश्विनौ ॥ १–४ जगती । ५–१२ त्रिष्टुप् । १३–१८ उष्णिक् ॥

॥९२॥ एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रज-
सो भानुमंजते । निष्कृण्वाना आयुधानीव धृष्णवः प्रति
गावोऽरुषीर्यंति मातरः ॥१॥ उदपप्तन्नरुणा भानवो वृथा
स्वायुजो अरुषीर्गा अयुक्षत । अक्रन्नुषासो वयुनानि
पूर्वथा रुशंतं भानुमरुषीरशिश्रयुः ॥२॥ अर्चंति नारीर-

पसो न विष्टिभिः समानेन योजनेना परावतः । इषं
वहंतीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥३॥
अधि पेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहं ।
ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्यु१षा
आवर्तमः ॥४॥ प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते
बाधते कृष्णमभ्वं । स्वरुं न पेशो विदथेष्वंजञ्चित्रं दिवो
दुहिता भानुमश्रेत् ॥५॥२४॥ अतारिष्म तमसस्पारमस्योषा
उच्छंती वयुना कृणोति । श्रिये छंदो न स्मयते विभाती सुप्र-
तीका सौमनसायाजीगः ॥६॥ भास्वती नेत्री सूनृतानां दिवः
स्तवे दुहिता गोतमेभिः । प्रजावतो नृवतो अश्वबुध्यानुषो
गोअग्राँ उप मासि वाजान् ॥७॥ उषस्तमश्यां यशसं
सुवीरं दासप्रवर्गं रयिमश्वबुध्यं । सुदंससा श्रवसा या वि-
भासि वाजप्रसूता सुभगे बृहंतं ॥८॥ विश्वानि देवी भुवना-
भिचक्ष्या प्रतीची चक्षुरुर्विया वि भाति । विश्वं जीवं चरसे
बोधयंती विश्वस्य वाचमविदन्मनायोः ॥९॥ पुनःपुनर्जा-
यमाना पुराणी समानं वर्णमभि शुंभमाना । श्वघ्नीव
कृत्नुर्विज आमिनाना मर्तस्य देवी जरयंत्यायुः ॥१०॥२५॥
व्यूर्ण्वती दिवो अंताँ अबोध्यप स्वसारं सनुतर्युयोति । प्रमि-
नती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥११॥
पशून्न चित्रा सुभगा प्रथाना सिंधुर्न क्षोद उर्विया व्यश्वैत् ।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशा-
ना ॥१२॥ उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति । येन
तोकं च तनयं च धामहे ॥१३॥ उषो अद्येह गोमत्यश्वा-
वति विभावरि । रेवदस्मे व्युच्छ सूनृतावति ॥१४॥

युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः। अथा नो विश्वा सौभगान्या वह ॥ १५ ॥ २६ ॥ अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत्। अर्वाग्रथं समनसा नि यच्छतं ॥ १६ ॥ यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः। आ न ऊर्जं वहतमश्विना युवं ॥ १७ ॥ एह देवा मयोभुवा दस्रा हिरण्यवर्तनी। उषर्बुधो वहंतु सोमपीतये ॥ १८ ॥ २७ ॥

॥ ९३ ॥ १–१२ गोतमो राहूगणः ॥ अग्नीषोमौ ॥ १–३ अनुष्टुप्। ४–७. १२ त्रिष्टुप्। ८ जगती त्रिष्टुब्वा। ९–११ गायत्री ॥

॥ ९३ ॥ अग्नीषोमाविमं सु मे शृणुतं वृषणा हवं। प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥ १ ॥ अग्नीषोमा यो अद्य वामिदं वचः सपर्यति। तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यं ॥ २ ॥ अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिं। स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् ॥ ३ ॥ अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिं गाः। अवातिरतं बृसयस्य शेषोऽविंदतं ज्योतिरेकं बहुभ्यः ॥ ४ ॥ युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तं। युवं सिंधूँरभिशस्तेरवद्यादग्नीषोमावमुंचतं गृभीतान् ॥ ५ ॥ आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः। अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकं ॥ ६ ॥ २८ ॥ अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथां। सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥ ७ ॥ यो अग्नीषोमा हविषा सपर्याद्देवद्रीचा मनसा यो घृतेन। तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतं ॥ ८ ॥ अग्नीषोमा सवेदसा सहूती वनतं गिरः। सं देवत्रा बभूवथुः ॥ ९ ॥ अग्नीषोमावनेन वां यो वां घृतेन दाशति। तस्मै दीदयतं बृहत्

॥१०॥ अग्नीषोमाविमानि नो युवं हव्या जुजोषतं। आ यातमुप
नः सचा ॥११॥ अग्नीषोमा पिपृतमर्वतो न आ प्यायंतामु-
स्रिया हव्यसूदः। अस्मे बलानि मघवत्सु धत्तं कृणुतं नो
अध्वरं श्रुष्टिमंतं ॥१२॥२९॥१४॥

॥९४॥ १–१६ कुत्स आंगिरसः ॥ १–७. ८[४]. ९–१६[१.२] अग्निः। ८[१.२.३] देवाः। १६[३.४] मित्रो
वरुणोऽदितिः सिंधुः पृथिवी द्यौरग्निर्वा ॥ १–१४ जगती। १५. १६ त्रिष्टुप् ॥

॥९४॥ इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनी-
षया। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं
तव ॥१॥ यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यं। स
तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव ॥२॥ शकेम
त्वा समिधं साधया धियस्त्वे देवा हविरदंत्याहुतं। त्वमादित्याँ आ
वह तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव ॥३॥ भरामेध्मं
कृणवामा हवींषि ते चितयंतः पर्वणापर्वणा वयं। जीवातवे
प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥४॥ विशां
गोपा अस्य चरंति जंतवो द्विपच्च यदुत चतुष्पदक्तुभिः। चित्रः
प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव ॥५॥३०॥ त्व-
मध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः। विश्वा
विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव ॥६॥
यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे।
राच्र्याश्चिदंधो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव ॥७॥
पूर्वो देवा भवतु सुन्वतो रथोऽस्माकं शंसो अभ्यस्तु दूढ्यः। तदा
जानीतोत पुष्यता वचोऽग्ने सख्ये मा रिषामा वयं तव ॥८॥ व-
धैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अंति वा के चिदत्रिणः। अथा

यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव ॥ ९ ॥
यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः ।
आदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं
तव ॥ १० ॥ ३१ ॥ अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा यत्ते
यवसादो व्यस्थिरन् । सुगं तत्ते तावकेभ्यो रथेभ्योऽग्ने सख्ये मा
रिषामा वयं तव ॥ ११ ॥ अयं मित्रस्य वरुणस्य धायसेऽवयातां
मरुतां हेळो अद्भुतः । मृळा सु नो भूत्वेषां मनः पुनरग्ने सख्ये
मा रिषामा वयं तव ॥ १२ ॥ देवो देवानामसि मित्रो अद्भुतो
वसुर्वसूनामसि चारुरध्वरे । शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने
सख्ये मा रिषामा वयं तव ॥ १३ ॥ तत्ते भद्रं यत्समिद्धः स्वे दमे
सोमाहुतो जरसे मृळयत्तमः । दधासि रत्नं द्रविणं च दाशुषेऽग्ने
सख्ये मा रिषामा वयं तव ॥ १४ ॥ यस्मै त्वं सुद्रविणो ददा-
शोऽनागास्त्वमदिते सर्वताता । यं भद्रेण शवसा चोदयासि
प्रजावता राधसा ते स्याम ॥ १५ ॥ स त्वमग्ने सौभगत्वस्य विद्वा-
नस्माकमायुः प्र तिरेह देव । तन्नो मित्रो वरुणो मामहंता-
मदितिः सिंधुः पृथिवी उत द्यौः ॥ १६ ॥ ३२ ॥ ६ ॥

॥ ९५ ॥ १–११ कुत्स आंगिरसः ॥ अग्निरग्निरौषसो वा ॥ त्रिष्टुप् ॥

॥ ९५ ॥ द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप
धापयेते । हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां
ददृशे सुवर्चाः ॥ १ ॥ दशेमं त्वष्टुर्जनयंत गर्भमतंद्रासो युव-
तयो विभृत्रं । तिग्मानीकं स्वयशसं जनेषु विरोचमानं
परि षीं नयंति ॥ २ ॥ त्रीणि जाना परि भूषंत्यस्य समुद्र
एकं दिव्येकमप्सु । पूर्वामनु प्र दिशं पार्थिवानामृतून्प्रशा-

सद्वि दधावनुष्ठु ॥३॥ क इमं वो निण्यमा चिकेत वत्सो
मातॄर्जनयत स्वधाभिः । बह्वीनां गर्भो अपसामुपस्थान्म-
हान्कविर्निश्चरति स्वधावान् ॥४॥ आविष्ट्यो वर्धते चारुरासु
जिह्मानामूर्ध्वः स्वयशा उपस्थे । उभे त्वष्टुर्बिभ्यतुर्जायमा-
नात्प्रतीची सिंहं प्रति जोषयेते ॥५॥१॥ उभे भद्रे जोषयेते
न मेने गावो न वाश्रा उप तस्थुरेवैः । स दक्षाणां
दक्षपतिर्बभूवांजंति यं दक्षिणतो हविर्भिः ॥६॥ उद्यंयमीति
सवितेव बाहू उभे सिचौ यतते भीम ऋंजन् । उच्छुक्र-
मत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति ॥७॥
त्वेषं रूपं कृणुत उत्तरं यत्संपृंचानः सदने गोभिरद्भिः । कविर्बुध्नं
परि मर्मृज्यते धीः सा देवताता समितिर्बभूव ॥८॥ उरु ते ज्रयः
पर्येति बुध्नं विरोचमानं महिषस्य धाम । विश्वेभिरग्ने स्वयशो-
भिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान् ॥९॥ धन्वन्त्स्रोतः कृणुते
गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षां । विश्वा सनानि जठरेषु
धत्तेऽंतर्नवासु चरति प्रसूषु ॥१०॥ एवा नो अग्ने समिधा वृधानो
रेवत्पावक श्रवसे वि भाहि । तन्नो मित्रो वरुणो मामहंताम-
दितिः सिंधुः पृथिवी उत द्यौः ॥११॥२॥

॥ ९६ ॥ १–९ कुत्स आंगिरसः ॥ अग्निरग्निर्द्रविणोदा वा ॥ त्रिष्टुप् ॥

॥९६॥ स प्रत्नथा सहसा जायमानः सद्यः काव्यानि
बळधत्त विश्वा । आपश्च मित्रं धिषणा च साधन्देवा अग्निं
धारयन्द्रविणोदां ॥१॥ स पूर्वया निविदा कव्यतायोरिमाः
प्रजा अजनयन्मनूनां । विवस्वता चक्षसा द्यामपश्च देवा
अग्निं धारयन्द्रविणोदां ॥२॥ तमीळत प्रथमं यज्ञसाधं

विश आरीराहुतमृंजसानं। ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं
धारयन्द्रविणोदां ॥३॥ स मातरिश्वा पुरुवारपुष्टिर्विदद्गातुं
तनयाय स्वर्वित्। विशां गोपा जनिता रोदस्योर्देवा अग्निं
धारयन्द्रविणोदां ॥४॥ नक्तोषासा वर्णमामेम्याने धापयेते
शिशुमेकं समीची। द्यावाक्षामा रुक्मो अंतर्वि भाति देवा
अग्निं धारयन्द्रविणोदां ॥५॥३॥ रायो बुध्नः संगमनो वसूनां
यज्ञस्य केतुर्मन्मसाधनो वेः। अमृतत्वं रक्षमाणास एनं देवा
अग्निं धारयन्द्रविणोदां ॥६॥ नू च पुरा च सदनं रयीणां
जातस्य च जायमानस्य च क्षां। सतश्च गोपां भवतश्च भूरेर्देवा
अग्निं धारयन्द्रविणोदां ॥७॥ द्रविणोदा द्रविणसस्तुरस्य
द्रविणोदाः सनरस्य प्र यंसत्। द्रविणोदा वीरवतीमिषं नो
द्रविणोदा रासते दीर्घमायुः ॥८॥ एवा नो अग्ने समिधा
वृधानो रेवत्पावक श्रवसे वि भाहि। तन्नो मित्रो वरुणो
मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥९॥४॥

॥ ९७ ॥ १-८ कुत्स आंगिरसः ॥ अग्निरग्निः शुचिर्वा ॥ गायत्री ॥

॥९७॥ अप नः शोशुचदघमग्ने शुशुग्ध्या रयिं। अप
नः शोशुचदघं ॥१॥ सुक्षेत्रिया सुगातुया वसूया च
यजामहे। अप नः शोशुचदघं ॥२॥ प्र यद्भंदिष्ठ एषां
प्रास्माकासश्च सूरयः। अप नः शोशुचदघं ॥३॥ प्र यत्ते
अग्ने सूरयो जायेमहि प्र ते वयं। अप नः शोशुचदघं ॥४॥ प्र
यदग्नेः सहस्वतो विश्वतो यंति भानवः। अप नः शोशुच-
दघं ॥५॥ त्वं हि विश्वतोमुख विश्वतः परिभूरसि। अप
नः शोशुचदघं ॥६॥ द्विषो नो विश्वतोमुखाति नावेव

पार॑य। अप॑ नः॒ शोशु॑चद॒घं॥७॥ स नः॒ सिंधु॑मिव ना॒वयाति॑
पर्षा स्व॒स्तये॑। अप॑ नः॒ शोशु॑चद॒घं ॥८॥५॥

॥९८॥ १–३ कुत्स आंगिरसः ॥ अग्निर्वैश्वानरो वा ॥ त्रिष्टुप् ॥

॥९८॥ वै॒श्वा॒न॒रस्य॑ सुम॒तौ स्या॑म॒ राजा॒ हि कं॒ भुव॑नानामभि॒-
श्रीः। इ॒तो जा॒तो विश्व॑मि॒दं वि च॑ष्टे वैश्वान॒रो य॑तते॒ सूर्ये॑ण॥१॥
पृ॒ष्टो दि॒वि पृ॒ष्टो अ॒ग्निः पृ॑थि॒व्यां पृ॒ष्टो विश्वा॒ ओष॑धी॒रा वि॑वेश।
वै॒श्वा॒न॒रः सह॑सा पृ॒ष्टो अ॒ग्निः स नो॒ दिवा॒ स रि॒षः पा॑तु॒ नक्तं॑॥२॥
वैश्वा॑नर॒ तव॒ तत्स॒त्यम॑स्त्व॒स्मान्रायो॑ म॒घवा॑नः सचंतां। तन्नो॑ मि॒-
त्रो वरु॑णो मामहंता॒मदि॑तिः॒ सिंधुः॑ पृथि॒वी उ॒त द्यौः ॥३॥६॥

॥९९॥ १ कश्यपो मारीचः ॥ अग्निरग्निर्जातवेदा वा ॥ त्रिष्टुप् ॥

॥९९॥ जा॒तवे॑दसे सुनवाम॒ सोम॑मरातीय॒तो नि द॑हाति॒
वेदः॑। स नः॑ पर्ष॒दति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वेव॒ सिंधुं॑ दुरि॒-
तात्य॒ग्निः ॥१॥७॥

॥१००॥ १–१९ वृषागिरो महाराजस्य पुत्रभूता वार्षागिरा ऋज्राश्वांबरीषसहदेवभयमानसुराधसो वार्षागिराः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१००॥ स यो वृषा॒ वृष्ण्ये॑भिः॒ समो॑का म॒हो दि॒वः पृ॑थि॒व्याश्च॑
स॒म्राट्। स॒ती॒नस॑त्वा॒ हव्यो॒ भरे॑षु म॒रुत्वा॑न्नो भवत्विंद्र॒ ऊती ॥१॥
यस्याना॑प्तः॒ सूर्य॑स्येव॒ यामो॒ भरे॑भरे वृत्र॒हा शुष्मो॒ अस्ति॑। वृष॑तमः॒
सखि॑भिः॒ स्वेभि॒रेवै॑र्म॒रुत्वा॑न्नो भवत्विंद्र॒ ऊती॥२॥ दि॒वो न यस्य॒
रेत॑सो॒ दुघा॑नाः॒ पंथा॑सो॒ यंति॒ शव॒साप॑रीताः। त॒रद्द्वे॑षाः सास॒हिः
पौंस्ये॑भिर्म॒रुत्वा॑न्नो भव॒त्विंद्र॒ ऊती॥३॥ सो अंगि॑रोभि॒रंगि॑र-
स्तमो भू॒द्वृषा॒ वृष॑भिः॒ सखि॑भिः॒ सखा॒ सन्। ऋ॒ग्मिभि॑र्ऋ॒ग्मी
गा॒तुभि॒र्ज्येष्ठो॑ म॒रुत्वा॑न्नो भव॒त्विंद्र॒ ऊती॥४॥ स सू॒नुभि॒र्न रु॒द्रे-

भिर्ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान् । सनीळेभिः श्रवस्यानि
तूर्वन्मरुत्वान्नो भवत्विंद्र ऊती ॥ ५ ॥ ८ ॥ स मन्युमीः समद-
नस्य कर्तास्माकेभिर्नृभिः सूर्यं सनत् । अस्मिन्नहन्त्सत्प-
तिः पुरुहूतो मरुत्वान्नो भवत्विंद्र ऊती ॥ ६ ॥ तमूतयो
रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्रां । स विश्वस्य
करुणस्येश एको मरुत्वान्नो भवत्विंद्र ऊती ॥ ७ ॥ तमप्संत
शवस उत्सवेषु नरो नरमवसे तं धनाय । सो अंधे चित्तमसि
ज्योतिर्विदन्मरुत्वान्नो भवत्विंद्र ऊती ॥ ८ ॥ स सव्येन यमति
व्राधतश्चित्स दक्षिणे संगृभीता कृतानि । स कीरिणा
चित्सनिता धनानि मरुत्वान्नो भवत्विंद्र ऊती ॥ ९ ॥ स
ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्न्वद्य ।
स पौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विंद्र ऊती ॥ १० ॥ ९ ॥
स जामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत
एवैः । अपां तोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विंद्र
ऊती ॥ ११ ॥ स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः
शतनीथ ऋभ्वा । चम्रीषो न शवसा पांचजन्यो मरु-
त्वान्नो भवत्विंद्र ऊती ॥ १२ ॥ तस्य वज्रः क्रंदति स्मत्स्वर्षा
दिवो न त्वेषो रवथः शिमीवान् । तं सचंते सनयस्तं
धनानि मरुत्वान्नो भवत्विंद्र ऊती ॥ १३ ॥ यस्याजस्रं शवसा
मानमुक्थं परिभुजद्रोदसी विश्वतः सीं । स पारिषत्क्र-
तुभिर्मंदसानो मरुत्वान्नो भवत्विंद्र ऊती ॥ १४ ॥ न यस्य
देवा देवता न मर्ता आपश्चन शवसो अंतमापुः । स
प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विंद्र ऊती
॥ १५ ॥ १० ॥ रोहिच्छ्यावा सुमदंशुर्ललामीर्द्युक्षा राय ऋज्रा-

श्वस्य । वृषण्वंतं बिभ्रती धूर्षु रथं मंद्रा चिकेत नाहुषीषु विक्षु ॥१६॥ एतत्त्यत्त इंद्र वृष्ण उक्थं वार्षागिरा अभि गृणंति राधः । ऋज्राश्वः प्रष्टिभिरंबरीषः सहदेवो भयमानः सुराधाः ॥१७॥ दस्यूञ्छिम्यूंश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत् । सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः ॥१८॥ विश्वाहेंद्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजं । तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥१९॥११॥

॥१०१॥ १–११ कुत्स आंगिरसः ॥ इंद्रः ॥ १–७ जगती । ८–११ त्रिष्टुप् ॥

॥१०१॥ प्र मंदिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना । अवस्यवो वृषणं वज्रदक्षिणं मरुत्वंतं सख्याय हवामहे ॥१॥ यो व्यंसं जाहृषाणेन मन्युना यः शंबरं यो अहन्पिप्रुमव्रतं । इंद्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वंतं सख्याय हवामहे॥२॥ यस्य द्यावापृथिवी पौंस्यं महद्यस्य व्रते वरुणो यस्य सूर्यः । यस्येंद्रस्य सिंधवः सश्चति व्रतं मरुत्वंतं सख्याय हवामहे॥३॥ यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः । वीळोश्चिदिंद्रो यो असुन्वतो वधो मरुत्वंतं सख्याय हवामहे॥४॥ यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविंदत् । इंद्रो यो दस्यूँरधराँ अवातिरन्मरुत्वंतं सख्याय हवामहे॥५॥ यः शूरेभिर्हव्यो यश्च भीरुभिर्यो धावद्भिर्हूयते यश्च जिग्युभिः । इंद्रं यं विश्वा भुवनाभि संदधुर्मरुत्वंतं सख्याय हवामहे॥६॥१२॥ रुद्राणामेति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते पृथु ज्रयः । इंद्रं मनीषा अभ्यर्चति श्रुतं मरुत्वंतं सख्याय हवामहे॥७॥

16251

यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे। अत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकृमा सत्यराधः ॥८॥ त्वायेंद्र सोमं सुषुमा सुदक्ष त्वाया हविश्चकृमा ब्रह्मवाहः। अधा नियुत्वः सगणो मरुद्भिरस्मिन्यज्ञे बर्हिषि मादयस्व ॥९॥ मादयस्व हरिभिर्ये त इंद्र वि ष्यस्व शिप्रे वि सृजस्व धेने। आ त्वा सुशिप्र हरयो वहंतूशन्हव्यानि प्रति नो जुषस्व ॥१०॥ मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिंद्रेण सनुयाम वाजं। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥११॥१३॥

॥१०२॥ १–११ कुत्स आंगिरसः ॥ इंद्रः ॥ १–१० जगती । ११ त्रिष्टुप् ॥

॥१०२॥ इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे। तमुत्सवे च प्रसवे च सासहिमिंद्रं देवासः शवसामदन्ननु ॥१॥ अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः। अस्मे सूर्याचंद्रमसाभिचक्षे श्रद्धे कमिंद्र चरतो वितर्तुरं ॥२॥ तं स्मा रथं मघवन्प्राव सातये जैत्रं यं ते अनुमदाम संगमे। आजा न इंद्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः ॥३॥ वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे। अस्मभ्यमिंद्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या रुज ॥४॥ नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः। अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हींद्र निभृतं मनस्तव ॥५॥१४॥ गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मञ्छतमूतिः खजंकरः। अकल्प इंद्रः प्रतिमानमोजसाथा जना वि ह्वयंते सिषासवः ॥६॥ उत्ते शतान्मघवन्नुच्च भूयस

उत्सहस्राद्रिरिचे कृष्टिषु श्रवः। अमात्रं त्वा धिषणा तित्विषे
मह्यधा वृत्राणि जिघ्नसे पुरंदर ॥७॥ त्रिविष्टिधातु प्रतिमान-
मोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना। अतीदं विश्वं भुवनं
ववक्षिथाशत्रुरिंद्र जनुषा सनादसि ॥८॥ त्वां देवेषु प्रथमं
हवामहे त्वं बभूथ पृतनासु सासहिः। सेमं नः कारुमुपमन्यु-
मुद्भिदमिंद्रः कृणोतु प्रसवे रथं पुरः ॥९॥ त्वं जिगेथ न धना
रुरोधिथार्भेष्वाजा मघवन्महत्सु च। त्वामुग्रमवसे सं शिशीम-
स्यथा न इंद्र हवनेषु चोदय ॥१०॥ विश्वाहेंद्रो अधिवक्ता नो
अस्त्वपरिह्वृताः सनुयाम वाजं। तन्नो मित्रो वरुणो मामहंता-
मदितिः सिंधुः पृथिवी उत द्यौः ॥११॥१५॥

॥ १०३ ॥ १–८ कुत्स आंगिरसः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१०३॥ तत्त इंद्रियं परमं पराचैरधारयंत कवयः पुरेदं।
क्षमेदमन्यद्दिव्य१न्यदस्य समी पृच्यते समनेव केतुः ॥१॥
स धारयत्पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज।
अहन्नहिमभिनद्रौहिणं व्यहन्व्यंसं मघवा शचीभिः ॥२॥
स जातूभर्मा श्रद्दधान ओजः पुरो विभिंदन्नचरद्वि दा-
सीः। विद्वान्वज्रिन्दस्यवे हेतिमस्यार्यं सहो वर्धया
द्युम्नमिंद्र ॥३॥ तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा
नाम बिभ्रत्। उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः
श्रवसे नाम दधे ॥४॥ तदस्येदं पश्यता भूरि पुष्टं
श्रदिंद्रस्य धत्तन वीर्याय। स गा अविंदत्सो अविंद-
दश्वान्त्स ओषधीः सो अपः स वनानि ॥५॥१६॥ भूरिकर्मणे
वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमं। य आदृत्या परि-

पंथीव शूरोऽयज्वनो विभजन्नेति वेदः ॥६॥ तदिंद्र प्रेव वीर्यं
चकर्थ यत्ससंतं वज्रेणाबोधयोऽहिं । अनु त्वा पत्नीर्हृषितं
वयश्च विश्वे देवासो अमदन्ननु त्वा ॥७॥ शुष्णं पिप्रुं कुयवं
वृत्रमिंद्र यदावधीर्वि पुरः शंबरस्य । तन्नो मित्रो वरुणो
मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥८॥१७॥

॥१०४॥ १-९ कुत्स आंगिरसः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१०४॥ योनिष्ट इंद्र निषदे अकारि तमा नि षीद स्वानो
नार्वा । विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपि-
त्वे ॥१॥ ओ त्ये नर इंद्रमूतये गुर्नू चित्तान्सद्यो अध्वनो जग-
म्यात् । देवासो मन्युं दासस्य श्चम्नन्ते न आ वक्षन्सुविताय वर्णं
॥२॥ अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् । क्षी-
रेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ॥३॥
युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः । अंजसी
कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरंते ॥४॥ प्रति यत्स्या
नीथादर्शि दस्योरोको नाच्छा सदनं जानती गात् । अध स्मा
नो मघवन्चर्कृतादिन्मा नो मघेव निष्षपी परा दाः ॥५॥१८॥
स त्वं न इंद्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे । मांतरां
भुजमा रीरिषो नः श्रद्धितं ते महत इंद्रियाय ॥६॥ अधा मन्ये
श्रत्ते अस्मा अधायि वृषा चोदस्व महते धनाय । मा नो अकृते
पुरुहूत योनाविंद्र क्षुध्यद्भ्यो वय आसुतिं दाः ॥७॥ मा नो
वधीरिंद्र मा परा दा मा नः प्रिया भोजनानि प्र मोषीः ।
आंडा मा नो मघवञ्छक्र निर्भेन्मा नः पात्रा भेत्सहजानुषा-
णि ॥८॥ अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा

मदा॑य । उ॒रु॒व्यचा॑ ज॒ठर॒ आ वृ॑षस्व पि॒तेव॑ नः शृणुहि
हू॒यमा॑नः ॥ ९ ॥ १९ ॥

॥ १०५ ॥ १–१९ आप्त्यस्त्रितः कुत्सो वा ॥ विश्वे देवाः ॥ १–७. ९–१८ पंक्तिः ।
८ महाबृहती यवमध्या । १९ त्रिष्टुप् ॥

॥१०५॥ चं॒द्रमा॑ अ॒प्स्व१॒॑न्तरा सु॑प॒र्णो धा॑वते दि॒वि। न वो॑
हिरण्यनेमयः प॒दं विं॑दंति विद्युतो वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ १ ॥
अर्थ॒मिद्वा उ॑ अ॒र्थिन॒ आ जा॒या यु॑वते॒ पति॑म्। तुं॒जाते॒ वृष्ण्यं॒ पयः॑
परि॒दाय॒ रसं॑ दुहे वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ २ ॥ मो षु दे॑वा अ॒दः
स्व१॒॑र्व पादि॑ दि॒वस्परि॑। मा सो॒म्यस्य॑ शं॒भुवः॒ शूने॑ भूम॒ कदा॑
च॒न वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ३ ॥ य॒ज्ञं पृ॑च्छाम्यव॒मं स तद्दू॒तो
वि वो॑चति। क्व॑ ऋ॒तं पू॒र्व्यं ग॒तं कस्तद्बि॑भर्ति॒ नूत॑नो वि॒त्तं मे॑
अ॒स्य रो॑दसी ॥ ४ ॥ अ॒मी ये दे॑वा॒ः स्थन॑ त्रि॒ष्वा रो॑च॒ने दि॒वः। कद्व॑
ऋ॒तं कदनृ॑तं॒ क्व॑ प्र॒त्ना व॒ आहु॑ति॒र्वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ५ ॥ २० ॥
कद्व॑ ऋ॒तस्य॑ धर्ण॒सि कद्वरु॑णस्य॒ चक्ष॑णम्। कद॑र्य॒म्णो म॒हस्प॒थाति॑
क्रामेम दू॒ढ्यो॑ वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ६ ॥ अ॒हं सो अ॑स्मि॒
यः पु॒रा सु॒ते वदा॑मि॒ कानि॑ चित्। तं मा॑ व्यं॒त्या॒ध्यो॒३॒॑ वृको॒ न
तृ॒ष्णजं॑ मृ॒गं वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ७ ॥ सं मा॑ तपंत्य॒भितः॑
स॒पत्नी॑रिव॒ पर्श॑वः। मूषो॒ न शि॒श्ना व्य॑दंति मा॒ध्यः॑ स्तो॒-
तारं॑ ते शतक्रतो वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ८ ॥ अ॒मी ये
स॒प्त र॒श्मय॒स्तत्रा॑ मे॒ नाभि॒राता॑ता। त्रि॒तस्तद्वे॑दा॒प्त्यः स
जा॑मि॒त्वाय॑ रेभति वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ ९ ॥ अ॒मी ये
पं॒चो॒क्षणो॒ मध्ये॑ त॒स्थुर्म॒हो दि॒वः। दे॒व॒त्रा नु प्र॒वाच्यं॑ सध्री॒-
ची॒ना नि वा॑वृतुर्वि॒त्तं मे॑ अ॒स्य रो॑दसी ॥ १० ॥ २१ ॥ सु॒प॒र्णा ए॒त
आ॑सते॒ मध्य॑ आ॒रोध॑ने दि॒वः। ते से॑धंति प॒थो वृकं॒ तरं॑तं य॒ह्व-

तीरपो वित्तं मे अस्य रोदसी ॥११॥ नव्यं तदुक्थ्यं हितं देवासः
सुप्रवाचनं। ऋतमर्षंति सिंधवः सत्यं तातान सूर्यो वित्तं मे अस्य
रोदसी ॥१२॥ अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यं। स नः सत्तो म-
नुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य रोदसी ॥१३॥ सत्तो
होता मनुष्वदा देवाँ अच्छा विदुष्टरः। अग्निर्हव्या सुषूदति देवो
देवेषु मेधिरो वित्तं मे अस्य रोदसी ॥१४॥ ब्रह्मा कृणोति वरुणो
गातुविदं तमीमहे। व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं
मे अस्य रोदसी ॥१५॥२२॥ असौ यः पंथा आदित्यो दिवि प्र-
वाच्यं कृतः। न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे
अस्य रोदसी ॥१६॥ त्रितः कूपेऽवहितो देवान्हवत ऊतये। तच्छु-
श्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥१७॥
अरुणो मा सकृद्वृकः पथा यंतं ददर्श हि। उज्जिहीते निचाय्या
तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ॥१८॥ एनांगूषेण वय-
मिंद्रवंतोऽभि ष्याम वृजने सर्ववीराः। तन्नो मित्रो वरुणो मा-
महंतामदितिः सिंधुः पृथिवी उत द्यौः ॥१९॥२३॥१५॥

॥ १०६ ॥ १–७ कुत्स आंगिरसः ॥ विश्वे देवाः ॥ १–६ जगती । ७ त्रिष्टुप् ॥

॥१०६॥ इंद्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं
हवामहे। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंह-
सो निष्पिपर्तन ॥१॥ त आदित्या आ गता सर्वतातये
भूत देवा वृत्रतूर्येषु शंभुवः। रथं न दुर्गाद्वसवः सुदानवो
विश्वस्मान्नो अंहसो निष्पिपर्तन ॥२॥ अवंतु नः पितरः
सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा। रथं न दुर्गाद्वसवः
सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥३॥ नराशंसं वा-

जिन्वं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥४॥ बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥५॥ इंद्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये। रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥६॥ देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन्। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥७॥२४॥

॥१०७॥ १–३ कुत्स आंगिरसः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥१०७॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयंतः। आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ॥१॥ उप नो देवा अवसा गमंत्वंगिरसां सामभिः स्तूयमानाः। इंद्र इंद्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥२॥ तन्न इंद्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात्। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥३॥२५॥

॥१०८॥ १–१३ कुत्स आंगिरसः ॥ इंद्राग्नी ॥ त्रिष्टुप् ॥

॥१०८॥ य इंद्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे। तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥१॥ यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरं। तावाँ अयं पातवे सोमो अस्त्वरमिंद्राग्नी मनसे युवभ्यां ॥२॥ चक्राथे हि सध्र्यङ्नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः। ताविंद्राग्नी सध्र्यंचा निषद्या वृष्णः सोमस्य

वृषणा वृषेथां ॥३॥ समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा। तीव्रैः सोमैः परिषिक्तेभिरर्वागेंद्राग्नी सौमनसाय यातं॥४॥ यानींद्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि। या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य॥५॥२६॥ यदब्रवं प्रथमं वां वृणानो३यं सोमो असुरैर्नो विहव्यः। तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य ॥६॥ यदिंद्राग्नी मदथः स्वे दुरोणे यद्ब्रह्मणि राजनि वा यजत्रा। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥७॥ यदिंद्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥८॥ यदिंद्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥९॥ यदिंद्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥१०॥ यदिंद्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥११॥ यदिंद्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥१२॥ एवेंद्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥१३॥२७॥

॥१०९॥ १-८ कुत्स आंगिरसः ॥ इंद्राग्नी ॥ त्रिष्टुप् ॥

॥१०९॥ वि ह्यख्यं मनसा वस्य इच्छन्निंद्राग्नी ज्ञास उत वा सजातान्। नान्या युवत्प्रमतिरस्ति मह्यं स

वां धियं वाजयंतीमतक्षं ॥१॥ अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्। अथा सोमस्य प्रयती युवभ्यामिंद्राग्नी स्तोमं जनयामि नव्यं ॥२॥ मा छेद्म रश्मीरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः। इंद्राग्निभ्यां कं वृषणो मदंति ता ह्यद्री धिषणाया उपस्थे ॥३॥ युवाभ्यां देवी धिषणा मदायेंद्राग्नी सोममुशती सुनोति। तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु ॥४॥ युवामिंद्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये। तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥५॥२८॥ प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च। प्र सिंधुभ्यः प्र गिरिभ्यो महित्वा प्रेंद्राग्नी विश्वा भुवनात्यन्या ॥६॥ आ भरतं शिक्षतं वज्रबाहू अस्माँ इंद्राग्नी अवतं शचीभिः। इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥७॥ पुरंदरा शिक्षतं वज्रहस्तास्माँ इंद्राग्नी अवतं भरेषु। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥८॥२९॥

॥ ११० ॥ १–९ कुत्स आंगिरसः ॥ ऋभवः ॥ १–४. ६–८ जगती । ५. ९ त्रिष्टुप् ॥

॥११०॥ ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते। अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥१॥ आभोगयं प्र यदिच्छंत ऐतनापाकाः प्रांचो मम के चिदापयः। सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहं ॥२॥ तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयंत ऐतन। त्यं चिच्चमसमसुरस्य भक्षणमेकं संतमकृणुता चतुर्वयं ॥३॥ विष्ट्वी शमी तरणित्वेन

वाघतो मर्तासः संतो अमृतत्वमानशुः। सौधन्वना ऋभवः सूर-
चक्षसः संवत्सरे समपृच्यंत धीतिभिः ॥४॥ क्षेत्रमिव वि ममु-
स्तेजनेनँ एकं पात्रमृभवो जेहमानं। उपस्तुता उपमं नाधमाना
अमर्त्येषु श्रव इच्छमानाः ॥५॥३०॥ आ मनीषामंतरिक्षस्य
नृभ्यः स्रुचेव घृतं जुहवाम विद्मना। तरणित्वा ये पितुरस्य सश्चिर
ऋभवो वाजमरुहन्दिवो रजः ॥६॥ ऋभुर्न इंद्रः शवसा नवी-
यानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः। युष्माकं देवा अवसाहनि प्रि-
येऽ३भि तिष्ठेम पृत्सुतीरसुन्वतां ॥७॥ निश्चर्मण ऋभवो गाम-
पिंशत सं वत्सेनासृजता मातरं पुनः। सौधन्वनासः स्वपस्यया
नरो जिव्री युवाना पितराकृणोतन ॥८॥ वाजेभिर्नो वाजसा-
तावविड्ढ्यृभुमाँ इंद्र चित्रमा दर्षि राधः। तन्नो मित्रो वरुणो
मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥९॥३१॥

॥१११॥ १–५ कुत्स आंगिरसः ॥ ऋभवः ॥ १–४ जगती । ५ त्रिष्टुप् ॥

॥१११॥ तक्षन्रथं सुवृतं विद्मनापसस्तक्षन्हरी इंद्र-
वाहा वृषण्वसू। तक्षन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय
मातरं सचाभुवं ॥१॥ आ नो यज्ञाय तक्षत ऋभुमद्वयः
क्रत्वे दक्षाय सुप्रजावतीमिषं। यथा क्षयाम सर्ववीरया
विशा तन्नः शर्धाय धासथा स्विंद्रियं ॥२॥ आ तक्षत साति-
मस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः। सातिं नो जैत्रीं
सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिं ॥३॥ ऋभुक्ष-
णमिंद्रमा हुव ऊतय ऋभून्वाजान्मरुतः सोमपीतये। उभा
मित्रावरुणा नूनमश्विना ते नो हिन्वंतु सातये धिये जि-
षे ॥४॥ ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ

अविष्टु । तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥५॥३२॥

॥ ११२ ॥ १–२५ कुत्स आंगिरसः ॥ १¹ द्यावापृथिव्यौ । १² अग्निः । १³·⁴–२५ अश्विनौ ॥ १–२३ जगती । २४. २५ त्रिष्टुप् ॥

॥११२॥ ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये । याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतं ॥१॥ युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मंतवे । याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतं ॥२॥ युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना । याभिर्धेनुमस्वं पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतं ॥३॥ याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति । याभिस्त्रिमंतुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतं ॥४॥ याभी रेभं निवृतं सितमद्भ्य उद्वंदनमैरयतं स्वर्दृशे । याभिः कण्वं प्र सिषासंतमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥५॥३३॥ याभिरंतकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः । याभिः कर्कंधुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतं ॥६॥ याभिः शुचंतिं धनसां सुषंसदं तप्तं घर्ममोम्यावंतमत्रये । याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतं ॥७॥ याभिः शचीभिर्वृषणा परावृजं प्रांधं श्रोणं चक्षस एतवे कृथः । याभिर्वर्तिकां ग्रसिताममुंचतं ताभिरू षु ऊतिभिरश्विना गतं ॥८॥ याभिः सिंधुं मधुमंतमसश्चतं वसिष्ठं याभिरजरावजिन्वतं । याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊति-

भिरश्विना गतं ॥९॥ याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतं । याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥१०॥३४॥ याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् । कक्षीवंतं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतं ॥११॥ याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे । याभिस्त्रिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतं ॥१२॥ याभिः सूर्यं परियाथः परावति मंधातारं क्षैत्रपत्येष्वावतं । याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥१३॥ याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शंबरहत्य आवतं । याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥१४॥ याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः । याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥१५॥३५॥ याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः । याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतं ॥१६॥ याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना । याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतं ॥१७॥ याभिरंगिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः । याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतं ॥१८॥ याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतं । या-

भिः सुदासं ऊहथुः सुदेव्यं१ताभिरू षु ऊतिभिरश्विना
गतं ॥ १९ ॥ याभिः शंताती भवथो ददाशुषे भुज्युं याभि-
रवथो याभिरध्रिगुं । ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु
ऊतिभिरश्विना गतं ॥ २० ॥ ३६ ॥ याभिः कृशानुमसने
दुवस्यथो जवे याभिर्यूनो अर्वंतमावतं । मधु प्रियं भरथो
यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतं ॥ २१ ॥ याभिर्नरं
गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः । याभी
रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतं ॥ २२ ॥
याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतं ।
याभिर्ध्वसंतिं पुरुषंतिमावतं ताभिरू षु ऊतिभिरश्विना
गतं ॥ २३ ॥ अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा
मनीषां । अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाज-
सातौ ॥ २४ ॥ द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना
सौभगेभिः । तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः
पृथिवी उत द्यौः ॥ २५ ॥ ३७ ॥ ७ ॥

॥ ११३ ॥ १–२० कुत्स आंगिरसः ॥ १[१.२.] २–२० उषाः । १[१.४] उषा रात्रिश्च ॥ त्रिष्टुप् ॥

॥ ११३ ॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो
अजनिष्ट विभ्वा । यथा प्रसूता सवितुः सवायँ एवा
रात्र्युषसे योनिमारैक् ॥ १ ॥ रुशद्वत्सा रुशती श्वेत्यागा-
दारैगु कृष्णा सदनान्यस्याः । समानबंधू अमृते अनूची
द्यावा वर्णं चरत आमिनाने ॥ २ ॥ समानो अध्वा
स्वस्रोरनंतस्तमन्यान्या चरतो देवशिष्टे । न मेथेते न
तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥ ३ ॥ भा-

स्वंती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः । प्रार्प्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ॥ ४ ॥ जिह्मश्ये३ चरितवे मघोन्याभोगय इष्टये राय उं त्वं । दभ्रं पश्यंद्भ्य उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा ॥ ५ ॥ १ ॥ क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै । विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा ॥ ६ ॥ एषा दिवो दुहिता प्रत्यदर्शि व्युच्छंती युवतिः शुक्रवासाः । विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ ॥ ७ ॥ परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनां । व्युच्छंती जीवमुदीरयंत्युषा मृतं कं चन बोधयंती ॥ ८ ॥ उषो यदग्निं समिधे चकर्थ वि यदावश्चक्षसा सूर्यस्य । यन्मानुषान्यक्ष्यमाणाँ अजीगस्तद्देवेषु चकृषे भद्रमप्नः ॥ ९ ॥ कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान् । अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति ॥ १० ॥ २ ॥ ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छंतीमुषसं मर्त्यासः । अस्माभिरू नु प्रतिचक्ष्याभूदो ते यंति ये अपरीषु पश्यान् ॥ ११ ॥ यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयंती । सुमंगलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ ॥ १२ ॥ शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी । अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः ॥ १३ ॥ व्यं१ जिभिर्दिव आतास्वद्यौदप कृष्णां निर्णिजं देव्यावः । प्रबोधयंत्यरुणेभिरश्वैरोषा याति सुयुजा

रथेन ॥१४॥ आवहंती पोष्या वार्याणि चित्रं केतुं कृणुते चेकि-
ताना । ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा
व्यश्वैत् ॥१५॥३॥ उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम
आ ज्योतिरेति । अरैक्पंथां यातवे सूर्यायागन्म यत्र प्रतिरंत
आयुः ॥१६॥ स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ
उषसो विभातीः । अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि
दिदीहि प्रजावत् ॥१७॥ या गोमतीरुषसः सर्ववीरा व्युच्छंति
दाशुषे मर्त्याय । वायोरिव सूनृतानामुदर्के ता अश्वदा
अश्नवत्सोमसुत्वा ॥१८॥ माता देवानामदितेरनीकं यज्ञस्य
केतुर्बृहती वि भाहि । प्रशस्तिकृद्ब्रह्मणे नो व्यु१च्छा नो जने
जनय विश्ववारे ॥१९॥ यच्चित्रमप्न उषसो वहंतीजानाय
शशमानाय भद्रं । तन्नो मित्रो वरुणो मामहंतामदितिः
सिंधुः पृथिवी उत द्यौः ॥२०॥४॥

॥११४॥ १–११ कुत्स आंगिरसः ॥ रुद्रः ॥ १–९ जगती । १०.११ त्रिष्टुप् ॥

॥११४॥ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरा-
महे मतीः । यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे
अस्मिन्ननातुरं ॥१॥ मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वी-
राय नमसा विधेम ते । यच्छं च योश्च मनुरायेजे पिता
तदश्याम तव रुद्र प्रणीतिषु ॥२॥ अश्याम ते सुमतिं
देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः । सुम्नायन्निद्वि-
शो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥३॥
त्वेषं वयं रुद्रं यज्ञसाधं वंकुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणी-

महे ॥४॥ दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे । हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥५॥५॥ इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनं। रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥६॥ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितं। मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥७॥ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥८॥ उप ते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे। भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥९॥ आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु। मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥१०॥ अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान्। तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥११॥६॥

॥ ११५ ॥ १–६ कुत्स आङ्गिरसः ॥ सूर्यः ॥ त्रिष्टुप् ॥

॥११५॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥१॥ सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् । यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रं ॥२॥ भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः । नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः ॥३॥ तत्सूर्यस्य देवत्वं तन्महित्वं

मध्या कर्तोर्विततं सं जभार। यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥४॥ तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे। अनंतमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरंति ॥५॥ अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात्। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥६॥७॥१६॥

॥११६॥ १—२५ कक्षीवान्दैर्घतमस औशिजः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥११६॥ नासत्याभ्यां बर्हिरिव प्र वृंजे स्तोमाँ इयम्यभ्रियेव वातः। यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥१॥ वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना। तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय ॥२॥ तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः। तमूहथुर्नौभिरात्मन्वतीभिरंतरिक्षप्रुद्भिरपोदकाभिः ॥३॥ तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतंगैः। समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः ॥४॥ अनारंभणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे। यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसं ॥५॥८॥ यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति। तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥६॥ युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिं। कारोतराच्छफादश्वस्य वृष्णः शतं कुंभाँ असिंचतं सुरायाः ॥७॥ हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तं। ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं

स्वस्ति ॥ ८ ॥ परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्म-
बारं । क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोत-
मस्य ॥ ९ ॥ जुजुरुषो नासत्योत वव्रिं प्रामुंचतं द्रापिमिव
च्यवानात् । प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं
कनीनां ॥ १० ॥ ९ ॥ तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्ना-
सत्या वरूथं । यद्विद्वांसा निधिमिवापगूळ्हमुद्दर्शता-
दूपथुर्वंदनाय ॥ ११ ॥ तद्वां नरा सनये दंस उग्रमाविष्कृ-
णोमि तन्यतुर्न वृष्टिं । दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य
शीर्ष्णा प्र यदीमुवाच ॥ १२ ॥ अजोहवीन्नासत्या करा वां
महे यामन्पुरुभुजा पुरंधिः । श्रुतं तच्छासुरिव वध्रिमत्या
हिरण्यहस्तमश्विनावदत्तं ॥ १३ ॥ आस्नो वृकस्य वर्तिकाम-
भीके युवं नरा नासत्यामुमुक्तं । उतो कविं पुरुभुजा युवं ह
कृपमाणमकृणुतं विचक्षे ॥ १४ ॥ चरित्रं हि वेरिवाच्छेदि
पर्णमाजा खेलस्य परितक्म्यायां । सद्यो जंघामायसीं विश्प-
लायै धने हिते सर्तवे प्रत्यधत्तं ॥ १५ ॥ १० ॥ शतं मेषान्वृक्ये
चक्षदानमृज्राश्वं तं पितांधं चकार । तस्मा अक्षी नासत्या
विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥ १६ ॥ आ वां रथं
दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयंती । विश्वे देवा
अन्वमन्यंत हृद्भिः समु श्रिया नासत्या सचेथे ॥ १७ ॥
यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयंता । रेवदु-
वाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥ १८ ॥
रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं नासत्या वहंता । आ
जह्नावीं समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातं ॥ १९ ॥
परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः ।

विभिंदुना नासत्या रथेन वि पर्वताँ अजरयू अयातं ॥२०॥११॥
एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा । निरहतं
दुच्छुना इंद्रवंता पृथुश्रवसो वृषणावरातीः ॥२१॥ शरस्य
चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः । शयवे
चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गां ॥२२॥ अवस्यते
स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः । पशुं न
नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥२३॥ दश
रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वंतः । विप्रुतं
रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥२४॥ प्र वां
दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः । उत
पश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्यां ॥२५॥१२॥

॥ ११७ ॥ १–२५ कक्षीवान्दैर्घतमस औशिजः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥११७॥ मध्वः सोमस्याश्विना मदाय प्रत्नो होता वि-
वासते वां । बर्हिष्मती रातिर्विश्रिता गीरिषा यातं
नासत्योप वाजैः ॥१॥ यो वामश्विना मनसो जवीयान्रथः
स्वश्वो विश आजिगाति । येन गच्छथः सुकृतो दुरोणं तेन
नरा वर्तिरस्मभ्यं यातं ॥२॥ ऋषिं नरावंहसः पांचजन्य-
मृबीसादत्रिं मुंचथो गणेन । मिनंता दस्योरशिवस्य माया
अनुपूर्वं वृषणा चोदयंता ॥३॥ अश्वं न गूळ्हमश्विना
दुरेवैरृषिं नरा वृषणा रेभमप्सु । सं तं रिणीथो विप्रुतं
दंसोभिर्न वां जूर्यंति पूर्व्या कृतानि ॥४॥ सुषुप्वांसं न
निरृतेरुपस्थे सूर्यं न दस्रा तमसि क्षियंतं । शुभे रुक्मं न
दर्शतं निखातमुदूपथुरश्विना वंदनाय ॥५॥१३॥ तद्वां नरा

शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन् । शफादश्वस्य
वाजिनो जनाय शतं कुंभाँ असिंचतं मधूनां ॥६॥ युवं नरा
स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय । घोषायै चित्पि-
तृषदे दुरोणे पतिं जूर्यंत्या अश्विनावदत्तं ॥७॥ युवं श्यावाय
रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय । प्रवाच्यं तद्वृ-
षणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तं ॥८॥ पुरू वर्पां-
स्यश्विना दधाना नि पेदव ऊहथुराशुमश्वं । सहस्रसां
वाजिनमप्रतीतमहिहनं श्रवस्यं१ तरुत्रं ॥९॥ एतानि वां
श्रवस्या सुदानू ब्रह्मांगूषं सदनं रोदस्योः । यद्वां पज्रासो
अश्विना हवंते यातमिषा च विदुषे च वाजं ॥१०॥१४॥
सूनोर्मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदंता ।
अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतं॥११॥
कुह यांता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ।
हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥१२॥
युवं च्यवानमश्विना जरंतं पुनर्युवानं चक्रथुः शचीभिः ।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥१३॥
युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना । युवं
भुज्युमर्णसो निः समुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः ॥१४॥
अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्ज-
गन्वान् । निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा
स्वस्ति ॥१५॥१५॥ अजोहवीदश्विना वर्तिका वामास्नो
यत्सीममुंचतं वृकस्य । वि जयुषा ययथुः सान्वद्रेर्जातं विष्वा-
चो अहतं विषेण ॥१६॥ शतं मेषान्वृक्ये मामहानं तमः
प्रणीतमशिवेन पित्रा । आक्षी ऋज्राश्वे अश्विनाव-

धत्तं ज्योतिरंधाय चक्रथुर्विचक्षे ॥१७॥ शुनमंधाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति । जारः कनीन इव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥१८॥ मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः । अथा युवामिदह्वयत्पुरंधिरागच्छतं सीं वृषणाववोभिः ॥१९॥ अधेनुं दस्रा स्तर्यं१ विषक्तामपिन्वतं शयवे अश्विना गां । युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषां ॥२०॥१८॥ यवं वृकेणाश्विना वपंतेषं दुहंता मनुषाय दस्रा । अभि दस्युं बकुरेणा धमंतोरु ज्योतिश्चक्रथुरार्याय ॥२१॥ आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतं । स वां मधु प्र वोचदृतायन्त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वां ॥२२॥ सदा कवी सुमतिमा चके वां विश्वा धियो अश्विना प्रावतं मे । अस्मे रयिं नासत्या बृहंतमपत्यसाचं श्रुत्यं रराथां ॥२३॥ हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तं । त्रिधा ह श्यावमश्विना विकस्तमुज्जीवस ऐरयतं सुदानू ॥२४॥ एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् । ब्रह्म कृण्वंतो वृषणा युवभ्यां सुवीरासो विदथमा वदेम ॥२५॥१७॥

॥ ११८ ॥ १–११ कक्षीवान्दैर्घतमस औशिजः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥११८॥ आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् । यो मर्त्यस्य मनसो जवीयान्त्रिवंधुरो वृषणा वातरंहाः ॥१॥ त्रिवंधुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् । पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥२॥ प्रवद्यामना सुवृता रथेन

दस्राविमं शृणुतं श्लोकमद्रेः। किमंग वां प्रत्यवर्तिं गमिष्ठाहुर्वि-
प्रासो अश्विना पुराजाः ॥३॥ आ वां श्येनासो अश्विना वहंतु
रथे युक्तास आशवः पतंगाः। ये अप्तुरो दिव्यासो न गृध्रा अभि
प्रयो नासत्या वहंति ॥४॥ आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा
दुहिता सूर्यस्य। परि वामश्वा वपुषः पतंगा वयो वहंत्वरुषा
अभीके ॥५॥१८॥ उद्वंदनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा
शचीभिः। निष्टौग्र्यं पारयथः समुद्रात्पुनश्च्यवानं चक्रथुर्यु-
वानं॥६॥ युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तं।
युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥७॥
युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय। अमुंचतं
वर्तिकामंहसो निः प्रति जंघां विश्पलाया अधत्तं ॥८॥ युवं
श्वेतं पेदव इंद्रजूतमहिहनमश्विनादत्तमश्वं। जोहूत्रमर्यो अभि-
भूतिमुग्रं सहस्रसां वृषणं वीड्वंगं ॥९॥ ता वां नरा स्ववसे
सुजाता हवामहे अश्विना नाधमानाः। आ न उप वसुमता
रथेन गिरो जुषाणा सुविताय यातं ॥१०॥ आ श्येनस्य जवसा
नूतनेनास्मे यातं नासत्या सजोषाः। हवे हि वामश्विना
रातहव्यः शश्वत्तमाया उषसो व्युष्टौ ॥११॥१९॥

॥ ११९ ॥ १-१० कक्षीवान्दैर्घतमस औशिजः ॥ अश्विनौ ॥ जगती ॥

॥११९॥ आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं
जीवसे हुवे। सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरि-
वोधामभि प्रयः ॥१॥ ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि
शस्मन्त्समयंत आ दिशः। स्वदामि घर्मं प्रति यंत्यूतय
आ वामूर्जानी रथमश्विनारुहत् ॥२॥ सं यन्मिथः

पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे। युवोरह
प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरं॥३॥ युवं भुज्युं
भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहंता पितृभ्य आ। यासिष्टं
वर्तिर्वृषणा विजेन्यं१ दिवोदासाय महि चेति वामवः॥४॥ यु-
वोरश्विना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यं। आ वां
पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती॥५॥२०॥
युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये। युवं शयो-
रवसं पिप्यथुर्गवि प्र दीर्घेण वंदनस्तार्यायुषा॥६॥ युवं वंदनं
निर्ऋतं जरण्यया रथं न दस्रा करणा समिन्वथः। क्षेत्रादा विप्रं
जनथो विपन्यया प्र वामत्र विधते दंसना भुवत्॥७॥ अगच्छतं
कृपमाणं परावति पितुः स्वस्य त्यजसा निबाधितं। स्वर्वतीरित
ऊतीर्युवोरह चित्रा अभीके अभवन्नभिष्टयः॥८॥ उत स्या वां
मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति। युवं दधीचो
मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत्॥९॥ युवं
पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः। शर्यैरभिद्युं
पृतनासु दुष्टरं चर्कृत्यमिंद्रमिव चर्षणीसहं॥१०॥२१॥

॥१२०॥ १–१२ कक्षीवान्दैर्घतमस औशिजः॥ १–११ अश्विनौ। १२ दुःस्वप्ननाशनं॥
१ गायत्री। २ ककुप्। ३ काविराट्। ४ नष्टरूपी। ५ तनुशिरा। ६ (अक्षरैर्) उष्णिक्।
७ विष्टारबृहती। ८ कृतिः। ९ विराट्। १०–१२ गायत्री॥

॥१२०॥ का राधद्धोत्राश्विना वां को वां जोष उभयोः।
कथा विधात्यप्रचेताः॥१॥ विद्वांसाविद्दुरः पृच्छेदविद्वा-
नित्थापरो अचेताः। नू चिन्नु मर्ते अक्रौ॥२॥ ता
विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य।
प्रार्चद्दयमानो युवाकुः॥३॥ वि पृच्छामि पाक्या३न देवान्व-

षट्कृतस्याद्भुतस्य दस्रा। पातं च सह्यसो युवं च रभ्यसो नः॥४॥
प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पज्रियो वाँ।
प्रैषयुर्न विद्वान्॥५॥२२॥ श्रुतं गायत्रं तकवानस्याहं चिद्धि
रिरेभाश्विना वां। आक्षी शुभस्पती दन्॥६॥ युवं ह्यास्तं महो
रन्युवं वा यन्निरततंसतं। ता नो वसू सुगोपा स्यातं पातं नो
वृकादघायोः॥७॥ मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा
नो गृहेभ्यो धेनवो गुः। स्तनाभुजो अशिश्वीः॥८॥ दुहीयन्मित्र-
धितये युवाकु राये च नो मिमीतं वाजवत्यै। इषे च नो मिमीतं
धेनुमत्यै॥९॥ अश्विनोरसनं रथमनश्वं वाजिनीवतोः। तेनाहं
भूरि चाकन॥१०॥ अयं समह मा तनूह्याते जनाँ अनु। सो-
मपेयं सुखो रथः॥११॥ अध स्वप्नस्य निर्विदेऽभुंजतश्च रेवतः।
उभा ता बस्रि नश्यतः॥१२॥२३॥१७॥

॥ १२१ ॥ १–१५ कक्षीवान्दैर्घतमस औशिजः ॥ विश्वे देवा इंद्रो वा ॥ त्रिष्टुप् ॥

॥१२१॥ कदित्था नॄँः पात्रं देवयतां श्रवद्गिरो अंगिरसां
तुरण्यन्। प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे
यजत्रः॥१॥ स्तंभीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय
द्रविणं नरो गोः। अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य
परि मातरं गोः॥२॥ नक्षद्धवमरुणीः पूर्व्यं राट् तुरो
विशामंगिरसामनु द्यून्। तक्षद्वज्रं नियुतं तस्तंभद्द्यां चतुष्पदे
नर्याय द्विपादे॥३॥ अस्य मदे स्वर्यं दा ऋतायापीवृत-
मुस्रियाणामनीकं। यद्ध प्रसर्गे त्रिककुम्निवर्तदप द्रुहो
मानुषस्य दुरो वः॥४॥ तुभ्यं पयो यत्पितरावनीतां राधः
सुरेतस्तुरणे भुरण्यू। शुचि यत्ते रेक्ण आयजंत सबर्दु-

घाया: पय उस्रियायाः ॥५॥२४॥ अध प्र जज्ञे तरणिर्ममत्तु
प्र रोच्यस्या उषसो न सूरः । इंदुर्येभिराष्ट स्वेदुहव्यैः स्रुवेण
सिंचञ्जरणाभि धाम ॥६॥ स्विध्मा यद्वनधितिरपस्यात्सूरो
अध्वरे परि रोधना गोः । यद्ध प्रभासि कृत्व्याँ अनु द्यूननर्विशे
पश्विषे तुराय ॥७॥ अष्टा महो दिव आदो हरी इह
द्युम्नासाहमभि योधान उत्सं । हरिं यत्ते मंदिनं दुक्षन्वृधे
गोरभसमद्रिभिर्वाताप्यं ॥८॥ त्वमायसं प्रति वर्तयो गोर्दिवो
अश्मानमुपनीतमृभ्वा । कुत्साय यत्र पुरुहूत वन्वञ्छुष्णमनंतैः
परियासि वधैः ॥९॥ पुरा यत्सूरस्तमसो अपीतेस्तमद्रिवः
फलिगं हेतिमस्य । शुष्णस्य चित्परिहितं यदोजो दिवस्परि
सुग्रथितं तदादः ॥१०॥२५॥ अनु त्वा मही पाजसी अचक्रे
द्यावाक्षामा मदतामिंद्र कर्मन् । त्वं वृत्रमाशयानं सिरासु
महो वज्रेण सिष्वपो वराहुं ॥११॥ त्वमिंद्र नर्यो याँ अवो
नॄन्तिष्ठा वातस्य सुयुजो वहिष्ठान् । यं ते काव्य उशना
मंदिनं दाद्वृत्रहणं पार्यं ततक्ष वज्रं ॥१२॥ त्वं सूरो हरितो
रामयो नॄन्भरच्चक्रमेतशो नायमिंद्र । प्रास्य पारं नवतिं
नाव्यानामपि कर्तमवर्तयोऽयज्यून् ॥१३॥ त्वं नो अस्या इंद्र
दुर्हणायाः पाहि वज्रिवो दुरितादभीके । प्र नो वाजान्रथ्यो३ अ-
श्वबुध्यानिषे यंधि श्रवसे सूनृतायै ॥१४॥ मा सा ते अस्मत्सु-
मतिर्वि दसद्वाजप्रमहः समिषो वरंत । आ नो भज मघ-
वन्गोष्वर्यो मंहिष्ठास्ते सधमादः स्याम ॥१५॥२६॥८॥१॥

॥१२२॥ १–१५ कक्षीवान्दैर्घतमस औशिजः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥१२२॥ प्र वः पांतं रघुमन्यवोऽधो यज्ञं रुद्राय मीळ्हुषे

भरध्वं । दिवो अस्तोष्यसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः ॥ १ ॥ पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने । स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ॥ २ ॥ ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् । शिशीतमिंद्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यंतु देवाः ॥ ३ ॥ उत त्या मे यशसा श्वेतनायै व्यंता पांतौशिजो हुवध्यै । प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ॥ ४ ॥ आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नंशे । प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिमग्नेः ॥ ५ ॥ १ ॥ श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीं । श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिंधुरद्भिः ॥ ६ ॥ स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे । श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुंधानासो अग्मन् ॥ ७ ॥ अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः । जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरिः ॥ ८ ॥ जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक् । स्वयं स यक्ष्मं हृदये नि धत्त आप यदीं होत्राभिर्ऋतावा ॥ ९ ॥ स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः । विसृष्टरातिर्याति बाळ्हसृत्वा विश्वासु पृत्सु सदमिच्छूरः ॥ १० ॥ २ ॥ अध ग्मंता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मंद्राः । नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते ॥ ११ ॥ एतं शर्धं धाम यस्य सूरेरित्यवोचन्दशतयस्य नंशे । द्युम्नानि येषु वसुताती रारन्विश्वे सन्वंतु प्रभृथेषु वाजं ॥ १२ ॥ मंदामहे दश-

तयस्य धासेर्द्वियेत्पंच बिभ्रतो यंत्यन्ना । किमिष्टाश्व इष्टरश्मिरेत
ईशानासस्तरुष ऋंजते नॄन् ॥१३॥ हिरण्यकर्णं मणिग्रीव-
मर्णस्तन्नो विश्वे वरिवस्यंतु देवाः । अर्यो गिरः सद्य आ
जग्मुषीरोस्राश्चाकंतूभयेष्वस्मे ॥१४॥ चत्वारो मा मशर्शारस्य
शिश्वस्त्रयो राज्ञ आयवसस्य जिष्णोः । रथो वां मित्रावरुणा
दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत् ॥१५॥३॥

॥१२३॥ १–१३ कक्षीवान्दैर्घतमस औशिजः ॥ उषाः ॥ त्रिष्टुप् ॥

॥१२३॥ पृथू रथो दक्षिणाया अयोज्यैनं देवासो अ-
मृतासो अस्थुः । कृष्णादुदस्थादर्या३ विहाया श्चिकित्संती
मानुषाय क्षयाय ॥१॥ पूर्वा विश्वस्माद्भुवनादबोधि जयंती
वाजं बृहती सनुत्री । उच्चा व्यख्यद्युवतिः पुनर्भूरोषा
अगन्प्रथमा पूर्वहूतौ ॥२॥ यदद्य भागं विभजासि नृभ्य
उषो देवि मर्त्यत्रा सुजाते । देवो नो अत्र सविता
दमूना अनागसो वोचति सूर्याय ॥३॥ गृहंगृहमहना
यात्यच्छा दिवेदिवे अधि नामा दधाना । सिषासंती
द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनां ॥४॥ भगस्य
स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व । पश्चा स
दध्या यो अघस्य धाता जयेम तं दक्षिणया रथेन ॥५॥४॥
उदीरतां सूनृता उत्पुरंधीरुदग्नयः शुशुचानासो अस्थुः ।
स्पार्हा वसूनि तमसापगूळ्हाविष्कृण्वंत्युषसो विभातीः ॥६॥
अपान्यदेत्यभ्य१न्यदेति विषुरूपे अहनी सं चरेते ।
परिक्षितोस्तमो अन्या गुहाकरद्यौदुषाः शोशुचता
रथेन ॥७॥ सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचंते वरु-

णस्य धाम॑। अ॒नव॒द्यास्त्रिं॒शतं॒ योज॑ना॒न्येकै॑का॒ क्रतुं॒ परि॑ यंति
स॒द्यः ॥ ८ ॥ जा॒नत्यह्नः॑ प्रथ॒मस्य॒ नाम॑ शु॒क्रा कृ॒ष्णाद॑जनिष्ट
श्वि॒ती॒ची। ऋ॒तस्य॒ योषा॒ न मि॑नाति॒ धामाह॑रहर्नि॒ष्कृ॒तमा॒च-
रं॑ती ॥ ९ ॥ क॒न्ये॑व त॒न्वा॒३॒॑ शाश॑दानाँ एषि देवि दे॒वमिय॑क्षमा-
णं। सं॒स्मय॑माना युव॒तिः पु॒रस्ता॑दा॒विर्वक्षां॑सि कृणुषे विभा॒-
ती ॥ १० ॥ ५ ॥ सु॒सं॒का॒शा मा॒तृमृ॑ष्टेव॒ योषा॒विस्त॒न्वं॑ कृणुषे दृ॒शे
कं। भ॒द्रा त्वमु॑षो वित॒रं व्यु॑च्छ॒ न तत्ते॑ अ॒न्या उ॒षसो॑ नशंत ॥ ११ ॥
अश्वा॑वती॒र्गोम॑ती॒र्वि॒श्ववा॑रा॒ यत॑माना॒ र॒श्मिभि॒ः सूर्य॑स्य। परा॑
च॒ यंति॒ पुन॒रा च॑ यंति भ॒द्रा नाम॒ वह॑माना उ॒षासः॑ ॥ १२ ॥ ऋ॒-
तस्य॑ र॒श्मिम॑नु॒यच्छ॑माना भ॒द्रंभ॑द्रं॒ क्रतु॑म॒स्मासु॑ धेहि। उषो॑ नो
अ॒द्य सु॒हवा॒ व्यु॑च्छा॒स्मासु॒ रायो॑ म॒घव॑त्सु च स्युः ॥ १३ ॥ ६ ॥

॥ १२४ ॥ १-१३ कक्षीवान्दैर्घतमस औशिजः ॥ उषाः ॥ त्रिष्टुप् ॥

॥ १२४ ॥ उ॒षा उ॒च्छंती॑ समिधा॒ने अ॒ग्ना उ॒द्यन्त्सूर्य॑
उर्वि॒या ज्योति॑रश्रेत्। दे॒वो नो॒ अत्र॑ सवि॒ता न्वर्थं॒ प्रा-
सावी॑द्द्वि॒पत्प्र चतु॑ष्पदि॒त्यै ॥ १ ॥ अमि॑नती॒ दैव्या॑नि व्र॒तानि॑
प्रमि॒नती॑ मनु॒ष्या॑ यु॒गानि॑। ई॒युषी॑णामुप॒मा शश्व॑तीनामा-
य॒ती॒नां प्र॑थ॒मोषा व्य॑द्यौत् ॥ २ ॥ ए॒षा दि॒वो दु॑हि॒ता प्रत्य॑-
दर्शि॒ ज्योति॒र्वसा॑ना सम॒ना पु॒रस्ता॑त्। ऋ॒तस्य॒ पंथा॒मन्वे॑ति
सा॒धु प्र॑जान॒तीव॒ न दिशो॑ मिनाति ॥ ३ ॥ उपो॑ अद॒र्शि
शु॒न्ध्युवो॒ न वक्षो॑ नो॒धा इ॑वा॒विर॑कृत प्रि॒याणि॑। अ॒द्म॒सन्न
स॑स॒तो बो॒धयं॑ती शश्वत्त॒मागा॒त्पुन॑रे॒युषी॑णां ॥ ४ ॥ पूर्वे॑
अ॒र्धे रज॑सो अ॒प्त्यस्य॒ गवां॒ जनि॑त्र्यकृत॒ प्र के॒तुं। व्यु॑
प्रथते वित॒रं वरी॑य॒ ओभा पृ॒णंती॑ पि॒त्रोरु॒पस्था॑ ॥ ५ ॥ ७ ॥

एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिं । अरे-
पसा तन्वा३ शाशदाना नार्भादीषते न महो विभाती ॥ ६ ॥
अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानां । जायेव
पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥ ७ ॥ स्वसा
स्वस्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव । व्युच्छंती
रश्मिभिः सूर्यस्यांज्यंक्ते समनगा इव व्राः ॥ ८ ॥ आसां पूर्वा-
सामहसु स्वसृणामपरा पूर्वामभ्येति पश्चात् । ताः प्रत्नवन्नव्य-
सीर्नूनमस्मे रेवदुच्छंतु सुदिना उषासः ॥ ९ ॥ प्र बोधयोषः
पृणतो मघोन्यबुध्यमानाः पणयः ससंतु । रेवदुच्छ मघवद्भ्यो
मघोनि रेवत्स्तोत्रे सूनृते जारयंती ॥ १० ॥ ८ ॥ अवेयमश्वै-
द्युवतिः पुरस्ताद्युंक्ते गवामरुणानामनीकं । वि नूनमुच्छा-
दसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः ॥ ११ ॥ उत्ते वय-
श्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ । अमा सते वहसि
भूरि वाममुषो देवि दाशुषे मर्त्याय ॥ १२ ॥ अस्तोढ्वं स्तोम्या
ब्रह्मणा मेऽवीवृधध्वमुशतीरुषासः । युष्माकं देवीरवसा
सनेम सहस्रिणं च शतिनं च वाजं ॥ १३ ॥ ९ ॥

॥ १२५ ॥ १–७ कक्षीवान्दैर्घतमस औशिजः ॥ स्वनयस्य दानस्तुतिः ॥
त्रिष्टुप् । ४–५ जगती ॥

॥ १२५ ॥ प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रति-
गृह्या नि धत्ते । तेन प्रजां वर्धयमान आयू रायस्पोषेण
सचते सुवीरः ॥ १ ॥ सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै
वय इंद्रो दधाति । यस्त्वायंतं वसुना प्रातरित्वो मुक्षीज-
येव पदिमुत्सिनाति ॥ २ ॥ आयमद्य सुकृतं प्रातरिच्छन्निष्टेः
पुत्रं वसुमता रथेन । अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं

वर्धय सूनृताभिः ॥३॥ उप क्षरंति सिंधवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः। पृणंतं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यंति विश्वतः ॥४॥ नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति। तस्मा आपो घृतमर्षंति सिंधवस्तस्मा इयं दक्षिणा पिन्वते सदा ॥५॥ दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः। दक्षिणावंतो अमृतं भजंते दक्षिणावंतः प्र तिरंत आयुः ॥६॥ मा पृणंतो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रतासः। अन्यस्तेषां परिधिरस्तु कश्चिदपृणंतमभि सं यंतु शोकाः ॥७॥१०॥

॥ १२६ ॥ १–५ कक्षीवान्दैर्घतमस औशिजः। ६ भावयव्यः। ७ रोमशा ॥ १–५. ७ भावयव्यः। ६ रोमशा ॥ १–५ त्रिष्टुप्। ६. ७ अनुष्टुप् ॥

॥१२६॥ अमंदान्स्तोमान्प्र भरे मनीषा सिंधावधि क्षियतो भाव्यस्य। यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥१॥ शतं राज्ञो नाधमानस्य निष्काञ्छतमश्वान्प्रयतान्सद्य आदं। शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥२॥ उप मा श्यावाः स्वनयेन दत्ता वधूमंतो दश रथासो अस्थुः। षष्टिः सहस्रमनु गव्यमागात्सनत्कक्षीवाँ अभिपित्वे अह्नां ॥३॥ चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयंति। मदच्युतः कृशनावतो अत्यान्कक्षीवंत उदमृक्षंत पज्राः ॥४॥ पूर्वामनु प्रयतिमा ददे वस्त्रीन्युक्ताँ अष्टावरिधायसो गाः। सुबंधवो ये विश्या इव व्रा अनस्वंतः श्रव ऐषंत पज्राः ॥५॥ आगधिता परिगधिता या कशीकेव जंगहे। ददाति मह्यं यादुरी याशूनां भोज्या शता ॥६॥ उपोप मे परा मृश मा मे दभ्राणि मन्यथाः। सर्वाहमस्मि रोमशा गंधारीणामिवाविका ॥७॥११॥१८॥

॥१२७॥ १–११ परुच्छेपो दैवोदासिः ॥ अग्निः ॥ १–५, ७–११ अत्यष्टिः । ६ अतिधृतिः ॥

॥१२७॥ अग्निं होतारं मन्ये दास्वंतं वसुं सूनुं सहसो जात-
वेदसं विप्रं न जातवेदसं। य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृ-
पा। घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः॥१॥
यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमंगिरसां विप्र मन्मभिर्विप्रे-
भिः शुक्र मन्मभिः। परिज्मानमिव द्यां होतारं चर्षणीनां।
शोचिष्केशं वृषणं यमिमा विशः प्रावंतु जूतये विशः॥२॥ स
हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न
द्रुहंतरः। वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरं। निःषहमा-
णो यमते नायते धन्वासहा नायते॥३॥ दृळ्हा चिदस्मा अनु
दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नये दाष्ट्यवसे। प्र
यः पुरूणि गाहते तक्षद्वनेव शोचिषा। स्थिरा चिदन्ना नि
रिणात्योजसा नि स्थिराणि चिदोजसा॥४॥ तमस्य पृक्षमुप-
रासु धीमहि नक्तं यः सुदर्शतरो दिवातरादप्रायुषे दिवातरात्।
आदस्यायुर्ग्रभणवद्वीळु शर्म न सूनवे। भक्तमभक्तमवो
व्यंतो अजरा अग्नयो व्यंतो अजराः॥५॥१२॥ स हि शर्धो
न मारुतं तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्ट-
निः। आदद्धव्यान्याददिर्यज्ञस्य केतुरर्हणा। अध स्मास्य
हर्षतो हृषीवतो विश्वे जुषंत पंथां नरः शुभे न पंथां॥६॥
द्विता यदीं कीस्तासो अभिद्यवो नमस्यंत उपवोचंत
भृगवो मथ्नंतो दाशा भृगवः। अग्निरीशे वसूनां शुचिर्यो
धर्णिरेषां। प्रियाँ अपिधीँर्वनिषीष्ट मेधिर आ वनिषीष्ट
मेधिरः॥७॥ विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं
दंपतिं भुजे सत्यगिर्वाहसं भुजे। अतिथिं मानुषाणां पितुर्न

यस्यासया। अमी च विश्वे अमृतास आ वयो हव्या देवेष्वा
वयः ॥८॥ त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये
रयिर्न देवतातये। शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः।
अध स्मा ते परि चरन्त्यजर श्रुष्टीवानो नाजर ॥९॥ प्र वो
महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये स्तोमो बभूत्वग्नये।
प्रति यदीं हविष्मान्विश्वासु क्षासु जोगुवे। अग्रे रेभो न जरत
ऋषूणां जूर्णिर्होत ऋषूणां ॥१०॥ स नो नेदिष्ठं ददृशान आ
भराग्ने देवेभिः सचनाः सुचेतुना महो रायः सुचेतुना। महि
शविष्ठ नस्कृधि संचक्षे भुजे अस्यै। महि स्तोतृभ्यो मघवन्त्सु-
वीर्यं मथीरुग्रो न शवसा ॥११॥१३॥

॥१२८॥ १–८ परुच्छेपो दैवोदासिः ॥ अग्निः ॥ अत्यष्टिः ॥

॥१२८॥ अयं जायत मनुषो धरीमणि होता यजिष्ठ उशि-
जामनु व्रतमग्निः स्वमनु व्रतं। विश्वश्रुष्टिः सखीयते रयिरिव
श्रवस्यते। अदब्धो होता नि षददिळस्पदे परिवीत इळस्पदे॥१॥
तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देव-
ताता हविष्मता। स न ऊर्जामुपाभृत्यया कृपा न जूर्यति। यं मा-
तरिश्वा मनवे परावतो देवं भाः परावतः॥२॥ एवेन सद्यः पर्ये-
ति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्दधद्रेतः कनिक्रदत्। शतं
चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः। सदो दधान उपरेषु सा-
नुष्वग्निः परेषु सानुषु॥३॥ स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञ-
स्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति। क्रत्वा वेधा इषूयते
विश्वा जातानि पस्पशे। यतो घृतश्रीरतिथिरजायत वह्निर्वेधा
अजायत ॥४॥ क्रत्वा यदस्य तविषीषु पृंचतेऽग्नेरवेण म-

एतां न भोज्यैषिराय न भोज्या। स हि ष्मा दानमिन्वति वसूनां
च मज्मना। स नंस्त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः
॥५॥१४॥ विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे तरणिर्न
शिश्रथच्छ्रवस्यया न शिश्रथत्। विश्वस्मा इदिषुध्यते देवत्रा
हव्यमोहिषे। विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति
॥६॥ स मानुषे वृजने शंतमो हितो३ऽग्निर्यज्ञेषु जेन्यो न विश्पतिः
प्रियो यज्ञेषु विश्पतिः। स हव्या मानुषाणामिळा कृतानि
पत्यते। स नंस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः॥७॥ अग्निं
होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं
न्येरिरे। विश्वायुं विश्ववेदसं होतारं यजतं कविं। देवासो रण्व-
मवसे वसूयवो गीर्भी रण्वं वसूयवः॥८॥१५॥

॥ १२९ ॥ १–११ परुच्छेपो दैवोदासिः ॥ १–५. ७–११ इंद्रः । ६ इंदुः ॥
१–७. १० अत्यष्टिः । ८. ९ अतिशक्करी । ११ अष्टिः ॥

॥१२९॥ यं त्वं रथमिंद्र मेधसातयेऽपाका संतमिषिर
प्रणयसि प्रानवद्य नयसि। सद्यश्चित्तमभिष्टये करो वशश्च
वाजिनं। सास्माकमनवद्य तूतुजान वेधसामिमां वाचं न
वेधसां॥१॥ स श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्य इंद्र
भरहूतये नृभिरसि प्रतूर्तये नृभिः। यः शूरैः स्व१ः सनिता
यो विप्रैर्वाजं तरुता। तमीशानास इरधंत वाजिनं पृक्षमत्यं न
वाजिनं॥२॥ दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीररुं
शूर मर्त्यं परिवृणक्षि मर्त्यं। इंद्रोत तुभ्यं तद्दिवे तद्रुद्राय
स्वयशसे। मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय
सप्रथः॥३॥ अस्माकं व इंद्रमुश्मसीष्टये सखायं विश्वायुं
प्रासहं युजं वाजेषु प्रासहं युजं। अस्माकं ब्रह्मोतयेऽवा पृत्सुषु

कासु चित्। नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि
यं ॥४॥ नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नो-
तिभिरुग्राभिरुग्रोतिभिः। नेषि णो यथा पुरानेनाः शूर मन्यसे।
विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ॥५॥१६॥ प्र
तद्वोचेयं भव्यायेंदवे हव्यो न य इषवान्मन्म रेजति रक्षोहा
मन्म रेजति। स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिं। अव
स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥६॥ वनेम तद्धोत्रया
चितंत्या वनेम रयिं रयिवः सुवीर्यं रण्वं संतं सुवीर्यं। दुर्मन्मानं
सुमंतुभिरेमिषा पृचीमहि। आ सत्याभिरिंद्रं द्युम्नहूतिभिर्यजत्रं
द्युम्नहूतिभिः ॥७॥ प्रप्रा वो अस्मे स्वयशोभिरूती परिवर्ग
इंद्रो दुर्मतीनां दरीमन्दुर्मतीनां। स्वयं सा रिषयध्यै या न
उपेषे अत्रैः। हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ॥८॥
त्वं न इंद्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्य-
रक्षसा। सचस्व नः पराक आ सचस्वास्तमीक आ। पाहि नो
दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥९॥ त्वं न इंद्र राया
तरूषसोग्रं चित्त्वा महिमा सक्षदवसे महे मित्रं नावसे।
ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य। अन्यमस्मद्रिरिषेः कं
चिदद्रिवो रिरिक्षंतं चिदद्रिवः ॥१०॥ पाहि न इंद्र सुष्टुत
स्रिधोऽवयाता सदमिद्दुर्मतीनां देवः सन्दुर्मतीनां। हंता
पापस्य रक्षसस्त्राता विप्रस्य मावतः। अधा हि त्वा जनिता
जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो ॥११॥१७॥

॥१३०॥ १—१० परुच्छेपो दैवोदासिः ॥ इंद्रः ॥ १—९ अत्यष्टिः। १० त्रिष्टुप् ॥

॥१३०॥ एंद्र याह्युप नः परावतो नायमच्छा विद-

थानीव सत्पतिरस्तं राजेव सत्पतिः । हवामहे त्वा वयं प्रय-
स्वंतः सुते सचा । पुत्रासो न पितरं वाजसातये मंहिष्ठं
वाजसातये ॥ १ ॥ पिबा सोममिंद्र सुवानमद्रिभिः कोशेन
सिक्तमवतं न वंसगस्तातृषाणो न वंसगः । मदाय हर्यताय
ते तुविष्टमाय धायसे । आ त्वा यच्छंतु हरितो न सूर्यमहा
विश्वेव सूर्यं ॥ २ ॥ अविंदद्दिवो निहितं गुहा निधिं वेर्न
गर्भं परिवीतमश्मन्यनंते अंतरश्मनि । व्रजं वज्री गवामिव
सिषासन्नंगिरस्तमः । अपावृणोदिष इंद्रः परीवृता द्वार इषः
परीवृताः ॥ ३ ॥ दादृहाणो वज्रमिंद्रो गभस्त्योः क्षद्मेव ति-
ग्ममसनाय सं श्यदहिहत्याय सं श्यत् । संविव्यान ओजसा
शवोभिरिंद्र मज्मना । तष्टेव वृक्षं वनिनो नि वृश्चसि
परश्वेव नि वृश्चसि ॥ ४ ॥ त्वं वृथा नद्य इंद्र सर्तवेऽच्छा समु-
द्रमसृजो रथाँ इव वाजयतो रथाँ इव । इत ऊतीरयुंजत
समानमर्थमक्षितं । धेनूरिव मनवे विश्वदोहसो जनाय
विश्वदोहसः ॥ ५ ॥ १८ ॥ इमां ते वाचं वसूयंत आयवो
रथं न धीरः स्वपा अतक्षिषुः सुम्नाय त्वामतक्षिषुः ।
शुंभंतो जेन्यं यथा वाजेषु विप्र वाजिनं । अत्यमिव
शवसे सातये धना विश्वा धनानि सातये ॥ ६ ॥ भिनत्पुरो
नवतिमिंद्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण
दाशुषे नृतो । अतिथिग्वाय शंबरं गिरेरुग्रो अवाभरत् । महो
धनानि दयमान ओजसा विश्वा धनान्योजसा ॥ ७ ॥ इंद्रः
समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हे-
ष्वाजिषु । मनवे शासदव्रतान्त्वचं कृष्णामरंधयत् । दक्षन्न
विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥ ८ ॥ सूरश्चक्रं प्र

वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ
मुषायति । उशना यत्परावतोऽजगन्नूतये कवे । सुम्नानि
विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः ॥ ९ ॥ स नो
नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः । दिवो-
दासेभिरिंद्र स्तवानो वावृधीथा अहोभिरिव द्यौः ॥ १० ॥ १९ ॥

॥ १३१ ॥ १–७ परुच्छेपो दैवोदासिः ॥ इंद्रः ॥ अत्यष्टिः ॥

॥ १३१ ॥ इंद्राय हि द्यौरसुरो अनम्नतेंद्राय मही पृथिवी
वरीमभिर्द्युम्नसाता वरीमभिः । इंद्रं विश्वे सजोषसो देवासो
दधिरे पुरः । इंद्राय विश्वा सवनानि मानुषा रातानि संतु
मानुषा ॥ १ ॥ विश्वेषु हि त्वा सवनेषु तुंजते समानमेकं
वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् । तं त्वा नावं न
पर्षणिं शूषस्य धुरि धीमहि । इंद्रं न यज्ञैश्चितयंत आयवः
स्तोमेभिरिंद्रमायवः ॥ २ ॥ वि त्वा ततस्रे मिथुना अवस्यवो
व्रजस्य साता गव्यस्य निःसृजः सक्षंत इंद्र निःसृजः । यद्गव्यंता
द्वा जना स्व१र्यंता समूहसि । आविष्करिक्रद्वृषणं सचाभुवं
वज्रमिंद्र सचाभुवं ॥ ३ ॥ विदुष्टे अस्य वीर्यस्य पूरवः पुरो
यदिंद्र शारदीरवातिरः सासहानो अवातिरः । शासस्तमिंद्र
मर्त्यमयज्युं शवसस्पते । महीममुष्णाः पृथिवीमिमा अपो
मंदसान इमा अपः ॥ ४ ॥ आदित्ते अस्य वीर्यस्य चर्किरन्मदेषु
वृषन्नुशिजो यदाविथ सखीयतो यदाविथ । चकर्थ कारमेभ्यः
पृतनासु प्रवंतवे । ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यंतः
सनिष्णत ॥ ५ ॥ उतो नो अस्या उषसो जुषेत ह्य१र्कस्य
बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः । यदिंद्र

हंतवे मृधो वृषा वज्रिञ्चिकेतसि। आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः॥६॥ त्वं तमिंद्र वावृधानो अस्मयुरमित्रयंतं तुविजात मर्त्यं वज्रेण शूर मर्त्यं। जहि यो नो अघायति शृणुष्व सुश्रवस्तमः। रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः॥७॥२०॥

॥१३२॥१-६ परुच्छेपो दैवोदासिः॥१-५. ६² इंद्रः। ६¹ इंद्रापर्वतौ॥ अत्यष्टिः॥

॥१३२॥ त्वया वयं मघवन्पूर्व्ये धन इंद्रत्वोताः सासह्याम पृतन्यतो वनुयाम वनुष्यतः। नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते। अस्मिन्यज्ञे वि चयेमा भरे कृतं वाजयंतो भरे कृतं॥१॥ स्वर्जेषे भर आप्रस्य वक्मन्युषर्बुधः स्वस्मिन्नंजसि क्राणस्य स्वस्मिन्नंजसि। अहन्निंद्रो यथा विदे शीर्ष्णाशीर्ष्णोपवाच्यः। अस्मत्रा ते सध्र्यक् संतु रातयो भद्रा भद्रस्य रातयः॥२॥ तत्तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन्यज्ञे वारमकृण्वत क्षयमृतस्य वारसि क्षयं। वि तद्वोचेरध द्वितांतः पश्यंति रश्मिभिः। स घा विदे अन्विंद्रो गवेषणो बंधुक्षिद्भ्यो गवेषणः॥३॥ नू इत्था ते पूर्वथा च प्रवाच्यं यदंगिरोभ्योऽवृणोरप व्रजमिंद्र शिक्षन्नप व्रजं। ऐभ्यः समान्या दिशास्मभ्यं जेषि योत्सि च। सुन्वद्भ्यो रंधया कं चिदव्रतं हृणायंतं चिदव्रतं॥४॥ सं यज्जनान् क्रतुभिः शूर ईक्षयद्धने हिते तरुषंत श्रवस्यवः प्र यक्षंत श्रवस्यवः। तस्मा आयुः प्रजावदिद्बाधे अर्चंत्योजसा। इंद्र ओक्यं दिधिषंत धीतयो देवाँ अच्छा न धीतयः॥५॥ युवं तमिंद्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतं। दूरे चत्ताय छंत्सद्गहनं यदि-

नंक्षत् । अस्माकं शत्रून्परिं शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥ ६ ॥ २१ ॥

॥ १३३ ॥ १–७ परुच्छेपो दैवोदासिः ॥ इंद्रः ॥ १ त्रिष्टुप् । २–४ अनुष्टुप् । ५ गायत्री । ६ धृतिः । ७ अत्यष्टिः ॥

॥१३३॥ उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिंद्राः । अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळ्हा अशेरन् ॥१॥ अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनां । छिंधि वटूरिणा पदा महावटूरिणा पदा ॥ २ ॥ अवासां मघवञ्जहि शर्धो यातुमतीनां । वैलस्थानके अर्मके महावैलस्थे अर्मके ॥३॥ यासां तिस्रः पंचाशतोऽभिव्लंगैरपावपः । तत्सु ते मनायति तकत्सु ते मनायति ॥४॥ पिशंगभृष्टिमंभृणं पिशाचिमिंद्र सं मृण । सर्वं रक्षो नि बर्हय ॥ ५ ॥ अवर्मह इंद्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृणान्न भीषाँ अद्रिवः । शुष्मिंतमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे । अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥ ६ ॥ वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः । सुन्वान इत्सिषासति सहस्रा वाज्यवृतः । सुन्वानायेंद्रो ददात्याभुवं रयिं ददात्याभुवं ॥ ७ ॥ २२ ॥ १९ ॥

॥ १३४ ॥ १–६ परुच्छेपो दैवोदासिः ॥ वायुः ॥ १–५ अत्यष्टिः । ६ अष्टिः ॥

॥१३४॥ आ त्वा जुवो रारहाणा अभि प्रयो वायो वहंत्विह पूर्वपीतये सोमस्य पूर्वपीतये । ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती । नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥ १ ॥ मंदंतु त्वा मंदिनो वायविंदवोऽस्मत्क्राणासः सुकृता अभिद्यवो गोभिः क्राणा अभिद्यवः । यद्ध क्राणा

इरध्यै दक्षं सचंत ऊतयः। सध्रीचीना नियुतो दावने धिय उप
ब्रुवत ईं धियः ॥२॥ वायुर्युंक्ते रोहिता वायुररुणा वायू रथे
अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे। प्र बोधया पुरंधिं
जार आ ससतीमिव। प्र चक्षय रोदसी वासयोषसः श्रवसे
वासयोषसः ॥३॥ तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा
तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु। तुभ्यं धेनुः सबर्दुघा
विश्वा वसूनि दोहते। अजनयो मरुतो वक्षणाभ्यो दिव आ
वक्षणाभ्यः ॥४॥ तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इष-
णंत भुर्वण्यपामिषंत भुर्वणि। त्वां त्सारी दसमानो भगमीट्टे
तक्ववीये। त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा
॥५॥ त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि
सुतानां पीतिमर्हसि। उतो विहुत्मतीनां विशां ववर्जुषीणां।
विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरं ॥६॥२३॥

॥१३५॥ १–९ परुच्छेपो दैवोदासिः ॥ १–३. ९ वायुः। ४–८ इंद्रः ॥ १–७ अत्यष्टिः। ८. ९ अष्टिः ॥

॥१३५॥ स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता
नियुत्वते शतिनीभिर्नियुत्वते। तुभ्यं हि पूर्वपीतये देवा देवाय
येमिरे। प्र ते सुतासो मधुमंतो अस्थिरन्मदाय क्रत्वे अस्थिरन्
॥१॥ तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि
कोशमर्षति शुक्रा वसानो अर्षति। तवायं भाग आयुषु
सोमो देवेषु हूयते। वह वायो नियुतो याह्यस्मयुर्जुषाणो
याह्यस्मयुः ॥२॥ आ नो नियुद्भिः शतिनीभिरध्वरं
सहस्रिणीभिरुप याहि वीतये वायो हव्यानि वीतये।
तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा। अध्वर्युभिर्भरमा-

णा अयंसत वायो शुक्रा अयंसत॥३॥ आ वां रथो नियुत्वा-
न्वक्षदवसेऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वी-
तये। पिबतं मध्वो अंधसः पूर्वपेयं हि वां हितं। वायवा चंद्रेण
राधसा गतमिंद्रश्च राधसा गतं॥४॥ आ वां धियो ववृत्यु-
रध्वराँ उपेममिंदुं मर्मृजंत वाजिनमाशुमत्यं न वाजिनं। तेषां
पिबतमस्मयू आ नो गंतमिहोत्या। इंद्रवायू सुतानामद्रिभि-
र्युवं मदाय वाजदा युवं॥५॥२४॥ इमे वां सोमा अप्स्वा सु-
ता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत। एते
वामभ्यसृक्षत तिरः पवित्रमाशवः। युवायवोऽति रोमाण्य-
व्यया सोमासो अत्यव्यया॥६॥ अति वायो ससतो याहि
शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिंद्रश्च गच्छतं। वि
सूनृता ददृशे रीयते घृतमा पूर्णया नियुता याथो अध्वरमिं-
द्रश्च याथो अध्वरं॥७॥ अत्राह तद्वहेथे मध्व आहुतिं यमश्व-
त्थमुपतिष्ठंत जायवोऽस्मे ते संतु जायवः। साकं गावः सुवते
पच्यते यवो न ते वाय उप दस्यंति धेनवो नाप दस्यंति धे-
नवः॥८॥ इमे ये ते सु वायो बाह्वोजसोऽंतर्नदी ते पतयंत्युक्षणो
महि व्राधंत उक्षणः। धन्वंश्चिद्ये अनाशवो जीराश्चिदगिरौकसः।
सूर्यस्येव रश्मयो दुर्नियंतवो हस्तयोर्दुर्नियंतवः॥९॥२५॥

॥१३६॥ १-७ परुच्छेपो दैवोदासिः॥ १-५ मित्रावरुणौ। ६. ७ लिंगोक्तदेवताः॥
१-६ अत्यष्टिः। ७ त्रिष्टुप्॥

॥१३६॥ प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता
मृळयद्भ्यां स्वादिष्ठं मृळयद्भ्यां। ता सम्राजा घृतासुती
यज्ञेयज्ञ उपस्तुता। अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं
नू चिदाधृषे॥१॥ अदर्शि गातुरुरवे वरीयसी पंथा

ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः। द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च। अथा दधाते बृहदुक्थ्यं१ वयं उपस्तुत्यं बृहद्वयः ॥ २ ॥ ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे जागृवांसा दिवेदिवे। ज्योतिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती। मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः ॥ ३ ॥ अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः। तं देवासो जुषेरत विश्वे अद्य सजोषसः। तथा राजाना करथो यदीमह ऋतावाना यदीमहे ॥ ४ ॥ यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वांसं मर्तमंहसः। तमर्यमाभि रक्षत्यृजूयंतमनु व्रतं। उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतं ॥ ५ ॥ नमो दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीळ्हुषे सुमृळीकाय मीळ्हुषे। इंद्रमग्निमुप स्तुहि द्युक्षमर्यमणं भगं। ज्योग्जीवंतः प्रजया सचेमहि सोमस्योती सचेमहि ॥ ६ ॥ ऊती देवानां वयमिंद्रवंतो मंसीमहि स्वयशसो मरुद्भिः। अग्निर्मित्रो वरुणः शर्म यंसन् तदश्याम मघवानो वयं च ॥ ७ ॥ २६ ॥ १ ॥

॥१३७॥ १-३ परुच्छेपो दैवोदासिः ॥ मित्रावरुणौ ॥ अतिशक्वरी ॥

॥ १३७ ॥ सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे। आ राजाना दिविस्पृशास्मत्रा गंतमुप नः। इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥ १ ॥ इम आ यातमिंदवः सोमासो दध्याशिरः सुतासो दध्याशिरः। उत वामुषसो बुधि साकं सूर्यस्य रश्मि-

भिः । सु॒तो मि॒त्राय॒ वरु॑णाय पी॒तये॒ चारु॑र्ऋ॒ताय॑ पी॒तये॑ ॥२॥
तां वां॑ धे॒नुं न वा॑स॒रीमं॒शुं दु॑हं॒त्यद्रि॑भिः॒ सोमं॑ दुहं॒त्यद्रि॑भिः ।
अ॒स्म॒त्रा गं॑त॒मुप॑ नो॒ऽर्वाञ्चा॒ सोम॑पीतये । अ॒यं वां॑ मित्रा-
वरुणा॒ नृभिः॑ सु॒तः सोम॒ आ पी॒तये॑ सु॒तः ॥ ३ ॥ १ ॥

॥ १३८ ॥ १–४ परुच्छेपो दैवोदासिः ॥ पूषा ॥ अत्यष्टिः ॥

॥१३८॥ प्रप्र॑ पू॒ष्णस्तु॑विजा॒तस्य॑ शस्यते महि॒त्वम॑स्य त॒वसो॒
न तं॑दते स्तो॒त्रम॑स्य॒ न तं॑दते । अर्चा॑मि सुम्न॒यन्न॒हमंत्यू॑तिं
मयो॒भुवं॑ । विश्व॑स्य॒ यो मन॒ आयु॒युवे॑ म॒खो दे॒व आयु॒युवे॑ म॒खः
॥१॥ प्र हि त्वा॑ पूषन्न॒जिरं॒ न याम॑नि॒ स्तोमे॑भिः कृ॒ण्व ऋ॒णवो॒
यथा॒ मृध॒ उष्ट्रो॒ न पीप॑रो॒ मृधः॑ । हु॒वे यत्त्वा॑ मयो॒भुवं॑ दे॒वं
स॒ख्याय॒ मर्त्यः॑ । अ॒स्माक॑मांगू॒षान्द्यु॒म्निन॑स्कृधि॒ वाजे॑षु द्यु॒म्नि-
न॑स्कृधि ॥२॥ यस्य॑ ते पूषन्स॒ख्ये वि॑प॒न्यवः॒ क्रत्वा॑ चि॒त्संतो॒ऽव॑सा
बुभु॒ज्रिर॒ इति॒ क्रत्वा॑ बुभु॒ज्रिरे॑ । तामनु॑ त्वा॒ नवी॑यसीं नि॒युतं॑ रा॒य
ईमहे । अहे॑ळमान उरुशंस॒ सरी॑ भव॒ वाजे॑वाजे॒ सरी॑ भव ॥३॥
अ॒स्या ऊ॒ षु ण॒ उप॑ सा॒तये॑ भुवोऽहे॑ळमानो ररि॒वाँ अ॑जाश्व
श्रवस्य॒ताम॑जाश्व । ओ षु त्वा॑ ववृ॒तीम॑हि॒ स्तोमे॑भिर्दस्म सा॒धु-
भिः । न॒हि त्वा॑ पूषन्नति॒मन्य॑ आघृणे॒ न ते॑ स॒ख्यम॑पह्नु॒वे ॥४॥२॥

॥ १३९ ॥ १–११ परुच्छेपो दैवोदासिः ॥ १ विश्वे देवाः । २ मित्रावरुणौ । ३–५ अश्विनौ । ६ इंद्रः । ७ अग्निः । ८ मरुतः । ९ इंद्राग्नी । १० बृहस्पतिः । ११ विश्वे देवाः ॥ १–४. ६–१० अत्यष्टिः । ५ बृहती । ११ त्रिष्टुप् ॥

॥१३९॥ अस्तु॒ श्रौष॑ट् पु॒रो अ॒ग्निं धि॒या द॑ध॒ आ नु तच्छर्धो॑
दि॒व्यं वृ॑णीमह इंद्रवा॒यू वृ॑णीमहे । यद्ध॑ क्रा॒णा वि॒वस्व॑ति
नाभा॑ सं॒दायि॒ नव्य॑सी । अध॒ प्र सू न॒ उप॑ यंतु धी॒तयो॑ दे॒वाँ
अच्छा॒ न धी॒तयः॑ ॥ १ ॥ यद्ध॒ त्यन्मि॑त्रावरुणावृ॒तादध्या-

ददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना । युवो-
रित्थाधि सद्मस्वपश्याम हिरण्ययं । धीभिश्चन मनसा
स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः ॥ २ ॥ युवां स्तो-
मेभिर्देवयंतो अश्विनाश्रावयंत इव श्लोकमायवो युवां
हव्याभ्या३यवः । युवोर्विश्वा अधि श्रियः पृक्षश्च विश्व-
वेदसा । प्रुषायंते वां पवयो हिरण्यये रथे दस्रा हिरण्यये
॥३॥ अचेति दस्रा व्यु१नाकमृण्वथो युंजते वां रथयुजो दि-
विष्टिष्वध्वस्मानो दिविष्टिषु । अधि वां स्थाम वंधुरे रथे
दस्रा हिरण्यये । पथेव यंतावनुशासता रजोऽंजसा शासता
रजः ॥४॥ शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतं । मा वां
रातिरुप दसत्कदा चनास्मद्रातिः कदा चन ॥ ५ ॥ ३ ॥
वृषन्निंद्र वृषपाणास इंदव इमे सुता अद्रिषुतास उद्भि-
दस्तुभ्यं सुतास उद्भिदः । ते त्वा मंदंतु दावने महे चित्राय
राधसे । गीर्भिर्गिर्वाहः स्तवमान आ गहि सुमृळीको न आ
गहि ॥६॥ ओ षू णो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि
यज्ञियेभ्यो राजभ्यो यज्ञियेभ्यः । यद्ध त्यामंगिरोभ्यो धेनुं देवा
अदत्तन । वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा
॥७॥ मो षु वो अस्मदभि तानि पौंस्या सना भूवन्द्युम्नानि
मोत जारिषुरस्मत्पुरोत जारिषुः । यद्वश्चित्रं युगेयुगे नव्यं
घोषादमर्त्यं । अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च
दुष्टरं ॥ ८ ॥ दध्यङ् ह मे जनुषं पूर्वो अंगिराः प्रियमेधः
कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः । तेषां देवेष्वा-
यतिरस्माकं तेषु नाभयः । तेषां पदेन मह्या नमे गिरें-
द्राग्नी आ नमे गिरा ॥ ९ ॥ होता यक्षद्वनिनो वंत वार्यं बृ-

हस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः । जगृभ्मा दू-
रआदिशं श्लोकमद्रेरध त्मना । अधारयदररिंदानि सुक्रतुः पुरू
सद्मानि सुक्रतुः ॥ १० ॥ ये देवासो दिव्येकादश स्थ पृथिव्या-
मध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो
यज्ञमिमं जुषध्वं ॥ ११ ॥ ४ ॥ २० ॥

॥ १४० ॥ १—१३ दीर्घतमा औचथ्यः ॥ अग्निः ॥ १—९. ११ जगती । १० त्रिष्टुब् जगती वा । १२. १३ त्रिष्टुप् ॥

॥ १४० ॥ वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा यो-
निमग्नये । वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं
तमोहनं ॥ १ ॥ अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे
जग्धमी पुनः । अन्यस्यासा जिह्वया जेन्यो वृषा न्य१न्येन वनिनो
मृष्ट वारणः ॥ २ ॥ कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते
अभि मातरा शिशुं । प्राचाजिह्वं ध्वसयंतं तृषुच्युतमा साच्यं कु-
पयं वर्धनं पितुः ॥ ३ ॥ मुमुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृ-
ष्णसीतास ऊ जुवः । असमना अजिरासो रघुष्यदो वातजूता
उप युज्यंत आशवः ॥ ४ ॥ आदस्य ते ध्वसयंतो वृथेरते कृष्णमभ्वं
महि वर्पः करिक्रतः । यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वस-
न्स्तनयन्नेति नानदत् ॥ ५ ॥ ५ ॥ भूषन्न योऽधि बभ्रूषु नम्नते वृषेव
पत्नीरभ्येति रोरुवत् । ओजायमानस्तन्वश्च शुंभते भीमो न
शृंगा दविधाव दुर्गृभिः ॥ ६ ॥ स संस्तिरो विष्टिरः सं गृभायति
जानन्नेव जानतीर्नित्य आ शये । पुनर्वर्धंते अपि यंति दे-
व्यमन्यद्वर्पः पित्रोः कृण्वते सचा ॥ ७ ॥ तमग्रुवः केशिनीः सं
हि रेभिर ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पुनः । तासां जरां
प्रमुंचन्नेति नानदद्दसुं परं जनयञ्जीवमस्तृतं ॥ ८ ॥ अधी-

वासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः ।
वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह ॥ ९ ॥
अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः ।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥ १० ॥ ६ ॥
इदमग्ने सुधितं दुर्धितादधि प्रियादु चिन्मन्मनः प्रेयो अस्तु
ते । यत्ते शुक्रं तन्वो३ रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वं
॥ ११ ॥ रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने ।
अस्माकं वीराँ उत नो मघोनो जनांश्च या पारयाच्छर्म या च
॥ १२ ॥ अभी नो अग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिंधवश्च
स्वगूर्ताः । गव्यं यव्यं यंतो दीर्घाहेषं वरमरुण्यो वरंत ॥ १३ ॥ ७ ॥

॥ १४१ ॥ १–१३ दीर्घतमा औचथ्यः ॥ अग्निः ॥ १–११ जगती । १२, १३ त्रिष्टुप् ॥

॥ १४१ ॥ बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो
यतो जनि । यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयंत
सस्रुतः ॥ १ ॥ पृक्षो वपुः पितुमान्नित्य आ शये द्वितीयमा
सप्तशिवासु मातृषु । तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं
जनयंत योषणः ॥ २ ॥ निर्यदीं बुध्नान्महिषस्य वर्पस ईशा-
नासः शवसा क्रंत सूरयः । यदीमनु प्रदिवो मध्व आधवे
गुहा संतं मातरिश्वा मथायति ॥ ३ ॥ प्र यत्पितुः परमा-
न्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति । उभा यदस्य
जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः ॥ ४ ॥
आदिन्मातॄराविशद्यास्वा शुचिरहिंस्यमान उर्विया वि
वावृधे । अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु
धावते ॥ ५ ॥ ८ ॥ आदिद्धोतारं वृणते दिविष्टिषु भगमिव

पपृचानासं ऋंजते। देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं
विश्वधा वेति धायसे ॥ ६ ॥ वि यदस्याद्यजतो वातचोदितो
ह्वारो न वक्वा जरणा अनाकृतः। तस्य पत्मन्दक्षुषः कृष्णजंहसः
शुचिजन्मनो रज आ व्यध्वनः ॥ ७ ॥ रथो न यातः शिक्वभिः
कृतो द्यामंगेभिररुषेभिरीयते। आदस्य ते कृष्णासो दक्षि सूरयः
शूरस्येव त्वेषथादीषते वयः ॥ ८ ॥ त्वया ह्यग्ने वरुणो धृतव्रतो
मित्रः शाशद्रे अर्यमा सुदानवः। यत्सीमनु क्रतुना विश्वथा
विभुररान्न नेमिः परिभूरजायथाः ॥ ९ ॥ त्वमग्ने शशमानाय
सुन्वते रत्नं यविष्ठ देवतातिमिन्वसि। तं त्वा नु नव्यं सहसो
युवन्वयं भगं न कारे महिरत्न धीमहि ॥ १० ॥ अस्मे रयिं न
स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिं। रश्मींरिव यो
यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः ॥ ११ ॥ उत
नः सुद्योत्मा जीराश्वो होता मंद्रः शृणवच्चंद्ररथः। स नो ने-
षन्नेषतमैरमूरोऽमिर्वामं सुवितं वस्यो अच्छ ॥ १२ ॥ अस्ता-
व्यग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः। अमी च ये
मघवानो वयं च मिहं न सूरो अति निष्टतन्युः ॥ १३ ॥ ९ ॥

॥ १४२ ॥ १–१३ दीर्घतमा औचथ्यः ॥ आप्रीसूक्तं। १ समित्। २ तनूनपात्। ३ नरा-
शंसः। ४ इळः। ५ बर्हिः। ६ देवीर्द्वारः। ७ उषासानक्ता। ८ दैव्यौ होतारौ प्रचे-
तसौ। ९ तिस्रो देव्यः सरस्वतीळाभारत्यः। १० त्वष्टा। ११ वनस्पतिः। १२ स्वा-
हाकृतयः। १३ इंद्रः ॥ अनुष्टुप् ॥

॥ १४२ ॥ समिद्धो अग्न आ वह देवाँ अद्य यतस्रुचे। तंतुं तनु-
ष्व पूर्व्यं सुतसोमाय दाशुषे ॥ १ ॥ घृतवंतमुप मासि मधु-
मंतं तनूनपात्। यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः
॥ २ ॥ शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति। नराशं-
सस्त्रिरा दिवो देवो देवेषु यज्ञियः ॥ ३ ॥ ईळितो अग्न आ वहेंद्रं

चित्रमिह प्रियं। इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते ॥४॥
स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे। वृंजे देवव्यचस्तममिं-
द्राय शर्म सप्रथः ॥५॥ वि श्रयंतामृतावृधः प्रयै देवेभ्यो महीः।
पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ॥६॥१०॥ आ भंदमाने
उपाके नक्तोषासा सुपेशसा। यह्वी ऋतस्य मातरा सीदतां
बर्हिरा सुमत् ॥७॥ मंद्रजिह्वा जुगुर्वणी होतारा दैव्या कवी।
यज्ञं नो यक्षतामिमं सिध्रमद्य दिविस्पृशं ॥८॥ शुचिर्देवेष्वर्पि-
ता होत्रा मरुत्सु भारती। इळा सरस्वती मही बर्हिः सीदंतु
यज्ञियाः ॥९॥ तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना। त्वष्टा पो-
षाय वि ष्यतु राये नाभा नो अस्मयुः ॥१०॥ अवसृजन्नुप त्मना
देवान्यक्षि वनस्पते। अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः
॥११॥ पूषण्वते मरुत्वते विश्वदेवाय वायवे। स्वाहा गायत्रवे-
पसे हव्यमिंद्राय कर्तन ॥१२॥ स्वाहाकृतान्या गह्युप हव्यानि
वीतये। इंद्रा गहि श्रुधी हवं त्वां हवंते अध्वरे ॥१३॥११॥

॥१४३॥ १–८ दीर्घतमा औचथ्यः ॥ अग्निः ॥ १–७ जगती । ८ त्रिष्टुप् ॥

॥१४३॥ प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः
सूनवे भरे। अपां नपाद्यो वसुभिः सह प्रियो होता पृथिव्यां
न्यसीददृत्वियः ॥१॥ स जायमानः परमे व्योमन्यावि-
रग्निरभवन्मातरिश्वने। अस्य क्रत्वा समिधानस्य मज्मना
प्र द्यावा शोचिः पृथिवी अरोचयत् ॥२॥ अस्य त्वेषा
अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः। भा-
त्वक्षसो अत्यक्तुर्न सिंधवोऽग्ने रेजंते अससंतो अजराः
॥३॥ यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य

मज्मना। अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥४॥ न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दिव्या यथाशनिः। अग्निर्जंभैस्तिगितैरत्ति भर्वति योधो न शत्रून्त्स वना न्यृंजते ॥५॥ कुविन्नो अग्निरुचथस्य वीरसद्वसुष्कुविद्वसुभिः काममावरत्। चोदः कुवित्तुतुज्यात्सातये धियः शुचिप्रतीकं तमया धिया गृणे ॥६॥ घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋंजते। इंधानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियं ॥७॥ अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः। अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः ॥८॥१२॥

॥१४४॥ १–७ दीर्घतमा औचथ्यः ॥ अग्निः ॥ जगती ॥

॥१४४॥ एति प्र होता व्रतमस्य माययोर्ध्वां दधानः शुचिपेशसं धियं। अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ॥१॥ अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः। अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते ॥२॥ युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरित्रता मिथः। आदीं भगो न हव्यः समस्मदा वोळ्हुर्न रश्मीन्त्समयंस्त सारथिः ॥३॥ यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा। दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा ॥४॥ तमीं हिन्वंति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे। धनोरधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित ॥५॥ त्वं ह्यग्ने दिव्यस्य राजसि

त्वं पार्थिवस्य पशुपा इव त्मना। एनी त एते बृहती अभि-
श्रिया हिरण्ययी वक्वरी बर्हिराशाते ॥ ६ ॥ अग्ने जुषस्व प्रति
हर्य तद्वचो मंद्र स्वधाव ऋतजात सुक्रतो। यो विश्वतः
प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमाँ इव क्षयः॥ ७ ॥ १३ ॥

॥ १४५ ॥ १–५ दीर्घतमा औचथ्यः ॥ अग्निः ॥ १–४ जगती। ५ त्रिष्टुप् ॥

॥१४५॥ तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा
न्वीयते। तस्मिन्त्संति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शु-
ष्मिणस्पतिः॥१॥ तमित्पृच्छंति न सिमो वि पृच्छति स्वेनेव धीरो
मनसा यदग्रभीत्। न मृष्यते प्रथमं नापरं वचोऽस्य क्रत्वा सचते
अप्रदृपितः ॥२॥ तमिद्गच्छंति जुह्वः१ स्तमर्वतीर्विश्वान्येकः शृ-
णवद्वचांसि मे। पुरुप्रैषस्ततुरिर्यज्ञसाधनोऽच्छिद्रोतिः शिशुरा-
दत्त सं रभः॥३॥ उपस्थायं चरति यत्समारत सद्यो जातस्तत्सार
युज्येभिः। अभि श्वांतं मृशते नांद्ये मुदे यदीं गच्छंत्युशतीरपिष्ठितं
॥४॥ स ईं मृगो अप्यो वनर्गुरुप त्वच्युपमस्यां नि धायि। व्य-
ब्रवीद्वयुना मर्त्येभ्योऽग्निर्विद्वाँ ऋतचिद्धि सत्यः ॥५॥१४॥

॥ १४६ ॥ १–५ दीर्घतमा औचथ्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ १४६ ॥ त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रो-
रुपस्थे। निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचना-
पप्रिवांसं ॥ १ ॥ उक्षा महाँ अभि ववक्ष एने अजरस्तस्था-
वितऊतिरृष्वः। उर्व्याः पदो नि दधाति सानौ रिहंत्यूधो
अरुषासो अस्य ॥२॥ समानं वत्समभि संचरंती विष्वग्धेनू
वि चरतः सुमेके। अनपवृज्याँ अध्वनो मिमाने विश्वा-
न्केताँ अधि महो दधाने ॥३॥ धीरासः पदं कवयो नयंति ना-

ना हृदा रक्षमाणा अजुर्यं । सिषासंतः पर्यपश्यंत सिंधुमावि-
रेभ्यो अभवत्सूर्यो नॄन् ॥ ४ ॥ दिदृक्षेण्यः परि काष्ठासु जेन्यं
ईळेन्यो महो अर्भाय जीवसे । पुरुत्रा यदभवत्सूरहैभ्यो गर्भे-
भ्यो मघवा विश्वदर्शतः ॥ ५ ॥ १५ ॥

॥ १४७ ॥ १–५ दीर्घतमा औचथ्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१४७॥ कथा ते अग्ने शुचयंत आयोर्ददाशुर्वाजेभिराशुषा-
णाः। उभे यत्तोके तनये दधाना ऋतस्य सामन्रणयंत देवाः॥१॥
बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः। पी-
यति त्वो अनु त्वो गृणाति वंदारुस्ते तन्वं वंदे अग्ने ॥ २ ॥ ये
पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरितादरक्षन् । ररक्ष
तान्त्सुकृतो विश्ववेदा दिप्संत इद्रिपवो नाह देभुः ॥ ३ ॥ यो
नो अग्ने अररिवाँ अघायुररातीवा मर्चयति द्वयेन। मंत्रो गुरुः
पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ॥ ४ ॥ उत वा यः
सहस्य प्रविद्वान्मर्तो मर्तं मर्चयति द्वयेन । अतः पाहि स्तव-
मान स्तुवंतमग्ने माकिर्नो दुरिताय धायीः ॥ ५ ॥ १६ ॥

॥ १४८ ॥ १–५ दीर्घतमा औचथ्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ १४८ ॥ मथीद्यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं
विश्वदेव्यं । नि यं दधुर्मनुष्यासु विक्षु स्व१र्ण चित्रं वपुषे वि-
भावं ॥ १ ॥ ददानमिन्न ददभंत मन्माग्निर्वरूथं मम तस्य
चाकन् । जुषंत विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य का-
रोः ॥ २ ॥ नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञि-
यासः । प्र सू नयंत गृभयंत इष्टावश्वासो न रथ्यो रारहाणाः
॥ ३ ॥ पुरूणि दस्मो नि रिणाति जंभैराद्रोचते वन आ विभा-
वा । आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु

द्यून् ॥४॥ न यं रिपवो न रिषण्यवो गर्भे संतं रेषणा रेषयंति।
अंधा अपश्या न दभन्नभिख्या नित्यास ईं प्रेतारो अरक्षन्
॥५॥१७॥

॥ १४९ ॥ १-५ दीर्घतमा औचथ्यः ॥ अग्निः ॥ विराट् ॥

॥१४९॥ महः स राय एषते पतिर्दन्निन इनस्य वसुनः पद
आ। उप ध्रजंतमद्रयो विधन्नित् ॥१॥ स यो वृषा नरां न रो-
दस्योः श्रवोभिरस्ति जीवपीतसर्गः। प्र यः सस्राणः शिश्रीत
योनौ ॥२॥ आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ना-
र्वा। सूरो न रुरुक्वाञ्छतात्मा ॥३॥ अभि द्विजन्मा त्री रो-
चनानि विश्वा रजांसि शुशुचानो अस्थात्। होता यजिष्ठो
अपां सधस्थे ॥४॥ अयं स होता यो द्विजन्मा विश्वा दधे
वार्याणि श्रवस्या। मर्तो यो अस्मै सुतुको ददाश ॥५॥१८॥

॥ १५० ॥ १-३ दीर्घतमा औचथ्यः ॥ अग्निः ॥ उष्णिक् ॥

॥१५०॥ पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा। तोदस्येव
शरण आ महस्य ॥१॥ व्यनिनस्य धनिनः प्रहोषे चिदररुषः।
कदा चन प्रजिगतो अदेवयोः ॥२॥ स चंद्रो विप्र मर्त्यो महो
व्राधंतमो दिवि। प्रप्रेत्ते अग्ने वनुषः स्याम ॥३॥१९॥

॥ १५१ ॥ १-९ दीर्घतमा औचथ्यः ॥ १ मित्रः। २-९ मित्रावरुणौ ॥ जगती ॥

॥१५१॥ मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे
अप्सु जीजनन्। अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं
यजतं जनुषामवः ॥१॥ यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः
प्र मित्रासो न दधिरे स्वाभुवः। अध क्रतुं विदतं गातुमर्चत
उत श्रुतं वृषणा पस्त्यावतः ॥२॥ आ वां भूषन्क्षितयो जन्म

रोदस्योः प्रवाच्यं वृषणा दक्षसे महे । यदीमृताय भरथो यद-
र्वते प्र होत्रया शिम्या वीथो अध्वरं ॥ ३ ॥ प्र सा क्षितिरसुर
या महि प्रिय ऋतावानावृतमा घोषथो बृहत् । युवं दिवो
बृहतो दक्षमाभुवं गां न धुर्युप युंजाथे अपः ॥ ४ ॥ मही अत्र
महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः । स्वरंति ता
उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव ॥ ५ ॥ २० ॥ आ
वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः । अव
त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः
॥ ६ ॥ यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति
मन्मसाधनः । उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः
सुमतिं गंतमस्मयू ॥ ७ ॥ युवां यज्ञैः प्रथमा गोभिरंजत ऋता-
वाना मनसो न प्रयुक्तिषु । भरंति वां मन्मना संयता गिरो-
ऽदृप्यता मनसा रेवदाशाथे ॥ ८ ॥ रेवद्वयो दधाथे रेवदाशाथे
नरा मायाभिरितऊति माहिनं । न वां द्यावोऽहभिर्नोत सिं-
धवो न देवत्वं पणयो नानशुर्मघं ॥ ९ ॥ २१ ॥

॥ १५२ ॥ १-७ दीर्घतमा औचथ्यः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥ १५२ ॥ युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मंतवो
ह सर्गाः । अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा
सचेथे ॥ १ ॥ एतच्चन त्वो वि चिकेतदेषां सत्यो मंत्रः कवि-
शस्त ऋघावान् । त्रिरश्रिं हंति चतुरश्रिरुग्रो देवनिदो
ह प्रथमा अजूर्यन् ॥ २ ॥ अपादेति प्रथमा पद्वतीनां क-
स्तद्वां मित्रावरुणा चिकेत । गर्भो भारं भरत्या चिदस्य
ऋतं पिपर्त्यनृतं नि तारीत् ॥ ३ ॥ प्रयंतमित्परि जारं

कनीनां पश्यामसि नोपनिपद्यमानं। अनवपृग्णा वितता
वसानं प्रियं मित्रस्य वरुणस्य धाम ॥४॥ अनश्वो जातो
अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः। अचित्तं ब्रह्म जुजुषुर्यु-
वानः प्र मित्रे धाम वरुणे गृणन्तः ॥५॥ आ धेनवो मामतेय-
मवन्तीर्ब्रह्मप्रियं पीपयन्त्सस्मिन्नूधन्। पित्वो भिक्षेत वयुनानि
विद्वानासाविवासन्नदितिमुरुष्येत् ॥६॥ आ वां मित्रावरुणा
हव्यजुष्टिं नमसा देवाववसा ववृत्याम्। अस्माकं ब्रह्म पृतनासु
सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥७॥२२॥

॥१५३॥ १-४ दीर्घतमा औचथ्यः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥१५३॥ यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा
नमोभिः। घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति
॥१॥ प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः।
अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥२॥
पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे। हिनोति
यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता ॥३॥ उत वां
विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः। उतो नो अस्य
पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ॥४॥२३॥

॥१५४॥ १-६ दीर्घतमा औचथ्यः ॥ विष्णुः ॥ त्रिष्टुप् ॥

॥१५४॥ विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि
विममे रजांसि। यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रे-
धोरुगायः ॥१॥ प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः
कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति
भुवनानि विश्वा ॥२॥ प्र विष्णवे शूषमेतु मन्म गिरि-
क्षित उरुगायाय वृष्णे। य इदं दीर्घं प्रयतं सधस्थमेको

विममे त्रिभिरित्पदेभिः ॥३॥ यस्य त्री पूर्णा मधुना पदान्य-
क्षीयमाणा स्वधया मदंति। य उ त्रिधातु पृथिवीमुत द्या-
मेको दाधार भुवनानि विश्वा ॥४॥ तदस्य प्रियमभि पाथो
अश्यां नरो यत्र देवयवो मदंति। उरुक्रमस्य स हि बंधुरित्था
विष्णोः पदे परमे मध्व उत्सः ॥५॥ ता वां वास्तून्युश्मसि
गमध्यै यत्र गावो भूरिशृंगा अयासः। अत्राह तदुरुगायस्य
वृष्णः परमं पदमव भाति भूरि ॥६॥२४॥

॥१५५॥ १–६ दीर्घतमा औचथ्यः ॥ १–३ विष्णुरिंद्रश्च। ४–६ विष्णुः ॥ जगती ॥

॥१५५॥ प्र वः पांतमंधसो धियायते महे शूराय विष्णवे चा-
र्चत। या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधु-
ना ॥१॥ त्वेषमित्था समरणं शिमीवतोरिंद्राविष्णू सुतपा वा-
मुरुष्यति। या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामु-
रुष्यथः॥२॥ ता ईं वर्धंति मह्यस्य पौंस्यं नि मातरा नयति रेतसे
भुजे। दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः
॥३॥ तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे
॥४॥ द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति। तृती-
यमस्य नकिरा दधर्षति वयश्चन पतयंतः पतत्रिणः॥५॥ चतुर्भिः
साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपत्। बृहच्छरीरो
विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवं ॥६॥२५॥

॥१५६॥ १–५ दीर्घतमा औचथ्यः ॥ विष्णुः ॥ जगती ॥

॥१५६॥ भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एव-
या उ सप्रथाः। अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो

यज्ञश्च राध्यो हविष्मता ॥१॥ यः पूर्व्याय वेधसे नवीयसे सुम-
ज्जानये विष्णवे ददाशति । यो जातमस्य महतो महि ब्रव-
त्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥२॥ तमु स्तोतारः पूर्व्यं यथा
विद ऋतस्य गर्भं जनुषा पिपर्तन । आस्य जानंतो नाम
चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ॥३॥ तमस्य
राजा वरुणस्तमश्विना क्रतुं सचंत मारुतस्य वेधसः । दाधार
दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते ॥४॥ आ
यो विवाय सचथाय दैव्य इंद्राय विष्णुः सुकृते सुकृत्तरः ।
वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत्
॥ ५ ॥ २६ ॥ २१ ॥

॥ १५७ ॥ १-६ दीर्घतमा औचथ्यः ॥ अश्विनौ ॥ १-४ जगती ।
५-६ त्रिष्टुप् ॥

॥१५७॥ अबोध्यग्निर्ज्म उदेति सूर्यो व्युषाश्चंद्रा मह्यावो
अर्चिषा । आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता
जगत्पृथक् ॥१॥ यद्युंजाथे वृषणमश्विना रथं घृतेन नो मधुना
क्षत्रमुक्षतं । अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता
भजेमहि ॥२॥ अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्वि-
नोर्यातु सुष्टुतः । त्रिवंधुरो मघवा विश्वसौभगः शं न आ वक्ष-
द्द्विपदे चतुष्पदे ॥३॥ आ न ऊर्जं वहतमश्विना युवं मधुमत्या नः
कशया मिमिक्षतं । प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो
भवतं सचाभुवा ॥४॥ युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुव-
नेष्वंतः । युवमग्निं च वृषणावपश्च वनस्पतींरश्विनावैरयेथां ॥५॥
युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या३ राथ्येभिः । अथो ह
क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश ॥६॥२७॥२॥

॥ १५८ ॥ १–६ दीर्घतमा औचथ्यः ॥ अश्विनौ ॥ १–५ त्रिष्टुप् । ६ अनुष्टुप् ॥

॥१५८॥ वसू रुद्रा पुरुमंतू वृधंता दशस्यतं नो वृषणाव-
भिष्टौ । दस्रा ह यद्रेक्ण औचथ्यो वां प्र यत्सस्राथे अकवा-
भिरूती ॥१॥ को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे नमसा
पदे गोः । जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरंता
॥ २ ॥ युक्तो ह यद्वां तौग्र्याय पेरुर्वि मध्ये अर्णसो धायि
पज्रः । उप वामवः शरणं गमेयं शूरो नाज्म पतयद्भिरेवैः
॥३॥ उपस्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धां ।
मा मामेधो दशतयश्चितो धाक् प्र यद्वां बद्धस्त्मनि खादति
क्षां ॥ ४ ॥ न मा गरन्नद्यो मातृतमा दासा यदीं सुसमुब्धम-
वाधुः । शिरो यदस्य त्रैतनो वितक्षत्स्वयं दास उरो अंसा-
वपि ग्ध ॥५॥ दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे । अपा-
मर्थं यतीनां ब्रह्मा भवति सारथिः ॥ ६ ॥ १ ॥

॥ १५९ ॥ १–५ दीर्घतमा औचथ्यः ॥ द्यावापृथिव्यौ ॥ जगती ॥

॥ १५९ ॥ प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे
विदथेषु प्रचेतसा । देवेभिर्ये देवपुत्रे सुदंससेत्था धिया
वार्याणि प्रभूषतः ॥ १ ॥ उत मन्ये पितुरद्रुहो मनो मातु-
र्महि स्वतवस्तद्धवीमभिः । सुरेतसा पितरा भूम चक्र-
तुरुरु प्रजाया अमृतं वरीमभिः ॥ २ ॥ ते सूनवः स्वपसः सु-
दंससो मही जज्ञुर्मातरा पूर्वचित्तये । स्थातुश्च सत्यं जगतश्च
धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥ ३ ॥ ते मायिनो
ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा । नव्यं-
नव्यं तंतुमा तन्वते दिवि समुद्रे अंतः कवयः सुदीतयः
॥ ४ ॥ तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मना-

महे । अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमंतं शतग्विनं ॥ ५ ॥ २ ॥

॥ १६० ॥ १–५ दीर्घतमा औचथ्यः ॥ द्यावापृथिव्यौ ॥ जगती ॥

॥१६०॥ ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी । सुजन्मनी धिषणे अंतरीयते देवो देवी धर्मणा सूर्यः शुचिः ॥ १ ॥ उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः । सुधृष्टमे वपुष्ये३न रोदसी पिता यत्सीमभि रूपैरवासयत् ॥ २ ॥ स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया । धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत ॥ ३ ॥ अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशंभुवा । वि यो ममे रजसी सुक्रतूययाजरेभिः स्कंभनेभिः समानृचे ॥ ४ ॥ ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् । येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतं ॥ ५ ॥ ३ ॥

॥ १६१ ॥ १–१४ दीर्घतमा औचथ्यः ॥ ऋभवः ॥ १–१३ जगती । १४ त्रिष्टुप् ॥

॥ १६१ ॥ किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं१ कद्यदूचिम । न निंदिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम ॥ १ ॥ एकं चमसं चतुरः कृणोतन तद्वो देवा अब्रुवन्तद्व आगमं । सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ ॥ २ ॥ अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः । धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि ॥ ३ ॥ चकृवांस ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन् । यदावाख्यच्चमसाञ्चतुरः कृतानादित्त्वष्टा ग्नास्वंत-

न्यानजे ॥ ४ ॥ हनामेनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिंदिषुः। अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्या३नामभिः स्परत् ॥ ५ ॥ ४ ॥ इंद्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत। ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥ ६ ॥ निश्चर्मणो गामरिणीत धीतिभिर्या जरंता युवशा ताकृणोतन। सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ॥ ७ ॥ इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुंजनेजनं। सौधन्वना यदि तन्नेव हर्यथ तृतीये घा सवने मादयाध्वै ॥ ८ ॥ आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत्। वधर्यंतीं बहुभ्यः प्रैको अब्रवीदृता वदंतश्चमसाँ अपिंशत ॥ ९ ॥ श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतं। आ निम्रुचः शकृदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः ॥ १० ॥ ५ ॥ उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः। अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ ॥ ११ ॥ संमील्य यद्भुवना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः। अशपत यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन ॥ १२ ॥ सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत्। श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥ १३ ॥ दिवा यांति मरुतो भूम्याग्निरयं वातो अंतरिक्षेण याति। अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छंतः शवसो नपातः ॥ १४ ॥ ६ ॥

॥ १६२ ॥ १–२२ दीर्घतमा औचथ्यः ॥ अश्वस्तुतिः ॥ १.२.४.५.७–२२ त्रिष्टुप्। ३.६ जगती ॥

॥१६२॥ मा नो मित्रो वरुणो अर्यमायुरिंद्र ऋभुक्षा मरुतः
परि ख्यन्। यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वी-
र्याणि ॥१॥ यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो
नयंति। सुप्राङजो मेम्यद्विश्वरूप इंद्रापूष्णोः प्रियमप्येति पाथः
॥२॥ एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते वि-
श्वदेव्यः। अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जि-
न्वति ॥३॥ यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयंति।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥४॥
होताध्वर्युरावया अग्निमिंधो ग्रावग्राभ उत शंस्ता सुविप्रः।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वं ॥५॥७॥ यू-
पव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति। ये चा-
र्वते पचनं संभरंत्युतो तेषामभिगूर्तिर्न इन्वतु ॥६॥ उप प्रा-
गात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः। अन्वेनं
विप्रा ऋषयो मदंति देवानां पुष्टे चकृमा सुबंधुं ॥७॥ यद्वा-
जिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य। यद्वा
घास्य प्रभृतमास्ये३ तृणं सर्वा ता ते अपि देवेष्वस्तु ॥८॥ यद-
श्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु
॥९॥ यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गंधो
अस्ति। सुकृता तच्छमितारः कृण्वंतूत मेधं शृतपाकं पचंतु
॥१०॥८॥ यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्या-
वधावति। मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुश-

ओ रातमस्तु ॥ ११ ॥ ये वाजिनं परिपश्यंति पक्वं य ईमाहुः
सुरभिर्निर्हरेति । ये चार्वतो मांसभिक्षामुपासत उतो तेषा-
मभिगूर्तिर्न इन्वतु ॥ १२ ॥ यन्नीक्षणं मांस्पचन्या उखाया
या पात्राणि यूष्ण आसेचनानि । ऊष्मण्यापिधाना चरू-
णामंकाः सूनाः परि भूषंत्यश्वं ॥ १३ ॥ निक्रमणं निषदनं
विवर्तनं यच्च पड्बीशमर्वतः । यच्च पपौ यच्च घासिं जघास
सर्वा ता ते अपि देवेष्वस्तु ॥ १४ ॥ मा त्वाग्निर्ध्वनयीद्धूम-
गंधिर्मोखा भ्राजंत्यभि विक्त जघ्रिः । इष्टं वीतमभिगूर्तं वष-
ट्कृतं तं देवासः प्रति गृभ्णंत्यश्वं ॥ १५ ॥ ९ ॥ यदश्वाय वासं
उपस्तृणंत्यधीवासं या हिरण्यान्यस्मै । संदानमर्वंतं पड्बीशं
प्रिया देवेष्वा यामयंति ॥ १६ ॥ यत्ते सादे महसा शूकृतस्य
पार्ष्ण्या वा कशया वा तुतोद । स्रुचेव ता हविषो अध्वरेषु
सर्वा ता ते ब्रह्मणा सूदयामि ॥ १७ ॥ चतुस्त्रिंशद्वाजिनो
देवबंधोर्वंक्रीरश्वस्य स्वधितिः समेति । अच्छिद्रा गात्रा
वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥ १८ ॥ एकस्त्व-
ष्टुरश्वस्या विशस्ता द्वा यंतारा भवतस्तथ ऋतुः । या ते
गात्राणामृतुथा कृणोमि ताता पिंडानां प्र जुहोम्यग्नौ ॥ १९ ॥
मा त्वा तपत्प्रिय आत्मापियंतं मा स्वधितिस्तन्व१आ ति-
ष्ठिपत्ते । मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना
मिथू कः ॥ २० ॥ न वा उ एतन्म्रियसे न रिष्यसि देवाँ
इदेषि पथिभिः सुगेभिः । हरी ते युंजा पृषती अभूतामुपा-
स्थाद्वाजी धुरि रासभस्य ॥ २१ ॥ सुगव्यं नो वाजी स्वश्व्यं
पुंसः पुत्राँ उत विश्वापुषं रयिं । अनागास्त्वं नो अदितिः
कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान् ॥ २२ ॥ १० ॥

॥ १६३ ॥ १-१३ दीर्घतमा औचथ्यः ॥ अश्वस्तुतिः ॥ त्रिष्टुप् ॥

॥१६३॥ यदक्रंदः प्रथमं जायमान उद्यन्त्समुद्रादुत वा
पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं
ते अर्वन्॥१॥ यमेन दत्तं त्रित एनमायुनगिंद्र एणं प्रथमो
अध्यतिष्ठत्। गंधर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो
निरतष्ट॥२॥ असि यमो अस्यादित्यो अर्वन्नसि त्रितो
गुह्येन व्रतेन। असि सोमेन समया विपृक्त आहुस्ते त्रीणि
दिवि बंधनानि॥३॥ त्रीणि त आहुर्दिवि बंधनानि त्री-
ण्यप्सु त्रीण्यंतः समुद्रे। उतेव मे वरुणश्छंत्स्यर्वन्यत्रा त
आहुः परमं जनित्रं॥४॥ इमा ते वाजिन्नवमार्जनानीमा
शफानां सनितुर्निधाना। अत्रा ते भद्रा रशना अपश्यमृ-
तस्य या अभिरक्षंति गोपाः॥५॥११॥ आत्मानं ते मनसा-
रादजानामवो दिवा पतयंतं पतंगं। शिरो अपश्यं पथिभिः
सुगेभिररेणुभिर्जेहमानं पतत्रि॥६॥ अत्रा ते रूपमुत्तममपश्यं
जिगीषमाणमिष आ पदे गोः। यदा ते मर्तो अनु भोगमा-
नळादिद्ग्रसिष्ठ ओषधीरजीगः॥७॥ अनु त्वा रथो अनु
मर्यो अर्वन्ननु गावोऽनु भगः कनीनां। अनु व्रातासस्तव
सख्यमीयुरनु देवा ममिरे वीर्यं ते॥८॥ हिरण्यशृंगोऽयो
अस्य पादा मनोजवा अवर इंद्र आसीत्। देवा इदस्य हविर-
द्यमायन्यो अर्वंतं प्रथमो अध्यतिष्ठत्॥९॥ ईर्मांतासः सिलि-
कमध्यमासः सं शूरणासो दिव्यासो अत्याः। हंसा इव श्रेणिशो
यतंते यदाक्षिषुर्दिव्यमज्ममश्वाः॥१०॥१२॥ तव शरीरं पतयि-
ष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान्। तव शृंगाणि विष्ठिता
पुरुत्रारण्येषु जर्भुराणा चरंति॥११॥ उप प्रागाच्छसनं वाज्य-

वो देवद्रीचा मनसा दीध्यानः। अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यंति रेभाः ॥१२॥ उप प्रागात्परमं यत्सधस्थमर्वाँ अच्छा पितरं मातरं च। अद्या देवाञ्जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥१३॥१३॥

॥१६४॥ १–५२ दीर्घतमा औचथ्यः ॥ १–४१ विश्वे देवाः। ४२[१] वाक्। ४२[२] आपः। ४३[१] शकधूमः। ४३[२] सोमः। ४४ अग्निः सूर्यो वायुश्च। ४५ वाक्। ४६. ४७ सूर्यः। ४८ संवत्सरसंस्थं कालचक्रवर्णनं। ४९ सरस्वती। ५० साध्याः। ५१ सूर्यः पर्जन्या अग्नयो वा। ५२ सरस्वान् सूर्यो वा ॥ १–११. १३. १४. १६–२२. २४–२८. ३०–३५. ३७–४०. ४३–५०. ५२ त्रिष्टुप्। १२. १५. २३. २९. ३६. ४१ जगती। ४२ प्रस्तारपंक्तिः। ५१ अनुष्टुप् ॥

॥१६४॥ अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः। तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रं ॥१॥ सप्त युंजंति रथमेकचक्रमेको अश्वो वहति सप्तनामा। त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥२॥ इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहंत्यश्वाः। सप्त स्वसारो अभि सं नवंते यत्र गवां निहिता सप्त नाम ॥३॥ को ददर्श प्रथमं जायमानमस्थन्वंतं यदनस्था बिभर्ति। भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत् ॥४॥ पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता पदानि। वत्से बष्कयेऽधि सप्त तंतून्वि तत्निरे कवय ओतवा उ ॥५॥१४॥ अचिकित्वाञ्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान्। वि यस्तस्तंभ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकं ॥६॥ इह ब्रवीतु य ईमंग वेदास्य वामस्य निहितं पदं वेः। शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ॥७॥ माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे। सा बीभत्सुर्गर्भरसा निविद्धा नमस्वंत इदुपवाकमीयुः ॥८॥ युक्ता मातासीद्धुरि दक्षि-

णाया अतिष्ठद्गर्भो वृजनीष्वंतः । अमीमेद्वत्सो अनु गा-
मपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥ ९॥ तिस्रो मातॄस्त्रीन्पितॄ-
न्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयंति । मंत्रयंते दिवो
अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वां ॥१०॥१५॥ द्वाद-
शारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य । आ पुत्रा
अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥११॥
पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरी-
षिणं । अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहु-
रर्पितं ॥१२॥ पंचारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुव-
नानि विश्वा । तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते
सनाभिः ॥१३॥ सनेमि चक्रमजरं वि वावृत उत्ताना
दश युक्ता वहंति । सूर्यस्य चक्षू रजसैत्यावृतं तस्मि
पिता भुवनानि विश्वा ॥१४॥ साकंजानां सप्तथमाहु
षळिद्यमा ऋषयो देवजा इति । तेषामिष्टानि विहि
धामशः स्थात्रे रेजंते विकृतानि रूपशः ॥१५॥
स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि
दंधः । कविर्यः पुत्रः स ईमा चिकेत यस्ता वि
पितुष्पितासत् ॥१६॥ अवः परेण पर एनाव
वत्सं बिभ्रती गौरुदस्थात् । सा कद्रीची कं स्वि
गात्कं स्वित्सूते नहि यूथे अंतः ॥१७॥ अव
तरं यो अस्यानुवेद पर एनावरेण । कवीय
प्र वोचदेवं मनः कुतो अधि प्रजातं ॥१८
परांच आहुर्ये परांचस्ताँ उ
सोम तानि धुरा

वहंति ॥१९॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि
षस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि
चाकशीति ॥२०॥१७॥ यत्रा सुपर्णा अमृतस्य भागम-
निमेषं विदथाभिस्वरंति । इनो विश्वस्य भुवनस्य गोपाः
स मा धीरः पाकमत्रा विवेश ॥२१॥ यस्मिन्वृक्षे मध्वदः
सुपर्णा निविशंते सुवते चाधि विश्वे । तस्येदाहुः पि-
प्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥२२॥ यद्गा-
यत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः
२३॥ गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन
कं । वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त
णीः ॥२४॥ जगता सिंधुं दिव्यस्तभायद्रथंतरे सूर्यं पर्य-
त् । गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र
महित्वा ॥२५॥१८॥ उप ह्वये सुदुघां धेनुमेतां
गोधुगुत दोहदेनां । श्रेष्ठं सवं सविता सावि-
ीद्धो घर्मस्तदु षु प्र वोचं ॥२६॥ हिंकृण्वती
वसूनां वत्समिच्छंती मनसाभ्यागात् । दुहाम-
पयो अघ्न्येयं सा वर्धतां महते सौभगाय
ीरमीमेदनु वत्सं मिषंतं मूर्धानं हिङ्ङकृणो-
। सृक्काणं घर्ममभि वावशाना मिमाति मायुं
ः ॥२८॥ अयं स शिंक्ते येन गौरभीवृता
युं ध्वसनावधि श्रिता । सा चित्तिभिर्नि
त्यै विद्युद्भवंती प्रति वव्रिमौह
तु जीवमेजद्ध्रुवं मध्य

तस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥ ३० ॥ १९ ॥
अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरंतं ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वंतः
॥३१॥ य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु
तस्मात् । स मातुर्योना परिवीतो अंतर्बहुप्रजा निर्ऋ-
तिमा विवेश ॥ ३२ ॥ द्यौर्मे पिता जनिता नाभिरत्र बंधुर्मे
माता पृथिवी महीयं । उत्तानयोश्चम्वो३र्योनिरंतरत्रा पिता
दुहितुर्गर्भमाधात् ॥ ३३ ॥ पृच्छामि त्वा परमंतं पृथिव्याः
पृच्छामि यत्र भुवनस्य नाभिः । पृच्छामि त्वा वृष्णो अश्वस्
रेतः पृच्छामि वाचः परमं व्योम ॥ ३४ ॥ इयं वेदिः प
अंतः पृथिव्या अयं यज्ञो भुवनस्य नाभिः । अयं सो
वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ३५ ॥
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठंति प्रदिशा
मेणि । ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि
विश्वतः ॥ ३६ ॥ न वि जानामि यदिवेदमस्मि निण्
द्धो मनसा चरामि । यदा मागन्प्रथमजा ऋतस्य
अश्नुवे भागमस्याः ॥ ३७ ॥ अपाङ् प्राङेति स्वध
तोऽमर्त्यो मर्त्येना सयोनिः । ता शश्वंता विषूची
न्य१न्यं चिक्युर्न नि चिक्युरन्यं ॥ ३८ ॥ ऋचो
व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः । यस्तन्न
करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ३९
गवती हि भूया अथो वयं भगवंतः स्याम ।
...यानीं पिब शुद्धमुदकमाचरंती ॥ ४० ॥
...त्येकपदी द्विप...

अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥४१॥
तस्याः समुद्रा अधि वि क्षरंति तेन जीवंति प्रदिशश्चतस्रः।
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति॥४२॥ शकमयं धूम-
मारादपश्यं विषूवता पर एनावरेण। उक्षाणं पृश्निम-
पचंत वीरास्तानि धर्माणि प्रथमान्यासन्॥४३॥ त्रयः
केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषां। विश्व-
मेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपं॥४४॥
चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये
नीषिणः। गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो
नुष्या वदंति॥४५॥ इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः
सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदंत्यग्निं यमं
रिश्वानमाहुः॥४६॥२२॥ कृष्णं नियानं हरयः सुप-
अपो वसाना दिवमुत्पतंति। त आववृत्रन्त्सदनादृत-
घृतेन पृथिवी व्युद्यते॥४७॥ द्वादश प्रधयश्चक्रमेकं
नभ्यानि क उ तच्चिकेत। तस्मिन्त्साकं त्रिशता न
र्पिताः षष्टिर्न चलाचलासः॥४८॥ यस्ते स्तनः
मयोभूर्येन विश्वा पुष्यसि वार्याणि। यो रत्नधा
सुदत्रः सरस्वति तमिह धातवे कः॥४९॥ यज्ञेन
देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं
सचंत यत्र पूर्वे साध्याः संति देवाः॥५०॥
कमुच्चैत्यव चाहभिः। भूमिं पर्जन्या जिन्वंति
ग्नयः॥५१॥ दिव्यं सुपर्णं वायसं बृहंतमपां
धीनां। अभीपतो वृष्टिभिस्तर्पयंतं
॥५२॥२३॥

॥ १६५ ॥ १. २. ४. ६. ८. १०–१२. इंद्रः । ३. ५. ७. ९. मरुतः । १३–१५ अगस्त्यः ॥
मरुत्वानिंद्रः ॥ त्रिष्टुप् ॥

॥१६५॥ कया शुभा सवयसः सनीळाः समान्या मरुतः सं
मिमिक्षुः । कया मती कुत एतास एतेऽर्चंति शुष्मं वृषणो
वसूया ॥१॥ कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आ
ववर्त । श्येनाँ इव ध्रजतो अंतरिक्षे केन महा मनसा रीरमाम
॥२॥ कुतस्त्वमिंद्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥३॥
ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः । आ
शासते प्रति हर्यंत्युक्थेमा हरी वहतस्ता नो अच्छ ॥४॥ अतो
वयमंतमेभिर्युजानाः स्वक्षत्रेभिस्तन्व१ः शुंभमानाः । महोभि-
रेताँ उप युज्महे न्विंद्र स्वधामनु हि नो बभूथ ॥५॥२४॥ क्व१स्या
वो मरुतः स्वधासीद्यन्मामेकं समधत्ताहिहत्ये । अहं ह्यु१ग्रस्त-
विषस्तुविष्मान्विश्वस्य शत्रोरनमं वधस्नैः ॥६॥ भूरि चकर्थ युज्ये-
भिरस्मे समानेभिर्वृषभ पौंस्येभिः । भूरीणि हि कृणवामा शवि-
ष्ठेंद्र क्रत्वा मरुतो यद्वशाम ॥७॥ वधीं वृत्रं मरुत इंद्रियेण स्वेन
भामेन तविषो बभूवान् । अहमेता मनवे विश्वश्चंद्राः सुगा अप-
श्चकर वज्रबाहुः ॥८॥ अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति
देवता विदानः । न जायमानो नशते न जातो यानि करिष्या
कृणुहि प्रवृद्ध ॥९॥ एकस्य चिन्मे विभ्व१स्त्वोजो या नु दधृष्वा-
न्कृणवै मनीषा । अहं ह्यु१ग्रो मरुतो विदानो यानि च्यवमिंद्र
इदीश एषां ॥१०॥२५॥ अमंदन्मा मरुतः स्तोमो अत्र यन्मे नरः
श्रुत्यं ब्रह्म चक्र । इंद्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे
तनूभिः ॥११॥ एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो

दधानाः । संचक्ष्या मरुतश्चंद्रवर्णा अच्छांत मे छुदयाथा च नूनं॥१२॥ को न्वत्र मरुतो मामहे वः प्र यातन सखीँरच्छा सखायः । मन्मानि चित्रा अपिवातयंत एषां भूत नवेदा म ऋतानां ॥ १३ ॥ आ यद्दुवस्याद्दुवसे न कारुरस्मांचक्रे मान्यस्य मेधा । ओ षु वर्त्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत ॥ १४ ॥ एष वः स्तोमो मरुत इयं गीर्मांदार्यस्य मान्यस्य कारोः । एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुं ॥ १५ ॥ २६ ॥ ३ ॥

॥ १६६ ॥ १–१५ ॥ अगस्त्यः ॥ मरुतः ॥ १–१३ जगती । १४. १५. त्रिष्टुप् ॥

॥ १६६ ॥ तन्नु वोचाम रभसाय जन्मने पूर्वं महित्वं वृषभस्य केतवे । ऐधेव यामन्मरुतस्तुविष्वणो युधेव शक्रास्तविषाणि कर्तन ॥ १ ॥ नित्यं न सूनुं मधु बिभ्रत उप क्रीळंति क्रीळा विदथेषु घृष्वयः । नक्षंति रुद्रा अवसा नमस्विनं न मर्धंति स्वतवसो हविष्कृतं ॥ २ ॥ यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे । उक्षंत्यस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः ॥ ३ ॥ आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयतासो अध्रजन् । भयंते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु ॥ ४ ॥ यत्त्वेषयामा नदयंत पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः । विश्वो वो अज्मन्भयते वनस्पती रथीयंतीव प्र जिहीत ओषधिः ॥ ५ ॥ १ ॥ यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन । यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा ॥ ६ ॥ प्र स्कंभदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः । अर्चंत्यर्कं

मंदिरस्य पीतये विदुर्वीरस्य प्रथमानि पौंस्या ॥७॥ शतभुजि-
भिस्तमभिह्रुतेरघात्पूर्भी रक्षता मरुतो यमावत। जनं यमुग्रा-
स्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु॥८॥ विश्वानि
भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता। अंसेष्वा
वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ॥९॥
भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अंजयः।
अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे
॥१०॥२॥ महांतो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्या इव
स्तृभिः। मंद्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इंद्रे मरुतः
परिष्टुभः॥११॥ तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रम-
दितेरिव व्रतं। इंद्रश्चन त्यजसा वि ह्रुणाति तज्जनाय यस्मै सुकृते
अराध्वं॥१२॥ तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास
आवत। अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चि-
किद्रिरे॥१३॥ येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा
तुरासः। आ यत्ततनन्वृजने जनास एभिर्यज्ञेभिस्तदभीष्टिमश्यां
॥१४॥ एष वः स्तोमो मरुत इयं गीर्मांदार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुं॥१५॥३॥

॥ १६७ ॥ १–१५ अगस्त्यः ॥ मरुतः ॥ १–१३ जगती । १४. १५. त्रिष्टुप् ॥

॥ १६७ ॥ सहस्रं त इंद्रोतयो नः सहस्रमिषो हरिवो
गूर्ततमाः । सहस्रं रायो मादयध्यै सहस्रिण उप नो यंतु
वाजाः॥१॥ आ नोऽवोभिर्मरुतो यांत्वच्छा ज्येष्ठेभिर्वा बृहद्दि-
वैः सुमायाः। अध यदेषां नियुतः परमाः समुद्रस्य चिद्धनयंत

पारे॥२॥ मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा
न ऋष्टिः। गुहा चरन्ती मनुषो न योषा सभावती विदथ्येव
सं वाक्॥३॥ परा शुभ्रा अयासो यव्या साधारण्येव मरुतो
मिमिक्षुः। न रोदसी अप नुदन्त घोरा जुषन्त वृधं सख्याय देवाः
॥४॥ जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः।
आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या॥५॥४॥
आस्थापयन्त युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम्।
अर्को यद्वो मरुतो हविष्मान्गायद्गाथं सुतसोमो दुवस्यन्॥६॥
प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो अस्ति।
सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः
॥७॥ पान्ति मित्रावरुणाववद्याच्चयत ईमर्यमो अप्रशस्तान्।
उत च्यवन्ते अच्युता ध्रुवाणि वावृध ईं मरुतो दातिवारः॥८॥
नही नु वो मरुतो अन्त्यस्मे आरात्ताच्चिच्छवसो अन्तमापुः।
ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परि ष्ठुः॥९॥
वयमद्येन्द्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये। वयं पुरा महि
च नो अनु द्यून् तन्न ऋभुक्षा नरामनु ष्यात्॥१०॥ एष वः
स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः। एषा यासीष्ट
तन्वे वयां विद्यामेषं वृजनं जीरदानुम्॥११॥५॥

॥१६८॥ १–१० अगस्त्यः॥ मरुतः॥ १–७ जगती। ८–१० त्रिष्टुप्॥

॥१६८॥ यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो
देवया उ दधिध्वे। आ वोऽर्वाचः सुविताय रोदस्योर्महे
ववृत्यामवसे सुवृक्तिभिः॥१॥ वव्रासो न ये स्वजाः स्वतवस
इषं स्वरभिजायन्त धूतयः। सहस्रियासो अपां नोर्मय आसा

गावो वंद्यासो नोक्षणः॥२॥ सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते । ऐषामंसेषु रंभिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे॥३॥ अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना । अरेणवस्तुविजाता अचुच्यवुर्दृह्ळानि चिन्मरुतो भ्राजदृष्टयः॥४॥ को वोऽतर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया । धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्योऽनैतशः॥५॥६॥ क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय । यच्च्यावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवं॥६॥ सातिर्न वोऽमवती स्ववती त्वेषा विपाका मरुतः पिपिष्वती । भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जंजती॥७॥ प्रति ष्टोभंति सिंधवः पविभ्यो यदभ्रियां वाचमुदीरयंति । अव स्मयंत विद्युतः पृथिव्यां यदी घृतं मरुतः प्रुष्णुवंति॥८॥ असूत पृश्निर्महते रणाय त्वेषमयासां मरुतामनीकं । ते सप्सरासोऽजनयंताभ्वमादित्स्वधामिषिरां पर्यपश्यन्॥९॥ एष वः स्तोमो मरुत इयं गीर्मांदार्यस्य मान्यस्य कारोः । एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुं॥१०॥७॥

॥१६९॥१-८ अगस्त्यः॥ इंद्रः॥ १. ३-८ त्रिष्टुप् । २ चतुष्पदा विराट्॥

॥ १६९ ॥ महश्चित्त्वमिंद्र यत एतान्महश्चिदसि त्यजसो वरूता । स नो वेधो मरुतां चिकित्वान्सुम्ना वनुष्व तव हि प्रेष्ठा॥१॥ अयुज्रन्त इंद्र विश्वकृष्टीर्विदानासो निष्षिधो मर्त्यत्रा । मरुतां पृत्सुतिर्हासमाना स्वर्मीह्ळस्य प्रधनस्य सातौ॥२॥ अम्यक्सा त इंद्र ऋष्टिरस्मे सनेम्यभ्वं

मरुतो जुनंति । अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं
दधति प्रयांसि ॥३॥ त्वं तू न इंद्र तं रयिं दा ओजिष्ठया
दक्षिणयेव रातिं । स्तुतश्च यास्ते चकनंत वायोः स्तनं न
मध्वः पीपयंत वाजैः ॥४॥ त्वे राय इंद्र तोशतमाः प्रणेतारः
कस्य चिदृतायोः । ते षु णो मरुतो मृळयंतु ये स्मा पुरा
गातूयंतीव देवाः ॥५॥८॥ प्रति प्र याहींद्र मीळ्हुषो नॄन्महः
पार्थिवे सदने यतस्व । अध यदेषां पृथुबुध्नास एतास्तीर्थे
नार्यः पौंस्यानि तस्थुः ॥६॥ प्रति घोराणामेतानामयासां
मरुतां शृण्व आयतामुपब्दिः । ये मर्त्यं पृतनायंतमूमैर्ऋ-
णावानं न पतयंत सर्गैः ॥७॥ त्वं मानेभ्य इंद्र विश्वजन्या
रदा मरुद्भिः शुरुधो गोअग्राः । स्तवानेभिः स्तवसे देव
देवैर्विद्यामेषं वृजनं जीरदानुं ॥८॥९॥

॥१७०॥ १.३.४ इंद्रः। २.५ अगस्त्यः॥ इंद्रः॥ १ बृहती। २–४ अनुष्टुप्। ५ त्रिष्टुप्॥

॥१७०॥ न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतं । अन्यस्य चि-
त्तमभि संचरेण्यमुताधीतं वि नश्यति ॥१॥ किं न इंद्र जिघां‐
ससि भ्रातरो मरुतस्तव । तेभिः कल्पस्व साधुया मा नः समरणे
वधीः ॥२॥ किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे । विद्मा हि
ते यथा मनोऽस्मभ्यमिन्न दित्ससि ॥३॥ अरं कृण्वंतु वेदिं
समग्निमिंधतां पुरः । तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ॥४॥
त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः । इंद्र
त्वं मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि ॥५॥१०॥

॥१७१॥ १–६ अगस्त्यः॥ १. २ मरुतः। ३–६ मरुत्वानिंद्रः॥ त्रिष्टुप्॥

॥१७१॥ प्रति व एना नमसाहमेमि सूक्तेन भिक्षे सु-

मतिं तुराणां। रराणता मरुतो वेद्याभिर्नि हेळो धत्त वि मुच-
ध्वमश्वान्॥१॥ एष वः स्तोमो मरुतो नमस्वान्हृदा तष्टो मन-
सा धायि देवाः। उपेमा यात मनसा जुषाणा यूयं हि ष्ठा नमस
इद्वृधासः॥२॥ स्तुतासो नो मरुतो मृळयंतूत स्तुतो मघवा
शंभविष्ठः। ऊर्ध्वा नः संतु कोम्या वनान्यहानि विश्वा मरुतो
जिगीषा॥३॥ अस्मादहं तविषादीषमाण इंद्राद्भिया मरुतो
रेजमानः। युष्मभ्यं हव्या निशितान्यासन्तान्यारे चकृमा मृळता
नः॥४॥ येन मानासश्चितयंत उस्रा व्युष्टिषु शवसा शश्वतीनां।
स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभिः स्थविरः सहोदाः॥५॥
त्वं पाहींद्र सहीयसो नॄन्भवा मरुद्भिरवयातहेळाः। सुप्रकेते-
भिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुं॥६॥११॥

॥ १७२ ॥ १–३ अगस्त्यः ॥ मरुतः ॥ गायत्री ॥

॥१७२॥ चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः। मरुतो
अहिभानवः॥१॥ आरे सा वः सुदानवो मरुत ऋंजती शरुः।
आरे अश्मा यमस्यथ॥२॥ तृणस्कंदस्य नु विशः परि वृंक्त
सुदानवः। ऊर्ध्वान्नः कर्त जीवसे॥३॥१२॥

॥ १७३ ॥ १–१३ अगस्त्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१७३॥ गायत्साम नभन्यं यथा वेरर्चाम तद्वावृधानं
स्वर्वत्। गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं
विवासान्॥१॥ अर्चद्वृषा वृषभिः स्वेदुहव्यैर्मृगो नाश्नो
अति यज्जुगुर्यात्। प्र मंदयुर्मनां गूर्त होता भरते मर्यो मि-
थुना यजत्रः॥२॥ नक्षद्धोता परि सद्म मिता यन्भरद्गर्भ-
मा शरदः पृथिव्याः। क्रंददश्वो नयमानो रुवद्गौरंतर्दूतो न

रोदसी चरद्वाक्॥३॥ ता कर्माषतरास्मै प्र च्यौत्नानि देवयंतो
भरंते। जुजोषदिंद्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः॥४॥
तमु ष्टुहींद्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः। प्रतीचश्चि-
द्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसो विहंता॥५॥१३॥ प्र य-
दित्था महिना नृभ्यो अस्त्यरं रोदसी कक्ष्ये३नास्मै। सं विव्य
इंद्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्यां॥६॥
समत्सु त्वा शूर सतामुराणं प्रपथिंतमं परितंसयध्यै। सजोषस
इंद्रं मदे क्षोणीः सूरिं चिद्ये अनुमदंति वाजैः॥७॥ एवा हि ते
शं सवना समुद्र आपो यत्त आसु मदंति देवीः। विश्वा ते
अनु जोष्या भूद्गौः सूरींश्चिद्यदि धिषा वेषि जनान्॥८॥
असाम यथा सुषखाय एन स्वभिष्टयो नरां न शंसैः। असद्यथा
न इंद्रो वंदनेष्ठास्तुरो न कर्म नयमान उक्था॥९॥ विष्पर्धसो
नरां न शंसैरस्माकासदिंद्रो वज्रहस्तः। मित्रायुवो न पूर्पतिं
सुशिष्टौ मध्यायुव उप शिक्षंति यज्ञैः॥१०॥१४॥ यज्ञो हि ष्मेंद्रं
कश्चिदृंधञ्जुहुराणश्चिन्मनसा परियन्। तीर्थे नाच्छा तातृ-
षाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा॥११॥ मो षू ण इंद्रात्र
पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः। महश्चिद्यस्य मी-
ळ्हुषो यव्या हविष्मतो मरुतो वंदते गीः॥१२॥ एषः स्तोम
इंद्र तुभ्यमस्मे एतेन गातुं हरिवो विदो नः। आ नो ववृत्याः
सुविताय देव विद्यामेषं वृजनं जीरदानुं॥१३॥१५॥

॥१७४॥१-१० अगस्त्यः॥ इंद्रः॥ त्रिष्टुप्॥

॥१७४॥ त्वं राजेंद्र ये च देवा रक्षा नॄन्पाह्यसुर त्वमस्मान्। त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहो-

दाः ॥१॥ दनो विश इंद्र मृध्रवाचः सप्त यत्पुरः शर्म शारदी-
र्दर्त् । ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रंधीः ॥२॥
अजा वृत इंद्र शूरपत्नीर्द्यां च येभिः पुरुहूत नूनं । रक्षो
अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः ॥३॥
शेषन्नु त इंद्र सस्मिन्योनौ प्रशस्तये पवीरवस्य मह्ना । सृज-
दर्णांस्यव यद्युधा गास्तिष्ठद्धरी धृषता मृष्ट वाजान् ॥४॥
वह कुत्समिंद्र यस्मिंश्चाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा । प्र
सूरश्चक्रं वृहतादभीकेऽभि स्पृधो यासिषद्वज्रबाहुः ॥५॥१६॥
जघन्वाँ इंद्र मित्रेरूञ्चोदप्रवृद्धो हरिवो अदाशून् । प्र ये पश्य-
न्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अपत्यं ॥६॥ रपत्क-
विरिंद्रार्कसातौ क्षां दासायोपबर्हणीं कः । करत्तिस्रो मघवा
दानुचित्रा नि दुर्योणे कुयवाचं मृधि श्रेत् ॥७॥ सना ता
त इंद्र नव्या आगुः सहो नभोऽविरणाय पूर्वीः । भिनत्पुरो
न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः ॥८॥ त्वं धुनिरिंद्र
धुनिमतीर्ऋणोरपः सीरा न स्रवंतीः । प्र यत्समुद्रमति शूर
पर्षि पारया तुर्वशं यदुं स्वस्ति ॥९॥ त्वमस्माकमिंद्र विश्वध
स्या अवृकतमो नरां नृपाता । स नो विश्वासां स्पृधां
सहोदा विद्यामेषं वृजनं जीरदानुं ॥१०॥१७॥

॥ १७५ ॥ १–६ ॥ अगस्त्यः ॥ इंद्रः ॥ १ स्कंधोग्रीवी बृहती । २–५ अनुष्टुप् । ६ त्रिष्टुप् ॥

॥१७५॥ मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।
वृषा ते वृष्ण इंदुर्वाजी सहस्रसातमः ॥१॥ आ नस्ते गंतु
मत्सरो वृषा मदो वरेण्यः । सहावाँ इंद्र सानसिः पृतनाषा-
ळमर्त्यः ॥२॥ त्वं हि शूरः सनिता चोदयो मनुषो रथं । सहा-

वान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥३॥ मुषाय सूर्यं कवे
चक्रमीशान ओजसा । वह शुष्णाय वधं कुत्सं वातस्याश्वैः
॥४॥ शुष्मिंतमो हि ते मदो द्युम्निंतम उत क्रतुः । वृत्रघ्ना वरि-
वोविदा मंसीष्ठा अश्वसातमः ॥५॥ यथा पूर्वेभ्यो जरितृभ्य
इंद्र मय इवापो न तृष्यते बभूथ । तामनु त्वा निविदं जोह-
वीमि विद्यामेषं वृजनं जीरदानुं ॥६॥१८॥

॥१७६॥ १–६ अगस्त्यः ॥ इंद्रः ॥ १–५ अनुष्टुप् । ६ त्रिष्टुप् ॥

॥१७६॥ मत्सि नो वस्यइष्टय इंद्रमिंदो वृषा विश । ऋघाय-
माण इन्वसि शत्रुमंति न विंदसि ॥१॥ तस्मिन्ना वेशया गिरो य
एकश्चर्षणीनां । अनु स्वधा यमुप्यते यवं न चर्कृषद्वृषा ॥२॥ यस्य
विश्वानि हस्तयोः पंच क्षितीनां वसु । स्पाशयस्व यो अस्मध्रुग्दि-
व्येवाशनिर्जहि ॥३॥ असुन्वंतं समं जहि दूणाशं यो न ते मयः ।
अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते ॥४॥ आवो यस्य द्विब-
र्हसोऽर्केषु सानुषगसत् । आजाविंद्रस्येंदो प्रावो वाजेषु वाजिनं
॥५॥ यथा पूर्वेभ्यो जरितृभ्य इंद्र मय इवापो न तृष्यते बभूथ । ता-
मनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुं ॥६॥१९॥

॥१७७॥ १–५ अगस्त्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१७७॥ आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां
पुरुहूत इंद्रः । स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृष-
णा याह्यर्वाङ् ॥१॥ ये ते वृषणो वृषभास इंद्र ब्रह्मयुजो
वृषरथासो अत्याः । ताँ आ तिष्ठ तेभिरा याह्यर्वाङ् हवामहे
त्वा सुत इंद्र सोमे ॥२॥ आ तिष्ठ रथं वृषणं वृषा ते सुतः
सोमः परिषिक्ता मधूनि । युक्त्वा वृषभ्यां वृषभ क्षितीनां हरि-

भ्यां याहि प्रवतोप मद्रिक् ॥३॥ अयं यज्ञो देवया अयं
मियेध इमा ब्रह्माण्ययमिंद्र सोमः। स्तीर्णं बर्हिरा तु शक्र
प्र याहि पिबा निषद्य वि मुचा हरी इह ॥४॥ ओ सुष्टुत
इंद्र याह्यर्वाङुप ब्रह्माणि मान्यस्य कारोः। विद्याम वस्तो-
रवसा गृणंतो विद्यामेषं वृजनं जीरदानुं ॥५॥२०॥

॥१७८॥ १–५ अगस्त्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१७८॥ यद्ध स्या त इंद्र श्रुष्टिरस्ति यया बभूथ जरितृभ्य
ऊती। मा नः कामं महयंतमा धग्विश्वा ते अश्यां पर्याप
आयोः ॥१॥ न घा राजेंद्र आ दभन्नो या नु स्वसारा कृणवंत
योनौ। आपश्चिदस्मै सुतुका अवेषन्गमन्न इंद्रः सख्या वयश्च
॥२॥ जेता नृभिरिंद्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः।
प्रभर्ता रथं दाशुष उपाक उद्यंता गिरो यदि च त्मना भूत् ॥३॥
एवा नृभिरिंद्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत्।
समर्य इषः स्तवते विवाचि सत्राकरो यजमानस्य शंसः ॥४॥
त्वया वयं मघवन्निंद्र शत्रूनभि ष्याम महतो मन्यमानान्। त्वं
त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुं ॥५॥२१॥

॥१७९॥ १.२ लोपमुद्रा। ३.४ अगस्त्यः। ५.६ अंतेवासी ब्रह्मचारी ॥
रतिः ॥ १–४.६ त्रिष्टुप्। ५ बृहती ॥

॥१७९॥ पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरु-
षसो जरयंतीः। मिनाति श्रियं जरिमा तनूनामप्यू नु
पत्नीर्वृषणो जगम्युः ॥१॥ ये चिद्धि पूर्व ऋतसाप
आसन्त्साकं देवेभिरवदन्नृतानि। ते चिदवासुर्नह्यंतमापुः
समू नु पत्नीर्वृषभिर्जगम्युः ॥२॥ न मृषा श्रांतं यद-
वंति देवा विश्वा इत्स्पृधो अभ्यश्नवाव। जयावेदत्र शत-

नीथमाजिं यत्सम्यंचा मिथुनावभ्यजाव ॥३॥ नदस्य मा
रुधतः काम आगन्नित आजातो अमुतः कुतश्चित् । लोपा-
मुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसंतं ॥४॥
इमं नु सोममंतितो हृत्सु पीतमुप ब्रुवे । यत्सीमागश्चकृमा
तत्सु मृळतु पुलुकामो हि मर्त्यः ॥५॥ अगस्त्यः खनमानः
खनित्रैः प्रजामपत्यं बलमिच्छमानः । उभौ वर्णावृषिरुग्रः
पुपोष सत्या देवेष्वाशिषो जगाम ॥६॥२२॥२३॥

॥ १८० ॥ १–१० अगस्त्यः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥१८०॥ युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि
दीयत् । हिरण्यया वां पवयः प्रुषायन्मध्वः पिबंता उषसः
सचेथे ॥१॥ युवमत्यस्याव नक्षथो यद्विपत्मनो नर्यस्य प्रय-
ज्योः । स्वसा यद्वां विश्वगूर्ती भराति वाजायेट्टे मधुपाविषे
च ॥२॥ युवं पय उस्रियायामधत्तं पक्वमामायामव पूर्व्यं गोः ।
अंतर्यद्वनिनो वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान् ॥३॥
युवं ह घर्मं मधुमंतमत्रयेऽपो न क्षोदोऽवृणीतमेषे । तद्वां
नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यंति मध्वः ॥४॥ आ
वां दानाय ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः । अपः
क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रा ॥५॥२३॥
नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिं ।
प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजं ॥६॥ वयं
चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान् ।
अधा चिद्धि ष्माश्विनावनिंद्या पाथो हि ष्मा वृषणावंतिदेवं
॥७॥ युवां चिद्धि ष्माश्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सा-

ती। अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः ॥८॥
प्र यद्वहेथे महिना रथस्य प्र स्पंद्रा याथो मनुषो न होता। धत्तं
सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम ॥९॥ तं वां
रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यं। अरिष्टनेमिं
परि द्यामियानं विद्यामेषं वृजनं जीरदानुं ॥१०॥२४॥

॥१८१॥ १-९ अगस्त्यः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥१८१॥ कदु प्रेष्ठाविषां रयीणामध्वर्यंता यदुन्निनीथो अ-
पां। अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जना-
नां ॥१॥ आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो
अत्याः। मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना
वहंतु ॥२॥ आ वां रथोऽवनिर्न प्रवत्वान्त्सृप्रवंधुरः सुविताय
गम्याः। वृष्णः स्थातारा मनसो जवीयानहंपूर्वो यजतो धिष्ण्या
यः ॥३॥ इहेह जाता समवावशीतामरेपसा तन्वा३नामभिः
स्वैः। जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र
ऊहे ॥४॥ प्र वां निचेरुः ककुहो वशाँ अनु पिशंगरूपः सद-
नानि गम्याः। हरी अन्यस्य पीपयंत वाजैर्मथ्रा रजांस्यश्विना
वि घोषैः ॥५॥२५॥ प्र वां शरद्वान्वृषभो न निष्षाट् पूर्वीरि-
षश्चरति मध्व इष्णन्। एवैरन्यस्य पीपयंत वाजैर्वेषंतीरूर्ध्वा
नद्यो न आगुः ॥६॥ असर्जि वां स्थविरा वेधसा गीर्बाळ्हे
अश्विना त्रेधा क्षरंती। उपस्तुताववतं नाधमानं यामन्नया-
मञ्छृणुतं हवं मे ॥७॥ उत स्या वां रुशतो वप्ससो गीस्त्रिबर्हिषि
सदसि पिन्वते नॄन्। वृषा वां मेघो वृषणा पीपाय गोर्न सेके मनु-
षो दशस्यन् ॥८॥ युवां पूषेवाश्विना पुरंधिरग्निमुषां न जरते हवि-

ष्मान्। हुवे यद्वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानुं ॥ ९ ॥ २६ ॥

॥ १८२ ॥ १–८ अगस्त्यः ॥ अश्विनौ ॥ १–५, ७ जगती । ६, ८ त्रिष्टुप् ॥

॥१८२॥ अभूदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः। धियंजिन्वा धिष्ण्या विश्पलावसू दिवो नपाता सुकृते शुचिव्रता ॥१॥ इंद्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा। पूर्णं रथं वहेथे मध्व आचितं तेन दाश्वांसमुप याथो अश्विना ॥२॥ किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्महीयते। अति क्रमिष्टं जुरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यवे ॥३॥ जंभयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना। वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम ॥४॥ युवमेतं चक्रथुः सिंधुषु प्लवमात्मन्वंतं पक्षिणं तौग्र्याय कं। येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः ॥५॥२७॥ अवविद्धं तौग्र्यमप्स्व१ंतरनारंभणे तमसि प्रविद्धं। चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयंति ॥६॥ कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत्। पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कं ॥७॥ तद्वां नरा नासत्यावनु ष्याद्यद्वां मानास उचथमवोचन्। अस्मादद्य सदसः सोम्यादा विद्यामेषं वृजनं जीरदानुं ॥८॥२८॥

॥ १८३ ॥ १–६ अगस्त्यः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥ १८३ ॥ तं युंजाथां मनसो यो जवीयान्त्रिवंधुरो वृषणा यस्त्रिचक्रः। येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो

विर्न पर्णैः ॥१॥ सुवृद्रथो वर्तते यन्नभि क्षां यत्तिष्ठथः क्रतुं-
मंतानु पृक्षे । वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा
सचेथे ॥२॥ आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते
हविष्मान् । येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने
च ॥३॥ मा वां वृको मा वृकीरा दधर्षीन्मा परि वर्क्तमुत
माति धक्तं । अयं वां भागो निहित इयं गीर्दस्राविमे वां
निधयो मधूनां ॥४॥ युवां गोतमः पुरुमीळ्हो अत्रिर्दस्रा
हवतेऽवसे हविष्मान् । दिशं न दिष्टामृजूयेव यंता मे हवं
नासत्योप यातं ॥५॥ अतारिष्म तमसस्पारमस्य प्रति वां
स्तोमो अश्विनावधायि । एह यातं पथिभिर्देवयानैर्विद्यामेषं
वृजनं जीरदानुं ॥६॥२९॥४॥

॥ १८४ ॥ १–६ अगस्त्यः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥१८४॥ ता वामद्य तावपरं हुवेमोच्छंत्यामुषसि वह्नि-
रुक्थैः । नासत्या कुह चित्संतावर्यो दिवो नपाता सुदास्त-
राय ॥१॥ अस्मे ऊ षु वृषणा मादयेथामुत्पणींर्हतमूर्म्या मदं-
ता । श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः
॥२॥ श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः । वच्यंते
वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ॥३॥ अस्मे
सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः । अनु
यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदंति ॥४॥ एष
वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति । यातं
वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदंता ॥५॥ अतारिष्म
तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि । एह यातं
पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुं ॥६॥१॥

॥ १८५ ॥ १–११ अगस्त्यः ॥ द्यावापृथिव्यौ ॥ त्रिष्टुप् ॥

॥१८५॥ कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद । विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥१॥ भूरि द्वे अचरंती चरंतं पद्वंतं गर्भमपदी दधाते । नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥२॥ अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् । तद्रोदसी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥३॥ अतप्यमाने अवसावंती अनु ष्याम रोदसी देवपुत्रे । उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥४॥ संगच्छमाने युवती समंते स्वसारा जामी पित्रोरुपस्थे । अभिजिघ्रंती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ॥५॥२॥ उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री । दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात् ॥६॥ उर्वी पृथ्वी बहुले दूरेअंते उप ब्रुवे नमसा यज्ञे अस्मिन् । दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ॥७॥ देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा । इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥८॥ उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेतां । भूरि चिदर्यः सुदास्तरायेषा मदंत इषयेम देवाः ॥९॥ ऋतं दिवे तदवोचं पृथिव्या अभिश्रावाय प्रथमं सुमेधाः । पातामवद्याद्दुरितादभीके पिता माता च रक्षतामवोभिः ॥१०॥ इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वां । भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुं ॥११॥३॥

॥१८६॥ १-११ अगस्त्यः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥१८६॥ आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु । अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥१॥ आ नो विश्व आस्क्रा गमंतु देवा मित्रो अर्यमा वरुणः सजोषाः । भुवन्यथा नो विश्वे वृधासः करन्त्सुषाहा विथुरं न शवः ॥२॥ प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः । असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः ॥३॥ उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः । समाने अहन्विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन् ॥४॥ उत नोऽहिर्बुध्न्यो३मयस्कः शिशुं न पिप्युषीव वेति सिंधुः । येन नपातमपां जुनाम मनोजुवो वृषणो यं वहंति ॥५॥४॥ उत न ईं त्वष्टा गंत्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः । आ वृत्रहेंद्रश्चर्षणिप्रास्तुविष्टमो नरां न इह गम्याः ॥६॥ उत न ईं मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहंति । तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसंत ॥७॥ उत न ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदंतु । पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवाः ॥८॥ प्र नु यदेषां महिना चिकित्रे प्र युंजते प्रयुजस्ते सुवृक्ति । अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायंत सेनाः ॥९॥ प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि संति । अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ॥१०॥ इयं सा वो अस्मे दीधितिर्यजत्रा अपिप्राणी च सदनी च भूयाः । नि या देवेषु यतते वसूयुर्विद्यामेषं वृजनं जीरदानुं ॥११॥५॥

॥ १८७ ॥ १–११ अगस्त्यः ॥ अन्नस्तुतिः ॥ १ अनुष्टुब्गर्भोष्णिक् । २.४.८–१०.
गायत्री ॥ ३.५.६.७.११ अनुष्टुप् ॥

॥१८७॥ पितुं नु स्तोषं महो धर्माणं तविषीं।यस्यं त्रितो व्योजंसा वृत्रं।विपर्वमर्दयंत् ॥१॥ स्वादों पितो मधो पितो वयं त्वां ववृमहे । अस्माकंमविता भंव ॥२॥ उपं नः पितवा चंर शिवः शिवाभिरूतिभिः । मयोभुरंद्विषेण्यः सखां सुशेवो अद्वंयाः ॥३॥ तव त्ये पितो रसा रजांस्यनु विष्ठिताः । दिवि वाता इव श्रिताः ॥४॥ तव त्ये पितो ददंतस्तवं स्वादिष्ठ ते पितो । प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥५॥६॥ त्वे पितो महानां देवानां मनो हितं । अकारि चारु केतुना तवाहिमवंसावधीत् ॥६॥ यद्दो पितो अजंगन्विवस्व पर्वतानां । अत्रा चिन्नो मधो पितोऽरं भक्षाय गम्याः ॥७॥ यद्पामोषंधीनां परिंशमारिशामंहे । वातापे पीव इद्भव ॥८॥ यत्ते सोम गवाशिरो यवाशिरो भजामहे । वातापे पीव इद्भव ॥९॥ करम्भ ओषधे भव पीवो वृक्क उदारथिः । वातापे पीव इद्भव ॥१०॥ तं त्वां वयं पितो वचोभिर्गावो न हव्या सुषूदिम । देवेभ्यंस्त्वा सधमादंमस्मभ्यं त्वा सधमादं ॥११॥७॥

॥ १८८ ॥ १–११ अगस्त्यः ॥ आप्रियः ॥ गायत्री ॥

॥१८८॥ समिद्धो अद्य राजसि देवो देवैः संहस्रजित् । दूतो हव्या कविर्वह ॥१॥ तनूनपादृतं यते मध्वा यज्ञः समंज्यते । दधंत्सहस्रिणीरिषः ॥२॥ आजुह्वानो न ईड्यो देवाँ आ वंक्षि यज्ञियान् । अग्ने सहस्रसा असि ॥३॥ प्राचीनं बर्हिरोजंसा सहस्रंवीरमस्तृणन् । यत्रादित्या विराजंथ ॥४॥ विराट् सम्राड्विभ्वीः प्रभ्वीर्बह्वीश्च भूयसीश्च याः । दुरो घृतान्यंक्षरन् ॥५॥८॥ सुरुक्मे हि सुपेशसाधि श्रिया

विराजतः । उषासावेह सीदतां ॥६॥ प्रथमा हि सुवाचसा
होतारा दैव्या कवी । यज्ञं नो यक्षतामिमं ॥७॥ भारतीळे
सरस्वति या वः सर्वा उपब्रुवे । ता नश्चोदयत श्रिये ॥८॥
त्वष्टा रूपाणि हि प्रभुः पशून्विश्वान्त्समानजे । तेषां नः स्फा-
तिमा यज ॥९॥ उप त्मन्या वनस्पते पाथो देवेभ्यः सृज ।
अग्निर्हव्यानि सिष्वदत् ॥१०॥ पुरोगा अग्निर्देवानां गायत्रेण
समज्यते । स्वाहाकृतीषु रोचते ॥११॥९॥

॥ १८९ ॥ १–८ अगस्त्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१८९॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव
वयुनानि विद्वान् । युयोध्य१स्मज्जुहुराणमेनो भूयिष्ठां ते
नमउक्तिं विधेम ॥१॥ अग्ने त्वं पारया नव्यो अस्मान्स्व-
स्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उर्वी भवा
तोकाय तनयाय शं योः ॥२॥ अग्ने त्वमस्मद्युयोध्यमीवा
अनग्नित्रा अभ्यमन्त कृष्टीः । पुनरस्मभ्यं सुविताय देव क्षां
विश्वेभिरमृतेभिर्यजत्र ॥३॥ पाहि नो अग्ने पायुभिरजस्रै-
रुत प्रिये सदन आ शुशुक्वान् । मा ते भयं जरितारं यविष्ठ
नूनं विदन्मापरं सहस्वः ॥४॥ मा नो अग्नेऽव सृजो अघा-
याविष्यवे रिपवे दुच्छुनायै । मा दत्वते दशते मादते
नो मा रीषते सहसावन्परा दाः ॥५॥१०॥ वि घ त्वा-
वाँ ऋतजात यंसद्गृणानो अग्ने तन्वे३ वरूथं । विश्वाद्रि-
रिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट् ॥६॥
त्वं ताँ अग्न उभयान्वि विद्वान्वेषि प्रपित्वे मनुषो यजत्र ।
अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः ॥७॥ अवो-

चाम निवर्चनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुं
॥८॥११॥

॥१९०॥ १–८ अगस्त्यः॥ बृहस्पतिः॥ त्रिष्टुप्॥

॥१९०॥ अनर्वाणं वृषभं मंद्रजिह्वं बृहस्पतिं वर्धया नव्य-
मर्कैः। गाथान्यः सुरुचो यस्य देवा आशृण्वंति नवमानस्य
मर्ताः॥१॥ तमृत्विया उप वाचः सचंते सर्गो न यो देवय-
तामसर्जि। बृहस्पतिः स ह्यंजो वरांसि विभ्वाभवत्समृते
मातरिश्वा॥२॥ उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्स-
वितेव प्र बाहू। अस्य क्रत्वाहन्यो३यो अस्ति मृगो न भीमो
अरक्षसस्तुविष्मान्॥३॥ अस्य श्लोको दिवीयते पृथिव्या-
मत्यो न यंसद्यक्षभृद्विचेताः। मृगाणां न हेतयो यंति चेमा
बृहस्पतेरहिमायाँ अभि द्यून्॥४॥ ये त्वा देवोस्रिकं मन्य-
मानाः पापा भद्रमुपजीवंति पज्राः। न दूढ्ये३ अनु ददासि
वामं बृहस्पते चयस इत्पियारुं॥५॥१२॥ सुप्रैतुः सूयवसो न
पंथा दुर्नियंतुः परिप्रीतो न मित्रः। अनर्वाणो अभि ये
चक्षते नोऽपीवृता अपोर्णुवंतो अस्थुः॥६॥ सं यं स्तुभो-
ऽवनयो न यंति समुद्रं न स्रवतो रोधचक्राः। स विद्वाँ
उभयं चष्टे अंतर्बृहस्पतिस्तर आपश्च गृध्रः॥७॥ एवा महस्तु-
विजातस्तुविष्मान्बृहस्पतिर्वृषभो धायि देवः। स नः स्तुतो
वीरवद्धातु गोमद्विद्यामेषं वृजनं जीरदानुं॥८॥१३॥

॥१९१॥ १–१६ विषशंकावानगस्त्यः॥ अमृणसूर्याः॥ १–९. १४–१६ अनुष्टुप्।
१०–१२ महापंक्तिः। १३ महाबृहती॥

॥१९१॥ कंकतो न कंकतोऽथो सतीनकंकतः। द्वाविति

प्रुषी इति न्य१ दृष्टा अलिप्सत ॥ १ ॥ अदृष्टान्हंत्यायत्यथो हंति परायती । अथो अवघ्नती हंत्यथो पिनष्टि पिंषती ॥२॥ शरासः कुशरासो दर्भासः सैर्या उत । मौंजा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥३॥ नि गावो गोष्ठे असदन्नि मृगासो अविक्षत । नि केतवो जनानां न्य१ दृष्टा अलिप्सत ॥४॥ एत उ त्ये प्रत्यदृश्रन्प्रदोषं तस्करा इव । अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥ ५ ॥ १४ ॥ द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा । अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कं ॥६॥ ये अंस्या ये अंग्याः सूचीका ये प्रकंकताः । अदृष्टाः किं चनेह वः सर्वे साकं नि जस्यत ॥७॥ उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा । अदृष्टान्सर्वाञ्जंभयन्सर्वाश्च यातुधान्यः ॥ ८ ॥ उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन् । आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥ ९ ॥ सूर्ये विषमा सजामि दृतिं सुरावतो गृहे । सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥१०॥१५॥ इयत्तिका शकुंतिका सका जघास ते विषं । सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ ११ ॥ त्रिः सप्त विष्पुलिंगका विषस्य पुष्यमक्षन् । ताश्चिन्नु न मरंति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥१२॥ नवानां नवतीनां विषस्य रोपुषीणां । सर्वासामग्रभं नामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥१३॥ त्रिः सप्त मयूर्यः सप्त स्वसारो अग्रुवः । तास्ते विषं वि जभ्रिर उदकं कुंभिनीरिव ॥१४॥ इयत्तकः कुषुंभकस्तकं भिनद्म्यश्मना । ततो विषं प्र

वावृते पराचीरनु संवतः ॥१५॥ कुषुंभकस्तदब्रवीद्गिरेः प्रवर्तमानकः । वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषं ॥१६॥१६॥२४॥१॥

॥ इति प्रथमं मंडलं समाप्तं ॥

॥१॥ १-१६ ॥ गृत्समद आंगिरसः शौनहोत्रः पश्चाद्भार्गवः शौनकः ॥ अग्निः ॥ जगती ॥

॥१॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥१॥ तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः । तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥२॥ त्वमग्न इंद्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः । त्वं ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरंध्या ॥३॥ त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः । त्वमर्यमा सत्पतिर्यस्य संभुजं त्वमंशो विदथे देव भाजयुः ॥४॥ त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यं । त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः ॥५॥१७॥ त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे । त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ॥६॥ त्वमग्ने द्रविणोदा अरंकृते त्वं देवः सविता रत्नधा असि । त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत् ॥७॥ त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृंजते । त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ॥८॥ त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचं । त्वं पुत्रो भवसि

यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः ॥९॥ त्वमग्न ऋभुराके
नमस्य१स्त्वं वाजस्य क्षुमतो राय ईशिषे । त्वं वि भास्यनु दक्षि
दावने त्वं विशिक्षुरसि यज्ञमातनिः ॥१०॥१८॥ त्वमग्ने अदिति-
र्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा । त्वमिळा शतहि-
मासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ॥११॥ त्वमग्ने सुभृत
उत्तमं वयस्तव स्पार्हे वर्ण आ संदृशि श्रियः । त्वं वाजः
प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥१२॥ त्वामग्न
आदित्यास आस्य१ं त्वां जिह्वां शुचयश्चक्रिरे कवे । त्वां रा-
तिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदंत्याहुतं ॥१३॥ त्वे
अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदंत्याहुतं ।
त्वया मर्तासः स्वदंत आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः
॥१४॥ त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव
रिच्यसे । पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी
रोदसी उभे ॥१५॥ ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने राति-
मुपसृजंति सूरयः । अस्माञ्च तांश्च प्र हि नेषि वस्य आ
बृहद्वदेम विदथे सुवीराः ॥१६॥१९॥

॥ २ ॥ १–१३ गृत्समदः ॥ अग्निः ॥ जगती ॥

॥२॥ यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना
गिरा । समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदं
॥१॥ अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु
धेनवः । दिव इवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार
संयतः ॥२॥ तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं
न्येरिरे । रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु

प्रशंस्यं ॥३॥ तमुक्षमाणं रजसि स्व आ दमे चंद्रमिव सुरुचं
ह्वार आ दधुः । पृश्न्याः पतरं चितयंतमक्षभिः पाथो न पायुं
जनसी उभे अनु ॥४॥ स होता विश्वं परि भूत्वध्वरं तमु हव्यै-
र्मनुष ऋंजते गिरा । हिरिशिप्रो वृधसानासु जर्भुरद्द्यौर्न
स्तृभिश्चितयद्रोदसी अनु ॥५॥२०॥ स नो रेवत्समिधानः स्व-
स्तये संददस्वान्रयिमस्मासु दीदिहि। आ नः कृणुष्व सुविताय
रोदसी अग्ने हव्या मनुषो देव वीतये ॥६॥ दा नो अग्ने
बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि । प्रा-
ची द्यावापृथिवी ब्रह्मणा कृधि स्वर्ण शुक्रमुषसो वि
दिद्युतः ॥७॥ स इधान उषसो राम्या अनु स्वर्ण दीदे-
दरुषेण भानुना । होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशा-
मतिथिश्चारुरायवे ॥८॥ एवा नो अग्ने अमृतेषु पूर्व्य धी-
ष्पीपाय बृहद्दिवेषु मानुषा। दुहाना धेनुर्वृजनेषु कारवे त्मना
शतिनं पुरुरूपमिषणि॥९॥ वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा
वा चितयेमा जनाँ अति। अस्माकं द्युम्नमधि पंच कृष्टिषूच्चा
स्वर्ण शुशुचीत दुष्टरं॥१०॥ स नो बोधि सहस्य प्रशंस्यो
यस्मिन्सुजाता इषयंत सूरयः । यमग्ने यज्ञमुपयंति वाजिनो
नित्ये तोके दीदिवांसं स्वे दमे ॥११॥ उभयासो जातवेदः
स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि। वस्वो रायः पुरुश्चं-
द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ॥१२॥ ये स्तोतृभ्यो
गोअग्रामश्वपेशसमग्ने रातिमुपसृजंति सूरयः। अस्माञ्च तांश्च
प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥१३॥२१॥

॥३॥ १–११ गृत्समदः ॥ आग्नं ॥ १–६. ८–११ त्रिष्टुप् ॥ ७ जगती ॥

॥३॥ समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भु-

वनान्यस्थात्। होता पावकः प्रदिवः सुमेधा देवो देवान्यज-
त्वग्निरर्हन्॥१॥ नराशंसः प्रति धामान्यंजन् तिस्रो दिवः प्रति
मह्ना स्वर्चिः। घृतप्रुषा मनसा हव्यमुंदन्मूर्धन्यज्ञस्य समनक्तु
देवान्॥२॥ ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानु-
षात्पूर्वो अद्य। स आ वह मरुतां शर्धो अच्युतमिंद्रं नरो
बर्हिषदं यजध्वं॥३॥ देव बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये
सुभरं वेद्यस्यां। घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या
यज्ञियासः॥४॥ वि श्रयंतामुर्विया हूयमाना द्वारो देवीः सु-
प्रायणा नमोभिः। व्यचस्वतीर्वि प्रथंतामजुर्या वर्णं पुनाना
यशसं सुवीरं॥५॥२२॥ साध्वपांसि सनता न उक्षिते उषा-
सानक्ता वय्येव रण्विते। तंतुं ततं संवयंती समीची यज्ञस्य
पेशः सुदुघे पयस्वती॥६॥ दैव्या होतारा प्रथमा विदुष्टर
ऋजु यक्षतः समृचा वपुष्टरा। देवान्यजंतावृतुथा समंजतो
नाभा पृथिव्या अधि सानुषु त्रिषु॥७॥ सरस्वती साधयंती
धियं न इळा देवी भारती विश्वतूर्तिः। तिस्रो देवीः स्वधया
बर्हिरेदमच्छिद्रं पांतु शरणं निषद्य॥८॥ पिशंगरूपः सुभरो
वयोधाः श्रुष्टी वीरो जायते देवकामः। प्रजां त्वष्टा वि ष्यंतु
नाभिमस्मे अथा देवानामप्येतु पाथः॥९॥ वनस्पतिरवसृ-
जन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः। त्रिधा समक्तं न-
यतु प्रजानन्देवेभ्यो दैव्यः शमितोप हव्यं॥१०॥ घृतं मिमिक्षे
घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम। अनुष्वधमा वह
मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यं॥११॥२३॥

॥४॥ १–९ सोमाहुतिर्भार्गवः॥ अग्निः॥ त्रिष्टुप्॥

॥४॥ हुवे वः सुद्योत्मानं सुवृक्तिं विशामग्निमतिथिं सु-

प्रयसे। मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जा-
तवेदाः ॥१॥ इमं विधंतो अपां सधस्थे द्वितादधुर्भृगवो वि-
क्ष्वा३योः। एष विश्वान्यभ्यस्तु भूमा देवानामग्निररतिर्जीराश्वः
॥२॥ अग्निं देवासो मानुषीषु विक्षु प्रियं धुः क्षेष्यंतो न मित्रं।
स दीदयदुशतीरूर्म्या आ दक्षाय्यो यो दास्वते दम आ ॥३॥
अस्य रण्वा स्वस्येव पुष्टिः संदृष्टिरस्य हियानस्य दक्षोः। वि यो
भरिभ्रदोषधीषु जिह्वामत्यो न रथ्यो दोधवीति वारान् ॥४॥
आ यन्मे अभ्वं वनदः पनंतोशिग्भ्यो नामिमीत वर्णं। स
चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत्
॥५॥२४॥ आ यो वना तातृषाणो न भाति वार्ण पथा
रथ्येव स्वानीत्। कृष्णाध्वा तपू रण्वश्चिकेत द्यौरिव स्मय-
मानो नभोभिः ॥६॥ स यो व्यस्थादभि दक्षदुर्वीं पशुर्नैति
स्वयुरगोपाः। अग्निः शोचिष्माँ अतसान्युष्णन्कृष्णव्यथिरस्व-
दयन्न भूम ॥७॥ नू ते पूर्वस्यावसो अधीतौ तृतीये विदथे
मन्म शंसि। अस्मे अग्ने संयद्वीरं बृहंतं क्षुमंतं वाजं स्वपत्यं
रयिं दाः ॥८॥ त्वया यथा गृत्समदासो अग्ने गुहा वन्वंत
उपराँ अभि ष्युः। सुवीरासो अभिमातिषाहः स्मत्सूरिभ्यो
गृणते तद्वयो धाः ॥९॥२५॥

॥५॥ १–८ सोमाहुतिर्भार्गवः॥ अग्निः॥ अनुष्टुप्॥

॥५॥ होताजनिष्ट चेतनः पिता पितृभ्य ऊतये। प्रय-
क्षञ्जेन्यं वसु शकेम वाजिनो यमं ॥१॥ आ यस्मिन्त्सप्त रश्म-
यस्तता यज्ञस्य नेतरि। मनुष्वद्दैव्यमष्टमं पोता विश्वं तदिन्व-
ति ॥२॥ दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत्। परि

विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥३॥ साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि । विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते ॥४॥ ता अस्य वर्णमायुवो नेष्टुः सचन्त धेनवः । कुवित्तिसृभ्य आ वरं स्वसारो या इदं ययुः ॥५॥ यदी मातुरुप स्वसा घृतं भरन्त्यस्थित । तासामध्वर्युरागतौ यवो वृष्टीव मोदते ॥६॥ स्वः स्वाय धायसे कृणुतामृत्विगृत्विजं । स्तोमं यज्ञं चादरं वनेमा ररिमा वयं ॥७॥ यथा विद्वाँ अरं करद्विश्वेभ्यो यजतेभ्यः । अयमग्ने त्वे अपि यं यज्ञं चकृमा वयं ॥८॥२९॥

॥ ६ ॥ १–८ सोमाहुतिर्भार्गवः ॥ अग्निः ॥ गायत्री ॥

॥६॥ इमां मे अग्ने समिधमिमामुपसदं वनेः । इमा उ षु श्रुधी गिरः ॥१॥ अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे । एना सूक्तेन सुजात ॥२॥ तं त्वा गीर्भिर्गिर्वणसं द्रविणस्युं द्रविणोदः । सपर्येम सपर्यवः ॥३॥ स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्य१स्मद्द्वेषांसि ॥४॥ स नो वृष्टिं दिवस्परि स नो वाजमनर्वाणं । स नः सहस्रिणीरिषः ॥५॥ ईळानायावस्यवे यविष्ठ दूत नो गिरा । यजिष्ठ होतरा गहि ॥६॥ अन्तर्ह्यग्न ईयसे विद्वाञ्जन्मोभया कवे । दूतो जन्येव मित्र्यः ॥७॥ स विद्वाँ आ च पिप्रयो यक्षि चिकित्व आनुषक् । आ चास्मिन्त्सत्सि बर्हिषि ॥८॥२७॥

॥ ७ ॥ १–६ सोमाहुतिर्भार्गवः ॥ अग्निः ॥ गायत्री ॥

॥७॥ श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर । वसो पुरुस्पृहं रयिं ॥१॥ मा नो अरातिरीशत देवस्य मर्त्यस्य च । पर्षि तस्या उत द्विषः ॥२॥ विश्वा उत त्वया वयं धारा उदन्या इव ।

अति गाहेमहि द्विषः ॥ ३ ॥ शुचिः पावक वंद्योऽग्ने बृहद्वि
रोचसे । त्वं घृतेभिराहुतः ॥ ४ ॥ त्वं नो असि भारताग्ने वशा-
भिरुक्षभिः । अष्टापदीभिराहुतः ॥ ५ ॥ द्रुन्नः सर्पिरासुतिः प्रत्नो
होता वरेण्यः । सहसस्पुत्रो अद्भुतः ॥ ६ ॥ २८ ॥

॥ ८ ॥ १–६ ॥ गृत्समदः ॥ अग्निः ॥ १–५ गायत्री । ६ अनुष्टुप् ॥

॥ ८ ॥ वाजयन्निव नू रथान्योगाँ अग्नेरुप स्तुहि । यशस्त-
मस्य मीळ्हुषः ॥ १ ॥ यः सुनीथो ददाशुषेऽजुर्यो जरयन्नरिं
चारुप्रतीक आहुतः ॥ २ ॥ य उ श्रिया दमेष्वा दोषोषसि
प्रशस्यते । यस्य व्रतं न मीयते ॥ ३ ॥ आ यः स्वर्ण भानुना
चित्रो विभात्यर्चिषा । अंजानो अजरैरभि ॥ ४ ॥ अत्रिमनु
स्वराज्यमग्निमुक्थानि वावृधुः । विश्वा अधि श्रियो दधे
॥ ५ ॥ अग्नेरिंद्रस्य सोमस्य देवानामूतिभिर्वयं । अरिष्यंतः
सचेमह्यभि ष्याम पृतन्यतः ॥ ६ ॥ २९ ॥ ५ ॥

॥ ९ ॥ १–६ गृत्समदः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ ९ ॥ नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असस-
दत्सुदक्षः । अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो
अग्निः ॥ १ ॥ त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ
प्रणेता । अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि
गोपाः ॥ २ ॥ विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे
सधस्थे । यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे
समिद्धे ॥ ३ ॥ अग्ने यजस्व हविषा यजीयाञ्छ्रुष्टी देष्णमभि
गृणीहि राधः । त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य व-
चसो मनोता ॥ ४ ॥ उभयं ते न क्षीयते वसव्यं दिवेदिवे
जायमानस्य दस्म । कृधि क्षुमंतं जरितारमग्ने कृधि पतिं

स्वपत्यस्य रायः ॥५॥ सेनानीकेन सुविदत्रो अस्मे यष्टा देवाँ
आयजिष्ठः स्वस्ति । अदब्धो गोपा उत नः परस्पा अग्ने
द्युमदुत रेवद्दिदीहि ॥६॥१॥

॥ १० ॥ १-६ गृत्समदः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१०॥ जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्स-
मिद्धः । श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्य१ः स
वाजी ॥१॥ श्रूया अग्निश्चित्रभानुर्हवं मे विश्वाभिर्गीर्भिरमृतो
विचेताः । श्यावा रथं वहतो रोहिता वोतारुषाह चक्रे
विभृत्रः ॥२॥ उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशासु
गर्भः । शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचे-
ताः ॥३॥ जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियंतं भुवनानि
विश्वा । पृथुं तिरश्चा वयसा बृहंतं व्यचिष्ठमन्नै रभसं दृशानं
॥४॥ आ विश्वतः प्रत्यंचं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा३ जर्भुराणः ॥५॥
ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम । अनूनम-
ग्निं जुह्वा वचस्या मधुपृचं धनसा जोहवीमि ॥६॥२॥

॥ ११ ॥ १-२१ गृत्समदः ॥ इंद्रः ॥ १-२० विराट्स्थाना त्रिष्टुप् । २१ त्रिष्टुप् ॥

॥११॥ श्रुधी हवमिंद्र मा रिषण्यः स्याम ते दावने वसूनां ।
इमा हि त्वामूर्जो वर्धयंति वसूयवः सिंधवो न क्षरंतः ॥१॥ सृजो
महीरिंद्र या अपिन्वः परिष्ठिता अहिना शूर पूर्वीः । अमर्त्यं
चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधानः ॥२॥ उक्थेष्विन्नु
शूर येषु चाकन्स्तोमेष्विंद्र रुद्रियेषु च । तुभ्येदेता यासु मंदसानः
प्र वायवे सिस्रते न शुभ्राः ॥३॥ शुभ्रं नु ते शुष्मं वर्धयंतः शुभ्रं
वज्रं बाह्वोर्दधानाः । शुभ्रस्त्वमिंद्र वावृधानो अस्मे दासी-

विशः सूर्येण सह्याः ॥४॥ गुहा हितं गुह्यं गूळ्हमप्स्वपी-
वृतं मायिनं क्षियंतं । उतो अपो द्यां तस्तभ्वांसमहन्नहिं
शूर वीर्येण ॥५॥३॥ स्तवा नु त इंद्र पूर्व्या महान्युत स्तवाम
नूतना कृतानि । स्तवा वज्रं बाह्वोरुशंतं स्तवा हरी सूर्यस्य
केतू ॥६॥ हरी नु त इंद्र वाजयंता घृतश्चुतं स्वारमस्वार्ष्टां ।
वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन् ॥७॥ नि
पर्वतः साद्यप्रयुच्छन्त्सं मातृभिर्वावशानो अक्रान् । दूरे
पारे वाणीं वर्धयंत इंद्रेषितां धमनिं पप्रथन्नि ॥८॥ इंद्रो
महां सिंधुमाशयानं मायाविनं वृत्रमस्फुरन्निः । अरेजेतां
रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥९॥ अरो-
रवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वीत् । नि
मायिनो दानवस्य माया अपादयत्पपिवान्सुतस्य ॥१०॥४॥
पिबापिबेदिंद्र शूर सोमं मंदंतु त्वा मंदिनः सुतासः । पृणंत-
स्ते कुक्षी वर्धयंत्वित्था सुतः पौर इंद्रमाव ॥११॥ त्वे इंद्रा-
प्यभूम विप्रा धियं वनेम ऋतया सपंतः । अवस्यवो धी-
महि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥१२॥ स्याम ते त
इंद्र ये त ऊती अवस्यव ऊर्जं वर्धयंतः । शुष्मिंतमं यं चा-
कनाम देवास्मे रयिं रासि वीरवंतं ॥१३॥ रासि क्षयं रासि
मित्रमस्मे रासि शर्ध इंद्र मारुतं नः । सजोषसो ये च मंद-
सानाः प्र वायवः पांत्यग्रणीतिं ॥१४॥ व्यंत्विन्नु येषु मंदसा-
नस्तृपत्सोमं पाहि द्रह्यदिंद्र । अस्मान्सु पृत्स्वा तरुत्रावर्-
धयो द्यां बृहद्भिरर्कैः ॥१५॥५॥ बृहंत इन्नु ये ते तरुत्रोक्थे-
भिर्वा सुम्नमाविवासान् । स्तृणानासो बर्हिः पस्त्यावत्त्वो-
ता इदिंद्र वाजमग्मन् ॥१६॥ उग्रेष्विन्नु शूर मंदसान-

स्त्रिकद्रुकेषु पाहि सोममिंद्र । प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिं ॥ १७ ॥ धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभं । अपावृणोर्ज्योतिरार्याय नि सव्यतः सादि दस्युरिंद्र ॥ १८ ॥ सनेम ये त ऊतिभिस्तरंतो विश्वाः स्पृध आर्येण दस्यून् । अस्मभ्यं तत्त्वाष्ट्रं विश्वरूपमरंधयः साख्यस्य त्रिताय ॥ १९ ॥ अस्य सुवानस्य मंदिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः । अवर्तयत्सूर्यो न चक्रं भिनद्वलमिंद्रो अंगिरस्वान् ॥ २० ॥ नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी । शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ २१ ॥ ६ ॥ १ ॥

॥ १२ ॥ १–१५ गृत्समदः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ १२ ॥ यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् । यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इंद्रः ॥ १ ॥ यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान्प्रकुपिताँ अरम्णात् । यो अंतरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इंद्रः ॥ २ ॥ यो हत्वाहिमरिणात्सप्त सिंधून्यो गा उदाजदपधा वलस्य । यो अश्मनोरंतरग्निं जजान संवृक्समत्सु स जनास इंद्रः ॥ ३ ॥ येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः । श्वघ्नीव यो जिगीवां लक्षमाददर्यः पुष्टानि स जनास इंद्रः ॥ ४ ॥ यं स्मा पृच्छंति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनं । सो अर्यः पुष्टीर्विज इवामिनाति श्रदस्मै धत्त स जनास इंद्रः ॥ ५ ॥ ७ ॥ यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः । युक्तग्राव्णो योऽविता सुशिप्रः सुत-

सोमस्य स जनास इंद्रः ॥६॥ यस्याश्वासः प्रदिशि यस्य गा-
वो यस्य ग्रामा यस्य विश्वे रथासः। यः सूर्यं य उषसं जजान
यो अपां नेता स जनास इंद्रः ॥७॥ यं क्रंदसी संयती
विह्वयेते परेऽवर उभया अमित्राः। समानं चिद्रथमा-
तस्थिवांसा नाना हवेते स जनास इंद्रः ॥८॥ यस्मान्न ऋते
विजयंते जनासो यं युध्यमाना अवसे हवंते। यो विश्वस्य
प्रतिमानं बभूव यो अच्युतच्युत्स जनास इंद्रः ॥९॥ यः शश्वतो
मह्येनो दधानानमन्यमानाञ्छर्वा जघान। यः शर्धते ना-
नुददाति शृध्यां यो दस्योर्हंता स जनास इंद्रः ॥१०॥८॥ यः
शंबरं पर्वतेषु क्षियंतं चत्वारिंश्यां शरद्यन्वविंदत्। ओजा-
यमानं यो अहिं जघान दानुं शयानं स जनास इंद्रः ॥११॥
यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिंधून्। यो
रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहंतं स जनास इंद्रः ॥१२॥ द्या-
वा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयंते।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इंद्रः
॥१३॥ यः सुन्वंतमवति यः पचंतं यः शंसंतं यः शशमा-
नमूती। यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास
इंद्रः ॥१४॥ यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स
किलासि सत्यः। वयं त इंद्र विश्वह प्रियासः सुवीरासो वि-
दथमा वदेम ॥१५॥९॥

॥१३॥१-१३ गृत्समदः॥ इंद्रः॥१-१२. जगती। १३ त्रिष्टुप्॥

॥१३॥ ऋतुर्जनित्री तस्या अपस्परि मक्षू जात आविं-
शद्यासु वर्धते। तदाहना अभवत्पिप्युषी पयोंऽशोः पीयू-
षं प्रथमं तदुक्थ्यं ॥१॥ सध्रीमा यंति परि बिभ्रतीः पयो

विश्वपस्न्याय प्र भरंत भोजनं। समानो अध्वा प्रवतामनु-
ष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥२॥ अन्वेको वदति
यद्दाति तद्रूपा मिनन्तदपा एक ईयते। विश्वा एकस्य
विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥३॥ प्रजा-
भ्यः पुष्टिं विभजंत आसते रयिमिव पृष्ठं प्रभवंतमायते।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्यु-
क्थ्यः ॥४॥ अधाकृणोः पृथिवीं संदृशे दिवे यो धौती-
नामहिहन्नारिणक्पथः। तं त्वा स्तोमेभिरुदभिर्न वाजिनं
देवं देवा अजनन्त्सास्युक्थ्यः ॥५॥१०॥ यो भोजनं च
दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ। सः शेव-
धिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः
॥६॥ यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्य१वनी-
रधारयः। यश्चासमा अजनो दिद्युतो दिव उरूर्वाँ अभि-
तः सास्युक्थ्यः ॥७॥ यो नार्मरं सहवसुं निहंतवे पृक्षाय
च दासवेशाय चावहः। ऊर्जयंत्या अपरिविष्टमास्य-
मुतैवाद्य पुरुकृत्सास्युक्थ्यः ॥८॥ शतं वा यस्य दश
साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ। अरज्जौ
दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ॥९॥
विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे
धनं। षळस्तभ्ना विष्टिरः पंच संदृशः परि परो अभ-
वः सास्युक्थ्यः ॥१०॥११॥ सुप्रवाचनं तव वीर वी-
र्यं१यदेकेन क्रतुना विंदसे वसु। जातूष्ठिरस्य प्र
वयः सहस्वतो या चकर्थ सेंद्र विश्वास्युक्थ्यः ॥११॥
अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रु-

तिं। नीचा संतमुदनयः परावृजं प्रांधं श्रोणं श्रवयन्त्सास्यु-
क्थ्यः ॥१२॥ अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु
ते वसव्यं। इंद्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे
सुवीराः ॥१३॥१२॥

॥१४॥ १-१२ गृत्समदः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१४॥ अध्वर्यवो भरतेंद्राय सोममामत्रेभिः सिंचता मद्य-
मंधः। कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष
वष्टि ॥१॥ अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव
वृक्षं। तस्मा एतं भरत तद्वशायँ एष इंद्रो अर्हति पीतिमस्य
॥२॥ अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं
वः। तस्मा एतमंतरिक्षे न वातमिंद्रं सोमैरोर्णुत जूर्न वस्त्रैः
॥३॥ अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बा-
हून्। यो अर्बुदमव नीचा बबाधे तमिंद्रं सोमस्य भृथे हिं-
नोत ॥४॥ अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो
व्यंसं। यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इंद्रायांधसो
जुहोत ॥५॥ अध्वर्यवो यः शतं शंबरस्य पुरो बिभेदाश्मनेव
पूर्वीः। यो वर्चिनः शतमिंद्रः सहस्रमपावपद्भरता सोममस्मै
॥६॥१३॥ अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्ज-
घन्वान्। कुत्सस्यायोरतिथिग्वस्य वीरान्न्यवृणग्भरता सोम-
मस्मै ॥७॥ अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहंतो नशथा
तदिंद्रे। गभस्तिपूतं भरत श्रुतायेंद्राय सोमं यज्यवो जुहोत
॥८॥ अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्न-
यध्वं। जुषाणो हस्त्यमभि वावशे व इंद्राय सोमं मदिरं जु-
होत ॥९॥ अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता

भोजमिंद्रं । वेदाहमस्य निभृतं म एतद्दित्संतं भूयो यजत-
श्चिकेत ॥१०॥ अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य
क्षम्यस्य राजा । तमूर्दरं न पृणता यवेनेंद्रं सोमेभिस्तदपो वो
अस्तु ॥११॥ अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते
वसव्यं । इंद्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः
॥१२॥१४॥

॥ १५ ॥ १-१० गृत्समदः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१५॥ प्र घा न्वस्य महतो महानि सत्या सत्यस्य कर-
णानि वोचं । त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिंद्रो
जघान ॥१॥ अवंशे द्यामस्तभायद्बृहंतमा रोदसी अपृण-
दंतरिक्षं । स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद
इंद्रश्चकार ॥२॥ सद्मेव प्राचो वि मिमाय मानैर्वज्रेण
खान्यतृणन्नदीनां । वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता
मद इंद्रश्चकार ॥३॥ स प्रवोळ्हॄन्परिगत्या दभीतेर्विश्वम-
धागायुधमिद्धे अग्नौ । सं गोभिरश्वैरसृजद्रथेभिः सोमस्य
ता मद इंद्रश्चकार ॥४॥ स ईं महीं धुनिमेतोररम्णात्सो
अस्नातॄनपारयत्स्वस्ति । त उत्साय रयिमभि प्र तस्थुः
सोमस्य ता मद इंद्रश्चकार ॥५॥१५॥ सोदंचं सिंधुम-
रिणान्महित्वा वज्रेणान उषसः सं पिपेष । अजवसो
जविनीभिर्विवृश्चन्त्सोमस्य ता मद इंद्रश्चकार ॥६॥ स
विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् । प्रति
श्रोणः स्थाद्व्य१नगचष्ट सोमस्य ता मद इंद्रश्चकार
॥७॥ भिनद्वलमंगिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यै-
रत् । रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इंद्र-

अकार ॥८॥ स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघंथ दस्युं प्र दभीतिमावः । रंभी चिदत्र विविदे हिरण्यं सोमस्य ता मद इंद्रश्चकार ॥९॥ नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी । शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥१०॥ १६ ॥

॥ १६ ॥ १–९ गृत्समदः ॥ इंद्रः ॥ १–८ जगती । ९ त्रिष्टुप् ॥

॥१६॥ प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे । इंद्रमजुर्यं जरयंतमुक्षितं सनाद्युवानमवसे हवामहे ॥१॥ यस्मादिंद्राद्बृहतः किं चनेमृते विश्वान्यस्मिन्संभृताधि वीर्या । जठरे सोमं तन्वी३सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुं ॥२॥ न क्षोणीभ्यां परिभ्वे त इंद्रियं न समुद्रैः पर्वतैरिंद्र ते रथः । न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु ॥३॥ विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरंति वृषभाय सश्चते । वृषा यजस्व हविषा विदुष्टरः पिबेंद्र सोमं वृषभेण भानुना ॥४॥ वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे । वृषणाध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ॥५॥१७॥ वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा । वृष्णो मदस्य वृषभ त्वमीशिष इंद्र सोमस्य वृषभस्य तृप्णुहि ॥६॥ प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः । कुविन्नो अस्य वचसो निबोधिषदिंद्रमुत्सं न वसुनः सिचामहे ॥७॥ पुरा संबाधादभ्या ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी । सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ॥८॥ नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र

दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माति धग्भगो नो
बृहद्वदेम विदथे सुवीराः॥९॥१८॥

॥१७॥१-९ गृत्समदः॥ इंद्रः॥१-७ जगती।८.९ त्रिष्टुप्॥

॥१७॥ तदस्मै नव्यमंगिरस्वदर्चत शुष्मा यदस्य प्रत्नथो-
दीरते। विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहिता-
न्यैरयत्॥१॥ स भूतु यो ह प्रथमाय धायस ओजो मिमानो
महिमानमातिरत्। शूरो यो युत्सु तन्वं परिव्यत शीर्षणि
द्यां महिना प्रत्यमुंचत॥२॥ अधाकृणोः प्रथमं वीर्यं महद्य-
दस्याग्रे ब्रह्मणा शुष्ममैरयः। रथेष्ठेन हर्यश्वेन विच्युताः प्र
जीरयः सिस्रते सध्र्य१क् पृथक्॥३॥ अधा यो विश्वा भुवना-
भि मज्मनेशानकृत्प्रवया अभ्यवर्धत। आद्रोदसी ज्योतिषा
वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत्॥४॥ स प्रा-
चीनान्पर्वतान्दृंहदोजसाधराचीनमकृणोदपामपः। अधा-
रयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः॥५॥१९॥
सास्मा अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेद-
सस्परि। येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृण-
क्तुविष्वणिः॥६॥ अमाजूरिव पित्रोः सचा सती समाना-
दा सदसस्त्वामिये भगं। कृधि प्रकेतमुप मास्या भर दद्धि
भागं तन्वो३ येन मामहः॥७॥ भोजं त्वामिंद्र वयं हुवेम
ददिष्टुमिंद्रापांसि वाजान्। अविड्ढींद्र चित्रया न ऊती कृधि
वृषन्निंद्र वस्यसो नः॥८॥ नूनं सा ते प्रति वरं जरित्रे दुही-
यदिंद्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माति धग्भगो
नो बृहद्वदेम विदथे सुवीराः॥९॥२०॥

॥ १८ ॥ १-९ गृत्समदः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१८॥ प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः स-
प्तरश्मिः । दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो
भूत् ॥१॥ सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः
स होता । अन्यस्या गर्भमन्य ऊं जनंत सो अन्येभिः सचते
जेन्यो वृषा ॥२॥ हरी नु कं रथ इंद्रस्य योजमायै सूक्तेन व-
चसा नवेन । मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यज-
मानासो अन्ये ॥३॥ आ द्वाभ्यां हरिभ्यामिंद्र याह्या चतुर्भि-
रा षड्भिर्हूयमानः । आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख
मा मृधस्कः ॥४॥ आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिं-
शता हरिभिर्युजानः । आ पंचाशता सुरथेभिरिंद्रा षष्ट्या
सप्तत्या सोमपेयं ॥५॥२१॥ आशीत्या नवत्या याह्यर्वाङा श-
तेन हरिभिरुह्यमानः । अयं हि ते शुनहोत्रेषु सोम इंद्र त्वा-
या परिषिक्तो मदाय ॥६॥ मम ब्रह्मेंद्र याह्यच्छा विश्वा हरी
धुरि धिष्वा रथस्य । पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर
सवने मादयस्व ॥७॥ न म इंद्रेण सख्यं वि योषदस्मभ्यम-
स्य दक्षिणा दुहीत । उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये
जिगीवांसः स्याम ॥८॥ नूनं सा ते प्रति वरं जरित्रे दुही-
यदिंद्र दक्षिणा मघोनी । शिक्षा स्तोतृभ्यो माति धग्भगो नो
बृहद्वदेम विदथे सुवीराः ॥ ९ ॥ २२ ॥

॥ १९ ॥ १-९ गृत्समदः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१९॥ अपाय्यस्यांधसो मदाय मनीषिणः सुवानस्य प्र-
यसः । यस्मिन्निंद्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यंतश्च
नरः ॥१॥ अस्य मंदानो मध्वो वज्रहस्तोऽहिमिंद्रो अर्णोवृतं

वि वृश्चत। प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां
चक्रमंत ॥२॥ स माहिन इंद्रो अर्णो अपां प्रैरयदहिहाच्छा
समुद्रं। अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत्
॥३॥ सो अप्रतीनि मनवे पुरूणींद्रो दाशद्दाशुषे हंति वृत्रं।
सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ
॥४॥ स सुन्वत इंद्रः सूर्यमा देवो रिणङ्मर्त्याय स्तवान्। आ
यद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ॥५॥२३॥ स
रंधयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय। दिवोदा-
साय नवतिं च नवेंद्रः पुरो व्यैरच्छंबरस्य ॥६॥ एवा त इंद्रो-
चथमहेम श्रवस्या न त्मना वाजयंतः। अश्याम तत्साप्त-
माशुषाणा ननमो वधरदेवस्य पीयोः ॥७॥ एवा ते गृत्स-
मदाः शूर मन्मावस्यवो न वयुनानि तक्षुः। ब्रह्मण्यंत इंद्र
ते नवीय इषमूर्जं सुक्षितिं सुम्नमश्युः ॥८॥ नूनं सा ते प्रति
वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो
माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥२४॥

॥ २० ॥ १–९ गृत्समदः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२०॥ वयं ते वय इंद्र विद्धि षु णः प्र भरामहे वाजयुर्न
रथं। विपन्यवो दीध्यतो मनीषा सुम्नमियक्षंतस्त्वावतो नॄन्
॥१॥ त्वं न इंद्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान्।
त्वमिनो दाशुषो वरूतेत्थाधीरभि यो नक्षति त्वा ॥२॥ स नो
युवेंद्रो जोहूत्रः सखा शिवो नरामस्तु पाता। यः शंसंतं यः
शशमानमूती पचंतं च स्तुवंतं च प्रणेषत् ॥३॥ तमु स्तुष
इंद्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च। स वस्वः कामं
पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥४॥ सो अंगिरसा-

मुचथा जुजुष्वान्ब्रह्मा तूतोदिंद्रो गातुमिष्णन्। मुष्णन्नुषसः सूर्येण स्तवानश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥५॥२५॥ स ह श्रुत इंद्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः। अव प्रियमर्शसानस्य साह्वाञ्छिरो भरद्दासस्य स्वधावान् ॥६॥ स वृत्रहेंद्रः कृष्णयोनीः पुरंदरो दासीरैरयद्वि। अजनयन्मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ॥७॥ तस्मै तवस्य१मनु दायि सत्रेंद्राय देवेभिरर्णसातौ। प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत् ॥८॥ नूनं सा ते प्रति वरं जरित्रे दुहीयदिंद्र दक्षिणा मघोनी। शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥२६॥

॥२१॥ १-६ गृत्समदः ॥ इंद्रः ॥ १-५ जगती । ६ त्रिष्टुप् ॥

॥२१॥ विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते। अश्वजिते गोजिते अब्जिते भरेंद्राय सोमं यजताय हर्यतं ॥१॥ अभिभुवेऽभिभंगाय वन्वतेऽषाळ्हाय सहमानाय वेधसे। तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इंद्राय वोचत ॥२॥ सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः। वृतंचयः सहुरिर्विक्ष्वारित इंद्रस्य वोचं प्र कृतानि वीर्या ॥३॥ अनानुदो वृषभो दोधतो वधो गंभीर ऋष्वो असमष्टकाव्यः। रध्रचोदः श्नथनो वीळितस्पृथुरिंद्रः सुयज्ञ उषसः स्वर्जनत् ॥४॥ यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः। अभिस्वरा निषदा गा अवस्यव इंद्रे हिन्वाना द्रविणान्याशत ॥५॥ इंद्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे। पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नां ॥६॥२७॥

॥२२॥ १–४ गृत्समदः॥ इंद्रः॥ १ अष्टिः। २.३ अतिशक्करी। ४ अतिशक्कर्यष्टिर्वा॥

॥२२॥ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोम-
मपिबद्विष्णुना सुतं यथावशत्। स ईं ममाद महि कर्म कर्तवे
महामुरुं सैनं सश्चद्देवो देवं सत्यमिंद्रं सत्य इंदुः॥१॥ अध
त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य
मज्मना प्र वावृधे। अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो
देवं सत्यमिंद्रं सत्य इंदुः॥२॥ साकं जातः क्रतुना साकमोजसा
ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः। दाता
राधः स्तुवते काम्यं वसु सैनं सश्चद्देवो देवं सत्यमिंद्रं सत्य
इंदुः॥३॥ तव त्यन्नर्यं नृतोऽप इंद्र प्रथमं पूर्व्यं दिवि प्रवाच्यं
कृतं। यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः। भुवद्विश्वम-
भ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषं॥४॥२८॥२॥

॥२३॥ १–१९ गृत्समदः॥ १. ५. ९. ११. १७. १९ ब्रह्मणस्पतिः। २–४. ६–८. १०. १२–१६. १८ बृहस्पतिः॥ १–१४. १६–१८ जगती। १५. १९ त्रिष्टुप्॥

॥२३॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुप-
मश्रवस्तमं। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नू-
तिभिः सीद सादनं॥१॥ देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते
यज्ञियं भागमानशुः। उस्रा इव सूर्यो ज्योतिषा महो वि-
श्वेषामिज्जनिता ब्रह्मणामसि॥२॥ आ विबाध्या परिरा-
पस्तमांसि च ज्योतिष्मंतं रथमृतस्य तिष्ठसि। बृहस्पते
भीमममित्रदंभनं रक्षोहणं गोत्रभिदं स्वर्विदं॥३॥ सु-
नीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्न-
वत्। ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महि-
त्वनं॥४॥ न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न
द्वयाविनः। विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा

रक्षांसि ब्रह्मणस्पते ॥५॥२९॥ त्वं नो गोपाः पथिकृद्विचक्षण-
स्तव व्रताय मतिभिर्जरामहे । बृहस्पते यो नो अभि ह्वरो
दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥६॥ उत वा यो नो म-
र्चयादनागसोऽरातीवा मर्तः सानुको वृकः । बृहस्पते अप तं
वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥७॥ त्रातारं त्वा
तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुं । बृहस्पते देवनिदो
नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥८॥ त्वया वयं
सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि । या नो
दूरे तळितो या अरातयोऽभि संति जंभया ता अनप्नसः ॥९॥
त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्ता-
रिषीमहि ॥१०॥३०॥ अनानुदो वृषभो जग्मिराहवं निष्टप्ता
शत्रुं पृतनासु सासहिः । असि सत्य ऋणया ब्रह्मणस्पत उ-
ग्रस्य चिद्दमिता वीळुहर्षिणः ॥११॥ अदेवेन मनसा यो
रिषण्यति शासामुग्रो मन्यमानो जिघांसति । बृहस्पते मा
प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः ॥१२॥ भरेषु
हव्यो नमसोपसद्यो गंता वाजेषु सनिता धनंधनं । विश्वा
इदर्यो अभिदिप्स्वो३ मृधो बृहस्पतिर्वि ववर्हा रथाँ इव
॥१३॥ तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवी-
र्यं । आविस्तत्कृष्व यदसत्त उक्थ्यं१ बृहस्पते वि परिरा-
पो अर्दय ॥१४॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति
क्रतुमज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं
धेहि चित्रं ॥१५॥३१॥ मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे
निरामिणो रिपवोऽन्नेषु जागृधुः । आ देवानामोहते वि

व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥१६॥ विश्वेभ्यो हि
त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नःसाम्नः कविः । स ऋणचि-
दृणया ब्रह्मणस्पतिर्द्रुहो हंता मह ऋतस्य धर्तरि ॥१७॥ तव
श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदंगिरः । इंद्रेण
युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवं ॥१८॥
ब्रह्मणस्पते त्वमस्य यंता सूक्तस्य बोधि तनयं च जिन्व । विश्वं
तद्भद्रं यदवंति देवा बृहद्वदेम विदथे सुवीराः ॥१९॥३२॥६॥

॥ २४ ॥ १–१६ गृत्समदः ॥ १–११. १३–१६ ब्रह्मणस्पतिः । १२ ब्रह्मणस्पतिरिंद्रश्च ॥
१–११. १३–१५ जगती । १२. १६ त्रिष्टुप् ॥

॥२४॥ सेमामविड्ढि प्रभृतिं य ईशिषेऽया विधेम
नवया महा गिरा । यथा नो मीढ्वान्स्तवते सखा तव
बृहस्पते सीषधः सोत नो मतिं ॥१॥ यो नंत्वान्यनमन्न्यो-
जसोतादर्दर्मन्युना शंबराणि वि । प्राच्यावयदच्युता ब्रह्म-
णस्पतिरा चाविशद्वसुमंतं वि पर्वतं ॥२॥ तद्देवानां देव-
तमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदंत वीळिता । उद्गा आज-
दभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः ॥३॥ अश्मास्य-
मवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् । तमेव
विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणं ॥४॥
सना ता का चिद्भुवना भवीत्वा माद्भिः शरद्भिर्दुरो वरंत
वः । अयतंता चरतो अन्यदन्यदिद्या चकार वयुना ब्र-
ह्मणस्पतिः ॥५॥१॥ अभिनक्षंतो अभि ये तमानशु-
र्निधिं पणीनां परमं गुहा हितं । ते विद्वांसः प्रतिचक्ष्या-
नृता पुनर्यत उ आयन्तदुदीयुराविशं ॥६॥ ऋतावानः
प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।

ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि
तं ॥७॥ ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति
धन्वना । तस्य साध्वीरिषवो याभिरस्यति नृचक्षसो दृशये
कर्णयोनयः ॥८॥ स संनयः स विनयः पुरोहितः स सुष्टुतः
स युधि ब्रह्मणस्पतिः । चाक्ष्मो यद्वाजं भरते मती धनादित्
सूर्यस्तपति तप्यतुर्वृथा ॥९॥ विभु प्रभु प्रथमं मेहनावतो
बृहस्पतेः सुविदत्राणि राध्या । इमा सातानि वेन्यस्य वा-
जिनो येन जना उभये भुंजते विशः ॥१०॥२॥ योऽवरे वृजने
विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ । स देवो देवा-
न्प्रति पप्रथे पृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः ॥११॥ विश्वं
सत्यं मघवाना युवोरिदापश्चन प्र मिनंति व्रतं वां । अच्छें-
द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातं ॥१२॥
उताशिष्ठा अनु शृण्वंति वह्नयः सभेयो विप्रो भरते मती
धना । वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समि-
थे ब्रह्मणस्पतिः ॥१३॥ ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्यु-
र्महि कर्मा करिष्यतः । यो गा उदाजत्स दिवे वि चाभजन्म-
हीव रीतिः शवसासरत्पृथक् ॥१४॥ ब्रह्मणस्पते सुयमस्य वि-
श्वहा रायः स्याम रथ्यो३ वयस्वतः । वीरेषु वीराँ उप पृङ्ग्धि
नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवं ॥१५॥ ब्रह्मणस्पते
त्वमस्य यंता सूक्तस्य बोधि तनयं च जिन्व । विश्वं तद्भद्रं
यदवंति देवा बृहद्वदेम विदथे सुवीराः ॥१६॥३॥

॥२५॥ १-५ गृत्समदः ॥ ब्रह्मणस्पतिः ॥ जगती ॥

॥२५॥ इंधानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशु-

वद्रातहव्य इत्। जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते
ब्रह्मणस्पतिः ॥१॥ वीरेभिर्वीरान्वनवद्वनुष्यतो गोभी रयिं प-
प्रथद्बोधति त्मना। तोकं च तस्य तनयं च वर्धते यंयं युजं
कृणुते ब्रह्मणस्पतिः ॥२॥ सिंधुर्न क्षोदः शिमीवाँ ऋघायतो
वृषेव वध्रीँरभि वष्ट्योजसा। अग्नेरिव प्रसितिर्नाह वर्तवे यंयं
युजं कृणुते ब्रह्मणस्पतिः ॥३॥ तस्मा अर्षति दिव्या असश्चतः
स सत्वभिः प्रथमो गोषु गच्छति। अनिभृष्टतविषिर्हंत्योजसा
यंयं युजं कृणुते ब्रह्मणस्पतिः ॥४॥ तस्मा इद्विश्वे धुनयंत सिं-
धवोऽच्छिद्रा शर्म दधिरे पुरूणि। देवानां सुम्ने सुभगः स
एधते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥५॥४॥

॥२६॥ १-४ गृत्समदः ॥ ब्रह्मणस्पतिः ॥ जगती ॥

॥२६॥ ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयंतम-
भ्यसत्। सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति
भोजनं ॥१॥ यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व
वृत्रतूर्ये। हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्पतेरव आ
वृणीमहे ॥२॥ स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं
भरते धना नृभिः। देवानां यः पितरमाविवासति श्रद्धा-
मना हविषा ब्रह्मणस्पतिं ॥३॥ यो अस्मै हव्यैर्घृतवद्भिरवि-
धत्प्र तं प्राचा नयति ब्रह्मणस्पतिः। उरुष्यतीमंहसो रक्षती
रिषो३ंहोश्चिदस्मा उरुचक्रिरद्भुतः ॥४॥५॥

॥२७॥ १-१७ कूर्मो गार्त्समदो गृत्समदो वा ॥ आदित्याः ॥ त्रिष्टुप् ॥

॥२७॥ इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा
जुहोमि। शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो

दक्षो अंशः ॥१॥ इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा
वरुणो जुषंत । आदित्यासः शुचयो धारपूता अवृजिना अन-
वद्या अरिष्टाः ॥२॥ त आदित्यास उरवो गभीरा अदब्धासो
दिप्संतो भूर्यक्षाः । अंतः पश्यंति वृजिनोत साधु सर्वं रा-
जभ्यः परमा चिदंति ॥३॥ धारयंत आदित्यासो जगत्स्था
देवा विश्वस्य भुवनस्य गोपाः । दीर्घाधियो रक्षमाणा असु-
र्यमृतावानश्चयमाना ऋणानि ॥४॥ विद्यामादित्या अवसो
वो अस्य यदर्यमन्भय आ चिन्मयोभु । युष्माकं मित्रावरुणा
प्रणीतौ परि श्वभ्रेव दुरितानि वृज्यां ॥५॥६॥ सुगो हि वो
अर्यमन्मित्र पंथा अनृक्षरो वरुण साधुरस्ति । तेनादित्या
अधि वोचता नो यच्छता नो दुष्परिहंतु शर्म ॥६॥ पिपर्तु
नो अदिती राजपुत्राति द्वेषांस्यर्यमा सुगेभिः । बृहन्मित्रस्य
वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥७॥ तिस्रो भूमी-
र्धारयन्त्रीँरुत द्यून्त्रीणि व्रता विदथे अंतरेषां । ऋतेना-
दित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥८॥ त्री
रोचना दिव्या धारयंत हिरण्ययाः शुचयो धारपूताः । अस्व-
प्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥९॥ त्वं
विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः । शतं
नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ॥१०॥७॥
न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत
पश्चा । पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्यो-
तिरश्यां ॥११॥ यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयंति
पुष्टयश्च नित्याः । स रेवान्याति प्रथमो रथेन वसुदावा वि-
दथेषु प्रशस्तः ॥१२॥ शुचिरपः सूयवसा अदब्ध उप क्षेति

वृद्धवयाः सुवीरः । नकिष्टं घ्नंत्यंतितो न दूराद्य आदित्यानां
भवति प्रणीतौ ॥१३॥ अदिते मित्र वरुणोत मृळ यद्वो
वयं चकृमा कच्चिदागः । उर्वश्यामभयं ज्योतिरिंद्र मा नो
दीर्घा अभि नशन्तमिस्राः ॥१४॥ उभे अस्मै पीपयतः स-
मीची दिवो वृष्टिं सुभगो नाम पुष्यन् । उभा क्षयावा-
जयन्याति पृत्सूभावर्धौ भवतः साधू अस्मै ॥१५॥ या वो
माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः ।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्त्स्याम ॥१६॥
माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः
॥१७॥८॥

॥ २८ ॥ १–११ कूर्मो गार्त्समदो गृत्समदो वा ॥ वरुणः ॥ त्रिष्टुप् ॥

॥२८॥ इदं कवेरादित्यस्य स्वराजो विश्वानि सांत्यभ्यस्तु
मह्ना । अति यो मंद्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य
भूरेः ॥१॥ तव व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टु-
वांसः । उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु
द्यून् ॥२॥ तव स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्र-
णेतः । यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं युज्याय
देवाः ॥३॥ प्र सीमादित्यो असृजद्विधर्ताँ ऋतं सिंधवो वरु-
णस्य यंति । न श्राम्यंति न वि मुचंत्येते वयो न पप्तू रघुया
परिज्मन् ॥४॥ वि मच्छ्रथाय रशनामिवाग ऋध्याम ते
वरुण खामृतस्य । मा तंतुश्छेदि वयतो धियं मे मा मात्रा
शार्यपसः पुर ऋतोः ॥५॥९॥ अपो सु म्यक्ष वरुण भियसं
मत्सम्राळृतावोऽनु मा गृभाय । दामेव वत्साद्वि मुमुग्ध्यं-

हो नहि त्वदारे निमिषश्चनेशे ॥६॥ मा नो वधैर्वरुण ये त
इष्टावेनः कृण्वन्तमसुर भ्रीणन्ति । मा ज्योतिषः प्रवसथानि
गन्म वि षू मृधः शिश्रथो जीवसे नः ॥७॥ नमः पुरा ते वरु-
णोत नूनमुतापरं तुविजात ब्रवाम । त्वे हि कं पर्वते न श्रि-
तान्यप्रच्युतानि दूळभ व्रतानि ॥८॥ परं ऋणा सावीरध मत्कृ-
तानि माहं राजन्नन्यकृतेन भोजं । अव्युष्टा इन्नु भूयसीरुषास
आ नो जीवान्वरुण तासु शाधि ॥९॥ यो मे राजन्युज्यो वा
सखा वा स्वप्ने भयं भीरवे मह्यमाह । स्तेनो वा यो दिप्सति
नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥१०॥ माहं मघोनो
वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः । मा रायो रा-
जन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥११॥१०॥

॥२९॥१–७ कूर्मो गार्त्समदो गृत्समदो वा ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥२९॥ धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥१॥
यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत । अभि-
क्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ॥२॥ किमू
नु वः कृणवामापरेण किं सनेन वसव आप्येन । यूयं नो मित्रा-
वरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ॥३॥ हये देवा यूय-
मिदापयः स्थ ते मृळत नाधमानाय मह्यं । मा वो रथो मध्य-
मवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ॥४॥ प्र व एको
मिमय भूर्यागो यन्मा पितेव कितवं शशास । आरे पाशा आरे
अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ॥५॥ अर्वाञ्चो
अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयं । त्राध्वं

नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥६॥ माहं
मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः । मा रायो
राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥७॥११॥

---

३० ॥ १–११ गृत्समदः ॥ १–५. ७. ८[२]. १० इंद्रः । ६ इंद्रासोमौ । ८[१] सरस्वती । ९ बृहस्पतिः । ११ मरुतः ॥ १–१० त्रिष्टुप् । ११ जगती ॥

॥३०॥ ऋतं देवाय कृण्वते सवित्र इंद्रायाहिघ्ने न रमंत
आपः । अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसां ॥१॥
यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुष उवाच ।
पथो रदंतीरनु जोषमस्मै दिवेदिवे धुनयो यंत्यर्थं ॥२॥ ऊर्ध्वो
ह्यस्थादध्यंतरिक्षेऽधा वृत्राय प्र वधं जभार । मिहं वसान उप
हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिंद्रः ॥३॥ बृहस्पते तपुषा-
श्नेव विध्य वृकद्वरसो असुरस्य वीरान् । यथा जघंथ धृषता
पुरा चिदेवा जहि शत्रुमस्माकमिंद्र ॥४॥ अव क्षिप दिवो
अश्मानमुच्चा येन शत्रुं मंदसानो निजूर्वाः । तोकस्य सातौ
तनयस्य भूरेरस्माँ अर्धं कृणुतादिंद्र गोनां ॥५॥१२॥ प्र हि क्रतुं
वृहथो यं वनुथो रध्रस्य स्थो यजमानस्य चोदौ । इंद्रासोमा
युवमस्माँ अविष्टमस्मिन्भयस्थे कृणुतमु लोकं ॥६॥ न मा त-
मन्न श्रमन्नोत तंद्रन्न वोचाम मा सुनोतेति सोमं । यो मे
पृणाद्यो ददद्यो निबोधाद्यो मा सुन्वंतमुप गोभिरायत् ॥७॥
सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून् । त्यं
चिच्छर्धंतं तविषीयमाणमिंद्रो हंति वृषभं शंडिकानां ॥८॥
यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य ।
बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषंतं परि धेहि राजन् ॥९॥
अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि ।

ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि ॥१०॥
तं वः शर्धं मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनं। यथा
रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ॥११॥१३॥

॥ ३१ ॥ १–७ गृत्समदः ॥ विश्वे देवाः ॥ १–६ जगती । ७ त्रिष्टुप् ॥

॥ ३१ ॥ अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसु-
भिः सचाभुवा । प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो
हृषीवंतो वनर्षदः ॥१॥ अध स्मा न उदवता सजोषसो रथं
देवासो अभि विक्षु वाजयुं । यदाशवः पद्याभिस्तित्रंतो रजः
पृथिव्याः सानौ जंघनंत पाणिभिः ॥२॥ उत स्य न इंद्रो वि-
श्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः । अनु नु स्थात्यवृका-
भिरूतिभी रथं महे सनये वाजसातये ॥३॥ उत स्य देवो
भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथं । इळा भ-
गो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती ॥४॥
उत त्ये देवी सुभगे मिथूदृशोषासानक्ता जगतामपीजु-
वा । स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिव-
या उपस्तिरे ॥५॥ उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्यो-
ऽज एकपादुत । त्रित ऋभुक्षाः सविता चनो दधेऽपां न-
पादाशुहेमा धिया शमि ॥६॥ एता वो वश्म्युद्यता य-
जत्रा अतक्षन्नायवो नव्यसे सं । श्रवस्यवो वाजं चकानाः स-
प्तिर्न रथ्यो अह धीतिमश्याः ॥ ७ ॥ १४ ॥

॥ ३२ ॥ १–८ गृत्समदः ॥ १ द्यावापृथिव्यौ । २. ३ इंद्रस्त्वष्टा वा । ४. ५ राका ।
६. ७ सिनीवाली । ८ लिंगोक्तदेवताः ॥ १–५ जगती । ६–८ अनुष्टुप् ॥

॥३२॥ अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वच-
सः सिषासतः । ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसूयुर्वां

महो दधे ॥१॥ मा नो गुह्या रिप आयोरहन्दभन्मा न आभ्यो रीरधो दुच्छुनाभ्यः । मा नो वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत्त्वेमहे ॥२॥ अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतं । पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ॥३॥ राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना । सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यं ॥४॥ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥५॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥६॥ या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी । तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥७॥ या गुंगूर्या सिनीवाली या राका या सरस्वती । इंद्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥८॥१५॥३॥

॥ ३३ ॥ १–१५ गृत्समदः ॥ रुद्रः ॥ त्रिष्टुप् ॥

॥३३॥ आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः । अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥१॥ त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः । व्य१स्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥२॥ श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो । पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥३॥ मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती । उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥४॥ हवीमभिर्हवते यो हविर्भिरव स्तोमेभी

रुद्रं दिषीय। ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरध-
न्मनायै ॥५॥१६॥ उन्मा ममंद वृषभो मरुत्वान्त्वक्षीयसा वयसा
नाधमानं। घृणीव छायामरपा अशीया विवासेयं रुद्रस्य सुम्नं
॥६॥ क्व१स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥७॥ प्र
बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि। नमस्या
कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥८॥ स्थिरे-
भिरंगैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः। ईशा-
नादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यं ॥९॥ अर्हन्बिभर्षि
सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपं। अर्हन्निदं दयसे
विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥१०॥१७॥ स्तुहि
श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रं। मृळा जरित्रे रुद्र
स्तवानोऽन्यं ते अस्मन्नि वपंतु सेनाः ॥११॥ कुमारश्चित्पितरं
वंदमानं प्रति नानाम रुद्रोपयंतं। भूरेर्दातारं सत्पतिं गृणीषे
स्तुतस्त्वं भेषजा रास्यस्मे ॥१२॥ या वो भेषजा मरुतः शुचीनि
या शंतमा वृषणो या मयोभु। यानि मनुरवृणीता पिता
नस्ता शं च योश्च रुद्रस्य वश्मि ॥१३॥ परि णो हेती रुद्रस्य
वृज्याः परि त्वेषस्य दुर्मतिर्मही गात्। अव स्थिरा मघवद्भ्य-
स्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥१४॥ एवा बभ्रो वृषभ
चेकितान यथा देव न हृणीषे न हंसि। हवनश्रुन्नो रुद्रेह बो-
धि बृहद्वदेम विदथे सुवीराः ॥१५॥१८॥

॥ ३४ ॥ १–१५ गृत्समदः ॥ मरुतः ॥ १–१४ जगती । १५ त्रिष्टुप् ॥

॥३४॥ धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्त-
विषीभिरर्चिनः। अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमंतो

अप गा अवृणवत ॥१॥ द्यावो न स्तृभिश्चितयंत खादिनो
व्यभ्रिया न द्युतयंत वृष्टयः । रुद्रो यद्वो मरुतो रुक्मवक्षसो
वृषाजनि पृश्न्याः शुक्र ऊधनि ॥२॥ उक्षंते अश्वाँ अत्याँ इवा-
जिषु नदस्य कर्णैस्तुरयंत आशुभिः । हिरण्यशिप्रा मरुतो
दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ॥३॥ पृक्षे ता विश्वा
भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः । पृषदश्वासो
अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥४॥ इंधन्वभि-
र्धेनुभी रप्शदूधभिरध्वस्मभिः पथिभिर्भ्राजदृष्टयः । आ हंसासो
न स्वसराणि गंतन मधोर्मदाय मरुतः समन्यवः ॥५॥१९॥
आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि
गंतन । अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे
वाजपेशसं ॥६॥ तं नो दात मरुतो वाजिनं रथ आपानं
ब्रह्म चितयद्दिवेदिवे । इषं स्तोतृभ्यो वृजनेषु कारवे सनिं
मेधामरिष्टं दुष्टरं सहः ॥७॥ यद्युंजते मरुतो रुक्मवक्षसो-
ऽश्वान्रथेषु भग आ सुदानवः । धेनुर्न शिश्वे स्वसरेषु पिन्वते
जनाय रातहविषे महीमिषं ॥८॥ यो नो मरुतो वृकताति
मर्त्यो रिपुर्दधे वसवो रक्षता रिषः । वर्तयत तपुषा चक्रि-
याभि तमव रुद्रा अशसो हंतना वधः ॥९॥ चित्रं तद्वो मरुतो
याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः । यद्वा निदे नवमा-
नस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः ॥१०॥२०॥ तान्वो
महो मरुत एवयाव्नो विष्णोरेषस्य प्रभृथे हवामहे । हिरण्य-
वर्णान्ककुहान्यतस्रुचो ब्रह्मण्यंतः शंस्यं राध ईमहे ॥११॥ ते द-
शग्वाः प्रथमा यज्ञमूहिरे ते नो हिन्वंतूषसो व्युष्टिषु । उषा न
रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥१२॥ ते

क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः।
निमेघमाना अत्येन पाजसा सुश्चंद्रं वर्णं दधिरे सुपेशसं॥१३॥
तां इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि।
त्रितो न यान्पंच होतृनभिष्टय आववर्तदवरांश्चक्रियावसे
॥१४॥ यया रध्रं पारयथात्यंहो यया निदो मुंचथ वंदितारं।
अर्वाची सा मरुतो या व ऊतिरो षु वाश्रेव सुमतिर्जि-
गातु॥१५॥२१॥

॥३५॥१-१५ गृत्समदः॥ अपांनपात्॥ त्रिष्टुप्॥

॥३५॥ उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो
गिरो मे। अपां नपादाशुहेमा कुवित्स सुपेशसस्करति
जोषिषद्धि॥१॥ इमं स्वस्मै हृद आ सुतष्टं मंत्रं वोचेम कु-
विदस्य वेदत्। अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुव-
ना जजान॥२॥ समन्या यंत्युप यंत्यन्याः समानमूर्वं नद्यः
पृणंति। तमू शुचिं शुचयो दीदिवांसमपां नपातं परि
तस्थुरापः॥३॥ तमस्मेरा युवतयो युवानं मर्मृज्यमानाः
परि यंत्यापः। स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो
घृतनिर्णिगप्सु॥४॥ अस्मै तिस्रो अव्यथ्याय नारीर्देवाय
देवीर्दिधिषंत्यन्नं। कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं
धयति पूर्वसूनां॥५॥२२॥ अश्वस्यात्र जनिमास्य च स्वर्द्रुहो
रिषः संपृचः पाहि सूरीन्। आमासु पूर्षु परो अप्रमृष्यं
नारातयो वि नशन्नानृतानि॥६॥ स्व आ दमे सुदुघा
यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति। सो अपां नपादू-
र्जयन्नप्स्वंतर्वसुदेयाय विधते वि भाति॥७॥ यो अप्स्वा
शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति। वया इदन्या

भुवनान्यस्य प्र जायंते वीरुधश्च प्रजाभिः ॥८॥ अपां नपादा
ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः । तस्य ज्येष्ठं महि-
मानं वहंतीर्हिरण्यवर्णाः परि यंति यह्वीः ॥९॥ हिरण्यरूपः स
हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः । हिरण्ययात्परि योने-
र्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥१०॥२३॥ तदस्यानीकमुत
चारु नामापीच्यं वर्धते नप्तुरपां । यमिंधते युवतयः समित्था
हिरण्यवर्णं घृतमन्नमस्य ॥११॥ अस्मै बहूनामवमाय सख्ये
यज्ञैर्विधेम नमसा हविर्भिः । सं सानु मार्ज्मि दिधिषामि
बिल्मैर्दधाम्यन्नैः परि वंद ऋग्भिः ॥१२॥ स ईं वृषाजनयत्तासु
गर्भं स ईं शिशुर्धयति तं रिहंति । सो अपां नपादनभिम्ला-
तवर्णोऽन्यस्येवेह तन्वा विवेष ॥१३॥ अस्मिन्पदे परमे तस्थि-
वांसमध्वस्मभिर्विश्वहा दीदिवांसं । आपो नप्त्रे घृतमन्नं वहं-
तीः स्वयमत्कैः परि दीयंति यह्वीः ॥१४॥ अयांसमग्ने सुक्षितिं
जनायायांसमु मघवद्भ्यः सुवृक्तिं । विश्वं तद्भद्रं यदवंति देवा
बृहद्वदेम विदथे सुवीराः ॥१५॥२४॥

॥३६॥१–६ गृत्समदः ॥ १ इंद्रो मधुश्च । २ मरुतो माधवश्च । ३ त्वष्टा शुक्रश्च । ४ अग्निः शुचिश्च । ५ इंद्रो नभश्च । ६ मित्रावरुणौ नभस्यश्च ॥ जगती ॥

॥३६॥ तुभ्यं हिन्वानो वसिष्ट गा अपोऽधुक्षन्त्सीमवि-
भिरद्रिभिर्नरः । पिबेंद्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं
प्रथमो य ईशिषे ॥१॥ यज्ञैः संमिश्लाः पृषतीभिर्ऋष्टिभिर्या-
मञ्छुभ्रासो अंजिषु प्रिया उत । आसद्या बर्हिर्भरतस्य सूनवः
पोत्रादा सोमं पिबता दिवो नरः ॥२॥ अमेव नः सुहवा आ
हि गंतन नि बर्हिषि सदतना रणिष्टन । अथा मंदस्व जुजु-
षाणो अंधसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥३॥ आ वक्षि

देवाँ इह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु। प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृप्णुहि ॥४॥ एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः। तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥५॥ जुषेथां यज्ञं बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु। अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ॥६॥२५॥७॥

॥३७॥ १–६ गृत्समदः॥ १–४ द्रविणोदाः। ५ अश्विनौ। ६ अग्निः॥ जगती॥

॥३७॥ मंदस्व होत्रादनु जोषमंधसोऽध्वर्यवः स पूर्णां वष्ट्यासिचं। तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः॥१॥ यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते। अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः॥२॥ मेद्यंतु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते। आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः॥३॥ अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितं। तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः॥४॥ अर्वाचमद्य यय्यं नृवाहणं रथं युंजाथामिह वां विमोचनं। पृंक्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू॥५॥ जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिं। विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः॥६॥१॥

॥३८॥ १–११ गृत्समदः॥ सविता॥ त्रिष्टुप्॥

॥३८॥ उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा

वह्निरस्थात् । नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वी-
तिहोत्रं स्वस्तौ ॥१॥ विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र
बाहवा पृथुपाणिः सिसर्ति । आपश्चिदस्य व्रत आ नि-
मृग्रा अयं चिद्वातो रमते परिज्मन् ॥२॥ आशुभिश्चि-
द्यान्वि मुचाति नूनमरीरमदतमानं चिदेतोः । अह्यर्षूणां
चिन्न्ययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात् ॥३॥ पुनः
समव्यद्विततं वयंती मध्या कर्तोर्न्यधाच्छक्म धीरः । उत्संहा-
यास्थाद्व्य१तूँरदर्धररमतिः सविता देव आगात् ॥४॥ नानौ-
कांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः ।
ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा
॥५॥२॥ समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरता-
ममाभूत् । शश्वाँ अपो विकृतं हित्व्यागादनु व्रतं सवितु-
र्दैव्यस्य ॥६॥ त्वया हितमप्यमप्सु भागं धन्वान्वा मृगयसो
वि तस्थुः । वनानि विभ्यो नकिरस्य तानि व्रता देवस्य
सवितुर्मिनंति ॥७॥ याद्राध्यं१ वरुणो योनिमप्यमनिशितं
निमिषि जर्भुराणः । विश्वो मार्तांडो व्रजमा पशुर्गात्स्थ-
शो जन्मानि सविता व्याकः ॥८॥ न यस्येंद्रो वरुणो न
मित्रो व्रतमर्यमा न मिनंति रुद्रः । नारातयस्तमिदं
स्वस्ति हुवे देवं सवितारं नमोभिः ॥९॥ भगं धियं
वाजयंतः पुरंधिं नराशंसो ग्नास्पतिर्नो अव्याः । आये
वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम ॥१०॥
अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध
आ गात् । शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवि-
तर्जरित्रे ॥११॥३॥

॥३९॥ १-८ गृत्समदः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥३९॥ ग्रावाणेव तदिदर्थं जरेथे गृध्रेव वृक्षं निधिमंत-
मच्छ । ब्रह्माणेव विदथ उक्थशासा दूतेव हव्या जन्या
पुरुत्रा ॥१॥ प्रातर्यावाणा रथ्येव वीराजेव यमा वरमा सं-
चेथे । मेने इव तन्वा३ शुंभमाने दंपतीव क्रतुविदा जनेषु
॥२॥ शृंगेव नः प्रथमा गंतमर्वाक् शफाविव जर्भुराणा तरो-
भिः । चक्रवाकेव प्रति वस्तोरुस्रार्वाचा यातं रथ्येव शक्रा
॥३॥ नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव ।
श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान्
॥४॥ वातेवाजुर्या नद्येव रीतिरक्षी इव चक्षुषा यातमर्वाक् ।
हस्ताविव तन्वे३ शंभविष्ठा पादेव नो नयतं वस्यो अच्छ
॥५॥४॥ ओष्ठाविव मध्वास्ने वदंता स्तनाविव पिप्यतं जी-
वसे नः । नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता
भूतमस्मे ॥६॥ हस्तेव शक्तिमभि संददी नः क्षामेव नः स-
मजतं रजांसि । इमा गिरो अश्विना युष्मयंतीः क्ष्णोत्रेणेव
स्वधितिं सं शिशीतं ॥७॥ एतानि वामश्विना वर्धनानि
ब्रह्म स्तोमं गृत्समदासो अक्रन् । तानि नरा जुजुषाणोप
यातं बृहद्वदेम विदथे सुवीराः ॥८॥५॥

॥४०॥ १-६ गृत्समदः ॥ १-६[1] सोमापूषणौ । ६[2] अदितिः ॥ त्रिष्टुप् ॥

॥४०॥ सोमापूषणा जनना रयीणां जनना दिवो जनना
पृथिव्याः । जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य
नाभिं ॥१॥ इमौ देवौ जायमानौ जुषंतेमौ तमांसि गूहता-
मजुष्टा । आभ्यामिंद्रः पक्वमामास्वंतः सोमापूषभ्यां जनदु-
स्रियासु ॥२॥ सोमापूषणा रजसो विमानं सप्तचक्रं रथम-

विश्वमिन्वं । विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पं-
चरश्मिं ॥३॥ दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यंत-
रिक्षे । तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे
॥४॥ विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण
एति । सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना ज-
येम ॥५॥ धियं पूषा जिन्वतु विश्वमिन्वो रयिं सोमो रयिपति-
र्दधातु । अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः॥६॥६॥

॥ ४१ ॥ १–२१ गृत्समदः ॥ १. २ वायुः । ३ इंद्रवायू । ४–६ मित्रावरुणौ । ७–९ अश्विनौ । १०–१२ इंद्रः । १३–१५ विश्वे देवाः । १६–१८ सरस्वती । १९.१.२. २०. २१ द्यावापृथिव्यौ हविर्धाने वा । १९.३. द्यावापृथिव्यौ हविर्धाने वाग्निर्वा ॥ १–१५. १९–२१ गायत्री । १६. १७. अनुष्टुप् । १८ बृहती ॥

॥४१॥ वायो ये ते सहस्रिणो रथासस्तेभिरा गहि । नियुत्वा-
न्सोमपीतये ॥१॥ नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते । गं-
तासि सुन्वतो गृहं ॥२॥ शुक्रस्याद्य गवाशिर इंद्रवायू नियुत्व-
तः । आ यातं पिबतं नरा ॥३॥ अयं वां मित्रावरुणा सुतः सोम
ऋतावृधा । ममेदिह श्रुतं हवं ॥४॥ राजानावनभिद्रुहा ध्रुवे
सदस्युत्तमे । सहस्रस्थूण आसाते ॥५॥७॥ ता सम्राजा घृतासुती
आदित्या दानुनस्पती । सचेते अनवह्वरं ॥६॥ गोमदू षु नास-
त्याश्वावद्यातमश्विना । वर्ती रुद्रा नृपाय्यं ॥७॥ न यत्परो नांतर
आदधर्षद्वृषण्वसू । दुःशंसो मर्त्यो रिपुः ॥८॥ ता न आ वोळ्हमः-
श्विना रयिं पिशंगसंदृशं । धिष्ण्या वरिवोविदं ॥९॥ इंद्रो अंग
महद्भयमभी षदप चुच्यवत् । स हि स्थिरो विचर्षणिः ॥१०॥८॥
इंद्रश्च मृळयाति नो न नः पश्चादघं नशत् । भद्रं भवाति नः पुरः
॥११॥ इंद्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । जेता शत्रून्वि-
चर्षणिः ॥१२॥ विश्वे देवास आ गत शृणुता म इमं हवं । एदं

बर्हिर्नि षीदत ॥१३॥ तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः। एतं पिबत काम्यं ॥१४॥ इंद्रज्येष्ठा मरुद्गणा देवासः पूषरातयः। विश्वे मम श्रुता हवं ॥१५॥९॥ अंबितमे नदीतमे देवितमे सरस्वति । अप्रशस्ता इव स्मसि प्रशस्तिमंब नस्कृधि ॥१६॥ त्वे विश्वा सरस्वति श्रितायूंषि देव्यां। शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥१७॥ इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति। या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥१८॥ प्रेतां यज्ञस्य शंभुवा युवामिदा वृणीमहे। अग्निं च हव्यवाहनं ॥१९॥ द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशं। यज्ञं देवेषु यच्छतां ॥२०॥ आ वामुपस्थमद्रुहा देवाः सीदंतु यज्ञियाः। इहाद्य सोमपीतये ॥२१॥१०॥

॥ ४२ ॥ १–३ गृत्समदः ॥ इंद्रः कपिंजलरूपी ॥ त्रिष्टुप् ॥

॥४२॥ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावं। सुमंगलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत् ॥१॥ मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता। पित्र्यामनु प्रदिशं कनिक्रदत्सुमंगलो भद्रवादी वदेह॥२॥ अव क्रंद दक्षिणतो गृहाणां सुमंगलो भद्रवादी शकुंते। मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः॥३॥११॥

॥ ४३ ॥ १–३ गृत्समदः ॥ इंद्रः कपिंजलरूपी ॥ १.३ जगती। २ अतिशक्वर्यष्टिर्वा ॥

॥४३॥ प्रदक्षिणिदभि गृणंति कारवो वयो वदंत ऋतुथा शकुंतयः। उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति ॥१॥ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि। वृषेव वाजी शिशुमतीरपीत्या

सर्वतो नः शकुने भद्रमा वंद विश्वतो नः शकुने पुण्यमा वंद ॥२॥ आवदंस्त्वं शंकुने भद्रमा वंद तूष्णीमासीनः सुमतिं चिंकिद्धि नः । यदुत्पतन्वदंसि कर्करियथा बृहद्वंदेम विदथे सुवीराः ॥ ३ ॥ १२ ॥ ४ ॥ २ ॥

॥ इति द्वितीयं मंडलं समाप्तं ॥

॥ १ ॥ १–२३ विश्वामित्रो गाथिनः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१॥ सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजंध्यै । देवाँ अच्छा दीद्यद्युंजे अद्रिं शमाये अंग्ने तन्वं जुषस्व ॥१॥ प्रांचं यज्ञं चंकृम वर्धतां गीः समिद्भिरग्निं नमंसा दुवस्यन् । दिवः शंशासुर्विदथा कवीनां गृत्साय चित्तवसे गातुमीषुः ॥२॥ मयो दधे मेधिरः पूतदंक्षो दिवः सुबंधुर्जनुषा पृथिव्याः । अविंदन्नु दर्शतमप्स्व१ंतर्देवासो अग्निमपसि स्वसृणां ॥३॥ अवर्धयन्त्सुभगं सप्त यह्वीः श्वेतं जज्ञानमंरुषं महित्वा । शिशुं न जातमभ्यारुरश्वा देवासो अग्निं जनिमन्वपुषन् ॥४॥ शुक्रेभिरंगै रजं आततन्वान् क्रतुं पुनानः कविभिः पवित्रैः । शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ॥५॥१३॥ वव्राजा सीमनंदतीरदब्धा दिवो यह्वीरवसाना अनग्नाः । सना अत्र युवतयः सयोनीरेकं गर्भं दधिरे सप्त वाणीः ॥ ६ ॥ स्तीर्णा अस्य संहतो विश्वरूपा घृतस्य योनौ स्रवथे मधूनां । अस्थुरत्र धेनवः पिन्वमाना मही दस्मस्य मातरा समीची ॥७॥ बभ्राणः सूनो सहसो व्यद्यौद्दधानः शुक्रा रंभसा वपूंषि । श्चोतंति धारा मधुनो घृतस्य वृषा यत्र वावृधे

काव्येन ॥८॥ पितुश्चिदूधर्जनुषा विवेद व्यस्य धारा असृजद्वि
धेनाः । गुहा चरंतं सखिभिः शिवेभिर्दिवो यह्वीभिर्न गुहा
बभूव ॥९॥ पितुश्च गर्भं जनितुश्च बभ्रे पूर्वीरेको अधयत्पी-
प्यानाः । वृष्णे सपत्नी शुचये सबंधू उभे अस्मै मनुष्ये३ नि
पाहि ॥१०॥१४॥ उरौ महाँ अनिबाधे ववर्धापो अग्निं यशसः
सं हि पूर्वीः । ऋतस्य योनावशयद्दमूना जामीनामग्निरपसि
स्वसॄणां ॥११॥ अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः
सूनवे भाऋजीकः । उदुस्रिया जनिता यो जजानापां गर्भो
नृतमो यह्वो अग्निः ॥१२॥ अपां गर्भं दर्शतमोषधीनां वना
जजान सुभगा विरूपं । देवासश्चिन्मनसा सं हि जग्मुः
पनिष्ठं जातं तवसं दुवस्यन् ॥१३॥ बृहंत इद्भानवो भाऋजी-
कमग्निं सचंत विद्युतो न शुक्राः । गुहेव वृद्धं सदसि स्वे
अंतरपार ऊर्वे अमृतं दुहानाः ॥१४॥ ईळे च त्वा यजमानो
हविर्भिरीळे सखित्वं सुमतिं निकामः । देवैरवो मिमीहि सं
जरित्रे रक्षा च नो दम्येभिरनीकैः ॥१५॥१५॥ उपक्षेतारस्तव
सुप्रणीतेऽग्ने विश्वानि धन्या दधानाः । सुरेतसा श्रवसा तुंज-
माना अभि ष्याम पृतनायूँरदेवान् ॥१६॥ आ देवानामभवः
केतुरग्ने मंद्रो विश्वानि काव्यानि विद्वान् । प्रति मर्ताँ अवा-
सयो दमूना अनु देवान्रथिरो यासि साधन् ॥१७॥ नि दुरोणे
अमृतो मर्त्यानां राजा ससाद विदथानि साधन् । घृतप्रतीक
उर्विया व्यद्यौदग्निर्विश्वानि काव्यानि विद्वान् ॥१८॥ आ नो
गहि सख्येभिः शिवेभिर्महान्महीभिरूतिभिः सरण्यन् । अस्मे
रयिं बहुलं संतरुत्रं सुवाचं भागं यशसं कृधी नः ॥१९॥ एता
ते अग्ने जनिमा सनानि प्र पूर्व्याय नूतनानि वोचं । महांति

वृष्णो॑ स॒त्वना कृ॒तेमा जन्म॑ञ्जन्म॒न् निहि॑तो जा॒तवे॑दाः ॥२०॥
जन्म॑ञ्जन्म॒न् निहि॑तो जा॒तवे॑दा वि॒श्वामि॑त्रेभिरिध्यते॒ अज॑स्रः।
तस्य॑ व॒यं सु॑म॒तौ य॒ज्ञिय॒स्यापि॑ भ॒द्रे सौ॑मन॒से स्या॑म ॥२१॥
इ॒मं य॒ज्ञं स॑हसाव॒न् त्वं नो॑ देव॒त्रा धे॑हि सु॒क्रतो॒ ररा॑णः। प्र
यं॑सि होतर्बृह॒तीरिषो॑ नोऽग्ने॒ महि॒ द्रवि॑ण॒मा य॑जस्व ॥२२॥
इळा॑मग्ने पुरु॒दंसं॑ स॒निं गोः श॑श्वत्त॒मं हव॑मानाय साध। स्यान्नः॑
सू॒नुस्तन॑यो वि॒जावा॑ग्ने॒ सा ते॑ सुम॒तिर्भू॑त्व॒स्मे ॥२३॥१९॥

॥ २ ॥ १-१५ विश्वामित्रः ॥ अग्निर्वैश्वानरः ॥ जगती ॥

॥२॥ वै॒श्वा॒न॒राय॑ धि॒षणा॑मृता॒वृधे॑ घृ॒तं न पू॒तम॒ग्नये॑ जना-
मसि। द्वि॒ता होता॑रं॒ मनु॑षश्च वा॒घतो॑ धि॒या रथं॒ न कुलि॑शः॒
समृ॑ण्वति ॥१॥ स रो॑चयज्ज॒नुषा॒ रोद॑सी उ॒भे स मा॒त्रोर॑भ-
वत्पु॒त्र ईड्यः॑। ह॒व्य॒वाळ॒ग्निर॒जर॒श्चनो॑हितो दू॒ळभो॑ वि॒शाम-
ति॑थिर्वि॒भाव॑सुः ॥२॥ क्रत्वा॒ दक्ष॑स्य॒ तरु॑षो॒ विध॑र्मणि दे॒वासो॑
अ॒ग्निं ज॑नयन्त॒ चित्ति॑भिः। रु॒रु॒चा॒नं भा॒नुना॒ ज्योति॑षा म॒हा-
मत्यं॒ न वाजं॑ सनि॒ष्यन्नुप॑ ब्रुवे ॥३॥ आ म॒न्द्रस्य॑ सनि॒ष्यन्तो॒ वरे॑ण्यं
वृणी॒महे॒ अह्र॑यं॒ वाज॑मृ॒ग्मिय॑म्। रा॒तिं भृगू॑णामु॒शिजं॑ क॒विक्र॑-
तुम॒ग्निं राज॑न्तं दि॒व्येन॑ शो॒चिषा॑ ॥४॥ अ॒ग्निं सु॒म्नाय॑ दधिरे पु॒रो
जना॒ वाज॑श्रवसमि॒ह वृ॒क्तब॑र्हिषः। य॒तस्रु॑चः सु॒रुचं॑ वि॒श्वदे॑व्यं
रु॒द्रं य॒ज्ञानां॒ साध॑दिष्टिम॒पसा॑म् ॥५॥१७॥ पाव॑कशोचे॒ तव॒ हि
क्षयं॒ परि॒ होत॑र्य॒ज्ञेषु॑ वृ॒क्तब॑र्हिषो॒ नरः॑। अग्ने॒ दुव॑ इ॒च्छमा॑नास॒
आप्य॒मुपा॑सते॒ द्रवि॑णं धेहि॒ तेभ्यः॑ ॥६॥ आ रोद॑सी अपृण॒दा
स्व॑र्म॒हज्जा॒तं यदे॑नम॒पसो॒ अधा॑रयन्। सो अ॑ध्व॒राय॒ परि॑
णीयते क॒विरत्यो॒ न वाज॑सातये॒ चनो॑हितः ॥७॥ न॒मस्य॑त

हव्यदातिं स्वध्वरं दुवस्यत दम्यं जातवेदसं । रथीरृतस्य
बृहतो विचर्षणिरग्निर्देवानामभवत्पुरोहितः ॥८॥ तिस्रो य-
ह्वस्य समिधः परिज्मनोऽग्नेरपुनन्नुशिजो अमृत्यवः । ता-
सामेकामदधुर्मर्त्ये भुजमु लोकमु द्वे उप जामिमीयतुः ॥९॥
विशां कविं विश्पतिं मानुषीरिषः सं सीमकृण्वन्त्स्वधितिं
न तेजसे । स उद्वतो निवतो याति वेविषत्स गर्भमेषु भुवनेषु
दीधरत् ॥१०॥१८॥ स जिन्वते जठरेषु प्रजज्ञिवान्वृषा चित्रेषु
नानदन्न सिंहः । वैश्वानरः पृथुपाजा अमर्त्यो वसु रत्ना दय-
मानो वि दाशुषे॥११॥ वैश्वानरः प्रत्नथा नाकमारुहद्दिवस्पृष्ठं
भंदमानः सुमन्मभिः । स पूर्ववज्जनयंजंतवे धनं समानमज्मं
पर्येति जागृविः ॥१२॥ ऋतावानं यज्ञियं विप्रमुक्थ्य१मा
यं दधे मातरिश्वा दिवि क्षयं । तं चित्रयामं हरिकेशमीमहे
सुदीतिमग्निं सुविताय नव्यसे ॥१३॥ शुचिं न याममिषिरं
स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधं । अग्निं मूर्धानं दिवो
अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत् ॥१४॥ मंद्रं हो-
तारं शुचिमद्वयाविनं दमूनसमुक्थ्यं विश्वचर्षणिं । रथं न
चित्रं वपुषाय दर्शतं मनुर्हितं सदमिद्राय ईमहे ॥१५॥१९॥

॥३॥ १–११ विश्वामित्रः ॥ अग्निर्वैश्वानरः ॥ जगती ॥

॥३॥ वैश्वानराय पृथुपाजसे विपो रत्ना विधंत धरुणेषु
गातवे । अग्निर्हि देवाँ अमृतो दुवस्यत्यथा धर्माणि सनता
न दूदुषत् ॥१॥ अंतर्दूतो रोदसी दस्म ईयते होता निषत्तो
मनुषः पुरोहितः । क्षयं बृहंतं परि भूषति द्युभिर्देवेभिरग्निरि-
षितो धियावसुः ॥२॥ केतुं यज्ञानां विदथस्य साधनं विप्रासो
अग्निं महयंत चित्तिभिः । अपांसि यस्मिन्नधि संदधुर्गिरस्त-

स्मिन्त्सुम्नानि यजमान आ चके ॥३॥ पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघतां । आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भंदते धामभिः कविः ॥४॥ चंद्रमग्निं चंद्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदं । विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥५॥२०॥ अग्निर्देवेभिर्मनुषश्च जंतुभिस्तन्वानो यज्ञं पुरुपेशसं धिया । रथीरंतरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ॥६॥ अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः । वयांसि जिन्व बृहतश्च जागृव उशिग्देवानामसि सुक्रतुर्विपां ॥७॥ विश्पतिं यह्वमतिथिं नरः सदा यंतारं धीनामुशिजं च वाघतां । अध्वराणां चेतनं जातवेदसं प्र शंसंति नमसा जूतिभिर्वृधे ॥८॥ विभावा देवः सुरणः परि क्षितीरग्निर्बभूव शवसा सुमद्रथः । तस्य व्रतानि भूरिपोषिणो वयमुप भूषेम दम आ सुवृक्तिभिः ॥९॥ वैश्वानर तव धामान्या चके येभिः स्वर्विदभवो विचक्षण । जात आपृणो भुवनानि रोदसी अग्ने ता विश्वा परिभूरसि त्मना ॥१०॥ वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः । उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥११॥२१॥

॥ ४ ॥ १–११ विश्वामित्रः ॥ आप्रियः ॥ त्रिष्टुप् ॥

॥४॥ समित्समित्सुमना बोध्यस्मे शुचाशुचा सुमतिं रासि वस्वः । आ देव देवान्यजथाय वक्षि सखा सखीन्त्सुमना यक्ष्यग्ने ॥१॥ यं देवासस्त्रिरहन्नायजंते दिवेदिवे वरुणो मित्रो अग्निः । सेमं यज्ञं मधुमंतं कृधी नस्तनू-

नपाद्घृतयोनिं विधंतं ॥२॥ प्र दीधितिर्विश्ववारा जिगाति होतारमिळः प्रथमं यजध्यै । अच्छा नमोभिर्वृषभं वंदध्यै स देवान्यक्षदिषितो यजीयान् ॥३॥ ऊर्ध्वो वां गातुरध्वरे अकार्यूर्ध्वा शोचींषि प्रस्थिता रजांसि । दिवो वा नाभा न्यसादि होता स्तृणीमहि देवव्यचा वि बर्हिः ॥४॥ सप्त होत्राणि मनसा वृणाना इन्वंतो विश्वं प्रति यन्नृतेन । नृपेशसो विदथेषु प्र जाता अभी३मं यज्ञं वि चरंत पूर्वीः ॥५॥२२॥ आ भंदमाने उषसा उपाके उत स्मयेते तन्वा३ विरूपे । यथा नो मित्रो वरुणो जुजोषदिंद्रो मरुत्वाँ उत वा महोभिः ॥६॥ दैव्या होतारा प्रथमा न्यृंजे सप्त पृक्षासः स्वधया मदंति । ऋतं शंसंत ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥७॥ आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः । सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदंतु ॥८॥ तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व । यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥९॥ वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति । सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥१०॥ आ याह्यग्ने समिधानो अर्वाङिंद्रेण देवैः सरथं तुरेभिः । बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयंतां ॥११॥२३॥

॥ ५ ॥ १-११ विश्वामित्रः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ ५ ॥ प्रत्यग्निरुषसश्चेकितानोऽबोधि विप्रः पदवीः कवीनां । पृथुपाजा देवयद्भिः समिद्धोऽप द्वारा तमसो वह्निरावः ॥ १ ॥ प्रेद्वग्निर्वावृधे स्तोमेभिर्गीर्भिः स्तोतॄणां नमस्य उक्थैः । पूर्वीर्ऋतस्य संदृशश्चकानः सं दूतो

अद्यौदुषसो विरोके ॥२॥ अधाय्यग्निर्मानुषीषु विक्ष्व१पां
गर्भो मित्र ऋतेन साधन्। आ हर्यतो यजतः सान्वस्थादभूदु
विप्रो हव्यो मतीनां ॥३॥ मित्रो अग्निर्भवति यत्समिद्धो
मित्रो होता वरुणो जातवेदाः। मित्रो अध्वर्युरिषिरो दमूना
मित्रः सिंधूनामुत पर्वतानां ॥४॥ पाति प्रियं रिपो अग्रं पदं
वेः पाति यह्वश्चरणं सूर्यस्य। पाति नाभा सप्तशीर्षाणमग्निः
पाति देवानामुपमादमृष्वः ॥५॥२४॥ ऋभुश्चक्र ईड्यं चारु
नाम विश्वानि देवो वयुनानि विद्वान्। ससस्य चर्म घृतवत्पदं
वेस्तदिदग्नी रक्षत्यप्रयुच्छन् ॥६॥ आ योनिमग्निर्घृतवंतमस्था-
त्पृथुप्रगाणमुशंतमुशानः। दीद्यानः शुचिरृष्वः पावकः पु-
नःपुनर्मातरा नव्यसी कः ॥७॥ सद्यो जात ओषधीभिर्ववक्षे
यदी वर्धंति प्रस्वो घृतेन। आप इव प्रवता शुंभमाना उरु-
ष्यदग्निः पित्रोरुपस्थे ॥८॥ उदु ष्टुतः समिधा यह्वो अद्यौद्वर्ष्म-
न्दिवो अधि नाभा पृथिव्याः। मित्रो अग्निरीड्यो मातरिश्वा
दूतो वक्षद्यजथाय देवान् ॥९॥ उदस्तंभीत्समिधा नाकमृ-
ष्वो३ग्निर्भवन्नुत्तमो रोचनानां। यदी भृगुभ्यः परि मातरिश्वा
गुहा संतं हव्यवाहं समीधे ॥१०॥ इळामग्ने पुरुदंसं सनिं
गोः शश्वत्तमं हवमानाय साध। स्यान्नः सूनुस्तनयो विजा-
वाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥२५॥

॥ ६ ॥ १–११ विश्वामित्रः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥६॥ प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देव-
यंतः। दक्षिणावाड्वाजिनी प्राच्येति हविर्भरंत्यग्नये घृताची
॥१॥ आ रोदसी अपृणा जायमान उत प्र रिक्था अध नु
प्रयज्यो। दिवश्चिदग्ने महिना पृथिव्या वच्यंतां ते वह्नयः सप्त-

जिह्वाः ॥२॥ द्यौश्च॑ त्वा पृथि॒वी य॒ज्ञिया॑सो॒ नि होता॑रं सा-
दयंते॒ दमा॑य। यदी॒ विशो॒ मानु॑षीर्देव॒यंती॒ः प्रय॑स्वती॒रीळ॑ते
शु॒क्रम॒र्चिः ॥३॥ म॒हान्स॒धस्थे॑ ध्रु॒व आ निष॑त्तो॒ऽन्तर्द्यावा॒
माहि॑ने॒ हर्य॑माणः। आस्क्रे॑ स॒पत्नी॑ अ॒जरे॒ अमृ॑क्ते सब॒र्दुघे॑
उरुगा॒यस्य॑ धे॒नू ॥४॥ व्र॒ता ते॑ अग्ने मह॒तो म॒हानि॒ तव॒ क्रत्वा॒
रोद॑सी॒ आ त॑तंथ। त्वं दू॒तो अ॑भवो॒ जाय॑मान॒स्त्वं ने॒ता वृ॑षभ
चर्षणी॒नां ॥५॥२६॥ ऋ॒तस्य॑ वा के॒शिना॑ यो॒ग्याभि॑र्घृत॒स्नुवा॒
रोहि॑ता धु॒रि धि॑ष्व। अथा॑ व॑ह दे॒वान्दे॑व॒ विश्वा॒न्त्स्वध्व॒रा
कृ॑णुहि जातवेदः ॥६॥ दि॒वश्चि॑दा ते॑ रुचयंत रो॒का उ॒षो
वि॑भा॒तीरनु॑ भासि पू॒र्वीः। अपो॑ यद॑ग्न उ॒शध॒ग्वने॑षु होतु॑-
र्मं॒द्रस्य॑ पनयंत दे॒वाः ॥७॥ उ॒रौ वा॒ ये अं॒तरि॑क्षे॒ मदं॑ति दि॒वो
वा॒ ये रो॑च॒ने संति॑ दे॒वाः। ऊमा॑ वा॒ ये सु॒हवा॑सो॒ यज॑त्रा
आ॑येमि॒रे र॒थ्यो॑ अग्ने॒ अश्वाः॑ ॥८॥ ऐभि॑रग्ने स॒रथं॑ याह्य॒र्वाङ्
ना॑नार॒थं वा॑ वि॒भवो॒ ह्यश्वाः॑। पत्नी॑वतस्त्रिं॒शतं॒ त्रींश्च॑ दे॒वा-
न॑नुष्व॒धमा व॑ह मा॒दय॑स्व ॥९॥ स होता॒ यस्य॒ रोद॑सी चि-
दु॒र्वी य॒ज्ञंय॑ज्ञम॒भि वृ॒धे गृ॑णी॒तः। प्राची॑ अध्व॒रेव॑ तस्थतुः
सु॒मेके॑ ऋ॒तावरी॑ ऋ॒तजा॑तस्य स॒त्ये ॥१०॥ इळा॑मग्ने पुरु॒दंसं॑
स॒निं गोः श॑श्वत्त॒मं हव॑मानाय साध। स्यान्नः॑ सू॒नुस्तन॑यो
वि॒जावा॑ग्ने॒ सा ते॑ सुम॒तिर्भू॑त्व॒स्मे ॥११॥२७॥८॥२॥

॥ ७ ॥ १–११ विश्वामित्रः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७॥ प्र य आ॒रुः शि॑तिपृ॒ष्ठस्य॑ धा॒सेरा मा॒तरा॑ विविशुः
स॒प्त वाणीः॑। प॒रि॒क्षिता॑ पि॒तरा॒ सं च॑रेते॒ प्र स॑स्राते दी॒र्घमायुः॑
प्र॒यक्षे॑ ॥१॥ दि॒वक्ष॑सो धे॒नवो॒ वृष्णो॒ अश्वा॑ दे॒वीरा त॑स्थौ मधु॑-
म॒द्वहं॑तीः। ऋ॒तस्य॑ त्वा॒ सद॑सि क्षेम॒यंतं॒ पर्येका॑ चरति वर्त॒-

निं गौः ॥२॥ आ सीमरोहत्सुयमा भवंतीः पतिश्चिकित्वान्रयि-
विद्रयीणां । प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्र-
तीकः ॥३॥ महि त्वाष्ट्रमूर्जयंतीरजुर्यं स्तभूयमानं वहतो वहंति ।
व्यंगेभिर्दिद्युतानः सधस्थ एकामिव रोदसी आ विवेश ॥४॥
जानंति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणंति । दि-
वोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः
॥५॥१॥ उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयंत
शूषं । उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम जरितुर्ववक्ष ॥६॥
अध्वर्युभिः पंचभिः सप्त विप्राः प्रियं रक्षंते निहितं पदं वेः ।
प्रांचो मदंत्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ॥७॥
दैव्या होतारा प्रथमा न्यृंजे सप्त पृक्षासः स्वधया मदंति । ऋतं
शंसंत ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः ॥८॥ वृषायंते
महे अत्याय पूर्वीर्वृष्णे चित्राय रश्मयः सुयामाः । देव होतर्मं-
द्रतरश्चिकित्वान्महो देवान्रोदसी एह वक्षि ॥९॥ पृक्षप्रयजो
द्रविणः सुवाचः सुकेतव उषसो रेवदूषुः । उतो चिदग्ने महिना
पृथिव्याः कृतं चिदेनः सं महे दशस्य ॥१०॥ इळामग्ने पुरुदंसं
सनिं गोः शश्वत्तमं हवमानाय साध । स्यान्नः सूनुस्तनयो वि-
जावाग्ने सा ते सुमतिर्भूत्वस्मे ॥११॥२॥

॥ ८ ॥ १–११ विश्वामित्रः ॥ १–५ यूपः । ६.७.९.१० यूपाः । ८ विश्वे देवा यूपा वा ।
११ छिन्नयूपस्य मूलभूतः स्थाणुः ॥ १.२.४–६.८–११ त्रिष्टुप् । ३.७ अनुष्टुप् ॥

॥८॥ अंजंति त्वामध्वरे देवयंतो वनस्पते मधुना दैव्येन ।
यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे
॥१॥ समिद्धस्य श्रयमाणः पुरस्ताद्ब्रह्म वन्वानो अजरं सु-
वीरं । आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभ-

गाय ॥२॥ उच्छ्रयस्व वनस्पते वर्ष्मन्पृथिव्या अधि । सुमिती मीयमानो वर्चो धा यज्ञवाहसे ॥३॥ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः । तं धीरासः कवय उन्नयंति स्वाध्यो३ मनसा देवयंतः ॥४॥ जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः । पुनंति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचं ॥५॥३॥ यान्वो नरो देवयंतो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष । ते देवासः स्वरवस्तस्थिवांसः प्रजावदस्मे दिधिषंतु रत्नं ॥६॥ ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः । ते नो व्यंतु वार्यं देवत्रा क्षेत्रसाधसः ॥७॥ आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अंतरिक्षं । सजोषसो यज्ञमवंतु देवा ऊर्ध्वं कृण्वंत्वध्वरस्य केतुं ॥८॥ हंसा इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः । उन्नीयमानाः कविभिः पुरस्ताद्देवा देवानामपि यंति पाथः ॥९॥ शृंगाणीवेच्छृंगिणां सं ददृश्रे चषालवंतः स्वरवः पृथिव्यां । वाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवंतु पृतनाज्येषु ॥१०॥ वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम । यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥११॥४॥

॥ ९ ॥ १–९ विश्वामित्रः ॥ अग्निः ॥ १–८ बृहती । ९ त्रिष्टुप् ॥

॥९॥ सखायस्त्वा ववृमहे देवं मर्तास ऊतये । अपां नपातं सुभगं सुदीदितिं सुप्रतूर्तिमनेहसं ॥१॥ कायमानो वना त्वं यन्मातॄरजगन्नपः । न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः ॥२॥ अति तृष्टं ववक्षिथाथैव सुमना असि । प्रप्रान्ये यंति पर्यन्य आसते येषां सख्ये असि श्रितः ॥३॥ ईयि-

वांसमति स्रिधः शश्वतीरति सश्चतः। अन्वीमविंदन्निचिरासो अद्रुहो अप्सु सिंहमिव श्रितं ॥४॥ ससृवांसमिव त्मनाग्निमित्था तिरोहितं। ऐनं नयन्मातरिश्वा परावतो देवेभ्यो मथितं परि ॥५॥५॥ तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन। विश्वान्यद्यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य ॥६॥ तद्भद्रं तव दंसना पाकाय चिच्छदयति। त्वां यदग्ने पशवः समासते समिद्धमपिशर्वरे ॥७॥ आ जुहोता स्वध्वरं शीरं पावकशोचिषं। आशुं दूतमजिरं प्रत्नमीड्यं श्रुष्टी देवं सपर्यत ॥८॥ त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्। औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयंत ॥९॥६॥

॥१०॥ १–९ विश्वामित्रः ॥ अग्निः ॥ उष्णिक् ॥

॥१०॥ त्वामग्ने मनीषिणः सम्राजं चर्षणीनां। देवं मर्तास इंधते समध्वरे ॥१॥ त्वां यज्ञेष्वृत्विजमग्ने होतारमीळते। गोपा ऋतस्य दीदिहि स्वे दमे ॥२॥ स घा यस्ते ददाशति समिधा जातवेदसे। सो अग्ने धत्ते सुवीर्यं स पुष्यति ॥३॥ स केतुरध्वराणामग्निर्देवेभिरा गमत्। अंजानः सप्त होतृभिर्हविष्मते ॥४॥ प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत्। विपां ज्योतींषि बिभ्रते न वेधसे ॥५॥७॥ अग्निं वर्धंतु नो गिरो यतो जायत उक्थ्यः। महे वाजाय द्रविणाय दर्शतः ॥६॥ अग्ने यजिष्ठो अध्वरे देवान्देवयते यज। होता मंद्रो वि राजस्यति स्रिधः ॥७॥ स नः पावक दीदिहि द्युमदस्मे सुवीर्यं। भवा स्तोतृभ्यो अंतमः स्वस्तये ॥८॥ तं त्वा विप्रा विपन्यवो जागृवांसः समिंधते। हव्यवाहममर्त्यं सहोवृधं ॥९॥८॥

॥ ११ ॥ १–९ विश्वामित्रः ॥ अग्निः ॥ गायत्री ॥

॥११॥ अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः। स वेद यज्ञ-
मानुषक् ॥१॥ स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः। अग्निर्धि-
या समृण्वति ॥२॥ अग्निर्धिया स चेतति केतुर्यज्ञस्य पूर्व्यः। अर्थं
ह्यस्य तरणि ॥३॥ अग्निं सूनुं सनश्रुतं सहसो जातवेदसं। वह्निं
देवा अकृण्वत ॥४॥ अदाभ्यः पुरएता विशामग्निर्मानुषीणां।
तूर्णी रथः सदा नवः ॥५॥९॥ साह्वान्विश्वा अभियुजः क्रतुर्देवा-
नाममृक्तः। अग्निस्तुविश्रवस्तमः ॥६॥ अभि प्रयांसि वाहसा
दाश्वाँ अश्नोति मर्त्यः। क्षयं पावकशोचिषः ॥७॥ परि विश्वानि
सुधिताग्नेरश्याम मन्मभिः। विप्रासो जातवेदसः ॥८॥ अग्ने
विश्वानि वार्या वाजेषु सनिषामहे। त्वे देवास एरिरे ॥९॥१०॥

॥ १२ ॥ १–९ विश्वामित्रः ॥ इंद्राग्नी ॥ गायत्री ॥

॥१२॥ इंद्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यं। अस्य पातं
धियेषिता ॥१॥ इंद्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः।
अया पातमिमं सुतं ॥२॥ इंद्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे।
ता सोमस्येह तृंपतां ॥३॥ तोशा वृत्रहणा हुवे सजित्वानाप-
राजिता। इंद्राग्नी वाजसातमा ॥४॥ प्र वामर्चत्युक्थिनो नी-
थाविदो जरितारः। इंद्राग्नी इष आ वृणे ॥५॥११॥ इंद्राग्नी नवतिं
पुरो दासपत्नीरधूनुतं। साकमेकेन कर्मणा ॥६॥ इंद्राग्नी अपस-
स्पर्युप प्र यंति धीतयः। ऋतस्य पथ्या३ अनु ॥७॥ इंद्राग्नी तवि-
षाणि वां सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितं ॥८॥ इंद्राग्नी
रोचना दिवः परि वाजेषु भूषथः। तद्वां चेति प्र वीर्यं ॥९॥१२॥१॥

॥ १३ ॥ १–७ ॥ ऋषभो वैश्वामित्रः ॥ अग्निः ॥ अनुष्टुप् ॥

॥१३॥ प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै। गमद्देवेभिरा

स नो यजिष्ठो बर्हिरा सदत् ॥१॥ ऋतावा यस्य रोदसी दक्षं सचंत ऊतयः । हविष्मंतस्तमीळते तं सनिष्यंतोऽवसे ॥२॥ स यंता विप्र एषां स यज्ञानामथा हि षः । अग्निं तं वो दुवस्यत दाता यो वनिता मघं ॥३॥ स नः शर्माणि वीतयेऽग्निर्यच्छतु शंतमा । यतो नः प्रुष्णवद्वसु दिवि क्षितिभ्यो अप्स्वा ॥४॥ दीदिवांसमपूर्व्यं वस्वीभिरस्य धीतिभिः । ऋक्वाणो अग्निमिंधते होतारं विश्पतिं विशां ॥५॥ उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः । शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातमः ॥६॥ नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु । द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितं ॥७॥१३॥

॥ १४ ॥ १–७ ऋषभो वैश्वामित्रः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१४॥ आ होता मंद्रो विदथान्यस्थात्सत्यो यज्वा कवितमः स वेधाः । विद्युद्रथः सहसस्पुत्रो अग्निः शोचिष्केशः पृथिव्यां पाजो अश्रेत् ॥१॥ अयामि ते नमउक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः । विद्वाँ आ वक्षि विदुषो नि षत्सि मध्य आ बर्हिरूतये यजत्र ॥२॥ द्रवतां त उषसा वाजयंती अग्ने वातस्य पथ्याभिरच्छ । यत्सीमंजंति पूर्व्यं हविर्भिरा वंधुरेव तस्थतुर्दुरोणे ॥३॥ मित्रश्च तुभ्यं वरुणः सहस्वोऽग्ने विश्वे मरुतः सुम्नमर्चन् । यच्छोचिषा सहसस्पुत्र तिष्ठा अभि क्षितीः प्रथयन्त्सूर्यो नॄन् ॥४॥ वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य । यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥५॥ त्वद्धि पुत्र सहसो वि पूर्वीर्देवस्य यंत्यूतयो वि वाजाः । त्वं देहि सहस्रिणं रयिं नोऽद्रोघेण वचसा सत्यमग्ने ॥६॥ तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे

अकर्मे। त्वं विश्वस्य सुरथस्य बोधि सर्वं तदग्ने अमृत स्वदेह ॥७॥१४॥

॥ १५ ॥ १–७ उत्कीलः कात्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१५॥ वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः। सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ ॥१॥ त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः। जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात ॥२॥ त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि। वसो नेषि च पर्षि चात्यंहः कृधी नो राय उशिजो यविष्ठ ॥३॥ अषाळ्हो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा संजिगीवान्। यज्ञस्य नेता प्रथमस्य पायोर्जातवेदो बृहतः सुप्रणीते ॥४॥ अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः। रथो न सस्निरभि वक्षि वाजमग्ने त्वं रोदसी नः सुमेके ॥५॥ प्र पीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे। देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात् ॥६॥ इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध। स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥७॥१५॥

॥ १६ ॥ १–६ उत्कीलः कात्यः ॥ अग्निः ॥ १.३.५ बृहती। २.४.६ सतोबृहती ॥

॥ १६ ॥ अयमग्निः सुवीर्यस्येशे महः सौभगस्य। राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानां ॥१॥ इमं नरो मरुतः सश्चता वृधं यस्मिन्रायः शेवृधासः। अभि ये संति पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः ॥२॥ स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य। तुविद्युम्न वर्षिष्ठस्य प्रजावतोऽनमीवस्य

शुष्मिणः ॥३॥ चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वा दुवः । आ देवेषु यतत आ सुवीर्य आ शंस उत नृणां ॥४॥ मा नो अग्नेऽमतये मावीरतायै रीरधः । मागोतायै सहसस्पुत्र मा निदेऽप द्वेषांस्या कृधि ॥५॥ शग्धि वाजस्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे । सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ॥६॥१६॥

॥ १७ ॥ १–५ कतो वैश्वामित्रः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१७॥ समिध्यमानः प्रथमानु धर्मा समक्तुभिरज्यते विश्ववारः । शोचिष्केशो घृतनिर्णिक्पावकः सुयज्ञो अग्निर्यजथाय देवान् ॥१॥ यथायजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश्चिकित्वान् । एवानेन हविषा यक्षि देवान्मनुष्वद्यज्ञं प्र तिरेममद्य ॥२॥ त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने । ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः ॥३॥ अग्निं सुदीतिं सुदृशं गृणंतो नमस्यामस्त्वेड्यं जातवेदः । त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिं ॥४॥ यस्त्वद्धोता पूर्वो अग्ने यजीयान्द्विता च सत्ता स्वधया च शंभुः । तस्यानु धर्म प्र यजा चिकित्वोऽथा नो धा अध्वरं देववीतौ ॥५॥१७॥

॥ १८ ॥ १–५ कतो वैश्वामित्रः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१८॥ भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः । पुरुद्रुहो हि क्षितयो जनानां प्रति प्रतीचीर्दहतादरातीः ॥१॥ तपो ष्वग्ने अंतरॉं अमित्रॉं तपा शंसमररुषः परस्य । तपो वसो चिकितानो अचित्तान्वि ते तिष्ठंतामजरा अयासः ॥२॥ इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं

तरसे बलाय। यावदीशे ब्रह्मणा वंदमान इमां धियं शत-
सेयाय देवी ॥३॥ उच्छोचिषा सहसस्पुत्र स्तुतो बृहद्वयः
शशमानेषु धेहि। रेवदग्ने विश्वामित्रेषु शं योर्मर्मृज्मा ते
तन्वं१भूरि कृत्वः॥४॥ कृधि रत्नं सुसनितर्धनानां स घेदग्ने
भवसि यत्समिद्धः। स्तोतुर्दुरोणे सुभगस्य रेवत्सृप्रा करस्ना
दधिषे वपूंषि॥५॥१८॥

॥१९॥ १–५ गाथी ॥ अग्निः ॥ त्रिष्टुप्॥

॥१९॥ अग्निं होतारं प्र वृणे मियेधे गृत्सं कविं विश्ववि-
दममूरं। स नो यक्षद्देवताता यजीयान्राये वाजाय वनते
मघानि॥१॥ प्र ते अग्ने हविष्मतीमियर्म्यच्छा सुद्युम्नां रा-
तिनीं घृताचीं। प्रदक्षिणिद्देवतातिमुराणः सं रातिभिर्वसु-
भिर्यज्ञमश्रेत्॥२॥ स तेजीयसा मनसा त्वोत उत शिक्ष
स्वपत्यस्य शिक्षोः। अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते
सुष्टुतयश्च वस्वः॥३॥ भूरीणि हि त्वे दधिरे अनीकाग्ने देवस्य
यज्यवो जनासः। स आ वह देवतातिं यविष्ठ शर्धो यदद्य
दिव्यं यजासि॥४॥ यत्त्वा होतारमनजन्मियेधे निषादयंतो
यजथाय देवाः। स त्वं नो अग्नेऽवितेह बोध्यधि श्रवांसि
धेहि नस्तनूषु॥५॥१९॥

॥२०॥ १–५ गाथी ॥ १,५ विश्वे देवाः। २–४ अग्निः ॥ त्रिष्टुप्॥

॥२०॥ अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः।
सुज्योतिषो नः शृण्वंतु देवाः सजोषसो अध्वरं वावशानाः
॥१॥ अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतं-
जात पूर्वीः। तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो
अप्रयुच्छन्॥२॥ अग्ने भूरीणि तव जातवेदो देव स्वधावो-

ऽमृतस्य नाम। याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः
पृष्टबंधो ॥३॥ अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा
ऋतावा। स वृत्रहा सनयो विश्ववेदाः पर्षद्विश्वाति दुरिता गृणंतं
॥४॥ दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवं। अ-
श्विना मित्रावरुणा भगं च वसून्रुद्राँ आदित्याँ इह हुवे ॥५॥२०॥

॥ २१ ॥ १–५ गाथी ॥ अग्निः ॥ १. ४ त्रिष्टुप्। २.३ अनुष्टुप्। ५ विराड्रूपा सतोबृहती ॥

॥२१॥ इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व।
स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य
॥१॥ घृतवंतः पावक ते स्तोकाः श्चोतंति मेदसः। स्वधर्मन्देव-
वीतये श्रेष्ठं नो धेहि वार्यं ॥२॥ तुभ्यं स्तोका घृतश्चुतोऽग्ने वि-
प्राय संत्य। ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भव ॥३॥
तुभ्यं श्चोतंत्यध्रिगो शचीवः स्तोकासो अग्ने मेदसो घृतस्य।
कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर ॥४॥
ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे। श्चोतंति ते
वसो स्तोका अधि त्वचि प्रति तान्देवशो विहि ॥५॥२१॥

॥ २२ ॥ १–५ गाथी ॥ पुरीष्या अग्नयः ॥ १–३. ५ त्रिष्टुप्। ४ अनुष्टुप् ॥

॥ २२ ॥ अयं सो अग्निर्यस्मिन्त्सोममिंद्रः सुतं दधे जठरे
वावशानः। सहस्रिणं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे
जातवेदः ॥१॥ अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्व-
प्स्वा यजत्र। येनांतरिक्षमुर्वाततंथ त्वेषः स भानुरर्णवो नृ-
चक्षाः ॥२॥ अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे
धिष्ण्या ये। या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपति-
ष्ठंत आपः ॥३॥ पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः। जु-

षंतां यज्ञमद्रुहोऽनमीवा इषो महीः ॥४॥ इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥५॥२२॥

॥२३॥ १–५ देवश्रवा देववातश्च भारतौ ॥ अग्निः ॥ १.२.४.५ त्रिष्टुप् । ३ सतोबृहती ॥

॥२३॥ निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता । जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदाः ॥१॥ अमंथिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षं । अग्ने वि पश्य बृहताभि रायेषां नो नेता भवतादनु द्यून् ॥२॥ दश क्षिपः पूर्व्यं सीमजीजनन्सुजातं मातृषु प्रियं । अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद्वशी ॥३॥ नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नां । दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि ॥४॥ इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥५॥२३॥

॥ २४ ॥ १–५ विश्वामित्रः ॥ अग्निः ॥ १ अनुष्टुप् । २–४ गायत्री ॥

॥२४॥ अग्ने सहस्व पृतना अभिमातीरपास्य । दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसे ॥१॥ अग्न इळा समिध्यसे वीतिहोत्रो अमर्त्यः । जुषस्व सू नो अध्वरं ॥२॥ अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत । एदं बर्हिः सदो मम ॥३॥ अग्ने विश्वेभिरग्निभिर्देवेभिर्महया गिरः । यज्ञेषु य उ चायवः ॥४॥ अग्ने दा दाशुषे रयिं वीरवंतं परीणसं । शिशीहि नः सूनुमतः ॥५॥२४॥

॥ २५ ॥ १–५ विश्वामित्रः ॥ १–३.५ अग्निः । ४ इंद्राग्नी ॥ विराट् ॥

॥२५॥ अग्ने दिवः सूनुरसि प्रचेतास्तना पृथिव्या उत विश्ववेदाः । ऋधग्देवाँ इह यजा चिकित्वः ॥१॥ अग्निः सनोति

वीर्याणि विद्वान्त्सनोति वाजममृताय भूषन् । स नो देवाँ
एह वह पुरुक्षो ॥२॥ अग्निर्द्यावापृथिवी विश्वजन्ये आ भाति
देवी अमृते अमूरः । क्षयन्वाजैः पुरुश्चंद्रो नमोभिः ॥३॥ अग्न
इंद्रश्च दाशुषो दुरोणे सुतावतो यज्ञमिहोप यातं । अमर्धंता
सोमपेयाय देवा ॥४॥ अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो
सहसो जातवेदः । सधस्थानि महयमान ऊती ॥५॥२५॥

॥ २६ ॥ १–६. ८. ९ विश्वामित्रः । ७ आत्मा ॥ १–३ वैश्वानरः । ४–६ मरुतः ।
७. ८ अग्निरात्मा वा । ९ विश्वामित्रोपाध्यायः ॥ १–६ जगती । ७–९ त्रिष्टुप् ॥

॥२६॥ वैश्वानरं मनसाग्निं निचाय्या हविष्मंतो अनुषत्यं स्व-
र्विदं । सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे
॥१॥ तं शुभ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यं ।
बृहस्पतिं मनुषो देवतातये विप्रं श्रोतारमतिथिं रघुष्यदं ॥२॥
अश्वो न क्रंदञ्जनिभिः समिध्यते वैश्वानरः कुशिकेभिर्युगेयुगे ।
स नो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नममृतेषु जागृविः ॥३॥
प्र यंतु वाजास्तविषीभिरग्नयः शुभे संमिश्लाः पृषतीरयुक्षत ।
बृहदुक्षो मरुतो विश्ववेदसः प्र वेपयंति पर्वताँ अदाभ्याः ॥४॥
अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयं । ते
स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः
॥५॥२६॥ व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोज
ईमहे । पृषदश्वासो अनवभ्रराधसो गंतारो यज्ञं विदथेषु धीराः
॥६॥ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥७॥
त्रिभिः पवित्रैरपुपोद्ध्य१र्कं हृदा मतिं ज्योतिरनु प्रजानन् । व-
र्षिष्ठं रत्नमकृत स्वधाभिरादिद्द्यावापृथिवी पर्यपश्यत् ॥८॥ श-

तथा॑र॒मुत्स॒मक्षी॑यमाणं॒ विप॒श्चितं॒ पि॒तरं॒ वक्त्वा॑नां । मे॒ळिं मदं॑तं पि॒त्रोरु॒पस्थे॒ तं रो॑दसी पिपृतं स॒त्य॒वाचं॑ ॥ ९ ॥ २७ ॥

॥ २७ ॥ १–१५ विश्वामित्रः ॥ १ ऋतव ऋषिर्वा । २–१५ अग्निः ॥ गायत्री ॥

॥२७॥ प्र वो॒ वाजा॑ अ॒भिद्य॑वो ह॒विष्मं॑तो घृ॒ताच्या॑ । दे॒वा-ञ्जि॑गाति सुम्न॒युः ॥१॥ ईळे॑ अ॒ग्निं वि॑प॒श्चितं॒ गि॒रा य॒ज्ञस्य॒ साध॑नं । श्रु॒ष्टी॒वानं॑ धि॒तावा॑नं ॥२॥ अग्ने॑ श॒केम॑ ते व॒यं यमं॑ दे॒वस्य॑ वा॒-जिनः॑ । अति॒ द्वेषां॑सि तरेम ॥ ३ ॥ स॒मि॒ध्यमा॑नो अध्व॒रे॒३॒॑ग्निः पा॑व॒क ईड्यः॑ । शो॒चिष्के॑श॒स्तमी॑महे ॥४॥ पृ॒थु॒पाजा॒ अम॑र्त्यो घृ॒तनि॑र्णि॒क्स्वा॑हुतः । अ॒ग्निर्य॒ज्ञस्य॑ हव्य॒वाट् ॥५॥२८॥ तं स॒बाधो॑ य॒तस्रु॑च इ॒त्था धि॒या य॒ज्ञवं॑तः । आ च॑क्रुर॒ग्निमू॒तये॑ ॥६॥ होता॑ दे॒वो अम॑र्त्यः पु॒रस्ता॑देति मा॒यया॑ । वि॒दथा॑नि प्रचो॒दय॑न् ॥७॥ वा॒जी वाजे॑षु धीयतेऽध्व॒रेषु॒ प्र णी॑यते । विप्रो॑ य॒ज्ञस्य॒ साध॑नः ॥८॥ धि॒या च॑क्रे॒ वरे॑ण्यो भू॒तानां॒ गर्भ॒मा द॑धे । दक्ष॑स्य पि॒तरं॒ तना॑ ॥९॥ नि त्वा॑ दधे॒ वरे॑ण्यं॒ दक्ष॑स्ये॒ळा स॑हस्कृत । अग्ने॑ सु॒दी॒-तिमु॒शिजं॑ ॥ १० ॥ २९ ॥ अ॒ग्निं य॒न्तुरं॑म॒प्तुरं॑मृ॒तस्य॒ योगे॑ व॒नुषः॑ । विप्रा॒ वाजैः॒ समिं॑धते ॥११॥ ऊ॒र्जो नपा॑तमध्व॒रे दी॑दि॒वांस॒मुप॒ द्यवि॑ । अ॒ग्निमी॑ळे क॒विक्र॑तुं ॥१२॥ ई॒ळेन्यो॑ नम॒स्य॑स्ति॒रस्त॒-मांसि दर्श॒तः । सम॒ग्निरि॑ध्यते॒ वृषा॑ ॥१३॥ वृषो॑ अ॒ग्निः समि॑-ध्यते॒ऽश्वो॒ न दे॑व॒वाह॑नः । तं ह॒विष्मं॑त ईळते ॥१४॥ वृष॑णं त्वा व॒यं वृ॑षन्वृष॑णः॒ समि॑धीमहि । अग्ने॒ दीद्य॑तं बृ॒हत् ॥ १५ ॥ ३० ॥

॥ २८ ॥ १–६ विश्वामित्रः ॥ अग्निः ॥ १.२.६ गायत्री । ३ उष्णिक् । ४ त्रिष्टुप् । ५ जगती ॥

॥२८॥ अग्ने॑ जु॒षस्व॑ नो ह॒विः पु॑रो॒ळाशं॑ जातवेदः । प्रा॒तः॒सा॒वे धि॑यावसो ॥१॥ पु॒रो॒ळा अ॑ग्ने पच॒तस्तुभ्यं॑ वा घा॒ परि॑ष्कृतः । तं जु॑षस्व यविष्ठ्य ॥२॥ अग्ने॑ वी॒हि पु॑रो॒ळाश॒माहु॑तं ति॒रोअ॑ह्न्यं ।

सहसः सूनुरस्यध्वरे हितः ॥३॥ माध्यंदिने सवने जातवेदः पु-
रोळाशमिह कवे जुषस्व । अग्ने यह्वस्य तव भागधेयं न प्र
मिनंति विदथेषु धीराः ॥४॥ अग्ने तृतीये सवने हि कानिषः
पुरोळाशं सहसः सूनवाहुतं । अथा देवेष्वध्वरं विपन्यया धा
रत्नवंतममृतेषु जागृविं ॥५॥ अग्ने वृधान आहुतिं पुरोळाशं
जातवेदः । जुषस्व तिरोअह्न्यं ॥६॥३१॥

॥२९॥१–१६ विश्वामित्रः॥१–४.६–१६ अग्निः।५ ऋत्विज अग्निर्वा॥१.४.१०.१२
अनुष्टुप्।२.३.५.७–९.१३.१६ त्रिष्टुप्।६.११.१४.१५ जगती॥

॥२९॥ अस्तीदमधिमंथनमस्ति प्रजननं कृतं । एतां विश्प-
त्नीमा भराग्निं मंथाम पूर्वथा ॥१॥ अरण्योर्निहितो जातवेदा
गर्भ इव सुधितो गर्भिणीषु । दिवेदिव ईड्यो जागृवद्भिर्हविष्म-
द्भिर्मनुष्येभिरग्निः ॥२॥ उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवी-
ता वृषणं जजान । अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो
वयुनेऽजनिष्ट ॥३॥ इळायास्त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो नि धीमह्यग्ने हव्याय वोळ्हवे ॥४॥ मंथता नरः कवि-
मद्वयंतं प्रचेतसममृतं सुप्रतीकं । यज्ञस्य केतुं प्रथमं पुरस्तादग्निं
नरो जनयता सुशेवं ॥५॥३२॥ यदी मंथंति बाहुभिर्वि रोचते-
ऽश्वो न वाज्यरुषो वनेष्वा । चित्रो न याममश्विनोरनिवृतः
परि वृणक्त्यश्मनस्तृणा दहन् ॥६॥ जातो अग्नी रोचते चेकिता-
नो वाजी विप्रः कविशस्तः सुदानुः । यं देवास ईड्यं विश्वविदं ह-
व्यवाहमदधुरध्वरेषु ॥७॥ सीद होतः स्व उ लोके चिकित्वान्सा-
दया यज्ञं सुकृतस्य योनौ । देवावीर्देवान्हविषा यजास्यग्ने बृहद्य-
जमाने वयो धाः ॥८॥ कृणोत धूमं वृषणं सखायोऽस्रेधंत इतन
वाजमच्छ । अयमग्निः पृतनाषाट् सुवीरो येन देवासो असहंत

दस्यून् ॥९॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः।
तं जानन्नग्न आ सीदाथा नो वर्धया गिरः ॥१०॥३३॥ तनून-
पादुच्यते गर्भ आसुरो नराशंसो भवति यद्विजायते। मातरि-
श्वा यदमिमीत मातरि वातस्य सर्गो अभवत्सरीमणि ॥११॥
सुनिर्मथा निर्मथितः सुनिधा निहितः कविः। अग्ने स्वध्वरा
कृणु देवान्देवयते यज ॥१२॥ अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं
तरणिं वीळुजंभं। दश स्वसारो अग्रुवः समीचीः पुमांसं जा-
तमभि सं रभंते ॥१३॥ प्र सप्तहोता सनकादरोचत मातुरुपस्थे
यदशोचदूधनि। न नि मिषति सुरणो दिवेदिवे यदसुरस्य
जठरादजायत ॥१४॥ अमित्रायुधो मरुतामिव प्रयाः प्रथम-
जा ब्रह्मणो विश्वमिद्विदुः। द्युम्नवद्ब्रह्म कुशिकास एरिर ए-
कएको दमे अग्निं समीधिरे ॥१५॥ यदद्य त्वा प्रयति यज्ञे अ-
स्मिन्होतश्चिकित्वोऽवृणीमहीह। ध्रुवमया ध्रुवमुताशमिष्ठाः
प्रजानन्विद्वाँ उप याहि सोमं ॥१६॥३४॥१॥२॥

॥३०॥ १-२२ विश्वामित्रः॥ इंद्रः॥ त्रिष्टुप्॥

॥३०॥ इच्छंति त्वा सोम्यासः सखायः सुन्वंति सोमं दधति
प्रयांसि। तितिक्षंते अभिशस्तिं जनानामिंद्र त्वदा कश्चन हि
प्रकेतः ॥१॥ न ते दूरे परमा चिद्रजांस्या तु प्र याहि हरिवो
हरिभ्यां। स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः स-
मिधाने अग्नौ ॥२॥ इंद्रः सुशिप्रो मघवा तरुत्रो महाव्रात-
स्तुविकूर्मिर्ऋघावान्। यदुग्रो धा बाधितो मर्त्येषु क्व१त्या ते
वृषभ वीर्याणि ॥३॥ त्वं हि ष्मा च्यावयन्नच्युतान्येको वृत्रा
चरसि जिघ्नमानः। तव द्यावापृथिवी पर्वतासोऽनु व्रताय नि-

मिंतेव तस्थुः ॥४॥ उताभये पुरुहूत श्रवोभिरेको दृळ्हमवदो
वृत्रहा सन् । इमे चिदिंद्र रोदसी अपारे यत्संगृभ्णा मघवन्का-
शिरित्ते ॥५॥१॥ प्र सू त इंद्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृ-
णन्नेतु शत्रून् । जहि प्रतीचो अनूचः पराचो विश्वं सत्यं
कृणुहि विष्टमस्तु ॥६॥ यस्मै धायुरदधा मर्त्यायाभक्तं चिद्भजते
गेह्यं१ सः । भद्रा त इंद्र सुमतिर्घृताची सहस्रदाना पुरुहूत
रातिः ॥७॥ सहदानुं पुरुहूत क्षियंतमहस्तमिंद्र सं पिणक्कु-
णारुं । अभि वृत्रं वर्धमानं पियारुमपादमिंद्र तवसा जघंथ
॥८॥ नि सामनामिषिरामिंद्र भूमिं महीमपारां सदने ससत्थ ।
अस्तभ्नाद्द्यां वृषभो अंतरिक्षमर्षंत्वापस्त्वयेह प्रसूताः ॥९॥
अलातृणो वल इंद्र व्रजो गोः पुरा हंतोर्भयमानो व्यार ।
सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमंतीः
॥१०॥२॥ एको द्वे वसुमती समीची इंद्र आ पप्रौ पृथिवीमुत
द्यां । उतांतरिक्षादभि नः समीक इषो रथीः सयुजः शूर
वाजान् ॥११॥ दिशः सूर्यो न मिनाति प्रदिष्टा दिवेदिवे
हर्यश्वप्रसूताः । सं यदानळध्वन आदिदश्वैर्विमोचनं कृणुते
तत्त्वस्य ॥१२॥ दिदृक्षंत उषसो यामन्नक्तोर्विवस्वत्या महि
चित्रमनीकं । विश्वे जानंति महिना यदागादिंद्रस्य कर्म
सुकृता पुरूणि ॥१३॥ महि ज्योतिर्निहितं वक्षणास्वामा
पक्वं चरति बिभ्रती गौः । विश्वं स्वाद्म संभृतमुस्रियायां
यत्सीमिंद्रो अदधाद्भोजनाय ॥१४॥ इंद्र दृह्य यामकोशा अ-
भूवन्यज्ञाय शिक्ष गृणते सखिभ्यः । दुर्मायवो दुरेवा मर्त्यासो
निषंगिणो रिपवो हंत्वासः ॥१५॥३॥ सं घोषः शृण्वेऽवमैर-
मित्रैर्जही न्येष्वशनिं तपिष्ठां । वृश्चेमधस्तादि रुजा सहस्व

जहि रक्षो मघवन्रंधयस्व ॥ १६ ॥ उद्वृह रक्षः सहमूलमिंद्र वृश्चा मध्यं प्रत्यग्रं शृणीहि । आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य ॥ १७ ॥ स्वस्तये वाजिभिश्च प्रणेतः सं यन्महीरिष आसत्सि पूर्वीः । रायो वंतारो बृहतः स्यामास्मे अस्तु भग इंद्र प्रजावान् ॥ १८ ॥ आ नो भर भगमिंद्र द्युमंतं नि ते देष्णस्य धीमहि प्ररेके । ऊर्व इव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनां ॥ १९ ॥ इमं कामं मंदया गोभिरश्वैश्चंद्रवंता राधसा पप्रथश्च । स्वर्यवो मतिभिस्तुभ्यं विप्रा इंद्राय वाहः कुशिकासो अक्रन् ॥ २० ॥ आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यं सनयो यंतु वाजाः । दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यं सु मघवन्बोधि गोदाः ॥ २१ ॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ । शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥ २२ ॥ ४ ॥

॥ ३१ ॥ १–२२ विश्वामित्रः कुशिको वा ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ३१ ॥ शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् । पिता यत्र दुहितुः सेकमृंजन्सं शग्म्येन मनसा दधन्वे ॥ १ ॥ न जामये तान्वो रिक्थमारैक्चकार गर्भं सनितुर्निधानं । यदी मातरो जनयंत वह्निमन्यः कर्ता सुकृतोरन्य ऋंधन् ॥ २ ॥ अग्निर्जज्ञे जुह्वा३ रेजमानो महस्पुत्राँ अरुषस्य प्रयक्षे । महान्गर्भो मह्या जातमेषां मही प्रवृद्धर्यश्वस्य यज्ञैः ॥ ३ ॥ अभि जैत्रीरसचंत स्पृधानं महि ज्योतिस्तमसो निरजानन् । तं जानतीः प्रत्युदायन्नुषासः पतिर्गवामभवदेक इंद्रः ॥ ४ ॥ वीळौ सतीरभि धीरा अतृंदन्प्राचाहिन्वन्मनसा सप्त विप्राः । विश्वामविंदन्पथ्यामृतस्य प्र-

जानन्नित्था नमसा विवेश ॥५॥५॥ विदद्यदी सरमा रुग्ण-
मद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः । अग्रं नयत्सुपद्यक्षराणामच्छा
रवं प्रथमा जानती गात् ॥६॥ अगच्छदु विप्रतमः सखीयन्न-
सूदयत्सुकृते गर्भमद्रिः । ससान मर्यो युवभिर्मखस्यन्नथाभव-
दंगिराः सद्यो अर्चन् ॥ ७ ॥ सतःसतः प्रतिमानं पुरोभू-
र्विश्वा वेद जनिमा हंति शुष्णं । प्र णो दिवः पदवीर्गव्यु-
रर्चन्त्सखा सखींरमुंचन्निरवद्यात् ॥ ८ ॥ नि गव्यता मनसा
सेदुरर्कैः कृण्वानासो अमृतत्वाय गातुं । इदं चिन्नु सदनं
भूर्येषां येन मासाँ असिषासन्नृतेन ॥ ९ ॥ संपश्यमाना
अमदन्नभि स्वं पयः प्रत्नस्य रेतसो दुघानाः । वि रोदसी
अतपद्घोष एषां जाते निःष्ठामदधुर्गोषु वीरान् ॥ १० ॥ ६ ॥
स जातेभिर्वृत्रहा सेदु हव्यैरुदुस्रिया असृजदिंद्रो अर्कैः ।
उरूच्यस्मै घृतवद्भरंती मधु स्वाद्म दुदुहे जेन्या गौः ॥ ११ ॥
पित्रे चिच्चक्रुः सदनं समस्मै महि त्विषीमत्सुकृतो वि
हि ख्यन् । विष्कभ्नंतः स्कंभनेना जनित्री आसीना ऊर्ध्वं
रभसं वि मिन्वन् ॥ १२ ॥ मही यदि धिषणा शिश्नथे धात्स-
द्योवृधं विभ्वं रोदस्योः । गिरो यस्मिन्ननवद्याः समीची-
र्विश्वा इंद्राय तविषीरनुत्ताः ॥ १३ ॥ मह्या ते सख्यं वश्मि
शक्तीरा वृत्रघ्ने नियुतो यंति पूर्वीः । महि स्तोत्रमव
आगन्म सूरेरस्माकं सु मघवन्बोधि गोपाः ॥ १४ ॥ महि
क्षेत्रं पुरु श्चंद्रं विविद्वानादित्सखिभ्यश्चरथं समैरत् । इंद्रो
नृभिरजनद्दीद्यानः साकं सूर्यमुषसं गातुमग्निं ॥ १५ ॥ ७ ॥
अपश्चिदेष विभ्वो३दमूनाः प्र सध्रीचीरसृजद्विश्वश्चंद्राः ।
मध्वः पुनानाः कविभिः पवित्रैर्द्युभिर्हिन्वंत्यक्तुभिर्धनुत्रीः

॥१६॥ अनु॑ कृ॒ष्णे वसु॑धिती जिहाते उ॒भे सूर्य॑स्य मं॒हना॒ यज॑त्रे । परि॒ यत्ते॑ महि॒मानं॑ वृ॒जध्यै॒ सखा॑य इंद्र॒ काम्या॑ ऋजि॒प्याः ॥१७॥ पति॑र्भव वृत्रहन्त्सू॒नृता॑नां गि॒रां वि॒श्वायु॑र्वृष॒भो व॑यो॒धाः । आ नो॑ गहि स॒ख्येभिः॑ शि॒वेभि॑र्म॒हान्म॒हीभि॑रू॒तिभिः॑ सर॒ण्यन् ॥१८॥ तमं॑गिर॒स्वन्नम॑सा स॒पर्य॒न्नव्यं॑ कृणोमि॒ सन्य॑से पुरा॒जां । द्रुहो॒ वि या॑हि बहु॒ला अदे॑वीः॒ स्व॑श्च नो मघवन्त्सा॒तये॑ धाः ॥१९॥ मि॒हः पा॑व॒काः प्रत॑ता अभूवन्त्स्व॒स्ति नः॑ पिपृहि पा॒रमा॑सां । इंद्र॒ त्वं र॑थि॒रः पा॑हि नो रि॒षो म॒क्षूम॑क्षू कृणुहि गो॒जितो॑ नः ॥२०॥ अदे॑दिष्ट वृत्र॒हा गोप॑ति॒र्गा अं॒तः कृ॒ष्णाँ अ॑रु॒षैर्धाम॑भिर्गात् । प्र सू॒नृता॑ दि॒शमा॑न ऋ॒तेन॒ दुर॑श्च॒ विश्वा॑ अवृणो॒दप॒ स्वाः ॥२१॥ शु॒नं हु॑वेम म॒घवा॑नमिं॒द्रम॒स्मिन्भरे॒ नृत॑मं॒ वाज॑सातौ । शृ॒ण्वंत॑मु॒ग्रमू॒तये॑ स॒मत्सु॒ घ्नंतं॑ वृ॒त्राणि॑ सं॒जितं॒ धना॑नां ॥ २२ ॥ ८ ॥

॥ ३२ ॥ १–१७ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३२॥ इंद्र॒ सोमं॑ सोमपते॒ पिबे॒मं माध्यं॑दिनं॒ सव॑नं॒ चारु॒ यत्ते॑ । प्र॒प्रुथ्या॒ शिप्रे॑ मघवन्नृजीषिन्वि॒मुच्या॒ हरी॑ इ॒ह मा॑दयस्व ॥१॥ ग॒वाशि॑रं म॒न्थिन॑मिंद्र शु॒क्रं पिबा॒ सोमं॑ ररि॒मा ते॒ मदा॑य । ब्र॒ह्म॒कृता॒ मारु॑तेना ग॒णेन॑ स॒जोषा॑ रु॒द्रैस्तृ॒पदा वृ॑षस्व ॥२॥ ये ते॒ शुष्मं॒ ये तवि॑षी॒मव॑र्ध॒न्नर्च॑त इंद्र म॒रुत॑स्त॒ ओजः॑ । माध्यं॑दिने॒ सव॑ने वज्रहस्त॒ पिबा॑ रु॒द्रेभिः॒ सग॑णः सुशिप्र ॥३॥ त इन्न्व॑स्य॒ मधु॑मद्विविप्र॒ इंद्र॑स्य॒ शर्धो॑ म॒रुतो॒ य आस॑न् । येभि॑र्वृ॒त्रस्ये॑षि॒तो वि॒वेदा॑म॒र्मणो॒ मन्य॑मानस्य॒ मर्म॑ ॥४॥ म॒नु॒ष्वदिं॑द्र॒ सव॑नं जुषा॒णः पिबा॒ सोमं॒ शश्व॑ते वी॒र्या॑य । स आ व॑वृत्स्व हर्यश्व य॒ज्ञैः स॑र॒ण्युभि॑र॒पो अर्णा॑ सिसर्षि ॥५॥९॥ त्वम॒पो यद्ध॒

वृत्रं जघन्वाँ अत्याँ इव प्रासृजः सर्तवाजौ । शयानमिंद्र
चरता वधेन वव्रिवांसं परि देवीरदेवं ॥६॥ यजाम इन्नमसा
वृद्धमिंद्रं बृहंतमृष्वमजरं युवानं । यस्य प्रिये ममतुर्यज्ञियस्य
न रोदसी महिमानं ममाते ॥७॥ इंद्रस्य कर्म सुकृता पुरूणि
व्रतानि देवा न मिनंति विश्वे । दाधार यः पृथिवीं द्या-
मुतेमां जजान सूर्यमुषसं सुदंसाः ॥८॥ अद्रोघ सत्यं तव
तन्महित्वं सद्यो यज्जातो अपिबो ह सोमं । न द्याव इंद्र
तवसस्त ओजो नाहा न मासाः शरदो वरंत ॥९॥ त्वं सद्यो
अपिबो जात इंद्र मदाय सोमं परमे व्योमन् । यद्ध द्यावा-
पृथिवी आविवेशीरथाभवः पूर्व्यः कारुधायाः ॥१०॥१०॥
अहन्नहिं परिशयानमर्णं ओजायमानं तुविजात तव्यान् ।
न ते महित्वमनु भूदध द्यौर्यदन्यया स्फिग्या३ क्षामवस्थाः
॥११॥ यज्ञो हि त इंद्र वर्धनो भूदुत प्रियः सुतसोमो मियेधः ।
यज्ञेन यज्ञमव यज्ञियः सन्यज्ञस्ते वज्रमहिहत्य आवत् ॥१२॥
यज्ञेनेंद्रमवसा चक्रे अर्वागैनं सुम्नाय नव्यसे ववृत्यां । यः
स्तोमेभिर्वावृधे पूर्व्येभिर्यो मध्यमेभिरुत नूतनेभिः ॥१३॥
विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिंद्रमह्नः ।
अंहसो यत्र पीपरद्यथा नो नावेव यांतमुभये हवंते ॥१४॥
आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै ।
समु प्रिया आववृत्रन्मदाय प्रदक्षिणिदभि सोमास इंद्रं ॥१५॥
न त्वा गभीरः पुरुहूत सिंधुर्नाद्रयः परि षंतो वरंत । इत्था
सखिभ्य इषितो यदिंद्रा दृळ्हं चिदरुजो गव्यमूर्वं ॥१६॥ शुनं
हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ । शृण्वंतमु-
ग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥१७॥११॥

॥ ३३ ॥ १–१३ संवादो नदीभिर्विश्वामित्रस्य ॥ १–१२ त्रिष्टुप् । १३ अनुष्टुप् ॥

॥३३॥ प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ॥१॥
इंद्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः । समाराणे
ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे ॥२॥ अच्छा
सिंधुं मातृतमामयासं विपाशमुर्वीं सुभगामगन्म । वत्समिव
मातरा संरिहाणे समानं योनिमनु संचरंती ॥३॥ एना वयं
पयसा पिन्वमाना अनु योनिं देवकृतं चरंतीः । न वर्तवे
प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥४॥ रमध्वं मे
वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः । प्र सिंधुमच्छा बृहती
मनीषावस्युरह्वे कुशिकस्य सूनुः ॥५॥१२॥ इंद्रो अस्माँ अरद-
द्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनां । देवोऽनयत्सविता सुपा-
णिस्तस्य वयं प्रसवे याम उर्वीः ॥६॥ प्रवाच्यं शश्वधा वीर्यं१त-
दिंद्रस्य कर्म यदहिं विवृश्चत् । वि वज्रेण परिषदो जघाना-
यन्नापोऽयनमिच्छमानाः ॥७॥ एतद्वचो जरितर्मापि मृष्ठा
आ यत्ते घोषानुत्तरा युगानि । उक्थेषु कारो प्रति नो जुषस्व
मा नो नि कः पुरुषत्रा नमस्ते ॥८॥ ओ षु स्वसारः कारवे
शृणोत ययौ वो दूरादनसा रथेन । नि षू नमध्वं भवता सुपारा
अधोअक्षाः सिंधवः स्रोत्याभिः ॥९॥ आ ते कारो शृणवामा
वचांसि ययाथ दूरादनसा रथेन । नि ते नंसै पीप्यानेव
योषा मर्यायेव कन्या शश्वचै ते ॥१०॥१३॥ यदंग त्वा भरताः
संतरेयुर्गव्यन्ग्राम इषित इंद्रजूतः । अर्षादह प्रसवः सर्गतक्त
आ वो वृणे सुमतिं यज्ञियानां ॥११॥ अतारिषुर्भरता गव्यवः
समभक्त विप्रः सुमतिं नदीनां । प्र पिन्वध्वमिषयंतीः सुराधा

आ वक्षणाः पृणध्वं यात शीभं ॥१२॥ उद्व ऊर्मिः शम्या हंत्वापो योक्राणि मुंचत । मादुष्कृतौ व्येनसाघ्न्यौ शूनमारतां ॥१३॥१४॥

॥३४॥ १-११ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३४॥ इंद्रः पूर्भिदातिरद्दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून् । ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे ॥१॥ मखस्य ते तविषस्य प्र जूतिमियर्मि वाचममृताय भूषन् । इंद्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा ॥२॥ इंद्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः । अहन्व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणां ॥३॥ इंद्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः । प्रारोचयन्मनवे केतुमह्नामविदज्ज्योतिर्बृहते रणाय ॥४॥ इंद्रस्तुजो बर्हणा आ विवेश नृवद्दधानो नर्या पुरूणि । अचेतयद्धिय इमा जरित्रे प्रेमं वर्णमतिरच्छुक्रमासां ॥५॥१५॥ महो महानि पनयंत्यस्येंद्रस्य कर्म सुकृता पुरूणि । वृजनेन वृजिनान्सं पिपेष मायाभिर्दस्यूँरभिभूत्योजाः ॥६॥ युधेंद्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः । विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणंति ॥७॥ सत्रासाहं वरेण्यं सहोदां ससवांसं स्वरपश्च देवीः । ससान यः पृथिवीं द्यामुतेमामिंद्रं मदंत्यनु धीरणासः ॥८॥ ससानात्याँ उत सूर्यं ससानेंद्रः ससान पुरुभोजसं गां । हिरण्ययमुत भोगं ससान हत्वी दस्यून्प्रार्यं वर्णमावत् ॥९॥ इंद्र ओषधीरसनोदहानि वनस्पतींरसनोदंतरिक्षं । बिभेद वलं नुनुदे विवाचो-

ऽथाभवद्दमिताभिक्रतूनां ॥१०॥ शुनं हुवेम मघवानमिंद्रम-
स्मिन्भरे नृतमं वाजसातौ । शृण्वंतमुग्रमूतये समत्सु घ्नंतं
वृत्राणि संजितं धनानां ॥ ११ ॥ १६ ॥

॥ ३५ ॥ १-११ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३५॥ तिष्ठा हरी रथ आ युज्यमाना याहि वायुर्न नि-
युतो नो अच्छ । पिबास्यंधो अभिसृष्टो अस्मे इंद्र स्वाहा
ररिमा ते मदाय ॥१॥ उपाजिरा पुरुहूताय सप्ती हरी र-
थस्य धूर्ष्वा युनज्मि । द्रवद्यथा संभृतं विश्वतश्चिदुपेमं यज्ञमा
वहात इंद्रं ॥२॥ उपो नयस्व वृषणा तपुष्पोतेमव त्वं वृषभ
स्वधावः । ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि
धानाः ॥३॥ ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया स-
धमाद आशू । स्थिरं रथं सुखमिंद्राधितिष्ठन्प्रजानन्विद्वाँ उप
याहि सोमं ॥४॥ मा ते हरी वृषणा वीतपृष्ठा नि रीरम-
न्यजमानासो अन्ये । अत्यायाहि शश्वतो वयं तेऽरं सुतेभिः
कृणवाम सोमैः ॥५॥१७॥ तवायं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं
सुमना अस्य पाहि । अस्मिन्यज्ञे बर्हिष्या निषद्या दधिष्वेमं
जठर इंदुमिंद्र ॥६॥ स्तीर्णं ते बर्हिः सुत इंद्र सोमः कृता धा-
ना अत्तवे ते हरिभ्यां । तदोकसे पुरुशाकाय वृष्णे मरुत्वते
तुभ्यं राता हवींषि ॥७॥ इमं नरः पर्वतास्तुभ्यमापः समिंद्र
गोभिर्मधुमंतमक्रन् । तस्यागत्या सुमना ऋष्व पाहि प्रजा-
नन्विद्वान्पथ्या३अनु स्वाः ॥८॥ याँ आभजो मरुत इंद्र सो-
मे ये त्वामवर्धन्नभवन्गणस्ते । तेभिरेतं सजोषा वावशानो-
३ऽग्नेः पिब जिह्वया सोममिंद्र ॥९॥ इंद्र पिब स्वधया चि-
त्सुतस्याग्नेर्वा पाहि जिह्वया यजत्र । अध्वर्योर्वा प्रयतं शक्र

हस्ताद्धोतुर्वा यज्ञं हविषो जुषस्व ॥१०॥ शुनं हुवेम मघवा-
नमिंद्रमस्मिन्भरे नृतमं वाजसातौ । शृण्वंतमुग्रमूतये समत्सु
घ्नंतं वृत्राणि संजितं धनानां ॥११॥१८॥

॥ ३६ ॥ १-९, ११ विश्वामित्रः । १० घोर आंगिरसः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३६॥ इमामू षु प्रभृतिं सातये धाः शश्वच्छश्वदूतिभिर्या-
दमानः । सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो
भूत् ॥१॥ इंद्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा
विहायाः । प्रयम्यमानान्प्रति षू गृभायेंद्र पिब वृषधूतस्य
वृष्णः ॥२॥ पिबा वर्धस्व तव घा सुतास इंद्र सोमासः प्रथ-
मा उतेमे । यथापिबः पूर्व्याँ इंद्र सोमाँ एवा पाहि पन्यो
अद्या नवीयान् ॥३॥ महाँ अमत्रो वृजने विरप्श्युग्रं शवः
पत्यते धृष्ण्वोजः । नाह विव्याच पृथिवी चनैनं यत्सोमा-
सो हर्यश्वममंदन् ॥४॥ महाँ उग्रो वावृधे वीर्याय समा-
चक्रे वृषभः काव्येन । इंद्रो भगो वाजदा अस्य गावः प्र जा-
यंते दक्षिणा अस्य पूर्वीः ॥५॥१९॥ प्र यत्सिंधवः प्रसवं
यथायन्नापः समुद्रं रथ्येव जग्मुः । अतश्चिदिंद्रः सदसो वरी-
यान्यदीं सोमः पृणति दुग्धो अंशुः ॥६॥ समुद्रेण सिंधवो
यादमाना इंद्राय सोमं सुषुतं भरंतः । अंशुं दुहंति हस्तिनो
भरित्रैर्मध्वः पुनंति धारया पवित्रैः ॥७॥ ह्रदा इव कुक्षयः सो-
मधानाः समी विव्याच सवना पुरूणि । अन्ना यदिंद्रः प्रथमा
व्याश वृत्रं जघन्वाँ अवृणीत सोमं ॥८॥ आ तू भर माकिरेत-
त्परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनां । इंद्र यत्ते माहिनं दत्र-
मस्त्यस्मभ्यं तद्धर्यश्व प्र यंधि ॥९॥ अस्मे प्र यंधि मघवन्नृजीषि-
न्निंद्र रायो विश्ववारस्य भूरेः । अस्मे शतं शरदो जीवसे धा अस्मे

वीरान्छ्वंत इंद्र शिप्रिन् ॥१०॥ शुनं हुवेम मघवानमिंद्रम-
स्मिन्भरे नृतमं वाजसातौ । शृण्वंतमुग्रमूतये समत्सु घ्नंतं
वृत्राणि संजितं धनानां ॥११॥२०॥

॥ ३७ ॥ १-११ विश्वामित्रः ॥ इंद्रः ॥ १-१० गायत्री । ११ अनुष्टुप् ॥

॥३७॥ वार्त्रहत्याय शवसे पृतनाषाह्याय च । इंद्र त्वा वर्तयाम-
सि ॥१॥ अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो । इंद्र कृण्वंतु
वाघतः ॥२॥ नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे । इंद्रा-
भिमातिषाह्ये ॥३॥ पुरुष्टुतस्य धामभिः शतेन महयामसि । इंद्रस्य
चर्षणीधृतः ॥४॥ इंद्रं वृत्राय हंतवे पुरुहूतमुप ब्रुवे । भरेषु वा-
जसातये ॥५॥२१॥ वाजेषु सासहिर्भव त्वामीमहे शतक्रतो । इंद्र
वृत्राय हंतवे ॥६॥ द्युम्नेषु पृतनाज्ये पृत्सुतूर्षु श्रवःसु च । इंद्र सा-
क्ष्वाभिमातिषु ॥७॥ शुष्मिंतमं न ऊतये द्युम्निनं पाहि जागृविं ।
इंद्र सोमं शतक्रतो ॥८॥ इंद्रियाणि शतक्रतो या ते जनेषु पंचसु ।
इंद्र तानि त आ वृणे ॥९॥ अगन्निंद्र श्रवो बृहद्द्युम्नं दधिष्व दुष्टरं ।
उत्ते शुष्मं तिरामसि ॥१०॥ अर्वावतो न आ गह्यथो शक्र परा-
वतः । उ लोको यस्ते अद्रिव इंद्रेह तत आ गहि ॥११॥२२॥

॥ ३८ ॥ १-१० प्रजापतिर्वैश्वामित्रो वाच्यो वा द्वौ वा तौ विश्वामित्रो वा ॥
इंद्रः ॥ त्रिष्टुप् ॥

॥३८॥ अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो
जिहानः । अभि प्रियाणि मर्मृशत्पराणि कवींरिच्छामि सं-
दृशे सुमेधाः ॥१॥ इनोत पृच्छ जनिमा कवीनां मनोधृतः
सुकृतस्तक्षत द्यां । इमा उ ते प्रण्यो३ वर्धमाना मनोवाता
अध नु धर्मणि ग्मन् ॥२॥ नि षीमिदत्र गुह्या दधाना उत क्ष-
त्राय रोदसी समंजन् । सं मात्राभिर्ममिरे येमुरुर्वी अंतर्मही

सम॑ृते धा॒यसे॑ धुः ॥३॥ आ ति॒ष्ठंतं॒ परि॒ विश्वे॑ अभूष॒ञ्छ्रियो॒ व॑सा॑नश्चरति॒ स्वरो॑चिः । म॒हत्तद्वृष्णो॒ असु॑रस्य॒ नामा वि॒श्वरू॑पो अ॒मृता॑नि तस्थौ ॥४॥ अ॒सूत॒ पूर्वो॑ वृष॒भो ज्याया॑नि॒मा अ॑स्य शु॒रुधः॑ संति पू॒र्वीः । दिवो॑ नपाता वि॒दथ॑स्य धी॒भिः क्ष॒त्रं रा॑जाना प्र॒दिवो॑ दधाथे ॥५॥२३॥ त्रीणि॑ राजाना वि॒दथे॑ पु॒रूणि॒ परि॒ विश्वा॑नि भूषथः॒ सदां॑सि । अप॑श्यम॒त्र मन॑सा जग॒न्वान्व्र॒ते ग॑ंध॒र्वाँ अपि॑ वा॒युके॑शान् ॥६॥ तदिन्न्व॑स्य वृष॒भस्य॑ धे॒नोरा नाम॑भिर्ममिरे॒ सक्म्यं॒ गोः । अ॒न्यद॑न्यदसु॒र्यं१॒॑ वसा॑ना॒ नि मा॒यिनो॑ ममिरे रू॒पम॑स्मिन् ॥७॥ तदिन्न्व॑स्य सवि॒तु॑र्नकि॑र्मे हि॒र॒ण्ययी॑म॒मतिं॒ याम॑शि॑श्रेत् । आ सु॑ष्टु॒ती रोद॑सी विश्व॒मिन्वे॒ अपी॑व॒ योषा॒ जनि॑मानि वव्रे ॥८॥ यु॒वं प्र॒त्नस्य॑ साधथो म॒हो यद्दैवी॑ स्व॒स्तिः परि॑ णः स्यातं । गो॒पाजि॑ह्वस्य त॒स्थुषो॒ विरू॑पा॒ विश्वे॑ पश्यंति मा॒यिनः॑ कृ॒तानि॑ ॥९॥ शु॒नं हु॑वेम म॒घवा॑न॒मिंद्र॑म॒स्मिन्भरे॒ नृत॑मं॒ वाज॑सातौ । शृ॒ण्वंत॑मु॒ग्रमू॒तये॑ स॒मत्सु॒ घ्नंतं॑ वृ॒त्राणि॑ सं॒जितं॒ धना॑नां ॥१०॥२४॥३॥

॥ ३९ ॥ १–९ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३९॥ इंद्रं॑ म॒तिर्हृ॒द आ व॒च्यमा॒नाच्छा॒ पतिं॒ स्तोम॑तष्टा जिगाति । या जागृ॑वि॒र्वि॒दथे॑ श॒स्यमा॒नेंद्र॒ यत्ते॒ जाय॑ते वि॒द्धि तस्य॑ ॥१॥ दि॒वश्चि॒दा पू॒र्व्या जाय॑माना॒ वि जागृ॑वि॒र्वि॒दथे॑ श॒स्यमा॑ना । भ॒द्रा वस्त्रा॒ण्यर्जु॑ना॒ वसा॑ना॒ सेयम॒स्मे स॑न॒जा पित्र्या॒ धीः ॥२॥ य॒मा चि॒दत्र॑ यम॒सूर॑सूत जि॒ह्वाया॒ अग्रं॒ पत॒दा ह्यस्था॑त् । वपूं॑षि जा॒ता मि॑थु॒ना स॑चेते तमो॒हना॒ तपु॑षो बु॒ध्न एता॑ ॥३॥ नकि॑रेषां निंदि॒ता मर्त्ये॑षु॒ ये अ॒स्माकं॑ पि॒तरो॒ गोषु॑ यो॒धाः । इंद्र॑ एषां दृंहि॒ता माहि॑नावा॒नुद्गो॒त्रा॑-

णिं ससृजे दंसनावान् ॥४॥ सखा ह यत्र सखिभिर्नवग्वैरभि- ज्ञ्वा सत्वभिर्गा अनुग्मन् । सत्यं तदिंद्रो दशभिर्दशग्वैः सूर्यं विवेद तमसि क्षियंतं ॥५॥२५॥ इंद्रो मधु संभृतमुस्रियायां पद्वद्विवेद शफवन्नमे गोः । गुहा हितं गुह्यं गूळ्हमप्सु हस्ते दधे दक्षिणे दक्षिणावान् ॥६॥ ज्योतिर्वृणीत तमसो विजानन्नारे स्याम दुरितादभीके । इमा गिरः सोमपाः सोमवृद्ध जुषस्वेंद्र पुरुतमस्य कारोः ॥७॥ ज्योतिर्यज्ञाय रोदसी अनु ष्यादारे स्याम दुरितस्य भूरेः । भूरि चिद्धि तुजतो मर्त्यस्य सुपारासो वसवो बर्हणावत् ॥८॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ । शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥९॥२६॥२॥

॥ ४० ॥ १–९ विश्वामित्रः ॥ इंद्रः ॥ गायत्री ॥

॥४०॥ इंद्र त्वा वृषभं वयं सुते सोमे हवामहे । स पाहि मध्वो अंधसः ॥१॥ इंद्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत । पिबा वृषस्व तातृपिं ॥२॥ इंद्र प्र णो धितावानं यज्ञं विश्वेभिर्देवेभिः । तिर स्तवान विश्पते ॥३॥ इंद्र सोमाः सुता इमे तव प्र यंति सत्पते । क्षयं चंद्रास इंदवः ॥४॥ दधिष्वा जठरे सुतं सोममिंद्र वरेण्यं । तव द्युक्षास इंदवः ॥५॥१॥ गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे । इंद्र त्वादातमिद्यशः ॥६॥ अभि द्युम्नानि वनिन इंद्रं सचंते अक्षिता । पीत्वी सोमस्य वावृधे ॥७॥ अर्वावतो न आ गहि परावतश्च वृत्रहन् । इमा जुषस्व नो गिरः ॥८॥ यदंतरा परावतमर्वावतं च हूयसे । इंद्रेह तत आ गहि ॥९॥२॥

॥ ४१ ॥ १–९ विश्वामित्रः ॥ इंद्रः ॥ गायत्री ॥

॥४१॥ आ तू न इंद्र मद्र्यग्घुवानः सोमपीतये हरिभ्यां या-

ह्यद्रिवः ॥१॥ सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक् ।
अयुज्रन्प्रातरद्रयः ॥२॥ इमा ब्रह्म ब्रह्मवाहः क्रियंत आ बर्हिः
सीद । वीहि शूर पुरोळाशं ॥३॥ रारंधि सवनेषु ण एषु स्तोमेषु
वृत्रहन् । उक्थेष्विंद्र गिर्वणः ॥४॥ मतयः सोमपामुरुं रिहंति
शवसस्पतिं । इंद्रं वत्सं न मातरः ॥५॥३॥ स मंदस्वा ह्यंधसो
राधसे तन्वा महे । न स्तोतारं निदे करः ॥६॥ वयमिंद्र त्वायवो
हविष्मंतो जरामहे । उत त्वमस्मयुर्वसो ॥७॥ मारे अस्मद्वि
मुमुचो हरिप्रियार्वाङ्याहि । इंद्र स्वधावो मत्स्वेह ॥८॥ अर्वाचं
त्वा सुखे रथे वहतामिंद्र केशिना । घृतस्नू बर्हिरासदे ॥९॥४॥

॥ ४२ ॥ १–९ विश्वामित्रः ॥ इंद्रः ॥ गायत्री ॥

॥४२॥ उप नः सुतमा गहि सोममिंद्र गवाशिरं । हरिभ्यां
यस्ते अस्मयुः ॥१॥ तमिंद्र मदमा गहि बर्हिःष्ठां ग्रावभिः सुतं ।
कुविन्न्वस्य तृप्णवः ॥२॥ इंद्रमित्था गिरो ममाच्छागुरिषिता
इतः । आवृते सोमपीतये ॥३॥ इंद्रं सोमस्य पीतये स्तोमैरिह
हवामहे । उक्थेभिः कुविदागमत् ॥४॥ इंद्र सोमाः सुता इमे
तान्दधिष्व शतक्रतो । जठरे वाजिनीवसो ॥५॥५॥ विद्मा हि
त्वा धनंजयं वाजेषु दधृषं कवे । अधा ते सुम्नमीमहे ॥६॥
इममिंद्र गवाशिरं यवाशिरं च नः पिब । आगत्या वृषभिः
सुतं ॥७॥ तुभ्येदिंद्र स्व ओक्ये३ सोमं चोदामि पीतये । एष
रारंतु ते हृदि ॥८॥ त्वां सुतस्य पीतये प्रत्नमिंद्र हवामहे ।
कुशिकासो अवस्यवः ॥९॥६॥

॥ ४३ ॥ १–८ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ४३ ॥ आ याह्यर्वाङुप वंधुरेष्ठास्तवेदनु प्रदिवः सो-
मपेयं । प्रिया सखाया वि मुचोप बर्हिस्त्वामिमे हव्यवा-

हो हवंते ॥१॥ आ याहि पूर्वीरति चर्षणीराँ अर्य आशिष उप नो
हरिभ्यां । इमा हि त्वा मतयः स्तोमतष्टा इंद्र हवंते सख्यं जुषाणाः
॥२॥ आ नो यज्ञं नमोवृधं सजोषा इंद्र देव हरिभिर्याहि तूयं ।
अहं हि त्वा मतिभिर्जोहवीमि घृतप्रयाः सधमादे मधूनां ॥३॥
आ च त्वामेता वृषणा वहातो हरी सखाया सुधुरा स्वंगा ।
धानावदिंद्रः सवनं जुषाणः सखा सख्युः शृणवद्वंदनानि ॥४॥
कुविन्मा गोपां करसे जनस्य कुविद्राजानं मघवन्नृजीषिन् ।
कुविन्म ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शि-
क्षाः ॥५॥ आ त्वा बृहंतो हरयो युजाना अर्वागिंद्र सधमादो
वहंतु । प्र ये द्विता दिव ऋंजंत्याताः सुसंमृष्टासो वृषभस्य मू-
राः ॥६॥ इंद्र पिब वृषधूतस्य वृष्ण आ यं ते श्येन उशते ज-
भार । यस्य मदे च्यावयसि प्र कृष्टीर्यस्य मदे अप गोत्रा ववर्थ
॥७॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥८॥७॥

॥ ४४ ॥ १-५ विश्वामित्रः ॥ इंद्रः ॥ बृहती ॥

॥४४॥ अयं ते अस्तु हर्यतः सोम आ हरिभिः सुतः । जु-
षाण इंद्र हरिभिर्न आ गह्या तिष्ठ हरितं रथं ॥१॥ हर्यन्नुष-
समर्चयः सूर्यं हर्यन्नरोचयः । विद्वांश्चिकित्वान्हर्यश्व वर्धस इंद्र
विश्वा अभि श्रियः ॥२॥ द्यामिंद्रो हरिधायसं पृथिवी हरि-
वर्पसं । अधारयद्धरितोर्भूरि भोजनं ययोरंतर्हरिश्चरत् ॥३॥
जज्ञानो हरितो वृषा विश्वमा भाति रोचनं । हर्यश्वो हरितं
धत्त आयुधमा वज्रं बाह्वोर्हरिं ॥४॥ इंद्रो हर्यंतमर्जुनं वज्रं
शुक्रैरभीवृतं । अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभि-
राजत ॥५॥८॥

॥ ४५ ॥ १–५ विश्वामित्रः ॥ इंद्रः ॥ बृहती ॥

॥४५॥ आ मंद्रैरिंद्र हरिभिर्याहि मयूररोमभिः । मा त्वा के
चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ इहि ॥१॥ वृत्रखादो
वलंरुजः पुरां दर्मो अपामजः । स्थाता रथस्य हर्योरभिस्वर
इंद्रो दृळ्हा चिदारुजः ॥२॥ गंभीराँ उदधीँरिव क्रतुं पुष्यसि गा
इव । प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥३॥ आ
नस्तुजं रयिं भरांशं न प्रतिजानते । वृक्षं पक्वं फलमंकीव धूनुहींद्र
संपारणं वसु ॥४॥ स्वयुरिंद्र स्वराळसि स्मद्दिष्टिः स्वयशस्तरः ।
स वावृधान ओजसा पुरुष्टुत भवा नः सुश्रवस्तमः ॥५॥९॥

॥ ४६ ॥ १–५ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥४६॥ युध्मस्य ते वृषभस्य स्वराज उग्रस्य यूनः स्थविरस्य
घृष्वेः । अजूर्यतो वज्रिणो वीर्या३णींद्र श्रुतस्य महतो महानि
॥१॥ महाँ असि महिष वृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान् ।
एको विश्वस्य भुवनस्य राजा स योधया च क्षयया च जनान्
॥२॥ प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः ।
प्र मज्मना दिव इंद्रः पृथिव्याः प्रोरोर्महो अंतरिक्षादृजीषी
॥३॥ उरुं गभीरं जनुषाभ्यु१ग्रं विश्वव्यचसमवतं मतीनां । इंद्रं
सोमासः प्रदिवि सुतासः समुद्रं न स्रवत आ विशंति ॥४॥ यं
सोममिंद्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया । तं ते
हिन्वंति तमु ते मृजंत्यध्वर्यवो वृषभ पातवा उ ॥५॥१०॥

॥ ४७ ॥ १–५ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥४७॥ मरुत्वाँ इंद्र वृषभो रणाय पिबा सोममनुष्वधं म-
दाय । आ सिंचस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानां
॥१॥ सजोषा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर वि-

ह्वान्। जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥२॥ उत ऋतुभिर्ऋतुपाः पाहि सोममिंद्र देवेभिः सखिभिः सुतं नः। याँ आभजो मरुतो ये त्वान्वहन्वृत्रमदधुस्तुभ्यमोजः ॥३॥ ये त्वाहिहत्ये मघवन्नवर्धन्ये शांबरे हरिवो ये गविष्टौ। ये त्वा नूनमनुमदंति विप्राः पिबेंद्र सोमं सगणो मरुद्भिः ॥४॥ मरुत्वंतं वृषभं वावृधानमकवारिं दिव्यं शासमिंद्रं। विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥५॥११॥

॥ ४८ ॥ १–५ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥४८॥ सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदंधसः सुतस्य। साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य ॥१॥ यज्जायथास्तदहरस्य कामेंऽशोः पीयूषमपिबो गिरिष्ठां। तं ते माता परि योषा जनित्री महः पितुर्दम आसिंचदग्रे ॥२॥ उपस्थाय मातरमन्नमैट्ट तिग्ममपश्यदभि सोममूधः। प्रयावयन्नचरद्गृत्सो अन्यान्महानि चक्रे पुरुधप्रतीकः ॥३॥ उग्रस्तुराषाळभिभूत्योजा यथावशं तन्वं चक्र एषः। त्वष्टारमिंद्रो जनुषाभिभूयामुष्या सोममपिबच्चमूषु ॥४॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ। शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥५॥१२॥

॥ ४९ ॥ १–५ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥४९॥ शंसा महामिंद्रं यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन्। यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयंत देवाः ॥१॥ यं नु नकिः पृतनासु स्वराजं द्विता तरति नृतमं हरिष्ठां। इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्द-

स्योः ॥२॥ सहावा पृत्सु तरणिर्नार्वा व्यानशी रोदसी मेहनावान्। भगो न कारे हव्यो मतीनां पितेव चारुः सुहवो वयोधाः ॥३॥ धर्ता दिवो रजसस्पृष्ट ऊर्ध्वो रथो न वायुर्वसुभिर्नियुत्वान्। क्षपां वस्ता जनिता सूर्यस्य विभक्ता भागं धिषणेव वाजं ॥४॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ। शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥ ५ ॥ १३ ॥

॥ ५० ॥ १–५ विश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥५०॥ इंद्रः स्वाहा पिबतु यस्य सोम आगत्या तुम्रो वृषभो मरुत्वान्। ओरुव्यचाः पृणतामेभिरन्नैरास्य हविस्तन्व१ः काममृध्याः ॥१॥ आ ते सपर्यू जवसे युनज्मि ययोरनु प्रदिवः श्रुष्टिमावः। इह त्वा धेयुर्हरयः सुशिप्र पिबा त्व१स्य सुषुतस्य चारोः ॥२॥ गोभिर्मिमिक्षुं दधिरे सुपारमिंद्रं ज्यैष्ठ्याय धायसे गृणानाः। मंदानः सोमं पपिवाँ ऋजीषिन्समस्मभ्यं पुरुधा गा इषण्य ॥३॥ इमं कामं मंदया गोभिरश्वैश्चंद्रवता राधसा पप्रथश्च। स्वर्यवो मतिभिस्तुभ्यं विप्रा इंद्राय वाहः कुशिकासो अक्रन् ॥४॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ। शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥ ५ ॥ १४ ॥

॥ ५१ ॥ १–१२ विश्वामित्रः ॥ इंद्रः ॥ १–३ जगती । ४–९ त्रिष्टुप् । १०–१२ गायत्री ॥

॥ ५१ ॥ चर्षणीधृतं मघवानमुक्थ्य१मिंद्रं गिरो बृहतीरभ्यनूषत । वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥१॥ शतक्रतुमर्णवं शाकिनं नरं गिरो म इंद्रमुप यंति विश्वतः। वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभि-

षाचं स्वर्विदं ॥२॥ आकरे वसोर्जरिता पनस्यतेऽनेहसः स्तुभ
इंद्रो दुवस्यति । विवस्वतः सदन आ हि पिप्रिये सत्रासाह-
मभिमातिहनं स्तुहि ॥३॥ नृणामु त्वा नृतमं गीर्भिरुक्थैरभि
प्र वीरमर्चता सबाधः । सं सहसे पुरुमायो जिहीते नमो
अस्य प्रदिव एक ईशे ॥४॥ पूर्वीरस्य निष्षिधो मर्त्येषु पुरू
वसूनि पृथिवी बिभर्ति । इंद्राय द्याव ओषधीरुतापो रयिं
रक्षंति जीरयो वनानि ॥५॥१५॥ तुभ्यं ब्रह्माणि गिर इंद्र तुभ्यं
सत्रा दधिरे हरिवो जुषस्व । बोध्या३पिरवसो नूतनस्य सखे
वसो जरितृभ्यो वयो धाः ॥६॥ इंद्र मरुत्व इह पाहि सोमं
यथा शार्याते अपिबः सुतस्य । तव प्रणीती तव शूर शर्म-
न्ना विवासंति कवयः सुयज्ञाः ॥७॥ स वावशान इह पाहि
सोमं मरुद्भिरिंद्र सखिभिः सुतं नः । जातं यत्त्वा परि देवा
अभूषन्महे भराय पुरुहूत विश्वे ॥८॥ अप्तूर्ये मरुत आपिरेषो-
ऽमंदन्निंद्रमनु दातिवाराः । तेभिः साकं पिबतु वृत्रखादः सुतं
सोमं दाशुषः स्वे सधस्थे ॥९॥ इदं ह्यन्वोजसा सुतं राधानां
पते पिबा त्व१स्य गिर्वणः ॥१०॥ यस्ते अनु स्वधामसत्सुते
नि यच्छ तन्वं स त्वा ममत्तु सोम्यं ॥११॥ प्र ते अश्नोतु कु-
क्ष्योः प्रेंद्र ब्रह्मणा शिरः प्र बाहू शूर राधसे ॥ १२ ॥ १६ ॥

॥ ५२ ॥ १–८ विश्वामित्रः ॥ इंद्रः ॥ १–४ गायत्री । ५.७.८ त्रिष्टुप् । ६ जगती ॥

॥५२॥ धानावंतं करंभिणमपूपवंतमुक्थिनं । इंद्र प्रातर्जुषस्व
नः ॥१॥ पुरोळाशं पचत्यं जुषस्वेंद्रा गुरस्व च । तुभ्यं हव्यानि
सिस्रते ॥२॥ पुरोळाशं च नो घसो जोषयासे गिरश्च नः । व-
धूयुरिव योषणां ॥३॥ पुरोळाशं सनश्रुत प्रातःसावे जुषस्व
नः । इंद्र क्रतुर्हि ते बृहन् ॥४॥ माध्यंदिनस्य सवनस्य धानाः

पुरोळाशमिंद्र कृष्वेह चारुं। प्र यत्स्तोता जरिता तूर्ण्यर्थो वृषा-
यमाण उप गीर्भिरीट्टे ॥५॥१७॥ तृतीये धानाः सवने पुरुष्टुत पुरो-
ळाशमाहुतं मामहस्व नः। ऋभुमंतं वाजवंतं त्वा कवे प्रयस्वंत
उप शिक्षेम धीतिभिः ॥६॥ पूषण्वते ते चकृमा करंभं हरिवते
हर्यश्वाय धानाः। अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्रहा
शूर विद्वान् ॥७॥ प्रति धाना भरत तूयमस्मै पुरोळाशं वीरत-
माय नृणां। दिवेदिवे सदृशीरिंद्र तुभ्यं वर्धंतु त्वा सोमपेयाय
धृष्णो ॥ ८ ॥ १८ ॥

॥ ५३ ॥ १–२४ विश्वामित्रः ॥ १ इंद्रापर्वतौ । २–१४. २१–२४ इंद्रः । १५. १६ वाक् ।
१७–२० रथांगानि ॥ १–९. ११. १४. १५. १७. १९. २१. २३. २४ त्रिष्टुप् । १०. १६
जगती । १२. २०. २२ अनुष्टुप् । १३ गायत्री । १८ बृहती ॥

॥ ५३ ॥ इंद्रापर्वता बृहता रथेन वामीरिष आ वहतं सु-
वीराः। वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदंता
॥१॥ तिष्ठा सु कं मघवन्मा परा गाः सोमस्य नु त्वा सुषुतस्य
यक्षि। पितुर्न पुत्रः सिचमा रभे त इंद्र स्वादिष्ठया गिरा श-
चीवः ॥२॥ शंसावाध्वर्यो प्रति मे गृणीहींद्राय वाहः कृणवाव
जुष्टं। एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिंद्राय शस्तं
॥३॥ जायेदस्तं मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहंतु।
यदा कदा च सुनवाम सोममग्निष्ट्वा दूतो धन्वात्यच्छ ॥४॥ परा
याहि मघवन्ना च याहींद्र भ्रातरुभयत्रा ते अर्थं। यत्रा रथस्य
बृहतो निधानं विमोचनं वाजिनो रासभस्य ॥५॥१९॥ अपाः
सोममस्तमिंद्र प्र याहि कल्याणीर्जाया सुरणं गृहे ते। यत्रा
रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ॥६॥ इमे
भोजा अंगिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः। विश्वा-
मित्राय ददतो मघानि सहस्रसावे प्र तिरंत आयुः ॥७॥ रूपं-

रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वां। त्रिर्यद्दिवः परि मुहूर्तमागात्स्वैर्मंत्रैरनृतुपा ऋतावा ॥८॥ महाँ ऋषिर्देवजा देवजूतोऽस्तभ्नात्सिंधुमर्णवं नृचक्षाः। विश्वामित्रो यदवहत्सुदासमप्रियायत कुशिकेभिरिंद्रः ॥९॥ हंसा इव कृणुथ श्लोकमद्रिभिर्मदंतो गीर्भिरध्वरे सुते सचा। देवेभिर्विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यं मधु ॥१०॥२०॥ उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्र मुंचता सुदासः। राजा वृत्रं जंघनत्प्रागपागुदगथा यजाते वर आ पृथिव्याः ॥११॥ य इमे रोदसी उभे अहमिंद्रमतुष्टवं। विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनं ॥१२॥ विश्वामित्रा अरासत ब्रह्मेंद्राय वज्रिणे। करदिन्नः सुराधसः ॥१३॥ किं ते कृण्वंति कीकटेषु गावो नाशिरं दुह्रे न तपंति घर्मं। आ नो भर प्रमगंदस्य वेदो नैचाशाखं मघवन्रंधया नः ॥१४॥ ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता। आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यं ॥१५॥२१॥ ससर्परीरभरत्तूयमेभ्योऽधि श्रवः पांचजन्यासु कृष्टिषु। सा पक्ष्या३ नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः ॥१६॥ स्थिरौ गावौ भवतां वीळुरक्षो मेषा वि वर्हि मा युगं वि शारि। इंद्रः पातल्ये ददतां शरीतोररिष्टनेमे अभि नः सचस्व ॥१७॥ बलं धेहि तनूषु नो बलमिंद्रानळुत्सु नः। बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥१८॥ अभि व्ययस्व खदिरस्य सारमोजो धेहि स्पंदने शिंशपायां। अक्ष वीळो वीळित वीळयस्व मा यामादस्मादव जीहिपो नः ॥१९॥ अयमस्मान्वनस्पतिर्मा च हा मा च रीरिषत। स्वस्त्या गृहेभ्य आवसा आ विमो-

चनात् ॥२०॥२२॥ इंद्रोतिभिर्बहुलाभिर्नो अद्य याच्छ्रेष्ठा-
भिर्मघवञ्छूर जिन्व। यो नो द्वेष्ट्यधरः सस्पदीष्ट यमु द्विष्म-
स्तमु प्राणो जहातु ॥२१॥ परशुं चिद्वि तपति शिंबलं चिद्वि
वृश्चति। उखा चिदिंद्र येषंती प्रयस्ता फेनमस्यति ॥२२॥ न
सायकस्य चिकिते जनासो लोधं नयंति पशु मन्यमानाः।
नावाजिनं वाजिना हासयंति न गर्दभं पुरो अश्वान्नयंति
॥२३॥ इम इंद्र भरतस्य पुत्रा अपपित्वं चिकितुर्न प्रपित्वं।
हिन्वंत्यश्वमरणं न नित्यं ज्यावाजं परि णयंत्याजौ ॥२४॥२३॥४॥

॥ ५४ ॥ १–२२ प्रजापतिर्वैश्वामित्रो वाच्यो वा ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥५४॥ इमं महे विदथ्याय शूषं शश्वत्कृत्व ईड्याय प्र जभ्रुः।
शृणोतु नो दम्येभिरनीकैः शृणोत्वग्निर्दिव्यैरजस्रः ॥१॥ महि
महे दिवे अर्चा पृथिव्यै कामो म इच्छञ्चरति प्रजानन्।
ययोर्ह स्तोमे विदथेषु देवाः सपर्यवो मादयंते सचायोः॥२॥
युवोरृतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूतं। इदं
दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नं ॥३॥
उतो हि वां पूर्व्या आविविद्र ऋतावरी रोदसी सत्यवाचः।
नरश्चिद्वां समिथे शूरसातौ ववंदिरे पृथिवि वेविदानाः ॥४॥
को अद्धा वेद क इह प्र वोचद्देवाँ अच्छा पथ्या३का समेति।
ददृश्र एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु ॥५॥२४॥ क-
विर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विघृते मदंती। नाना
चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ॥६॥ समान्या
वियुते दूरेअंते ध्रुवे पदे तस्थतुर्जागरूके। उत स्वसारा युवती
भवंती आदु ब्रुवाते मिथुनानि नाम ॥७॥ विश्वेदेते जनिमा सं
विविक्तो महो देवान्बिभ्रती न व्यथेते। एजद्ध्रुवं पत्यते विश्व-

मेकं चरत्पतत्रि विषुणं वि जातं ॥८॥ सना पुराणमध्येम्या-
रान्महः पितुर्जनितुर्जामि तन्नः । देवासो यत्र पनितार ए-
वैरुरौ पथि व्युते तस्थुरंतः ॥९॥ इमं स्तोमं रोदसी प्र ब्रवी-
म्यृदूदराः शृणवन्नग्निजिह्वाः । मित्रः सम्राजो वरुणो युवान
आदित्यासः कवयः पप्रथानाः ॥१०॥२५॥ हिरण्यपाणिः स-
विता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः । देवेषु च सवितः
श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिं ॥११॥ सुकृत्सुपाणिः
स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात् । पूषण्वंत ऋभ-
वो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट ॥१२॥ विद्युद्रथा मरुत
ऋष्टिमंतो दिवो मर्या ऋतजाता अयासः । सरस्वती शृ-
णवन्यज्ञियासो धाता रयिं सहवीरं तुरासः ॥१३॥ विष्णुं स्तो-
मासः पुरुदस्ममर्का भगस्येव कारिणो यामनि ग्मन् । उरु-
क्रमः ककुहो यस्य पूर्वीर्न मर्धंति युवतयो जनित्रीः ॥१४॥ इं-
द्रो विश्वैर्वीर्यैः३ःपत्यमान उभे आ पप्रौ रोदसी महित्वा । पुरं-
दरो वृत्रहा धृष्णुषेणः संगृभ्या न आ भरा भूरि पश्वः ॥१५॥२६॥
नासत्या मे पितरा बंधुपृच्छा सजात्यमश्विनोश्चारु नाम ।
युवं हि स्थो रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा
॥१६॥ महत्तद्वः कवयश्चारु नाम यद्ध देवा भवथ विश्व इंद्रे ।
सख ऋभुभिः पुरुहूत प्रियेभिरिमां धियं सातये तक्षता नः
॥१७॥ अर्यमा णो अदितिर्यज्ञियासोऽदब्धानि वरुणस्य व्रता-
नि । युयोत नो अनपत्यानि गंतोः प्रजावान्नः पशुमाँ अस्तु
गातुः ॥१८॥ देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु स-
र्वताता । शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्व१-
तरिक्षं ॥१९॥ शृण्वंतु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया

मदंतः। आदित्यैर्नो अदितिः शृणोतु यच्छंतु नो मरुतः शर्म भद्रं
॥२०॥ सदा सुगः पितुमाँ अस्तु पंथा मध्वा देवा ओषधीः सं पि-
पृक्त। भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः
॥२१॥ स्वदस्व हव्या समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवां-
सि। विश्वाँ अग्ने पृत्सु ताञ्जेषि शत्रूनहा विश्वा सुमना दीदिही
नः ॥२२॥२७॥

॥५५॥ १–२२ प्रजापतिर्वैश्वामित्रो वाच्यो वा ॥ विश्वे देवाः। १ उषाः। २–१० अग्निः। ११ अहोरात्रौ। १२–१४ रोदसी। १५ रोदसी द्युनिशौ वा। १६ दिशः। १७–२२ इंद्रः पर्जन्यात्मा त्वष्टा वाग्निश्च ॥ त्रिष्टुप् ॥

॥५५॥ उषसः पूर्वा अध यद्व्यूषुर्महद्वि जज्ञे अक्षरं पदे
गोः। व्रता देवानामुप नु प्रभूषन्महद्देवानामसुरत्वमेकं ॥१॥
मो षू णो अत्र जुहुरंत देवा मा पूर्वे अग्ने पितरः पदज्ञाः।
पुराण्योः सद्मनोः केतुरंतर्महद्देवानामसुरत्वमेकं ॥२॥ वि मे
पुरुत्रा पतयंति कामाः शम्यच्छा दीद्ये पूर्व्याणि। समिद्धे
अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकं ॥३॥ समानो रा-
जा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानु। अन्या वत्सं
भरति क्षेति माता महद्देवानामसुरत्वमेकं ॥४॥ आक्षित्पू-
र्वास्वपरा अनूरुत्सद्यो जातासु तरुणीष्वंतः। अंतर्वतीः
सुवते अप्रवीता महद्देवानामसुरत्वमेकं ॥५॥२८॥ शयुः पर-
स्तादध नु द्विमाताबंधनश्चरति वत्स एकः। मित्रस्य ता
वरुणस्य व्रतानि महद्देवानामसुरत्वमेकं ॥६॥ द्विमाता हो-
ता विदथेषु सम्राळन्वग्रं चरति क्षेति बुध्नः। प्र रण्यानि
रण्यवाचो भरंते महद्देवानामसुरत्वमेकं ॥७॥ शूरस्येव युध्य-
तो अंतमस्य प्रतीचीनं ददृशे विश्वमायत्। अंतर्मतिश्च-
रति निष्षिधं गोर्महद्देवानामसुरत्वमेकं ॥८॥ नि वेवेति

पलितो दूत आस्वंतर्महांश्चरति रोचनेन । वपूंषि बिभ्रदभि
नो वि चष्टे महद्देवानामसुरत्वमेकं ॥ ९ ॥ विष्णुर्गोपाः परमं
पाति पाथः प्रिया धामान्यमृता दधानः । अग्निष्टा विश्वा
भुवनानि वेद महद्देवानामसुरत्वमेकं ॥ १० ॥ २९ ॥ नाना च-
क्राते यम्या३वपूंषि तयोरन्यद्रोचते कृष्णमन्यत् । श्यावी च
यदरुषी च स्वसारौ महद्देवानामसुरत्वमेकं ॥ ११ ॥ माता च
यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची । ऋतस्य ते
सदस्यीळे अंतर्महद्देवानामसुरत्वमेकं ॥ १२ ॥ अन्यस्या वत्सं
रिहती मिमाय कया भुवा नि दधे धेनुरूधः । ऋतस्य सा
पयसापिन्वतेळा महद्देवानामसुरत्वमेकं ॥ १३ ॥ पद्या वस्ते
पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा । ऋतस्य सद्म वि
चरामि विद्वान्महद्देवानामसुरत्वमेकं ॥ १४ ॥ पदे इव निहिते
दस्मे अंतस्तयोरन्यद्गुह्यमाविरन्यत् । सध्रीचीना पथ्या३सा
विषूची महद्देवानामसुरत्वमेकं ॥१५॥३०॥ आ धेनवो धुनयं-
तामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः । नव्यानव्या युव-
तयो भवंतीर्महद्देवानामसुरत्वमेकं ॥ १६ ॥ यदन्यासु वृषभो
रोरवीति सो अन्यस्मिन्यूथे नि दधाति रेतः । स हि क्षपा-
वान्स भगः स राजा महद्देवानामसुरत्वमेकं ॥१७॥ वीरस्य नु
स्वश्व्यं जनासः प्र नु वोचाम विदुरस्य देवाः । षोळ्हा युक्ताः
पंचपंचा वहंति महद्देवानामसुरत्वमेकं ॥ १८ ॥ देवस्त्वष्टा
सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान । इमा च
विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकं ॥१९॥ मही समै-
रच्चम्वा समीची उभे ते अस्य वसुना न्यृष्टे । शृण्वे वीरो
विंदमानो वसूनि महद्देवानामसुरत्वमेकं ॥ २० ॥ इमां

चं नः पृथिवी विश्वधाया उप क्षेति हितमित्रो न राजा। पुरः-
सदः शर्मसदो न वीरा महद्देवानामसुरत्वमेकं ॥२१॥ निष्षि-
ध्वरीस्त ओषधीरुतापो रयिं त इंद्र पृथिवी बिभर्ति। सखा-
यस्ते वामभाजः स्याम महद्देवानामसुरत्वमेकं ॥२२॥३१॥३॥

॥ ५६ ॥ १-८ प्रजापतिर्वैश्वामित्रो वाच्यो वा ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥५६॥ न ता मिनंति मायिनो न धीरा व्रता देवानां प्र-
थमा ध्रुवाणि। न रोदसी अद्रुहा वेद्याभिर्न पर्वता निनमे
तस्थिवांसः ॥१॥ षड्भाराँ एको अचरन्बिभर्त्यृतं वर्षिष्ठमुप
गाव आगुः। तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते
दर्श्येका ॥२॥ त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध
प्रजावान्। त्र्यनीकः पत्यते माहिनावान्स रेतोधा वृषभः
शश्वतीनां ॥३॥ अभीक आसां पदवीरबोध्यादित्यानामह्वे
चारु नाम। आपश्चिदस्मा अरमंत देवीः पृथग्व्रजंतीः परि
षीमवृंजन् ॥४॥ त्री षधस्था सिंधवस्त्रिः कवीनामुत त्रिमा-
ता विदथेषु सम्राट्। ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा
दिवो विदथे पत्यमानाः ॥५॥ त्रिरा दिवः सवितर्वार्याणि
दिवेदिव आ सुव त्रिर्नो अह्नः। त्रिधातु राय आ सुवा वसू-
नि भग त्रातर्धिषणे सातये धाः ॥६॥ त्रिरा दिवः सविता
सोषवीति राजाना मित्रावरुणा सुपाणी। आपश्चिदस्य रो-
दसी चिदुर्वी रत्नं भिक्षंत सवितुः सवाय ॥७॥ त्रिरुत्तमा दू-
णशा रोचनानि त्रयो राजंत्यसुरस्य वीराः। ऋतावान इषि-
रा दूळभासस्त्रिरा दिवो विदथे संतु देवाः ॥८॥१॥

॥ ५७ ॥ १-६ विश्वामित्रः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥५७॥ प्र मे विविक्वाँ अविदन्मनीषां धेनुं चरंतीं प्रयुता-

मगोपां। सद्यश्चिद्या दुदुहे भूरि धासेरिंद्रस्तद्ग्निः पनितारो अ-
स्याः ॥१॥ इंद्रः सु पूषा वृषणा सुहस्ता दिवो न प्रीताः शशयं
दुदुहे। विश्वे यदस्यां रणयंत देवाः प्र वोऽत्र वसवः सुम्नमश्यां
॥२॥ या जामयो वृष्ण इच्छंति शक्तिं नमस्यंतीर्जानते गर्भम-
स्मिन्। अच्छा पुत्रं धेनवो वावशाना महश्चरंति बिभ्रतं वपूंषि
॥३॥ अच्छा विवक्मि रोदसी सुमेके ग्राव्णो युजानो अध्वरे
मनीषा। इमा उ ते मनवे भूरिवारा ऊर्ध्वा भवंति दर्शता यजत्राः
॥४॥ या ते जिह्वा मधुमती सुमेधा अग्ने देवेषूच्यत उरूची।
तयेह विश्वाँ अवसे यजत्राना सादय पायया चा मधूनि ॥५॥
या ते अग्ने पर्वतस्येव धारासश्चंती पीपयद्देव चित्रा। तामस्मभ्यं
प्रमतिं जातवेदो वसो रास्व सुमतिं विश्वजन्यां ॥६॥२॥

॥ ५८ ॥ १–९ विश्वामित्रः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥५८॥ धेनुः प्रत्नस्य काम्यं दुहानांतः पुत्रश्चरति दक्षिणा-
याः। आ द्योतनिं वहति शुभ्रयामोषसः स्तोमो अश्विना-
वजीगः ॥१॥ सुयुग्वहंति प्रति वामृतेनोर्ध्वा भवंति पितरेव
मेधाः। जरेथामस्मद्वि पणेर्मनीषां युवोरवश्चकृमा यातम-
र्वाक् ॥२॥ सुयुग्भिरश्वैः सुवृता रथेन दस्राविमं शृणुतं श्लो-
कमद्रेः। किमंग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना
पुराजाः ॥३॥ आ मन्येथामा गतं कच्चिदेवैर्विश्वे जनासो
अश्विना हवंते। इमा हि वां गोऋजीका मधूनि प्र मि-
त्रासो न ददुरुस्रो अग्रे ॥४॥ तिरः पुरू चिदश्विना रजांस्यां-
गूषो वां मघवाना जनेषु। एह यातं पथिभिर्देवयानैर्दस्रा-
विमे वां निधयो मधूनां ॥५॥३॥ पुराणमोकः सख्यं शिवं वां

युवोर्नरा द्रविणं जह्नाव्यां । पुनः कृण्वानाः सख्या शिवानि
मध्वा मदेम सह नू समानाः ॥६॥ अश्विना वायुना युवं
सुदक्षा नियुद्भिश्च सजोषसा युवाना । नासत्या तिरोअह्न्यं
जुषाणा सोमं पिबतमस्रिधा सुदानू ॥७॥ अश्विना परि
वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः । रथो ह वामृ-
तजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ॥८॥ अश्विना
मधुषुत्तमो युवाकुः सोमस्तं पातमा गतं दुरोणे । रथो ह वां
भूरि वर्पः करिक्रत्सुतावतो निष्कृतमागमिष्ठः ॥९॥४॥

॥ ५९ ॥ १–९ विश्वामित्रः ॥ मित्रः ॥ १–५ त्रिष्टुप् । ६–९ गायत्री ॥

॥५९॥ मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथि-
वीमुत द्यां । मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृत-
वज्जुहोत ॥१॥ प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य
शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यं-
तितो न दूरात् ॥२॥ अनमीवास इळया मदंतो मितज्ञवो
वरिमन्ना पृथिव्याः । आदित्यस्य व्रतमुपक्षियंतो वयं मित्रस्य
सुमतौ स्याम ॥३॥ अयं मित्रो नमस्यः सुशेवो राजा सुक्षत्रो
अजनिष्ट वेधाः । तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे
स्याम ॥४॥ महाँ आदित्यो नमसोपसद्यो यातयज्जनो गृणते
सुशेवः । तस्मा एतत्पन्यतमाय जुष्टमग्नौ मित्राय हविरा जुहोत
॥५॥५॥ मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि । द्युम्नं चित्र-
श्रवस्तमं ॥६॥ अभि यो महिना दिवं मित्रो बभूव सप्रथाः ।
अभि श्रवोभिः पृथिवीं ॥७॥ मित्राय पंच येमिरे जना अ-
भिष्टिशवसे । स देवान्विश्वान्बिभर्ति ॥८॥ मित्रो देवेष्वायुषु
जनाय वृक्तबर्हिषे । इष इष्टव्रता अकः ॥९॥६॥

॥ ६० ॥ १–७ विश्वामित्रः ॥ १–४ ऋभवः । ५–७ ऋभव इंद्रश्च ॥ जगती ॥

॥६०॥ इहेह वो मनसा बंधुता नर उशिजो जग्मुरभि तानि
वेदसा । याभिर्मायाभिः प्रतिजूतिवर्पसः सौधन्वना यज्ञियं
भागमानश ॥१॥ याभिः शचीभिश्चमसाँ अपिंशत यया धिया
गामरिणीत चर्मणः । येन हरी मनसा निरतक्षत तेन देवत्व-
मृभवः समानश ॥२॥ इंद्रस्य सख्यमृभवः समानशुर्मनोर्नपातो
अपसो दधन्विरे । सौधन्वनासो अमृतत्वमेरिरे विष्ट्वी शमीभिः
सुकृतः सुकृत्यया ॥३॥ इंद्रेण याथ सरथं सुते सचाँ अथो वशानां
भवथा सह श्रिया । न वः प्रतिमै सुकृतानि वाघतः सौधन्वना
ऋभवो वीर्याणि च ॥४॥ इंद्र ऋभुभिर्वाजवद्भिः समुक्षितं सुतं
सोममा वृषस्वा गभस्त्योः । धियेषितो मघवन्दाशुषो गृहे सौ-
धन्वनेभिः सह मत्स्वा नृभिः ॥५॥ इंद्र ऋभुमान्वाजवान्मत्स्वेह
नोऽस्मिन्सवने शच्यां पुरुष्टुत । इमानि तुभ्यं स्वसराणि ये-
मिरे व्रता देवानां मनुषश्च धर्मभिः ॥६॥ इंद्र ऋभुभिर्वाजि-
भिर्वाजयन्निह स्तोमं जरितुरुप याहि यज्ञियं । शतं केतेभि-
रिषिरेभिरायवे सहस्रणीथो अध्वरस्य होमनि ॥७॥७॥

॥ ६१ ॥ १–७ विश्वामित्रः ॥ उषाः ॥ त्रिष्टुप् ॥

॥६१॥ उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो
मघोनि । पुराणी देवि युवतिः पुरंधिरनु व्रतं चरसि विश्ववारे
॥१॥ उषो देव्यमर्त्या वि भाहि चंद्ररथा सूनृता ईरयंती । आ
त्वा वहंतु सुयमासो अश्वा हिरण्यवर्णां पृथुपाजसो ये ॥२॥
उषः प्रतीची भुवनानि विश्वोर्ध्वा तिष्ठस्यमृतस्य केतुः । समा-
नमर्थं चरणीयमाना चक्रमिव नव्यस्या ववृत्स्व ॥३॥ अव स्यू-
मेव चिन्वती मघोन्युषा याति स्वसरस्य पत्नी । स्व१र्जनंती

सुभगा सुदंसा आंताद्दिवः पप्रथ आ पृथिव्याः ॥४॥ अच्छा
वो देवीमुषसं विभातीं प्र वो भरध्वं नमसा सुवृक्तिं। ऊर्ध्वं
मधुधा दिवि पाजो अश्रेत्प्र रोचना रुरुचे रण्वसंदृक् ॥५॥
ऋतावरी दिवो अर्कैरबोध्या रेवती रोदसी चित्रमस्थात्। आ-
यतीमग्न उषसं विभातीं वाममेषि द्रविणं भिक्षमाणः ॥६॥
ऋतस्य बुध्न उषसामिषण्यन्वृषा मही रोदसी आ विवेश। मही
मित्रस्य वरुणस्य माया चंद्रेव भानुं वि दधे पुरुत्रा ॥७॥८॥

॥ ६२॥ १–१५ विश्वामित्रः । १६–१८ विश्वामित्रो जमदग्निर्वा ॥ १–३ इंद्रावरुणौ।
४–६ बृहस्पतिः । ७–९ पूषा । १०–१२ सविता । १३–१५ सोमः । १६–१८
मित्रावरुणौ ॥ १–३ त्रिष्टुप् । ४–१८ गायत्री ॥

॥६२॥ इमा उ वां भृमयो मन्यमाना युवावते न तुज्या अभूवन्।
क्व१त्यदिंद्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः ॥१॥
अयमु वां पुरुतमो रयीयञ्छश्वत्तममवसे जोहवीति। सजोषा-
विंद्रावरुणा मरुद्भिर्दिवा पृथिव्या शृणुतं हवं मे ॥२॥ अस्मे तदिं-
द्रावरुणा वसु ष्यादस्मे रयिर्मरुतः सर्ववीरः। अस्मान्वरूत्रीः शर-
णैरवंत्वस्मान्होत्रा भारती दक्षिणाभिः ॥३॥ बृहस्पते जुषस्व नो
हव्यानि विश्वदेव्य। रास्व रत्नानि दाशुषे ॥४॥ शुचिमर्कैर्बृहस्पति-
मध्वरेषु नमस्यत। अनाम्योज आ चके ॥५॥९॥ वृषभं चर्षणीनां
विश्वरूपमदाभ्यं। बृहस्पतिं वरेण्यं ॥६॥ इयं ते पूषन्नाघृणे सुष्टु-
तिर्देव नव्यसी। अस्माभिस्तुभ्यं शस्यते ॥७॥ तां जुषस्व गिरं मम
वाजयंतीमवा धियं। वधूयुरिव योषणां ॥८॥ यो विश्वाभि विप-
श्यति भुवना सं च पश्यति। स नः पूषाविता भुवत् ॥९॥ तत्सवितु-
र्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥१०॥१०॥
देवस्य सवितुर्वयं वाजयंतः पुरंध्या। भगस्य रातिमीमहे ॥११॥ देवं

नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः । नमस्यंति धियेषिताः ॥१२॥ सोमो जिगाति गातुविद्देवानामेति निष्कृतं । ऋतस्य योनिमासदं ॥१३॥ सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे । अनमीवा इषस्करत् ॥१४॥ अस्माकमायुर्वर्धयन्नभिमातीः सहमानः । सोमः सधस्थमासदत् ॥१५॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं । मध्वा रजांसि सुक्रतू ॥१६॥ उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः । द्राघिष्ठाभिः शुचिव्रता ॥१७॥ गृणाना जमदग्निना योनावृतस्य सीदतं । पातं सोममृतावृधा ॥ १८ ॥ ११ ॥ ५ ॥ ३ ॥

॥ इति तृतीयं मंडलं समाप्तं ॥

॥ १ ॥ १–२० वामदेवः ॥ १. ६–२० अग्निः । २–५ अग्निरग्निर्वा वरुणश्च ॥ १ अष्टिः । २ अतिजगती । ३ धृतिः । ४–२० त्रिष्टुप् ॥

॥१॥ त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा न्येरिरे । अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं जनत प्रचेतसं ॥१॥ स भ्रातरं वरुणमग्न आ ववृत्स्व देवाँ अच्छा सुमती यज्ञवनसं ज्येष्ठं यज्ञवनसं । ऋतावानमादित्यं चर्षणीधृतं राजानं चर्षणीधृतं ॥२॥ सखे सखायमभ्या ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्या । अग्ने मृळीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु । तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधि ॥३॥ त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेळोऽव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् ॥४॥ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अव

यक्ष्व नो वरुणं ररांणो वीहि मृळीकं सुहवो न एधि॥५॥१२॥
अस्य श्रेष्ठा सुभगस्य संदृग्देवस्य चित्रतमा मर्त्येषु। शुचि
घृतं न तप्तमघ्न्यायाः स्पार्हा देवस्य मंहनेव धेनोः॥६॥ त्रिरस्य
ता परमा संति सत्या स्पार्हा देवस्य जनिमान्यग्नेः। अनंते
अंतः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः॥७॥ स
दूतो विश्वेदभि वष्टि सद्मा होता हिरण्यरथो रंसुजिह्वः।
रोहिदश्वो वपुष्यो विभावा सदा रण्वः पितुमतीव संसत्॥८॥
स चेतयन्मनुषो यज्ञबंधुः प्र तं मह्या रशनया नयंति। स
क्षेत्यस्य दुर्यासु साधन्देवो मर्तस्य सधनित्वमाप॥९॥ स तू
नो अग्निर्नयतु प्रजानन्नच्छा रत्नं देवभक्तं यदस्य। धिया
यद्विश्वे अमृता अकृण्वन्द्यौष्पिता जनिता सत्यमुक्षन्॥१०॥१३॥
स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ।
अपादशीर्षा गुहमानो अंतायोयुवानो वृषभस्य नीळे॥११॥
प्र शर्ध आर्त प्रथमं विपन्यँ ऋतस्य योना वृषभस्य नीळे।
स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयंत वृष्णे॥१२॥
अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः।
अश्मव्रजाः सुदुघा वव्रे अंतरुदुस्रा आजन्नुषसो हुवानाः॥१३॥
ते मर्मृजत ददृवांसो अद्रिं तदेषामन्ये अभितो वि वोचन्।
पश्वयंत्रासो अभि कारमर्चन्विदंत ज्योतिश्चकृपंत धीभिः
॥१४॥ ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षंतम-
द्रिं। दृळ्हं नरो वचसा दैव्येन व्रजं गोमंतमुशिजो वि वव्रुः
॥१५॥१४॥ ते मन्वत प्रथमं नाम धेनोस्त्रिः सप्त मातुः परमा-
णि विंदन्। तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा
गोः॥१६॥ नेशत्तमो दुधितं रोचत द्यौरुद्देव्या उषसो भानुरर्त।

आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन् ॥१७॥
आदित्यश्वा बुबुधाना व्यख्यन्नादिद्रत्नं धारयंत द्युभक्तं । विश्वे
विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यमस्तु ॥१८॥ अच्छा
वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठं । शुच्यूधो
अतृणन्न गवामंधो न पूतं परिषिक्तमंशोः ॥१९॥ विश्वेषामदि-
तिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणां । अग्निर्देवानामव
आवृणानः सुमृळीको भवतु जातवेदाः ॥ २० ॥ १५ ॥

॥ २ ॥ १–२० वामदेवः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥२॥ यो मर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्निधायि ।
होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै ॥ १ ॥ इह
त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अंतरग्ने । दूत
ईयसे युयुजान ऋष्व ऋजुमुष्कान्वृषणः शुक्रांश्च ॥ २ ॥
अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा ।
अंतरीयसे अरुषा युजानो युष्मांश्च देवान्विश आ च म-
र्तान् ॥ ३ ॥ अर्यमणं वरुणं मित्रमेषामिंद्राविष्णू मरुतो
अश्विनोत । स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे
जनाय ॥ ४ ॥ गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा स-
दमिदप्रमृष्यः । इळावाँ एषो असुर प्रजावान्दीर्घो रयिः
पृथुबुध्नः सभावान् ॥ ५ ॥ १६ ॥ यस्त इध्मं जभरत्सिष्विदानो
मूर्धानं वा ततपते त्वाया । भुवस्तस्य स्वतवाँः पायुरग्ने वि-
श्वस्मात्सीमघायत उरुष्य ॥ ६ ॥ यस्ते भरादन्नियते चिदन्नं
निशिषन्मंद्रमतिथिमुदीरत् । आ देवयुरिनधते दुरोणे तस्मि-
न्रयिर्ध्रुवो अस्तु दास्वान् ॥ ७ ॥ यस्त्वा दोषा य उषसि प्रशं-

साग्निर्यं वा त्वा कृणवंते हविष्मान्। अश्वो न स्वे दम आ हेम्यावान्तमंहसः पीपरो दाश्वांसं॥८॥ यस्तुभ्यमग्ने अमृताय दाशद्दुवस्त्वे कृणवंते यतस्रुक्। न स राया शशमानो वि योषन्नैनमंहः परि वरदघायोः॥९॥ यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं रराणः। प्रीतेदसद्धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः॥१०॥१७॥ चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान्। राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य॥११॥ कविं शशासुः कवयोऽदब्धा निधारयंतो दुर्यास्वायोः। अतस्त्वं दृश्याँ अग्न एतान्पड्भिः पश्येरद्भुताँ अर्य एवैः॥१२॥ त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ। रत्नं भर शशमानाय घृष्वे पृथु श्चंद्रमवसे चर्षणिप्राः॥१३॥ अधा ह यद्वयमग्ने त्वाया पड्भिर्हस्तेभिश्चकृमा तनूभिः। रथं न क्रंतो अपसा भुरिजोर्ऋतं येमुः सुध्य आशुषाणाः॥१४॥ अधा मातुरुषसः सप्त विप्रा जायेमहि प्रथमा वेधसो नॄन्। दिवस्पुत्रा अंगिरसो भवेमाद्रिं रुजेम धनिनं शुचंतः॥१५॥१८॥ अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः। शुचीदयन्दीधितिमुक्थशासः क्षामा भिंदंतो अरुणीरप व्रन्॥१६॥ सुकर्माणः सुरुचो देवयंतोऽयो न देवा जनिमा धमंतः। शुचंतो अग्निं ववृधंत इंद्रमूर्वं गव्यं परिषदंतो अग्मन्॥१७॥ आ यूथेव क्षुमति पश्वो अख्यद्देवानां यज्जनिमांत्युग्र। मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायोः॥१८॥ अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः। अनूनमग्निं पुरुधा सुश्चंद्रं देवस्य मर्मृजतश्चारु चक्षुः॥१९॥ एता ते अग्न उचथानि वेधोऽवोचाम

कवये ता जुषस्व । उच्छोचस्व कृणुहि वस्यसो नो महो रायः
पुरुवार प्र यंधि ॥२०॥१९॥

॥३॥ १-१६ वामदेवः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥३॥ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोद-
स्योः । अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वं
॥१॥ अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवा-
साः । अर्वाचीनः परिवीतो नि षीदेमा उ ते स्वपाक प्रती-
चीः ॥२॥ आशृण्वते अदृपिताय मन्म नृचक्षसे सुमृळीकाय
वेधः । देवाय शस्तिममृताय शंस ग्रावेव सोता मधुषुद्यमीळे
॥३॥ त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वा-
धीः । कदा त उक्था सधमाद्यानि कदा भवंति सख्या गृहे
ते ॥४॥ कथा ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न
आगः । कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भ-
गाय ॥५॥२०॥ कद्धिष्ण्यासु वृधसानो अग्ने कद्वाताय प्रतवसे
शुभंये । परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥६॥
कथा महे पुष्टिंभराय पूष्णे कद्रुद्राय सुमखाय हविर्दे । कद्वि-
ष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै ॥७॥ कथा
शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः । प्रति
ब्रवोऽदितये तुराय साधा दिवो जातवेदश्चिकित्वान् ॥८॥
ऋतेन ऋतं नियतमीळ आ गोरामा सचा मधुमत्पक्वमग्ने ।
कृष्णा सती रुशता धासिनैषा जामर्येण पयसा पीपाय
॥९॥ ऋतेन हि ष्मा वृषभश्चिदक्तः पुमाँ अग्निः पयसा
पृष्ठ्येन । अस्पंदमानो अचरद्वयोधा वृषा शुक्रं दुदुहे पृश्नि-
रूधः ॥१०॥२१॥ ऋतेनाद्रिं व्यसन्भिदंतः समंगिरसो नवंत गो-

भिः। शुनं नरः परि षदन्नुषासमाविः स्वरभवज्जाते अग्नौ ॥११॥
ऋतेन देवीरमृता अमृक्ता अर्णोभिरापो मधुमद्भिरग्ने। वाजी
न सर्गेषु प्रस्तुभानः प्र सदमित्स्रवितवे दधन्युः ॥१२॥ मा कस्य
यक्षं सदमिद्धुरो गा मा वेशस्य प्रमिनतो मापेः। मा भ्रातुरग्ने
अनृजोर्ऋणं वेर्मा सख्युर्दक्षं रिपोर्भुजेम ॥१३॥ रक्षा णो अग्ने
तव रक्षणेभी रारक्षाणः सुमख प्रीणानः। प्रति ष्फुर वि रुज
वीड्वंहो जहि रक्षो महि चिद्वावृधानं ॥१४॥ एभिर्भव सुमना
अग्ने अर्कैरिमान्स्पृश मन्मभिः शूर वाजान्। उत ब्रह्माण्यं-
गिरो जुषस्व सं ते शस्तिर्देववाता जरेत ॥१५॥ एता विश्वा
विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि। निवचना
कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः ॥ १६ ॥ २२ ॥

॥ ४ ॥ १–१५ वामदेवः ॥ अग्नी रक्षोहा ॥ त्रिष्टुप् ॥

॥४॥ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ
इभेन। तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्ष-
सस्तपिष्ठैः ॥१॥ तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता
शोशुचानः। तपूंष्यग्ने जुह्वा पतंगानसंदितो वि सृज विष्व-
गुल्काः ॥२॥ प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो
अस्या अदब्धः। यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे
व्यथिरा दधर्षीत् ॥३॥ उदग्ने तिष्ठ प्रत्या तनुष्व न्य१मित्राँ
ओषतात्तिग्महेते। यो नो अरातिं समिधान चक्रे नीचा
तं धक्ष्यतसं न शुष्कं ॥४॥ ऊर्ध्वो भव प्रति विध्याध्यस्मदा-
विष्कृणुष्व दैव्यान्यग्ने। अव स्थिरा तनुहि यातुजूनां जामि-
मजामिं प्र मृणीहि शत्रून् ॥५॥२३॥ स ते जानाति सुमतिं

यविष्ठ य ईवते ब्रह्मणे गातुमैरत् । विश्वान्यस्मै सुदिनानि
रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥६॥ सेदग्ने अस्तु सुभगः
सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः । पिप्रीषति स्व आ-
युषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥७॥ अर्चामि ते
सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः । स्वश्वास्त्वा
सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥८॥ इह त्वा
भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून् । क्रीळन्तस्त्वा
सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानां ॥९॥ यस्त्वा
स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन । तस्य त्राता
भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥१०॥२४॥
महो रुजामि बंधुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥११॥
अस्वप्नजस्तरणयः सुशेवा अतंद्रासोऽवृका अश्रमिष्ठाः । ते
पायवः सध्र्यंचो निषद्याग्ने तव नः पांत्वमूर ॥१२॥ ये पायवो
मामतेयं ते अग्ने पश्यंतो अंधं दुरितादरक्षन् । ररक्ष तान्त्सु-
कृतो विश्ववेदा दिप्संत इद्रिपवो नाह देभुः ॥१३॥ त्वया वयं
सधन्य१स्त्वोतास्तव प्रणीत्यश्याम वाजान् । उभा शंसा सूदय
सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥१४॥ अया ते अग्ने समिधा
विधेम प्रति स्तोमं शस्यमानं गृभाय । दहाशसो रक्षसः पा-
ह्य१स्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥१५॥२५॥४॥

॥ ५ ॥ १–१५ वामदेवः ॥ वैश्वानरः ॥ त्रिष्टुप् ॥

॥५॥ वैश्वानराय मीळ्हुषे सजोषाः कथा दाशेमाग्नये बृ-
हद्भाः । अनूनेन बृहता वक्षथेनोप स्तभायदुपमिन्न रोधः ॥१॥

मा निंदत य इमां मह्यं रातिं देवो ददौ मर्त्याय स्वधावान्।
पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो यह्वो अग्निः
॥२॥ साम द्विबर्हा महि तिग्मभृष्टिः सहस्ररेता वृषभस्तु-
विष्मान्। पदं न गोरपगूळ्हं विविद्वानग्निर्मह्यं प्रेदु वोचन्म-
नीषां॥३॥ प्र ताँ अग्निर्बभसत्तिग्मजंभस्तपिष्ठेन शोचिषा यः
सुराधाः। प्र ये मिनंति वरुणस्य धाम प्रिया मित्रस्य चेततो
ध्रुवाणि॥४॥ अभ्रातरो न योषणो व्यंतः पतिरिपो न जनयो
दुरेवाः। पापासः संतो अनृता असत्या इदं पदमजनता गभीरं
॥५॥१॥ इदं मे अग्ने कियते पावकामिनते गुरुं भारं न मन्म।
बृहद्दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु॥६॥ त-
मिन्न्वे३व समना समानमभि क्रत्वा पुनती धीतिरश्याः। स-
सस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपितं जबारु॥७॥ प्रवाच्यं
वचसः किं मे अस्य गुहा हितमुप निणिग्वदंति। यदुस्रि-
याणामप वारिव व्रन्पाति प्रियं रुपो अग्रं पदं वेः॥८॥ इदमु
त्यन्महि महामनीकं यदुस्रिया सचत पूर्व्यं गौः। ऋतस्य पदे
अधि दीद्यानं गुहा रघुष्यद्रघुयद्विवेद॥९॥ अध द्युतानः पित्रोः
सचासामनुत गुह्यं चारु पृश्नेः। मातुष्पदे परमे अंति षद्गो-
र्वृष्णः शोचिषः प्रयतस्य जिह्वा॥१०॥२॥ ऋतं वोचे नमसा
पृच्छ्यमानस्तवाशसा जातवेदो यदीदं। त्वमस्य क्षयसि यद्ध
विश्वं दिवि यदु द्रविणं यत्पृथिव्यां॥११॥ किं नो अस्य द्रविणं
कद्ध रत्नं वि नो वोचो जातवेदश्चिकित्वान्। गुहाध्वनः परमं
यन्नो अस्य रेकु पदं न निदाना अगन्म॥१२॥ का मर्यादा
वयुना कद्ध वाममच्छा गमेम रघवो न वाजं। कदा नो
देवीरमृतस्य पत्नीः सूरो वर्णेन ततनन्नुषासः॥१३॥ अनिरेण

वचसा फल्गुेन प्रतीत्येन कृधुनातृपासः। अधा ते अग्ने किमिहा वदंत्यनायुधास आसता सचंतां ॥१४॥ अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आ रुरोच। रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौत् ॥१५॥३॥

॥ ६ ॥ १—११ वामदेवः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ ६ ॥ ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान्। त्वं हि विश्वमभ्यसि मन्म प्र वेधसश्चित्तिरसि मनीषां ॥१॥ अमूरो होता न्यसादि विक्ष्वग्निर्मंद्रो विदथेषु प्रचेताः। ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्तभायदुप द्यां ॥२॥ यता सुजूर्णी रातिनी घृताची प्रदक्षिणिद्देवतातिमुराणः। उदु स्वरुर्नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः ॥३॥ स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात्। पर्यग्निः पशुपा न होता त्रिविष्ट्येति प्रदिव उराणः ॥४॥ परि त्मना मितद्रुरेति होताग्निर्मंद्रो मधुवचा ऋतावा। द्रवंत्यस्य वाजिनो न शोका भयंते विश्वा भुवना यदभ्राट् ॥५॥४॥ भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः। न यत्ते शोचिस्तमसा वरंत न ध्वस्मानस्तन्वी३ रेप आ धुः ॥६॥ न यस्य सातुर्जनितोरवारि न मातरापितरा नू चिदिष्टौ। अधा मित्रो न सुधितः पावको३ग्निर्दीदाय मानुषीषु विक्षु ॥७॥ द्विर्यं पंच जीजनन्त्संवसानाः स्वसारो अग्निं मानुषीषु विक्षु। उषर्बुधमथर्यो३न दंतं शुक्रं स्वासं परशुं न तिग्मं ॥८॥ तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वंचः स्वंचः। अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वंत दस्माः ॥९॥ ये ह त्ये ते सहमाना अयासस्त्वेषा-

सो अग्ने अर्चयश्चरंति। श्येनासो न दुवसनासो अर्थं तुविष्व-
णसो मारुतं न शर्धः ॥१०॥ अकारि ब्रह्म समिधान तुभ्यं
शंसात्युक्थं यजते व्यू धाः। होतारमग्निं मनुषो नि षेदुर्न-
मस्यंत उशिजः शंसमायोः ॥११॥५॥

॥७॥ १–११ वामदेवः॥ अग्निः॥ १ जगती। २–६ अनुष्टुप्। ७–११ त्रिष्टुप्॥

॥७॥ अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरे-
ष्वीड्यः। यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे-
विशे ॥१॥ अग्ने कदा त आनुषग्भुवद्देवस्य चेतनं। अधा हि त्वा
जगृभ्रिरे मर्तासो विक्ष्वीड्यं ॥२॥ ऋतावानं विचेतसं पश्यंतो
द्यामिव स्तृभिः। विश्वेषामध्वराणां हस्कर्तारं दमेदमे ॥३॥ आशुं
दूतं विवस्वतो विश्वा यश्चर्षणीरभि। आ जभ्रुः केतुमायवो भृग-
वाणं विशेविशे ॥४॥ तमीं होतारमानुषक्चिकित्वांसं नि षेदिरे।
रण्वं पावकशोचिषं यजिष्ठं सप्त धामभिः ॥५॥६॥ तं शश्वतीषु
मातृषु वन आ वीतमश्रितं। चित्रं संतं गुहा हितं सुवेदं कू-
चिदर्थिनं ॥६॥ ससस्य यद्वियुता सस्मिन्नूधन्नृतस्य धामन्रणयंत
देवाः। महाँ अग्निर्नमसा रातहव्यो वेरध्वराय सदमिदृतावा
॥७॥ वेरध्वरस्य दूत्यानि विद्वानुभे अंता रोदसी संचिकित्वान्।
दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि ॥८॥ कृष्णं त
एम रुशतः पुरो भाश्चरिष्ण्व१र्चिर्वपुषामिदेकं। यदप्रवीता दधते
ह गर्भं सद्यश्चिज्जातो भवसीदु दूतः ॥९॥ सद्यो जातस्य ददृशान-
मोजो यदस्य वातो अनुवाति शोचिः। वृणक्ति तिग्मामतसेषु
जिह्वां स्थिरा चिदन्ना दयते वि जंभैः ॥१०॥ तृषु यदन्ना तृषुणा
ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः। वातस्य मेळिं सचते नि-
जूर्वन्नाशुं न वाजयते हिन्वे अर्वा ॥११॥७॥

॥ ८ ॥ १–८ वामदेवः ॥ अग्निः ॥ गायत्री ॥

॥८॥ दूतं वो विश्ववेदसं हव्यवाहममर्त्यं । यजिष्ठमृंजसे गिरा
॥१॥ स हि वेदा वसुधितिं महाँ आरोधनं दिवः । स देवाँ एह
वक्षति ॥२॥ स वेद देव आनमं देवाँ ऋतायते दमे । दाति
प्रियाणि चिद्वसु ॥३॥ स होता सेदु दूत्यं चिकित्वाँ अंतरीयते ।
विद्वाँ आरोधनं दिवः ॥४॥ ते स्याम ये अग्नये ददाशुर्हव्यदा-
तिभिः । य ईं पुष्यंत इंधते ॥५॥ ते राया ते सुवीर्यैः ससवांसो
वि शृण्विरे । ये अग्ना दधिरे दुवः ॥६॥ अस्मे रायो दिवेदिवे
सं चरंतु पुरुस्पृहः । अस्मे वाजास ईरतां ॥७॥ स विप्रश्चर्ष-
णीनां शवसा मानुषाणां । अति क्षिप्रेव विध्यति ॥८॥८॥

॥ ९ ॥ १–८ वामदेवः ॥ अग्निः ॥ गायत्री ॥

॥९॥ अग्ने मृळ महाँ असि य ईमा देवयुं जनं । इयेथ ब-
र्हिरासदं ॥१॥ स मानुषीषु दूळभो विक्षु प्रावीरमर्त्यः । दूतो
विश्वेषां भुवत् ॥२॥ स सद्म परि णीयते होता मंद्रो दिवि-
ष्टिषु । उत पोता नि षीदति ॥३॥ उत ग्ना अग्निरध्वर उतो
गृहपतिर्दमे । उत ब्रह्मा नि षीदति ॥४॥ वेषि ह्यध्वरीयतामुप-
वक्ता जनानां । हव्या च मानुषाणां ॥५॥ वेषीद्वस्य दूत्यं१ यस्य
जुजोषो अध्वरं । हव्यं मर्तस्य वोळ्हवे ॥६॥ अस्माकं जोष्यध्वर-
मस्माकं यज्ञमंगिरः । अस्माकं शृणुधी हवं ॥७॥ परि ते दू-
ळभो रथोऽस्माँ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥८॥९॥

॥ १० ॥ १–८ वामदेवः ॥ अग्निः ॥ १–३ पदपंक्तिः । ४. ६. ७ उष्णिक् पदपंक्तिर्वा ।
५ महापदपंक्तिः । ८ उष्णिक् ॥

॥१०॥ अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशं । ऋध्या-
मा त ओहैः ॥१॥ अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथी-
र्ऋतस्य बृहतो बभूथ ॥२॥ एभिर्नो अर्कैर्भवा नो अर्वाङ् स्व१र्ण

ज्योतिः। अग्ने विश्वेभिः सुमना अनीकैः ॥ ३ ॥ आभिष्टे अद्य गीर्भिर्गृणंतोऽग्ने दाशेम। प्र ते दिवो न स्तनयंति शुष्माः ॥ ४ ॥ तव स्वादिष्ठाग्ने संदृष्टिरिदा चिदह्न इदा चिदक्तोः। श्रिये रुक्मो न रोचत उपाके ॥ ५ ॥ घृतं न पूतं तनूररेपाः शुचि हिरण्यं। तत्ते रुक्मो न रोचत स्वधावः ॥ ६ ॥ कृतं चिद्धि ष्मा सनेमि द्वेषोऽग्न इनोषि मर्तात्। इत्था यजमानादृतावः ॥ ७ ॥ शिवा नः सख्या संतु भ्रात्राग्ने देवेषु युष्मे। सा नो नाभिः सदने सस्मिन्नूधन् ॥ ८ ॥ १० ॥ १ ॥

॥ ११ ॥ १–६ वामदेवः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ ११ ॥ भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य। रुशद्दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नं ॥ १ ॥ वि षाह्यग्ने गृणते मनीषां खं वेपसा तुविजात स्तवानः। विश्वेभिर्यद्वावनः शुक्र देवैस्तन्नो रास्व सुमहो भूरि मन्म ॥ २ ॥ त्वदग्ने काव्या त्वन्मनीषास्त्वदुक्था जायंते राध्यानि। त्वदेति द्रविणं वीरपेशा इत्थाधिये दाशुषे मर्त्याय ॥ ३ ॥ त्वद्वाजी वाजंभरो विहाया अभिष्टिकृज्जायते सत्यशुष्मः। त्वद्रयिर्देवजूतो मयोभुस्त्वदाशुर्जूजुवाँ अग्ने अर्वा ॥ ४ ॥ त्वामग्ने प्रथमं देवयंतो देवं मर्ता अमृत मंद्रजिह्वं। द्वेषोयुतमा विवासंति धीभिर्दमूनसं गृहपतिममूरं ॥ ५ ॥ आरे अस्मदमतिमारे अंह आरे विश्वां दुर्मतिं यन्निपासि। दोषा शिवः सहसः सूनो अग्ने यं देव आ चित्सचसे स्वस्ति ॥ ६ ॥ ११ ॥

॥ १२ ॥ १–६ वामदेवः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ १२ ॥ यस्त्वामग्न इनधते यतस्रुक्त्रिस्ते अन्नं कृणवत्सस्मिन्नहन्। स सु द्युम्नैरभ्यस्तु प्रसक्षत्तव क्रत्वा जातवेदश्चि-

कित्वान् ॥१॥ इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा संपर्यन् । स इधानः प्रति दोषामुषासं पुष्यन्नयिं सचते घ्नन्नमित्रान् ॥२॥ अग्निरीशे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः । दधाति रत्नं विधते यविष्ठो व्यानुषङ्मर्त्याय स्वधावान् ॥३॥ यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः । कृधी ष्व१स्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥४॥ महश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानां । मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः ॥५॥ यथा ह त्यद्वसवो गौर्यं चित्पदि षितामर्मुचता यजत्राः । एवो ष्व१स्मन्मुंचता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥६॥१२॥

॥ १३ ॥ १-५ वामदेवः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१३॥ प्रत्यग्निरुषसामग्रमख्यद्विभातीनां सुमना रत्नधेयं । यातमश्विना सुकृतो दुरोणमुत्सूर्यो ज्योतिषा देव एति ॥१॥ ऊर्ध्वं भानुं सविता देवो अश्रेद्द्रप्सं दविध्वद्गविषो न सत्वा । अनु व्रतं वरुणो यंति मित्रो यत्सूर्यं दिव्यारोहयंति ॥२॥ यं सीमकृण्वन्तमसे विपृचे ध्रुवक्षेमा अनवस्यंतो अर्थं । तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहंति ॥३॥ वहिष्ठेभिर्विहरन्यासि तंतुमवव्ययन्नसितं देव वस्म । दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्व१ंतः ॥४॥ अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न । कया याति स्वधया को ददर्श दिवः स्कंभः समृतः पाति नाकं ॥५॥१३॥

॥ १४ ॥ १-५ वामदेवः ॥ अग्निर्लिंगोक्तदेवता वा ॥ त्रिष्टुप् ॥

॥ १४ ॥ प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमाना

महोभिः। आ नासत्योरुगाया रथेनेमं यज्ञमुप नो यातमच्छ ॥१॥ ऊर्ध्वं केतुं सविता देवो अश्रेज्ज्योतिर्विश्वस्मै भुवनाय कृण्वन्। आप्रा द्यावापृथिवी अंतरिक्षं वि सूर्यो रश्मिभिश्चेकितानः ॥२॥ आवहंत्यरुणीर्ज्योतिषागान्मही चित्रा रश्मिभिश्चेकिताना। प्रबोधयंती सुविताय देव्युषा ईयते सुयुजा रथेन ॥३॥ आ वां वहिष्ठा इह ते वहंतु रथा अश्वास उषसो व्युष्टौ। इमे हि वां मधुपेयाय सोमा अस्मिन्यज्ञे वृषणा मादयेथां ॥४॥ अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न। कया याति स्वधया को ददर्श दिवः स्कंभः समृतः पाति नाकं ॥५॥१४॥

॥१५॥ १-१० वामदेवः॥ १-६ अग्निः। ७, ८ सोमकः साहदेव्यः। ९, १० अश्विनौ॥ गायत्री॥

॥१५॥ अग्निर्होता नो अध्वरे वाजी सन्परि णीयते। देवो देवेषु यज्ञियः ॥१॥ परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव। आ देवेषु प्रयो दधत् ॥२॥ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे ॥३॥ अयं यः सृंजये पुरो दैववाते समिध्यते। द्युमाँ अमित्रदंभनः ॥४॥ अस्य घा वीर ईवतोऽग्नेरीशीत मर्त्यः। तिग्मजंभस्य मीळ्हुषः ॥५॥१५॥ तमर्वंतं न सानसिमरुषं न दिवः शिशुं। मर्मृज्यंते दिवेदिवे ॥६॥ बोधद्यन्मा हरिभ्यां कुमारः साहदेव्यः। अच्छा न हूत उदरं ॥७॥ उत त्या यजता हरी कुमारात्साहदेव्यात्। प्रयता सद्य आ ददे ॥८॥ एष वां देवावश्विना कुमारः साहदेव्यः। दीर्घायुरस्तु सोमकः ॥९॥ तं युवं देवावश्विना कुमारं साहदेव्यं। दीर्घायुषं कृणोतन ॥१०॥१६॥

॥ १६ ॥ १–२१ वामदेवः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१६॥ आ सत्यो यातु मघवाँ ऋजीषी द्रवंत्वस्य हरय उप
नः। तस्मा इदंधः सुषुमा सुदक्षमिहाभिपित्वं करते गृणानः॥१॥
अव स्य शूराध्वनो नांतेऽस्मिन्नो अद्य सवने मंदध्यै। शंसात्यु-
क्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म॥२॥ कविर्न निण्यं
विदथानि साधन्वृषा यत्सेकं विपिपानो अर्चात्। दिव इत्था
जीजनत्सप्त कारूनह्ना चिच्चक्रुर्वयुना गृणंतः॥३॥ स्व१र्यद्वेदि
सुदृशीकमर्कैर्महि ज्योती रुरुचुर्यद्ध वस्तोः। अंधा तमांसि
दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ॥४॥ ववक्ष इंद्रो
अमितमृजीष्यु१भे आ पप्रौ रोदसी महित्वा। अतश्चिदस्य
महिमा वि रेच्यभि यो विश्वा भुवना बभूव॥५॥१७॥ विश्वानि
शक्रो नर्याणि विद्वानपो रिरेच सखिभिर्निकामैः। अश्मानं
चिद्ये बिभिदुर्वचोभिर्व्रजं गोमंतमुशिजो वि वव्रुः॥६॥ अपो
वृत्रं वव्रिवांसं पराहन्प्रावत्ते वज्रं पृथिवी सचेताः। प्रार्णांसि
समुद्रियाण्यैनोः पतिर्भवञ्छवसा शूर धृष्णो॥७॥ अपो यदद्रिं
पुरुहूत दर्दराविर्भुवत्सरमा पूर्व्यं ते। स नो नेता वाजमा दर्षि
भूरिं गोत्रा रुजन्नंगिरोभिर्गृणानः॥८॥ अच्छा कविं नृमणो
गा अभिष्टौ स्वर्षाता मघवन्नाधमानं। ऊतिभिस्तमिषणो
द्युम्नहूतौ नि मायावानब्रह्मा दस्युरर्त॥९॥ आ दस्युघ्ना मनसा
याह्यस्तं भुवत्ते कुत्सः सख्ये निकामः। स्वे योनौ नि षदतं
सरूपा वि वां चिकित्सदृतचिद्ध नारी॥१०॥१८॥ यासि
कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः। ऋज्रा वाजं
न गध्यं युयूषन्कविर्यदहन्पार्याय भूषात्॥११॥ कुत्साय
शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा। सद्यो

दस्यून्प्र मृण कुत्सेन प्र सूरश्चक्रं वृहताद्भीके ॥१२॥ त्वं पिप्रुं
मृगयं शूशुवांसमृजिश्वने वैदथिनाय रंधीः । पंचाशत्कृष्णा
नि वपः सहस्रात्कं न पुरो जरिमा वि दर्दः ॥१३॥ सूर उपाके
तन्वं१ दधानो वि यत्ते चेत्यमृतस्य वर्पः । मृगो न हस्ती तवि-
षीमुषाणः सिंहो न भीम आयुधानि बिभ्रत ॥१४॥ इंद्रं कामा
वसूयंतो अग्मन्स्वर्मीळ्हे न सवने चकानाः । श्रवस्यवः
शशमानास उक्थैरोको न रण्वा सुदृशीव पुष्टिः ॥१५॥१९॥
तमिद्व इंद्रं सुहवं हुवेम यस्ता चकार नर्या पुरूणि । यो मावते
जरित्रे गध्यं चिन्मक्षू वाजं भरति स्पार्हराधाः ॥१६॥ तिग्मा
यदंतरशनिः पताति कस्मिंश्चिच्छूर मुहुके जनानां । घोरा यदर्य
समृतिर्भवात्यध स्मा नस्तन्वो बोधि गोपाः ॥१७॥ भुवोऽवि-
ता वामदेवस्य धीनां भुवः सखावृको वाजसातौ । त्वामनु प्रम-
तिमा जगन्मोरुशंसो जरित्रे विश्वध स्याः ॥१८॥ एभिर्नृभिरिंद्र
त्वायुभिष्ट्वा मघवद्भिर्मघवन्विश्व आजौ । द्यावो न द्युम्नैरभि
संतो अर्यः क्षपो मदेम शरदश्च पूर्वीः ॥१९॥ एवेदिंद्राय वृष-
भाय वृष्णे ब्रह्माकर्म भृगवो न रथं । नू चिद्यथा नः सख्या
वियोषदसन्न उग्रोऽविता तनूपाः ॥२०॥ नू ष्टुत इंद्र नू गृणान
इषं जरित्रे नद्यो३ न पीपेः । अकारि ते हरिवो ब्रह्म नव्यं
धिया स्याम रथ्यः सदासाः ॥२१॥२०॥

॥१७॥ १–२१ वामदेवः ॥ इंद्रः ॥ १–१४. १६–२१ त्रिष्टुप् । १५ एकपदा ॥

॥१७॥ त्वं महाँ इंद्र तुभ्यं ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः ।
त्वं वृत्रं शवसा जघन्वान्सृजः सिंधूँरहिना जग्रसानान् ॥१॥ तव
त्विषो जनिमन्रेजत द्यौ रेजद्भूमिर्भियसा स्वस्य मन्योः । ऋ-
घायंत सुभ्व१ः पर्वतास आर्दन्धन्वानि सरयंत आपः ॥२॥ भि-

नज्रिरिं शवसा वज्रमिष्णन्नाविष्कृण्वानः सहसान ओजः।
वधीद्वृत्रं वज्रेण मंदसानः सरन्नापो जवसा हतवृष्णीः॥३॥
सुवीरस्ते जनिता मन्यत द्यौरिंद्रस्य कर्ता स्वपस्तमो भूत्। य
ईं जजान स्वर्यं सुवज्रमनपच्युतं सदसो न भूम॥४॥ य एक
इच्च्यावयति प्र भूमा राजा कृष्टीनां पुरुहूत इंद्रः। सत्यमेनमनु
विश्वे मदंति रातिं देवस्य गृणतो मघोनः॥५॥२१॥ सत्रा सो-
मा अभवन्नस्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः। सत्राभवो
वसुपतिर्वसूनां दत्रे विश्वा अधिथा इंद्र कृष्टीः॥६॥ त्वमध प्रथ-
मं जायमानोऽमे विश्वा अधिथा इंद्र कृष्टीः। त्वं प्रति प्रवत
आशयानमहिं वज्रेण मघवन्वि वृश्चः॥७॥ सत्राहणं दाधृषिं
तुम्रमिंद्रं महामपारं वृषभं सुवज्रं। हंता यो वृत्रं सनितोत
वाजं दाता मघानि मघवा सुराधाः॥८॥ अयं वृतश्चातयते
समीचीर्य आजिषु मघवा शृण्व एकः। अयं वाजं भरति यं
सनोत्यस्य प्रियासः सख्ये स्याम॥९॥ अयं शृण्वे अध जयन्नुत
घ्नन्नयमुत प्र कृणुते युधा गाः। यदा सत्यं कृणुते मन्युमिंद्रो
विश्वं दृळ्हं भयत एजदस्मात्॥१०॥२२॥ समिंद्रो गा अजयत्सं
हिरण्या समश्विया मघवा यो ह पूर्वीः। एभिर्नृभिर्नृतमो
अस्य शाकै रायो विभक्ता संभरश्च वस्वः॥११॥ कियत्स्विदिंद्रो
अध्येति मातुः कियत्पितुर्जनितुर्यो जजान। यो अस्य शुष्मं
मुहुकैरियर्ति वातो न जूतः स्तनयद्भिरभ्रैः॥१२॥ क्षियंतं त्वम-
क्षियंतं कृणोतीयर्ति रेणुं मघवा समोहं। विभंजनुरशनिमाँ इव
द्यौरुत स्तोतारं मघवा वसौ धात्॥१३॥ अयं चक्रमिषणत्सूर्य-
स्य न्येतशं रीरमत्ससृमाणं। आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो
बुध्ने रजसो अस्य योनौ॥१४॥ असिक्न्यां यजमानो न होता

॥१५॥२३॥ गव्यंत इंद्रं सख्याय विप्रा अश्वायंतो वृषणं वाजयंतः । जनीयंतो जनिदामक्षितोतिमा च्यावयामोऽवते न कोशं ॥१६॥ त्राता नो बोधि ददृशान आपिरभिख्याता मर्डिता सोम्यानां । सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयोधाः ॥१७॥ सखीयतामविता बोधि सखा गृणान इंद्र स्तुवते वयो धाः । वयं ह्या ते चकृमा सबाध आभिः शमीभिर्महयंत इंद्र ॥१८॥ स्तुत इंद्रो मघवा यद्ध वृत्रा भूरीण्येको अप्रतीनि हंति । अस्य प्रियो जरिता यस्य शर्मन्नकिर्देवा वारयंते न मर्ताः ॥१९॥ एवा न इंद्रो मघवा विरप्शी करत्सत्या चर्षणीधृदनर्वा । त्वं राजा जनुषां धेह्यस्मे अधि श्रवो माहिनं यज्जरित्रे ॥२०॥ नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३न पीपेः । अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥२१॥२४॥

॥ १८ ॥ १-१३ संवाद इंद्रादितिवामदेवानां ॥ त्रिष्टुप् ॥

॥१८॥ अयं पंथा अनुवित्तः पुराणो यतो देवा उदजायंत विश्वे । अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः ॥१॥ नाहमतो निरया दुर्गहैतत्तिरश्चता पार्श्वान्निर्गमाणि । बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै ॥२॥ परायतीं मातरमन्वचष्ट न नानु गान्यनु नू गमानि । त्वष्टुर्गृहे अपिबत्सोममिंद्रः शतधन्यं चम्वोः सुतस्य ॥३॥ किं स ऋधक्कृणवद्यं सहस्रं मासो जभार शरदश्च पूर्वीः । नही न्वस्य प्रतिमानमस्त्यंतर्जातेषूत ये जनित्वाः ॥४॥ अवद्यमिव मन्यमाना गुहाकरिंद्रं माता वीर्येणा न्यृष्टं । अथोदस्थात्स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः

॥ ५ ॥ २५ ॥ एता अर्षन्त्यललाभवंतीर्ऋतावरीरिव संक्रोशमानाः । एता वि पृच्छ किमिदं भनंति कमापो अद्रिं परिधिं रुजंति ॥ ६ ॥ किमु ष्विदस्मै निविदो भनंतेंद्रस्यावद्यं दिधिषंत आपः । ममैतान्पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद्वि सिंधून् ॥ ७ ॥ ममच्चन त्वा युवतिः परास ममच्चन त्वा कुषवा जगार । ममच्चिदापः शिशवे ममृड्युर्ममच्चिदिंद्रः सहसोदतिष्ठत् ॥ ८ ॥ ममच्चन ते मघवन्व्यंसो निविविध्वाँ अप हनू जघान । अधा निविद्ध उत्तरो बभूवाञ्छिरो दासस्य सं पिणग्वधेन ॥ ९ ॥ गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिंद्रं । अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्व इच्छमानं ॥ १० ॥ उत माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः । अथाब्रवीद्वृत्रमिंद्रो हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व ॥ ११ ॥ कस्ते मातरं विधवामचक्रच्छयुं कस्त्वामजिघांसच्चरंतं । कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणाः पितरं पादगृह्य ॥ १२ ॥ अवर्त्या शुन आंत्राणि पेचे न देवेषु विविदे मर्डितारं । अपश्यं जायाममहीयमानामधा मे श्येनो मध्वा जभार ॥ १३ ॥ २६ ॥ ५ ॥

॥ १९ ॥ १–११ वामदेवः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ १९ ॥ एवा त्वामिंद्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः । महामुभे रोदसी वृद्धमृष्वं निरेकमिद्वृणते वृत्रहत्ये ॥ १ ॥ अवासृजंत जिव्रयो न देवा भुवः सम्राळिंद्र सत्ययोनिः । अहन्नहिं परिशयानमर्णः प्र वर्तनीररदो विश्वधेनाः ॥ २ ॥ अतृप्णुवंतं वियतमबुध्यमबुध्यमानं सुषुपाणमिंद्र । सप्त प्रति प्रवत आशयानमहिं वज्रेण वि रिणा अपर्वन् ॥ ३ ॥ अक्षो-

दयच्छवसा क्षाम बुध्नं वार्णे वातस्तविषीभिरिंद्रः । दृळ्हा
न्यौभ्नादुशमान ओजोऽवाभिनत्ककुभः पर्वतानां ॥४॥ अभि
प्र दद्रुर्जनयो न गर्भं रथा इव प्र ययुः साकमद्रयः । अतर्पयो
विसृत उब्ज ऊर्मीन्त्वं वृताँ अरिणा इंद्र सिंधून् ॥५॥१॥ त्वं
महीमवनिं विश्वधेनां तुर्वीतये वय्याय क्षरंतीं । अरमयो
नमसैजदर्णः सुतरणाँ अकृणोरिंद्र सिंधून् ॥६॥ प्राग्रुवो न-
भन्वो३न वक्वा ध्वस्रा अपिन्वद्युवतीर्ऋतज्ञाः । धन्वान्यज्राँ
अपृणक्तृषाणाँ अधोगिंद्रः स्तर्यो३दंसुपत्नीः ॥७॥ पूर्वीरु-
षसः शरदश्च गूर्ता वृत्रं जघन्वाँ असृजद्वि सिंधून् । परिष्ठिता
अतृणद्बद्बधानाः सीरा इंद्रः स्रवितवे पृथिव्या ॥८॥ वम्रीभिः
पुत्रमग्रुवो अदानं निवेशनाद्धरिव आ जभर्थ । व्यं१धो अ-
ख्यदहिमाददानो निर्भूदुखच्छित्समरंत पर्व ॥९॥ प्र ते पूर्वा-
णि करणानि विप्राविद्वाँ आह विदुषे करांसि । यथायथा
वृष्ण्यानि स्वगूर्तापांसि राजन्नर्याविवेषीः ॥१०॥ नू ष्टुत इंद्र
नू गृणान इषं जरित्रे नद्यो३न पीपेः । अकारि ते हरिवो
ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥२॥

॥ २० ॥ १–११ वामदेवः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२०॥ आ न इंद्रो दूरादा न आसादभिष्टिकृदवसे यास-
दुग्रः । ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगे समत्सु तुर्वणिः पृत-
न्यून् ॥१॥ आ न इंद्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे
च । तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसा-
तौ ॥२॥ इमं यज्ञं त्वमस्माकमिंद्र पुरो दधत्सनिष्यसि क्रतुं
नः । श्वघ्नीव वज्रिन्त्सनये धनानां त्वया वयमर्य आजिं

जयेम ॥३॥ उशन्नु षु णः सुमना उपाके सोमस्य नु सुषुतस्य
स्वधावः । पा इंद्र प्रतिभृतस्य मध्वः समंधसा ममदः पृष्ठ्येन
॥४॥ वि यो ररप्श ऋषिभिर्नवेभिर्वृक्षो न पक्वः सृण्यो न जेता ।
मर्यो न योषामभि मन्यमानोऽच्छा विवक्मि पुरुहूतमिंद्रं
॥५॥३॥ गिरिर्न यः स्वतवाँ ऋष्व इंद्रः सनादेव सहसे जात
उग्रः । आदर्ता वज्रं स्थविरं न भीम उद्नेव कोशं वसुना न्यृष्टं
॥६॥ न यस्य वर्ता जनुषा न्वस्ति न राधस आमरीता मघ-
स्य । उद्वावृषाणस्तविषीव उग्रास्मभ्यं दद्धि पुरुहूत रायः ॥७॥
ईक्षे रायः क्षयस्य चर्षणीनामुत व्रजमपवर्तासि गोनां । शि-
क्षानरः समिथेषु प्रहावान्वस्वो राशिमभिनेतासि भूरिं ॥८॥
कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहु का चिदृष्वः ।
पुरु दाशुषे विचयिष्ठो अंहोऽथा दधाति द्रविणं जरित्रे ॥९॥
मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत्ते ।
नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिंद्र स्तुवंतः
॥१०॥ नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३न पीपेः । अ-
कारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥४॥

॥ २१ ॥ १–११ वामदेवः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२१॥ आ यात्विंद्रोऽवस उप न इह स्तुतः सधमादस्तु
शूरः । वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात्
॥१॥ तस्येदिह स्तवथ वृष्ण्यानि तुविद्युम्नस्य तुविराधसो
नॄन् । यस्य क्रतुर्विदथ्यो३न सम्राट् साह्वाँ तरुत्रो अभ्यस्ति
कृष्टीः ॥२॥ आ यात्विंद्रो दिव आ पृथिव्या मक्षू समुद्रादुत वा
पुरीषात् । स्वर्णरादवसे नो मरुत्वान्परावतो वा सदनादृतस्य
॥ ३ ॥ स्थूरस्य रायो बृहतो य ईशे तमु ष्टवाम विदथेष्विंद्रं ।

यो वायुना जयति गोमतीषु प्र धृष्णुया नयति वस्यो अच्छ
॥४॥ उप यो नमो नमसि स्तभायन्नियर्ति वाचं जनयन्यजध्यै ।
ऋंजसानः पुरुवार उक्थैरेंद्रं कृण्वीत सदनेषु होता ॥५॥ धि-
षा यदि धिषण्यंतः सरण्यान्सदंतो अद्रिमौशिजस्य गोहे ।
आ दुरोषाः पास्त्यस्य होता यो नो महान्त्संवरणेषु वह्निः
॥६॥ सत्रा यदीं भार्वरस्य वृष्णः सिषक्ति शुष्मः स्तुवते भराय ।
गुहा यदीमौशिजस्य गोहे प्र यद्धिये प्रायसे मदाय ॥७॥ वि
यद्वरांसि पर्वतस्य वृण्वे पयोभिर्जिन्वे अपां जवांसि । वि-
दद्गौरस्य गवयस्य गोहे यदी वाजाय सुध्यो३ वहंति ॥८॥ भद्रा
ते हस्ता सुकृतोत पाणी प्रयंतारा स्तुवते राध इंद्र । का ते
निषत्तिः किमु नो ममत्सि किं नोदुदु हर्षसे दातवा उ ॥९॥
एवा वस्व इंद्रः सत्यः सम्राड्ढंता वृत्रं वरिवः पूरवे कः । पुरुष्टुत
क्रत्वा नः शग्धि रायो भक्षीय तेऽवसो दैव्यस्य ॥१०॥ नू ष्टुत
इंद्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः । अकारि ते हरिवो
ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥६॥२॥

॥ २२ ॥ १–११ वामदेवः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२२॥ यन्न इंद्रो जुजुषे यच्च वष्टि तन्नो महान्करति शुष्म्या
चित् । ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा
बिभ्रदेति ॥१॥ वृषा वृषंधिं चतुरश्रिमस्यन्नुग्रो बाहुभ्यां नृतमः
शचीवान् । श्रिये परुष्णीमुषमाण ऊर्णां यस्याः पर्वाणि
सख्याय विव्ये ॥२॥ यो देवो देवतमो जायमानो महो वाजे-
भिर्महद्भिश्च शुष्मैः । दधानो वज्रं बाह्वोरुशंतं द्याममेन
रेजयत्प्र भूम ॥३॥ विश्वा रोधांसि प्रवतश्च पूर्वीर्द्यौर्ऋष्वाज्ज-
निमन्नेजत क्षाः । आ मातरा भरति शुष्म्या गोर्नृवत्परि-

ज्मन्नोनुवंत वाताः ॥४॥ ता तू त इंद्र महतो महानि विश्वे-
ष्वित्सवनेषु प्रवाच्या । यच्छूर धृष्णो धृषता दधृष्वानहिं
वज्रेण शवसाविवेषीः ॥५॥७॥ ता तू ते सत्या तुविनृम्ण
विश्वा प्र धेनवः सिस्रते वृष्ण ऊध्नः । अधा ह त्वद्वृषमणो
भियानाः प्र सिंधवो जवसा चक्रमंत ॥६॥ अत्राह ते हरि-
वस्ता उ देवीरवोभिरिंद्र स्तवंत स्वसारः । यत्सीमनु प्र मुचो
बद्बधाना दीर्घामनु प्रसितिं स्यंदयध्यै ॥७॥ पिपीळे अंशु-
र्मद्यो न सिंधुरा त्वा शमी शशमानस्य शक्तिः । अस्मद्र्यक्छु-
शुचानस्य यम्या आशुर्न रश्मिं तुव्योजसं गोः ॥८॥ अस्मे
वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि सत्रा सहुरे सहांसि । अस्मभ्यं
वृत्रा सुहनानि रंधि जहि वधर्वनुषो मर्त्यस्य ॥९॥ अस्माकमित्सु
शृणुहि त्वमिंद्रास्मभ्यं चित्राँ उप माहि वाजान् । अस्मभ्यं
विश्वा इषणः पुरंधीरस्माकं सु मघवन्बोधि गोदाः ॥१०॥ नू
ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३न पीपेः । अकारि ते
हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥८॥

॥ २३ ॥ १–११ वामदेवः ॥ १–७. ११ इंद्रः । ८–१० इंद्र ऋतदेवो वा ॥ त्रिष्टुप् ॥

॥२३॥ कथा महामवृधत्कस्य होतुर्यज्ञं जुषाणो अभि सो-
ममूधः । पिबन्नुशानो जुषमाणो अंधो ववक्ष ऋष्वः शुचते
धनाय ॥१॥ को अस्य वीरः सधमादमाप समानंश सुमतिभिः
को अस्य । कदस्य चित्रं चिकिते कदूती वृधे भुवच्छशमा-
नस्य यज्योः ॥२॥ कथा शृणोति हूयमानमिंद्रः कथा शृण्वन्न-
वसामस्य वेद । का अस्य पूर्वीरुपमातयो ह कथैनमाहुः प-
पुरिं जरित्रे ॥३॥ कथा सबाधः शशमानो अस्य नशदभि द्रविणं
दीध्यानः । देवो भुवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि

यज्जुजोषत् ॥४॥ कथा कदस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं
जुजोष । कथा कदस्य सख्यं सखिभ्यो ये अस्मिन्कामं सुयुजं
ततस्रे ॥५॥९॥ किमादमत्रं सख्यं सखिभ्यः कदा नु ते भ्रात्रं प्र
ब्रवाम । श्रिये सुदृशो वपुरस्य सर्गाः स्व१र्ण चित्रतममिष आ
गोः ॥ ६ ॥ द्रुहं जिघांसन्ध्वरसमनिंद्रां तेतिक्ते तिग्मा तुजसे
अनीका । ऋणा चिद्यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो
बबाधे ॥७॥ ऋतस्य हि शुरुधः संति पूर्वीर्ऋतस्य धीतिर्वृ-
जिनानि हंति । ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः
शुचमान आयोः ॥८॥ ऋतस्य दृळ्हा धरुणानि संति पुरूणि
चंद्रा वपुषे वपूंषि । ऋतेन दीर्घमिषणंत पृक्ष ऋतेन गाव
ऋतमा विवेशुः ॥९॥ ऋतं येमान ऋतमिद्वनोत्यृतस्य शुष्म-
स्तुरया उ गव्युः । ऋताय पृथ्वी बहुले गभीरे ऋताय धेनू परमे
दुहाते ॥१०॥ नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३न पीपेः ।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥११॥१०॥

॥ २४ ॥ १–११ वामदेवः ॥ इंद्रः ॥ १–९. ११ त्रिष्टुप् । १० अनुष्टुप् ॥

॥२४॥ का सुष्टुतिः शवसः सूनुमिंद्रमर्वाचीनं राधस आ
ववर्तत् । ददिर्हि वीरो गृणते वसूनि स गोपतिर्निष्षिधां
नो जनासः ॥१॥ स वृत्रहत्ये हव्यः स ईड्यः स सुष्टुत इंद्रः स-
त्यराधाः । स यामन्ना मघवा मर्त्याय ब्रह्मण्यते सुष्वये वरि-
वो धात् ॥२॥ तमिन्नरो वि ह्वयंते समीके रिरिक्वांसस्तन्वः
कृण्वत त्राम् । मिथो यत्त्यागमुभयासो अग्मन्नरस्तोकस्य तन-
यस्य सातौ ॥३॥ क्रतूयंति क्षितयो योग उग्राशुषाणासो मि-
थो अर्णसातौ । सं यद्विशोऽववृत्रंत युध्मा आदिन्नेम इंद्रयंते
अभीके ॥४॥ आदिद्ध नेम इंद्रियं यजंत आदित्पक्तिः पुरोळाशं

रिरिच्यात् । आदित्सोमो वि पपृच्यादसुष्वीनादिज्जुजोष
वृषभं यजध्यै ॥ ५ ॥ ११ ॥ कृणोत्यस्मै वरिवो य इत्थेंद्राय सो-
ममुशते सुनोति । सध्रीचीनेन मनसाविवेनन्तमित्सखायं
कृणुते समत्सु ॥ ६ ॥ य इंद्राय सुनवत्सोममद्य पचात्पक्तीरुत
भृज्जाति धानाः । प्रति मनायोरुचथानि हर्यन्तस्मिन्दधद्वृ-
षणं शुष्ममिंद्रः ॥ ७ ॥ यदा समर्यं व्यचेदृघावा दीर्घं यदाजि-
मभ्यख्यदर्यः । अचिक्रदद्वृषणं पत्न्यच्छा दुरोण आ निशितं
सोमसुद्भिः ॥ ८ ॥ भूयसा वस्नमचरत्कनीयोऽविक्रीतो अका-
निषं पुनर्यन् । स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि
दुहंति प्र वाणं ॥ ९ ॥ क इमं दशभिर्ममेंद्रं क्रीणाति धेनुभिः ।
यदा वृत्राणि जंघनदथैनं मे पुनर्ददत् ॥ १० ॥ नू ष्टुत इंद्र नू
गृणान इषं जरित्रे नद्यो३न पीपेः । अकारि ते हरिवो ब्रह्म
नव्यं धिया स्याम रथ्यः सदासाः ॥ ११ ॥ १२ ॥

॥ २५ ॥ १–८ वामदेवः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२५॥ को अद्य नर्यो देवकाम उशन्निंद्रस्य सख्यं जुजोष ।
को वा महेऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे ॥ १ ॥ को
नानाम वचसा सोम्याय मनायुर्वा भवति वस्त उस्राः । क इं-
द्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कवये क ऊती ॥ २ ॥ को
देवानामवो अद्या वृणीते क आदित्याँ अदितिं ज्योतिरीट्टे ।
कस्याश्विनाविंद्रो अग्निः सुतस्यांशोः पिबंति मनसाविं-
वेनं ॥ ३ ॥ तस्मा अग्निर्भारतः शर्म यंसज्ज्योक्पश्यात्सूर्यमु-
च्चरंतं । य इंद्राय सुनवामेत्याह नरे नर्याय नृतमाय नृणां ॥ ४ ॥
न तं जिनंति बहवो न दभ्रा उर्वस्मा अदितिः शर्म यंसत् ।
प्रियः सुकृत्प्रिय इंद्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी

॥५॥१३॥ सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते के-
वलेंद्रः। नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवहंतेदवाचः
॥६॥ न रेवता पणिना सख्यमिंद्रोऽसुन्वता सुतपाः सं गृ-
णीते। आस्य वेदः खिदति हंति नग्नं वि सुष्वये पक्तये केवलो
भूत् ॥७॥ इंद्रं परेऽवरे मध्यमास इंद्रं यांतोऽवसितास इंद्रं।
इंद्रं क्षियंत उत युध्यमाना इंद्रं नरो वाजयंतो हवंते ॥८॥१४॥

॥ २६ ॥ १-३ वामदेव इंद्रो वा। ४-७ वामदेवः ॥ १-३ इंद्र आत्मा वा।
४-७ श्येनः ॥ त्रिष्टुप् ॥

॥२६॥ अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः।
अहं कुत्समार्जुनेयं न्यृंजेऽहं कविरुशना पश्यता मा ॥१॥ अहं
भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय। अहमपो अनयं
वावशाना मम देवासो अनु केतमायन् ॥२॥ अहं पुरो मं-
दसानो व्यैरं नव साकं नवतीः शंबरस्य। शततमं वेश्यं स-
र्वताता दिवोदासमतिथिग्वं यदावं ॥३॥ प्र सु ष विभ्यो
मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा। अचक्रया य-
त्स्वधया सुपर्णो हव्यं भरन्मनवे देवजुष्टं ॥४॥ भरद्यदि विर-
तो वेविजानः पथोरुणा मनोजवा असर्जि। तूयं ययौ म-
धुना सोम्येनोत श्रवो विविदे श्येनो अत्र ॥५॥ ऋजीपी
श्येनो ददमानो अंशुं परावतः शकुनो मंद्रं मदं। सोमं भर-
द्दादृहाणो देवावान्दिवो अमुष्मादुत्तरादादाय ॥६॥ आदाय
श्येनो अभरत्सोमं सहस्रं सवाँ अयुतं च साकं। अत्रा पुरं-
धिरजहादरातीर्मदे सोमस्य मूरा अमूरः ॥७॥१५॥

॥ २७ ॥ १-५ वामदेवः ॥ १-४ श्येनः। ५ श्येन इंद्रो वा ॥ १-४ त्रिष्टुप्। ५ शक्करी ॥

॥२७॥ गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि वि-

श्वा । शतं मा पुर आयसीररक्षन्नध श्येनो जवसा निरदीयं
॥१॥ न घा स मामप जोषं जभाराभीमास त्वक्षसा वीर्येण ।
ईर्मा पुरंधिरजहादरातीरुत वातां अतरच्छूशुवानः ॥२॥ अव
यच्छ्येनो अस्वनीदध द्योर्वि यद्यदि वात ऊहुः पुरंधिं । सृजद्य-
दस्मा अव ह क्षिपज्ज्यां कृशानुरस्ता मनसा भुरण्यन् ॥३॥
ऋजिप्य ईमिंद्रावतो न भुज्युं श्येनो जभार बृहतो अधि ष्णोः ।
अंतः पतत्पतत्र्यस्य पर्णमध यामनि प्रसितस्य तद्वेः ॥४॥ अध
श्वेतं कलशं गोभिरक्तमापिप्यानं मघवा शुक्रमंधः । अध्व-
र्युभिः प्रयतं मध्वो अग्रमिंद्रो मदाय प्रति धत्पिबध्यै शूरो
मदाय प्रति धत्पिबध्यै ॥५॥१६॥

॥ २८ ॥ १–५ वामदेवः ॥ इंद्रासोमौ ॥ त्रिष्टुप् ॥

॥२८॥ त्वा युजा तव तत्सोम सख्य इंद्रो अपो मनवे स-
स्रुतस्कः । अहन्नहिमरिणात्सप्त सिंधूनपावृणोदपिहितेव खा-
नि ॥१॥ त्वा युजा नि खिदत्सूर्यस्येंद्रश्चक्रं सहसा सद्य इंदो ।
अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि
॥२॥ अहन्निंद्रो अदहदग्निरिंदो पुरा दस्यून्मध्यंदिनादभीके ।
दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि बर्हीत् ॥३॥
विश्वस्मात्सीमधमाँ इंद्र दस्यून्विशो दासीरकृणोरप्रशस्ताः ।
अबाधेथाममृणतं नि शत्रूनविंदेथामपचितिं वधत्रैः ॥४॥ एवा
सत्यं मघवाना युवं तदिंद्रश्च सोमोर्वमश्व्यं गोः । आदर्दृतम-
पिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना ॥५॥१७॥

॥ २९ ॥ १–५ वामदेवः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२९॥ आ नः स्तुत उप वाजेभिरूती इंद्र याहि हरिभिर्म-

दसानः। तिरश्चिदर्यः सवना पुरूण्यांगूषेभिर्गृणानः सत्यराधाः
॥१॥ आ हि ष्मा याति नर्यश्चिकित्वान्हूयमानः सोतृभिरुप
यज्ञं। स्वश्वो यो अभीरुर्मन्यमानः सुष्वाणेभिर्मदति सं ह वीरैः
॥२॥ श्रावयेदस्य कर्णा वाजयध्यै जुष्टामनु प्र दिशं मंदयध्यै।
उद्वावृषाणो राधसे तुविष्मान्करन्न इंद्रः सुतीर्थाभयं च ॥३॥
अच्छा यो गंता नाधमानमूती इत्था विप्रं हवमानं गृणंतं।
उप त्मनि दधानो धुर्या३शून्सहस्राणि शतानि वज्रबाहुः ॥४॥
त्वोतासो मघवन्निंद्र विप्रा वयं ते स्याम सूरयो गृणंतः। भेजा-
नासो बृहद्दिवस्य राय आकाय्यस्य दावने पुरुक्षोः ॥५॥१८॥

॥ ३० ॥ १–२४ वामदेवः ॥ १–८. १२–२४ इंद्रः। ९–११ इंद्र उषाश्च ॥
१–७. ९–२३ गायत्री। ८. २४ अनुष्टुप् ॥

॥३०॥ नकिरिंद्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्। नकि-
रेवा यथा त्वं ॥१॥ सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः।
सत्रा महाँ असि श्रुतः ॥२॥ विश्वे चनेदना त्वा देवास इंद्र
युयुधुः। यदहा नक्तमातिरः ॥३॥ यत्रोत बाधितेभ्यश्चक्रं कुत्साय
युध्यते। मुषाय इंद्र सूर्यं ॥४॥ यत्र देवाँ ऋघायतो विश्वाँ
अयुध्य एक इत्। त्वमिंद्र वनूँरहन् ॥५॥१९॥ यत्रोत मर्त्याय
कमरिणा इंद्र सूर्यं। प्रावः शचीभिरेतशं ॥६॥ किमादुतासि
वृत्रहन्मघवन्मन्युमत्तमः। अत्राह दानुमातिरः ॥७॥ एतद्घेदुत
वीर्य१मिंद्र चकर्थ पौंस्यं। स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं
दिवः ॥८॥ दिवश्चिद्घा दुहितरं महान्महीयमानां। उषास-
मिंद्र सं पिणक् ॥९॥ अपोषा अनसः सरत्संपिष्टादह बिभ्यु-
षी। नि यत्सीं शिश्नथद्वृषा ॥१०॥२०॥ एतदस्या अनः शये
सुसंपिष्टं विपाश्या। ससार सीं परावतः ॥११॥ उत सिंधुं

विबाल्यं वितस्थानामधि क्षमि । परि ष्ठा इंद्र मायया ॥१२॥
उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनं । पुरो यदस्य
संपिणक् ॥१३॥ उत दासं कौलितरं बृहतः पर्वतादधि ।
अवाहन्निंद्र शंबरं ॥१४॥ उत दासस्य वर्चिनः सहस्राणि
शतावधीः । अधि पंच प्रधीँरिव ॥१५॥२१॥ उत त्यं पुत्रमग्रुवः
परावृक्तं शतक्रतुः । उक्थेष्विंद्र आभजत् ॥१६॥ उत त्या
तुर्वशायदू अस्नातारा शचीपतिः । इंद्रो विद्वाँ अपारयत्
॥१७॥ उत त्या सद्य आर्या सरयोरिंद्र पारतः । अर्णाचित्रर-
थावधीः ॥१८॥ अनु द्वा जहिता नयोऽंधं श्रोणं च वृत्रहन् ।
न तत्ते सुम्नमष्टवे ॥१९॥ शतमश्मन्मयीनां पुरामिंद्रो व्यास्यत् ।
दिवोदासाय दाशुषे ॥२०॥२२॥ अस्वापयद्दभीतये सहस्रा
त्रिंशतं हथैः । दासानामिंद्रो मायया ॥२१॥ स घेदुतासि
वृत्रहन्त्समान इंद्र गोपतिः । यस्ता विश्वानि चिच्युषे ॥२२॥
उत नूनं यदिंद्रियं करिष्या इंद्र पौंस्यं । अद्या नकिष्टदा मिनत्
॥२३॥ वामंवामं त आदुरे देवो ददात्वर्यमा । वामं पूषा वामं
भगो वामं देवः करूळती ॥२४॥२३॥

॥ ३१ ॥ १–१५ वामदेवः ॥ इंद्रः ॥ १. २. ४–१५ गायत्री । ३ पादनिचृत् ॥

॥३१॥ कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचि-
ष्ठया वृता ॥१॥ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदंधसः । दृळ्हा
चिदारुजे वसु ॥२॥ अभी षु णः सखीनामविता जरितॄणां । शतं
भवास्यूतिभिः ॥३॥ अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः ।
नियुद्भिश्चर्षणीनां ॥४॥ प्रवता हि क्रतूनामा हा पदेव गच्छ-
सि । अभक्षि सूर्ये सचा ॥५॥२४॥ सं यत्त इंद्र मन्यवः सं चक्रा-
णि दधन्विरे । अध त्वे अध सूर्ये ॥६॥ उत स्मा हि त्वामाहु-

रिन्मघवानं शचीपते । दातारमविदीधयुं ॥७॥ उत स्मा सद्य
इत्परि शशमानाय सुन्वते । पुरू चिन्मंहसे वसु ॥८॥ नहि ष्मा
ते शतं चन राधो वरंत आमुरः । न च्यौत्नानि करिष्यतः ॥९॥
अस्माँ अवंतु ते शतमस्मान्त्सहस्रमूतयः । अस्मान्विश्वा अभि-
ष्टयः ॥१०॥२५॥ अस्माँ इहा वृणीष्व सख्याय स्वस्तये । महो
राये दिवित्मते ॥११॥ अस्माँ अविड्ढि विश्वहेंद्र राया परीणसा ।
अस्मान्विश्वाभिरूतिभिः ॥१२॥ अस्मभ्यं ताँ अपा वृधि व्रजाँ
अस्तेव गोमतः । नवाभिरिंद्रोतिभिः ॥१३॥ अस्माकं धृष्णुया
रथो द्युमाँ इंद्रानपच्युतः । गव्युरश्वयुरीयते ॥१४॥ अस्माकमु-
त्तमं कृधि श्रवो देवेषु सूर्य । वर्षिष्ठं द्यामिवोपरि ॥१५॥२६॥

॥३२॥ १–२४ वामदेवः ॥ १–२२ इंद्रः । २३. २४ इंद्राश्वौ ॥ गायत्री ॥

॥३२॥ आ तू न इंद्र वृत्रहन्नस्माकमर्धमा गहि । महा-
न्महीभिरूतिभिः ॥१॥ भृमिश्चिद्घासि तूतुजिरा चित्र चित्रि-
णीष्वा । चित्रं कृणोष्यूतये ॥२॥ दभ्रेभिश्चिच्छशीयांसं हंसि
व्राधंतमोजसा । सखिभिर्ये त्वे सचा ॥३॥ वयमिंद्र त्वे सचा
वयं त्वाभि नोनुमः । अस्माँअस्माँ इदुदव ॥४॥ स नश्चित्रा-
भिरद्रिवोऽनवद्याभिरूतिभिः । अनाधृष्टाभिरा गहि ॥५॥२७॥
भूयामो षु त्वावतः सखाय इंद्र गोमतः । युजो वाजाय घृष्वये
॥६॥ त्वं ह्येक ईशिष इंद्र वाजस्य गोमतः । स नो यंधि मही-
मिषं ॥७॥ न त्वा वरंते अन्यथा यद्दित्ससि स्तुतो मघं । स्तोतृभ्य
इंद्र गिर्वणः ॥८॥ अभि त्वा गोतमा गिरानूषत प्र दावने ।
इंद्र वाजाय घृष्वये ॥९॥ प्र ते वोचाम वीर्या३ या मंदसान
आरुजः । पुरो दासीरभीत्य ॥१०॥२८॥ ता ते गृणंति वेधसो

यानि चकर्थ पौंस्या । सुतेष्विंद्र गिर्वणः ॥ ११ ॥ अवीवृधंत
गोतमा इंद्र त्वे स्तोमवाहसः । ऐषु धा वीरवद्यशः ॥ १२ ॥
यच्चिद्धि शश्वतामसींद्र साधारणस्त्वं । तं त्वा वयं हवामहे
॥ १३ ॥ अर्वाचीनो वसो भवास्मे सु मत्स्वांधसः । सोमानामिंद्र
सोमपाः ॥ १४ ॥ अस्माकं त्वा मतीनामा स्तोम इंद्र यच्छतु ।
अर्वागा वर्तया हरी ॥ १५ ॥ पुरोळाशं च नो घसो जोषया-
से गिरश्च नः । वधूयुरिव योषणां ॥ १६ ॥ २९ ॥ सहस्रं व्यतीनां
युक्तानामिंद्रमीमहे । शतं सोमस्य खार्यः ॥ १७ ॥ सहस्रा ते
शता वयं गवामा च्यावयामसि । अस्मत्रा राध एतु ते ॥ १८ ॥
दश ते कलशानां हिरण्यानामधीमहि । भूरिदा असि वृत्रहन्
॥ १९ ॥ भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर । भूरि घेदिंद्र
दित्ससि ॥ २० ॥ भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन् । आ
नो भजस्व राधसि ॥ २१ ॥ प्र ते बभ्रू विचक्षण शंसामि गोषणो
नपात् । माभ्यां गा अनु शिश्रथः ॥ २२ ॥ कनीनकेव विद्रधे
नवे द्रुपदे अर्भके । बभ्रू यामेषु शोभेते ॥ २३ ॥ अरं म उस्रया-
म्णेऽरमनुस्रयाम्णे । बभ्रू यामेष्वस्रिधा ॥ २४ ॥ ३० ॥ ६ ॥ ३ ॥

॥ ३३ ॥ १—११ वामदेवः ॥ ऋभवः ॥ त्रिष्टुप् ॥

॥ ३३ ॥ प्र ऋभुभ्यो दूतमिव वाचमिष्य उपस्तिरे श्वैतरीं
धेनुमीळे । ये वातजूतास्तरणिभिरेवैः परि द्यां सद्यो अपसो
बभूवुः ॥ १ ॥ यदारमक्रन्नृभवः पितृभ्यां परिविष्टी वेषणा दं-
सनाभिः । आदिद्देवानामुप सख्यमायन्धीरासः पुष्टिमवहन्म-
नायै ॥ २ ॥ पुनर्ये चक्रुः पितरा युवाना सना यूपेव जरणा
शयाना । ते वाजो विभ्वाँ ऋभुरिंद्रवंतो मधुप्सरसो नोऽवंतु
यज्ञं ॥ ३ ॥ यत्संवत्समृभवो गामरक्षन्यत्संवत्समृभवो मा

अपिंशन् । यत्संवत्समभरन्भासो अस्यास्ताभिः शमीभिरमृत-
त्वमाशुः ॥४॥ ज्येष्ठ आह चमसा द्वा करेति कनीयान्त्रीन्कृणवा-
मेत्याह । कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत्पनयद्वचो
वः ॥५॥१॥ सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मु-
रेताम् । विभ्राजमानांश्चमसाँ अहेवावेनत्त्वष्टा चतुरो ददृश्वान्
॥६॥ द्वादश द्यून्यदगोह्यस्यातिथ्ये रणन्नृभवः ससंतः । सुक्षेत्रा-
कृण्वन्ननयंत सिंधून्धन्वातिष्ठन्नोषधीर्निम्नमापः ॥७॥ रथं ये
चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम् । त आ तक्षंत्वृ-
भवो रयिं नः स्ववसः स्वपसः सुहस्ताः ॥८॥ अपो ह्येषामजुषंत
देवा अभि क्रत्वा मनसा दीध्यानाः । वाजो देवानामभवत्सु-
कर्मेंद्रस्य ऋभुक्षा वरुणस्य विभ्वा ॥९॥ ये हरी मेधयोक्था
मदंत इंद्राय चक्रुः सुयुजा ये अश्वा । ते रायस्पोषं द्रविणान्यस्मे
धत्त ऋभवः क्षेमयंतो न मित्रम् ॥१०॥ इदाह्नः पीतिमुत वो मदं
धुर्न ऋते श्रांतस्य सख्याय देवाः । ते नूनमस्मे ऋभवो व-
सूनि तृतीये अस्मिन्त्सवने दधात ॥११॥२॥

॥ ३४ ॥ १–११ वामदेवः ॥ ऋभवः ॥ त्रिष्टुप् ॥

॥३४॥ ऋभुर्विभ्वा वाज इंद्रो नो अच्छेमं यज्ञं रत्नधेयोप
यात । इदा हि वो धिषणा देव्यह्नामधात्पीतिं सं मदा अग्म-
ता वः ॥१॥ विदानासो जन्मनो वाजरत्ना उत ऋतुभिर्ऋ-
भवो मादयध्वम् । सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे
रयिमेरयध्वम् ॥२॥ अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्व-
त्प्रदिवो दधिध्वे । प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे
अग्रियोत वाजाः ॥३॥ अभूदु वो विधते रत्नधेयमिदा नरो

दाशुषे मर्त्याय । पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय ॥४॥ आ वाजा यातोप न ऋभुक्षा महो नरो द्रविणसो गृणानाः । आ वः पीतयोऽभिपित्वे अह्नामिमा अस्तं नवस्व इव ग्मन् ॥५॥३॥ आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः । सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इंद्रवंतः ॥६॥ सजोषा इंद्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः । अग्रेपाभिर्ऋतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥७॥ सजोषस आदित्यैर्मादयध्वं सजोषस ऋभवः पर्वतेभिः । सजोषसो दैव्येना सवित्रा सजोषसः सिंधुभी रत्नधेभिः ॥८॥ ये अश्विना ये पितरा य ऊती धेनुं ततक्षुर्ऋभवो ये अश्वा । ये अंसत्रा य ऋधग्रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ॥९॥ ये गोमंतं वाजवंतं सुवीरं रयिं धत्थ वसुमंतं पुरुक्षुं । ते अग्रेपा ऋभवो मंदसाना अस्मे धत्त ये च रातिं गृणंति ॥१०॥ नापाभूत न वोऽतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन् । समिंद्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः ॥११॥४॥

॥३५॥ १–९ वामदेवः ॥ ऋभवः ॥ त्रिष्टुप् ॥

॥३५॥ इहोप यात शवसो नपातः सौधन्वना ऋभवो माप भूत । अस्मिन्हि वः सवने रत्नधेयं गमंत्विंद्रमनु वो मदासः ॥१॥ आगन्नृभूणामिह रत्नधेयमभूत्सोमस्य सुषुतस्य पीतिः । सुकृत्यया यत्स्वपस्यया चँ एकं विचक्र चमसं चतुर्धा ॥२॥ व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत । अथैत वाजा अमृतस्य पंथां गणं देवानामृभवः सुहस्ताः ॥३॥ किंमयः स्विच्चमस एष आस यं काव्येन चतुरो विचक्र ।

अथा सुनुध्वं सवनं मदाय पात ऋभवो मधुनः सोम्यस्य
॥४॥ शच्याकर्त पितरा युवाना शच्याकर्त चमसं देवपानं।
शच्या हरी धनुतरावतष्टेंद्रवाहावृभवो वाजरत्नाः॥५॥५॥ यो
वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदाय। तस्मै
रयिमृभवः सर्ववीरमा तक्षत वृषणो मंदसानाः॥६॥ प्रातः
सुतमपिबो हर्यश्व माध्यंदिनं सवनं केवलं ते। समृभुभिः
पिबस्व रत्नधेभिः सखीं याँ इंद्र चकृषे सुकृत्या॥७॥ ये देवा-
सो अभवता सुकृत्या श्येना इवेदधि दिवि निषेद। ते रत्नं
धात शवसो नपातः सौधन्वना अभवतामृतासः॥८॥ यत्तृ-
तीयं सवनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः। तदृभवः
परिषिक्तं व एतत्सं मदेभिरिंद्रियेभिः पिबध्वं॥९॥६॥

॥३६॥ १-९ वामदेवः॥ ऋभवः॥ १-८ जगती॥ ९ त्रिष्टुप्॥

॥३६॥ अनश्वो जातो अनभीशुरुक्थ्यो३ रथस्त्रिचक्रः परि
वर्तते रजः। महत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च
पुष्यथ॥१॥ रथं ये चक्रुः सुवृतं सुचेतसोऽविह्वरंतं मनसस्परि
ध्यया। ताँ ऊ न्व१स्य सवनस्य पीतय आ वो वाजा ऋभवो
वेदयामसि॥२॥ तद्वो वाजा ऋभवः सुप्रवाचनं देवेषु विभ्वो
अभवन्महित्वनं। जिव्री यत्संता पितरा सनाजुरा पुनर्युवाना
चरथाय तक्षथ॥३॥ एकं वि चक्र चमसं चतुर्वयं निश्चर्मणो
गामरिणीत धीतिभिः। अथा देवेष्वमृतत्वमानश श्रुष्टी वा-
जा ऋभवस्तद्व उक्थ्यं॥४॥ ऋभुतो रयिः प्रथमश्रवस्तमो
वाजश्रुतासो यमजीजनन्नरः। विभ्वतष्टो विदथेषु प्रवाच्यो यं
देवासोऽवथा स विचर्षणिः॥५॥७॥ स वाज्यर्वा स ऋषि-
र्वचस्यया स शूरो अस्ता पृतनासु दुष्टरः। स रायस्पोषं

स सुवीर्यं दधे यं वाजो विभ्वाँ ऋभवो यमाविषुः ॥६॥ श्रेष्ठं वः
पेशो अधि धायि दर्शतं स्तोमो वाजा ऋभवस्तं जुजुष्टन। धीरा-
सो हि ष्ठा कवयो विपश्चितस्तान्व एना ब्रह्मणा वेदयामसि
॥७॥ यूयमस्मभ्यं धिषणाभ्यस्परि विद्वांसो विश्वा नर्याणि भो-
जना। द्युमंतं वाजं वृषशुष्ममुत्तममा नो रयिमृभवस्तक्षता वयः
॥८॥ इह प्रजामिह रयिं रराणा इह श्रवो वीरवत्तक्षता नः। येन
वयं चितयेमात्यन्यान्तं वाजं चित्रमृभवो ददा नः ॥९॥८॥

॥ ३७ ॥ १–८ वामदेवः ॥ ऋभवः ॥ १–४ त्रिष्टुप्। ५–८ अनुष्टुप्॥

॥३७॥ उप नो वाजा अध्वरमृभुक्षा देवा यात पथिभि-
र्देवयानैः। यथा यज्ञं मनुषो विक्ष्वा३सु दधिध्वे रण्वाः सुदिने-
ष्वह्नां ॥१॥ ते वो हृदे मनसे संतु यज्ञा जुष्टासो अद्य घृतनिर्णि-
जो गुः। प्र वः सुतासो हरयंत पूर्णाः क्रत्वे दक्षाय हर्षयंत पीताः
॥२॥ त्र्युदायं देवहितं यथा वः स्तोमो वाजा ऋभुक्षणो ददे
वः। जुह्वे मनुष्वदुपरासु विक्षु युष्मे सचा बृहद्दिवेषु सोमं ॥३॥
पीवोअश्वाः शुचद्रथा हि भूतायःशिप्रा वाजिनः सुनिष्काः।
इंद्रस्य सूनो शवसो नपातोऽनु वश्चेत्यग्रियं मदाय ॥४॥ ऋ-
भुमृभुक्षणो रयिं वाजे वाजिन्तमं युजं। इंद्रस्वंतं हवामहे
सदासातममश्विनं ॥५॥९॥ सेदृभवो यमवथ यूयमिंद्रश्च मर्त्यं।
स धीभिरस्तु सनिता मेधसाता सो अर्वता ॥६॥ वि नो वाजा
ऋभुक्षणः पथश्चितन यष्टवे। अस्मभ्यं सूरयः स्तुता विश्वा
आशास्तरीषणि ॥७॥ तं नो वाजा ऋभुक्षण इंद्र नासत्या
रयिं। समश्वं चर्षणिभ्य आ पुरु शस्त मघत्तये ॥८॥१०॥

॥ ३८ ॥ १–१० वामदेवः ॥ १ द्यावापृथिव्यौ। २–१० दधिक्राः ॥ त्रिष्टुप् ॥

॥३८॥ उतो हि वां दात्रा संति पूर्वा या पूरुभ्यस्त्रसदस्युर्नि-

तोशे । क्षेत्रासां ददथुरुर्वरासां घनं दस्युभ्यो अभिभूतिमुग्रं
॥१॥ उत वाजिनं पुरुनिष्षिध्वानं दधिक्रामु ददथुर्विश्वकृष्टिं ।
ऋजिप्यं श्येनं प्रुषितप्सुमाशुं चर्कृत्यमर्यो नृपतिं न शूरं ॥२॥
यं सीमनु प्रवतेव द्रवंतं विश्वः पूरुर्मदति हर्षमाणः । पड्भि-
र्गृध्यंतं मेधयुं न शूरं रथतुरं वातमिव ध्रजंतं ॥३॥ यः स्मा-
रुंधानो गध्या समत्सु सनुतरश्चरति गोषु गच्छन् । आवि-
र्ऋजीको विदथा निचिक्यत्तिरो अरतिं पर्याप आयोः
॥४॥ उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशंति क्षितयो
भरेषु । नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथं
॥५॥११॥ उत स्मासु प्रथमः सरिष्यन्नि वेवेति श्रेणिभी रथा-
नां । स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत्किरणं ददश्वान्
॥६॥ उत स्य वाजी सहुरिर्ऋतावा शुश्रूषमाणस्तन्वा समर्ये ।
तुरं यतीषु तुरयन्नृजिप्योऽधि भ्रुवोः किरते रेणुमृंजन् ॥७॥
उत स्मास्य तन्यतोरिव द्योर्ऋघायतो अभियुजो भयंते । यदा
सहस्रमभि षीमयोधीद्दुर्वर्तुः स्मा भवति भीम ऋंजन् ॥८॥
उत स्मास्य पनयंति जना जूतिं कृष्टिप्रो अभिभूतिमाशोः ।
उतैनमाहुः समिथे वियंतः परा दधिक्रा असरत्सहस्रैः ॥९॥
आ दधिक्राः शवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्त-
तान । सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा व-
चांसि ॥१०॥१२॥

॥३९॥ १-६ वामदेवः ॥ दधिक्राः ॥ १-५ त्रिष्टुप् । ६ अनुष्टुप् ॥

॥३९॥ आशुं दधिक्रां तमु नु ष्टवाम दिवस्पृथिव्या उत
चर्किराम । उच्छंतीर्मामुषसः सूदयंत्वति विश्वानि दुरितानि
पर्षन् ॥१॥ महश्चर्कर्म्यर्वतः क्रतुप्रा दधिक्राव्णः पुरुवा-

रस्य वृष्णः । यं पूरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा
ततुरिं ॥२॥ यो अश्वस्य दधिक्राव्णो अकारीत्समिद्धे अग्ना
उषसो व्युष्टौ । अनागसं तमदितिः कृणोतु स मित्रेण वरुणे-
ना सजोषाः ॥३॥ दधिक्राव्ण इष ऊर्जो महो यदमन्महि
मरुतां नाम भद्रं । स्वस्तये वरुणं मित्रमग्निं हवामह इंद्रं
वज्रबाहुं ॥४॥ इंद्रमिवेदुभये वि ह्वयंत उदीराणा यज्ञमुपप्र-
यंतः । दधिक्रामु सूदनं मर्त्याय ददथुर्मित्रावरुणा नो अश्वं
॥५॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि
नो मुखा करत्प्र ण आयूंषि तारिषत् ॥६॥१३॥

॥४०॥ १–५ वामदेवः ॥ १–४ दधिक्राः । ५ सूर्यः ॥ १ त्रिष्टुप् । २–५ जगती ॥

॥४०॥ दधिक्राव्ण इदु नु चर्किराम विश्वा इन्मामुषसः
सूदयंतु । अपामग्नेरुषसः सूर्यस्य बृहस्पतेरांगिरसस्य जिष्णोः
॥१॥ सत्वा भरिषो गविषो दुवन्यसच्छ्रवस्यादिष उषसस्तुर-
ण्यसत् । सत्यो द्रवो द्रवरः पतंगरो दधिक्रावेषमूर्जं स्वर्ज-
नत् ॥२॥ उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति
प्रगर्धिनः । श्येनस्येव ध्रजतो अंकसं परि दधिक्राव्णः सहोर्जा
तरित्रतः ॥३॥ उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां
बद्धो अपिकक्ष आसनि । क्रतुं दधिक्रा अनु संतवीत्वत्पथा-
मंकांस्यन्वापनीफणत् ॥४॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता
वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा
ऋतजा अद्रिजा ऋतं ॥५॥१४॥

॥४१॥ १–११ वामदेवः ॥ इंद्रावरुणौ ॥ त्रिष्टुप् ॥

॥४१॥ इंद्रा को वां वरुणा सुम्नमाप स्तोमो हविष्माँ अमृतो

न होता। यो वां हृदि क्रतुमाँ असदुक्तः पस्पर्शदिंद्रावरुणा नमस्वान् ॥ १ ॥ इंद्रा ह यो वरुणा चक्र आपी देवौ मर्तः सख्याय प्रयस्वान्। स हंति वृत्रा समिथेषु शत्रूनवोभिर्वा महद्भिः स प्र शृण्वे ॥ २ ॥ इंद्रा ह रत्नं वरुणा धेष्ठेत्था नृभ्यः शशमानेभ्यस्ता। यदी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते ॥ ३ ॥ इंद्रा युवं वरुणा दिद्युमस्मिन्नोजिष्ठमुग्रा नि वधिष्टं वज्रं। यो नो दुरेवो वृकतिर्दभीतिस्तस्मिन्मिमाथामभिभूत्योजः ॥ ४ ॥ इंद्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृषभेव धेनोः। सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥ ५ ॥ १५ ॥ तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये। इंद्रा नो अत्र वरुणा स्यातामवोभिर्दस्मा परितक्म्यायां ॥ ६ ॥ युवामिद्ध्यवसे पूर्व्याय परि प्रभूती गविषः स्वापी। वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शंभू ॥ ७ ॥ ता वां धियोऽवसे वाजयंतीराजिं न जंग्मुर्युवयूः सुदानू। श्रिये न गाव उप सोममस्थुरिंद्रं गिरो वरुणं मे मनीषाः ॥ ८ ॥ इमा इंद्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छमानाः। उपेमस्थुर्जोष्टार इव वस्वो रघ्वीरिव श्रवसो भिक्षमाणाः ॥ ९ ॥ अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम। ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचंतां ॥ १० ॥ आ नो बृहंता बृहतीभिरूती इंद्र यातं वरुण वाजसातौ। यद्दिद्यवः पृतनासु प्रक्रीळान्तस्य वां स्याम सनितार आजेः ॥ ११ ॥ १६ ॥

॥ ४२ ॥ १–१० त्रसदस्युः पौरुकुत्स्यः ॥ १–६ आत्मा। ७–१० इंद्रावरुणौ ॥ त्रिष्टुप् ॥

॥ ४२ ॥ मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वे अमृता

यथा नः । क्रतुं सचंते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥१॥ अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयंत । क्रतुं सचंते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥२॥ अहमिंद्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके । त्वष्टेव विश्वा भुवनानि विद्वान्त्समैरयं रोदसी धारयं च ॥३॥ अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य । ऋतेन पुत्रो अदितेर्ऋतावोत त्रिधातु प्रथयद्वि भूम ॥४॥ मां नरः स्वश्वा वाजयंतो मां वृताः समरणे हवंते । कृणोम्याजिं मघवाहमिंद्र इयर्मि रेणुमभिभूत्योजाः ॥५॥१७॥ अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतं । यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी अपारे ॥६॥ विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः । त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इंद्र सिंधून् ॥७॥ अस्माकमत्र पितरस्त आसन्त्सप्त ऋषयो दौर्गहे बध्यमाने । त आयजंत त्रसदस्युमस्या इंद्रं न वृत्रतुरमर्धदेवं ॥८॥ पुरुकुत्सानी हि वामदाशद्धव्येभिरिंद्रावरुणा नमोभिः । अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवं ॥९॥ राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः । तां धेनुमिंद्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरंती ॥१०॥१८॥

॥ ४३ ॥ १-७ पुरुमीळ्हाजमीळ्हौ सौहोत्रौ ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥४३॥ क उ श्रवत्कतमो यज्ञियानां वंदारु देवः कतमो जुषाते । कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्यां ॥१॥ को मृळाति कतम आगमिष्ठो देवानामु कतमः शंभविष्ठः । रथं कमाहुर्द्रवदश्वमाशुं यं सूर्यस्य दुहितावृणीत

॥ २ ॥ मक्षू हि ष्मा गच्छथ ईवतो द्यूनिंद्रो न शक्तिं परित-
क्म्यायां । दिव आजाता दिव्या सुपर्णा कया शचीनां भ-
वथः शचिष्ठा ॥ ३ ॥ का वां भूदुपमातिः कया न आश्विना
गमथो हूयमाना । को वां महश्चित्त्यजसो अभीक उरुष्यतं
माध्वी दस्रा न ऊती ॥४॥ उरु वां रथः परि नक्षति द्यामा
यत्समुद्रादभि वर्तते वां । मध्वा माध्वी मधु वां प्रुषायन्यत्सीं
वां पृक्षो भुरजंत पक्वाः ॥ ५ ॥ सिंधुर्ह वां रसया सिंचदश्वा-
न्घृणा वयोऽरुषासः परि ग्मन् । तदू षु वामजिरं चेति यानं
येन पती भवथः सूर्यायाः ॥ ६ ॥ इहेह यद्वां समना पपृक्षे
सेयमस्मे सुमतिर्वाजरत्ना । उरुष्यतं जरितारं युवं ह श्रितः
कामो नासत्या युवद्रिक् ॥ ७ ॥ १९ ॥

॥ ४४ ॥ १-७ पुरुमीळ्हाजमीळ्हौ सौहोत्रौ ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥४४॥ तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं
गोः । यः सूर्यां वहति वंधुरायुर्गिर्वाहसं पुरुतमं वसूयुं ॥ १ ॥
युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः ।
युवोर्वपुरभि पृक्षः सचंते वहंति यत्ककुहासो रथे वां ॥२॥ को
वामद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः । ऋतस्य
वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत् ॥३॥ हिर-
ण्ययेन पुरुभू रथेनेमं यज्ञं नासत्योप यातं । पिबाथ इन्मधुनः
सोम्यस्य दधथो रत्नं विधते जनाय ॥४॥ आ नो यातं दिवो
अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन । मा वामन्ये नि
यमन्देवयंतः सं यद्ददे नाभिः पूर्व्या वां ॥५॥ नू नो रयिं पुरुवीरं
बृहंतं दस्रा मिमाथामुभयेष्वस्मे । नरो यद्वामश्विना स्तोम-
मावन्त्सधस्तुतिमाजमीळ्हासो अग्मन् ॥६॥ इहेह यद्वां समना

पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना । उरुष्यतं जरितारं युवं ह
श्रितः कामो नासत्या युवद्रिक् ॥ ७ ॥ २० ॥

॥ ४५ ॥ १-७ वामदेवः ॥ अश्विनौ ॥ १-६ जगती । ७ त्रिष्टुप् ॥

॥ ४५ ॥ एष स्य भानुरुदियर्ति युज्यते रथः परिज्मा दिवो
अस्य सानवि । पृक्षासो अस्मिन्मिथुना अधि त्रयो दृति-
स्तुरीयो मधुनो वि रप्शते ॥१॥ उद्वां पृक्षासो मधुमंत ईरते
रथा अश्वास उषसो व्युष्टिषु । अपोर्णुवंतस्तम आ परीवृतं
स्व१र्ण शुक्रं तन्वंत आ रजः ॥२॥ मध्वः पिबतं मधुपेभिरा-
सभिरुत प्रियं मधुने युंजाथां रथं । आ वर्तनिं मधुना जि-
न्वथस्पथो दृतिं वहेथे मधुमंतमश्विना ॥ ३ ॥ हंसासो ये वां
मधुमंतो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः । उदप्रुतो मं-
दिनो मंदिनिस्पृशो मध्वो न मक्षः सवनानि गच्छथः ॥ ४ ॥
स्वध्वरासो मधुमंतो अग्नय उस्रा जरंते प्रति वस्तोरश्विना ।
यन्निक्तहस्तस्तरणिर्विचक्षणः सोमं सुषाव मधुमंतमद्रिभिः ॥५॥
आकेनिपासो अहभिर्दविध्वतः स्व१र्ण शुक्रं तन्वंत आ रजः ।
सूरश्चिदश्वान्युयुजान ईयते विश्वाँ अनु स्वधया चेतथस्पथः
॥६॥ प्र वामवोचमश्विना धियंधा रथः स्वश्वो अजरो यो अ-
स्ति । येन सद्यः परि रजांसि याथो हविष्मंतं तरणिं भोजमच्छ
॥७॥२१॥४॥

॥ ४६ ॥ १-७ वामदेवः ॥ १ वायुः । २-७ इंद्रवायू ॥ गायत्री ॥

॥४६॥ अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु । त्वं हि पूर्व-
पा असि ॥१॥ शतेना नो अभिष्टिभिर्नियुत्वाँ इंद्रसारथिः । वायो
सुतस्य तृंपतं ॥२॥ आ वां सहस्रं हरय इंद्रवायू अभि प्रयः ।
वहंतु सोमपीतये ॥३॥ रथं हिरण्यवंधुरमिंद्रवायू स्वध्वरं आ हि

स्यार्हो दिविस्पृशं ॥४॥ रथेन पृथुपाजसा दाश्वांसमुप ग-
च्छतं । इंद्रवायू इहा गतं ॥५॥ इंद्रवायू अयं सुतस्तं देवेभिः
सजोषसा । पिबतं दाशुषो गृहे ॥६॥ इह प्रयाणमस्तु वामिं-
द्रवायू विमोचनं । इह वां सोमपीतये ॥७॥२२॥

॥४७॥ १-४ वामदेवः ॥ १ वायुः । २-४ इंद्रवायू ॥ अनुष्टुप् ॥

॥४७॥ वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु । आ
याहि सोमपीतये स्पार्हो देव नियुत्वता ॥१॥ इंद्रश्च वायवेषां
सोमानां पीतिमर्हथः । युवां हि यंतीदवो निम्नमापो न सध्र्यक्
॥२॥ वायविंद्रश्च शुष्मिणा सरथं शवसस्पती । नियुत्वंता न ऊ-
तय आ यातं सोमपीतये ॥३॥ या वां संति पुरुस्पृहो नियुतो
दाशुषे नरा । अस्मे ता यज्ञवाहसेंद्रवायू नि यच्छतं ॥४॥२३॥

॥४८॥ १-५ वामदेवः ॥ वायुः ॥ अनुष्टुप् ॥

॥४८॥ विहि होत्रा अवीता विपो न रायो अर्यः । वायवा
चंद्रेण रथेन याहि सुतस्य पीतये ॥१॥ निर्युवाणो अशस्ती-
र्नियुत्वाँ इंद्रसारथिः । वायवा चंद्रेण रथेन याहि सुतस्य पीतये
॥२॥ अनु कृष्णे वसुधिती येमाते विश्वपेशसा । वायवा चंद्रेण
रथेन याहि सुतस्य पीतये ॥३॥ वहंतु त्वा मनोयुजो युक्तासो
नवतिर्नव । वायवा चंद्रेण रथेन याहि सुतस्य पीतये ॥४॥
वायो शतं हरीणां युवस्व पोष्याणां । उत वा ते सहस्रिणो
रथ आ यातु पाजसा ॥५॥२४॥

॥४९॥ १-६ वामदेवः ॥ इंद्राबृहस्पती ॥ गायत्री ॥

॥४९॥ इदं वामास्ये हविः प्रियमिंद्राबृहस्पती । उक्थं मदश्च
शस्यते ॥१॥ अयं वां परि षिच्यते सोम इंद्राबृहस्पती । चारुर्मदाय
पीतये ॥२॥ आ न इंद्राबृहस्पती गृहमिंद्रश्च गच्छतं । सोम-

पा सोमपीतये ॥३॥ अस्मे इंद्राबृहस्पती रयिं धत्तं शतग्विनं। अश्वावंतं सहस्रिणं ॥४॥ इंद्राबृहस्पती वयं सुते गीर्भिर्हवामहे। अस्य सोमस्य पीतये ॥५॥ सोममिंद्राबृहस्पती पिबतं दाशुषो गृहे। मादयेथां तदोकसा ॥६॥ २५॥

॥ ५० ॥ १–११ वामदेवः ॥ १–९ बृहस्पतिः । १०.११ इंद्राबृहस्पती ॥ १–९. ११ त्रिष्टुप् । १० जगती ॥

॥५०॥ यस्तस्तंभ सहसा वि ज्मो अंतान्बृहस्पतिस्त्रिषधस्थो रवेण। तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मंद्रजिह्वं ॥१॥ धुनेतयः सुप्रकेतं मदंतो बृहस्पते अभि ये नस्ततस्रे। पृषंतं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिं ॥२॥ बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदुः। तुभ्यं खाता अवता अद्रिदुग्धा मध्वः श्चोतंत्यभितो विरप्शं ॥३॥ बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन्। सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि ॥ ४ ॥ स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण। बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥५॥२६॥ एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः। बृहस्पते सुप्रजा वीरवंतो वयं स्याम पतयो रयीणां ॥६॥ स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण। बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वंदते पूर्वभाजं ॥७॥ स इत्क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीं। तस्मै विशः स्वयमेवा नमंते यस्मिन्ब्रह्मा राजनि पूर्व एति ॥८॥ अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या। अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवंति देवाः ॥९॥ इंद्रश्च सोमं पिबतं बृहस्पतेऽस्मिन्यज्ञे मंदसाना वृषण्वसू।

आ वां विश्वत्विंद्वः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतं ॥ १० ॥ बृहस्पत इंद्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे । अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥ ११ ॥ २७ ॥ ७ ॥

॥ ५१ ॥ १–११ वामदेवः ॥ उषाः ॥ त्रिष्टुप् ॥

॥ ५१ ॥ इदमु त्यत्पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात् । नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय ॥ १ ॥ अस्थुरु चित्रा उषसः पुरस्तान्मिता इव स्वरवोऽध्वरेषु । व्यू व्रजस्य तमसो द्वारोच्छंतीरव्रञ्छुचयः पावकाः ॥ २ ॥ उच्छंतीरद्य चितयंत भोजान्राधोदेयायोषसो मघोनीः । अचित्रे अंतः पणयः ससंत्वबुध्यमानास्तमसो विमध्ये ॥ ३ ॥ कुवित्स देवीः सनयो नवो वा यामो बभूयादुषसो वो अद्य । येना नवग्वे अंगिरे दशग्वे सप्तास्ये रेवती रेवदूष ॥ ४ ॥ यूयं हि देवीर्ऋतयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः । प्रबोधयंतीरुषसः ससंतं द्विपाच्चतुष्पाच्चरथाय जीवं ॥ ५ ॥ १ ॥ क्व स्विदासां कतमा पुराणी यया विधाना विदधुर्ऋभूणां । शुभं यच्छुभ्रा उषसश्चरंति न वि ज्ञायंते सदृशीरजुर्याः ॥ ६ ॥ ता घा ता भद्रा उषसः पुरासुरभिष्टिद्युम्ना ऋतजातसत्याः । यास्वीजानः शशमान उक्थैः स्तुवञ्छंसन्द्रविणं सद्य आप ॥ ७ ॥ ता आ चरंति समना पुरस्तात्समानतः समना पप्रथानाः । ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरंते ॥ ८ ॥ ता इन्न्वे३व समना समानीरमीतवर्णा उषसश्चरंति । गूहंतीरभ्वमसितं रुशद्भिः शुक्रास्तनूभिः शुचयो रुचानाः ॥ ९ ॥ रयिं दिवो दुहितरो विभा-

तीः प्रजावंत् यच्छतास्मासु देवीः । स्योनादा वः प्रतिबुध्य-
मानाः सुवीर्यस्य पतयः स्याम ॥१०॥ तद्वो दिवो दुहितरो
विभातीरुप ब्रुव उषसो यज्ञकेतुः । वयं स्याम यशसो जनेषु
तद्द्यौश्च धत्तां पृथिवी च देवी ॥११॥२॥

॥५२॥१-७ वामदेवः॥ उषाः॥ गायत्री॥

॥५२॥ प्रति ष्या सूनरी जनी व्युच्छंती परि स्वसुः । दिवो
अदर्शि दुहिता ॥१॥ अश्वेव चित्रारुषी माता गवामृतावरी ।
सखाभूदश्विनोरुषाः ॥२॥ उत सखास्यश्विनोरुत माता गवा-
मसि । उतोषो वस्व ईशिषे ॥३॥ यावयद्द्वेषसं त्वा चिकित्वि-
त्सूनृतावरि । प्रति स्तोमैरभुत्स्महि ॥४॥ प्रति भद्रा अदृक्षत
गवां सर्गा न रश्मयः । ओषा अप्रा उरु ज्रयः ॥५॥ आपप्रु-
षी विभावरि व्यावर्ज्योतिषा तमः । उषो अनु स्वधामव ॥६॥
आ द्यां तनोषि रश्मिभिरांतरिक्षमुरु प्रियं । उषः शुक्रेण
शोचिषा ॥७॥३॥

॥५३॥१-७ वामदेवः॥ सविता॥ जगती॥

॥५३॥ तद्देवस्य सवितुर्वार्यं महद्वृणीमहे असुरस्य प्रचे-
तसः । छर्दिर्येन दाशुषे यच्छति त्मना तन्नो महाँ उदयान्दे-
वो अक्तुभिः ॥१॥ दिवो धर्ता भुवनस्य प्रजापतिः पिशंगं
द्रापिं प्रति मुंचते कविः । विचक्षणः प्रथयन्नापृणन्नुर्वजीज-
नत्सविता सुम्नमुक्थ्यं ॥२॥ आप्रा रजांसि दिव्यानि पार्थिवा
श्लोकं देवः कृणुते स्वाय धर्मणे । प्र बाहू अस्राक्सविता
सवीमनि निवेशयन्प्रसुवन्नक्तुभिर्जगत् ॥३॥ अदाभ्यो भुवना-
नि प्रचाकशद्व्रतानि देवः सविताभि रक्षते । प्रास्राग्बाहू
भुवनस्य प्रजाभ्यो धृतव्रतो महो अज्मस्य राजति ॥४॥

त्रिरंतरिक्षं सविता महित्वना त्री रजांसि परिभूस्त्रीणि रोचना । तिस्रो दिवः पृथिवीस्तिस्र इन्वति त्रिभिर्व्रतैरभि नो रक्षति त्मना ॥५॥ बृहत्सुम्नः प्रसवीता निवेशनो जगतः स्थातुरुभयस्य यो वशी । स नो देवः सविता शर्म यच्छत्वस्मे क्षयाय त्रिवरूथमंहसः ॥६॥ आगन्देव ऋतुभिर्वर्धतु क्षयं दधातु नः सविता सुप्रजामिषं । स नः क्षपाभिरहभिश्च जिन्वतु प्रजावंतं रयिमस्मे समिन्वतु ॥७॥४॥

॥ ५४ ॥ १–६ वामदेवः ॥ सविता ॥ १–५ जगती । ६ त्रिष्टुप् ॥

॥५४॥ अभूद्देवः सविता वंद्यो नु न इदानीमह्न उपवाच्यो नृभिः । वि यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत् ॥१॥ देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमं । आदिद्दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥२॥ अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता । देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ॥३॥ न प्रमिये सवितुर्दैव्यस्य तद्यथा विश्वं भुवनं धारयिष्यति । यत्पृथिव्या वरिमन्ना स्वंगुरिर्वर्ष्मन्दिवः सुवति सत्यमस्य तत् ॥४॥ इंद्रज्येष्ठान्बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि पस्त्यावतः । यथायथा पतयंतो वियेमिर एवैव तस्थुः सवितः सवाय ते ॥५॥ ये ते त्रिरहन्त्सवितः सवासो दिवेदिवे सौभगमासुवंति । इंद्रो द्यावापृथिवी सिंधुरद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥६॥५॥

॥ ५५ ॥ १–१० वामदेवः ॥ विश्वे देवाः ॥ १–७ त्रिष्टुप् । ८–१० गायत्री ॥

॥५५॥ को वस्त्राता वसवः को वरूता द्यावाभूमी अदिते त्रासीथां नः । सहीयसो वरुण मित्र मर्तात्को वोऽध्वरे वरिवो धाति

देवाः ॥१॥ प्र ये धामानि पूर्व्याण्यर्चान्वि यदुच्छान्वियोतारो
अमूराः । विधातारो वि ते दधुरजस्रा ऋतधीतयो रुरुचंत
दस्माः ॥२॥ प्र पस्त्या३मदितिं सिंधुमर्कैः स्वस्तिमीळे सख्याय
देवीं । उभे यथा नो अहनी निपात उषासानक्ता करताम-
दब्धे ॥३॥ व्यर्यमा वरुणश्चेति पंथामिषस्पतिः सुवितं गातु-
मग्निः । इंद्राविष्णू नृवदु षु स्तवाना शर्म नो यंतममवद्वरूथं
॥४॥ आ पर्वतस्य मरुतामवांसि देवस्य त्रातुरव्रि भगस्य ।
पात्पतिर्जन्यादंहसो नो मित्रो मित्रियादुत न उरुष्येत् ॥५॥६॥
नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः । समुद्रं
न संचरणे सनिष्यवो घर्मस्वरसो नद्यो३ अप व्रन् ॥६॥ देवै-
र्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् । नहि
मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सान्वग्नेः ॥७॥ अ-
ग्निरीशे वसव्यस्याग्निर्महः सौभगस्य । तान्यस्मभ्यं रासते ॥८॥
उषो मघोन्या वह सूनृते वार्या पुरु । अस्मभ्यं वाजिनीवति
॥९॥ तत्सु नः सविता भगो वरुणो मित्रो अर्यमा । इंद्रो नो
राधसा गमत् ॥ १० ॥ ७ ॥

॥ ५६ ॥ १–७ वामदेवः ॥ द्यावापृथिव्यौ ॥ १–४ त्रिष्टुप् । ५–७ गायत्री ॥

॥ ५६ ॥ मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां
शुचयद्भिरर्कैः । यत्सीं वरिष्ठे बृहती विमिन्वन्रुवद्धोक्षा
पप्रथानेभिरेवैः ॥ १ ॥ देवी देवेभिर्यजते यजत्रैरमिनती
तस्थतुरुक्षमाणे । ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री
शुचयद्भिरर्कैः ॥२॥ स इत्स्वपा भुवनेष्वास य इमे द्यावा-
पृथिवी जजान । उर्वी गभीरे रजसी सुमेके अवंशे धीरः
शच्या समैरत् ॥३॥ नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भि-

रिषयंती सजोषाः । उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदासाः ॥४॥ प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे । शुची उप प्रशस्तये ॥५॥ पुनाने तन्वा मिथः स्वेन दक्षेण राजथः । ऊह्याथे सनादृतं ॥६॥ मही मित्रस्य साधयस्तरंती पिप्रंती ऋतं । परि यज्ञं नि षेदथुः ॥७॥८॥

॥५७॥१-८ वामदेवः॥१-३ क्षेत्रपतिः। ४ शुनः। ५.८ शुनासीरौ। ६.७ सीता॥ १.४.६.७ अनुष्टुप्। २.३.८ त्रिष्टुप्। ५ पुरउष्णिक्॥

॥५७॥ क्षेत्रस्य पतिना वयं हितेनेव जयामसि । गामश्वं पोषयित्न्वा स नो मृळातीदृशे ॥१॥ क्षेत्रस्य पते मधुमंतमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व । मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयंतु ॥२॥ मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वंतरिक्षं । क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यंतो अन्वेनं चरेम ॥३॥ शुनं वाहाः शुनं नरः शुनं कृषतु लांगलं । शुनं वरत्रा बध्यंतां शुनमष्ट्रामुदिंगय ॥४॥ शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः । तेनेमामुप सिंचतं ॥५॥ अर्वाची सुभगे भव सीते वंदामहे त्वा । यथा नः सुभगाससि यथा नः सुफलाससि ॥६॥ इंद्रः सीतां नि गृह्णातु तां पूषानु यच्छतु । सा नः पयस्वती दुहामुत्तरामुत्तरां समां ॥७॥ शुनं नः फाला वि कृषंतु भूमिं शुनं कीनाशा अभि यंतु वाहैः । शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तं ॥८॥९॥

॥५८॥ १-११ वामदेवः॥ अग्निः सूर्यो वापो वा गावो वा घृतं वा॥ १-१० त्रिष्टुप्। ११ जगती॥

॥५८॥ समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥१॥ वयं नाम प्र ब्रवामा घृतस्यास्मिन्यज्ञे

धारयामा नमोभिः। उप ब्रह्मा शृणवच्छस्यमानं चतुःशृंगो-
ऽवमीद्गौर एतत्॥२॥ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे
सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो
मर्त्याँ आ विवेश॥३॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि दे-
वासो घृतमन्वविंदन्। इंद्र एकं सूर्य एकं जजान वेनादेकं
स्वधया निष्टतक्षुः॥४॥ एता अर्षंति हृद्यात्समुद्राच्छतव्रजा
रिपुणा नावचक्षे। घृतस्य धारा अभि चाकशीमि हिरण्ययो
वेतसो मध्य आसां॥५॥१०॥ सम्यक्स्रवंति सरितो न धेना
अंतर्हृदा मनसा पूयमानाः। एते अर्षंत्यूर्मयो घृतस्य मृगा इव
क्षिपणोरीषमाणाः॥६॥ सिंधोरिव प्राध्वने शूघनासो वात-
प्रमियः पतयंति यह्वाः। घृतस्य धारा अरुषो न वाजी काष्ठा
भिंदन्नूर्मिभिः पिन्वमानः॥७॥ अभि प्रवंत समनेव योषाः
कल्याण्यः स्मयमानासो अग्निं। घृतस्य धाराः समिधो नसंत
ता जुषाणो हर्यति जातवेदाः॥८॥ कन्या इव वहतुमेतवा
उ अंज्यंजाना अभि चाकशीमि। यत्र सोमः सूयते यत्र यज्ञो
घृतस्य धारा अभि तत्पवंते॥९॥ अभ्यर्षत सुष्टुतिं गव्यमा-
जिमस्मासु भद्रा द्रविणानि धत्त। इमं यज्ञं नयत देवता नो
घृतस्य धारा मधुमत्पवंते॥१०॥ धामन्ते विश्वं भुवनमधि
श्रितमंतः समुद्रे हृद्यंतरायुषि। अपामनीके समिथे य आ-
भृतस्तमश्याम मधुमंतं त ऊर्मिं॥११॥११॥५॥४॥

॥ इति चतुर्थं मंडलं समाप्तं ॥

॥१॥१-१२ बुधगविष्ठिरावात्रेयौ ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१॥ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमु-
षासं। यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाक-
मच्छ ॥१॥ अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः
प्रातरस्थात्। समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो
निरमोचि ॥२॥ यदीं गणस्य रशनामजीगः शुचिरंक्ते शुचि-
भिर्गोभिरग्निः। आद्दक्षिणा युज्यते वाजयंत्युत्तानामूर्ध्वो अध-
यज्जुहूभिः ॥३॥ अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं
चरंति। यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे
अह्नां ॥४॥ जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो
वनेषु। दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजी-
यान् ॥५॥ अग्निर्होता न्यसीदद्यजीयानुपस्थे मातुः सुरभा उ
लोके। युवा कविः पुरुनिःष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य
इद्धः ॥६॥१२॥ प्र णु त्यं विप्रमध्वरेषु साधुमग्निं होतारमीळते
नमोभिः। आ यस्ततान रोदसी ऋतेन नित्यं मृजंति वाजिनं
घृतेन ॥७॥ मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अति-
थिः शिवो नः। सहस्रशृंगो वृषभस्तदोजा विश्वाँ अग्ने सहसा
प्रास्यन्यान् ॥८॥ प्र सद्यो अग्ने अत्येष्यन्यानाविर्यस्मै चारुतमो
बभूथ। ईळेन्यो वपुष्यो विभावा प्रियो विशामतिथिर्मानु-
षीणां ॥९॥ तुभ्यं भरंति क्षितयो यविष्ठ बलिमग्ने अंतित
ओत दूरात्। आ भंदिष्ठस्य सुमतिं चिकिद्धि बृहत्ते अग्ने महि
शर्म भद्रं ॥१०॥ आद्य रथं भानुमो भानुमंतमग्ने तिष्ठ यजतेभिः
समंतं। विद्वान्पथीनामुर्वं१तरिक्षमेह देवान्हविरद्याय वक्षि
॥११॥ अवोचाम कवये मेध्याय वचो वंदारु वृषभाय वृष्णे।

गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यंचमश्रेत्
॥ १२ ॥ १३ ॥

॥ २ ॥ १. ३–८. १०–१२ कुमार आत्रेयो वृशो वा जार उभौ वा । २. ९ वृशो जारः ॥ अग्निः ॥ १–११ त्रिष्टुप् । १२ शक्वरी ॥

॥२॥ कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति
पित्रे । अनीकमस्य न मिनज्जनासः पुरः पश्यंति निहितमर-
तौ ॥१॥ कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान ।
पूर्वीर्हि गर्भः शरदो ववर्धापश्यं जातं यदसूत माता ॥२॥ हि-
रण्यदंतं शुचिवर्णमारात्क्षेत्रादपश्यमायुधा मिमानं । ददानो
अस्मा अमृतं विपृक्वत्किं मामनिंद्राः कृणवन्ननुक्थाः ॥ ३ ॥
क्षेत्रादपश्यं सनुतश्चरंतं सुमद्यूथं न पुरु शोभमानं । न ता
अगृभ्रन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवंति ॥ ४ ॥ के
मे मर्यकं वि यवंत गोभिर्न येषां गोपा अरणश्चिदास । य ईं
जगृभुरव ते सृजंत्वाजाति पश्व उप नश्चिकित्वान् ॥ ५ ॥ वसां
राजानं वसतिं जनानामरातयो नि दधुर्मर्त्येषु । ब्रह्माण्यत्रेरव
तं सृजंतु निंदितारो निंद्यासो भवंतु ॥६॥१४॥ शुनश्चिच्छेपं
निदितं सहस्राद्यूपादमुंचो अशमिष्ट हि षः । एवास्मदग्ने वि
मुमुग्धि पाशान्होतश्चिकित्व इह तू निषद्य ॥७॥ हृणीयमानो
अप हि मदैयेः प्र मे देवानां व्रतपा उवाच । इंद्रो विद्वाँ अनु
हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगां ॥८॥ वि ज्योतिषा
बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा । प्रादेवीर्मायाः
सहते दुरेवाः शिशीते शृंगे रक्षसे विनिक्षे ॥९॥ उत स्वानासो
दिवि षंत्वग्नेस्तिग्मायुधा रक्षसे हंतवा उ । मदे चिदस्य प्र रु-
जंति भामा न वरंते परिबाधो अदेवीः ॥१०॥ एतं ते स्तोमं तु-

विजात विप्रो रथं न धीरः स्वपा अतक्षं। यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना जयेम ॥११॥ तुविग्रीवो वृषभो वावृधानोऽशत्र्वं१र्यः समजाति वेदः। इतीममग्निममृता अवोचन्बर्हिष्मते मनवे शर्म यंसद्धविष्मते मनवे शर्म यंसत् ॥१२॥१५॥

॥३॥ १-१२ वसुश्रुत आत्रेयः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥३॥ त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः। त्वे विश्वे सहसस्पुत्र देवास्त्वमिंद्रो दाशुषे मर्त्याय ॥१॥ त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्गुह्यं बिभर्षि। अंजंति मित्रं सुधितं न गोभिर्यद्दंपती समनसा कृणोषि ॥२॥ तव श्रिये मरुतो मर्जयंत रुद्र यत्ते जनिम चारु चित्रं। पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनां ॥३॥ तव श्रिया सुदृशो देव देवाः पुरू दधाना अमृतं सपंत। होतारमग्निं मनुषो नि षेदुर्दशस्यंत उशिजः शंसमायोः ॥४॥ न त्वद्धोता पूर्वो अग्ने यजीयान्न काव्यैः परो अस्ति स्वधावः। विशश्च यस्या अतिथिर्भवासि स यज्ञेन वनवद्देव मर्तान् ॥५॥ वयमग्ने वनुयाम त्वोता वसूयवो हविषा बुध्यमानाः। वयं समर्ये विदथेष्वह्नां वयं राया सहसस्पुत्र मर्तान् ॥६॥१६॥ यो न आगो अभ्येनो भरात्यधीदघमघशंसे दधात। जही चिकित्वो अभिशस्तिमेतामग्ने यो नो मर्चयति द्वयेन ॥७॥ त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना अयजंत हव्यैः। संस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमानः ॥८॥ अव स्पृधि पितरं योधि विद्वान्पुत्रो यस्ते सहसः सून ऊहे। कदा चिकित्वो अभि चक्षसे नोऽग्ने कदा ऋतचिद्यातयासे ॥९॥ भूरि नाम वंदमानो द-

धाति पिता वंसो यदि तज्जोषयासे। कुविद्देवस्य सहसा च-
कानः सुम्नमग्निर्वनते वावृधानः ॥१०॥ त्वमंग जरितारं यविष्ठ
विश्वान्यग्ने दुरिताति पर्षि। स्तेना अदृश्रन्रिपवो जनासो-
ऽज्ञातकेता वृजिना अभूवन् ॥११॥ इमे यामासस्त्वद्रिगभूवन्व-
सवे वा तदिदागो अवाचि। नाहायमग्निरभिशस्तये नो न
रीषते वावृधानः परा दात् ॥१२॥१७॥

॥४॥ १-११ वसुश्रुत आत्रेयः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥४॥ त्वामग्ने वसुपतिं वसूनामभि प्र मंदे अध्वरेषु राजन्।
त्वया वाजं वाजयंतो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानां ॥१॥ ह-
व्यवाळग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे। सु-
गार्हपत्याः समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि ॥२॥
विशां कविं विश्पतिं मानुषीणां शुचिं पावकं घृतपृष्ठमग्निं।
नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वार्याणि ॥३॥ जु-
षस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य। जुषस्व
नः समिधं जातवेद आ च देवान्हविरद्याय वक्षि ॥४॥ जुष्टो द-
मूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान्। विश्वा
अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ॥५॥१८॥
वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे३ स्वायै। पि-
पर्षि यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान्
॥६॥ वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे। अ-
स्मे रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि ॥७॥
अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रिषधस्थ हव्यं। वयं
देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि ॥८॥ विश्वा-
नि नो दुर्गहा जातवेदः सिंधुं न नावा दुरिताति पर्षि। अग्ने

अचित्वन्नमसा गृणानो३ स्माकं बोध्यविता तनूनां ॥९॥ य-
स्त्वां हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि । जात-
वेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां ॥१०॥
यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं । अश्विनं
स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति ॥११॥१९॥

॥५॥ १–११ वसुश्रुत आत्रेयः ॥ आप्रं ॥ गायत्री ॥

॥५॥ सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जा-
तवेदसे ॥१॥ नराशंसः सुषूदतीमं यज्ञमदाभ्यः । कविर्हि मधु-
हस्त्यः ॥२॥ ईळितो अग्न आ वहेंद्रं चित्रमिह प्रियं । सुखै
रथेभिरूतये ॥३॥ ऊर्णम्रदा वि प्रथस्वाभ्य१र्का अनूषत ।
भवा नः शुभ्र सातये ॥४॥ देवीर्द्वारो वि श्रयध्वं सुप्रायणा
न ऊतये । प्रप्र यज्ञं पृणीतन ॥५॥२०॥ सुप्रतीके वयोवृधा
यह्वी ऋतस्य मातरा । दोषामुषासमीमहे ॥६॥ वातस्य
पत्मन्नीळिता दैव्या होतारा मनुषः । इमं नो यज्ञमा गतं
॥७॥ इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीं-
दंत्वस्रिधः ॥८॥ शिवस्त्वष्टरिहा गहि विभुः पोष उत त्मना ।
यज्ञेयज्ञे न उदव ॥९॥ यत्र वेत्थ वनस्पते देवानां गुह्या ना-
मानि । तत्र हव्यानि गामय ॥१०॥ स्वाहाग्नये वरुणाय
स्वाहेंद्राय मरुद्भ्यः । स्वाहा देवेभ्यो हविः ॥११॥२१॥

॥६॥ १–१० वसुश्रुत आत्रेयः ॥ अग्निः ॥ पंक्तिः ॥

॥६॥ अग्निं तं मन्ये यो वसुरस्तं यं यंति धेनवः । अस्तमर्वंत
आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥१॥ सो
अग्निर्यो वसुर्गृणे सं यमायंति धेनवः । समर्वंतो रघुद्रुवः सं सु-
जातासः सूरय इषं स्तोतृभ्य आ भर ॥२॥ अग्निर्हि वाजिनं

विशे ददाति विश्वचर्षणिः। अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर॥३॥ आ ते अग्न इधीमहि द्युमंतं देवाजरं। यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर॥४॥ आ ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते। सुश्चंद्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर॥५॥२२॥ प्रो त्ये अग्नयोऽग्निषु विश्वं पुष्यंति वार्यं। ते हिन्विरे त इन्विरे त इषण्यंत्यानुषगिषं स्तोतृभ्य आ भर॥६॥ तव त्ये अग्ने अर्चयो महि व्राधंत वाजिनः। ये पत्वभिः शफानां व्रजा भुरंत गोनामिषं स्तोतृभ्य आ भर॥७॥ नवा नो अग्न आ भर स्तोतृभ्यः सुक्षितीरिषः। ते स्याम य आनृचुस्त्वादूतासो दमेदम इषं स्तोतृभ्य आ भर॥८॥ उभे सुश्चंद्र सर्पिषो दर्वी श्रीणीष आसनि। उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर॥९॥ एवाँ अग्निमजुर्यमुर्गीर्भिर्यज्ञेभिरानुषक्। दधदस्मे सुवीर्यमुत त्यदाश्वश्व्यमिषं स्तोतृभ्य आ भर॥१०॥२३॥

॥७॥ १–१० इष आत्रेयः॥ अग्निः॥ १–९ अनुष्टुप्। १० पंक्तिः॥

॥७॥ सखायः सं वः सम्यंचमिषं स्तोमं चाग्नये। वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते॥१॥ कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने। अर्हंतश्चिद्यमिंधते संजनयंति जंतवः॥२॥ सं यदिषो वनामहे सं हव्या मानुषाणां। उत द्युम्नस्य शवस ऋतस्य रश्मिमा ददे॥३॥ स स्मा कृणोति केतुमा नक्तं चिद्दूर आ सते। पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः॥४॥ अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति। अभीमह स्वजेन्यं भूमा पृष्ठेव रुरुहुः॥५॥२४॥ यं मर्त्यः पुरुस्पृहं विदद्विश्वस्य धायसे। प्र स्वा-

दनं पितूनामस्तताति चिदायवे ॥६॥ स हि ष्मा धन्वाक्षितं
दाता न दात्या पशुः । हिरिश्मश्रुः शुचिदन्नृभुरनिभृष्टतवि-
षिः ॥७॥ शुचिः ष्म यस्मा अत्रिवत्प्र स्वधितीव रीयते । सु-
षूरसूत माता क्राणा यदानशे भगं ॥८॥ आ यस्ते सर्पिरासु-
तेऽग्ने शमस्ति धायसे । ऐषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु
धाः ॥९॥ इति चिन्मन्युमध्रिजस्त्वादातमा पशुं ददे । आदग्ने
अपृणतोऽत्रिः सासह्याद्दस्यूनिषः सासह्यान्नॄन् ॥ १० ॥ २५ ॥

॥ ८ ॥ १-७ इष आत्रेयः ॥ अग्निः ॥ जगती ॥

॥८॥ त्वामग्न ऋतायवः समीधिरे प्रत्नं प्रत्नास ऊतये स-
हस्कृत । पुरुश्चन्द्रं यजतं विश्वधायसं दमूनसं गृहपतिं वरेण्यं
॥ १ ॥ त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि
षेदिरे । बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषं
॥२॥ त्वामग्ने मानुषीरीळते विशो होत्राविदं विविचिं रत्न-
धातमं । गुहा सन्तं सुभग विश्वदर्शतं तुविष्वणसं सुयजं
घृतश्रियं ॥ ३ ॥ त्वामग्ने धर्णसिं विश्वधा वयं गीर्भिर्गृणन्तो
नमसोप सेदिम । स नो जुषस्व समिधानो अङ्गिरो देवो
मर्तस्य यशसा सुदीतिभिः ॥ ४ ॥ त्वमग्ने पुरुरूपो विशेविशे
वयो दधासि प्रत्नथा पुरुष्टुत । पुरूण्यन्ना सहसा वि राजसि
त्विषिः सा ते तित्विषाणस्य नाधृषे ॥ ५॥ त्वामग्ने समिधानं
यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनं । उरुज्रयसं घृतयोनि-
माहुतं त्वेषं चक्षुर्दधिरे चोदयन्मति ॥६॥ त्वामग्ने प्रदिव आहुतं
घृतैः सुम्नायवः सुषमिधा समीधिरे । स वावृधान ओषधीभि-
रुक्षितोऽभि ज्रयांसि पार्थिवा वि तिष्ठसे ॥७॥२६॥८॥३॥

॥ ९ ॥ १–७ गय आत्रेयः ॥ अग्निः ॥ १–४. ६ अनुष्टुप् । ५. ७ पंक्तिः ॥

॥ ९ ॥ त्वाम॑ग्ने ह॒विष्म॑न्तो दे॒वं मर्ता॑स ईळते । मन्ये॑ त्वा
जा॒तवे॑दसं॒ स ह॒व्या व॑क्ष्यानु॒षक् ॥ १ ॥ अ॒ग्निर्होता॒ दास्व॑तः
क्षय॑स्य वृ॒क्तब॑र्हिषः । सं य॒ज्ञास॒श्चर॑न्ति॒ यं सं वाजा॑सः श्रव॒-
स्यवः॑ ॥२॥ उ॒त स्म॒ यं शिशुं॑ यथा॒ नवं॒ जनि॑ष्टा॒रणी॑ । ध॒र्तार॑ं
मानु॑षीणां वि॒शाम॒ग्निं स्व॑ध्व॒रम् ॥३॥ उ॒त स्म॑ दुर्गृभीयसे पु॒त्रो
न ह्वा॒र्याणा॑म् । पु॒रू यो दग्धा॑सि॒ वना॑ग्ने प॒शुर्न यव॑से ॥ ४ ॥ अध॑
स्म॒ यस्या॒र्चयः॑ स॒म्यक्सं॒यन्ति॑ धू॒मिनः॑ । यदी॒मह॑ त्रि॒तो दि॒व्युप॑
ध्माते॑व॒ धम॑ति॒ शिशी॑ते ध्मा॒तरी॑ यथा ॥ ५ ॥ तवा॒हम॑ग्न ऊ॒ति-
भि॑र्मि॒त्रस्य॑ च॒ प्रश॑स्तिभिः । द्वे॒षो॒युतो॒ न दु॑रि॒ता तु॒र्याम॒ मर्त्या॑नाम्
॥६॥ तं नो॑ अग्ने अ॒भी नरो॑ र॒यिं स॑हस्व॒ आ भ॑र । स क्षे॑पयत्स
पो॑षयद्भु॒वद्वाज॑स्य सा॒तय॑ उ॒तैधि॑ पृ॒त्सु नो॑ वृ॒धे ॥ ७ ॥ १ ॥

॥ १० ॥ १–७ गय आत्रेयः ॥ अग्निः ॥ १–३. ५. ६ अनुष्टुप् । ४. ७ पंक्तिः ॥

॥१०॥ अग्न॒ ओजि॑ष्ठ॒मा भ॑र द्यु॒म्नम॒स्मभ्य॑मध्रिगो । प्र नो॑ रा॒या
परी॑णसा॒ रत्सि॒ वाजा॑य॒ पन्था॑म् ॥१॥ त्वं नो॑ अग्ने अद्भुत॒ क्रत्वा॒
दक्ष॑स्य मं॒हना॑ । त्वे अ॑सु॒र्य१॒॑मारु॑हत्क्रा॒णा मि॒त्रो न य॒ज्ञियः॑ ॥२॥
त्वं नो॑ अग्न ए॒षां॒ गयं॑ पु॒ष्टिं च॑ वर्धय । ये स्तोमे॑भिः॒ प्र सू॒रयो॒ नरो॑
म॒घान्या॑न॒शुः ॥३॥ ये अ॑ग्ने च॒न्द्र ते॒ गिरः॑ शु॒म्भन्त्यश्व॑राधसः । शुष्मे॑भिः
शु॒ष्मिणो॒ नरो॑ दि॒वश्चि॒द्येषां॑ बृ॒हत्सु॑की॒र्तिर्बोध॑ति॒ त्मना॑ ॥४॥
तव॒ त्ये अ॑ग्ने अ॒र्चयो॒ भ्राज॑न्तो यन्ति धृष्णु॒या । परि॑ज्मानो॒ न
वि॒द्युतः॑ स्वा॒नो रथो॒ न वा॑ज॒युः ॥५॥ नू नो॑ अग्न ऊ॒तये॑ स॒बा-
ध॑सश्च रा॒तये॑ । अ॒स्माका॑सश्च सू॒रयो॒ विश्वा॒ आशा॑स्तरी॒षणि॑ ॥६॥
त्वं नो॑ अग्ने अङ्गिरः स्तु॒तः स्तवा॑न॒ आ भ॑र । होत॑र्विभ्वा॒सहं॑
र॒यिं स्तो॒तृभ्यः॒ स्तव॑से च न उ॒तैधि॑ पृ॒त्सु नो॑ वृ॒धे ॥७॥२॥

॥ ११ ॥ १–६ सुतंभर आत्रेयः ॥ अग्निः ॥ जगती ॥

॥११॥ जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे। घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥१॥ यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समीधिरे। इंद्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥२॥ असंमृष्टो जायसे मात्रोः शुचिर्मंद्रः कविरुदतिष्ठो विवस्वतः। घृतेन त्वावर्धयन्नग्न आहुत धूमस्ते केतुरभवद्दिवि श्रितः ॥३॥ अग्निर्नो यज्ञमुप वेतु साधुयाग्निं नरो वि भरंते गृहेगृहे। अग्निर्दूतो अभवद्धव्यवाहनोऽग्निं वृणाना वृणते कविक्रतुं ॥४॥ तुभ्येदमग्ने मधुमत्तमं वचस्तुभ्यं मनीषा इयमस्तु शं हृदे। त्वां गिरः सिंधुमिवावनीर्महीरा पृणंति शवसा वर्धयंति च ॥५॥ त्वामग्ने अंगिरसो गुहा हितमन्वविंदञ्छिश्रियाणं वनेवने। स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमंगिरः ॥६॥३॥

॥ १२ ॥ १–६ सुतंभर आत्रेयः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१२॥ प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म। घृतं न यज्ञ आस्ये३ सुपूतं गिरं भरे वृषभाय प्रतीची ॥१॥ ऋतं चिकित्व ऋतमिच्चिकिद्धृतस्य धारा अनु तृंधि पूर्वीः। नाहं यातुं सहसा न द्वयेन ऋतं सपाम्यरुषस्य वृष्णः ॥२॥ कया नो अग्न ऋतयन्नृतेन भुवो नवेदा उचथस्य नव्यः। वेदा मे देव ऋतुपा ऋतूनां नाहं पतिं सनितुरस्य रायः ॥३॥ के ते अग्ने रिपवे बंधनासः के पायवः सनिषंत द्युमंतः। के धासिमग्ने अनृतस्य पांति क आसतो वचसः संति गोपाः ॥४॥ सखायस्ते विषुणा अग्न एते शिवासः संतो अशिवा अभूवन्। अधूर्षत स्वयमेते वचोभिर्ऋजूयते वृजिनानि ब्रुवंतः ॥५॥ यस्ते अग्ने नमसा

यज्ञमीळ्हं ऋतं स पात्यरुषस्य वृष्णः। तस्य क्षयः पृथुरा साधुरेतु प्रसस्रीणस्य नहुषस्य शेषः ॥ ६ ॥ ४ ॥

॥ १३ ॥ १-६ सुतंभर आत्रेयः ॥ अग्निः ॥ गायत्री ॥

॥१३॥ अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि। अग्ने अर्चन्त ऊतये॥१॥ अग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशः। देवस्य द्रविणस्यवः॥२॥ अग्निर्जुषत नो गिरो होता यो मानुषेष्वा। स यक्षद्दैव्यं जनम्॥३॥ त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः। त्वया यज्ञं वि तन्वते॥४॥ त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम्। स नो रास्व सुवीर्यम्॥५॥ अग्ने नेमिररा इव देवांस्त्वं परिभूरसि। आ राधश्चित्रमृञ्जसे॥६॥५॥

॥ १४ ॥ १-६ सुतंभर आत्रेयः ॥ अग्निः ॥ गायत्री ॥

॥१४॥ अग्निं स्तोमेन बोधय समिधानो अमर्त्यम्। हव्या देवेषु नो दधत्॥१॥ तमध्वरेष्वीळते देवं मर्ता अमर्त्यम्। यजिष्ठं मानुषे जने॥२॥ तं हि शश्वन्त ईळते स्रुचा देवं घृतश्चुता। अग्निं हव्याय वोळ्हवे॥३॥ अग्निर्जातो अरोचत घ्नन्दस्यूञ्ज्योतिषा तमः। अविन्दद्गा अपः स्वः॥४॥ अग्निमीळेन्यं कविं घृतपृष्ठं सपर्यत। वेतु मे शृणवद्धवम्॥५॥ अग्निं घृतेन वावृधुः स्तोमेभिर्विश्वचर्षणिम्। स्वाधीभिर्वचस्युभिः॥६॥६॥१॥

॥ १५ ॥ १-५ धरुण आंगिरसः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१५॥ प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्याय। घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः॥१॥ ऋतेन ऋतं धरुणं धारयन्त यज्ञस्य शाके परमे व्योमन्। दिवो धर्मन्धरुणे सेदुषो नॄञ्जातैरजाताँ अभि ये ननक्षुः॥२॥ अंहोयुवस्तन्वस्तन्वते वि वयो महद्दुष्टरं पूर्व्याय। स संवतो नवजातस्तुतु-

योस्त्विंहं न क्रुद्धमभितः परि ष्टुः ॥३॥ मातेव यद्भरसे पप्रथानो
जनंजनं धायसे चक्षसे च । वयोवयो जरसे यद्दधानः परि
त्मना विषुरूपो जिगासि ॥ ४ ॥ वाजो नु ते शवसस्पात्वंतमुरुं
दोघं धरुणं देव रायः । पदं न तायुर्गुहा दधानो महो राये
चितयन्नत्रिमस्पः ॥ ५ ॥ ७ ॥

॥ १६ ॥ १–५ पूरुरात्रेयः ॥ अग्निः ॥ १–४ अनुष्टुप् । ५ पंक्तिः ॥

॥१६॥ बृहद्वयो हि भानवेऽर्चा देवायाग्नये । यं मित्रं न प्रश-
स्तिभिर्मर्तासो दधिरे पुरः ॥१॥ स हि द्युभिर्जनानां होता दक्षस्य
बाह्वोः । वि हव्यमग्निरानुषग्भगो न वारमृण्वति ॥२॥ अस्य स्तोमे
मघोनः सख्ये वृद्धशोचिषः । विश्वा यस्मिन्तुविष्वणि समर्ये शु-
ष्ममादधुः ॥३॥ अधा ह्यग्न एषां सुवीर्यस्य मंहना । तमिद्यह्वं न रो-
दसी परि श्रवो बभूवतुः ॥४॥ नू न एहि वार्यमग्ने गृणान आ भर ।
ये वयं ये च सूरयः स्वस्ति धामहे सचोतैधि पृत्सु नो वृधे ॥५॥८॥

॥ १७ ॥ १–५ पूरुरात्रेयः ॥ अग्निः ॥ १–४ अनुष्टुप् । ५ पंक्तिः ॥

॥ १७ ॥ आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये । अग्निं कृते
स्वध्वरे पूरुरीळीतावसे ॥ १ ॥ अस्य हि स्वयशस्तर आसा
विधर्मन्मन्यसे । तं नाकं चित्रशोचिषं मंद्रं परो मनीषया ॥२॥
अस्य वासा उ अर्चिषा य आयुक्त तुजा गिरा । दिवो न यस्य
रेतसा बृहच्छोचंत्यर्चयः ॥ ३ ॥ अस्य क्रत्वा विचेतसो दस्मस्य
वसु रथ आ । अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते ॥४॥ नू
न इद्धि वार्यमासा सचंत सूरयः । ऊर्जो नपादभिष्टये पाहि
शग्धि स्वस्तय उतैधि पृत्सु नो वृधे ॥ ५ ॥ ९ ॥

॥ १८ ॥ १–५ द्वितो मृक्तवाहा आत्रेयः ॥ अग्निः ॥ १–४ अनुष्टुप् । ५ पंक्तिः ॥

॥१८॥ प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः । विश्वा-

नि यो अमर्त्यो हव्या मर्तेषु रण्यति ॥१॥ द्विताय मृक्तवाहसे स्वस्य दक्षस्य मंहना। इंदुं स धत्त आनुषक्स्तोता चित्ते अमर्त्य ॥२॥ तं वो दीर्घायुशोचिषं गिरा हुवे मघोनां। अरिष्टो येषां रथो व्यश्वदावन्नीयते ॥३॥ चित्रा वा येषु दीधितिरासन्नुक्था पांति ये। स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि ॥४॥ ये मे पंचाशतं ददुरश्वानां सधस्तुति। द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणां ॥ ५ ॥ १० ॥

॥१९॥ १–५ वव्रिरात्रेयः ॥ अग्निः ॥ १. २ गायत्री। ३. ४ अनुष्टुप्। ५ विराड्रूपा ॥

॥ १९ ॥ अभ्यवस्थाः प्र जायंते प्र वव्रेर्वव्रिश्चिकेत। उपस्थे मातुर्वि चष्टे ॥१॥ जुहुरे वि चितयंतोऽनिमिषं नृम्णं पांति। आ दृळ्हां पुरं विविशुः ॥ २ ॥ आ श्वैत्रेयस्य जंतवो द्युमद्वर्धंत कृष्टयः। निष्कग्रीवो बृहदुक्थ एना मध्वा न वाजयुः ॥ ३ ॥ प्रियं दुग्धं न काम्यमजामि जाम्योः सचा। घर्मो न वाजजठरोऽदब्धः शश्वतो दभः ॥४॥ क्रीळन्नो रश्म आ भुवः सं भस्मना वायुना वेविदानः। ता अस्य सन्धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः ॥ ५ ॥ ११ ॥

॥ २० ॥ १–४ प्रयस्वंत ऋषयः ॥ अग्निः ॥ १–३ अनुष्टुप्। ४ पंक्तिः ॥

॥२०॥ यमग्ने वाजसातम त्वं चिन्मन्यसे रयिं। तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजं ॥१॥ ये अग्ने नेरयंति ते वृद्धा उग्रस्य शवसः। अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिरे ॥ २ ॥ होतारं त्वा वृणीमहेऽग्ने दक्षस्य साधनं। यज्ञेषु पूर्व्यं गिरा प्रयस्वंतो हवामहे ॥३॥ इत्था यथा त ऊतये सहसावन्दिवेदिवे। राय ऋताय सुक्रतो गोभिः ष्याम सधमादो वीरैः स्याम सधमादः ॥ ४ ॥ १२ ॥

॥ २१ ॥ १–४ वस आत्रेयः ॥ अग्निः ॥ १–३ अनुष्टुप्। ४ पंक्तिः ॥

॥२१॥ मनुष्वत्त्वा नि धीमहि मनुष्वत्समिधीमहि। अग्ने मनु-
ष्वदंगिरो देवान्देवयते यज ॥१॥ त्वं हि मानुषे जनेऽग्ने सुप्रीत
इध्यसे। स्रुचस्त्वा यंत्यानुषक्सुजात सर्पिरासुते ॥२॥ त्वां विश्वे
सजोषसो देवासो दूतमक्रत। सपर्यंतस्त्वा कवे यज्ञेषु देवमी-
ळते ॥३॥ देवं वो देवयज्ययाग्निमीळीत मर्त्यः। समिद्धः शुक्र
दीदिह्यृतस्य योनिमासदः ससस्य योनिमासदः ॥ ४ ॥ १३ ॥

॥ २२ ॥ १–४ विश्वसामात्रेयः ॥ अग्निः ॥ १–३ अनुष्टुप्। ४ पंक्तिः ॥

॥२२॥ प्र विश्वसामन्नत्रिवदर्चा पावकशोचिषे। यो अध्वरे-
ष्वीड्यो होता मंद्रतमो विशि ॥१॥ न्य१ग्निं जातवेदसं दधाता
देवमृत्विजं। प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः ॥२॥ चिकित्वि-
न्मनसं त्वा देवं मर्तास ऊतये। वरेण्यस्य तेऽवस इयानासो अम-
न्महि ॥३॥ अग्ने चिकिद्ध्य१स्य न इदं वचः सहस्य। तं त्वा सुशिप्र
दंपते स्तोमैर्वर्धंत्यत्रयो गीर्भिः शुंभंत्यत्रयः ॥ ४ ॥ १४ ॥

॥ २३ ॥ १–४ द्युम्नो विश्वचर्षणिः ॥ अग्निः ॥ १–३ अनुष्टुप्। ४ पंक्तिः ॥

॥ २३ ॥ अग्ने सहंतमा भर द्युम्नस्य प्रासहा रयिं। विश्वा य-
श्चर्षणीरभ्या३सा वाजेषु सासहत् ॥१॥ तमग्ने पृतनाषहं रयिं
सहस्व आ भर। त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः
॥२॥ विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः। होतारं स-
द्मसु प्रियं व्यंति वार्या पुरु ॥३॥ स हि ष्मा विश्वचर्षणिरभि-
माति सहो दधे। अग्न एषु क्षयेष्वा रेवन्नः शुक्र दीदिहि द्युम-
त्पावक दीदिहि ॥ ४ ॥ १५ ॥

॥ २४ ॥ १. २. ३. ४ बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्च गौपायना लौपायना वा ॥
अग्निः ॥ द्विपदा ॥

॥२४॥ अग्ने त्वं नो अंतम उत त्राता शिवो भवा वरूथ्यः। वसु-

रग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥१॥२॥ स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्। तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥३॥४॥१६॥

॥ २५ ॥ १-९ वसूयव आत्रेयाः ॥ अग्निः ॥अनुष्टुप् ॥

॥२५॥ अच्छा वो अग्निमवसे देवं गासि स नो वसुः। रासत्पुत्र ऋषूणामृतावा पर्षति द्विषः ॥१॥ स हि सत्यो यं पूर्वे चिद्देवासश्चिद्यमीधिरे। होतारं मंद्रजिह्वमित्सुदीतिभिर्विभावसुं ॥२॥ स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या। अग्ने रायो दिदीहि नः सुवृक्तिभिर्वरेण्य ॥३॥ अग्निर्देवेषु राजत्यग्निर्मर्तेष्वाविशन्। अग्निर्नो हव्यवाहनोऽग्निं धीभिः सपर्यत ॥४॥ अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमं। अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥५॥१७॥ अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः। अग्निरत्यं रघुष्यदं जेतारमपराजितं ॥६॥ यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो। महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥७॥ तव द्युमंतो अर्चयो ग्रावेवोच्यते बृहत्। उतो ते तन्यतुर्यथा स्वानो अर्त त्मना दिवः ॥८॥ एवाँ अग्निं वसूयवः सहसानं ववंदिम। स नो विश्वा अति द्विषः पर्षन्नावेव सुक्रतुः ॥९॥१८॥

॥ २६ ॥ १-९ वसूयव आत्रेयाः ॥ अग्निः ॥ गायत्री ॥

॥२६॥ अग्ने पावक रोचिषा मंद्रया देव जिह्वया। आ देवान्वक्षि यक्षि च ॥१॥ तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशं देवाँ आ वीतये वह ॥२॥ वीतिहोत्रं त्वा कवे द्युमंतं समिधीमहि। अग्ने बृहंतमध्वरे ॥३॥ अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये। होतारं त्वा वृणीमहे ॥४॥ यजमानाय सुन्वत आग्ने

सुवीर्यं वह। देवैरा सत्सि बर्हिषि ॥५॥१९॥ समिधानः सहस्रजि-
दग्ने धर्माणि पुष्यसि। देवानां दूत उक्थ्यः॥६॥ न्य१ग्निं जातवेदसं
होत्रवाहं यविष्ठ्यं। दधाता देवमृत्विजं ॥७॥ प्र यज्ञ एत्वानुषग-
द्या देवव्यचस्तमः। स्तृणीत बर्हिरासदे॥८॥ एदं मरुतो अश्विना
मित्रः सीदंतु वरुणः। देवासः सर्वया विशा ॥९॥२०॥

॥२७॥ १–६ त्र्यरुणस्त्रैवृष्णस्त्रसदस्युश्च पौरुकुत्स्य अश्वमेधश्च भारत ऋषिर्वा॥
१–५ अग्निः। ६ इंद्राग्नी॥ १–३ त्रिष्टुप्। ४–६ अनुष्टुप्॥

॥२७॥ अनस्वंता सत्पतिर्मामहे मे गावा चेतिष्ठो असुरो म-
घोनः। त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर त्र्यरुणश्चिकेत ॥१॥
यो मे शता च विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति। वै-
श्वानर सुष्टुतो वावृधानोऽग्ने यच्छ त्र्यरुणाय शर्म ॥२॥ एवा ते
अग्ने सुमतिं चकानो नविष्ठाय नवमं त्रसदस्युः। यो मे गिरस्तुवि-
जातस्य पूर्वीर्युक्तेनाभि त्र्यरुणो गृणाति॥३॥ यो म इति प्रवोच-
त्यश्वमेधाय सूरये। दद्दृचा सनिं यते ददन्मेधामृतायते॥४॥ यस्य
मा परुषाः शतमुद्धर्षयंत्युक्षणः। अश्वमेधस्य दानाः सोमा इव
त्र्याशिरः॥५॥ इंद्राग्नी शतदाव्न्यश्वमेधे सुवीर्यं। क्षत्रं धारयतं बृह-
द्दिवि सूर्यमिवाजरं ॥६॥२१॥

॥२८॥ १–६ विश्ववारात्रेयी॥ अग्निः॥ १. ३ त्रिष्टुप्। २ जगती। ४ अनुष्टुप्।
५. ६ गायत्री॥

॥२८॥ समिद्धो अग्निर्दिवि शोचिरश्रेत्प्रत्यङ्ङुषसमुर्विया वि
भाति। एति प्राची विश्ववारा नमोभिर्देवाँ ईळाना हविषा
घृताची ॥१॥ समिध्यमानो अमृतस्य राजसि हविष्कृण्वंतं
सचसे स्वस्तये। विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने
नि च धत्त इत्पुरः॥२॥ अग्ने शर्ध महते सौभगाय तव द्युम्ना-

न्युत्तमानि संतु । सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि
तिष्ठा महांसि ॥ ३ ॥ समिद्धस्य प्रमहसोऽग्ने वंदे तव श्रियं ।
वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे ॥ ४ ॥ समिद्धो अग्न
आहुत देवान्यक्षि स्वध्वर । त्वं हि हव्यवाळसि ॥ ५ ॥ आ जु-
होता दुवस्यताग्निं प्रयत्यध्वरे । वृणीध्वं हव्यवाहनं ॥ ६ ॥ २२ ॥

॥ २९ ॥ १–१५ गौरिवीतिः शाक्त्यः ॥ १–८. ९[२]–१५ इंद्रः । ९[१] इंद्र उशना वा ॥
त्रिष्टुप् ॥

॥ २९ ॥ त्र्यर्यमा मनुषो देवताता त्री रोचना दिव्या धारयंत ।
अर्चंति त्वा मरुतः पूतदक्षास्त्वमेषामृषिरिंद्रासि धीरः ॥ १ ॥
अनु यदीं मरुतो मंदसानमार्चन्निंद्रं पपिवांसं सुतस्य । आदत्त
वज्रमभि यदहिं हन्नपो यह्वीरसृजत्सर्तवा उ ॥ २ ॥ उत ब्रह्माणो
मरुतो मे अस्येंद्रः सोमस्य सुषुतस्य पेयाः । तद्धि हव्यं मनुषे गा
अविंददहन्नहिं पपिवाँ इंद्रो अस्य ॥ ३ ॥ आद्रोदसी वितरं वि
ष्कभायत्संविव्यानश्चिद्भियसे मृगं कः । जिगर्तिमिंद्रो अपज-
र्गुराणः प्रति श्वसंतमव दानवं हन् ॥ ४ ॥ अध क्रत्वा मघवन्तुभ्यं
देवा अनु विश्वे अददुः सोमपेयं । यत्सूर्यस्य हरितः पतंतीः पुरः
सतीरुपरा एतशे कः ॥ ५ ॥ २३ ॥ नव यदस्य नवतिं च भोगा-
न्साकं वज्रेण मघवा विवृश्चत् । अर्चंतींद्रं मरुतः सधस्थे त्रैष्टु-
भेन वचसा बाधत द्यां ॥ ६ ॥ सखा सख्ये अपचत्तूयमग्निरस्य
क्रत्वा महिषा त्री शतानि । त्री साकमिंद्रो मनुषः सरांसि सुतं
पिबद्वृत्रहत्याय सोमं ॥ ७ ॥ त्री यच्छता महिषाणामघो मास्त्री
सरांसि मघवा सोम्यापाः । कारं न विश्वे अह्वंत देवा भरमिं-
द्राय यदहिं जघान ॥ ८ ॥ उशना यत्सहस्यै३रयातं गृहमिंद्र जूजु-
वानेभिरश्वैः । वन्वानो अत्र सरथं ययाथ कुत्सेन देवैरवनोर्ह शुष्णं

॥ ९ ॥ प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्वरिवो यातवेऽकः।
अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ्मृध्रवाचः
॥ १० ॥ २४ ॥ स्तोमासस्त्वा गौरिवीतेरवर्धन्नरंधयो वैदथिनाय
पिप्रुं। आ त्वामृजिश्वा सख्याय चक्रे पचन्पक्तीरपिबः सोम-
मस्य ॥ ११ ॥ नवग्वासः सुतसोमास इंद्रं दशग्वासो अभ्यर्चं-
त्यर्कैः। गव्यं चिदूर्वमपिधानवंतं तं चिन्नरः शशमाना अप व्रन्
॥१२॥ कथो नु ते परि चराणि विद्वान्वीर्या मघवन्या चकर्थ।
या चो नु नव्या कृणवः शविष्ठ प्रेदु ता ते विदथेषु ब्रवाम
॥१३॥ एता विश्वा चकृवाँ इंद्र भूर्यपरीतो जनुषा वीर्येण। या
चिन्नु वज्रिन्कृणवो दधृष्वान्न ते वर्ता तविष्या अस्ति तस्याः
॥१४॥ इंद्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्-
म। वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षं
॥ १५ ॥ २५ ॥

॥ ३० ॥ १–१५ बभ्रुरात्रेयः ॥ इंद्र ऋणंचयश्च ॥ त्रिष्टुप् ॥

॥३०॥ क१ स्य वीरः को अपश्यदिंद्रं सुखरथमीयमानं हरि-
भ्यां। यो राया वज्री सुतसोममिच्छन्तदोको गंता पुरुहूत
ऊती ॥ १ ॥ अवाचचक्षं पदमस्य सस्वरुग्रं निधातुरन्वायमि-
च्छन्। अपृच्छमन्याँ उत ते म आहुरिंद्रं नरो बुबुधाना अशेम
॥२॥ प्र नु वयं सुते या ते कृतानींद्र ब्रवाम यानि नो जुजोषः।
वेददविद्वाञ्छृणवच्च विद्वान्वहतेऽयं मघवा सर्वसेनः ॥ ३ ॥
स्थिरं मनश्चकृषे जात इंद्र वेषीदेको युधये भूयसश्चित्।
अश्मानं चिच्छवसा दिद्युतो वि विदो गवामूर्वमुस्रिया-
णां ॥ ४ ॥ परो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम
बिभ्रत्। अतश्चिदिंद्रादभयंत देवा विश्वा अपो अजयद्दासप-

त्नीः ॥ ५ ॥ २६ ॥ तुभ्येदेते मरुतः सुशेवा अर्चन्त्यर्कं सुन्वंत्यंधः ।
अहिमोहानमप आशयानं प्र मायाभिर्मायिनं सक्षदिंद्रः
॥ ६ ॥ वि षू मृधो जनुषा दानमिन्वन्नहन्गवा मघवन्त्संचका-
नः । अत्रा दासस्य नमुचेः शिरो यदवर्तयो मनवे गातुमिच्छन्
॥ ७ ॥ युजं हि मामकृथा आदिदिंद्र शिरो दासस्य नमुचेर्मथा-
यन् । अश्मानं चित्स्वर्यं१ वर्तमानं प्र चक्रियेव रोदसी मरु-
द्भ्यः ॥ ८ ॥ स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला
अस्य सेनाः । अंतर्ह्यख्यदुभे अस्य धेने अथोप प्रैद्युधये दस्युमिंद्रः
॥ ९ ॥ समत्र गावोऽभितोऽनवंतेहेह वत्सैर्वियुता यदासन् ।
सं ता इंद्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमंदन्
॥ १० ॥ २७ ॥ यदीं सोमा बभ्रुधूता अमंदन्नरोरवीद्वृषभः सादनेषु ।
पुरंदरः पपिवाँ इंद्रो अस्य पुनर्गवामददादुस्रियाणां ॥ ११ ॥
भद्रमिदं रुशमा अग्ने अक्रन्गवां चत्वारि ददतः सहस्रा । ऋ-
णंचयस्य प्रयता मघानि प्रत्यग्रभीष्म नृतमस्य नृणां ॥ १२ ॥
सुपेशसं माव सृजंत्यस्तं गवां सहस्रै रुशमासो अग्ने । तीव्रा
इंद्रममंदुः सुतासोऽक्तोर्व्युष्टौ परितक्म्यायाः ॥ १३ ॥ औच्छ-
त्सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानां । अत्यो
न वाजी रघुरज्यमानो बभ्रुश्चत्वार्यसनत्सहस्रा ॥ १४ ॥ चतुःस-
हस्रं गव्यस्य पश्वः प्रत्यग्रभीष्म रुशमेष्वग्ने । घर्मश्चित्तप्तः प्रवृजे
य आसीदयस्मयस्तम्वादाम विप्राः ॥ १५ ॥ २८ ॥

॥ ३१ ॥ १-१३ अवस्युरात्रेयः ॥ १-८[२], १०-१३ इंद्रः । ८[३] इंद्रः कुत्सो वा । ८[४] इंद्र उशना वा । ९ इंद्रः कुत्सश्च ॥ त्रिष्टुप् ॥

॥ ३१ ॥ इंद्रो रथाय प्रवतं कृणोति यमध्यस्थान्मघवा

वाजयंतं । यूथेव पश्वो व्युनोति गोपा अरिष्टो याति प्र-
थमः सिषासन् ॥१॥ आ प्र द्रव हरिवो मा वि वेनः पिशं-
गराते अभि नः सचस्व । नहि त्वदिंद्र वस्यो अन्यदस्त्यमेनां-
श्चिज्जनिवतश्चकर्थ ॥२॥ उद्यत्सहः सहस आजनिष्ट देदिष्ट
इंद्र इंद्रियाणि विश्वा । प्राचोदयत्सुदुघा वव्रे अंतर्वि ज्यो-
तिषा संववृत्वत्तमोऽवः ॥३॥ अनवस्ते रथमश्वाय तक्षन्त्वष्टा
वज्रं पुरुहूत द्युमंतं । ब्रह्माण इंद्रं महयंतो अर्कैरवर्धयन्नहये
हंतवा उ ॥४॥ वृष्णे यत्ते वृषणो अर्कमर्चानिंद्र ग्रावाणो
अदितिः सजोषाः । अनश्वासो ये पवयोऽरथा इंद्रेषिता
अभ्यवर्तंत दस्यून् ॥५॥२९॥ प्र ते पूर्वाणि करणानि वोचं
प्र नूतना मघवन्या चकर्थ । शक्तीवो यद्विभरा रोदसी उभे
जयन्नपो मनवे दानुचित्राः ॥६॥ तदिन्नु ते करणं दस्म वि-
प्राहिं यद्घ्नन्नोजो अत्रामिमीथाः । शुष्णस्य चित्परि माया
अगृभ्णाः प्रपित्वं यन्नप दस्यूँरसेधः ॥७॥ त्वमपो यदवे तु-
र्वशायारमयः सुदुघाः पार इंद्र । उग्रमयातमवहो ह कुत्सं सं
ह यद्वामुशनारंत देवाः ॥८॥ इंद्राकुत्सा वहमाना रथेना
वामत्या अपि कर्णे वहंतु । निः षीमद्भ्यो धमथो निः षध-
स्थान्मघोनो हृदो वरथस्तमांसि ॥९॥ वातस्य युक्तान्सुयुजं-
श्चिदश्वान्कविश्चिदेषो अजगन्नवस्युः । विश्वे ते अत्र मरुतः
सखाय इंद्र ब्रह्माणि तविषीमवर्धन् ॥१०॥३०॥ सूरश्चिद्रथं
परितक्म्यायां पूर्वं करदुपरं जूजुवांसं । भरच्चक्रमेतशः सं रि-
णाति पुरो दधत्सनिष्यति क्रतुं नः ॥११॥ आयं जना अभि-
चक्षे जगामेंद्रः सखायं सुतसोममिच्छन् । वदन्ग्रावाव वेदिं
भ्रियाते यस्य जीरमध्वर्यवश्चरंति ॥१२॥ ये चाकनंत चा-

कनैत नू ते मर्ता अमृत मो ते अंह आरन्। वावंधि यज्यूँ-
रुत तेषु धेह्योजो जनेषु येषु ते स्याम ॥ १३ ॥ ३१ ॥

॥ ३२ ॥ १-१२ गातुरात्रेयः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ३२ ॥ अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः । महांतमिंद्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन् ॥१॥ त्वमुत्साँ ऋतुभिर्बद्बधानाँ अरंह ऊधः पर्वतस्य वज्रिन्। अहिं चिदुग्र प्रयुतं शयानं जघन्वाँ इंद्र तविषीमधत्थाः ॥ २ ॥ त्यस्य चिन्महतो निर्मृगस्य वधर्जघान तविषीभिरिंद्रः। य एक इदप्रतिर्मन्यमान आदस्मादन्यो अजनिष्ट तव्यान् ॥३॥ त्यं चिदेषां स्वधया मदंतं मिहो नपातं सुवृधं तमोगां। वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णं ॥ ४ ॥ त्यं चिदस्य क्रतुभिर्निषत्तममर्मणो विददिदस्य मर्म। यदीं सुक्षत्र प्रभृता मदस्य युयुत्संतं तमसि हर्म्ये धाः ॥५॥ त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानं। तं चिन्मंदानो वृषभः सुतस्योच्चैरिंद्रो अपगूर्या जघान ॥६॥३२॥ उद्यदिंद्रो महते दानवाय वधर्यमिष्ट सहो अप्रतीतं। यदीं वज्रस्य प्रभृतौ ददाभ विश्वस्य जंतोरधमं चकार ॥ ७ ॥ त्यं चिदर्णं मधुपं शयानमसिन्वं वव्रं मह्याददुग्रः। अपादमत्रं महता वधेन नि दुर्योण आवृणङ्मृध्रवाचं ॥ ८ ॥ को अस्य शुष्मं तविषीं वरात एको धना भरते अप्रतीतः। इमे चिदस्य ज्रयसो नु देवी इंद्रस्यौजसो भियसा जिहाते ॥ ९ ॥ न्यस्मै देवी स्वधितिर्जिहीत इंद्राय गातुरुशतीव येमे। सं यदोजो युवते विश्वमाभिरनु स्वधाव्ने क्षितयो नमंत ॥१०॥ एकं नु त्वा सत्पतिं पांचजन्यं जातं शृणोमि यशसं जनेषु। तं मे जगृभ्र आ-

शसो नविष्टौ दोषा वस्तोर्हवमानास इंद्रं ॥११॥ एवा हि त्वा-
मृतुथा यातयंतं मघा विप्रेभ्यो ददतं शृणोमि। किं ते ब्रह्मा-
णो गृहते सखायो ये त्वाया निदधुः काममिंद्र ॥१२॥३३॥१॥२॥

॥ ३३ ॥ १–१० संवरणः प्राजापत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ३३ ॥ महि महे तवसे दीध्ये नॄनिंद्रायेत्था तवसे अत-
व्यान्। यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश्चिकेत
॥१॥ स त्वं न इंद्र धियसानो अर्कैर्हरीणां वृषन्योक्त्रमश्रेः। या
इत्था मघवन्ननु जोषं वक्षो अभि प्रार्यः सक्षि जनान् ॥२॥ न
ते त इंद्राभ्य१स्मदृष्वायुक्तासो अब्रह्मता यदसन्। तिष्ठा रथ-
मधि तं वज्रहस्ता रश्मिं देव यमसे स्वश्वः ॥३॥ पुरु यत्त इंद्र
संत्युक्था गवे चकर्थोर्वरासु युध्यन्। ततक्षे सूर्याय चिदोकसि
स्वे वृषा समत्सु दासस्य नाम चित् ॥४॥ वयं ते त इंद्र ये च
नरः शर्धो जज्ञाना याताश्च रथाः। आस्माञ्जगम्यादहिशुष्म
सत्वा भगो न हव्यः प्रभृथेषु चारुः ॥५॥१॥ पपृक्षेण्यमिंद्र त्वे
ह्योजो नृम्णानि च नृतमानो अमर्तः। स न एनीं वसवानो
रयिं दाः प्रार्यः स्तुषे तुविमघस्य दानं ॥६॥ एवा न इंद्रोति-
भिरव पाहि गृणतः शूर कारून्। उत त्वचं ददतो वाजसातौ
पिप्रीहि मध्वः सुषुतस्य चारोः ॥७॥ उत त्ये मा पौरुकुत्स्यस्य
सूरेस्त्रसदस्योर्हिरणिनो रराणाः। वहंतु मा दश श्येतासो अस्य
गैरिक्षितस्य क्रतुभिर्नु सश्चे ॥८॥ उत त्ये मा मारुताश्वस्य शो-
णाः क्रत्वामघासो विदथस्य रातौ। सहस्रा मे च्यवतानो
ददान आनूकमर्यो वपुषे नार्चत् ॥९॥ उत त्ये मा ध्वन्यस्य
जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः। मह्ना रायः संवरणस्य
ऋषेर्व्रजं न गावः प्रयता अपि ग्मन् ॥ १० ॥ २ ॥

॥ ३४ ॥ १–९ संवरणः प्राजापत्यः ॥ इंद्रः ॥ १–८ जगती । ९ त्रिष्टुप् ॥

॥३४॥ अजातशत्रुमजरा स्वर्वत्यनु स्वधामिता दस्ममीयते। सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतरं दधातन ॥ १ ॥ आ यः सोमेन जठरमपिप्रतामंदत मघवा मध्वो अंधसः। यदीं मृगाय हंतवे महावधः सहस्रभृष्टिमुशना वधं यमत्॥२॥ यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह। अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः ॥ ३ ॥ यस्यावधीत्पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते। वेतीद्वस्य प्रयता यतंकरो न किल्बिषादीषते वस्व आकरः ॥४॥ न पंचभिर्दशभिर्वष्ट्यारभं नासुन्वता सचते पुष्यता चन। जिनाति वेदमुया हंति वा धुनिरा देवयुं भजति गोमति व्रजे ॥५॥३॥ वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वृधः। इंद्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः ॥ ६ ॥ समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु। दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत् ॥७॥ सं यज्जनौ सुधनौ विश्वशर्धसाववेदिंद्रो मघवा गोषु शुभ्रिषु। युजं ह्य१न्यमकृत प्रवेपन्युदीं गव्यं सृजते सत्वभिर्धुनिः ॥ ८ ॥ सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतुमर्यः। तस्मा आपः संयतः पीपयंत तस्मिन्क्षत्रममवत्त्वेषमस्तु ॥ ९ ॥ ४ ॥

॥ ३५ ॥ १–८ प्रभूवसुरांगिरसः ॥ इंद्रः ॥ १–७ अनुष्टुप् । ८ पंक्तिः ॥

॥३५॥ यस्ते साधिष्ठोऽवस इंद्र क्रतुष्टमा भर। अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरं ॥१॥ यदिंद्र ते चतस्रो यच्छूर संति तिस्रः। यद्वा पंच क्षितीनामवस्तत्सु न आ भर॥२॥ आ तेऽवो

वरेण्यं वृषंतमस्य हूमहे। वृषजूतिर्हि जज्ञिष आभूभिरिंद्र तु-
र्वणिः ॥३॥ वृषा ह्यसि राधसे जज्ञिषे वृष्णि ते शवः। स्वक्षत्रं
ते धृषन्मनः सत्राहमिंद्र पौंस्यं ॥४॥ त्वं तमिंद्र मर्त्यममित्रयं-
तमद्रिवः। सर्वरथा शतक्रतो नि याहि शवसस्पते ॥५॥ त्वामि-
द्वृत्रहंतम जनासो वृक्तबर्हिषः। उग्रं पूर्वीषु पूर्व्यं हवंते वाजसा-
तये ॥६॥ अस्माकमिंद्र दुष्टरं पुरोयावानमाजिषु। सयावानं धने-
धने वाजयंतमवा रथं ॥७॥ अस्माकमिंद्रेहि नो रथमवा पुरंध्या।
वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे
॥८॥६॥

॥ ३६ ॥ १–६ प्रभूवसुरांगिरसः ॥ इंद्रः ॥ १. २. ४–६ त्रिष्टुप्। ३ जगती ॥

॥३६॥ स आ गमदिंद्रो यो वसूनां चिकेतद्दातुं दामनो
रयीणां। धन्वचरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुं
॥१॥ आ ते हनू हरिवः शूर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे।
अनु त्वा राजन्नर्वतो न हिन्वन् गीर्भिर्मदेम पुरुहूत विश्वे ॥२॥
चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः।
रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरूवसुः
॥३॥ एष ग्रावेव जरिता त इंद्रेयर्ति वाचं बृहदाशुषाणः। प्र
सव्येन मघवन्यंसि रायः प्र दक्षिणिद्धरिवो मा वि वेनः ॥४॥
वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्यां। स नो
वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन्भरे धाः ॥५॥ यो
रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदिष्ट।
यूने समस्मै क्षितयो नमंतां श्रुतरथाय मरुतो दुवोया ॥६॥७॥

॥ ३७ ॥ १–५ अत्रिः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३७॥ सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वं-

चाः। तस्मा अमृध्रा उषसो व्युच्छान्य इंद्राय सुनवामेत्याह ॥१॥ समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो जराते। ग्रावाणो यस्येषिरं वदंत्ययदध्वर्युर्हविषाव सिंधुं ॥२॥ वधूरियं पतिमिच्छंत्येति य ईं वहाते महिषीमिषिरां। आस्य श्रवस्याद्रथ आ च घोषात्पुरू सहस्रा परि वर्तयाते ॥३॥ न स राजा व्यथते यस्मिन्निंद्रस्तीव्रं सोमं पिबति गोसखायं। आ सत्वनैरजति हंति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन् ॥४॥ पुष्यात्क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति। प्रियः सूर्ये प्रियो अग्ना भवाति य इंद्राय सुतसोमो ददाशत् ॥५॥८॥

॥३८॥ १–५ अत्रिः॥ इंद्रः॥ अनुष्टुप्॥

॥३८॥ उरोष्ट इंद्र राधसो विभ्वी रातिः शतक्रतो। अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय ॥१॥ यदीमिंद्र श्रवाय्यमिषं शविष्ठ दधिषे। पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरं ॥२॥ शुष्मासो ये ते अद्रिवो मेहना केतसापः। उभा देवावभिष्टये दिवश्च ग्मश्च राजथः ॥३॥ उतो नो अस्य कस्य चिद्दक्षस्य तव वृत्रहन्। अस्मभ्यं नृम्णमा भरास्मभ्यं नृमणस्यसे ॥४॥ नू त आभिरभिष्टिभिस्तव शर्मञ्छतक्रतो। इंद्र स्याम सुगोपाः शूर स्याम सुगोपाः ॥५॥९॥

॥३९॥ १–५ अत्रिः॥ इंद्रः॥ १–४ अनुष्टुप्॥ ५ पंक्तिः॥

॥३९॥ यदिंद्र चित्र मेहनास्ति त्वादातमद्रिवः। राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥१॥ यन्मन्यसे वरेण्यमिंद्र द्युक्षं तदा भर। विद्याम तस्य ते वयमकूपारस्य दावने ॥२॥ यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत्। तेन दृळ्हा चिदद्रिव

आ वाजं दर्षि सातये ॥३॥ मंहिष्ठं वो मघोनां राजानं चर्षणीनां । इंद्रमुप प्रशस्तये पूर्वीभिर्जुजुषे गिरः ॥ ४ ॥ अस्मा इत्काव्यं वच उक्थमिंद्राय शंस्यं । तस्मा उ ब्रह्मवाहसे गिरो वर्धंत्यत्रयो गिरः शुंभंत्यत्रयः ॥ ५ ॥ १० ॥

॥ ४० ॥ १–९ अत्रिः ॥ १–४ इंद्रः । ५ सूर्यः । ६–९ अत्रिः ॥ १–३ उष्णिक् । ४. ६–८ त्रिष्टुप् । ५. ९ अनुष्टुप् ॥

॥ ४० ॥ आ याह्यद्रिभिः सुतं सोमं सोमपते पिब । वृषन्निंद्र वृषभिर्वृत्रहंतम ॥१॥ वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः । वृषन्निंद्र वृषभिर्वृत्रहंतम ॥२॥ वृषा त्वा वृषणं हुवे वज्रिंचित्राभिरूतिभिः । वृषन्निंद्र वृषभिर्वृत्रहंतम ॥३॥ ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा । युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यंदिने सवने मत्सदिंद्रः ॥४॥ यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः । अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ॥ ५ ॥ ११ ॥ स्वर्भानोरध यदिंद्र माया अवो दिवो वर्तमाना अवाहन् । गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविंददत्रिः ॥६॥ मा मामिमं तव संतमत्र इरस्या द्रुग्धो भियसा नि गारीत् । त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा ॥ ७ ॥ ग्राव्णो ब्रह्मा युयुजानः सपर्यन्कीरिणा देवान्नमसोपशिक्षन् । अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत् ॥८॥ यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः । अत्रयस्तमन्वविंदन्नह्य१न्ये अशक्नुवन् ॥ ९ ॥ १२ ॥

॥ ४१ ॥ १–२० अत्रिः ॥ विश्वे देवाः ॥ १–१५. १८. १९ त्रिष्टुप् । १६. १७ अतिजगती । २० एकपदा ॥

॥४१॥ को नु वां मित्रावरुणावृतायन्दिवो वा महः पार्थि-

वस्य वा दे। ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान्॥१॥ ते नो मित्रो वरुणो अर्यमायुरिंद्र ऋभुक्षा मरुतो जुषंत। नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः॥२॥ आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्रथ्यस्य पुष्टौ। उत वा दिवो असुराय मन्म प्रांधांसीव यज्यवे भरध्वं॥३॥ प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः। पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः॥४॥ प्र वो रयिं युक्ताश्वं भरध्वं राय एषेऽवसे दधीत धीः। सुशेव एवैरौशिजस्य होता ये व एवा मरुतस्तुराणां॥५॥१३॥ प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः। इषुध्यव ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः॥६॥ उप व एषे वंद्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः। उषासानक्ता विदुषीव विश्वमा हा वहतो मर्त्याय यज्ञं॥७॥ अभि वो अर्चे पोष्यावतो नॄन्वास्तोष्पतिं त्वष्टारं रराणः। धन्या सजोषा धिषणा नमोभिर्वनस्पतींरोषधी राय एषे॥८॥ तुजे नस्तने पर्वताः संतु स्वैतवो ये वसवो न वीराः। पनित आप्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ॥९॥ वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति। गृणीते अग्निरेतरी न शूषैः शोचिष्केशो नि रिणाति वना॥१०॥१४॥ कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगाय। आप ओषधीरुत नोऽवंतु द्यौर्वना गिरयो वृक्षकेशाः॥११॥ शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा। शृण्वंत्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः॥१२॥ विदा चिन्नु महांतो ये व एवा ब्रवाम दस्मा वार्यं दधानाः। वयश्चन सुभ्व१

आवं यंति स्तुभा मर्तमनुयतं वधस्नैः ॥१३॥ आ दैव्यानि पार्थि-
वानि जन्मापश्चाच्छा सुमखाय वोचं। वर्धंतां द्यावो गिरश्चंद्रा-
ग्रा उदा वर्धतामभिषाता अर्णाः ॥१४॥ पदेपदे मे जरिमा नि
धायि वरूत्री वा शक्रा या पायुभिश्च। सिषक्तु माता मही रसा
नः स्मत्सूरिभिर्ऋजुहस्त ऋजुवनिः ॥ १५ ॥ १५ ॥ कथा दाशेम
नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छो-
क्तौ। मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः ॥१६॥
इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो
वनते मर्त्यो वः। अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे
निर्ऋतिर्जग्रसीत ॥१७॥ तां वो देवाः सुमतिमूर्जयंतीमिषम-
श्याम वसवः शसा गोः। सा नः सुदानुर्मृळयंती देवी प्रति
द्रवंती सुविताय गम्याः ॥१८॥ अभि न इळा यूथस्य माता
स्मन्नदीभिरुर्वशी वा गृणातु। उर्वशी वा बृहद्दिवा गृणानाभ्यू-
र्ण्वाना प्रभृथस्यायोः ॥१९॥ सिषक्तु न ऊर्जव्यस्य पुष्टेः ॥२०॥१६॥

॥ ४२ ॥ १–१८ अत्रिः ॥ १–१०. १२–१८ विश्वे देवाः । ११ रुद्रः ॥ १–१६. १८ त्रिष्टुप् ।
१७ एकपदा ॥

॥ ४२ ॥ प्र शंतमा वरुणं दीधिती गीर्मित्रं भगमदितिं
नूनमश्याः। पृषद्योनिः पंचहोता शृणोत्वतूर्तपंथा असुरो म-
योभुः ॥१॥ प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं
सुशेवं। ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु
॥२॥ उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन।
स नो वसूनि प्रयता हितानि चंद्राणि देवः सविता सु-
वाति ॥३॥ समिंद्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः
सं स्वस्ति। सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या य-

ज्ञियानां ॥ ४ ॥ देवो भगः सविता रायो अंश इंद्रो वृत्रस्य सं-
जितो धनानां । ऋभुक्षा वाज उत वा पुरंधिरवंतु नो अमृ-
तासस्तुरासः ॥ ५ ॥ १७ ॥ मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः
प्र ब्रवामा कृतानि । न ते पूर्वे मघवन्नापरासो न वीर्यं१-
नूतनः कश्चनाप ॥ ६ ॥ उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं
सनितारं धनानां । यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागम-
ज्जोहुवानं ॥ ७ ॥ तवोतिभिः सचमाना अरिष्टा बृहस्पते मघ-
वानः सुवीराः । ये अश्वदा उत वा संति गोदा ये वस्त्रदाः सु-
भगास्तेषु रायः ॥ ८ ॥ विसर्माणं कृणुहि वित्तमेषां ये भुंजते
अपृणंतो न उक्थैः । अपव्रतान्प्रसवे वावृधानान्ब्रह्मद्विषः
सूर्याद्यावयस्व ॥ ९ ॥ य ओहते रक्षसो देववीतावचक्रेभिस्तं
मरुतो नि यात । यो वः शमीं शशमानस्य निंदात्तुच्छ्या-
न्कामान्करते सिष्विदानः ॥ १० ॥ १८ ॥ तमु ष्टुहि यः स्विषुः
सुधन्वा यो विश्वस्य क्षयति भेषजस्य । यक्ष्वा महे सौमनसाय
रुद्रं नमोभिर्देवमसुरं दुवस्य ॥ ११ ॥ दमूनसो अपसो ये सुहस्ता
वृष्णः पत्नीर्नद्यो विभ्वतष्टाः । सरस्वती बृहद्दिवोत राका द-
शस्यंतीर्वरिवस्यंतु शुभ्राः ॥ १२ ॥ प्र सू महे सुशरणाय मेधां
गिरं भरे नव्यसीं जायमानां । य आहना दुहितुर्वक्षणासु रूपा
मिनानो अकृणोदिदं नः ॥ १३ ॥ प्र सुष्टुतिः स्तनयंतं रुवंतमि-
ळस्पतिं जरितर्नूनमश्याः । यो अब्दिमाँ उदनिमाँ इयर्ति प्र वि-
द्युता रोदसी उक्षमाणः ॥ १४ ॥ एष स्तोमो मारुतं शर्धो अच्छा
रुद्रस्य सूनूँर्युवन्यूँरुदश्याः । कामो राये हवते मा स्वस्त्युप स्तुहि
पृषदश्वाँ अयासः ॥ १५ ॥ प्रैष स्तोमः पृथिवीमंतरिक्षं वनस्पतीँ-
रोषधी राये अश्याः । देवोदेवः सुहवो भूतु मह्यं मा नो माता पृ-

थि॒वी दु॒र्म॒तौ धा॑त् ॥१६॥ उ॒रौ दे॑वा अनिबा॒धे स्या॑म ॥१७॥
सम॒श्विनो॒रव॑सा॒ नूत॑नेन मयो॒भुवा॑ सु॒प्रणी॑ती गमेम । आ नो॑
र॒यिं व॑हत॒मोत वी॒राना विश्वा॑न्यमृता॒ सौभ॑गानि ॥१८॥१९॥

॥ ४३ ॥ १–१७ अत्रिः ॥ विश्वे देवाः ॥ १–१५, १७ त्रिष्टुप् । १६ एकपदा ॥

॥४३॥ आ धे॒नवः॒ पय॑सा॒ तूर्ण्य॑र्था॒ अम॑र्धन्ती॒रुप॑ नो यन्तु॒
मध्वा॑ । म॒हो रा॒ये बृ॒ह॒तीः स॒प्त विप्रो॑ मयो॒भुवो॑ जरि॒ता जो॑ह-
वीति ॥१॥ आ सु॑ष्टु॒ती नम॑सा वर्त॒यध्यै॒ द्यावा॒ वाजा॑य पृथि॒वी
अमृ॑ध्रे । पि॒ता मा॒ता मधु॑वचाः सु॒हस्ता॒ भरे॑भरे नो य॒शसा॑-
ववि॒ष्टाम् ॥२॥ अध्व॑र्यवश्चकृ॒वांसो॒ मधू॑नि॒ प्र वा॒यवे॑ भरत॒ चारु॑
शु॒क्रम् । होते॑व नः प्रथ॒मः पा॑ह्य॒स्य देव॒ मध्वो॑ ररि॒मा ते॒ मदा॑य
॥३॥ दश॒ क्षिपो॑ युञ्जते बा॒हू अद्रिं॒ सोम॑स्य॒ या श॑मि॒तारा॑
सु॒हस्ता॑ । मध्वो॒ रसं॑ सु॒गभ॑स्तिर्गिरि॒ष्ठां चनि॑श्चदद्दुदुहे शु॒क्रम॒ंशुः
॥४॥ असा॑वि ते जुजुषा॒णाय॒ सोमः॒ क्रत्वे॒ दक्षा॑य बृह॒ते मदा॑य ।
हरी॒ रथे॑ सु॒धुरा॒ योगे॑ अ॒र्वागि॑न्द्र प्रि॒या कृ॑णुहि हू॒यमा॑नः
॥५॥२०॥ आ नो॑ म॒हीम॒रम॑तिं स॒जोषा॒ ग्नां दे॒वीं नम॑सा रा॒-
तह॑व्याम् । मधो॒र्मदा॑य बृह॒तीमृ॑त॒ज्ञामाग्ने॑ वह प॒थिभि॑र्देव॒यानैः॑
॥६॥ अ॒ञ्जन्ति॒ यं प्र॒थय॑न्तो॒ न विप्रा॑ व॒पाव॑न्तं॒ नाग्निना॒ तप॑न्तः ।
पि॒तुर्न पु॒त्र उ॒पसि॒ प्रेष्ठ॒ आ घ॒र्मो अ॒ग्निमृ॒तय॑न्नसादि ॥७॥ अ-
च्छा॑ म॒ही बृ॒ह॒ती शन्त॑मा॒ गीर्दू॒तो न ग॑न्त्व॒श्विना॑ हु॒वध्यै॑ । मयो॒-
भुवा॑ स॒रथा या॑तम॒र्वाग्ग॒न्तं॑ नि॒धिं धुर॑मा॒णिर्न नाभि॑म् ॥८॥ प्र
तव्य॑सो॒ नम॑उक्तिं तु॒रस्या॒हं पू॒ष्ण उ॒त वा॒योर॑दिक्षि । या राध॑-
सा चोदि॒तारा॑ मती॒नां या वाज॑स्य द्रविणो॒दा उ॒त त्मन् ॥९॥
आ नाम॑भिर्म॒रुतो॑ वक्षि॒ विश्वा॒ना रू॒पेभि॑र्जातवेदो हुवा॒नः ।

यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गंत मरुतो विश्व ऊती
॥१०॥२१॥ आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गंतु
यज्ञं। हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृ-
णोतु ॥११॥ आ वेधसं नीलपृष्ठं बृहंतं बृहस्पतिं सदने सादयध्वं।
सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम ॥१२॥ आ
धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गंत्वोमभिर्हुवानः। ग्ना वसान
ओषधीरमृध्रस्त्रिधातुशृंगो वृषभो वयोधाः ॥१३॥ मातुष्पदे प-
रमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन्। सुशेव्यं नमसा रा-
तहव्याः शिशुं मृजंत्यायवो न वासे ॥१४॥ बृहद्वयो बृहते तुभ्य-
मग्ने धियाजुरो मिथुनासः सचंत। देवोदेवः सुहवो भूतु मह्यं मा
नो माता पृथिवी दुर्मतौ धात ॥१५॥ उरौ देवा अनिबाधे स्याम
॥१६॥ समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम। आ
नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥१७॥२२॥

॥ ४४ ॥ १–१५ अवत्सारः काश्यप अन्ये च ऋषयो दृष्टलिंगाः ॥ विश्वे देवाः ॥
१–१३ जगती । १४. १५. त्रिष्टुप् ॥

॥४४॥ तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं
स्वर्विदं। प्रतीचीनं वृजनं दोहसे गिराशुं जयंतमनु यासु
वर्धसे ॥१॥ श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककु-
भामचोदते। सुगोपा असि न दभाय सुक्रतो परो मा-
याभिर्ऋत आस नाम ते ॥२॥ अत्यं हविः सचते सच्च धातु
चारिष्टगातुः स होता सहोभरिः। प्रसर्स्राणो अनु बर्हिर्वृषा
शिशुर्मध्ये युवाजरो विस्रुहा हितः ॥३॥ प्र व एते सुयुजो
यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः। सुयंतुभिः सर्व-
शासैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति ॥४॥ सं-

जर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः । धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे ॥५॥२३॥ यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा । महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः ॥६॥ वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः । घ्रंसं रक्षंतं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः ॥७॥ ज्यायांसमस्य यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते । यादृश्मिन्धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत् ॥८॥ समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता । अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबंधनी ॥९॥ स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः । अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यं ॥१०॥२४॥ श्येन आसामदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य मायिनः । समन्यमन्यमर्थयंत्येतवे विदुर्विषाणं परिपानमंति ते ॥११॥ सदापृणो यजतो वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तर्यो वः सचा । उभा स वरा प्रत्येति भाति च यदीं गणं भजते सुप्रयावभिः ॥१२॥ सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदंचनः । भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन् ॥१३॥ यो जागार तमृचः कामयंते यो जागार तमु सामानि यंति । यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥१४॥ अग्निर्जागार तमृचः कामयंतेऽग्निर्जागार तमु सामानि यंति । अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥१५॥२५॥३॥

॥ ४५ ॥ १–११ सदापृण आत्रेयः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥४५॥ विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो
गुः । अपावृत व्रजिनीरुत्स्वर्गाद्वि दुरो मानुषीर्देव आवः ॥१॥
वि सूर्यो अमतिं न श्रियं सादोर्वाद्गवां माता जानती गात् ।
धन्वर्णसो नद्य१ः खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः
॥२॥ अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ।
वि पर्वतो जिहीत साधत द्यौराविवासंतो दसयंत भूम ॥३॥
सूक्तेभिर्वो वचोभिर्देवजुष्टैरिंद्रा न्व१ग्नी अवसे हुवध्यै । उ-
क्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासंतो मरुतो यजंति
॥ ४ ॥ एतो न्व१द्य सुध्यो३भवाम प्र दुच्छुना मिनवामा
वरीयः । आरे द्वेषांसि सनुतर्दधामायाम प्रांचो यजमानमच्छ
॥५॥२६॥ एता धियं कृणवामा सखायोऽप या माताँ ऋ-
णुत व्रजं गोः । यया मनुर्विशिशिप्रं जिगाय यया वणिग्वं-
कुरापा पुरीषं ॥ ६ ॥ अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश
मासो नवग्वाः । ऋतं यती सरमा गा अविंदद्विश्वानि
सत्यांगिराश्चकार ॥ ७ ॥ विश्वे अस्या व्युषि माहिनायाः सं
यद्गोभिरंगिरसो नवंत । उत्स आसां परमे सधस्थ ऋतस्य
पथा सरमा विदद्गाः ॥८॥ आ सूर्यो यातु सप्ताश्वः क्षेत्रं यद-
स्योर्विया दीर्घयाथे । रघुः श्येनः पतयदंधो अच्छा युवा
कविर्दीदयद्गोषु गच्छन् ॥९॥ आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त
यद्धरितो वीतपृष्ठाः । उद्ना न नावमनयंत धीरा आशृण्वती-
रापो अर्वागतिष्ठन् ॥ १० ॥ धियं वो अप्सु दधिषे स्वर्षां
ययातरन्दश मासो नवग्वाः । अया धिया स्याम देवगोपा
अया धिया तुतुर्यामात्यंहः ॥ ११ ॥ २७ ॥

॥ ४६ ॥ १–८ प्रतिक्षत्र आत्रेयः ॥ १–६ विश्वे देवाः । ७. ८ देवपत्न्यः ॥ १. ३–७ जगती । २. ८ त्रिष्टुप् ॥

॥४६॥ हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणी-
मवस्युवं। नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुरएत
ऋजु नेषति॥१॥ अग्न इंद्र वरुण मित्र देवाः शर्धः प्र यंत मारुतोत
विष्णो। उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषंत
॥२॥ इंद्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वताँ
अपः। हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये
॥३॥ उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो
मयस्करत्। उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु
मंसते॥४॥ उत त्यन्नो मारुतं शर्ध आ गमद्दिविक्षयं यजतं बर्हि-
रासदे। बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं१ वरुणो मित्रो अ-
र्यमा॥५॥ उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्य१स्त्रामणे
भुवन्। भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु
मे हवं॥६॥ देवानां पत्नीरुशतीरवंतु नः प्रावंतु नस्तुजये वाज-
सातये। याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः
शर्म यच्छत॥७॥ उत ग्ना व्यंतु देवपत्नीरिंद्राण्य१ग्नाय्यश्विनी राट्।
आ रोदसी वरुणानी शृणोतु व्यंतु देवीर्य ऋतुर्जनीनां॥८॥२८॥२॥

॥ ४७ ॥ १–७ प्रतिरथ आत्रेयः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥४७॥ प्रयुंजती दिव एति ब्रुवाणा मही माता दुहितु-
र्बोधयंती। आविवासंती युवतिर्मनीषा पितृभ्य आ सदने
जोहुवाना॥१॥ अजिरासस्तदप ईयमाना आतस्थिवांसो अ-
मृतस्य नाभिं। अनंतास उरवो विश्वतः सीं परि द्यावापृथिवी
यंति पंथाः॥२॥ उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं
पितुरा विवेश। मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रज-

सस्यात्यंती ॥३॥ चत्वारं ईं बिभ्रति क्षेमयंतो दश गर्भं चरसे धापयंते । त्रिधातवः परमा अस्य गावो दिवश्चरंति परि सद्यो अंतान् ॥४॥ इदं वपुर्निवचनं जनासश्चरंति यन्नद्यस्तस्थुरापः । द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या३ सबंधू ॥५॥ वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयंति । उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यंत्यच्छ ॥६॥ तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तं । अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥७॥१॥

॥ ४८ ॥ १-५ प्रतिभानुरात्रेयः ॥ विश्वे देवाः ॥ जगती ॥

॥४८॥ कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयं । आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ॥१॥ ता अत्नत वयुनं वीरवक्षणं समान्या वृतया विश्वमा रजः । अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्तिरते देवयुर्जनः ॥२॥ आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि । शतं वा यस्य प्रचरन्त्स्वे दमे संवर्तयंतो वि च वर्तयन्नहा ॥३॥ तामस्य रीतिं परशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः । सचा यदि पितुमंतमिव क्षयं रत्नं दधाति भरहूतये विशे ॥४॥ स जिह्वया चतुरनीक ऋंजते चारु वसानो वरुणो यतन्नरिं । न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यं ॥५॥२॥

॥ ४९ ॥ १-५ प्रतिप्रभ आत्रेयः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥४९॥ देवं वो अद्य सवितारमेषे भगं च रत्नं विभजंतमायोः । आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन् ॥१॥ प्रति प्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं सं-

वितारं दुवस्य । उपं ब्रुवीत नमसा विजानञ्ज्येष्ठं च रत्नं
विभजंतमायोः ॥२॥ अदत्रया दयते वार्याणि पूषा भगो
अदितिर्वस्त उस्रः । इंद्रो विष्णुर्वरुणो मित्रो अग्निरहानि
भद्रा जनयंत दस्माः ॥३॥ तन्नो अनर्वा सविता वरूथं तत्सिं-
धव इषयंतो अनु ग्मन् । उप यद्वोचे अध्वरस्य होता रायः
स्याम पतयो वाजरत्नाः ॥४॥ प्र ये वसुभ्य ईवदा नमो दुर्ये
मित्रे वरुणे सूक्तवाचः । अवैत्वभ्वं कृणुता वरीयो दिवस्पृ-
थिव्योरवसा मदेम ॥५॥३॥

॥ ५० ॥ १–५ स्वस्त्यात्रेयः ॥ विश्वे देवाः ॥ १–४ अनुष्टुप् । ५ पंक्तिः ॥

॥५०॥ विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यं । विश्वो राय इषु-
ध्यति द्युम्नं वृणीत पुष्यसे ॥१॥ ते ते देव नेतर्ये चेमाँ अनुशसे ।
ते राया ते ह्या३ पृचे सचेमहि सचथ्यैः ॥२॥ अतो न आ नॄन-
तिथीनतः पत्नीर्दशस्यत । आरे विश्वं पथेष्ठां द्विषो युयोतु यूयु-
विः ॥३॥ यत्र वह्निरभिहितो दुद्रवद्द्रोण्यः पशुः । नृमणा वीरप-
स्त्योऽर्णा धीरेव सनिता ॥४॥ एष ते देव नेता रथस्पतिः शं रयिः ।
शं राये शं स्वस्तय इषःस्तुतो मनामहे देवस्तुतो मनामहे ॥५॥४॥

॥ ५१ ॥ १–१५ स्वस्त्यात्रेयः ॥ विश्वे देवाः ॥ १–४ गायत्री । ५–१० उष्णिक् ।
११–१३ त्रिष्टुब्जगती वा । १४. १५ अनुष्टुप् ॥

॥५१॥ अग्ने सुतस्य पीतये विश्वैरूमेभिरा गहि । देवेभिर्ह-
व्यदातये ॥१॥ ऋतधीतय आ गत सत्यधर्माणो अध्वरं । अग्नेः
पिबत जिह्वया ॥२॥ विप्रेभिर्विप्र संत्य प्रातर्यावभिरा गहि । दे-
वेभिः सोमपीतये ॥३॥ अयं सोमश्चमू सुतोऽमत्रे परि षिच्यते ।
प्रिय इंद्राय वायवे ॥४॥ वायवा याहि वीतये जुषाणो हव्य-
दातये । पिबा सुतस्यांधसो अभि प्रयः ॥५॥५॥ इंद्रश्च वायवेषां

सुतानां पीतिमर्हथः । ताञ्जुषेथामरेपसावभि प्रयः ॥६॥
सुता इंद्राय वायवे सोमासो दध्याशिरः । निम्नं न यंति सिंध-
वोऽभि प्रयः ॥७॥ सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः । आ
याह्यग्ने अत्रिवत्सुते रण ॥८॥ सजूर्मित्रावरुणाभ्यां सजूः सो-
मेन विष्णुना । आ याह्यग्ने अत्रिवत्सुते रण ॥९॥ सजूरादित्यैर्व-
सुभिः सजूरिंद्रेण वायुना । आ याह्यग्ने अत्रिवत्सुते रण ॥१०॥६॥
स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना
॥११॥ स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्प-
तिः । बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु
नः ॥१२॥ विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः
स्वस्तये । देवा अवंत्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः
॥१३॥ स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति । स्वस्ति न
इंद्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥१४॥ स्वस्ति पंथामनु
चरेम सूर्याचंद्रमसाविव । पुनर्ददताघ्नता जानता सं गमेमहि
॥१५॥७॥

॥५२॥ १-१७ श्यावाश्व आत्रेयः ॥ मरुतः ॥ १-५. ७-१६ अनुष्टुप् । ६. १७ पंक्तिः ॥

॥५२॥ प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः । ये अद्रो-
घमनुष्वधं श्रवो मदंति यज्ञियाः ॥१॥ ते हि स्थिरस्य शवसः
सखायः संति धृष्णुया । ते यामन्ना धृषद्विनस्त्मना पांति शश्वतः
॥२॥ ते स्पंद्रासो नोक्षणोऽति ष्कंदंति शर्वरीः । मरुतामधा महो
दिवि क्षमा च मन्महे ॥३॥ मरुत्सु वो दधीमहि स्तोमं यज्ञं च
धृष्णुया । विश्वे ये मानुषा युगा पांति मर्त्यं रिषः ॥४॥ अर्हंतो ये
सुदानवो नरो असामिशवसः । प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा

मरुद्भ्यः ॥५॥८॥ आ रुक्मैरा युधा नर ऋष्वा ऋष्टीरसृक्षत । अन्वे-
नाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः ॥६॥
ये वावृधंत पार्थिवा य उरावंतरिक्ष आ । वृजने वा नदीनां
सधस्थे वा महो दिवः ॥७॥ शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसं ।
उत स्म ते शुभे नरः प्र स्यंद्रा युंजत त्मना ॥८॥ उत स्म ते परुष्ण्या-
मूर्णा वसत शुंध्यवः । उत पव्या रथानामद्रिं भिंदंत्योजसा ॥९॥
आपथयो विपथयोऽतस्पथा अनुपथाः । एतेभिर्मह्यं नामभि-
र्यज्ञं विष्टार ओहते ॥१०॥९॥ अधा नरो न्योहतेऽधा नियुत ओहते ।
अधा पारावता इति चित्रा रूपाणि दृश्या ॥११॥ छंदःस्तुभः कुभ-
न्यव उत्समा कीरिणो नृतुः । ते मे के चिन्न तायव ऊमा आसन्दृशि
त्विषे ॥१२॥ य ऋष्वा ऋष्टिविद्युतः कवयः संति वेधसः । तमृषे
मारुतं गणं नमस्या रमया गिरा ॥१३॥ अच्छ ऋषे मारुतं गणं
दाना मित्रं न योषणा । दिवो वा धृष्णव ओजसा स्तुता धीभिरि-
षण्यत ॥१४॥ नू मन्वान एषां देवाँ अच्छा न वक्षणा । दाना स-
चेत सूरिभिर्यामश्रुतेभिरंजिभिः ॥१५॥ प्र ये मे बंध्वेषे गां वोचंत
सूरयः पृश्निं वोचंत मातरं । अधा पितरमिष्मिणं रुद्रं वोचंत
शिक्वसः ॥१६॥ सप्त मे सप्त शाकिन एकमेका शता ददुः । यमुना-
यामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे ॥१७॥१०॥

॥ ५३ ॥ १–१६ श्यावाश्व आत्रेयः ॥ मरुतः ॥ १. ५. १०. ११. १५ ककुप् । २ बृहती ।
३ अनुष्टुप् । ४ पुरउष्णिक् । ६. ७. ९. १३. १४. १६ सतोबृहती । ८. १२ गायत्री ॥

॥५३॥ को वेद जानमेषां को वा पुरा सुम्नेष्वास मरुतां ।
यद्युयुज्रे किलास्यः ॥१॥ ऐतान्रथेषु तस्थुषः कः शुश्राव
कथा ययुः । कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह
॥२॥ ते म आहुर्य आययुरुप द्युभिर्विभिर्मदे । नरो मर्या अरे-

पर्सं इमान्पश्यन्निति ष्टुहि ॥३॥ ये अंजिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु । श्राया रथेषु धन्वसु ॥४॥ युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः । वृष्टी द्यावो यतीरिव ॥५॥११॥ आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः । वि पर्जन्यं सृजंति रोदसी अनु धन्वना यंति वृष्टयः ॥६॥ ततृदानाः सिंधवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा । स्यन्ना अश्वा इवाध्वनो विमोचने वि यद्वर्तंत एन्यः ॥७॥ आ यात मरुतो दिव आंतरिक्षादमादुत । माव स्थात परावतः ॥ ८ ॥ मा वो रसानितभा कुभा क्रुमुर्मा वः सिंधुर्नि रीरमत् । मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः ॥ ९ ॥ तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनां । अनु प्र यंति वृष्टयः ॥१०॥१२॥ शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः अनु क्रामेम धीतिभिः ॥११॥ कस्मा अद्य सुजाताय रातहव्याय प्र ययुः । एना यामेन मरुतः ॥१२॥ येन तोकाय तनयाय धान्यं१ बीजं वहध्वे अक्षितं । अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगं ॥१३॥ अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः । वृष्ट्वी शं योराप उस्रि भेषजं स्याम मरुतः सह ॥१४॥ सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः । यं त्रायध्वे स्याम ते ॥ १५ ॥ स्तुहि भोजान्स्तुवतो अस्य यामनि रणन्गावो न यवसे । यतः पूर्वाँ इव सखीँरनु ह्वय गिरा गृणीहि कामिनः ॥ १६ ॥ १३ ॥

॥ ५४ ॥ १–१५ श्यावाश्व आत्रेयः ॥ मरुतः ॥ १–१३, १५ जगती । १४ त्रिष्टुप् ॥

॥५४॥ प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते । घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्ण-

मर्चत ॥१॥ प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्व-
युजः परिज्रयः। सं विद्युता दधति वाशति त्रितः स्वरंत्या-
पोऽवना परिज्रयः ॥२॥ विद्युन्महसो नरो अश्मदिद्यवो
वातत्विषो मरुतः पर्वतच्युतः। अब्दया चिन्मुहुरा ह्रादुनीवृतः
स्तनयदमा रभसा उदोजसः ॥३॥ व्य१क्तून्रुद्रा व्यहानि शिक्वसो
व्यं१तरिक्षं वि रजांसि धूतयः। वि यदज्राँ अजथ नाव ईं
यथा वि दुर्गाणि मरुतो नाह रिष्यथ ॥४॥ तद्वीर्यं वो मरुतो
महित्वनं दीर्घं ततान सूर्यो न योजनं। एता न यामे अगृ-
भीतशोचिषोऽनश्वदां यन्न्ययातना गिरिं ॥५॥१४॥ अभ्राजि
शर्धो मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः। अध
स्मा नो अरमतिं सजोषसश्चक्षुरिव यंतमनु नेषथा सुगं ॥६॥
न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति।
नास्य राय उप दस्यंति नोतय ऋषिं वा यं राजानं वा सु-
षूदथ ॥७॥ नियुत्वंतो ग्रामजितो यथा नरोऽर्यमणो न मरुतः
कबंधिनः। पिन्वंत्युत्सं यदिनासो अस्वरन्व्युंदंति पृथिवीं
मध्वो अंधसा ॥८॥ प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौ-
र्भवति प्रयद्भ्यः। प्रवत्वतीः पथ्या अंतरिक्ष्याः प्रवत्वंतः पर्वता
जीरदानवः ॥९॥ यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा
दिवो नरः। न वोऽश्वाः श्रथयंताह सिस्रतः सद्यो अस्याध्वनः
पारमश्नुथ ॥१०॥१५॥ अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु
रुक्मा मरुतो रथे शुभः। अग्निभ्राजसो विद्युतो गभस्त्योः
शिप्राः शीर्षसु वितता हिरण्ययीः ॥११॥ तं नाकमर्यो अगृ-
भीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ। समच्यंत वृज-
नातित्विषंत यत्स्वरंति घोषं विततमृतायवः॥१२॥ युष्मादत्तस्य

मरुतो विचेतसो रायः स्याम रथ्यो३ वयस्वतः । न यो यु-
च्छति तिष्यो३ यथा दिवो३स्मे रारंत मरुतः सहस्रिणं ॥१३॥
यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रं । यूय-
मर्वंतं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमंतं ॥१४॥ तद्वो
यामि द्रविणं सद्यऊतयो येना स्व१र्ण ततनाम नॄँरभि । इदं
सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ॥१५॥१६॥

॥ ५५ ॥ १–१० श्यावाश्व आत्रेयः ॥ मरुतः ॥ १–९ जगती । १० त्रिष्टुप् ॥

॥५५॥ प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्म-
वक्षसः । ईयंते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा
अवृत्सत ॥१॥ स्वयं दधिध्वे तविषीं यथा विद बृहन्महांत
उर्विया वि राजथ । उतांतरिक्षं ममिरे व्योजसा शुभं यात
मनु रथा अवृत्सत ॥२॥ साकं जाताः सुभ्वः साकमुक्षिताः
श्रिये चिदा प्रतरं वावृधुर्नरः । विरोकिणः सूर्यस्येव रश्मयः
शुभं यातामनु रथा अवृत्सत ॥३॥ आभूषेण्यं वो मरुतो
महित्वनं दिदृक्षेण्यं सूर्यस्येव चक्षणं । उतो अस्माँ अमृतत्वे
दधातन शुभं यातामनु रथा अवृत्सत ॥४॥ उदीरयथा मरुतः
समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः । न वो दस्रा उप
दस्यंति धेनवः शुभं यातामनु रथा अवृत्सत ॥५॥१७॥ यद-
श्वान्धूर्षु पृषतीरयुग्ध्वं हिरण्ययान्प्रत्यत्काँ अमुग्ध्वं । विश्वा
इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथा अवृत्सत ॥६॥ न
पर्वता न नद्यो वरंत वो यत्राचिध्वं मरुतो गच्छथेदु तत् । उत
द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सत ॥७॥
यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते । विश्वस्य
तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत ॥८॥ मृळत

नो मरुतो मा वधिष्टनास्मभ्यं शर्मं बहुलं वि यंतन। अधि स्तो-
त्रस्यं सख्यस्यं गातन शुभं यातामनु रथां अवृत्सत ॥९॥ यूय-
मस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः। जुषध्वं
नो हव्यदांतिं यजत्रा वयं स्याम पतयो रयीणां ॥१०॥१८॥

॥५६॥१-९ श्यावाश्व आत्रेयः॥ मरुतः॥१.२.४-६.८.९ बृहती।३.७ सतोबृहती॥

॥५६॥ अग्ने शर्धंतमा गणं पिष्टं रुक्मेभिरंजिभिः। विशो
अद्य मरुतामवं ह्वये दिवश्चिद्रोचनादधि ॥१॥ यथा चिन्म-
न्यसे हृदा तदिन्मे जग्मुराशसः। ये ते नेदिष्ठं हवनान्या-
गमन्तान्वर्ध भीमसंदृशः ॥२॥ मीळ्हुष्मतीव पृथिवी परा-
हता मदंत्येत्यस्मदा। ऋक्षो न वो मरुतः शिमीवाँ अमो
दुध्रो गौरिव भीमयुः ॥३॥ नि ये रिणंत्योजसा वृथा गावो
न दुर्धुरः। अश्मानं चित्स्वर्यं१ पर्वतं गिरिं प्र च्यावयंति
यामंभिः ॥४॥ उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानां। मरुतां
पुरुतममपूर्व्यं गवां सर्गमिव ह्वये ॥५॥१९॥ युंग्ध्वं ह्यरुषी
रथे युंग्ध्वं रथेषु रोहितः। युंग्ध्वं हरी अजिरा धुरि वोळ्हवे
वहिंष्ठा धुरि वोळ्हवे ॥६॥ उत स्य वाज्यरुषस्तुविष्वणिरिह
स्म धायि दर्शतः। मा वो यामेषु मरुतश्चिरं करत्प्र तं रथेषु
चोदत ॥७॥ रथं नु मारुतं वयं श्रवस्युमा हुवामहे। आ
यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥८॥ तं
वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे। यस्मिन्त्सुजाता सुभगा
महीयते सचा मरुत्सु मीळ्हुषी ॥९॥२०॥४॥

॥ ५७ ॥ १-८ श्यावाश्व आत्रेयः ॥ मरुतः ॥ १-६ जगती। ७. ८ त्रिष्टुप् ॥

॥५७॥ आ रुद्रास इंद्रवंतः सजोषसो हिरण्यरथाः सुवि-
ताय गंतन। इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव

उस्रा उदन्यवे ॥१॥ वाशीमंत ऋष्टिमंतो मनीषिणः सुधन्वान इषुमंतो निषंगिणः। स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभं ॥२॥ धूनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जिहते यामनो भिया। कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वं ॥३॥ वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः। पिशंगाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥४॥ पुरुद्रप्सा अंजिमंतः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः। सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे ॥५॥२१॥ ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितं। नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ॥६॥ गोमदश्वावद्रथवत्सुवीरं चंद्रवद्राधो मरुतो ददा नः। प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य ॥७॥ हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः। सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥८॥२२॥

॥ ५८ ॥ १–८ श्यावाश्व आत्रेयः ॥ मरुतः ॥ त्रिष्टुप् ॥

॥५८॥ तमु नूनं तविषीमंतमेषां स्तुषे गणं मारुतं नव्यसीनां। य आश्वश्वा अमवद्वहंत उतेशिरे अमृतस्य स्वराजः ॥१॥ त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारं। मयोभुवो ये अमिता महित्वा वंदस्व विप्र तुविराधसो नॄन् ॥२॥ आ वो यंतूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनंति। अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥३॥ यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः। युष्मदेति मु-

ष्टिहा बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः ॥४॥ अरा इवे-
दचरमा अहेव प्रप्र जायंते अकवा महोभिः । पृश्नेः पुत्रा
उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः ॥५॥
यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभिः । क्षो-
दंत आपो रिणते वनान्यवोस्रियो वृषभः क्रंदतु द्यौः ॥६॥
प्रथिष्ट यामन्पृथिवी चिदेषां भर्तेव गर्भं स्वमिच्छवो धुः ।
वातान्ह्यश्वान्धुर्यायुयुज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः ॥७॥
ये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ।
त्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ॥८॥२३॥

॥ ५९ ॥ १—८ श्यावाश्व आत्रेयः ॥ मरुतः ॥ १—७ जगती । ८ त्रिष्टुप् ॥

॥५९॥ प्र वः स्पळक्रन्सुवितायं दावनेऽर्चा दिवे प्र पृ-
थ्व्या ऋतं भरे । उक्षंते अश्वान्तरुषंत आ रजोऽनु स्वं भानुं
थयंते अर्णवैः ॥१॥ अमादेषां भियसा भूमिरेजति नौर्न
र्णा क्षरति व्यथिर्यती । दूरेदृशो ये चितयंत एमभिरंतर्महे
वदथे येतिरे नरः ॥२॥ गवामिव श्रियसे शृंगमुत्तमं सूर्यो न
चक्षू रजसो विसर्जने । अत्या इव सुभ्व१श्चारवः स्थन मर्या
इव श्रियसे चेतथा नरः ॥३॥ को वो महांति महतामुदश्नव-
त्कस्काव्या मरुतः को ह पौंस्या । यूयं ह भूमिं किरणं न रेजथ
प्र यद्भरध्वे सुवितायं दावने ॥४॥ अश्वा इवेदरुषासः सबंधवः
शूरा इव प्रयुधः प्रोत युयुधुः । मर्या इव सुवृधो वावृधुर्नरः सू-
र्यस्य चक्षुः प्र मिनंति वृष्टिभिः ॥५॥ ते अज्येष्ठा अकनिष्ठास
उद्भिदोऽमध्यमासो महसा वि वावृधुः । सुजातासो जनुषा पृ-
श्निमातरो दिवो मर्या आ नो अच्छा जिगातन ॥६॥ वयो न ये
श्रेणीः पप्तुरोजसांतान्दिवो बृहतः सानुनस्परि । अश्वास

एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ॥७॥ मि-
मातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतंतां। आ-
चुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः ॥८॥२४॥

॥६०॥१-८श्यावाश्व आत्रेयः॥मरुतो मरुतोवाग्निश्च॥१-६त्रिष्टुप्।७.८.जगती॥

॥६०॥ ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं
नः। रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्यां
॥१॥ आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु।
वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वत
श्चित् ॥२॥ पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेज
स्वने वः। यत्क्रीळथ मरुत ऋष्टिमंत आप इव सध्र्यंचो
धवध्वे ॥३॥ वरा इवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्व
पिपिश्रे। श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रि
तनूषु ॥४॥ अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृ
सौभगाय। युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिन
मरुद्भ्यः॥५॥ यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दि
ष्ठ। अतो नो रुद्रा उत वा न्व१स्याग्ने वित्ताद्धविषो यद्यजा
॥६॥ अग्निश्च यन्मरुतो विश्ववेदसो दिवो वहध्व उत्तरादधि
ष्णुभिः। ते मंदसाना धुनयो रिशादसो वामं धत्त यजमानाय
सुन्वते ॥७॥ अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब
मंदसानो गणश्रिभिः। पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वा-
नर प्रदिवा केतुना सजूः ॥८॥२५॥

॥६१॥ १-१९ श्यावाश्व आत्रेयः॥ १-४ ११-१६. मरुतः। ५-८ शशीयसी तरंत-
महिषी। ९ पुरुमीळ्हो वैददश्विः। १० तरंतो वैददश्विः। १७-१९ रथवी-
तिर्दार्भ्यः॥ १-४. ६-८. १०-१९ गायत्री। ५ अनुष्टुप्। ९ सतोबृहती॥

॥६१॥ के ष्ठा नरः श्रेष्ठतमा य एकएक आयय। परमस्याः

परावतः॥१॥ क्व१ वोऽश्वाः क्वा३भीशवः कथं शेक कथा यय। पृष्ठे
सदो नसोर्यमः॥२॥ जघने चोद एषां वि सक्थानि नरो यमुः। पु-
त्रकृथे न जनयः॥३॥ परा वीरास एतन मर्यासो भद्रजानयः।
अग्नितपो यथासथ॥४॥ सनत्साश्व्यं पशुमुत गव्यं शतावयं। श्या-
वाश्वस्तुताय या दोर्वीरायोपबर्बृहत्॥५॥२६॥ उत त्वा स्त्री शशी-
यसी पुंसो भवति वस्यसी। अदेवत्रादराधसः॥६॥ वि या जानाति
जसुरिं वि तृष्यंतं वि कामिनं। देवत्रा कृणुते मनः॥७॥ उत घा ने-
मो अस्तुतः पुमाँ इति ब्रुवे पणिः। स वैरदेय इत्समः॥८॥ उत मेऽर-
पद्युवतिर्ममंदुषी प्रति श्यावाय वर्तनिं। वि रोहिता पुरुमीळ्हा-
य येमतुर्विप्राय दीर्घयशसे॥९॥ यो मे धेनूनां शतं वैददश्विर्यथा द-
दत्। तरंत इव मंहना॥१०॥२७॥ य ईं वहंत आशुभिः पिबंतो मदिरं
मधु। अत्र श्रवांसि दधिरे॥११॥ येषां श्रियाधि रोदसी विभ्राजंते
रथेष्वा। दिवि रुक्म इवोपरि॥१२॥ युवा स मारुतो गणस्त्वेषरथो
अनेद्यः। शुभंयावाप्रतिष्कुतः॥१३॥ को वेद नूनमेषां यत्रा
मदंति धूतयः। ऋतजाता अरेपसः॥१४॥ यूयं मर्तं विपन्यवः
प्रणेतार इत्था धिया। श्रोतारो यामहूतिषु॥१५॥२८॥ ते नो वसूनि
काम्या पुरुश्चंद्रा रिशादसः। आ यज्ञियासो ववृत्तन॥१६॥ एतं
मे स्तोममूर्म्ये दार्भ्याय परा वह। गिरो देवि रथीरिव॥१७॥ उत मे
वोचतादिति सुतसोमे रथवीतौ। न कामो अप वेति मे॥१८॥ एष
क्षेति रथवीतिर्मघवा गोमतीरनु। पर्वतेष्वपश्रितः॥१९॥२९॥

॥ ६२ ॥ १-९ श्रुतविदात्रेयः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥६२॥ ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचंत्य-
श्वान्। दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यं

॥१॥ तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहंभिर्दुदुह्रे। विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त ॥२॥ अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः। वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ॥३॥ आ वामश्वासः सुयुजो वहंतु यतरश्मय उप यंत्वर्वाक्। घृतस्य निर्णिगनु वर्तते वामुप सिंधवः प्रदिवि क्षरंति ॥४॥ अनु श्रुताममतिं वर्धदुर्वी बर्हिरिव यजुषा रक्षमाणा। नमस्वंता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वंतः ॥५॥३०॥ अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वंतः। राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ ॥६॥ हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्य१श्वाजनीव। भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य ॥७॥ हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य। आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ॥८॥ यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा। तेन नो मित्रावरुणावविष्टं सिषासंतो जिगीवांसः स्याम ॥९॥३१॥३॥

॥ ६३ ॥ १–७ अर्चनाना आत्रेयः ॥ मित्रावरुणौ ॥ जगती ॥

॥६३॥ ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि। यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ॥१॥ सम्राजावस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशा। वृष्टिं वां राधो अमृतत्वमीमहे द्यावापृथिवी वि चरंति तन्यवः ॥२॥ सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी। चित्रेभिरभ्रैरुप तिष्ठथो

रवं द्यां वर्षयथो असुरस्य मायया ॥३॥ माया वां मित्रावरुणा
दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधं । तमभ्रेण वृष्ट्या
गूहथो दिवि पर्जन्य द्रप्सा मधुमंत ईरते ॥४॥ रथं युंजते मरुतः
शुभे सुखं शूरो न मित्रावरुणा गविष्टिषु । रजांसि चित्रा वि चरं-
ति तन्यवो दिवः सम्राजा पयसा न उक्षतं ॥५॥ वाचं सु मित्रा-
वरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीं । अभ्रा वसत
मरुतः सु मायया द्यां वर्षयतमरुणामरेपसं ॥६॥ धर्मणा मित्रा-
वरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया । ऋतेन विश्वं
भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथं ॥७॥१॥

॥ ६४ ॥ १–७ अर्चनाना आत्रेयः ॥ मित्रावरुणौ ॥ १–६ अनुष्टुप् । ७ पंक्तिः ॥

॥६४॥ वरुणं वो रिशादसमृचा मित्रं हवामहे । परि व्र-
जेव बाह्वोर्जगन्वांसा स्वर्णरं ॥१॥ ता बाहवा सुचेतुना प्र
यंतमस्मा अर्चते । शेवं हि जार्यं वां विश्वासु क्षासु जोगुवे
॥२॥ यन्नूनमश्यां गतिं मित्रस्य यायां पथा । अस्य प्रियस्य
शर्मण्यहिंसानस्य सश्चिरे ॥३॥ युवाभ्यां मित्रावरुणोपमं धे-
यामृचा । यद्ध क्षये मघोनां स्तोतॄणां च स्पूर्धसे ॥४॥ आ नो
मित्र सुदीतिभिर्वरुणश्च सधस्थ आ । स्वे क्षये मघोनां सखीं-
नां च वृधसे ॥५॥ युवं नो येषु वरुण क्षत्रं बृहच्च बिभृथः ।
उरु णो वाजसातये कृतं राये स्वस्तये ॥६॥ उच्छंत्यां मे य-
जता देवक्षत्रे रुशद्गवि । सुतं सोमं न हस्तिभिरा पड्भिर्धावतं
नरा बिभ्रतावर्चनानसं ॥७॥२॥

॥ ६५ ॥ १–६ रातहव्य आत्रेयः ॥ मित्रावरुणौ ॥ १–५ अनुष्टुप् । ६ पंक्तिः ॥

॥६५॥ यश्चिकेत स सुक्रतुर्देवत्रा स ब्रवीतु नः । वरुणो यस्य द-
र्शतो मित्रो वा वनते गिरः ॥१॥ ता हि श्रेष्ठवर्चसा राजाना

दीर्घश्रुत्तमा । ता सत्यंती ऋतावृधं ऋतावाना जनेजने ॥२॥ ता वामियानोऽवसे पूर्वा उप ब्रुवे सचा । स्वश्वासः सु चेतुना वाजाँ अभि प्र दावने ॥३॥ मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते । मित्रस्य हि प्रतूर्वतः सुमतिरस्ति विधतः ॥४॥ वयं मित्रस्यावसि स्याम सप्रथस्तमे । अनेहसस्त्वोतयः सत्रा वरुणशेषसः ॥५॥ युवं मित्रेमं जनं यतथः सं च नयथः । मा मघोनः परि ख्यतं मो अस्माकमृषीणां गोपीथे न उरुष्यतं ॥६॥३॥

॥ ६६ ॥ १–६ रातहव्य आत्रेयः ॥ मित्रावरुणौ ॥ अनुष्टुप् ॥

॥६६॥ आ चिकितान सुक्रतू देवौ मर्त रिशादसा । वरुणाय ऋतपेशसे दधीत प्रयसे महे ॥१॥ ता हि क्षत्रमविह्रुतं सम्यगसुर्य१माशाते । अध व्रतेव मानुषं स्व१र्ण धायि दर्शतं ॥२॥ ता वामेषे रथानामुर्वीं गव्यूतिमेषां । रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥३॥ अधा हि काव्या युवं दक्षस्य पूर्भिरद्भुता । नि केतुना जनानां चिकेथे पूतदक्षसा ॥४॥ तदृतं पृथिवि बृहच्छ्रवएष ऋषीणां । जयसानावरं पृथ्वति क्षरंति यामभिः ॥५॥ आ यद्वामीयचक्षसा मित्र वयं च सूरयः । व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये ॥६॥४॥

॥ ६७ ॥ १–५ यजत आत्रेयः ॥ मित्रावरुणौ ॥ अनुष्टुप् ॥

॥६७॥ बळित्था देवा निष्कृतमादित्या यजतं बृहत् । वरुण मित्रार्यमन्वर्षिष्ठं क्षत्रमाशाथे ॥१॥ आ यद्योनिं हिरण्ययं वरुण मित्र सदथः । धर्तारा चर्षणीनां यंतं सुम्नं रिशादसा ॥२॥ विश्वे हि विश्ववेदसो वरुणो मित्रो अर्यमा । व्रता पदेव सश्चिरे पांति मर्त्यं रिषः ॥३॥ ते हि सत्या ऋतस्पृश ऋतावानो

जनेजने । सुनीथासः सुदानवोऽहोश्चिदुरुचक्रयः ॥४॥ को नु वां मित्रास्तुतो वरुणो वा तनूनां । तत्सु वामेषते मतिरत्रिभ्य एषते मतिः ॥५॥५॥

॥ ६८ ॥ १–५ यजत आत्रेयः ॥ मित्रावरुणौ ॥ गायत्री ॥

॥६८॥ प्र वो मित्राय गायत वरुणाय विपा गिरा । महिक्षत्रावृतं बृहत् ॥१॥ सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च । देवा देवेषु प्रशस्ता ॥२॥ ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य । महि वां क्षत्रं देवेषु ॥३॥ ऋतमृतेन सपंतेषिरं दक्षमाशाते । अद्रुहा देवौ वर्धते ॥४॥ वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः । बृहंतं गर्तमाशाते ॥५॥६॥

॥ ६९ ॥ १–४ उरुचक्रिरात्रेयः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥६९॥ त्री रोचना वरुण त्रीँरुत द्यून्त्रीणि मित्र धारयथो रजांसि । वावृधानावमतिं क्षत्रियस्यानु व्रतं रक्षमाणावजुर्यं ॥१॥ इरावतीर्वरुण धेनवो वां मधुमद्वां सिंधवो मित्र दुह्रे । त्रयस्तस्थुर्वृषभासस्तिसृणां धिषणानां रेतोधा वि द्युमंतः ॥२॥ प्रातर्देवीमदितिं जोहवीमि मध्यंदिन उदिता सूर्यस्य । राये मित्रावरुणा सर्वतातेळे तोकाय तनयाय शं योः ॥३॥ या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य । न वां देवा अमृता आ मिनंति व्रतानि मित्रावरुणा ध्रुवाणि ॥४॥७॥

॥ ७० ॥ १–४ उरुचक्रिरात्रेयः ॥ मित्रावरुणौ ॥ गायत्री ॥

॥७०॥ पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण । मित्र वंसि वां सुमतिं ॥१॥ ता वां सम्यगद्रुह्वाणेषमश्याम धायसे । वयं ते रुद्रा स्याम ॥२॥ पातं नो रुद्रा पायुभिरुत त्रायेथां

सुचाचा । तुर्याम दस्यूंन्तनूभिः ॥ ३ ॥ मा कस्याद्भुतक्रतू यक्षं
भुंजेमा तनूभिः । मा शेषसा मा तनसा ॥ ४ ॥ ८ ॥

॥ ७१ ॥ १–३ बाहुवृक्त आत्रेयः ॥ मित्रावरुणौ ॥ गायत्री ॥

॥ ७१ ॥ आ नो गंतं रिशादसा वरुण मित्र बर्हणा । उपेमं
चारुमध्वरं ॥ १ ॥ विश्वस्य हि प्रचेतसा वरुण मित्र राजथः ।
ईशाना पिप्यतं धियः ॥ २ ॥ उप नः सुतमा गतं वरुण मित्र
दाशुषः । अस्य सोमस्य पीतये ॥ ३ ॥ ९ ॥

॥ ७२ ॥ १–३ बाहुवृक्त आत्रेयः ॥ मित्रावरुणौ ॥ उष्णिक् ॥

॥ ७२ ॥ आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत् । नि
बर्हिषि सदतं सोमपीतये ॥ १ ॥ व्रतेन स्थो ध्रुवक्षेमा धर्मणा
यातयज्जना । नि बर्हिषि सदतं सोमपीतये ॥ २ ॥ मित्रश्च
नो वरुणश्च जुषेतां यज्ञमिष्टये । नि बर्हिषि सदतां सोमपी-
तये ॥ ३ ॥ १० ॥ ५ ॥

॥ ७३ ॥ १–१० पौर आत्रेयः ॥ अश्विनौ ॥ अनुष्टुप् ॥

॥ ७३ ॥ यदद्य स्थः परावति यदर्वावत्यश्विना । यद्वा पुरू
पुरुभुजा यदंतरिक्ष आ गतं ॥ १ ॥ इह त्या पुरुभूतमा पुरू
दंसांसि बिभ्रता । वरस्या याम्यध्रिगू हुवे तुविष्टमा भुजे
॥ २ ॥ ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः । पर्यन्या नाहुषा
युगा मह्ना रजांसि दीयथः ॥ ३ ॥ तदू षु वामेना कृतं विश्वा
यद्वामनु ष्टवे । नाना जातावरेपसा समस्मे बंधुमेयथुः ॥ ४ ॥
आ यद्वां सूर्या रथं तिष्ठद्रघुष्यदं सदा । परि वामरुषा वयो
घृणा वरंत आतपः ॥ ५ ॥ ११ ॥ युवोरत्रिश्चिकेतति नरा सुम्नेन
चेतसा । घर्मं यद्वामरेपसं नासत्यास्ना भुरण्यति ॥ ६ ॥ उग्रो
वां ककुहो ययिः शृण्वे यामेषु संतनिः । यद्वां दंसोभि-

रश्विनाचिर्नेरावर्वर्तति ॥७॥ मध्वं ऊ षु मधूयुवा रुद्रा सि-
षक्ति पिप्युषी । यत्समुद्राति पर्षथः पक्वाः पृक्षो भरंत वां ॥८॥
सत्यमिद्वा उं अश्विना युवामाहुर्मयोभुवा । ता यामन्यामहू-
तमा यामन्ना मृळयत्तमा ॥९॥ इमा ब्रह्माणि वर्धनाश्विभ्यां
संतु शंतमा । या तक्षाम रथाँ इवावोचाम बृहन्नमः
॥१०॥१२॥

॥ ७४ ॥ १–१० पौर आत्रेयः ॥ अश्विनौ ॥ अनुष्टुप् ॥

॥७४॥ कूष्ठो देवावश्विनाद्या दिवो मनावसू । तच्छ्रवथो
वृषण्वसू अत्रिर्वामा विवासति ॥१॥ कुह त्या कुह नु श्रुता
दिवि देवा नासत्या । कस्मिन्ना यतथो जने को वां नदीनां
सचा ॥२॥ कं याथः कं ह गच्छथः कमच्छा युंजाथे रथं । कस्य
ब्रह्माणि रण्यथो वयं वामुश्मसीष्टये ॥३॥ पौरं चिद्ध्युदप्रुतं पौरं
पौराय जिन्वथः । यदीं गृभीततातये सिंहमिव द्रुहस्पदे ॥४॥
प्र च्यवानाज्जुजुरुषो वव्रिमत्कं न मुंचथः । युवा यदीं कृथः
पुनरा काममृण्वे वध्वः ॥५॥१३॥ अस्ति हि वामिह स्तोता
स्मसि वां संदृशि श्रिये । नू श्रुतं म आ गतमवोभिर्वाजिनी-
वसू ॥६॥ को वामद्य पुरूणामा वव्ने मर्त्यानां । को विप्रो वि-
प्रवाहसा को यज्ञैर्वाजिनीवसू ॥७॥ आ वां रथो रथानां येष्ठो
यात्वश्विना । पुरू चिदस्मयुस्तिर आंगूषो मर्त्येष्वा ॥८॥ शमू षु
वां मधूयुवास्माकमस्तु चर्कृतिः । अर्वाचीना विचेतसा वि-
भिः श्येनेव दीयतं ॥९॥ अश्विना यद्ध कर्हि चिच्छुश्रूयातमिमं
हवं । वस्वीरू षु वां भुजः पृंचंति सु वां पृचः ॥१०॥१४॥

॥ ७५ ॥ १–९ अवस्युरात्रेयः ॥ अश्विनौ ॥ पंक्तिः ॥

॥७५॥ प्रति प्रियतमं रथं वृषणं वसुवाहनं । स्तोता वामश्वि-

नावृषिः स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवं ॥१॥
अत्यायातमश्विना तिरो विश्वा अहं सना। दस्रा हिरण्यव-
र्तनी सुषुम्ना सिंधुवाहसा माध्वी मम श्रुतं हवं ॥२॥ आ नो
रत्नानि बिभ्रतावश्विना गच्छतं युवं। रुद्रा हिरण्यवर्तनी
जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवं ॥३॥ सुष्टुभो वां
वृषण्वसू रथे वाणीच्याहिता। उत वां ककुहो मृगः पृक्षः
कृणोति वापुषो माध्वी मम श्रुतं हवं ॥४॥ बोधिन्मनसा
रथ्येषिरा हवनश्रुता। विभिश्च्यवानमश्विना नि याथो अद्व-
याविनं माध्वी मम श्रुतं हवं ॥५॥१५॥ आ वां नरा मनोयुजो-
ऽश्वासः प्रुषितप्सवः। वयो वहंतु पीतये सह सुम्नेभिरश्विना
माध्वी मम श्रुतं हवं ॥६॥ अश्विनावेह गच्छतं नासत्या मा
वि वेनतं। तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या माध्वी मम
श्रुतं हवं ॥७॥ अस्मिन्यज्ञे अदाभ्या जरितारं शुभस्पती।
अवस्युमश्विना युवं गृणंतमुप भूषथो माध्वी मम श्रुतं हवं
॥८॥ अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः। अयोजि वां वृष-
ण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवं ॥९॥१६॥

॥७६॥ १–५ अत्रिः॥ अश्विनौ॥ त्रिष्टुप्॥

॥७६॥ आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया
वाचो अस्थुः। अर्वाचा नूनं रथ्येह यातं पीपिवांसम-
श्विना घर्ममच्छ ॥१॥ न संस्कृतं प्र मिमीतो गमिष्ठांति
नूनमश्विनोपस्तुतेह। दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं
दाशुषे शंभविष्ठा ॥२॥ उता यातं संगवे प्रातरह्नो मध्यं-
दिन उदिता सूर्यस्य। दिवा नक्तमवसा शंतमेन नेदानीं
पीतिरश्विना ततान ॥३॥ इदं हि वां प्रदिवि स्थानमोक

इमे गृहा अश्विनेदं दुरोणं । आ नो दिवो बृहतः पर्वतादा-
द्भ्यो यातमिषमूर्जं वहन्ता ॥४॥ समश्विनोरवसा नूतनेन
मयोभुवा सुप्रणीती गमेम । आ नो रयिं वहतमोत वीरा-
ना विश्वान्यमृता सौभगानि ॥५॥१७॥

॥७७॥ १-५ अत्रिः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥७७॥ प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः
पिबातः । प्रातर्हि यज्ञमश्विना दधाते प्र शंसन्ति कवयः पूर्व-
भाजः ॥१॥ प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया
अजुष्टं । उतान्यो अस्मद्यजते वि चावः पूर्वःपूर्वो यजमानो
वनीयान् ॥२॥ हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो
वर्तते वां । मनोजवा अश्विना वातरंहा येनातियाथो दुरि-
तानि विश्वा ॥३॥ यो भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं
पित्वो ररते विभागे । स तोकमस्य पीपरच्छमीभिरनूर्ध्वभा-
सः सदमित्तुतुर्यात् ॥४॥ समश्विनोरवसा नूतनेन मयोभुवा
सुप्रणीती गमेम । आ नो रयिं वहतमोत वीराना विश्वान्य-
मृता सौभगानि ॥५॥१८॥

॥७८॥ १-९ सप्तवध्रिरात्रेयः ॥ अश्विनौ ॥ १-३ उष्णिक् ॥ ४ त्रिष्टुप् ॥ ५-९ अनुष्टुप् ॥

॥७८॥ अश्विनावेह गच्छतं नासत्या मा वि वेनतं । हंसा-
विव पततमा सुताँ उप ॥१॥ अश्विना हरिणाविव गौरा-
विवानु यवसं । हंसाविव पततमा सुताँ उप ॥२॥ अश्विना
वाजिनीवसू जुषेथां यज्ञमिष्टये । हंसाविव पततमा सुताँ
उप ॥३॥ अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेव यो-
षा । श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन
॥४॥१९॥ वि जिहीष्व वनस्पते योनिः सूष्यन्त्या इव । श्रुतं मे अ-

श्विना हवं सप्तवध्रिं च मुंचतं ॥५॥ भीताय नाधमानाय ऋषये सप्तवध्रये। मायाभिरश्विना युवं वृक्षं सं च वि चाचथः ॥६॥ यथा वातः पुष्करिणीं समिंगयति सर्वतः। एवा ते गर्भ एजतु निरैतु दशमास्यः ॥७॥ यथा वातो यथा वनं यथा समुद्र एजति। एवा त्वं दशमास्य सहावेहि जरायुणा ॥८॥ दश मासाञ्छशयानः कुमारो अधि मातरि। निरैतु जीवो अक्षतो जीवो जीवंत्या अधि ॥९॥२०॥

॥ ७९ ॥ १-१० सत्यश्रवा आत्रेयः ॥ उषाः ॥ पंक्तिः ॥

॥७९॥ महे नो अद्य बोधयोषो राये दिवित्मती। यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥१॥ या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः। सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥२॥ सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः। यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥३॥ अभि ये त्वा विभावरि स्तोमैर्गृणंति वह्नयः। मघैर्मघोनि सुश्रियो दामन्वंतः सुरातयः सुजाते अश्वसूनृते ॥४॥ यच्चिद्धि ते गणा इमे छदयंति मघत्तये। परि चिद्वष्टयो दधुर्ददतो राधो अह्रयं सुजाते अश्वसूनृते ॥५॥२१॥ ऐषु धा वीरवद्यश उषो मघोनि सूरिषु। ये नो राधांस्यह्रया मघवानो अरासत सुजाते अश्वसूनृते ॥६॥ तेभ्यो द्युम्नं बृहद्यश उषो मघोन्या वह। ये नो राधांस्यश्व्या गव्या भजंत सूरयः सुजाते अश्वसूनृते ॥७॥ उत नो गोमतीरिष आ वहा दुहितर्दिवः। साकं सूर्यस्य रश्मिभिः शुक्रैः शोचद्भिरर्चिभिः सुजाते अश्वसूनृते ॥८॥ व्युच्छा दुहितर्दिवो मा चिरं तनुथा अपः। नेत्त्वा स्तेनं यथा रिपुं

अर्चिषा सुजाते अश्वसूनृते ॥९॥ एतावद्वेदु-
वा दातुमर्हसि । या स्तोतृभ्यो विभावर्युच्छंती
यसे सुजाते अश्वसूनृते ॥ १० ॥ २२ ॥

॥ ८० ॥ १–६ सत्यश्रवा आत्रेयः ॥ उषाः ॥ त्रिष्टुप् ॥

॥८०॥ द्युतद्यामानं बृहतीमृतेन ऋतावरीमरुणप्सुं विभा-
ती । देवीमुषसं स्वरावहंती प्रति विप्रासो मतिभिर्जरंते ॥१॥
एषा जनं दर्शता बोधयंती सुगान्पथः कृण्वती यात्यग्रे । बृ-
हद्रथा बृहती विश्वमिन्वोषा ज्योतिर्यच्छत्यग्रे अह्नां ॥२॥
एषा गोभिररुणेभिर्युजानास्रेधंती रयिमप्रायु चक्रे । पथो
रदंती सुविताय देवी पुरुष्टुता विश्ववारा वि भाति ॥३॥
एषा व्येनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात् ।
ऋतस्य पंथामन्वेति साधु प्रजानतीव न दिशो मिनाति
॥४॥ एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो
अस्थात् । अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता
ज्योतिषागात् ॥५॥ एषा प्रतीची दुहिता दिवो नॄन्योषेव
भद्रा नि रिणीते अप्सः । व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्यो-
तिर्युवतिः पूर्वथाकः ॥ ६ ॥ २३ ॥

॥ ८१ ॥ १–५ श्यावाश्व आत्रेयः ॥ सविता ॥ जगती ॥

॥८१॥ युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो
विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवि-
तुः परिष्टुतिः ॥१॥ विश्वा रूपाणि प्रति मुंचते कविः प्रासा-
वीद्भद्रं द्विपदे चतुष्पदे । वि नाकमख्यत्सविता वरेण्योऽनु
प्रयाणमुषसो वि राजति ॥२॥ यस्य प्रयाणमन्वन्य इद्ययुर्दे-
वा देवस्य महिमानमोजसा । यः पार्थिवानि विममे स ए-

तंशे रजांसि देवः सविता महित्वना ॥ ३ ॥
वितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि
त्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभि
उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव याम
उतेदं विश्वं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तो
मानशे ॥ ५ ॥ २४ ॥

॥ ८२ ॥ १-९ श्यावाश्व आत्रेयः ॥ सविता ॥ १ अनुष्टुप् । २-९ गायत्री ॥

॥८२॥ तत्सवितुर्वृणीमहे वयं देवस्य भोजनं । श्रेष्ठं सर्वधा-
तमं तुरं भगस्य धीमहि ॥१॥ अस्य हि स्वयशस्तरं सवितु
कच्चन प्रियं । न मिनंति स्वराज्यं ॥२॥ स हि रत्नानि दाशुषे
सुवाति सविता भगः । तं भागं चित्रमीमहे ॥ ३ ॥ अद्या नो
देव सवितः प्रजावत्सावीः सौभगं । परा दुःष्वप्न्यं सुव ॥४॥
विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव
॥ ५ ॥ २५ ॥ अनागसो अदितये देवस्य सवितुः सवे । विश्वा
वामानि धीमहि ॥६॥ आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणी-
महे । सत्यसवं सवितारं ॥ ७ ॥ य इमे उभे अहनी पुर एत्य-
प्रयुच्छन् । स्वाधीर्देवः सविता ॥ ८ ॥ य इमा विश्वा जाता-
न्याश्रावयति श्लोकेन । प्र च सुवाति सविता ॥९॥२६॥

॥ ८३ ॥ १-१० अत्रिः ॥ पर्जन्यः ॥ १. ५-८. १० त्रिष्टुप् । २-४ जगती । ९ अनुष्टुप् ॥

॥ ८३ ॥ अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नम-
सा विवास । कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधीषु
गर्भं ॥ १ ॥ वि वृक्षान्हंत्युत हंति रक्षसो विश्वं बिभाय भु-
वनं महावधात् । उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः
स्तनयन्हंति दुष्कृतः ॥२॥ रथीव कशयाश्वाँ अभिक्षिपन्ना-

र्दूतान्कृणुते वर्ष्याँ३ अह । दूरात्सिंहस्य स्तनथा उदीरते
यत्पर्जन्यः कृणुते वर्ष्यं१ नभः ॥३॥ प्र वाता वान्ति पतयन्ति
विद्युत उदोषधीर्जिहते पिन्वते स्वः । इरा विश्वस्मै भुवनाय
जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥४॥ यस्य व्रते पृथिवी
नंनमीति यस्य व्रते शफवज्जर्भुरीति । यस्य व्रत ओषधीर्वि-
श्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥५॥२७॥ दिवो नो
वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः । अर्वा-
ङेतेन स्तनयित्नुनेह्यपो निषिंचन्नसुरः पिता नः ॥६॥ अभि
क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन । दृतिं सु
कर्ष विषितं न्यंचं समा भवन्तूद्वतो निपादाः ॥७॥ महान्तं
कोशमुदचा नि षिंच स्यन्दन्तां कुल्या विषिताः पुरस्तात् । घृ-
तेन द्यावापृथिवी व्युंधि सुप्रपाणं भवत्वघ्न्याभ्यः ॥८॥ यत्प-
र्जन्य कनिक्रदत्स्तनयन्हंसि दुष्कृतः । प्रतीदं विश्वं मोदते
यत्किं च पृथिव्यामधि ॥९॥ अवर्षीर्वर्षमुदु षू गृभायाकर्ध-
न्वान्यत्येतवा उ । अजीजन ओषधीर्भोजनाय कमुत प्रजा-
भ्योऽविदो मनीषां ॥१०॥२८॥

॥ ८४ ॥ १–३ अत्रिः ॥ पृथिवी ॥ अनुष्टुप् ॥

॥८४॥ बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि । प्र या
भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥१॥ स्तोमासस्त्वा वि-
चारिणि प्रति ष्टोभन्त्यक्तुभिः । प्र या वाजं न हेषन्तं पेरुमस्य-
स्यर्जुनि ॥२॥ दृळ्हा चिद्या वनस्पतीन्क्ष्मया दर्धर्ष्योजसा । यत्ते
अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः ॥३॥२९॥

॥ ८५ ॥ १–८ अत्रिः ॥ वरुणः ॥ त्रिष्टुप् ॥

॥८५॥ प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय ।

वि यो जघान शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय ॥१
वनेषु व्यं१तरिक्षं ततान वाजमर्वत्सु पयं उस्रियासु । हृत्
क्रतुं वरुणो अप्स्व१ग्निं दिवि सूर्यमदधात्सोममद्रौ ॥२॥
नीचीनबारं वरुणः कवंधं प्र ससर्ज रोदसी अंतरिक्षं । तेन वि-
श्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम ॥३॥ उनत्ति
भूमिं पृथिवीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित् । समभ्रेण
वसत पर्वतासस्तविषीयंतः श्रथयंत वीराः ॥४॥ इमामू ष्वा-
सुरस्य श्रुतस्य महीं मायां वरुणस्य प्र वोचं । मानेनेव त-
स्थिवाँ अंतरिक्षे वि यो ममे पृथिवीं सूर्येण ॥५॥३०॥ इमामू
नु कवितमस्य मायां महीं देवस्य नकिरा दधर्ष । एकं यदुद्ना
न पृणंत्येनीरासिंचंतीरवनयः समुद्रं ॥६॥ अर्यम्यं वरुण
मित्र्यं वा सखायं वा सदमिद्भ्रातरं वा । वेशं वा नित्यं वरु-
णारणं वा यत्सीमागश्चकृमा शिश्रथस्तत् ॥७॥ कितवासो
यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म । सर्वा ता वि
ष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ॥८॥३१॥

॥ ८६ ॥ १–६ अत्रिः ॥ इंद्राग्नी ॥ १–५ अनुष्टुप् । ६ विराट्पूर्वा ॥

॥८६॥ इंद्राग्नी यमवथ उभा वाजेषु मर्त्यं । दृळ्हा चित्स
प्र भेदति द्युम्ना वाणीरिव चितः ॥१॥ या पृतनासु दुष्टरा या
वाजेषु श्रवाय्या । या पंच चर्षणीरभीद्राग्नी ता हवामहे ॥२॥
तयोरिदमवच्छवस्तिग्मा दिद्युन्मघोनोः । प्रति द्रुणा गभस्त्यो-
र्गवां वृत्रघ्न एषते ॥३॥ ता वामेषे रथानामिंद्राग्नी हवामहे ।
पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा ॥४॥ ता वृधंता-
वनु द्यून्मर्ताय देवावदभा । अर्हंता चित्पुरो दधेऽशेव देवा-

वैते ॥५॥ एवेंद्राग्निभ्यामहावि हव्यं शूष्यं घृतं न पूतमद्रि-
भिः । ता सूरिषु श्रवो बृहद्रयिं गृणत्सु दिधृतमिषं गृणत्सु
दिधृतं ॥ ६ ॥ ३२ ॥

॥ ८७ ॥ १–९ एवयामरुदात्रेयः ॥ मरुतः ॥ अतिजगती ॥

॥८७॥ प्र वो महे मतयो यंतु विष्णवे मरुत्वते गिरिजा
एवयामरुत् । प्र शर्धाय प्रयज्यवे सुखादये तवसे भंददिष्टये
धुनिव्रताय शवसे ॥१॥ प्र ये जाता महिना ये च नु स्वयं
प्र विद्मना ब्रुवत एवयामरुत् । क्रत्वा तद्वो मरुतो नाधृषे
शवो दाना मह्ना तदेषामधृष्टासो नाद्रयः ॥२॥ प्र ये दिवो
बृहतः शृण्विरे गिरा सुशुक्वानः सुभ्व एवयामरुत् । न येषा-
मिरी सधस्थ ईष्ट आँ अग्नयो न स्वविद्युतः प्र स्यंद्रासो धु-
नीनां ॥३॥ स चक्रमे महतो निरुरुक्रमः समानस्मात्सदस
एवयामरुत् । यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो वि-
महसो जिगाति शेवृधो नृभिः ॥४॥ स्वनो न वोऽमवान्रे-
जयद्वृषा त्वेषो ययिस्तविष एवयामरुत् । येना सहंत ऋंजत
स्वरोचिषः स्थारश्मानो हिरण्ययाः स्वायुधास इष्मिणः
॥५॥३३॥ अपारो वो महिमा वृद्धशवसस्त्वेषं शवोऽवत्वेव-
यामरुत् ।स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्यता नि-
दः शुशुक्वांसो नाग्नयः ॥६॥ ते रुद्रासः सुमखा अग्नयो यथा
तुविद्युम्ना अवंत्वेवयामरुत् । दीर्घं पृथु पप्रथे सद्म पार्थिवं
येषामज्मेष्वा महः शर्धास्यद्भुतैनसां ॥७॥ अद्वेषो नो मरुतो
गातुमेतन श्रोता हवं जरितुरेवयामरुत् । विष्णोर्महः समन्यवो
युयोतन स्मद्रथ्यो३न दंसनाप द्वेषांसि सनुतः ॥८॥ गंता नो यज्ञं
यज्ञियाः सुशमि श्रोता हवमरक्ष एवयामरुत् । ज्येष्ठासो न

पर्वतासो व्योमनि यूयं तस्य प्रचेतसः स्यात दुर्धर्तवो नि
॥९॥३४॥६॥५॥

॥ इति पंचमं मंडलं समाप्तं ॥

॥ १ ॥ १–१३ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१॥ त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म हो-
ता । त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै
॥१॥ अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन्
तं त्वा नरः प्रथमं देवयंतो महो राये चितयंतो अनु ग्मन्
॥२॥ वृतेव यंतं बहुभिर्वसव्यै३स्त्वे रयिं जागृवांसो अनु
ग्मन् । रुशंतमग्निं दर्शतं बृहंतं वपावंतं विश्वहा दीदिवांसं
॥३॥ पदं देवस्य नमसा व्यंतः श्रवस्यवः श्रव आपन्नमृक्तं
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयंत संदृष्टौ ॥४॥
त्वां वर्धंति क्षितयः पृथिव्यां त्वां राय उभयासो जनानां
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणां
॥५॥३५॥ सपर्येण्यः स प्रियो विक्ष्व१ग्निर्होता मंद्रो नि षं-
साद यजीयान् । तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो
नमसा सदेम ॥६॥ तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे
देवयंतः । त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोच-
नेन ॥७॥ विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं
चर्षणीनां । प्रेतीषणिमिषयंतं पावकं राजंतमग्निं यजतं रयी-
णां ॥८॥ सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा
हव्यदातिं । य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते
त्वोतः ॥९॥ अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत
हव्यैः । वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ

यंतेम ॥१०॥ आ यस्ततंथ रोदसी वि भासा श्रवोभिश्च श्रवस्य१-
स्तरुत्रः । बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भा-
हि ॥११॥ नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि संतु ॥१२॥
पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्यां । पुरूणि
हि त्वे पुरुवार संत्यग्ने वसु विधते राजनि त्वे ॥१३॥३६॥४॥

॥ २ ॥ १-११ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ १-१० अनुष्टुप् । ११ शक्करी ॥

॥२॥ त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे । त्वं विचर्षणे श्रवो
वसो पुष्टिं न पुष्यसि ॥१॥ त्वां हि ष्मा चर्षणयो यज्ञेभिर्गी-
र्भिरीळते । त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ॥२॥ स-
जोषस्त्वा दिवो नरो यज्ञस्य केतुमिंधते । यद्ध स्य मानुषो जनः
सुम्नायुर्जुह्वे अध्वरे ॥३॥ ऋधद्यस्ते सुदानवे धिया मर्तः शशमते ।
ऊती ष बृहतो दिवो द्विषो अंहो न तरति ॥४॥ समिधा यस्त
आहुतिं निशितिं मर्त्यो नशत् । वयावंतं स पुष्यति क्षयमग्ने
शतायुषं ॥५॥१॥ त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥६॥ अधा हि वि-
क्ष्वीड्योऽसि प्रियो नो अतिथिः । रण्वः पुरीव जूर्यः सूनुर्न
त्रययाय्यः ॥७॥ क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः ।
परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः ॥८॥ त्वं त्या चिद-
च्युताग्ने पशुर्न यवसे । धामा ह यत्ते अजर वना वृश्चंति शिक्वसः
॥ ९ ॥ वेषि ह्यध्वरीयतामग्ने होता दमे विशां । समृधो विश्पते
कृणु जुषस्व हव्यमंगिरः ॥१०॥ अच्छा नो मित्रमहो देव देवा-
नग्ने वोचः सुमतिं रोदस्योः । वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्वि-
षो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥११॥२॥

॥ ३ ॥ १–८ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥३॥ अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे ।
यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः ॥ १ ॥
ईजे यज्ञेभिः शशमे शमीभिरृधद्वारायाग्नये ददाश । एवा चन
तं यशसामजुष्टिर्नांहो मर्तं नशते न प्रदृप्तिः ॥२॥ सूरो न यस्य
दृशतिररेपा भीमा यदेति शुचतस्त आ धीः । हेषस्वतः शुरुधो
नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः ॥ ३ ॥ तिग्मं चिदेम
महि वर्पो अस्य भसदश्वो न यमसान आसा । विजेहमानः
परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् ॥ ४ ॥ स इदस्तेव
प्रति धादसिष्यञ्छिशीत तेजोऽयसो न धाराँ । चित्रध्रजति-
ररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः ॥५॥३॥ स ईं रेभो न
प्रति वस्त उस्राः शोचिषा रारपीति मित्रमहाः । नक्तं य ईमरु-
षो यो दिवा नॄनमर्त्यो अरुषो यो दिवा नॄन् ॥ ६ ॥ दिवो न
यस्य विधतो नवीनोद्वृषा रुक्ष ओषधीषु नूनोत् । घृणा न यो
ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी ॥७॥ धायोभिर्वा
यो युज्येभिरर्कैर्विद्युन्न दविद्योत्स्वेभिः शुष्मैः । शर्धो वा यो
मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत् ॥ ८ ॥ ४ ॥

॥ ४ ॥ १–८ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ ४ ॥ यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो
यजासि । एवा नो अद्य समना समानानुशन्नग्न उशतो
यक्षि देवान् ॥१॥ स नो विभावा चक्षणिर्न वस्तोरग्निर्वन्दारु
वेद्यश्चनो धात् । विश्वायुर्यो अमृतो मर्त्येषूषर्भुद्भूदतिथिर्जा-
तवेदाः ॥ २ ॥ द्यावो न यस्य पनयन्त्यभ्वं भासांसि वस्ते सूर्यो
न शुक्रः । वि य इनोत्यजरः पावकोऽश्नस्य चिच्छिश्नथत्पू-

र्याणि ॥ ३ ॥ वज्रा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषा-
ज्मान्नं । स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यंतः ॥४॥
नितिक्ति यो वारणमन्नमत्ति वायुर्न राष्ट्र्यत्येत्यक्तून् । तुर्याम
यस्त आदिशामरातीरत्यो न ह्रुतः पततः परिह्रुत् ॥५॥५॥ आ
सूर्यो न भानुमद्भिरर्कैरग्ने ततंथ रोदसी वि भासा । चित्रो
नयत्परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन् ॥ ६ ॥
त्वां हि मंद्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने । इंद्रं न त्वा
शवसा देवता वायुं पृणंति राधसा नृतमाः ॥७॥ नू नो अग्ने-
ऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः । ता सूरिभ्यो
गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः ॥ ८ ॥ ६ ॥

॥५॥ १–७ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥५॥ हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्यविष्ठं ।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक्
॥१॥ त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके
॥२॥ त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणां ।
अत इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि
॥३॥ यो नः सनुत्यो अभिदासदग्ने यो अंतरो मित्रमहो वनु-
ष्यात् । तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तप-
स्वान् ॥४॥ यस्ते यज्ञेन समिधा य उक्थैरर्केभिः सूनो सहसो
ददाशत् । स मर्त्येष्वमृत प्रचेता राया द्युम्नेन श्रवसा वि
भाति ॥५॥ स तत्कृधीषितस्तूयमग्ने स्पृधो बाधस्व सहसा स-
हस्वान् । यच्छस्यसे द्युभिरक्तो वचोभिस्तज्जुषस्व जरितुर्घोषि

मन्म ॥६॥ अश्याम तं काममग्ने तवोती अश्याम रयिं
रयिवः सुवीरं। अश्याम वाजमभि वाजयंतोऽश्याम द्युम्नम-
जराजरं ते ॥७॥७॥

॥६॥ १–७ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥६॥ प्र नव्यसा सहसः सूनुमच्छा यज्ञेन गातुमव इच्छमा-
नः। वृश्चद्वनं कृष्णयामं रुशंतं वीती होतारं दिव्यं जिगाति
॥१॥ स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः।
यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन् ॥२॥ वि
ते विष्वग्वातजूतासो अग्ने भामासः शुचे शुचयश्चरंति। तु-
विम्रक्षासो दिव्या नवग्वा वना वनंति धृषता रुजंतः ॥३॥ ये
ते शुक्रासः शुचयः शुचिष्मः क्षां वपंति विषितासो अश्वाः।
अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः
॥४॥ अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः
सृजाना। शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वना-
नि ॥५॥ आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता
ततंथ। स बाधस्वाप भया सहोभिः स्पृधो वनुष्यन्वनुषो नि
जूर्व ॥६॥ स चित्र चित्रं चितयंतमस्मे चित्रक्षत्र चित्रतमं वयो-
धां। चंद्रं रयिं पुरुवीरं बृहंतं चंद्र चंद्राभिर्गृणते युवस्व ॥७॥८॥

॥७॥ १–७ भरद्वाजो बार्हस्पत्यः ॥ वैश्वानरः ॥ १–५ त्रिष्टुप्। ६, ७ जगती ॥

॥७॥ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जात-
मग्निं। कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयंत
देवाः ॥१॥ नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं
नवंत। वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयंत देवाः ॥२॥
त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः। वै-

श्वानर त्वमस्मासु धेहि वसूनि राजन्त्स्पृहयाय्याणि ॥३॥ त्वां
विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते । तव
क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ॥४॥ वैश्वानर तव
तानि व्रतानि महान्यग्ने नकिरा दधर्ष । यज्जायमानः पित्रो-
रुपस्थेऽविन्दः केतुं वयुनेष्वह्नाम् ॥५॥ वैश्वानरस्य विमितानि
चक्षसा सानूनि दिवो अमृतस्य केतुना । तस्येदु विश्वा भु-
वनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः ॥६॥ वि यो
रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः ।
परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य
रक्षिता ॥७॥९॥

॥८॥ १–७ भरद्वाजो बार्हस्पत्यः ॥ वैश्वानरः ॥ १–६ जगती । ७ त्रिष्टुप् ॥

॥८॥ पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा
जातवेदसः । वैश्वानराय मतिर्नव्यसी शुचिः सोम इव पवते
चारुरग्नये ॥१॥ स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा
अरक्षत । व्य१न्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना ना-
कमस्पृशत् ॥२॥ व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदकृ-
णोज्ज्योतिषा तमः । वि चर्मणीव धिषणे अवर्तयद्वैश्वानरो
विश्वमधत्त वृष्ण्यम् ॥३॥ अपामुपस्थे महिषा अगृभ्णत विशो
राजानमुप तस्थुर्ऋग्मियम् । आ दूतो अग्निमभरद्विवस्वतो
वैश्वानरं मातरिश्वा परावतः ॥४॥ युगेयुगे विदथ्यं गृणद्भ्यो-
ऽग्ने रयिं यशसं धेहि नव्यसीम् । पव्येव राजन्नघशंसमजर
नीचा नि वृश्च वनिनं न तेजसा ॥५॥ अस्माकमग्ने
मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यम् । वयं जयेम शतिनं
सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ॥६॥ अदब्धे-

भिस्त्वं गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन्। रक्षा च
नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः ॥७॥१०॥

॥ ९ ॥ १–७ भरद्वाजो बार्हस्पत्यः ॥ वैश्वानरः ॥ त्रिष्टुप् ॥

॥९॥ अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि
॥१॥ नाहं तंतुं न वि जानाम्योतुं न यं वयंति समरेऽतमा-
नाः। कस्य स्वित्पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा
॥२॥ स इत्तंतुं स वि जानात्योतुं स वक्त्वान्यृतुथा वदाति।
य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन्
॥३॥ अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु।
अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः ॥४॥
ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वंतः। विश्वे
देवाः समनसः सकेता एकं क्रतुमभि वि यंति साधु ॥५॥
वि मे कर्णा पतयतो वि चक्षुर्वी३दं ज्योतिर्हृदय आहितं
यत्। वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू
मनिष्ये ॥६॥ विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि
तस्थिवांसं। वैश्वानरोऽवतूतये नोऽमर्त्योऽवतूतये नः ॥७॥११॥

॥ १० ॥ १–७ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ १–६ त्रिष्टुप्। ७ द्विपदा ॥

॥१०॥ पुरो वो मंद्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे
दधिध्वं। पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जा-
तवेदाः ॥१॥ तमु द्युमः पुर्वणीक होतरग्ने अग्निभिर्मनुष इ-
धानः। स्तोमं यमस्मै ममतेव शूषं घृतं न शुचि मतयः पवंते
॥२॥ पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः। चि-

चाभिस्तमूतिभिश्चित्रशोचिर्व्रजस्य साता गोमतो दधाति
॥३॥ आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा।
अध बहु चित्तम ऊर्म्यायास्तिरः शोचिषा ददृशे पावकः
॥४॥ नू नश्चित्रं पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि।
ये राधसा श्रवसा चात्यन्यान्त्सुवीर्येभिश्चाभि संति जनान्
॥५॥ इमं यज्ञं चनो धा अग्न उशन्यं त आसानो जुहुते
हविष्मान्। भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाजस्य गध्यस्य
सातौ ॥६॥ वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः
सुवीराः ॥ ७ ॥ १२ ॥

॥ ११ ॥ १-६ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ ११ ॥ यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न
प्रयुक्ति। आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी
ववृत्याः ॥ १ ॥ त्वं होता मंद्रतमो नो अध्रुगंतर्देवो विदथा
मर्त्येषु। पावकया जुह्वा३ वह्निरासाग्ने यजस्व तन्वं१ तव स्वां
॥२॥ धन्या चिद्धि त्वे धिषणा वष्टि प्र देवाञ्जन्म गृणते यजध्यै।
वेपिष्ठो अंगिरसां यद्ध विप्रो मधु छंदो भनति रेभ इष्टौ ॥३॥
अदिद्युतत्स्वपाको विभावाग्ने यजस्व रोदसी उरूची। आयुं न
यं नमसा रातहव्या अंजंति सुप्रयसं पंच जनाः ॥ ४ ॥ वृंजे ह
यन्नमसा बर्हिरग्नावयामि स्रुग्घृतवती सुवृक्तिः। अम्यक्षि
सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः ॥५॥ दशस्या
नः पुर्वणीक होतर्देवेभिरग्ने अग्निभिरिधानः। रायः सूनो स-
हसो वावसाना अति स्रसेम वृजनं नांहः ॥ ६ ॥ १३ ॥

॥ १२ ॥ १-६ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१२॥ मध्ये होता दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी

यजध्यै । अयं स सूनुः सहस ऋतावा दूरात्सूर्यो न शोचिषा
ततान ॥१॥ आ यस्मिन्त्वे स्वपाके यजत्र यक्षद्राजन्त्सर्वतातेव
नु द्यौः । त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा
यजध्यै ॥२॥ तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो
अद्यौत् । अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु
॥३॥ सास्माकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः ।
द्र्वन्नो वन्वन्क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः ॥४॥ अध
स्मास्य पनयंति भासो वृथा यत्तक्षदनुयाति पृथ्वीं । सद्यो यः
स्यंद्रो विषितो धवीयानृणो न तायुरति धन्वा राट् ॥५॥ स
त्वं नो अर्वन्निदाया विश्वेभिरग्ने अग्निभिरिधानः । वेषि रायो
वि यासि दुच्छुना मदेम शतहिमाः सुवीराः ॥६॥१४॥

॥ १३ ॥ १–६ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१३॥ त्वद्विश्वा सुभग सौभगान्यग्ने वि यंति वनिनो न
वयाः । श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपां
॥१॥ त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः ।
अग्ने मित्रो न बृहत ऋतस्यासि क्षत्ता वामस्य देव भूरेः ॥२॥
स सत्पतिः शवसा हंति वृत्रमग्ने विप्रो वि पणेर्भर्ति वाजं । यं
त्वं प्रचेत ऋतजात राया सजोषा नप्त्रापां हिनोषि ॥३॥ यस्ते
सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वेद्यानट् । विश्वं
स देव प्रति वारमग्ने धत्ते धान्यं१ पत्यते वसव्यैः ॥४॥ ता
नृभ्य आ सौश्रवसा सुवीराग्ने सूनो सहसः पुष्यसे धाः । कृणो-
षि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये ॥५॥ वद्मा
सूनो सहसो नो विहाया अग्ने तोकं तनयं वाजिनो दाः । विश्वा-

भिर्गीर्भिर॒भि पू॒र्तिम॑श्यां॒ मदे॑म श॒तहि॑माः सु॒वीराः॑ ॥६॥१५॥

॥ १४ ॥ १–६ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ १–५ अनुष्टुप् । ६ शक्वरी ॥

॥१४॥ अ॒ग्ना यो मर्त्यो॒ दुवो॒ धियं॑ जु॒जोष॑ धी॒तिभिः॑ । भस॒न्नु

ष प्र पू॒र्व्य इषं॑ वुरी॒ताव॑से ॥१॥ अ॒ग्निरिद्धि प्रचे॑ता अ॒ग्निर्वे॒-

धस्त॑म॒ ऋषिः॑ । अ॒ग्निं होता॑रमीळते य॒ज्ञेषु॒ मनु॑षो॒ विशः॑

॥२॥ नाना॒ ह्य१॒॑ग्नेऽव॑से॒ स्पर्ध॑न्ते॒ रायो॑ अ॒र्यः । तूर्व॑न्तो॒ दस्यु॑मा-

यवो॑ व्र॒तैः सीक्ष॑न्तो अव्र॒तं ॥३॥ अ॒ग्निर॒प्सामृ॑ती॒षहं॑ वी॒रं द॑दाति॒

सत्प॑तिं । यस्य॒ त्रस॑न्ति॒ शव॑सः सं॒चक्षि॒ शत्र॑वो भि॒या ॥४॥ अ॒-

ग्निर्हि वि॒द्मना॑ नि॒दो दे॒वो मर्त॑मुरु॒ष्यति॑ । स॒हावा॒ यस्यावृ॑तो

र॒यिर्वाजे॒ष्ववृ॑तः ॥५॥ अच्छा॑ नो मित्रमहो देव दे॒वान॑ग्ने॒

वोचः॑ सुम॒तिं रोद॑स्योः । वी॒हि स्व॒स्तिं सु॑क्षि॒तिं दि॒वो नॄन्द्वि॒-

षो अंहां॑सि दुरि॒ता त॑रेम॒ ता त॑रेम॒ तवाव॑सा तरेम ॥६॥१६॥

॥ १५ ॥ १–१९ भरद्वाजो बार्हस्पत्यो वीतहव्यो वा ॥ अग्निः ॥ १, २, ४, ५, ७–९ जगती । ३, १५ शक्वरी । ६ अतिशक्वरी । १०–१४, १६, १९ त्रिष्टुप् । १७ अनुष्टुप् । १८ बृहती ॥

॥१५॥ इ॒मम् षु वो॒ अति॑थिमुष॒र्बुधं॒ विश्वा॑सां वि॒शां पति॑-

मृंजसे गि॒रा । वेतीद्दि॒वो ज॒नुषा॒ कच्चि॒दा शुचि॒र्ज्योक्चि॑दत्ति॒

गर्भो॒ यदच्यु॑तं ॥१॥ मि॒त्रं न यं सुधि॑तं॒ भृग॑वो द॒धुर्वन॒स्पता॒-

वीड्य॑मू॒र्ध्वशो॑चिषं । स त्वं सुप्री॑तो वी॒तह॑व्ये अद्भुत॒ प्रश॑स्ति-

भिर्महयसे दि॒वेदि॑वे ॥२॥ स त्वं दक्ष॑स्यावृ॒को वृ॒धो भू॑र॒र्यः

पर॒स्यान्त॑रस्य॒ तरु॑षः । रा॒यः सू॑नो सहसो॒ मर्त्ये॒ष्वा छ॒र्दिर्य॑च्छ

वी॒तह॑व्याय स॒प्रथो॑ भ॒रद्वा॑जाय स॒प्रथः॑ ॥३॥ द्यु॒तानं॑ वो॒

अति॑थिं॒ स्व॑र्णरम॒ग्निं होता॑रं॒ मनु॑षः स्वध्व॒रं । विप्रं॒ न द्यु॒-

क्षव॑चसं सुवृ॒क्तिभि॑र्हव्य॒वाह॑मर॒तिं दे॒वमृं॑जसे ॥४॥ पा॒व॒कया॒

यश्चितयंत्या कृपा क्षामन्नुरुच उषसो न भानुना । तूर्वन्न या-
मन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥५॥१७॥
अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणी-
षणि । उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं
देवो देवेषु वनते हि नो दुवः ॥६॥ समिद्धमग्निं समिधा गिरा
गृणे शुचिं पावकं पुरो अध्वरे ध्रुवं । विप्रं होतारं पुरुवारमद्रुहं
कविं सुम्नैरीमहे जातवेदसं ॥७॥ त्वां दूतमग्ने अमृतं युगेयुगे
हव्यवाहं दधिरे पायुमीड्यं । देवासश्च मर्तासश्च जागृविं विभुं
विश्पतिं नमसा नि षेदिरे ॥८॥ विभूषन्नग्न उभयाँ अनु व्रता
दूतो देवानां रजसी समीयसे । यत्ते धीतिं सुमतिमावृणी-
महेऽध स्मा नस्त्रिवरूथः शिवो भव ॥९॥ तं सुप्रतीकं सुदृशं
स्वंचमविद्वांसो विदुष्टरं सपेम । स यक्षद्विश्वा वयुनानि
विद्वान्प्र हव्यमग्निरमृतेषु वोचत् ॥१०॥१८॥ तमग्ने पास्युत तं
पिपर्षि यस्त आनट्कवये शूर धीतिं । यज्ञस्य वा निशितिं वो-
दितिं वा तमित्पृणक्षि शवसोत राया ॥११॥ त्वमग्ने वनुष्यतो
नि पाहि त्वमु नः सहसावन्नवद्यात् । सं त्वा ध्वस्मन्वदभ्येतु
पाथः सं रयिः स्पृहयाय्यः सहस्री ॥१२॥ अग्निर्होता गृहपतिः
स राजा विश्वा वेद जनिमा जातवेदाः । देवानामुत यो म-
र्त्यानां यजिष्ठः स प्र यजतामृतावा ॥१३॥ अग्ने यदद्य विशो
अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा । ऋता यजासि म-
हिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य ॥१४॥ अभि प्रयां-
सि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै । अवा
नो मघवन्वाजसातावग्ने विश्वानि दुरिता तरेम ता तरेम त-
वावसा तरेम ॥१५॥१९॥ अग्ने विश्वेभिः स्वनीक देवैरूर्णावंतं

प्रथमः सीद् योनिं। कुलायिनं घृतवंतं सवित्रे यज्ञं नय यजमा-
नाय साधु॥१६॥ इममु त्यमथर्ववदग्निं मंथंति वेधसः। यमंकूयं-
तमानयन्नमूरं श्याव्याभ्यः॥१७॥ जनिष्वा देववीतये सर्वताता
स्वस्तये। आ देवान्वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः॥१८॥
वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहंतं। अस्थूरि नो
गार्हपत्यानि संतु तिग्मेन नस्तेजसा सं शिशाधि॥१९॥२०॥१॥

॥ १६ ॥ १–४८ भरद्वाजो बार्हस्पत्यः ॥ अग्निः ॥ १. ६. वर्धमाना । २–५. ७–२६. २८–४५ गायत्री । ४६ त्रिष्टुप् । २७. ४७. ४८ अनुष्टुप् ॥

॥१६॥ त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने
॥१॥ स नो मंद्राभिरध्वरे जिह्वाभिर्यजा महः। आ देवान्वक्षि य-
क्षि च॥२॥ वेत्था हि वेधो अध्वनः पथश्च देवांजसा। अग्ने यज्ञेषु
सुक्रतो॥३॥ त्वामीळे अध द्विता भरतो वाजिभिः शुनं। ईजे
यज्ञेषु यज्ञियं॥४॥ त्वमिमा वार्या पुरु दिवोदासाय सुन्वते। भर-
द्वाजाय दाशुषे॥५॥२१॥ त्वं दूतो अमर्त्य आ वहा दैव्यं जनं। शृण्व-
न्विप्रस्य सुष्टुतिं॥६॥ त्वामग्ने स्वाध्यो३ मर्तासो देववीतये।
यज्ञेषु देवमीळते॥७॥ तव प्र यक्षि संदृशमुत क्रतुं सुदानवः।
विश्वे जुषंत कामिनः॥८॥ त्वं होता मनुर्हितो वह्निरासा विदु-
ष्टरः। अग्ने यक्षि दिवो विशः॥९॥ अग्न आ याहि वीतये गृणानो
हव्यदातये। नि होता सत्सि बर्हिषि॥१०॥२२॥ तं त्वा समिद्भि-
रंगिरो घृतेन वर्धयामसि। बृहच्छोचा यविष्ठ्य॥११॥ स नः पृथु
श्रवाय्यमच्छा देव विवाससि। बृहदग्ने सुवीर्यं॥१२॥ त्वामग्ने
पुष्करादध्यथर्वा निरमंथत। मूर्ध्नो विश्वस्य वाघतः॥१३॥
तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः। वृत्रहणं पुरंदरं॥१४॥
तमु त्वा पाथ्यो वृषा समीधे दस्युहंतमं। धनंजयं रणेरणे

॥ १५ ॥ २३ ॥ एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इंदुभिः ॥ १६ ॥ यत्र क्व च ते मनो दक्षं दधस उत्तरं । तत्रा सदः कृणवसे ॥ १७ ॥ नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो । अथा दुवो वनवसे ॥ १८ ॥ आग्निरगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः ॥ १९ ॥ स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना । वन्वन्नवातो अस्तृतः ॥ २० ॥ २४ ॥ स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता । बृहत्ततंथ भानुना ॥ २१ ॥ प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया । अर्च गाय च वेधसे ॥ २२ ॥ स हि यो मानुषा युगा सीदद्धोता कविक्रतुः । दूतश्च हव्यवाहनः ॥ २३ ॥ ता राजाना शुचिव्रतादित्यान्मारुतं गणं । वसो यक्षीह रोदसी ॥ २४ ॥ वस्वी ते अग्ने संदृष्टिरिषयते मर्त्याय । ऊर्जो नपादमृतस्य ॥ २५ ॥ २५ ॥ क्रत्वा दा अस्तु श्रेष्ठोऽद्य त्वा वन्वन्त्सुरेक्णाः । मर्त आनाश सुवृक्तिं ॥ २६ ॥ ते ते अग्ने त्वोता इषयंतो विश्वमायुः । तरंतो अर्यो अरातीर्वन्वंतो अर्यो अरातीः ॥ २७ ॥ अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्य१त्रिणं । अग्निर्नो वनते रयिं ॥ २८ ॥ सुवीरं रयिमा भर जातवेदो विचर्षणे । जहि रक्षांसि सुक्रतो ॥ २९ ॥ त्वं नः पाह्यंहसो जातवेदो अघायतः । रक्षा णो ब्रह्मणस्कवे ॥ ३० ॥ २६ ॥ यो नो अग्ने दुरेव आ मर्तो वधाय दाशति । तस्मान्नः पाह्यंहसः ॥ ३१ ॥ त्वं तं देव जिह्वया परि बाधस्व दुष्कृतं । मर्तो यो नो जिघांसति ॥ ३२ ॥ भरद्वाजाय सप्रथः शर्म यच्छ सहंत्य । अग्ने वरेण्यं वसु ॥ ३३ ॥ अग्निर्वृत्राणि जंघनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥ ३४ ॥ गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे । सीदन्नृतस्य योनिमा ॥ ३५ ॥ २७ ॥ ब्रह्म प्रजावदा भर जातवेदो

विचर्षणे। अग्ने यद्दीदयद्दिवि ॥३६॥ उप त्वा रण्वसंदृशं प्रयं-
स्वंतः सहस्कृत। अग्ने ससृज्महे गिरः ॥३७॥ उप छायामिव
घृणेरगन्म शर्म ते वयं। अग्ने हिरण्यऽसंदृशः ॥३८॥ य उग्र इव
शर्यहा तिग्मशृंगो न वंसगः। अग्ने पुरो रुरोजिथ ॥३९॥ आ
यं हस्ते न खादिनं शिशुं जातं न बिभ्रति। विशामग्निं स्वध्वरं
॥४०॥२८॥ प्र देवं देववीतये भरता वसुवित्तमं। आ स्वे योनौ
नि षीदतु ॥४१॥ आ जातं जातवेदसि प्रियं शिशीतातिथिं।
स्योन आ गृहपतिं ॥४२॥ अग्ने युक्ष्वा हि ये तवाश्वासो देव
साधवः। अरं वहंति मन्यवे ॥४३॥ अच्छा नो याह्या वहाभि प्र-
यांसि वीतये। आ देवान्त्सोमपीतये ॥४४॥ उदग्ने भारत द्युमदजं-
स्रेण दविद्युतत्। शोचा वि भाह्यजर ॥४५॥२९॥ वीती यो देवं
मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान्। होतारं सत्ययजं रो-
दस्योरुत्तानहस्तो नमसा विवासेत् ॥४६॥ आ ते अग्न ऋचा
हविर्हृदा तष्टं भरामसि। ते ते भवंतूक्षण ऋषभासो वशा उत
॥४७॥ अग्निं देवासो अग्रियमिंधते वृत्रहंतमं। येना वसून्या-
भृता तृळ्हा रक्षांसि वाजिना ॥ ४८ ॥ ३० ॥ ५ ॥

॥ १७ ॥ १–१५ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ १–१४ त्रिष्टुप्। १५ द्विपदा ॥

॥१७॥ पिबा सोममभि यमुग्र तर्द ऊर्वं गव्यं महि गृणान
इंद्र। वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रममित्रिया श-
वोभिः ॥१॥ स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो
यो मतीनां। यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इंद्र चित्राँ अभि
तृंधि वाजान् ॥२॥ एवा पाहि प्रत्नथा मंदतु त्वा श्रुधि ब्रह्म
वावृधस्वोत गीर्भिः। आविः सूर्यं कृणुहि पीपिहीषो जहि श-
त्रूँरभि गा इंद्र तृंधि ॥३॥ ते त्वा मदा बृहदिंद्र स्वधाव इमे

पीता उक्षयंत द्युमंतं । महामनूनं तवसं विभूतिं मत्सरासो
जर्हृषंत प्रसाहं ॥४॥ येभिः सूर्यमुषसं मंदसानोऽवासयोऽप द्द-
ळ्हानि दर्द्रत् । महामद्रिं परि गा इंद्र संतं नुत्था अच्युतं सदसः
परि स्वात् ॥५॥१॥ तव क्रत्वा तव तद्दंसनाभिरामासु पक्वं शच्या
नि दीधः । और्णोर्दुर उस्रियाभ्यो वि दृळ्होदूर्वाद्गा असृजो
अंगिरस्वान् ॥६॥ पप्राथ क्षां महि दंसो व्यु१र्वीमुप द्यामृष्वो
बृहदिंद्र स्तभायः । अधारयो रोदसी देवपुत्रे प्रत्ने मातरा य-
ह्वी ऋतस्य ॥७॥ अध त्वा विश्वे पुर इंद्र देवा एकं तवसं दधिरे
भराय । अदेवो यदभ्यौहिष्ट देवान्त्स्वर्षाता वृणत इंद्रमत्र
॥८॥ अध द्यौश्चित्ते अप सा नु वज्राद्द्वितानमद्भियसा स्वस्य
मन्योः । अहिं यदिंद्रो अभ्योहसानं नि चिद्विश्वायुः शयथे
जघान ॥९॥ अध त्वष्टा ते मह उग्र वज्रं सहस्रभृष्टिं ववृत-
च्छताश्रिं । निकाममरमणसं येन नवंतमहिं सं पिणगृजी-
षिन् ॥१०॥२॥ वर्धान्यं विश्वे मरुतः सजोषाः पचच्छतं महिषाँ
इंद्र तुभ्यं । पूषा विष्णुस्त्रीणि सरांसि धावन्वृत्रहणं मदिरमं-
शुमस्मै ॥११॥ आ क्षोदो महि वृतं नदीनां परिष्ठितमसृज ऊ-
र्मिमपां । तासामनु प्रवत इंद्र पंथां प्रार्दयो नीचीरपसः समुद्रं
॥१२॥ एवा ता विश्वा चकृवांसमिंद्रं महामुग्रमजुर्यं सहोदां ।
सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात् ॥१३॥
स नो वाजाय श्रवस इषे च राये धेहि द्युमत इंद्र विप्रान् ।
भरद्वाजे नृवत इंद्र सूरीन्दिवि च स्मैधि पार्ये न इंद्र ॥१४॥ अ-
या वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥१५॥३॥

॥ १८ ॥ १-१५ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१८॥ तमु ष्टुहि यो अभिभूत्योजा वन्वन्नवातः पुरु-

हूत इंद्रः । अषाळ्हमुग्रं सहमानमाभिर्गीर्भिर्वर्ध वृषभं चर्षणीनां ॥१॥ स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी । बृहद्रेणुश्च्यवनो मानुषीणामेकः कृष्टीनामभवत्सहावा ॥२॥ त्वं ह नु त्यददमायो दस्यूँरेकः कृष्टीरवनोरार्याय । अस्ति स्विन्नु वीर्यं१ तत्त इंद्र न स्विदस्ति तदृतुथा वि वोचः ॥३॥ सदिद्धि ते तुविजातस्य मन्ये सहः सहिष्ठ तुरतस्तुरस्य । उग्रमुग्रस्य तवसस्तवीयोऽरध्रस्य रध्रतुरो बभूव ॥४॥ तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमंगिरोभिः । हन्नच्युतच्युद्दस्मेषयंतमृणोः पुरो वि दुरो अस्य विश्वाः ॥५॥४॥ स हि धीभिर्हव्यो अस्त्युग्र ईशानकृन्महति वृत्रतूर्ये । स तोकसाता तनये स वज्री वितंतसाय्यो अभवत्समत्सु ॥६॥ स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे । स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः ॥७॥ स यो न मुहे न मिथू जनो भूत्सुमंतुनामा चुमुरिं धुनिं च । वृणक्पिप्रुं शंबरं शुष्णमिंद्रः पुरां च्यौत्नाय शयथाय नू चित् ॥८॥ उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिंद्र तिष्ठ । धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मंद पुरुदत्र मायाः ॥९॥ अग्निर्न शुष्कं वनमिंद्र हेती रक्षो नि धक्ष्यशनिर्न भीमा । गंभीरय ऋष्वया यो रुरोजाध्वानयद्दुरिता दंभयच्च ॥१०॥५॥ आ सहस्रं पथिभिरिंद्र राया तुविद्युम्न तुविवाजेभिरर्वाक् । याहि सूनो सहसो यस्य नू चिददेव ईशे पुरुहूत योतोः ॥११॥ प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो ररप्शे महिमा पृथिव्याः । नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः ॥१२॥ प्र तत्ते अद्या करणं कृतं

भूत्कुत्सं यदायुमतिथिग्वमस्मै । पुरू सहस्रा नि शिशा अभि क्षामुत्तूर्वयाणं धृषता निनेथ ॥ १३ ॥ अनु त्वाहिघ्ने अध देव देवा मदन्विश्वे कवितमं कवीनां । करो यत्र वरिवो बाधिताय दिवे जनाय तन्वे गृणानः ॥ १४ ॥ अनु द्यावापृथिवी तत्त ओजोऽमर्त्या जिहत इंद्र देवाः । कृष्वा कृत्नो अकृतं यत्ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः ॥ १५ ॥ ६ ॥

॥ १९ ॥ १–१३ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ १९ ॥ महाँ इंद्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः । अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥ १ ॥ इंद्रमेव धिषणा सातये धाद्बृहंतमृष्वमजरं युवानं । अषाळ्हेन शवसा शूशुवांसं सद्यश्चिद्यो वावृधे असामि ॥२॥ पृथू करस्ना बहुला गभस्ती अस्मद्र्य१क्सं मिमीहि श्रवांसि । यूथेव पश्वः पशुपा दमूना अस्माँ इंद्राभ्या ववृत्स्वाजौ ॥३॥ तं व इंद्रं चतिनमस्य शाकैरिह नूनं वाजयंतो हुवेम । यथा चित्पूर्वे जरितार आसुरनेद्या अनवद्या अरिष्टाः ॥४॥ धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः । सं जग्मिरे पथ्या३ रायो अस्मिन्त्समुद्रे न सिंधवो यादमानाः ॥५॥७॥ शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रं । विश्वा द्युम्ना वृष्ण्या मानुषाणामस्मभ्यं दा हरिवो मादयध्यै ॥ ६ ॥ यस्ते मदः पृतनाषाळमृध्र इंद्र तं न आ भर शूशुवांसं । येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः ॥७॥ आ नो भर वृषणं शुष्ममिंद्र धनस्पृतं शूशुवांसं सुदक्षं । येन वंसाम पृतनासु शत्रून्तवोतिभिरुत जामीँरजामीन् ॥ ८ ॥ आ ते शुष्मो वृषभ एतु पश्चादोत्तरादध-

रादा पुरस्तात् । आ विश्वतो अभि समेत्वर्वाङिंद्र द्युम्नं स्व-
र्वद्धेह्यस्मे ॥९॥ नृवत्त इंद्र नृतमाभिरूती वंसीमहि वामं
श्रोमतेभिः । ईक्षे हि वस्व उभयस्य राजन्धा रत्नं महि स्थूरं
बृहंतं ॥१०॥ मरुत्वंतं वृषभं वावृधानमकवारिं दिव्यं शास-
मिंद्रं । विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम
॥११॥ जनं वज्रिन्महि चिन्मन्यमानमेभ्यो नृभ्यो रंधया ये-
ष्वस्मि । अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये
गोष्वप्सु ॥१२॥ वयं त एभिः पुरुहूत सख्यैः शत्रोःशत्रोरुत्तर
इत्स्याम । घ्नंतो वृत्राण्युभयानि शूर राया मदेम बृहता त्वो-
ताः ॥१३॥८॥

॥२०॥ १–१३ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ १–६. ८–१३ त्रिष्टुप् । ७ विराट् ॥

॥२०॥ द्यौर्न य इंद्राभि भूमार्यस्तस्थौ रयिः शवसा पृत्सु
जनान् । तं नः सहस्रभरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरं
॥१॥ दिवो न तुभ्यमन्विंद्र सत्रासुर्यं देवेभिर्धायि विश्वं । अहिं
यद्वृत्रमपो वव्रिवांसं हन्नृजीषिन्विष्णुना सचानः ॥२॥
तूर्वन्नोजीयान्तवसस्तवीयान्कृतब्रह्मेंद्रो वृद्धमहाः । राजाभव-
न्मधुनः सोम्यस्य विश्वासां यत्पुरां दर्त्नुमावत् ॥३॥
शतैरपद्रन्पणय इंद्रात्र दशोणये कवयेऽर्कसातौ । वधैः शुष्ण-
स्याशुषस्य मायाः पित्वो नारिरेचीत्किं चन प्र ॥४॥ महो
द्रुहो अप विश्वायु धायि वज्रस्य यत्पतने पादि शुष्णः । उरु
ष सरथं सारथये करिंद्रः कुत्साय सूर्यस्य सातौ ॥५॥९॥
प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन् ।
प्रावन्नमीं साप्यं ससंतं पृणग्राया समिषा सं स्वस्ति ॥६॥
वि पिप्रोरहिमायस्य दृळ्हाः पुरो वज्रिञ्छवसा न दर्दः ।

सुदामन्तद्रेक्णो अप्रमृष्यमृजिश्वने दात्रं दाशुषे दाः ॥७॥ स
वेतसुं दशमायं दशोणिं तूतुजिमिंद्रः स्वभिष्टिसुम्नः । आ तुग्रं
शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै ॥८॥ स ईं स्पृ-
धो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ । तिष्ठद्धरी अ-
ध्यस्तेव गर्ते वचोयुजा वहत इंद्रमृष्वं ॥९॥ सनेम तेऽवसा
नव्य इंद्र प्र पूरवः स्तवंत एना यज्ञैः । सप्त यत्पुरः शर्म शारदी-
र्दर्द्धन्दासीः पुरुकुत्साय शिक्षन् ॥१०॥ त्वं वृध इंद्र पूर्व्यो भूर्वरिव-
स्यन्नुशने काव्याय । परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं
नपातं ॥११॥ त्वं धुनिरिंद्र धुनिमतीर्ऋणोरपः सीरा न स्रवंतीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥१२॥ तव
ह त्यदिंद्र विश्वमाजौ सस्तो धुनीचुमुरी या ह सिष्वप् । दीदय-
दित्तुभ्यं सोमेभिः सुन्वन्दभीतिरिध्मभृतिः पक्थ्य१र्कैः ॥१३॥१०॥

॥ २१ ॥ १-१२ भरद्वाजो बार्हस्पत्यः ॥ १-८. १०. १२ इंद्रः । ९. ११ विश्वे देवाः ॥
त्रिष्टुप् ॥

॥२१॥ इमा उं त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवंते ।
धियो रथेष्ठामजरं नवीयो रयिर्विभूतिरीयते वचस्या ॥१॥
तमु स्तुष इंद्रं यो विदानो गिर्वाहसं गीर्भिर्यज्ञवृद्धं । यस्य दि-
वमति मह्ना पृथिव्याः पुरुमायस्य रिरिचे महित्वं ॥२॥ स इत्त-
मोऽवयुनं ततन्वत्सूर्येण वयुनवच्चकार । कदा ते मर्ता अमृ-
तस्य धामेयक्षंतो न मिनंति स्वधावः ॥३॥ यस्ता चकार स कुह
स्विदिंद्रः कमा जनं चरति कासु विक्षु । कस्ते यज्ञो मनसे शं
वराय को अर्क इंद्र कतमः स होता ॥४॥ इदा हि ते वेविषतः
पुराजाः प्रत्नास आसुः पुरुकृत्सखायः । ये मध्यमास उत नूत-
नास उतावमस्य पुरुहूत बोधि ॥५॥११॥ तं पृच्छंतोऽवरासः

पराणि प्रत्ना तं इंद्र श्रुत्यानु येमुः। अचीमसि वीर ब्रह्मवाहो यादेव विद्म तात्त्वा महांतं ॥६॥ अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु तिष्ठ। तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो अप ता नुदस्व ॥७॥ स तु श्रुधीद्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः। त्वं ह्या३पिः प्रदिवि पितॄणां शश्वद्बभूथ सुहव एष्टौ ॥८॥ प्रोतये वरुणं मित्रमिंद्रं मरुतः कृष्वावसे नो अद्य। प्र पूषणं विष्णुमग्निं पुरंधिं सवितारमोषधीः पर्वतांश्च ॥९॥ इम उ त्वा पुरुशाक प्रयज्यो जरितारो अभ्यर्चंत्यर्कैः। श्रुधी हवमा हुवतो हुवानो न त्वावाँ अन्यो अमृत त्वदस्ति ॥१०॥ नु म आ वाचमुप याहि विद्वान्विश्वेभिः सूनो सहसो यजत्रैः। ये अग्निजिह्वा ऋतसाप आसुर्ये मनुं चक्रुरुपरं दसाय ॥११॥ स नो बोधि पुरएता सुगेषूत दुर्गेषु पथिकृद्विदानः। ये अश्रमास उरवो वहिष्ठास्तेभिर्न इंद्राभि वक्षि वाजं ॥१२॥१२॥

॥ २२ ॥ १-११ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२२॥ य एक इद्धव्यश्चर्षणीनामिंद्रं तं गीर्भिरभ्यर्च आभिः। यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान् ॥१॥ तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयंतः। नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठं ॥२॥ तमीमह इंद्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः। यो अस्कृधोयुरजरः स्वर्वान्तमा भर हरिवो मादयध्यै ॥३॥ तन्नो वि वोचो यदि ते पुरा चिज्जरितार आनशुः सुम्नमिंद्र। कस्ते भागः किं वयो दुध्र खिद्वः पुरुहूत पुरूवसोऽसुरघ्नः ॥४॥ तं पृच्छंती वज्रहस्तं रथेष्ठामिंद्रं वेपी वक्वरी यस्य नू

गीः । तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ
॥५॥१३॥ अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः
पर्वतेन । अच्युता चिद्वीळिता स्वोजो रुजो वि दृळ्हा धृषता
विरप्शिन् ॥ ६ ॥ तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नव-
त्परितंसयध्यै । स नो वक्षदनिमानः सुवह्मेंद्रो विश्वान्यति
दुर्गहाणि ॥ ७ ॥ आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दी-
पयोऽन्तरिक्षा । तपा वृषन्विश्वतः शोचिषा तान्ब्रह्मद्विषे
शोचय क्षामपश्च ॥ ८ ॥ भुवो जनस्य दिव्यस्य राजा पार्थिवस्य
जगतस्त्वेषसंदृक् । धिष्व वज्रं दक्षिण इंद्र हस्ते विश्वा अजुर्य
दयसे वि मायाः ॥ ९ ॥ आ संयतमिंद्र णः स्वस्तिं शत्रुतूर्याय
बृहतीममृध्राम् । यया दासान्यार्याणि वृत्रा करो वज्रिन्सुतुका
नाहुषाणि ॥ १० ॥ स नो नियुद्भिः पुरुहूत वेधो विश्ववारा-
भिरा गहि प्रयज्यो । न या अदेवो वरते न देव आभिर्याहि
तूयमा मद्र्यद्रिक् ॥ ११ ॥ १४ ॥

॥ २३ ॥ १-१० भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२३॥ सुत इत्त्वं निमिश्ल इंद्र सोमे स्तोमे ब्रह्मणि शस्य-
मान उक्थे । यद्वा युक्ताभ्यां मघवन्हरिभ्यां बिभ्रद्वज्रं बाह्वो-
रिंद्र यासि ॥ १ ॥ यद्वा दिवि पार्ये सुष्विमिंद्र वृत्रहत्येऽवसि
शूरसातौ । यद्वा दक्षस्य बिभ्युषो अबिभ्यदरंधयः शर्धत इंद्र
दस्यून् ॥ २ ॥ पाता सुतमिंद्रो अस्तु सोमं प्रणेनीरुग्रो जरिता-
रमूती । कर्ता वीराय सुष्वय उ लोकं दाता वसु स्तुवते कीरये
चित् ॥ ३ ॥ गंतेयांति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं द-
दिर्गाः । कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः
॥ ४ ॥ अस्मै वयं यद्वावान तद्विविष्म इंद्राय यो नः प्रदिवो अप-

स्कः। सुते सोमे स्तुमसि शंसदुक्थेंद्राय ब्रह्म वर्धनं यथासत्
॥५॥१५॥ ब्रह्माणि हि चकृषे वर्धनानि तावत्त इंद्र मतिभि-
र्विविष्मः। सुते सोमे सुतपाः शंतमानि रांड्या क्रियास्म
वक्षणानि यज्ञैः ॥ ६ ॥ स नो बोधि पुरोळाशं रराणः पिबा
तु सोमं गोऋजीकमिंद्र। एदं बर्हिर्यजमानस्य सीदोरुं कृधि
त्वायत उ लोकं ॥ ७ ॥ स मंदस्वा ह्यनु जोषमुग्र प्र त्वा य-
ज्ञास इमे अश्नुवंतु। प्रेमे हवासः पुरुहूतमस्मे आ त्वेयं धीर-
वस इंद्र यम्याः ॥ ८ ॥ तं वः सखायः सं यथा सुतेषु सोमे-
भिरीं पृणता भोजमिंद्रं। कुवित्तस्मा असति नो भराय न
सुष्विमिंद्रोऽवसे मृधाति ॥ ९॥ एवेदिंद्रः सुते अस्तावि सोमे
भरद्वाजेषु क्षयदिन्मघोनः। असद्यथा जरित्र उत सूरिरिंद्रो
रायो विश्ववारस्य दाता ॥ १० ॥ १६ ॥ २ ॥

॥ २४ ॥ १–१० भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ २४ ॥ वृषा मद इंद्रे श्लोक उक्था सचा सोमेषु सुतपा
ऋजीषी। अर्चत्र्यो मघवा नृभ्य उक्थैर्द्युक्षो राजा गिराम-
क्षितोतिः ॥ १ ॥ ततुरिर्वीरो नर्यो विचेताः श्रोता हवं गृ-
णत उर्व्यूतिः। वसुः शंसो नरां कारुधाया वाजी स्तुतो
विदथे दाति वाजं ॥२॥ अक्षो न चक्र्योः शूर बृहन्प्र ते मह्ना
रिरिचे रोदस्योः। वृक्षस्य नु ते पुरुहूत वया व्यूतयो रुरुहु-
रिंद्र पूर्वीः ॥३॥ शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः
संचरणीः। वत्सानां न तंतयस्त इंद्र दामन्वंतो अदामानः
सुदामन् ॥४॥ अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रि-
रिंद्रः। मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति
॥ ५ ॥ १७ ॥ वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिंद्रानयंत

यज्ञैः । तं त्वाभिः सुष्टुतिभिर्वाजयंत आजिं न जग्मुर्गिर्वाहो अश्वाः ॥६॥ न यं जरंति शरदो न मासा न द्याव इंद्रमवकर्शयंति। वृद्धस्य चिद्वर्धतामस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना ॥७॥ न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् । अज्रा इंद्रस्य गिरयश्चिदृष्वा गंभीरे चिद्भवति गाधमस्मै ॥८॥ गंभीरेण न उरुणामत्रिन्प्रेषो यंधि सुतपावन्वाजान् । स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायां ॥९॥ सचस्व नायमवसे अभीक इतो वा तमिंद्र पाहि रिषः । अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः ॥१०॥१८॥

॥ २५ ॥ १–९ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२५॥ या त ऊतिरवमा या परमा या मध्यमेंद्र शुष्मिन्नस्ति । ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान्न उग्र ॥१॥ आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिंद्र । आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽव तारीर्दासीः ॥२॥ इंद्र जामय उत येऽजामयोऽर्वाचीनासो वनुषो युयुज्रे। त्वमेषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही परांचः ॥३॥ शूरो वा शूरं वनते शरीरैस्तनूरुचा तरुषि यत्कृण्वैते । तोके वा गोषु तनये यदप्सु वि क्रंदसी उर्वरासु ब्रवैते ॥४॥ नहि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध । इंद्र नकिष्ट्वा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि ॥५॥१९॥ स पत्यत उभयोर्नृम्णमयोर्यदी वेधसः समिथे हवंते। वृत्रे वा महो नृवति क्षये वा व्यचस्वंता यदि वितंतसैते ॥६॥ अध स्मा ते चर्षणयो यदेजानिंद्र त्रातोत भवा वरूता।

अस्माकासो ये नृतमासो अर्य इंद्र सूरयो दधिरे पुरो नः ॥७॥
अनु ते दायि मह इंद्रियाय सत्रा ते विश्वमनु वृत्रहत्ये । अनु
क्षत्रमनु सहो यजत्रेंद्र देवेभिरनु ते नृषह्ये ॥८॥ एवा नः स्पृधः
समजा समत्स्विंद्र रारंधि मिथतीरदेवीः । विद्याम वस्तोरवसा
गृणंतो भरद्वाजा उत त इंद्र नूनं ॥ ९ ॥ २० ॥

॥ २६ ॥ १–८ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२६॥ श्रुधी न इंद्र ह्वयामसि त्वा महो वाजस्य सातौ वावृ-
षाणाः । सं यद्विशोऽयंत शूरसाता उग्रं नोऽवः पार्ये अहन्दाः ॥१॥
त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ । त्वां
वृत्रेष्विंद्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन् ॥२॥ त्वं कविं
चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् । त्वं शिरो अमर्म-
णः पराहन्नतिथिग्वाय शंस्यं करिष्यन् ॥३॥ त्वं रथं प्र भरो योध-
मृष्वमावो युध्यंतं वृषभं दशद्युं । त्वं तुग्रं वेतसवे सचाहन्त्वं तुजिं
गृणंतमिंद्र तूतोः ॥४॥ त्वं तदुक्थमिंद्र बर्हणा कः प्र यच्छता
सहस्रा शूर दर्षि । अव गिरेर्दासं शंबरं हन्प्रावो दिवोदासं चि-
त्राभिरूती ॥ ५ ॥ २१ ॥ त्वं श्रद्धाभिर्मंदसानः सोमैर्दभीतये चुमु-
रिमिंद्र सिष्वप । त्वं रजिं पिठीनसे दशस्यन्षष्टिं सहस्रा शच्या
सचाहन् ॥६॥ अहं चन तत्सूरिभिरानश्यां तव ज्याय इंद्र सुम्नमो-
जः । त्वया यत्स्तवंते सधवीर वीरास्त्रिवरूथेन नहुषा शविष्ठ ॥७॥
वयं ते अस्यामिंद्र द्युम्नहूतौ सखायः स्याम महिन प्रेष्ठाः । प्रातं-
र्दनिः क्षत्रश्रीरस्तु श्रेष्ठो घने वृत्राणां सनये धनानां ॥८॥२२॥

॥ २७ ॥ १–८ भरद्वाजो बार्हस्पत्यः ॥ १–७ इंद्रः । ८ अभ्यावर्तिनश्चायमानस्य
दानस्तुतिः ॥ त्रिष्टुप् ॥

॥२७॥ किमस्य मदे किम्वस्य पीताविंद्रः किमस्य सख्ये

चकार। रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किमु नू-
तनासः ॥१॥ सदस्य मदे सद्वस्य पीताविंद्रः सदस्य सख्ये चकार।
रणा वा ये निषदि सत्ते अस्य पुरा विविद्रे सदु नूतनासः ॥२॥
नहि नु ते महिमनः समस्य न मघवन्मघवत्त्वस्य विद्म। न
राधसोराधसो नूतनस्येंद्र नकिर्ददृश इंद्रियं ते ॥३॥ एतत्त्यत्त
इंद्रियमचेति येनावधीर्वरशिखस्य शेषः। वज्रस्य यत्ते निहतस्य
शुष्मात्स्वनाच्चिदिंद्र परमो ददार ॥४॥ वधीदिंद्रो वरशिखस्य
शेषोऽभ्यावर्तिने चायमानाय शिक्षन्। वृचीवंतो यद्धरि-
यूपीयायां हन्पूर्वे अर्धे भियसापरो दर्त् ॥५॥२३॥ त्रिंशच्छतं
वर्मिण इंद्र साकं यव्यावत्यां पुरुहूत श्रवस्या। वृचीवंतः शरवे
पत्यमानाः पात्रा भिंदाना न्यर्थान्यायन् ॥६॥ यस्य गावाव-
रुषा सूयवस्यू अंतरू षु चरतो रेरिहाणा। स सृंजयाय तुर्वशं
परादाद्वृचीवंतो दैववाताय शिक्षन् ॥७॥ द्वयाँ अग्ने रथिनो
विंशतिं गा वधूमंतो मघवा मह्यं सम्राट्। अभ्यावर्ती चाय-
मानो ददाति दूणाशेयं दक्षिणा पार्थवानां ॥८॥२४॥

॥ २८ ॥ १–८ भरद्वाजो बार्हस्पत्यः ॥ १. ३–८[२] गावः । २. ८[४] गाव इंद्रो वा ॥
१. ५–७ त्रिष्टुप् । २–४ जगती । ८ अनुष्टुप् ॥

॥२८॥ आ गावो अग्मन्नुत भद्रमक्रन्त्सीदंतु गोष्ठे रणयं-
त्वस्मे। प्रजावतीः पुरुरूपा इह स्युरिंद्राय पूर्वीरुषसो दुहा-
नाः ॥१॥ इंद्रो यज्वने पृणते च शिक्षत्युपेद्ददाति न स्वं
मुषायति। भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि
दधाति देवयुं ॥२॥ न ता नशंति न दभाति तस्करो नासामा-
मित्रो व्यथिरा दधर्षति। देवांश्च याभिर्यजते ददाति च ज्यो-
गित्ताभिः सचते गोपतिः सह ॥३॥ न ता अर्वा रेणुककाटो

अश्नुते न संस्कृतत्रमुप यंति ता अभि । उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरंति यज्वनः ॥४॥ गावो भगो गाव इंद्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः । इमा या गावः स जनास इंद्र इच्छामीद्धृदा मनसा चिदिंद्रं ॥५॥ यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकं । भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ॥६॥ प्रजावतीः सूयवसं रिशंतीः शुद्धा अपः सुप्रपाणे पिबंतीः । मा वः स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः ॥७॥ उपेदमुपपर्चनमासु गोषूप पृच्यतां । उप ऋषभस्य रेतस्युपेंद्र तव वीर्ये ॥८॥२५॥६॥

॥२९॥ १–६ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२९॥ इंद्रं वो नरः सख्याय सेपुर्महो यंतः सुमतये चकानाः । महो हि दाता वज्रहस्तो अस्ति महामु रण्वमवसे यजध्वं ॥१॥ आ यस्मिन्हस्ते नर्या मिमिक्षुरा रथे हिरण्यये रथेष्ठाः । आ रश्मयो गभस्त्योः स्थूरयोराध्वन्नश्वासो वृषणो युजानाः ॥२॥ श्रिये ते पादा दुव आ मिमिक्षुर्धृष्णुर्वज्री शवसा दक्षिणावान् । वसानो अत्कं सुरभिं दृशे कं स्व१र्ण नृतविषिरो बभूथ ॥३॥ स सोम आमिश्लतमः सुतो भूद्यस्मिन्पक्तिः पच्यते संति धानाः । इंद्रं नरः स्तुवंतो ब्रह्मकारा उक्था शंसंतो देववाततमाः ॥४॥ न ते अंतः शवसो धाय्यस्य वि तु बाबधे रोदसी महित्वा । आ ता सूरिः पृणति तूतुजानो यूथेवाप्सु समीजमान ऊती ॥५॥ एवेदिंद्रः सुहव ऋष्वो अस्तूती अनूती हिरिशिप्रः सत्वा । एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून् ॥६॥१॥

॥ ३० ॥ १–५ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३०॥ भूय इद्वावृधे वीर्यायँ एको अजुर्यो दयते वसूनि । प्र रि-
रिचे दिव इंद्रः पृथिव्या अर्धमिदस्य प्रति रोदसी उभे ॥१॥ अधा
मन्ये बृहदसुर्यमस्य यानि दाधार नकिरा मिनाति । दिवेदिवे
सूर्यो दर्शतो भूद्वि सद्मान्युर्विया सुक्रतुर्धात् ॥२॥ अद्या चिन्नू
चित्तदपो नदीनां यदाभ्यो अरदो गातुमिंद्र । नि पर्वता
अद्मसदो न सेदुस्त्वया दृळ्हानि सुक्रतो रजांसि ॥ ३ ॥ सत्य-
मित्तन्न त्वावाँ अन्यो अस्तींद्र देवो न मर्त्यो ज्यायान् । अहन्न-
हिं परिशयानमर्णोऽवासृजो अपो अच्छा समुद्रं ॥४॥ त्वमपो
वि दुरो विषूचीरिंद्र दृळ्हमरुजः पर्वतस्य । राजाभवो जगत-
श्चर्षणीनां साकं सूर्यं जनयन्द्यामुषासं ॥ ५ ॥ २ ॥

॥ ३१ ॥ १–५ सुहोत्रः ॥ इंद्रः ॥ १–३. ५ त्रिष्टुप् । ४ शक्वरी ॥

॥३१॥ अभूरेको रयिपते रयीणामा हस्तयोरधिथा इंद्र कृ-
ष्टीः । वि तोके अप्सु तनये च सूरेऽवोचंत चर्षणयो विवाचः ॥१॥
त्वद्भियेंद्र पार्थिवानि विश्वाच्युता चिच्च्यावयंते रजांसि । द्या-
वाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते ॥२॥
त्वं कुत्सेनाभि शुष्णमिंद्राशुषं युध्य कुयवं गविष्टौ । दश प्रपित्वे
अध सूर्यस्य मुषायश्चक्रमविवे रपांसि ॥३॥ त्वं शतान्यव शंब-
रस्य पुरो जघंथाप्रतीनि दस्योः । अशिक्षो यत्र शच्या शचीवो
दिवोदासाय सुन्वते सुतक्रे भरद्वाजाय गृणते वसूनि ॥४॥ स
सत्यसत्वन्महते रणाय रथमा तिष्ठ तुविनृम्ण भीमं । याहि प्र-
पथिन्नवसोप मद्रिक्प्र च श्रुत श्रावय चर्षणिभ्यः ॥ ५ ॥ ३ ॥

॥ ३२ ॥ १–५ सुहोत्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ३२ ॥ अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।

विरप्शिने वज्रिणे शंतमानि वचांस्यासा स्थविराय तक्षं
॥१॥ स मातरा सूर्येणा कवीनामवासयद्रुजदद्रिं गृणानः ।
स्वाधीभिर्ऋक्वभिर्वावशान उदुस्रियाणामसृजन्निदानं ॥२॥
स वह्निभिर्ऋक्वभिर्गोषु शश्वन्मितज्ञुभिः पुरुकृत्वा जिगाय ।
पुरः पुरोहा सखिभिः सखीयन्दृळ्हा रुरोज कविभिः कविः
सन् ॥३॥ स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च
शुष्मैः । पुरुवीराभिर्वृषभ क्षितीनामा गिर्वणः सुविताय प्र
याहि ॥४॥ स सर्गेण शवसा तक्तो अत्यैरप इंद्रो दक्षिणत-
स्तुराषाट् । इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषु-
रप्रमृष्यं ॥५॥४॥

॥ ३३ ॥ १-५ शुनहोत्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३३॥ य ओजिष्ठ इंद्र तं सु नो दा मदो वृषन्त्स्वभि-
ष्टिर्दास्वान् । सौवश्व्यं यो वनवत्स्वश्वो वृत्रा समत्सु सास-
हदमित्रान् ॥१॥ त्वां हीं३द्रावसे विवाचो हवंते चर्षणयः
शूरसातौ । त्वं विप्रेभिर्वि पणीँरशायस्त्वोत इत्सनिता वाज-
मर्वा ॥२॥ त्वं ताँ इंद्रोभयाँ अमित्रान्दासा वृत्राण्यार्या च
शूर । वधीर्वनेव सुधितेभिरत्कैरा पृत्सु दर्षि नृणां नृतम ॥३॥
स त्वं न इंद्राकवाभिरूती सखा विश्वायुरविता वृधे भूः ।
स्वर्षाता यद्ध्वयामसि त्वा युध्यंतो नेमधिता पृत्सु शूर ॥४॥
नूनं न इंद्रापराय च स्या भवा मृळीक उत नो अभिष्टौ ।
इत्था गृणंतो महिनस्य शर्मन्दिवि ष्याम पार्ये गोषतमाः
॥५॥५॥

॥ ३४ ॥ १-५ शुनहोत्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३४॥ सं च त्वे जग्मुर्गिर इंद्र पूर्वीर्वि च त्वद्यंति विभ्वो

मनीषाः । पुरा नूनं च स्तुतय ऋषीणां पस्पृध्र इंद्रे अध्युक्था॒र्का ॥१॥ पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः । रथो न महे शवसे युजानो३ऽस्माभिरिंद्रो अनुमाद्यो भूत् ॥२॥ न यं हिंसंति धीतयो न वाणीरिंद्रं नक्षंतीदभि वर्धयंतीः । यदि स्तोतारः शतं यत्सहस्रं गृणंति गिर्वणसं शं तदस्मै ॥३॥ अस्मा एतद्दिव्य१र्चेव मासा मिमिक्ष इंद्रे न्ययामि सोमः । जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः ॥४॥ अस्मा एतन्मह्यांगूषमस्मा इंद्राय स्तोत्रं मतिभिरवाचि । असद्यथा महति वृत्रतूर्य इंद्रो विश्वायुरविता वृधश्च ॥५॥६॥

॥३५॥ १-५ नरः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३५॥ कदा भुवन्रथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः । कदा स्तोमं वासयोऽस्य राया कदा धियः करसि वाजरत्नाः ॥१॥ कर्हि स्वित्तदिंद्र यन्नृभिर्नॄन्वीरैर्वीरान्नीळयासे जयाजीन् । त्रिधातु गा अधि जयासि गोष्विंद्र द्युम्नं स्वर्वद्धेह्यस्मे ॥२॥ कर्हि स्वित्तदिंद्र यज्जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ । कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः ॥३॥ स गोमघा जरित्रे अश्वश्चंद्रा वाजश्रवसो अधि धेहि पृक्षः । पीपिहीषः सुदुघामिंद्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः ॥४॥ तमा नूनं वृजनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे । मा निररं शुक्रदुघस्य धेनोरांगिरसान्ब्रह्मणा विप्र जिन्व ॥५॥७॥

॥३६॥ १-५ नरः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३६॥ सत्रा मदासस्तव विश्वजन्याः सत्रा रायोऽध ये पा-

थिंवासः। सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा
असुर्यं॥१॥ अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वी-
र्याय। स्यूमगृभे दुधयेऽर्वते च क्रतुं वृंजंत्यपि वृत्रहत्ये॥२॥ तं
सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुरिंद्रं। समुद्रं
न सिंधव उक्थशुष्मा उरुव्यचसं गिर आ विशंति॥३॥ स रा-
यस्खामुप सृजा गृणानः पुरुश्चंद्रस्य त्वमिंद्र वस्वः। पतिर्बभूथा-
समो जनानामेको विश्वस्य भुवनस्य राजा॥४॥ स तु श्रुधि
श्रुत्या यो दुवोयुर्द्यौर्न भूमाभि रायो अर्यः। असो यथा नः
शवसा चकानो युगेयुगे वयसा चेकितानः॥५॥८॥

॥३७॥ १-५ भरद्वाजो बार्हस्पत्यः॥ इंद्रः॥ त्रिष्टुप्॥

॥३७॥ अर्वाग्रथं विश्ववारं त उग्रेंद्र युक्तासो हरयो वहंतु।
कीरिश्चिद्धि त्वा हवते स्वर्वानृधीमहि सधमादस्ते अद्य॥१॥
प्रो द्रोणे हरयः कर्माग्मन्पुनानास ऋज्यंतो अभूवन्। इंद्रो
नो अस्य पूर्व्यः पपीयाद्द्युक्षो मदस्य सोम्यस्य राजा॥२॥ आ-
सस्राणासः शवसानमच्छेंद्रं सुचक्रे रथ्यासो अश्वाः। अभि
श्रव ऋज्यंतो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत्॥३॥ वरि-
ष्ठो अस्य दक्षिणामियर्तींद्रो मघोनां तुविकूर्मितमः। यया
वज्रिवः परियास्यंहो मघा च धृष्णो दयसे वि सूरीन्॥४॥
इंद्रो वाजस्य स्थविरस्य दातेंद्रो गीर्भिर्वर्धतां वृद्धमहाः। इंद्रो
वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः पृणति तूतुजानः॥५॥९॥

॥३८॥ १-५ भरद्वाजो बार्हस्पत्यः॥ इंद्रः॥ त्रिष्टुप्॥

॥३८॥ अपादित उदु नश्चित्रतमो महीं भर्षद्द्युमतीमिं-
द्रहूतिं। पन्यसीं धीतिं दैव्यस्य यामञ्जनस्य रातिं वनते
सुदानुः॥१॥ दूराच्चिदा वसतो अस्य कर्णा घोषादिंद्रस्य

तन्यति ब्रुवाणः । एयमेनं देवहूतिर्ववृत्यान्मद्र्य१गिंद्रमियमृ-
च्यमाना ॥२॥ तं वो धिया परमया पुराजामजरमिंद्रमभ्यनू-
ष्यर्कैः । ब्रह्मा च गिरो दधिरे समस्मिन्महांश्च स्तोमो अधि
वर्धदिंद्रे ॥३॥ वर्धाद्यं यज्ञ उत सोम इंद्रं वर्धाद्ब्रह्म गिर
उक्था च मन्म । वर्धाहैनमुषसो यामन्नक्तोर्वर्धान्मासाः
शरदो द्याव इंद्रं ॥४॥ एवा जज्ञानं सहसे असामि वावृधानं
राधसे च श्रुताय । महामुग्रमवसे विप्र नूनमा विवासेम
वृत्रतूर्येषु ॥५॥१०॥

॥३९॥ १-५ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३९॥ मंद्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वचनस्य
मध्वः । अपा नस्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः
॥१॥ अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिर्ऋतयुग्युजानः ।
रुजदरुग्णं वि वलस्य सानुं पणीँर्वचोभिरभि योधदिंद्रः ॥२॥
अयं द्योतयदद्युतो व्य१क्तून्दोषा वस्तोः शरद इंदुरिंद्र । इमं
केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार ॥३॥ अयं रो-
चयदरुचो रुचानो३यं वासयद्व्यृ१तेन पूर्वीः । अयमीयत
ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः ॥४॥ नू गृणा-
नो गृणते प्रत्न राजन्निषः पिन्व वसुदेयाय पूर्वीः । अप
ओषधीरविषा वनानि गा अर्वतो नॄनृचसे रिरीहि ॥५॥११॥

॥४०॥ १-५ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥४०॥ इंद्र पिब तुभ्यं सुतो मदायाव स्य हरी वि मुचा सखा-
या । उत प्र गाय गण आ निषद्याथा यज्ञाय गृणते वयो धाः ॥१॥
अस्य पिब यस्य जज्ञान इंद्र मदाय क्रत्वे अपिबो विरप्शिन् ।

तमु ते गावो नर आपो अद्रिरिंदुं समह्यन्पीतये समस्मै ॥२॥
समिद्धे अग्नौ सुत इंद्र सोम आ त्वा वहंतु हरयो वहिष्ठाः। त्वा-
यता मनसा जोहवीमींद्रा याहि सुवितार्य महे नः ॥३॥ आ
याहि शश्वदुशता ययाथेंद्र महा मनसा सोमपेयं। उप ब्रह्मा-
णि शृणव इमा नोऽथा ते यज्ञस्तन्वे३ वयो धात् ॥४॥ यदिंद्र
दिवि पार्ये यदृधग्यद्वा स्वे सदने यत्र वासि। अतो नो य-
ज्ञमवसे नियुत्वान्त्सजोषाः पाहि गिर्वणो मरुद्भिः ॥५॥१२॥

॥ ४१ ॥ १-५ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥४१॥ अहेळमान उप याहि यज्ञं तुभ्यं पवंत इंदवः सु-
तासः। गावो न वज्रिन्त्स्वमोको अच्छेंद्रा गहि प्रथमो
यज्ञियानां ॥१॥ या ते काकुत्सुकृता या वरिष्ठा यया शश्वत्पि-
बसि मध्व ऊर्मिं। तया पाहि प्र ते अध्वर्युरस्थात्सं ते वज्रो
वर्ततामिंद्र गव्युः ॥२॥ एष द्रप्सो वृषभो विश्वरूप इंद्राय वृष्णे
समकारि सोमः। एतं पिब हरिवः स्थातरुग्र यस्येशिषे प्रदिवि
यस्ते अन्नं ॥३॥ सुतः सोमो असुतादिंद्र वस्यानयं श्रेयाञ्चि-
कितुषे रणाय। एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तवि-
षीरा पृणस्व ॥४॥ ह्वयामसि त्वेंद्र याह्यर्वाङरं ते सोमस्तन्वे
भवाति। शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु
प्र विक्षु ॥५॥१३॥

॥ ४२ ॥ १-४ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ १-३ अनुष्टुप्। ४ बृहती ॥

॥४२॥ प्रत्यस्मै पिपीषते विश्वानि विदुषे भर। अरंगमाय
जग्मयेऽपश्चादध्वने नरे ॥१॥ एमेनं प्रत्येतन सोमेभिः सोम-
पातमं। अमत्रेभिर्ऋजीषिणमिंद्रं सुतेभिरिंदुभिः ॥२॥ यदी
सुतेभिरिंदुभिः सोमेभिः प्रतिभूषथ। वेदा विश्वस्य मेधिरो

धृषत्वंतमिदेषते ॥ ३ ॥ अस्माअस्मा इदंधसोऽध्वर्यो प्र भरा सुतं। कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्परत् ॥४॥१४॥

॥ ४३ ॥ १–४ भरद्वाजो बार्हस्पत्यः ॥ इंद्रः ॥ उष्णिक् ॥

॥४३॥ यस्य त्यच्छंबरं मदे दिवोदासाय रंधयः। अयं स सोम इंद्र ते सुतः पिब ॥१॥ यस्य तीव्रसुतं मदं मध्यमंतं च रक्षसे। अयं स सोम इंद्र ते सुतः पिब ॥२॥ यस्य गा अंतरश्मनो मदे दृळ्हा अवासृजः। अयं स सोम इंद्र ते सुतः पिब ॥३॥ यस्य मंदानो अंधसो माघोनं दधिषे शवः। अयं स सोम इंद्र ते सुतः पिब ॥४॥१५॥३॥

॥ ४४ ॥ १–२४ शंयुर्बार्हस्पत्यः ॥ इंद्रः ॥ १–६ अनुष्टुप्। ७.९ विराट्। ८ विराट् त्रिष्टुब्वा। १०–२४ त्रिष्टुप् ॥

॥४४॥ यो रयिवो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः। सोमः सुतः स इंद्र तेऽस्ति स्वधापते मदः ॥१॥ यः शग्मस्तुविशग्म ते रायो दामा मतीनां। सोमः सुतः स इंद्र तेऽस्ति स्वधापते मदः ॥२॥ येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः। सोमः सुतः स इंद्र तेऽस्ति स्वधापते मदः ॥३॥ त्यमु वो अप्रहणं गृणीषे शवसस्पतिं। इंद्रं विश्वासाहं नरं मंहिष्ठं विश्वचर्षणिं ॥४॥ यं वर्धयंतीद्गिरः पतिं तुरस्य राधसः। तमिन्न्वस्य रोदसी देवी शुष्मं सपर्यतः ॥५॥१६॥ तद्व उक्थस्य बर्हणेंद्रायोपस्तृणीषणि। विपो न यस्योतयो वि यद्रोहंति सक्षितः ॥६॥ अविदद्दक्षं मित्रो नवीयान्पपानो देवेभ्यो वस्यो अचैत्। ससवान्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्सखिभ्यः ॥७॥ ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन्। दधानो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः ॥८॥ द्युमत्तमं

दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः । वर्षीयो वयः कृणुहि शचीभिर्धनस्य सातावस्माँ अविड्ढि ॥ ९ ॥ इंद्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः । नकिरापिर्ददृशे मर्त्यत्रा किमंग रध्रचोदनं त्वाहुः ॥१०॥१७॥ मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम । पूर्वीष्ट इंद्र निःषिधो जनेषु जह्यसुष्वीन्प्र वृहापृणतः ॥११॥ उदभ्राणीव स्तनयन्नियर्तींद्रो राधांस्यश्व्यानि गव्या । त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन्मघोनः ॥ १२ ॥ अध्वर्यो वीर प्र महे सुतानामिंद्राय भर स ह्यस्य राजा । यः पूर्व्याभिरुत नूतनाभिर्गीर्भिर्वावृधे गृणतामृषीणां ॥१३॥ अस्य मदे पुरु वर्पांसि विद्वानिंद्रो वृत्राण्यप्रती जघान । तमु प्र होषि मधुमंतमस्मै सोमं वीराय शिप्रिणे पिबध्यै ॥ १४ ॥ पाता सुतमिंद्रो अस्तु सोमं हंता वृत्रं वज्रेण मंदसानः । गंता यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः ॥ १५ ॥ १८ ॥ इदं त्यत्पात्रमिंद्रपानमिंद्रस्य प्रियममृतमपायि । मत्सद्यथा सौमनसाय देवं व्य१स्मद्द्वेषो युयवद्व्यंहः ॥ १६ ॥ एना मंदानो जहि शूर शत्रूञ्जामिमजामिं मघवन्नमित्रान् । अभिषेणाँ अभ्या३देदिशानान्पराच इंद्र प्र मृणा जही च ॥१७॥ आसु ष्मा णो मघवन्निंद्र पृत्स्व१स्मभ्यं महि वरिवः सुगं कः । अपां तोकस्य तनयस्य जेष इंद्र सूरीन्कृणुहि स्मा नो अर्धं ॥ १८ ॥ आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः । अस्मत्रांचो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहंतु ॥१९॥ आ ते वृषन्वृषणो द्रोणमस्थुर्घृतप्रुषो नोर्मयो मदंतः । इंद्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरंति वृषभाय सोमं ॥२०॥१९॥ वृषासि

दिवो वृषभः पृथिव्या वृषा सिंधूनां वृषभः स्तियानां । वृष्णे त इंदुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय ॥२१॥ अयं देवः सहसा जायमान इंद्रेण युजा पणिमस्तभायत् । अयं स्वस्य पितुरायुधानींदुरमुष्णादशिवस्य मायाः ॥२२॥ अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरंतः । अयं त्रिधातु दिवि रोचनेषु त्रितेषु विंददमृतं निगूळ्हं ॥२३॥ अयं द्यावापृथिवी वि ष्कभायदयं रथमयुनक्सप्तरश्मिं । अयं गोषु शच्या पक्वमंतः सोमो दाधार दशयंत्रमुत्सं ॥ २४ ॥ २० ॥

॥ ४५ ॥ १-३३ शंयुर्बार्हस्पत्यः ॥ १-३० इंद्रः । ३१-३३ बृबुस्तक्षा ॥ १-२८. ३०-३२ गायत्री । २९ अतिनिचृत् । ३३ अनुष्टुप् ॥

॥४५॥ य आनयत्परावतः सुनीती तुर्वशं यदुं । इंद्रः स नो युवा सखा ॥१॥ अविप्रे चिद्वयो दधदनाशुना चिदर्वता । इंद्रो जेता हितं धनं ॥२॥ महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः । नास्य क्षीयंत ऊतयः ॥३॥ सखायो ब्रह्मवाहसेऽर्चत प्र च गायत । स हि नः प्रमतिर्मही ॥४॥ त्वमेकस्य वृत्रहन्नविता द्वयोरसि । उतेदृशे यथा वयं ॥५॥२१॥ नयसीद्वति द्विषः कृणोष्युक्थशंसिनः । नृभिः सुवीर उच्यसे ॥६॥ ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियं । गां न दोहसे हुवे ॥७॥ यस्य विश्वानि हस्तयोरूचुर्वसूनि नि द्विता । वीरस्य पृतनाषहः ॥८॥ वि दृळ्हानि चिदद्रिवो जनानां शचीपते । वृह माया अनानत ॥९॥ तमु त्वा सत्य सोमपा इंद्र वाजानां पते । अहूमहि श्रवस्यवः ॥१०॥२२॥ तमु त्वा यः पुरासिथ यो वा नूनं हिते धने । हव्यः स श्रुधी हवं ॥११॥ धीभिरर्वद्भिरर्वतो वाजाँ इंद्र श्रवाय्यान् । त्वया जेष्म हितं धनं ॥१२॥ अभूरु वीर गिर्वणो महाँ इंद्र धने हिते । भरे वितंतसाय्यः ॥१३॥ या त ऊति-

ऽमित्रहन्मक्षूजंवस्तमासति । तया नो हिनुही रथं ॥ १४ ॥
स रथेन रथीतमोऽस्माकेनाभियुग्वना । जेषि जिष्णो हितं
धनं ॥ १५ ॥ २३ ॥ य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः । प-
तिर्जज्ञे वृषक्रतुः ॥ १६ ॥ यो गृणतामिदासिथापिरूती शिवः
सखा । स त्वं न इंद्र मृळय ॥ १७ ॥ धिष्व वज्रं गभस्त्यो
रक्षोहत्याय वज्रिवः । सासहीष्ठा अभि स्पृधः ॥ १८ ॥ प्रत्नं रयी-
णां युजं सखायं कीरिचोदनं । ब्रह्मवाहस्तमं हुवे ॥ १९ ॥ स
हि विश्वानि पार्थिवाँ एको वसूनि पत्यते । गिर्वणस्तमो
अध्रिगुः ॥ २० ॥ २४ ॥ स नो नियुद्भिरा पृण कामं वाजेभिर-
श्विभिः । गोमद्भिर्गोपते धृषत् ॥ २१ ॥ तद्वो गाय सुते सचा
पुरुहूताय सत्वने । शं यद्गवे न शाकिने ॥ २२ ॥ न घा वसुर्नि
यमते दानं वाजस्य गोमतः । यत्सीमुप श्रवद्गिरः ॥ २३ ॥ कु-
वित्सस्य प्र हि व्रजं गोमंतं दस्युहा गमत् । शचीभिरप नो
वरत् ॥ २४ ॥ इमा उ त्वा शतक्रतोऽभि प्र णोनुवुर्गिरः । इंद्र
वत्सं न मातरः ॥ २५ ॥ २५ ॥ दूणाशं सख्यं तव गौरसि वीर
गव्यते । अश्वो अश्वायते भव ॥ २६ ॥ स मंदस्वा ह्यंधसो राधसे
तन्वा महे । न स्तोतारं निदे करः ॥ २७ ॥ इमा उ त्वा सुतेसुते
नक्षंते गिर्वणो गिरः । वत्सं गावो न धेनवः ॥ २८ ॥ पुरूतमं
पुरूणां स्तोतॄणां विवाचि । वाजेभिर्वाजयतां ॥ २९ ॥ अस्मा-
कमिंद्र भूतु ते स्तोमो वाहिष्ठो अंतमः । अस्मान्राये महे हिनु
॥ ३० ॥ अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्नस्थात् । उरुः कक्षो न
गांग्यः ॥ ३१ ॥ यस्य वायोरिव द्रवद्भद्रा रातिः सहस्रिणी । स-
द्यो दानाय मंहते ॥ ३२ ॥ तत्सु नो विश्वे अर्य आ सदा गृणंति
कारवः । बृबुं सहस्रदातमं सूरिं सहस्रसातमं ॥ ३३ ॥ २६ ॥

॥ ४६ ॥ १–१४ शंयुर्बार्हस्पत्यः ॥ इंद्रः ॥ प्रागाथं ॥

॥४६॥त्वामिद्धि हवामहे साता वाजस्य कारवः।त्वां वृत्रेष्विंद्र
सत्पतिं नरस्त्वां काष्ठास्वर्वतः॥१॥ स त्वं नश्चित्र वज्रहस्त धृष्णु-
या महः स्तवानो अद्रिवः।गामश्वं रथ्यमिंद्र सं किर सत्रा वाजं
न जिग्युषे ॥२॥ यः सत्राहा विचर्षणिरिंद्रं तं हूमहे वयं। सहस्र-
मुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥३॥ बाधसे
जनान्वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम। अस्माकं बोध्य-
विता महाधने तनूष्वप्सु सूर्ये ॥४॥ इंद्र ज्येष्ठं न आ भरँ ओजिष्ठं
पपुरि श्रवः। येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः
॥५॥२७॥ त्वामुग्रमवसे चर्षणीसहं राजन्देवेषु हूमहे। विश्वा सु
नो विथुरा पिब्दना वसोऽमित्रान्सुषहान्कृधि॥६॥ यदिंद्र ना-
हुषीष्वाँ ओजो नृम्णं च कृष्टिषु। यद्वा पंच क्षितीनां द्युम्नमा भर
सत्रा विश्वानि पौंस्या॥७॥ यद्वा तृक्षौ मघवन्द्रुह्यावा जने यत्पूरौ
कच्च वृष्ण्यं। अस्मभ्यं तद्रिरीहि सं नृषाह्येऽमित्रान्पृत्सु तुर्वणे
॥८॥ इंद्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत्। छर्दिर्यच्छ मघव-
द्भ्यश्च मह्यं च यावया दिद्युमेभ्यः॥९॥ ये गव्यता मनसा शत्रुमा-
दभुरभिप्रघ्नंति धृष्णुया। अध स्मा नो मघवन्निंद्र
अंतमो भव॥१०॥२८॥ अध स्मा नो वृधे भव
यदंतरिक्षे पतयंति पर्णिनो दिद्यवस्तिग्ममूर्ध
रासस्तन्वो वितन्वते प्रिया शर्म पितृणां। अध
तने च छर्दिरचित्तं यावय द्वेषः॥१२॥ यदिंद्र
यासे महाधने। असमने अध्वनि वृजिने पथि श्ये
तः॥१३॥ सिंधूँरिव प्रवण आशुया यतो यदि
आ ये वयो न वर्वृतत्यामिषि गृभीता बाह्वो

॥ ४७ ॥ १–३१ गर्गः ॥ १–५ सोमः । ६–१९. २०२. २१. ३१२ इंद्रः । २०१ लिंगोक्तदेवताः । २२–२५ प्रस्तोकस्य सार्जयस्य दानस्तुतिः । २६–२८ रथः । २९–३११ दुंदुभिः ॥ १–१८. २०–२२. २६. २८–३१ त्रिष्टुप् । १९ बृहती । २३ अनुष्टुप् । २४ गायत्री । २५ द्विपदा । २७ जगती ॥

॥४७॥ स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायं। उतो न्व१स्य पपिवांसमिंद्रं न कश्चन सहत आहवेषु॥१॥ अयं स्वादुरिह मदिष्ठ आस यस्येंद्रो वृत्रहत्ये ममाद। पुरूणि यश्च्यौत्ना शंबरस्य वि नवतिं नव च देह्यो३ हन् ॥२॥ अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः। अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे ॥ ३ ॥ अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः। अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्व१न्तरिक्षं॥४॥ अयं विंदच्चित्रदृशीकमर्णः शुक्रसद्मनामुषसामनीके। अयं महान्महता स्कंभनेनोद्यामस्तभ्नाद्वृषभो मरुत्वान् ॥५॥३०॥ धृषत्पिंब कलशे सोममिंद्र वृत्रहा शूर समरे वसूनां। माध्यंदिने सवन आ वृषस्व रयिस्थानो रयिमस्मासु धेहि ॥६॥ इंद्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ। भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः॥७॥ उरुं नो लोकमनु नेषि विद्वान्त्स्वर्वज्ज्योतिरभयं स्वस्ति। ऋष्वा त इंद्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहंता ॥८॥ वरिष्ठे न इंद्र वंधुरे धा वहिष्ठयोः शतावन्नश्वयोरा। इषमा वक्षीषां वर्षिष्ठां मा नस्तारीन्मघवन्रायो अर्यः॥९॥ इंद्र मृळ मह्यं जीवातुमिच्छ चोदय धियमयसो न धारां। यत्किंचाहं त्वायुरिदं वदामि तज्जुषस्व कृधि मा देववंतं॥१०॥३१॥ त्रातारमिंद्रमवितारमिंद्रं हवेहवे सुहवं शूरमिंद्रं। ह्वयामि शक्रं पुरुहूतमिंद्रं स्वस्ति नो मघवा धात्विंद्रः॥११॥ इंद्रः सुत्रामा स्ववाँ अवोभिः सुमृळी-

को भवतु विश्ववेदाः। बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥१२॥ तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम। स सुत्रामा स्ववाँ इंद्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥१३॥ अव त्वे इंद्र प्रवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवंते। उरू न राधः सवना पुरूण्यपो गा वज्रिन्युवसे समिंदून् ॥१४॥ क ईं स्तवत्कः पृणात्को यजाते यदुग्रमिन्मघवा विश्वहावेत्। पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः ॥१५॥३२॥ शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः। एधमानद्विळुभयस्य राजा चोष्कूयते विश इंद्रो मनुष्यान् ॥१६॥ परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति। अनानुभूतीरवधून्वानः पूर्वीरिंद्रः शरदस्तर्तरीति ॥१७॥ रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥१८॥ युजानो हरिता रथे भूरि त्वष्टेह राजति। को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु ॥१९॥ अगव्यूति क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत्। बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इंद्र पंथां ॥२०॥३३॥ दिवेदिवे सदृशीरन्यमर्धं कृष्णा असेधदप सद्मनो जाः। अहन्दासा वृषभो वस्नयंतोदव्रजे वर्चिनं शंबरं च ॥२१॥ प्रस्तोक इन्नु राधसस्त इंद्र दश कोशयीर्दश वाजिनोऽदात्। दिवोदासादतिथिग्वस्य राधः शांबरं वसु प्रत्यग्रभीष्म ॥२२॥ दशाश्वान्दश कोशान्दश वस्त्राधिभोजना। दशो हिरण्यपिंडान्दिवोदासादसानिषं ॥२३॥ दश रथान्प्रष्टिमतः शतं गा अथर्वभ्यः। अश्वथः पायवेऽदात् ॥२४॥ महि राधो

विश्वजन्यं दधानान्भरद्वाजान्त्सार्ञ्जयो अभ्ययष्ट ॥ २५ ॥ ३४ ॥ वन-
स्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणः सुवीरः । गोभिः संनद्धो
असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥ २६ ॥ दिवस्पृथिव्याः
पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः । अपामोज्मानं परि
गोभिरावृतमिंद्रस्य वज्रं हविषा रथं यज ॥ २७ ॥ इंद्रस्य वज्रो मरु-
तामनीकं मित्रस्य गर्भो वरुणस्य नाभिः । सेमां नो हव्यदातिं
जुषाणो देव रथ प्रति हव्या गृभाय ॥ २८ ॥ उप श्वासय पृथिवीमुत
द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् । स दुंदुभे सजूरिंद्रेण देवैर्दूरा-
द्दवीयो अप सेध शत्रून् ॥ २९ ॥ आ क्रंदय बलमोजो न आ धा निः
ष्टनिहि दुरिता बाधमानः । अप प्रोथ दुंदुभे दुच्छुना इत इंद्रस्य मु-
ष्टिरसि वीळयस्व ॥ ३० ॥ आमूरज प्रत्यावर्तयेमाः केतुमद्दुंदुभि-
र्वावदीति । समश्वपर्णाश्चरंति नो नरोऽस्माकमिंद्र रथिनो जयंतु
॥ ३१ ॥ ३५ ॥ ७ ॥

॥ ४८ ॥ १–२२ शंयुर्बार्हस्पत्यः ॥ तृणपाणिकं पृश्निसूक्तं । १–१० अग्निः । ११. १२. २०. २१ मरुतः । १३–१५ मरुतो लिंगोक्तदेवता वा । १६–१९ पूषा । २२ पृश्नि-र्द्यावाभूमी वा ॥ १. ३. ५. ९. १४. १९. २० बृहती । २. ४. १०. १२. १७ सतोबृहती । ६. ८ महासतोबृहती । ७ महाबृहती । ११. १६ ककुप् । १३. १८ पुरउष्णिक् । १५ अतिजगती । २१ यवमध्या महाबृहती । २२ अनुष्टुप् ॥

॥ ४८ ॥ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे । प्रप्र वय-
ममृतं जातवेदसं प्रियं मित्रं न शंसिषं ॥ १ ॥ ऊर्जो नपातं स
हिनायमस्मयुर्दाशेम हव्यदातये । भुवद्वाजेष्वविता भुवद्वृध
उत त्राता तनूनां ॥ २ ॥ वृषा ह्यग्ने अजरो महान्विभास्य-
र्चिषा । अजस्रेण शोचिषा शोशुचच्छुचे सुदीतिभिः सु दी-
दिहि ॥ ३ ॥ महो देवान्यजसि यक्ष्यानुषक्तव क्रत्वोत दंसना ।
अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वंस्व ॥ ४ ॥

यमापो अद्रयो वना गर्भमृतस्य पिप्रति। सहसा यो मथितो
जायते नृभिः पृथिव्या अधि सानवि ॥५॥१॥ आ यः पप्रौ भा-
नुना रोदसी उभे धूमेन धावते दिवि। तिरस्तमो ददृश ऊर्म्या-
स्वा श्यावास्वरुषो वृषा श्यावा अरुषो वृषा ॥६॥ बृहद्भि-
रग्ने अर्चिभिः शुक्रेण देव शोचिषा। भरद्वाजे समिधानो
यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥७॥ वि-
श्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणां। शतं पूर्भि-
र्यविष्ठ पाह्यंहसः समेद्धारं शतं हिमाः स्तोतृभ्यो ये च ददति
॥८॥ त्वं नश्चित्र ऊत्या वसो राधांसि चोदय। अस्य रायस्त्व-
मग्ने रथीरसि विदा गाधं तुचे तु नः ॥९॥ पर्षि तोकं तनयं
पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः। अग्ने हेळांसि दैव्या युयोधि नो-
ऽदेवानि ह्वरांसि च ॥१०॥२॥ आ सखायः सबर्दुघां धेनुमज-
ध्वमुप नव्यसा वचः। सृजध्वमनपस्फुरां ॥११॥ या शर्धाय
मारुताय स्वभानवे श्रवोऽमृत्यु धुक्षत। या मृळीके मरुतां
तुराणां या सुम्नैरेवयावरी ॥१२॥ भरद्वाजायाव धुक्षत द्विता।
धेनुं च विश्वदोहसमिषं च विश्वभोजसं ॥१३॥ तं व इंद्रं न सु-
क्रतुं वरुणमिव मायिनं। अर्यमणं न मंद्रं सृप्रभोजसं विष्णुं न
स्तुष आदिशे ॥१४॥ त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं
पूषणं सं यथा शता। सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गू-
ळ्हा वसू करत्सुवेदा नो वसू करत् ॥१५॥ आ मा पूषन्नुप द्रव
शंसिषं नु ते अपिकर्ण आघृणे। अघा अर्यो अरातयः ॥१६॥३॥
मा काकंबीरमुद्वृहो वनस्पतिमशस्तीर्वि हि नीनशः। मोत सू-
रो अह एवा चन ग्रीवा आदधते वेः ॥१७॥ दृतेरिव तेऽवृक-
मस्तु सख्यं। अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः ॥१८॥

परो हि मर्त्यैरसि समो देवैरुत श्रिया । अभि ख्यः पूषन्पृत-
नासु नस्त्वमवा नूनं यथा पुरा ॥१९॥ वामी वामस्य धूतयः
प्रणीतिरस्तु सूनृता । देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्र-
यज्यवः ॥२०॥ सद्यश्चिद्यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः ।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं
शवः ॥२१॥ सकृद्ध द्यौरजायत सकृद्भूमिरजायत । पृश्न्या दुग्धं
सकृत्पयस्तदन्यो नानु जायते ॥ २२ ॥ ४ ॥

॥ ४९ ॥ १–१५ ऋजिश्वा ॥ विश्वे देवाः ॥ १–१४ त्रिष्टुप् । १५ शक्करी ॥

॥ ४९ ॥ स्तुषे जनं सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा सु-
म्नयंता । त आ गमंतु त इह श्रुवंतु सुक्षत्रासो वरुणो मित्रो
अग्निः ॥१॥ विशोविश ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्योः ।
दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै ॥२॥ अ-
रुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या । मि-
थस्तुरा विचरंती पावके मन्म श्रुतं नक्षत ऋच्यमाने ॥ ३ ॥
प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्रां । द्यु-
तद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥४॥
स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान्मनसा युजानः ।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥५॥५॥
पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि ।
सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थातर्जगदा कृणुध्वं
॥ ६ ॥ पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं
धात् । ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म
यंसत् ॥७॥ पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्या-
नळर्कं । स नो रासच्छुरुधश्चंद्राग्रा धियंधियं सीषधाति

प्र पूषा ॥८॥ प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभ-
स्तिमृभ्वं । होता यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं वि-
भावा ॥९॥ भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया
रुद्रमक्तौ । बृहंतमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः
॥१०॥६॥ आ युवानः कवयो यज्ञियासो मरुतो गंत गृणतो
वरस्यां । अचित्रं चिद्धि जिन्वथा वृधंत इत्था नक्षंतो नरो
अंगिरस्वत् ॥११॥ प्र वीराय प्र तवसे तुरायाजा यूथेव प-
शुरक्षिरस्तं । स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वच-
नस्य विपः ॥१२॥ यो रजांसि विममे पार्थिवानि त्रिश्चिद्वि-
ष्णुर्मनवे बाधिताय । तस्य ते शर्मन्नुपदद्यमाने राया मदेम
तन्वा३ तना च ॥१३॥ तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्त-
त्सविता चनो धात् । तदोषधीभिरभि रातिषाचो भगः पुरं-
धिर्जिन्वतु प्र राये ॥१४॥ नू नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं
मह ऋतस्य गोपां । क्षयं दाताजरं येन जनान्स्पृधो अदेवी-
रभि च क्रमाम विश आदेवीरभ्य१श्नवाम ॥१५॥७॥४॥

॥५०॥ १–१५ ऋजिश्वा ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥५०॥ हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मि-
त्रमग्निं । अभिक्षदामर्यमणं सुशेवं त्रातॄन्देवान्सवितारं भगं
च ॥१॥ सुज्योतिषः सूर्य दक्षपितॄननागास्त्वे सुमहो वीहि
देवान् । द्विजन्मानो य ऋतसापः सत्याः स्वर्वंतो यजता अ-
ग्निजिह्वाः ॥२॥ उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं
सुषुम्ने । महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः
॥३॥ आ नो रुद्रस्य सूनवो नमंतामद्या हूतासो वसवोऽधृ-
ष्टाः । यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान्

॥४॥ मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ।
श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ॥५॥८॥
अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन । श्रवदिद्ध-
वमुप च स्तवानो रासद्वाजाँ उप महो गृणानः ॥६॥ ओमा-
नमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः । यूयं
हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ॥७॥
आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जग-
म्यात् । यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि
॥८॥ उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।
स्यामहं ते सदमिद्रातौ तव स्यामग्नेऽवसा सुवीरः ॥९॥ उत
त्या मे हवमा जग्म्यातं नासत्या धीभिर्युवमङ्ग विप्रा । अत्रिं
न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके ॥१०॥९॥ ते नो
रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः । दशस्यन्तो
दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः ॥११॥
ते नो रुद्रः सरस्वती सजोषा मीळ्हुष्मन्तो विष्णुर्मृळन्तु वायुः ।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः
॥१२॥ उत स्य देवः सविता भगो नोऽपां नपादवतु दानु प-
प्रिः । त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः
॥१३॥ उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु
॥१४॥ एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चन्त्यर्कैः । ग्ना
हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः ॥१५॥१०॥

॥५१॥ १–१६ ऋजिश्वा ॥ विश्वे देवाः ॥ १–१२ त्रिष्टुप् । १३–१५ उष्णिक् । १६ अनुष्टुप् ॥

॥ ५१ ॥ उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रियं वरुण-

योरदब्धं । ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता
व्यद्यौत् ॥१॥ वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनु-
तरा च विप्रः । ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो
अर्य एवान् ॥२॥ स्तुष उ वो मह ऋतस्य गोपानदितिं
मित्रं वरुणं सुजातान् । अर्यमणं भगमदब्धधीतीनच्छा वोचे
सधन्यः पावकान् ॥३॥ रिशादसः सत्पतीँरदब्धान्महो राज्ञः
सुवसनस्य दातॄन् । यूनः सुक्षत्रान्क्षयतो दिवो नॄनादित्या-
न्याम्यदितिं दुवोयु ॥४॥ द्यौ३ष्पितः पृथिवि मातरध्रुगग्ने
भ्रातर्वसवो मृळता नः । विश्व आदित्या अदिते सजोषा
अस्मभ्यं शर्म बहुलं वि यंत ॥५॥११॥ मा नो वृकाय वृक्ये
समस्मा अघायते रीरधता यजत्राः । यूयं हि ष्ठा रथ्यो नस्तनू-
नां यूयं दक्षस्य वचसो बभूव ॥६॥ मा व एनो अन्यकृतं भुजेम
मा तत्कर्म वसवो यच्चयध्वे । विश्वस्य हि क्षयथ विश्वदेवाः स्वयं
रिपुस्तन्वं रीरिषीष्ट ॥७॥ नम इदुग्रं नम आ विवासे नमो दा-
धार पृथिवीमुत द्यां । नमो देवेभ्यो नम ईश एषां कृतं चिदे-
नो नमसा विवासे ॥८॥ ऋतस्य वो रथ्यः पूतदक्षानृतस्य
पस्त्यसदो अदब्धान् । ताँ आ नमोभिरुरुचक्षसो नॄन्विश्वान्व
आ नमे महो यजत्राः ॥९॥ ते हि श्रेष्ठवर्चसस्त उ नस्तिरो
विश्वानि दुरिता नयंति । सुक्षत्रासो वरुणो मित्रो अग्निर्ऋ-
तधीतयो वक्मराजसत्याः ॥१०॥१२॥ ते न इंद्रः पृथिवी क्षाम व-
र्धन्पूषा भगो अदितिः पंच जनाः । सुशर्माणः स्ववसः सुनीथा
भवंतु नः सुत्रात्रासः सुगोपाः ॥११॥ नू सद्मानं दिव्यं नंशि देवा
भारद्वाजः सुमतिं याति होता । आसानेभिर्यजमानो मिये-
धैर्देवानां जन्म वसूयुर्ववंद ॥१२॥ अप त्यं वृजिनं रिपुं स्तेन-

मंग्ने दुराध्यं। दविष्ठमस्य सत्पते कृधी सुगं ॥१३॥ ग्रावाणः सोम नो हि कं सखित्वनायं वावशुः। जही न्य१त्रिणं पणिं वृको हि षः॥१४॥ यूयं हि ष्ठा सुदानव इंद्रज्येष्ठा अभिद्यवः। कर्ता नो अध्वन्ना सुगं गोपा अमा ॥१५॥ अपि पंथामगन्महि स्वस्तिगामनेहसं। येन विश्वाः परि द्विषो वृणक्ति विंदते वसु ॥१६॥१३॥

॥ ५२ ॥ १–१७ ऋजिश्वा ॥ विश्वे देवाः ॥ १–६. १३. १५. १७ त्रिष्टुप्। ७–१२ गायत्री। १४ जगती ॥

॥५२॥ न तद्दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः। उब्जंतु तं सुभ्व१ः पर्वतासो नि हीयतामतियाजस्य यष्टा ॥१॥ अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात्। तपूंषि तस्मै वृजिनानि संतु ब्रह्मद्विषमभि तं शोचतु द्यौः॥२॥ किमंग त्वा ब्रह्मणः सोम गोपां किमंग त्वाहुरभिशस्तिपां नः। किमंग नः पश्यसि निद्यमानान्ब्रह्मद्विषे तपुषिं हेतिमस्य ॥३॥ अवंतु मामुषसो जायमाना अवंतु मा सिंधवः पिन्वमानाः। अवंतु मा पर्वतासो ध्रुवासोऽवंतु मा पितरो देवहूतौ ॥४॥ विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरंतं। तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः ॥५॥१४॥ इंद्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिंधुभिः पिन्वमाना। पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव ॥६॥ विश्वे देवास आ गत शृणुता म इमं हवं। एदं बर्हिर्नि षीदत ॥७॥ यो वो देवा घृतस्नुना हव्येन प्रतिभूषति। तं विश्व उप गच्छथ ॥८॥ उप नः सूनवो गिरः शृण्वंत्वमृतस्य ये। सुमृळीका भवंतु नः ॥९॥ विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः। जुषंतां युज्यं पयः ॥१०॥१५॥ स्तो-

त्रमिंद्रो मरुद्गणस्त्वष्टृमान्मित्रो अर्यमा । इमा हव्या जुषंत नः
॥११॥ इमं नो अग्ने अध्वरं होतर्वयुनशो यज । चिकित्वान्दैव्यं
जनं ॥१२॥ विश्वे देवाः शृणुतेमं हवं मे ये अंतरिक्षे य उप द्य-
वि ष्ठ । ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि
मादयध्वं ॥१३॥ विश्वे देवा मम शृण्वंतु यज्ञिया उभे रोदसी
अपां नपाच्च मन्म । मा वो वचांसि परिचक्ष्याणि वोचं सु-
म्नेष्विद्वो अंतमा मदेम ॥१४॥ ये के च ज्मा महिनो अहिमा-
या दिवो जज्ञिरे अपां सधस्थे । ते अस्मभ्यमिषये विश्वमायुः
क्षप उस्रा वरिवस्यंतु देवाः ॥१५॥ अग्नीपर्जन्याववतं धियं
मेऽस्मिन्हवे सुहवा सुष्टुतिं नः । इळामन्यो जनयद्गर्भमन्यः
प्रजावतीरिष आ धत्तमस्मे ॥ १६ ॥ स्तीर्णे बर्हिषि समिधाने
अग्नौ सूक्तेन महा नमसा विवासे । अस्मिन्नो अद्य विदथे
यजत्रा विश्वे देवा हविषि मादयध्वं ॥ १७ ॥ १६ ॥

॥ ५३ ॥ १–१० भरद्वाजो बार्हस्पत्यः ॥ पूषा ॥ १–७. ९. १० गायत्री । ८ त्रिष्टुप् ॥

॥५३॥ वयमु त्वा पथस्पते रथं न वाजसातये । धिये पूषन्न-
युज्महि ॥१॥ अभि नो नर्यं वसु वीरं प्रयतदक्षिणं । वामं गृह-
पतिं नय ॥२॥ अदित्सतं चिदाघृणे पूषन्दानाय चोदय । पणे-
श्चिदि म्रदा मनः ॥३॥ वि पथो वाजसातये चिनुहि वि मृधो
जहि । साधंतामुग्र नो धियः ॥४॥ परि तृंधि पणीनामारया
हृदया कवे । अथेमस्मभ्यं रंधय ॥५॥१७॥ वि पूषन्नारया तुद प-
णेरिच्छ हृदि प्रियं । अथेमस्मभ्यं रंधय ॥६॥ आ रिख किकिरा
कृणु पणीनां हृदया कवे । अथेमस्मभ्यं रंधय ॥७॥ यां पूषन्ब्रह्म-
चोदनीमारां बिभर्ष्याघृणे । तया समस्य हृदयमा रिख किकिरा
कृणु ॥८॥ या ते अष्ट्रा गोओपशाघृणे पशुसाधनी । तस्यास्ते

सुम्नमीमहे ॥९॥ उत नो गोषणिं धियमश्वसां वाजसामुत ।
नृवत्कृणुहि वीतये ॥ १० ॥ १८ ॥

॥ ५४ ॥ १–१० भरद्वाजो बार्हस्पत्यः ॥ पूषा ॥ गायत्री ॥

॥५४॥ सं पूषन्विदुषा नय यो अंजसानुशासति । य एवेद-
मिति ब्रवत् ॥१॥ समु पूष्णा गमेमहि यो गृहाँ अभिशासति ।
इम एवेति च ब्रवत् ॥२॥ पूष्णश्चक्रं न रिष्यति न कोशोऽव प-
द्यते । नो अस्य व्यथते पविः ॥३॥ यो अस्मै हविषाविधन्न तं
पूषापि मृष्यते । प्रथमो विंदते वसु ॥४॥ पूषा गा अन्वेतु नः
पूषा रक्षत्वर्वतः । पूषा वाजं सनोतु नः ॥५॥१९॥ पूषन्ननु प्र गा इहि
यजमानस्य सुन्वतः । अस्माकं स्तुवतामुत ॥६॥ माकिर्नेशन्माकीं
रिषन्माकीं सं शारि केवटे । अथारिष्टाभिरा गहि ॥७॥ शृण्वंतं
पूषणं वयमिर्यमनष्टवेदसं । ईशानं राय ईमहे ॥८॥ पूषन्तव व्रते
वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ॥९॥ परि पूषा
परस्ताद्धस्तं दधातु दक्षिणं । पुनर्नो नष्टमाजतु ॥ १० ॥ २० ॥

॥ ५५ ॥ १–६ भरद्वाजो बार्हस्पत्यः ॥ पूषा ॥ गायत्री ॥

॥५५॥ एहि वां विमुचो नपादाघृणे सं सचावहै । रथीर्ऋ-
तस्य नो भव ॥१॥ रथीतमं कपर्दिनमीशानं राधसो महः । रायः
सखायमीमहे ॥ २ ॥ रायो धारास्याघृणे वसो राशिरजाश्व ।
धीवतोधीवतः सखा ॥३॥ पूषणं न्व१जाश्वमुप स्तोषाम वा-
जिनं । स्वसुर्यो जार उच्यते ॥४॥ मातुर्दिधिषुमब्रवं स्वसुर्जारः
शृणोतु नः । भ्रातेंद्रस्य सखा मम ॥ ५ ॥ आजासः पूषणं रथे
निशृंभास्ते जनश्रियं । देवं वहंतु बिभ्रतः ॥ ६ ॥ २१ ॥

॥ ५६ ॥ १–६ भरद्वाजो बार्हस्पत्यः ॥ पूषा ॥ १–५ गायत्री । ६ अनुष्टुप् ॥

॥५६॥ य एनमादिदेशति करंभादिति पूषणं । न तेन देव

आदिशे ॥१॥ उत घा स रथीतमः सख्या सत्पतिर्युजा । इंद्रो
वृत्राणि जिघ्नते ॥२॥ उतादः परुषे गवि सूरश्चक्रं हिरण्ययं ।
न्यैरयद्रथीतमः ॥ ३ ॥ यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मंतुमः ।
तत्सु नो मन्म साधय ॥४॥ इमं च नो गवेषणं सातये सीषधो
गणं । आरात्पूषन्नसि श्रुतः ॥५॥ आ ते स्वस्तिमीमह आरेअ-
घामुपावसुं । अद्या च सर्वतातये श्वश्च सर्वतातये ॥ ६ ॥ २२ ॥

॥ ५७ ॥ १-६ भरद्वाजो बार्हस्पत्यः ॥ इंद्रापूषणौ ॥ गायत्री ॥

॥५७॥ इंद्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाज-
सातये ॥१॥ सोममन्य उपासदत्पातवे चम्वोः सुतं । करंभमन्य
इच्छति ॥२॥ अजा अन्यस्य वह्नयो हरी अन्यस्य संभृता । ताभ्यां
वृत्राणि जिघ्नते ॥३॥ यदिंद्रो अनयद्रितो महीरपो वृषंतमः ।
तत्र पूषाभवत्सचा ॥४॥ तां पूष्णः सुमतिं वयं वृक्षस्य प्र व-
यामिव । इंद्रस्य चा रभामहे ॥५॥ उत्पूषणं युवामहेऽभीशूँरिव
सारथिः । मह्या इंद्रं स्वस्तये ॥ ६ ॥ २३ ॥

॥ ५८ १-४ भरद्वाजो बार्हस्पत्यः ॥ पूषा ॥ १. ३. ४ त्रिष्टुप् । २ जगती ॥

॥५८॥ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरि-
वासि । विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह
रातिरस्तु ॥१॥ अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने
विश्वे अर्पितः । अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षाणो
भुवना देव ईयते ॥२॥ यास्ते पूषन्नावो अंतः समुद्रे हिरण्य-
यीरंतरिक्षे चरंति । ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव
इच्छमानः ॥ ३ ॥ पूषा सुबंधुर्दिव आ पृथिव्या इळस्पतिर्म-
घवा दस्मवर्चाः । यं देवासो अददुः सूर्यायै कामेन कृतं तवसं
स्वंचं ॥ ४ ॥ २४ ॥

॥ ५९ ॥ १–१० भरद्वाजो बार्हस्पत्यः ॥ इंद्राग्नी ॥ १–६ बृहती । ७–१० अनुष्टुप् ॥

॥५९॥ प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः । हता-
सो वां पितरो देवशत्रव इंद्राग्नी जीवथो युवं ॥१॥ बळित्था
महिमा वामिंद्राग्नी पनिष्ठ आ । समानो वां जनिता भ्रातरा
युवं यमाविहेहमातरा ॥२॥ ओकिवांसा सुते सचाँ अश्वा सप्ती
इवादने । इंद्रा न्व१ग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥३॥
य इंद्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा । जोषवाकं वदतः पज्र-
होषिणा न देवा भसथश्चन ॥४॥ इंद्राग्नी को अस्य वां देवौ
मर्तश्चिकेतति । विषूचो अश्वान्युयुजान ईयत एकः समान आ
रथे ॥५॥२५॥ इंद्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः । हित्वी
शिरो जिह्वया वावदच्चरत्त्रिंशत्पदा न्यक्रमीत् ॥६॥ इंद्राग्नी आ
हि तन्वते नरो धन्वानि बाह्वोः । मा नो अस्मिन्महाधने परा
वर्क्तं गविष्टिषु ॥७॥ इंद्राग्नी तपंति माघा अर्यो अरातयः ।
अप द्वेषांस्या कृतं युयुतं सूर्यादधि ॥८॥ इंद्राग्नी युवोरपि
वसु दिव्यानि पार्थिवा । आ न इह प्र यच्छतं रयिं विश्वायु-
पोषसं ॥९॥ इंद्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता । वि-
श्वाभिर्गीर्भिरा गतमस्य सोमस्य पीतये ॥१०॥२६॥

॥ ६० ॥ १–१५ भरद्वाजो बार्हस्पत्यः ॥ इंद्राग्नी ॥ १–३. १३ त्रिष्टुप् । ४–१२ गायत्री । १४ बृहती । १५ अनुष्टुप् ॥

॥६०॥ श्नथद्वृत्रमुत सनोति वाजमिंद्रा यो अग्नी सहुरी स-
पर्यात् । इरज्यंता वसव्यस्य भूरेः सहस्तमा सहसा वाजयंता ॥१॥
ता योधिष्टमभि गा इंद्र नूनमपः स्वरुषसो अग्न ऊळ्हाः । दिशः
स्वरुषस इंद्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ॥२॥ आ
वृत्रहणा वृत्रहभिः शुष्मैरिंद्र यातं नमोभिरग्ने अर्वाक् । युवं
राधोभिरकवेभिरिंद्राग्ने अस्मे भवतमुत्तमेभिः ॥३॥ ता

हुवे ययोरिदं पप्रे विश्वं पुरा कृतं। इंद्राग्नी न मर्धतः ॥४॥ उग्रा
विघनिना मृध इंद्राग्नी हवामहे। ता नो मृळात ईदृशे ॥५॥२७॥
हतो वृत्राण्यार्या हतो दासानि सत्पती। हतो विश्वा अप
द्विषः ॥६॥ इंद्राग्नी युवामिमे३भि स्तोमा अनूषत। पिबतं
शंभुवा सुतं ॥७॥ या वां संति पुरुस्पृहो नियुतो दाशुषे नरा।
इंद्राग्नी ताभिरा गतं ॥८॥ ताभिरा गच्छतं नरोपेदं सवनं सुतं।
इंद्राग्नी सोमपीतये ॥९॥ तमीळिष्व यो अर्चिषा वना वि-
श्वा परिष्वजत्। कृष्णा कृणोति जिह्वया ॥१०॥२८॥ य इद्ध
आविवासति सुम्नमिंद्रस्य मर्त्यः। द्युम्नाय सुतरा अपः ॥११॥ ता
नो वाजवतीरिष आशून्पिपृतमर्वतः। इंद्रमग्निं च वोळ्हवे
॥१२॥ उभा वामिंद्राग्नी आहुवध्या उभा राधसः सह मादयध्यै।
उभा दातारविषां रयीणामुभा वाजस्य सातये हुवे वां ॥१३॥
आ नो गव्येभिरश्व्यैर्वसव्यै३रुप गच्छतं। सखायौ देवौ सख्याय
शंभुवेंद्राग्नी ता हवामहे ॥१४॥ इंद्राग्नी शृणुतं हवं यजमानस्य
सुन्वतः। वीतं हव्यान्या गतं पिबतं सोम्यं मधु ॥१५॥२९॥

॥ ६१ ॥ १-१४ भरद्वाजो बार्हस्पत्यः ॥ सरस्वती ॥ १-३. १३ जगती । ४-१२ गायत्री । १४ त्रिष्टुप् ॥

॥६१॥ इयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय
दाशुषे। या शश्वंतमाचखादावसं पणिं ता ते दात्राणि
तविषा सरस्वति ॥१॥ इयं शुष्मेभिर्बिसखा इवारुजत्सानु
गिरीणां तविषेभिरूर्मिभिः। पारावतघ्नीमवसे सुवृक्तिभिः
सरस्वतीमा विवासेम धीतिभिः ॥२॥ सरस्वति देवनिदो नि
बर्हय प्रजां विश्वस्य बृसयस्य मायिनः। उत क्षितिभ्योऽवनी-
रविंदो विषमेभ्यो अस्रवो वाजिनीवति ॥३॥ प्र णो देवी सर-

स्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ॥ ४ ॥ यस्त्वा
देवि सरस्वत्युपब्रूते धने हिते । इंद्रं न वृत्रतूर्ये ॥ ५ ॥ ३० ॥ त्वं
देवि सरस्वत्यवा वाजेषु वाजिनि । रदा पूषेव नः सनिं ॥ ६ ॥
उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः । वृत्रघ्नी वष्टि सु-
ष्टुतिं ॥ ७ ॥ यस्या अनंतो अह्रुतस्त्वेषश्चरिष्णुरर्णवः । अमश्चरति
रोरुवत् ॥ ८ ॥ सा नो विश्वा अति द्विषः स्वसॄरन्या ऋतावरी ।
अतन्नहेव सूर्यः ॥ ९ ॥ उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा ।
सरस्वती स्तोम्या भूत् ॥ १० ॥ ३१ ॥ आपप्रुषी पार्थिवान्युरु रजो
अंतरिक्षं । सरस्वती निदस्पातु ॥ ११ ॥ त्रिषधस्था सप्तधातुः
पंच जाता वर्धयंती । वाजेवाजे हव्या भूत् ॥ १२ ॥ प्र या महि-
म्ना महिनासु चेकिते द्युम्नेभिरन्या अपसामपस्तमा । रथ इव
बृहती विभ्वने कृतोपस्तुत्या चिकितुषा सरस्वती ॥ १३ ॥
सरस्वत्यभि नो नेषि वस्यो माप स्फरीः पयसा मा न आ
धक् । जुषस्व नः सख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि
गन्म ॥ १४ ॥ ३२ ॥ ८ ॥ ४ ॥ ५ ॥

॥ ६२ ॥ १-११ भरद्वाजो बार्हस्पत्यः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥ ६२ ॥ स्तुषे नरा दिवो अस्य प्रसंताश्विना हुवे जरमाणो
अर्कैः । या सद्य उस्रा व्युषि ज्मो अंतान्युयूषतः पर्युरू वरांसि
॥ १ ॥ ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू
रजोभिः । पुरू वरांस्यमिता मिमानापो धन्वान्यति याथो
अज्रान् ॥ २ ॥ ता ह त्यद्वर्तिर्यदरध्रमुग्रेत्था धियं ऊहथुः शश्व-
दश्वैः । मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य
॥ ३ ॥ ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानस-
प्ती । शुभं पृक्षमिषमूर्जं वहंता होता यक्षत्प्रत्नो अध्रुग्यु-

वाना ॥४॥ ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा व-
चसा विवासे । या शंसते स्तुवते शंभविष्ठा बभूवतुर्गृणते
चित्रराती ॥५॥१॥ ता भुज्युं विभिरद्भ्यः समुद्रात्तुग्रस्य सूनुमू-
हथू रजोभिः । अरेणुभिर्योजनेभिर्भुजंता पतत्रिभिरर्णसो नि-
रुपस्थात् ॥६॥ वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा
वध्रिमत्याः । दशस्यंता शयवे पिप्यथुर्गामिति च्यवाना
सुमतिं भुरण्यू ॥७॥ यद्रोदसी प्रदिवो अस्ति भूमा हेळो
देवानामुत मर्त्यत्रा । तदादित्या वसवो रुद्रियासो रक्षोयुजे
तपुरघं दधात ॥८॥ य ईं राजानावृतुथा विदधद्रजसो मित्रो
वरुणश्चिकेतत् । गंभीराय रक्षसे हेतिमस्य द्रोघाय चिद्वचस
आनवाय ॥९॥ अंतरैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता
रथेन । सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तं
॥१०॥ आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिर-
र्वाक् । दृळ्हस्य चिद्गोमतो वि व्रजस्य दुरो वर्तं गृणते
चित्रराती ॥११॥२॥

॥ ६३ ॥ १-११ भरद्वाजो बार्हस्पत्यः ॥ अश्विनौ ॥ १-१० त्रिष्टुप् । ११ एकपदा ॥

॥६३॥ क्व१त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नम-
स्वान् । आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य
मन्मन् ॥१॥ अरं मे गंतं हवनायास्मै गृणाना यथा पिबाथो
अंधः । परि ह त्यद्वर्तिर्याथो रिषो न यत्परो नांतरस्तुतुर्यात्
॥२॥ अकारि वामंधसो वरीमन्नस्तारि बर्हिः सुप्रायणतमं ।
उत्तानहस्तो युवयुर्ववंदा वां नक्षंतो अद्रय आंजन् ॥३॥
ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जूर्णिनी घृताची ।
प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन् ॥४॥

अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिं । प्र
मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन्यज्ञियानां ॥५॥३॥
युवं श्रीभिर्दर्शताभिराभिः शुभे पुष्टिमूहथुः सूर्यायाः । प्र वां
वयो वपुषेऽनु पप्तन्नक्षद्वाणी सुष्टुता धिष्ण्या वां ॥६॥ आ
वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहंतु । प्र वां
रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः ॥७॥ पुरु
हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसक्रां । स्तुतश्च
वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन् ॥८॥ उत
म ऋज्रे पुरयस्य रघ्वी सुमीळ्हे शतं पेरुके च पक्का । शांडो
दाद्धिरणिनः स्मद्दिष्टीन्दश वशासो अभिषाच ऋष्वान् ॥९॥
सं वां शता नासत्या सहस्राश्वानां पुरुपंथा गिरे दात् । भर-
द्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः ॥१०॥
आ वां सुम्ने वरिमन्त्सूरिभिः ष्यां ॥११॥४॥

॥ ६४ ॥ १-६ भरद्वाजो बार्हस्पत्यः ॥ उषाः ॥ त्रिष्टुप् ॥

॥६४॥ उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो
रुशंतः । कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा
मघोनी ॥१॥ भद्रा ददृक्ष उर्विया वि भास्युत्ते शोचिर्भानवो
द्यामपप्तन् । आविर्वक्षः कृणुषे शुंभमानोषो देवि रोचमा-
ना महोभिः ॥२॥ वहंति सीमरुणासो रुशंतो गावः सुभगा-
मुर्विया प्रथानां । अपेजते शूरो अस्तेव शत्रून्बाधते तमो
अजिरो न वोळ्हा ॥३॥ सुगोत ते सुपथा पर्वतेष्ववाते
अपस्तरसि स्वभानो । सा न आ वह पृथुयामन्नृष्वे रयिं
दिवो दुहितरिषयध्यै ॥४॥ सा वह योक्षभिरवातोषो वरं
वहसि जोषमनु । त्वं दिवो दुहितर्या ह देवी पूर्वहूतौ मंहना

दर्शता भूः ॥५॥ उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ। अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥६॥५॥

॥ ६५ ॥ १–६ भरद्वाजो बार्हस्पत्यः ॥ उषाः ॥ त्रिष्टुप् ॥

॥ ६५ ॥ एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छंती मानुषीरजीगः। या भानुना रुशता राम्यास्वज्ञायि तिरस्तमसश्चिदक्तून् ॥१॥ वि तद्ययुररुणयुग्भिरश्वैश्चित्रं भांत्युषसश्चंद्ररथाः। अग्रं यज्ञस्य बृहतो नयंतीर्वि ता बाधंते तम ऊर्म्यायाः ॥२॥ श्रवो वाजमिषमूर्जं वहंतीर्नि दाशुषं उषसो मर्त्याय। मघोनीर्वीरवत्पत्यमाना अवो धात विधते रत्नमद्य ॥३॥ इदा हि वो विधते रत्नमस्तीदा वीराय दाशुषं उषासः। इदा विप्राय जरते यदुक्था नि ष्म मावते वहथा पुरा चित् ॥४॥ इदा हि तं उषो अद्रिसानो गोत्रा गवामंगिरसो गृणंति। व्य१र्केण बिभिदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः ॥५॥ उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद्विधते मघोनि। सुवीरं रयिं गृणते रिरीह्युरुगायमधि धेहि श्रवो नः ॥६॥६॥

॥ ६६ ॥ १–११ भरद्वाजो बार्हस्पत्यः ॥ मरुतः ॥ त्रिष्टुप् ॥

॥ ६६ ॥ वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानं। मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः ॥१॥ ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वावृधंत। अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन् ॥२॥ रुद्रस्य ये मीळ्हुषः संति पुत्रा यांश्चो नु दाधृविर्भरध्यै। विदे हि माता महो मही षा सेत्पृश्निः सुभ्वे३ गर्भमाधात् ॥३॥ न य ईषंते जनुषोऽया न्व१ंतः संतोऽवद्यानि पुनानाः। नि-

यद्दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ॥४॥ मक्षू
न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः । न ये
स्तौना अयासो मह्ना नू चित्सुदानुरव यासदुग्रान् ॥५॥७॥ त
इदुग्राः शवसा धृष्णुषेणा उभे युजंत रोदसी सुमेके । अध
स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः ॥६॥ अनेनो
वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः । अनवसो अ-
नभीशू रजस्तूर्वि रोदसी पथ्या याति साधन् ॥७॥ नास्य
वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ । तोके वा
गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः ॥८॥ प्र चि-
त्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वं । ये सहांसि
सहसा सहंते रेजंते अग्ने पृथिवी मखेभ्यः ॥९॥ त्विषीमंतो
अध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वो३ नाग्नेः । अर्चत्रयो धुनयो
न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥१०॥ तं वृधंतं मारुतं
भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे । दिवः शर्धाय शुचयो
मनीषा गिरयो नाप उग्रा अस्पृध्रन् ॥११॥८॥

॥ ६७ ॥ १–११ भरद्वाजो बार्हस्पत्यः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥ ६७ ॥ विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा
वावृधध्यै । सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बा-
हुभिः स्वैः ॥१॥ इयं मद्वां प्र स्तृणीते मनीषोप प्रिया नमसा
बर्हिरच्छ । यंतं नो मित्रावरुणावधृष्टं छर्दिर्यद्वां वरूथ्यं सु-
दानू ॥२॥ आ यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा
हूयमाना । सं यावप्नःस्थो अपसेव जनाञ्छ्रुधीयतश्चिद्यत-
थो महित्वा ॥३॥ अश्वा न या वाजिना पूतबंधू ऋता यद्ग-
र्भमदितिर्भरध्यै । प्र या महि महांता जायमाना घोरा मर्ताय

रिपवे नि दीधः ॥४॥ विश्वे यद्वां मंहना मंदमानाः क्षत्रं देवासो
अदधुः सजोषाः। परि यद्भूथो रोदसी चिदुर्वी संति स्पशो अ-
दब्धासो अमूराः ॥५॥९॥ ता हि क्षत्रं धारयेथे अनु द्यून्दृंहेथे सा-
नुमुपमादिव द्योः। दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां
धासिनायोः ॥६॥ ता विग्रं धैथे जठरं पृणध्या आ यत्सद्म सभृ-
तयः पृणंति। न मृष्यंते युवतयोऽवाता वि यत्पयो विश्वजिन्वा
भरंते ॥७॥ ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरति-
र्ऋते भूत्। तद्वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः
॥८॥ प्र यद्वां मित्रावरुणा स्पूर्धन्प्रिया धाम युवधिता मिनंति।
न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ॥९॥
वि यद्वाचं कीस्तासो भरंते शंसंति के चिन्निविदो मनानाः।
आद्वां ब्रवाम सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा ॥१०॥
अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु।
अनु यद्गावः स्फुरानृजिप्यं धृष्णुं यद्रणे वृषणं युनजन् ॥११॥१०॥

॥ ६८ ॥ १–११ भरद्वाजो बार्हस्पत्यः ॥ इंद्रावरुणौ ॥ १–८, ११ त्रिष्टुप्; ९, १० जगती ॥

॥ ६८ ॥ श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद्वृक्तबर्हिषो
यजध्यै। आ य इंद्रावरुणाविषे अद्य महे सुम्नाय मह आव-
वर्तत् ॥१॥ ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता
हि भूतं। मघोनां मंहिष्ठा तुविशुष्म ऋतेन वृत्रतुरा सर्वसेना
॥२॥ ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिंद्रावरुणा चकाना।
वज्रेणान्यः शवसा हंति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः ॥३॥
ग्नाश्च यन्नरश्च वावृधंत विश्वे देवासो नरां स्वगूर्ताः। प्रैभ्य
इंद्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी ॥४॥ स इत्सु-

दानुः स्ववाँ ऋतावेंद्रा यो वां वरुण दाशति त्मन्। इषा स द्विषस्तरेद्दास्वान्वंसद्रयिं रयिवतश्च जनान् ॥ ५ ॥ ११ ॥ यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमंतं पुरुक्षुं। अस्मे स इंद्रावरुणावपि ष्यात्प्र यो भनक्ति वनुषामशस्तीः ॥ ६ ॥ उत नः सुत्रात्रो देवगोपाः सूरिभ्य इंद्रावरुणा रयिः ष्यात्। येषां शुष्मः पृतनासु साह्वान्प्र सद्यो द्युम्ना तिरते ततुरिः ॥ ७ ॥ नू न इंद्रावरुणा गृणाना पृंक्तं रयिं सौश्रवसाय देवा। इत्था गृणंतो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ॥ ८ ॥ प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः। अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा ॥ ९ ॥ इंद्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता। युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये ॥ १० ॥ इंद्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथां। इदं वामंधः परिषिक्तमस्मे आसद्यास्मिन्बर्हिषि मादयेथां ॥ ११ ॥ १२ ॥

॥ ६९ ॥ १–८ भरद्वाजो बार्हस्पत्यः ॥ इंद्राविष्णू ॥ त्रिष्टुप् ॥

॥ ६९ ॥ सं वां कर्मणा समिषा हिनोमींद्राविष्णू अपसस्पारे अस्य। जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयंता ॥ १ ॥ या विश्वासां जनितारा मतीनामिंद्राविष्णू कलशा सोमधाना। प्र वां गिरः शस्यमाना अवंतु प्र स्तोमासो गीयमानासो अर्कैः ॥ २ ॥ इंद्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना। सं वामंजंत्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः ॥ ३ ॥ आ वामश्वासो अभिमातिषाह इंद्राविष्णू सधमादो वहंतु। जुषेथां विश्वा हवना मतीनामुप ब्रह्माणि शृ-

णुतं गिरो मे ॥ ४ ॥ इंद्राविष्णू तत्पनयाय्यं वां सोमस्य मद उरु चक्रमाथे । अकृणुतमंतरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ॥ ५ ॥ इंद्राविष्णू हविषा वावृधानाग्राद्वाना नमसा रातहव्या । घृतासुती द्रविणं धत्तमस्मे समुद्रः स्थः कलशः सोमधानः ॥ ६ ॥ इंद्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथां । आ वामंधांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे ॥ ७ ॥ उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः । इंद्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथां ॥ ८ ॥ १३ ॥

॥ ७० ॥ १-६ भरद्वाजो बार्हस्पत्यः ॥ द्यावापृथिव्यौ ॥ जगती ॥

॥ ७० ॥ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा । द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ १ ॥ असश्चंती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते । राजंती अस्य भुवनस्य रोदसी अस्मे रेतः सिंचतं यन्मनुर्हितं ॥ २ ॥ यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति । प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता ॥ ३ ॥ घृतेन द्यावापृथिवी अभीवृते घृतश्रिया घृतपृचा घृतावृधा । उर्वी पृथ्वी होतृवूर्ये पुरोहिते ते इद्विप्रा ईळते सुम्नमिष्टये ॥ ४ ॥ मधु नो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते । दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यं ॥ ५ ॥ ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा । संरराणे रोदसी विश्वशंभुवा सनिं वाजं रयिमस्मे समिन्वतां ॥ ६ ॥ १४ ॥

॥ ७१ ॥ १–६ भरद्वाजो बार्हस्पत्यः ॥ सविता ॥ १–३ जगती । ४–६ त्रिष्टुप् ॥

॥७१॥ उदु ष्य देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुक्रतुः। घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणि ॥१॥ देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने। यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः ॥२॥ अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयं। हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशंस ईशत ॥३॥ उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात्। अयोहनुर्यजतो मंद्रजिह्व आ दाशुषे सुवति भूरि वामं ॥४॥ उदू अयाँ उपवक्तेव बाहू हिरण्यया सविता सुप्रतीका। दिवो रोहांस्यरुहत्पृथिव्या अरीरमत्पतयत्कच्चिदभ्वं ॥५॥ वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः। वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥ ६ ॥ १५ ॥

॥ ७२ ॥ १–५ भरद्वाजो बार्हस्पत्यः ॥ इंद्रासोमौ ॥ त्रिष्टुप् ॥

॥७२॥ इंद्रासोमा महि तद्वां महित्वं युवं महानि प्रथमानि चक्रथुः। युवं सूर्यं विविदथुर्युवं स्व१र्विश्वा तमांस्यहतं निदश्च ॥१॥ इंद्रासोमा वासयथ उषासमुत्सूर्यं नयथो ज्योतिषा सह। उप द्यां स्कंभथुः स्कंभनेनाप्रथतं पृथिवीं मातरं वि ॥२॥ इंद्रासोमावहिमपः परिष्ठां हथो वृत्रमनु वां द्यौरमन्यत। प्रार्णांस्यैरयतं नदीनामा समुद्राणि पप्रथुः पुरूणि ॥ ३ ॥ इंद्रासोमा पक्वमामास्वंतर्नि गवामिद्दधथुर्वक्षणासु। जगृभथुरनपिनद्धमासु रुशच्चित्रासु जगतीष्वंतः ॥ ४ ॥ इंद्रासोमा युवमंग तरुत्रमपत्यसाचं श्रुत्यं रराथे। युवं शुष्मं नर्यं चर्षणिभ्यः सं विव्यथुः पृतनाषाहमुग्रा ॥ ५ ॥ १६ ॥

॥ ७३ ॥ १–३ भरद्वाजो बार्हस्पत्यः ॥ बृहस्पतिः ॥ त्रिष्टुप् ॥

॥७३॥ यो अद्रिभित्प्रथमजा ऋतावा बृहस्पतिरांगिरसो ह-
विष्मान्। द्विबर्हज्मा प्राघर्मसत्पिता न आ रोदसी वृषभो रो-
रवीति ॥१॥ जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ च-
कार। घ्नन्वृत्राणि वि पुरो दर्दरीति जयञ्छत्रूँरमित्रान्पृत्सु साहन्
॥२॥ बृहस्पतिः समजयद्वसूनि महो व्रजान्गोमतो देव एषः।
अपः सिषासन्त्स्व१रप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥३॥१७॥

॥ ७४ ॥ १–४ भरद्वाजो बार्हस्पत्यः ॥ सोमारुद्रौ ॥ त्रिष्टुप् ॥

॥७४॥ सोमारुद्रा धारयेथामसुर्यं१ प्र वामिष्टयोऽरमश्नुवंतु।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥१॥
सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि संतु ॥२॥
सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तं। अव स्यतं
मुंचतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥३॥ तिग्मा-
युधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः। प्र नो
मुंचतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥४॥१८॥

॥ ७५ ॥ १–१९ पायुर्भारद्वाजः ॥ १ वर्म। २ धनुः। ३ ज्या। ४ आर्त्नी। ५ इषुधिः। ६[1] सारथिः। ६[2] रश्मयः। ७ अश्वाः। ८ रथः। ९ रथगोपाः। १० लिंगोक्तदेवताः। ११. १२. १५. १६ इषवः। १३ प्रतोदः। १४ हस्तघ्नः। १७–१९ लिंगोक्तदेवताः संग्रामाशिषः (१७ युद्धभूमिर्ब्रह्मणस्पतिरदितिश्च। १८ कवचसोमवरुणाः। १९ देवा ब्रह्म च) ॥ १–५. ७–९. ११. १४. १८ त्रिष्टुप्। ६. १० जगती। १२. १३. १५. १६. १९ अनुष्टुप्। १७ पंक्तिः ॥

॥७५॥ जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामु-
पस्थे। अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पि-
पर्तु ॥१॥ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो
जयेम। धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो ज-

येम ॥ २ ॥ वक्ष्यंतीवेदा गनीगंति कर्णं प्रियं सखायं परिष-
स्वजाना । योषेव शिंक्ते वितताधि धन्वञ्ज्या इयं समने
पारयंती ॥ ३ ॥ ते आचरंती समनेव योषा मातेव पुत्रं
बिभृतामुपस्थे । अप शत्रून्विध्यतां संविदाने आर्त्नी इमे
विष्फुरंती अमित्रान् ॥ ४ ॥ बह्वीनां पिता बहुरस्य पुत्र-
श्चिंश्चा कृणोति समनावगत्य । इषुधिः संकाः पृतनाश्च
सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ ५ ॥ १९ ॥ रथे तिष्ठन्नयति
वाजिनः पुरो यत्रयत्र कामयते सुषारथिः । अभीशूनां म-
हिमानं पनायत मनः पश्चादनु यच्छंति रश्मयः ॥ ६ ॥ तीव्रा-
न्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयंतः । अव-
क्रामंतः प्रपदैरमित्रान्क्षिणंति शत्रूँरनपव्ययंतः ॥ ७ ॥ रथवा-
हनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म । तत्रा रथमुप
शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ॥ ८ ॥ स्वादुषंसदः
पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवंतो गभीराः । चित्रसेना
इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥ ९ ॥ ब्राह्मणा-
सः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा । पू-
षा नः पातु दुरिताहृतावृधो रक्षा माकिर्नो अघशंस ईशत
॥ १० ॥ २० ॥ सुपर्णं वस्ते मृगो अस्या दंतो गोभिः संनद्धा पत-
ति प्रसूता । यत्रा नरः सं च वि च द्रवंति तत्रास्मभ्यमिषवः
शर्म यंसन् ॥ ११ ॥ ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः ।
सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥ १२ ॥ आ जंघं-
ति सान्वेषां जघनाँ उप जिघ्नते । अश्वाजनि प्रचेतसोऽश्वा-
न्समत्सु चोदय ॥ १३ ॥ अहिरिव भोगैः पर्येति बाहुं ज्याया
हेतिं परिबाधमानः । हस्तघ्नो विश्वा वयुनानि विद्वान्पु-

मान्युमांसं परि पातु विश्वतः ॥१४॥ आलाक्ता या रुरुशी-
र्ष्ण्यथो यस्या अयो मुखं । इदं पर्जन्यरेतस इष्वै देव्यै बृह-
न्नमः ॥१५॥२१॥ अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।
गच्छामित्रान्प्र पद्यस्व मामीषां कं चनोच्छिषः ॥१६॥ यत्र
बाणाः संपतंति कुमारा विशिखा इव । तत्रा नो ब्रह्मणस्प-
तिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥१७॥ मर्माणि
ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्तां । उरो-
र्वरीयो वरुणस्ते कृणोतु जयंतं त्वानु देवा मदंतु ॥१८॥ यो
नः स्वो अरणो यश्च निष्ट्यो जिघांसति । देवास्तं सर्वे धूर्वंतु
ब्रह्म वर्म ममांतरं ॥१९॥२२॥६॥६॥

॥ इति षष्ठं मंडलं समाप्तं ॥

॥ संहितापाठः ॥

॥ ओं ॥

॥१॥ १–२५ वसिष्ठः ॥ अग्निः ॥ १–१८ विराट् । १९–२५ त्रिष्टुप् ॥

॥१॥ अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयंत प्र-
शस्तं। दूरेदृशं गृहपतिमथर्युं ॥१॥ तमग्निमस्ते वसवो न्यृण्वन्सु-
प्रतिचक्षमवसे कुतश्चित्। दक्षाय्यो यो दम आस नित्यः ॥२॥
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ। त्वां शश्वंत
उप यंति वाजाः ॥३॥ प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः
शोशुचंत द्युमंतः। यत्रा नरः समासते सुजाताः ॥४॥ दा नो अग्ने
धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तं। न यं यावा तरति या-
तुमावान् ॥५॥२३॥ उप यमेति युवतिः सुदक्षं दोषा वस्तोर्ह-
विष्मती घृताची। उप स्वैनमरमतिर्वसूयुः ॥६॥ विश्वा अग्नेऽप
दहारातीर्येभिस्तपोभिरदहो जरूथं। प्र निस्वरं चातयस्वामी-
वां ॥७॥ आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पा-
वक। उतो न एभिः स्तवथैरिह स्याः ॥८॥ वि ये ते अग्ने भेजिरे
अनीकं मर्ता नरः पित्र्यासः पुरुत्रा। उतो न एभिः सुमना इह
स्याः ॥९॥ इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि संतु मा-
याः। ये मे धियं पनयंत प्रशस्तां ॥१०॥२४॥ मा शूने अग्ने नि
षदाम नृणां माशेषसोऽवीरता परि त्वा। प्रजावतीषु दुर्यासु दुर्य
॥११॥ यमश्वी नित्यमुपयाति यज्ञं प्रजावंतं स्वपत्यं क्षयं नः। स्व-
जन्मना शेषसा वावृधानं ॥१२॥ पाहि नो अग्ने रक्षसो अजुष्टा-

त्पाहि धूर्तेरररुषो अघायोः । त्वा युजा पृतनायूँरभि ष्यां
॥१३॥ सेदग्निरग्नीँरत्यस्त्वन्यान्यत्र वाजी तनयो वीळुपा-
णिः । सहस्रपाथा अक्षरा समेति ॥१४॥ सेदग्निर्यो वनुष्यतो
निपाति समेद्धारमंहस उरुष्यात् । सुजातासः परि चरंति
वीराः ॥१५॥२५॥ अयं सो अग्निराहुतः पुरुत्रा यमीशा-
नः समिदिंधे हविष्मान् । परि यमेत्यध्वरेषु होता ॥१६॥
त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या । उभा
कृण्वंतो वहतू मियेधे ॥१७॥ इमो अग्ने वीततमानि हव्या-
जस्रो वक्षि देवतातिमच्छ । प्रति न ईं सुरभीणि व्यंतु ॥१८॥
मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै ।
मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ
जुहूर्थाः ॥१९॥ नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः
सुषूदः । रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः
सदा नः ॥२०॥२६॥ त्वमग्ने सुहवो रण्वसंदृक्सुदीती सूनो
सहसो दिदीहि । मा त्वे सचा तनये नित्य आ धङ्मा वीरो
अस्मन्नर्यो वि दासीत् ॥२१॥ मा नो अग्ने दुर्भृतये सचैषु
देवेद्धेष्वग्निषु प्र वोचः । मा ते अस्मान्दुर्मतयो भृमाच्चिद्दे-
वस्य सूनो सहसो नशंत ॥२२॥ स मर्तो अग्ने स्वनीक
रेवानमर्त्ये य आजुहोति हव्यं । स देवता वसुवनिं दधाति
यं सूरिरर्थी पृच्छमान एति ॥२३॥ महो नो अग्ने सुवितस्य
विद्वान्रयिं सूरिभ्य आ वहा बृहंतं । येन वयं सहसावन्मदे-
माविक्षितास आयुषा सुवीराः ॥२४॥ नू मे ब्रह्माण्यग्न
उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः । रातौ स्यामोभयास
आ ते यूयं पात स्वस्तिभिः सदा नः ॥२५॥२७॥१॥

॥ २ ॥ १–११ वसिष्ठः ॥ आप्रं ॥ त्रिष्टुप् ॥

॥२॥ जुषस्व नः समिधमग्ने अद्य शोचा बृहद्यजतं धूममृण्वन्।
उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस्ततनः सूर्यस्य ॥१॥ न-
राशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः। ये सुक्रत-
वः शुचयो धियंधाः स्वदंति देवा उभयानि हव्या॥२॥ ईळेन्यं वो
असुरं सुदक्षमंतर्दूतं रोदसी सत्यवाचं। मनुष्वदग्निं मनुना स-
मिद्धं समध्वराय सदमिन्महेम ॥३॥ सपर्यवो भरमाणा अभिज्ञु
प्र वृंजते नमसा बर्हिरग्नौ। आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो
हविषा मर्जयध्वं ॥४॥ स्वाध्यो३ वि दुरो देवयंतोऽशिश्रयू रथ-
युर्देवताता। पूर्वी शिशुं न मातरा रिहाणे समग्रुवो न सम-
नेष्वंजन्॥५॥१॥ उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव
धेनुः। बर्हिषदा पुरुहूते मघोनी आ यज्ञिये सुविताय श्रयेतां॥६॥
विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै। ऊर्ध्वं
नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि॥७॥ आ भारती
भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः। सरस्वती सारस्व-
तेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदंतु ॥८॥ तन्नस्तुरीपमध पो-
षयित्नु देव त्वष्टर्वि रराणः स्यस्व। यतो वीरः कर्मण्यः सुदक्षो
युक्तग्रावा जायते देवकामः ॥९॥ वनस्पतेऽव सृजोप देवा-
नग्निर्हविः शमिता सूदयाति। सेदु होता सत्यतरो यजाति यथा
देवानां जनिमानि वेद॥१०॥ आ याह्यग्ने समिधानो अर्वाङिं-
द्रेण देवैः सरथं तुरेभिः। बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा
देवा अमृता मादयंतां ॥११॥२॥

॥ ३ ॥ १–१० वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥३॥ अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे

कृणुध्वं। यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥१॥ प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्। आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥२॥ उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरंत्यजरा इधानाः। अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥३॥ वि यस्य ते पृथिव्यां पाजो अश्रेत्तृषु यदन्ना समवृक्त जंभैः। सेनेव सृष्टा प्रसितिष्ट एति यवं न दस्म जुह्वा विवेक्षि ॥४॥ तमिद्दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयंत नरः। निशिशाना अतिथिमस्य योनौ दीदाय शोचिराहुतस्य वृष्णः ॥५॥३॥ सुसंदृक्ते स्वनीक प्रतीकं वि यद्रुक्मो न रोचस उपाके। दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूरः प्रति चक्षि भानुं ॥६॥ यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिश्च हव्यैः। तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि ॥७॥ या वा ते संति दाशुषे अधृष्टा गिरो वा याभिर्नृवतीरुरुष्याः। ताभिर्नः सूनो सहसो नि पाहि स्मत्सूरीञ्जरितॄञ्जातवेदः ॥८॥ निर्यत्पूतेव स्वधितिः शुचिर्गात्स्वया कृपा तन्वा३ रोचमानः। आ यो मात्रोरुशेन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः ॥९॥ एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम। विश्वा स्तोतृभ्यो गृणते च संतु यूयं पात स्वस्तिभिः सदा नः ॥१०॥४॥

॥ ४ ॥ १–१० वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥४॥ प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतं। यो दैव्यानि मानुषा जनूंष्यंतर्विश्वानि विद्मना जिगाति॥१॥ स

गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः । सं
यो वना युवते शुचिदन्भूरि चिदन्ना समिदत्ति सद्यः ॥२॥
अस्य देवस्य संसद्यनीके यं मर्तासः श्येतं जगृभ्रे । नि यो गृभं
पौरुषेयीमुवोच दुरोकमग्निरायवे शुशोच ॥३॥ अयं कविर-
कविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि । स मा नो अत्र जुहुरः
सहस्वः सदा त्वे सुमनसः स्याम ॥४॥ आ यो योनिं देवकृतं
ससाद क्रत्वा ह्यग्निरमृताँ अतारीत् । तमोषधीश्च वनिनश्च
गर्भं भूमिश्च विश्वधायसं बिभर्ति ॥५॥५॥ ईशे ह्यग्निरमृतस्य
भूरेरीशे रायः सुवीर्यस्य दातोः । मा त्वा वयं सहसावन्नवीरा
माप्सवः परि षदाम मादुवः ॥६॥ परिषद्यं ह्यरणस्य रेक्णो
नित्यस्य रायः पतयः स्याम । न शेषो अग्ने अन्यजातमस्त्य-
चेतानस्य मा पथो वि दुक्षः ॥७॥ नहि ग्रभायारणः सुशे-
वोऽन्योदर्यो मनसा मंतवा उ । अधा चिदोकः पुनरित्स एत्या
नो वाज्यभीषाळेतु नव्यः ॥८॥ त्वमग्ने वनुष्यतो नि पाहि
त्वमु नः सहसावन्नवद्यात् । सं त्वा ध्वस्मन्वदभ्येतु पाथः सं
रयिः स्पृहयाय्यः सहस्री ॥९॥ एता नो अग्ने सौभगा दि-
दीह्यपि क्रतुं सुचेतसं वतेम । विश्वा स्तोतृभ्यो गृणते च संतु
यूयं पात स्वस्तिभिः सदा नः ॥१०॥६॥

॥५॥ १–९ वसिष्ठः ॥ वैश्वानरः ॥ त्रिष्टुप् ॥

॥५॥ प्राग्नये तवसे भरध्वं गिरं दिवो अरतये पृथिव्याः । यो
विश्वेषाममृतानामुपस्थे वैश्वानरो वावृधे जागृवद्भिः ॥१॥
पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिंधूनां वृषभः स्तियानां ।
स मानुषीरभि विशो वि भाति वैश्वानरो वावृधानो वरेण ॥२॥

त्वद्भिया विश आयन्नसिक्नीरसमना जहतीर्भोजनानि। वैश्वा-
नर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः ॥३॥ तव त्रिधातु
पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचंत। त्वं भासा रोदसी आ
ततंथाजस्रेण शोचिषा शोशुचानः ॥४॥ त्वामग्ने हरितो वाव-
शाना गिरः सचंते धुनयो घृताचीः। पतिं कृष्टीनां रथ्यं रयीणां
वैश्वानरमुषसां केतुमह्नां ॥५॥७॥ त्वे असुर्यं१ वसवो न्यृण्वन्क्रतुं
हि ते मित्रमहो जुषंत। त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्ज-
नयन्नार्याय ॥६॥ स जायमानः परमे व्योमन्वायुर्न पाथः परि
पासि सद्यः। त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दश-
स्यन् ॥७॥ तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः।
यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय ॥८॥ तं
नो अग्ने मघवद्भ्यः पुरुक्षुं रयिं नि वाजं श्रुत्यं युवस्व। वैश्वानर
महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः ॥९॥८॥

॥ ६ ॥ १–७ वसिष्ठः ॥ वैश्वानरः ॥ त्रिष्टुप् ॥

॥६॥ प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमा-
द्यस्य। इंद्रस्येव प्र तवसस्कृतानि वंदे दारुं वंदमानो विवक्मि
॥१॥ कविं केतुं धासिं भानुमद्रेर्हिन्वंति शं राज्यं रोदस्योः।
पुरंदरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि ॥२॥
न्यक्रतून्ग्रथिनो मृध्रवाचः पणीँरश्रद्धाँ अवृधाँ अयज्ञान्।
प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून् ॥३॥
यो अपाचीने तमसि मदंतीः प्राचीश्चकार नृतमः शची-
भिः। तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयंतं
पृतन्यून् ॥४॥ यो देह्यो३ अनमयद्वधस्नैर्यो अर्यपत्नीरुषसं-

श्चकार। स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः ॥५॥ यस्य शर्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः। वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थं ॥६॥ आ देवो ददे बुध्न्या३ वसूनि वैश्वानर उदिता सूर्यस्य। आ समुद्रादवरादा परस्मादाग्निर्ददे दिव आ पृथिव्याः ॥७॥९॥

॥७॥ १–७ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७॥ प्र वो देवं चित्सहसानमग्निमश्वं न वाजिनं हिषे नमोभिः। भवा नो दूतो अध्वरस्य विद्वान्त्मना देवेषु विविदे मितद्रुः ॥१॥ आ याह्यग्ने पथ्या३ अनु स्वा मंद्रो देवानां सख्यं जुषाणः। आ सानु शुष्मैर्नदयन्पृथिव्या जंभेभिर्विश्वमुशधग्वनानि ॥२॥ प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता। आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः ॥३॥ सद्यो अध्वरे रथिरं जनंत मानुषासो विचेतसो य एषां। विशामधायि विश्पतिर्दुरोणे३ग्निर्मंद्रो मधुवचा ऋतावा ॥४॥ असादि वृतो वह्निराजगन्वानग्निर्ब्रह्मा नृषदने विधर्ता। द्यौश्च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारं ॥५॥ एते द्युम्नेभिर्विश्वमातिरंत मंत्रं ये वारं नर्या अतक्षन्। प्र ये विशस्तिरंत श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य ॥६॥ नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनां। इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः ॥७॥१०॥

॥८॥ १–७ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥८॥ इंधे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन।

नरो हव्येभिरीळते सबाध आग्निरग्र उषसामशोचि ॥१॥ अ-
यमु ष्य सुमहाँ अवेदि होता मंद्रो मनुषो यह्वो अग्निः। वि भा
अकः ससृजानः पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे ॥२॥ कया
नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः। कदा
भवेम पतयः सुदत्र रायो वंतारो दुष्टरस्य साधोः ॥३॥ प्रप्राय-
मग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः। अभि यः पूरुं
पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ॥४॥ असन्नित्त्वे
आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः। स्तुतश्चिदग्ने
शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ॥५॥ इदं वचः शत-
साः संसहस्रमुदग्नये जनिषीष्ट द्विबर्हाः। शं यत्स्तोतृभ्य आपये
भवाति द्युमदमीवचातनं रक्षोहा ॥६॥ नू त्वामग्न ईमहे व-
सिष्ठा ईशानं सूनो सहसो वसूनां। इषं स्तोतृभ्यो मघवद्भ्य
आनड्यूयं पात स्वस्तिभिः सदा नः ॥७॥११॥

॥ ९ ॥ १—६ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥९॥ अबोधि जार उषसामुपस्थाद्धोता मंद्रः कवितमः
पावकः। दधाति केतुमुभयस्य जंतोर्हव्या देवेषु द्रविणं सुकृत्सु
॥१॥ स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं
नः। होता मंद्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणां ॥२॥
अमूरः कविरदितिर्विवस्वान्सुसंसन्मित्रो अतिथिः शिवो
नः। चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्व१आ विवेश
॥३॥ ईळेन्यो वो मनुषो युगेषु समनगा अशुचज्जातवेदाः।
सुसंदृशा भानुना यो विभाति प्रति गावः समिधानं बु-
धंत ॥४॥ अग्ने याहि दूत्यं१मा रिषण्यो देवाँ अच्छा ब्रह्मकृता

गृणेन। सरस्वतीं मरुतो अश्विनापो यक्षि देवान्रत्नधेयाय वि-
श्वान् ॥ ५ ॥ त्वामग्ने समिधानो वसिष्ठो जरूथं हन्यक्षि राये
पुरंधिं। पुरुणीथा जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा
नः ॥ ६ ॥ १२ ॥

॥ १० ॥ १–५ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१०॥ उषो न जारः पृथु पाजो अश्रेद्दविद्युतद्दीद्यच्छोशुचा-
नः। वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजी-
गः ॥१॥ स्व१र्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न
मन्म। अग्निर्जन्मानि देव आ वि विद्वान्द्रवद्दूतो देवयावा वनि-
ष्ठः ॥२॥ अच्छा गिरो मतयो देवयंतीरग्निं यंति द्रविणं भिक्ष-
माणाः। सुसंदृशं सुप्रतीकं स्वंचं हव्यवाहमरतिं मानुषाणां ॥३॥
इंद्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहंतं। आदित्ये-
भिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारं ॥४॥ मंद्रं होता-
रमुशिजो यविष्ठमग्निं विश ईळते अध्वरेषु। स हि क्षपावाँ अ-
भवद्रयीणामतंद्रो दूतो यजथाय देवान् ॥ ५ ॥ १३ ॥

॥ ११ ॥ १–५ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ ११ ॥ महाँ अस्यध्वरस्य प्रकेतो न ऋते त्वदमृता मा-
दयंते । आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः
सदेह ॥ १ ॥ त्वामीळते अजिरं दूत्याय हविष्मंतः सदमिन्मा-
नुषासः । यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवं-
ति ॥ २ ॥ त्रिश्चिदक्तोः प्र चिकितुर्वसूनि त्वे अंतर्दाशुषे मर्त्याय।
मनुष्वदग्न इह यक्षि देवान्भवा नो दूतो अभिशस्तिपा-
वा ॥ ३ ॥ अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः

कृतस्यं। क्रतुं ह्यस्य वसवो जुषंताथा देवा दधिरे हव्यवाहं ॥४॥ आग्ने वह हविरद्याय देवानिंद्रज्येष्ठास इह मादयंतां। इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः ॥५॥१४॥

॥१२॥ १–३ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१२॥ अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे। चित्रभानुं रोदसी अंतरुर्वी स्वाहुतं विश्वतः प्रत्यंचं ॥१॥ स मह्ना विश्वा दुरितानि साह्वानग्निः ष्टवे दम आ जातवेदाः। स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥२॥ त्वं वरुण उत मित्रो अग्ने त्वां वर्धंति मतिभिर्वसिष्ठाः। त्वे वसु सुषणनानि संतु यूयं पात स्वस्तिभिः सदा नः ॥३॥१५॥

॥१३॥ १–३ वसिष्ठः ॥ वैश्वानरः ॥ त्रिष्टुप् ॥

॥१३॥ प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वं। भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनां ॥१॥ त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः। त्वं देवाँ अभिशस्तेरमुंचो वैश्वानर जातवेदो महित्वा ॥२॥ जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा। वैश्वानर ब्रह्मणे विंद गातुं यूयं पात स्वस्तिभिः सदा नः ॥३॥१६॥

॥१४॥ १–३ वसिष्ठः ॥ अग्निः ॥ १ बृहती। २. ३ त्रिष्टुप् ॥

॥१४॥ समिधा जातवेदसे देवाय देवहूतिभिः। हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये ॥१॥ वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र। वयं घृतेनाध्वरस्य

होतर्वेयं देव हविषा भद्रशोचे ॥२॥ आ नो देवेभिरुप देवहूति-
मग्ने याहि वषट्कृतिं जुषाणः । तुभ्यं देवाय दाशतः स्याम यूयं
पात स्वस्तिभिः सदा नः ॥ ३ ॥ १७ ॥

॥ १५ ॥ १–१५ वसिष्ठः ॥ अग्निः ॥ गायत्री ॥

॥ १५ ॥ उपसद्याय मीळ्हुष आस्ये जुहुता हविः । यो नो ने-
दिष्ठमाप्यं ॥१॥ यः पंच चर्षणीरभि निषसाद दमेदमे । कविर्गृह-
पतिर्युवा ॥२॥ स नो वेदो अमात्यमग्नी रक्षतु विश्वतः । उता-
स्मान्पात्वंहसः ॥३॥ नवं नु स्तोममग्नये दिवः श्येनाय जीजनं ।
वस्वः कुविद्वनाति नः ॥४॥ स्पार्हा यस्य श्रियो दृशे रयिर्वीर-
वतो यथा । अग्रे यज्ञस्य शोचतः ॥५॥१८॥ सेमां वेतु वषट्कृति-
मग्निर्जुषत नो गिरः । यजिष्ठो हव्यवाहनः ॥६॥ नि त्वा नक्ष्य
विश्पते द्युमंतं देव धीमहि । सुवीरमग्न आहुत ॥७॥ क्षप उस्रश्च
दीदिहि स्वग्नयस्त्वया वयं । सुवीरस्त्वमस्मयुः ॥८॥ उप त्वा सा-
तये नरो विप्रासो यंति धीतिभिः । उपाक्षरा सहस्रिणी ॥९॥
अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्यः
॥ १० ॥ १९ ॥ स नो राधांस्या भरेशानः सहसो यहो । भगश्च
दातु वार्यं ॥११॥ त्वमग्ने वीरवद्यशो देवश्च सविता भगः । दि-
तिश्च दाति वार्यं ॥ १२ ॥ अग्ने रक्षा णो अंहसः प्रति ष्म देव
रीषतः । तपिष्ठैरजरो दह ॥ १३ ॥ अधा मही न आयस्यना-
धृष्टो नृपीतये । पूर्भवा शतभुजिः ॥ १४ ॥ त्वं नः पाह्यंहसो दो-
षावस्तरघायतः । दिवा नक्तमदाभ्य ॥ १५ ॥ २० ॥

॥ १६ ॥ १–१२ वसिष्ठः ॥ अग्निः ॥ प्रागाथं ॥

॥ १६ ॥ एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं चे-

तिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतं ॥१॥ स योजते अरुषा वि-
श्वभोजसा स दुद्रवत्स्वाहुतः। सुब्रह्मा यज्ञः सुशमी वसूनां देवं
राधो जनानां ॥२॥ उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः।
उद्धूमासो अरुषासो दिविस्पृशः समग्निमिंधते नरः ॥३॥ तं त्वा
दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह। विश्वा सूनो सहसो
मर्तभोजना रास्व तद्यत्त्वेमहे ॥४॥ त्वमग्ने गृहपतिस्त्वं होता नो
अध्वरे। त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यं ॥५॥ कृधि
रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि। आ न ऋते शि-
शीहि विश्वमृत्विजं सुशंसो यश्च दक्षते ॥६॥२१॥ त्वे अग्ने स्वाहुत
प्रियासः संतु सूरयः। यंतारो ये मघवानो जनानामूर्वान्दयंत
गोनां ॥७॥ येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषी-
दति। तांस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत् ॥८॥
स मंद्रया च जिह्वया वह्निरासा विदुष्टरः। अग्ने रयिं मघवद्भ्यो
न आ वह हव्यदातिं च सूदय ॥९॥ ये राधांसि ददत्यश्व्या मघा
कामेन श्रवसो महः। ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्य-
विष्ठ्य ॥१०॥ देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचं।
उद्वा सिंचध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥११॥ तं हो-
तारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत। दधाति रत्नं विधते
सुवीर्यमग्निर्जनाय दाशुषे ॥१२॥२२॥

॥ १७ ॥ १–७ वसिष्ठः ॥ अग्निः ॥ द्विपदा त्रिष्टुप् ॥

॥१७॥ अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीतां ॥१॥ उत द्वार उशतीर्वि श्रयंतामुत देवाँ उशत आ वहेह ॥२॥ अग्ने वीहि हविषा यक्षि देवान्स्वध्वरा कृणुहि

जातवेदः ॥३॥ स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्पि-
प्रयच्च ॥४॥ वंस्व विश्वा वार्याणि प्रचेतः सत्या भवंत्वाशिषो
नो अद्य ॥५॥ त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ
नपातं ॥६॥ ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध
इयानः ॥७॥२३॥१॥

॥ १८ ॥ १–२५ वसिष्ठः ॥ १–२१ इंद्रः । २२–२५ सुदासः पैजवनस्य दानस्तुतिः ॥ त्रिष्टुप् ॥

॥१८॥ त्वे ह यत्पितरश्चिन्न इंद्र विश्वा वामा जरितारो अ-
सन्वन् । त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥१॥
राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन् । पिशा
गिरो मघवन्गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान् ॥२॥
इमा उ त्वा पस्पृधानासो अत्र मंद्रा गिरो देवयंतीरुप स्थुः ।
अर्वाची ते पथ्या राय एतु स्याम ते सुमताविंद्र शर्मन् ॥३॥
धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः । त्वामिन्मे
गोपतिं विश्व आहा न इंद्रः सुमतिं गंत्वच्छ ॥४॥ अर्णांसि
चित्पप्रथाना सुदास इंद्रो गाधान्यकृणोत्सुपारा । शर्धंतं शिम्यु-
मुचथस्य नव्यः शापं सिंधूनामकृणोदशस्तीः ॥५॥२४॥ पुरोळा
इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव । श्रुष्टिं
चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विषूचोः ॥६॥ आ
पक्थासो भलानसो भनंतालिनासो विषाणिनः शिवासः ।
आ योऽनयत्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा
नॄन् ॥७॥ दुराध्यो३ अदितिं स्रेवयंतोऽचेतसो वि जगृभ्रे
परुष्णीं । मह्नाविव्यक्पृथिवीं पत्यमानः पशुष्कविरशयच्चा-
यमानः ॥८॥ ईयुरर्थं न न्यर्थं परुष्णीमाशुश्चनेदभिपित्वं

जगाम । सुदास इंद्रः सुतुकाँ अमित्रानरंधयन्मानुषे व-
ध्रिवाचः ॥ ९ ॥ ईयुर्गावो न यवसादगोपा यथाकृतमभि
मित्रं चितासः । पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नि-
युतो रंतयश्च ॥ १० ॥ २५ ॥ एकं च यो विंशतिं च श्रवस्या
वैकर्णयोर्जनान्राजा न्यस्तः । दस्मो न सद्मन्नि शिशाति
बर्हिः शूरः सर्गमकृणोदिंद्र एषां ॥ ११ ॥ अध श्रुतं कवषं
वृद्धमप्स्वनु द्रुह्युं नि वृणग्वज्रबाहुः । वृणाना अत्र सख्याय
सख्यं त्वायंतो ये अमदन्ननु त्वा ॥ १२ ॥ वि सद्यो विश्वा
दृंहितान्येषामिंद्रः पुरः सहसा सप्त दर्दः । व्यानवस्य तृत्सवे
गयं भाग्जेष्म पूरुं विदथे मृध्रवाचं ॥ १३ ॥ नि गव्यवोऽनवो
द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा । षष्टिर्वीरासो अधि
षड् दुवोयु विश्वेदिंद्रस्य वीर्या कृतानि ॥ १४ ॥ इंद्रेणैते तृत्सवो
वेविषाणा आपो न सृष्टा अधवंत नीचीः । दुर्मित्रासः प्रक-
लविन्मिमाना जहुर्विश्वानि भोजना सुदासे ॥ १५ ॥ २६ ॥
अर्धं वीरस्य शृतपामनिंद्रं परा शर्धंतं नुनुदे अभि क्षां । इंद्रो
मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः ॥ १६ ॥
आध्रेण चित्तद्वेकं चकार सिंह्यं चित्पेत्वेना जघान । अव
स्रक्तीर्वेश्यावृश्चदिंद्रः प्रायच्छद्विश्वा भोजना सुदासे ॥ १७ ॥
शश्वंतो हि शत्रवो रारधुष्टे भेदस्य चिच्छर्धतो विंद रंधिं । मर्ताँ
एनः स्तुवतो यः कृणोति तिग्मं तस्मिन्नि जहि वज्रमिंद्र ॥ १८ ॥
आवदिंद्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वताता मुषायत् ।
अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि
॥ १९ ॥ न त इंद्र सुमतयो न रायः संचक्षे पूर्वा उषसो न
नूत्नाः । देवकं चिन्मान्यमानं जघंथाव त्मना बृहतः शंबरं भेत्

॥२०॥२७॥ प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः ।
न ते भोजस्य सख्यं मृषंताधा सूरिभ्यः सुदिना व्युच्छान् ॥२१॥ द्वे
नप्तुर्देववतः शते गोर्द्वा रथा वधूमंता सुदासः । अर्हन्नग्ने पैजव-
नस्य दानं होतेव सद्म पर्येमि रेभन् ॥२२॥ चत्वारो मा पैज-
वनस्य दानाः स्मद्दिष्टयः कृशनिनो निरेके । ऋज्रासो मा
पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहंति ॥२३॥ यस्य श्रवो
रोदसी अंतरुर्वी शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता । सप्तेदिंद्रं न
स्रवतो गृणंति नि युध्यामधिमशिशादभीके ॥२४॥ इमं नरो
मरुतः सश्चतानु दिवोदासं न पितरं सुदासः । अविष्टना पैज-
वनस्य केतं दूणाशं क्षत्रमजरं दुवोयु ॥२५॥२८॥

॥ १९ ॥ १–११ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१९॥ यस्तिग्मशृंगो वृषभो न भीम एकः कृष्टीश्च्यावयति
प्र विश्वाः । यः शश्वतो अदाशुषो गयस्य प्रयंतासि सुष्वि-
तराय वेदः ॥१॥ त्वं ह त्यदिंद्र कुत्समावः शुश्रूषमाणस्तन्वा
समर्ये । दासं यच्छुष्णं कुयवं न्यस्मा अरंधय आर्जुनेयाय
शिक्षन् ॥२॥ त्वं धृष्णो धृषता वीतहव्यं प्रावो विश्वाभिरू-
तिभिः सुदासं । प्र पौरुकुत्सिं त्रसदस्युमावः क्षेत्रसाता वृत्र-
हत्येषु पूरुं ॥३॥ त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व
हंसि । त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सु-
हंतु ॥४॥ तव च्यौत्नानि वज्रहस्त तानि नव यत्पुरो नव-
तिं च सद्यः । निवेशने शततमाविवेषीरहन् च वृत्रं नमु-
चिमुताहन् ॥५॥२९॥ सना ता त इंद्र भोजनानि रातहव्याय
दाशुषे सुदासे । वृष्णे ते हरी वृषणा युनज्मि व्यंतु ब्रह्माणि पुरु-

शाक वाजं ॥६॥ मा ते अस्यां सहसावन्परिष्टावघाय भूम हरि-
वः परादै । त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम
॥७॥ प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः । नि
तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ॥८॥ सद्य-
श्चिन्नु ते मघवन्नभिष्टौ नरः शंसंत्युक्थशास उक्था । ये ते हवे-
भिर्वि पणीँरदाशन्नस्मान्वृणीष्व युज्याय तस्मै ॥९॥ एते स्तोमा
नरां नृतम तुभ्यमस्मद्र्यंचो ददतो मघानि । तेषामिंद्र वृत्रहत्ये
शिवो भूः सखा च शूरोऽविता च नृणां ॥१०॥ नू इंद्र शूर स्तव-
मान ऊती ब्रह्मजूतस्तन्वा वावृधस्व । उप नो वाजान्मिमीह्युप
स्तीन्यूयं पात स्वस्तिभिः सदा नः ॥११॥३०॥२॥

॥२०॥ १–१० वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२०॥ उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत्क-
रिष्यन् । जग्मिर्युवा नृषदनमवोभिस्त्राता न इंद्र एनसो
महश्चित् ॥१॥ हंता वृत्रमिंद्रः शूशुवानः प्रावीन्नु वीरो जरि-
तारमूती । कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा
दाशुषे भूत् ॥२॥ युध्मो अनर्वा खजकृत्समद्वा शूरः सत्राषाड्
जनुषेमषाळ्हः । व्यास इंद्रः पृतनाः स्वोजा अधा विश्वं
शत्रूयंतं जघान ॥३॥ उभे चिदिंद्र रोदसी महित्वा पप्राथ
तविषीभिस्तुविष्मः । नि वज्रमिंद्रो हरिवान्मिमिक्षन्समं-
धसा मदेषु वा उवोच ॥४॥ वृषा जजान वृषणं रणाय तमु
चिन्नारी नर्यं ससूव । प्र यः सेनानीरध नृभ्यो अस्तीनः सत्वा
गवेषणः स धृष्णुः ॥५॥१॥ नू चित्स भ्रेषते जनो न रेषन्मनो
यो अस्य घोरमाविवासात् । यज्ञैर्य इंद्रे दधते दुवांसि क्षयत्स

राय ऋतपा ऋतेजाः॥६॥ यदिंद्र पूर्वो अपराय शिक्षन्नयज्ज्या-
यान्कनीयसो देष्णं। अमृत इत्पर्यासीत दूरमा चित्र चित्र्यं भरा
रयिं नः॥७॥ यस्त इंद्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा
ते। वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघ्नतो नृपीतौ
॥८॥ एष स्तोमो अचिक्रदद्वृषा त उत स्तामुर्मघवन्नक्रपिष्ट। रा-
यस्कामो जरितारं त आगन्त्वमंग शक्र वस्व आ शको नः॥९॥
स न इंद्र त्वयताया इषे धास्त्मना च ये मघवानो जुनंति। वस्वी
षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः॥१०॥२॥

॥२१॥ १–१० वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२१॥ असावि देवं गोऋजीकमंधो न्यस्मिन्निंद्रो जनु-
षेमुवोच। बोधामसि त्वा हर्यश्व यज्ञैर्बोधा नः स्तोममंधसो
मदेषु ॥१॥ प्र यंति यज्ञं विपयंति बर्हिः सोममादो विदथे
दुध्रवाचः। न्यु भ्रियंते यशसो गृभादा दूरउपब्दो वृषणो
नृषाचः ॥२॥ त्वमिंद्र स्रवितवा अपस्कः परिष्ठिता अहिना
शूर पूर्वीः। त्वद्वावक्रे रथ्यो३ न धेना रेजंते विश्वा कृत्रिमाणि
भीषा ॥३॥ भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि
विद्वान्। इंद्रः पुरो जर्हृषाणो वि दूधोद्वि वज्रहस्तो महिना
जघान॥४॥ न यातव इंद्र जूजुवुर्नो न वंदना शविष्ठ वेद्याभिः।
स शर्धदर्यो विषुणस्य जंतोर्मा शिश्नदेवा अपि गुर्ऋतं नः
॥५॥३॥ अभि क्रत्वेंद्र भूरध ज्मन्न ते विव्यङ्महिमानं रजांसि।
स्वेना हि वृत्रं शवसा जघंथ न शत्रुरंतं विविदद्युधा ते ॥६॥
देवाश्चित्ते असुर्याय पूर्वेऽनु क्षत्राय ममिरे सहांसि। इंद्रो
मघानि दयते विषह्येंद्रं वाजस्य जोहुवंत सातौ ॥७॥ कीरि-

श्विद्धि त्वामवसे जुहावेशानमिंद्र सौभगस्य भूरेः । अवो बभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावतो वरूता ॥ ८ ॥ सखायस्त इंद्र विश्वहं स्याम नमोवृधासो महिना तरुत्र । वन्वंतु स्मा तेऽवसा समीकेऽभीतिमर्यो वनुषां शवांसि ॥ ९ ॥ स न इंद्र त्वयताया इषे धास्त्मना च ये मघवानो जुनंति । वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥ ४ ॥

॥ २२ ॥ १—९ वसिष्ठः ॥ इंद्रः ॥ १—८ विराट् । ९ त्रिष्टुप् ॥

॥ २२ ॥ पिबा सोममिंद्र मंदतु त्वा यं ते सुषाव हर्यश्वाद्रिः । सोतुर्बाहुभ्यां सुयतो नार्वा ॥ १ ॥ यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि । स त्वामिंद्र प्रभूवसो ममत्तु ॥ २ ॥ बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिं । इमा ब्रह्म सधमादे जुषस्व ॥ ३ ॥ श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषां । कृष्वा दुवांस्यंतमा सचेमा ॥ ४ ॥ न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् । सदा ते नाम स्वयशो विवक्मि ॥ ५ ॥ ५ ॥ भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् । मारे अस्मन्मघवञ्ज्योक्कः ॥ ६ ॥ तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि । त्वं नृभिर्हव्यो विश्वधासि ॥ ७ ॥ नू चिन्नु ते मन्यमानस्य दस्मो-दश्नुवंति महिमानमुग्र । न वीर्यमिंद्र ते न राधः ॥ ८ ॥ ये च पूर्व ऋषयो ये च नूत्ना इंद्र ब्रह्माणि जनयंत विप्राः । अस्मे ते संतु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः ॥ ९ ॥ ६ ॥

॥ २३ ॥ १—६ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ २३ ॥ उदु ब्रह्माण्यैरत श्रवस्येंद्रं समर्ये महया वसिष्ठ ।

आ यो विश्वानि शवसा ततानोपश्रोता म ईवंतो वचांसि ॥१॥ अयामि घोष इंद्र देवजामिरिरज्यंत यच्छुरुधो विवाचि । नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान् ॥२॥ युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः । वि बाधिष्ट स्य रोदसी महित्वेंद्रो वृत्राण्यप्रती जघन्वान् ॥३॥ आपश्चित्पिप्युः स्तर्यो३ न गावो नक्षन्नृतं जरितारस्त इंद्र । याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥४॥ ते त्वा मदा इंद्र मादयंतु शुष्मिणं तुविराधसं जरित्रे । एको देवत्रा दयसे हि मर्तानस्मिञ्छूर सवने मादयस्व ॥५॥ एवेदिंद्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चंत्यर्कैः । स नः स्तुतो वीरवत्पातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥६॥७॥

॥ २४ ॥ १—६ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२४॥ योनिष्ट इंद्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि । असो यथा नोऽविता वृधे च ददो वसूनि ममदश्च सोमैः ॥१॥ गृभीतं ते मन इंद्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि । विसृष्टधेना भरते सुवृक्तिरियमिंद्रं जोहुवती मनीषा ॥२॥ आ नो दिव आ पृथिव्या ऋजीषिन्निदं बर्हिः सोमपेयाय याहि । वहंतु त्वा हरयो मद्र्यंचमांगूषमच्छा तवसं मदाय ॥३॥ आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्यश्व याहि । वरीवृजत्स्थविरेभिः सुशिप्रास्मे दधद्वृषणं शुष्ममिंद्र ॥४॥ एष स्तोमो मह उग्राय वाहे धुरी३वात्यो न वाजयन्नधायि । इंद्र त्वायमर्क ईट्टे वसूनां दिवीव द्यामधि नः श्रोमतं धाः ॥५॥ एवा न इंद्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम । इषं

पिन्व मघवंद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ ८ ॥

॥ २५ ॥ १–६ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ २५ ॥ आ ते मह इंद्रोत्युग्र समंन्यवो यत्समरंत सेनाः। पताति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वद्र्य१ग्वि चारीत् ॥ १ ॥ नि दुर्ग इंद्र श्नथिह्यमित्रानभि ये नो मर्तासो अमंति। आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनां ॥ २ ॥ शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु। जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि ॥ ३ ॥ त्वावंतो हींद्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ। विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः ॥ ४ ॥ कुत्सा एते हर्यश्वाय शूषमिंद्रे सहो देवजूतमियानाः। सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजं ॥ ५ ॥ एवा न इंद्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम। इषं पिन्व मघवंद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ ९ ॥

॥ २६ ॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ २६ ॥ न सोम इंद्रमसुतो ममाद नाब्रह्माणो मघवानं सुतासः। तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः शृणवद्यथा नः ॥ १ ॥ उक्थउक्थे सोम इंद्रं ममाद नीथेनीथे मघवानं सुतासः। यदीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवंते ॥ २ ॥ चकार ता कृणवन्नूनमन्या यानि ब्रुवंति वेधसः सुतेषु। जनीरिव पतिरेकः समानो नि मामृजे पुर इंद्रः सु सर्वाः ॥ ३ ॥ एवा तमाहुरुत शृण्व इंद्र एको विभक्ता तरणिर्म-

घानां। मिथस्तुरं ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि ॥४॥ एवा वसिष्ठ इंद्रमूतये नृन्कृष्टीनां वृषभं सुते गृणाति। सहस्रिण उप नो माहि वाजान्यूयं पात स्वस्तिभिः सदा नः ॥५॥१०॥

॥२७॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२७॥ इंद्रं नरो नेमधिता हवंते यत्पार्या युनजंते धियस्ताः। शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः ॥१॥ य इंद्र शुष्मो मघवन्ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः। त्वं हि दृळ्हा मघवन्विचेता अपा वृधि परिवृतं न राधः ॥२॥ इंद्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति। ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक् ॥३॥ नू चिन्न इंद्रो मघवा सहूती दानो वाजं नि यमते न ऊती। अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः ॥४॥ नू इंद्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय। गोमदश्वावद्रथवद्व्यंतो यूयं पात स्वस्तिभिः सदा नः ॥५॥११॥

॥२८॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२८॥ ब्रह्मा ण इंद्रोप याहि विद्वानर्वाचस्ते हरयो संतु युक्ताः। विश्वे चिद्धि त्वा विहवंत मर्ता अस्माकमिच्छृणुहि विश्वमिन्व ॥१॥ हवं त इंद्र महिमा व्यानड्ब्रह्म यत्पासि शवसिन्नृषीणां। आ यद्वज्रं दधिषे हस्त उग्र घोरः सन्क्रत्वा जनिष्ठा अषाळ्हः ॥२॥ तव प्रणीतींद्र जोहुवानान्त्सं यन्नॄन्न रोदसी निनेथ। महे क्षत्राय शवसे हि जज्ञेऽतूतुजिं चित्तूतुजिरशिश्नत् ॥३॥ एभिर्न इंद्राहभिर्दशस्य दुर्मि-

चासो हि क्षितयः पवंते। प्रति यच्चष्टे अनृतमनेना अव द्विता वरुणो मायी नः सात् ॥ ४ ॥ वोचेमेदिंद्रं मघवानमेनं महो रायो राधसो यद्दद्न्नः। यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥ १२ ॥

॥ २९ ॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२९॥ अयं सोम इंद्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः। पिबा त्व१स्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः ॥१॥ ब्रह्मन्वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयं। अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः ॥२॥ का ते अस्त्यरंकृतिः सूक्तैः कदा नूनं ते मघवन्दाशेम। विश्वा मतीरा ततने त्वायाधा म इंद्र शृणवो हवेमा ॥ ३ ॥ उतो घा ते पुरुष्या३ इदासन्येषां पूर्वेषामशृणोर्ऋषीणां। अधाहं त्वा मघवञ्जोहवीमि त्वं न इंद्रासि प्रमतिः पितेव ॥ ४ ॥ वोचेमेदिंद्रं मघवानमेनं महो रायो राधसो यद्दद्न्नः। यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥ १३ ॥

॥ ३० ॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥३०॥ आ नो देव शवसा याहि शुष्मिन्भवा वृध इंद्र रायो अस्य। महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर ॥१॥ हवंत उ त्वा हव्यं विवाचि तनूषु शूराः सूर्यस्य सातौ। त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रंधया सुहंतु ॥२॥ अहा यदिंद्र सुदिना व्युच्छान्दधो यत्केतुमुपमं समत्सु। न्य१ग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान् ॥ ३ ॥ वयं ते त इंद्र ये च देव स्तवंत शूर दद॑तो मघानि। यच्छा सूरिभ्य उपमं

वरूथं स्वाभुवो जरणामश्नवंत ॥४॥ वोचेमेदिंद्रं मघवानमेनं महो रायो राधसो यद्दन्नः । यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥५॥१४॥

॥ ३१ ॥ १–१२ वसिष्ठः ॥ इंद्रः ॥ १–९ गायत्री । १०–१२ विराट् ॥

॥३१॥ प्र व इंद्राय मादनं हर्यश्वाय गायत । सखायः सोमपाव्ने ॥१॥ शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः । चकृमा सत्यराधसे ॥२॥ त्वं न इंद्र वाजयुस्त्वं गव्युः शतक्रतो । त्वं हिरण्ययुर्वसो ॥३॥ वयमिंद्र त्वायवोऽभि प्र णोनुमो वृषन् । विद्धी त्वऽस्य नो वसो ॥४॥ मा नो निदे च वक्तवेऽर्यो रंधीरराव्णे । त्वे अपि क्रतुर्मम ॥५॥ त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन् । त्वया प्रति ब्रुवे युजा ॥६॥१५॥ महाँ उतासि यस्य तेऽनु स्वधावरी सहः । मम्नाते इंद्र रोदसी ॥७॥ तं त्वा मरुत्वती परि भुवद्वाणी सयावरी । नक्षमाणा सह द्युभिः ॥८॥ ऊर्ध्वासस्त्वान्विंदवो भुवन्दस्ममुप द्यवि । सं ते नमंत कृष्टयः ॥९॥ प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वं । विशः पूर्वीः प्र चरा चर्षणिप्राः ॥१०॥ उरुव्यचसे महिने सुवृक्तिमिंद्राय ब्रह्म जनयंत विप्राः । तस्य व्रतानि न मिनंति धीराः ॥११॥ इंद्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै । हर्यश्वाय बर्हया समापीन् ॥१२॥१६॥

॥ ३२ ॥ १–२५. २६[१]. २७ वसिष्ठः । २६[१] वसिष्ठः शक्तिर्वा ॥ इंद्रः ॥
१. २. ४–२७ प्रागाथं । ३ द्विपदा ॥

॥३२॥ मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन् । आरात्ताच्चित्सधमादं न आ गहीह वा सन्नुप श्रुधि ॥१॥ इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते । इंद्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥२॥ रायस्कामो वज्रहस्तं सु-

दक्षिणं पुत्रो न पितरं हुवे ॥३॥ इम इंद्राय सुन्विरे सोमासो दध्याशिरः । ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥४॥ श्रवच्छ्रुत्कर्ण ईयते वसूनां नू चिन्नो मर्धिषद्गिरः । सद्यश्चिद्यः सहस्राणि शता ददन्नकिर्दित्संतमा मिनत् ॥५॥१७॥ स वीरो अप्रतिष्कुत इंद्रेण शूशुवे नृभिः । यस्ते गभीरा सवनानि वृत्रहन्त्सुनोत्या च धावति ॥६॥ भवा वरूथं मघवन्मघोनां यत्समजासि शर्धतः । वि त्वाहतस्य वेदनं भजेमह्या दूणाशो भरा गयं ॥७॥ सुनोता सोमपाव्ने सोममिंद्राय वज्रिणे । पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥८॥ मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे । तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे ॥९॥ नकिः सुदासो रथं पर्यास न रीरमत् । इंद्रो यस्याविता यस्य मरुतो गमत्स गोमति व्रजे ॥१०॥१८॥ गमद्वाजं वाजयन्निंद्र मर्त्यो यस्य त्वमविता भुवः । अस्माकं बोध्यविता रथानामस्माकं शूर नृणां ॥११॥ उदिन्न्वस्य रिच्यतेऽंशो धनं न जिग्युषः । य इंद्रो हरिवान्न दभंति तं रिपो दक्षं दधाति सोमिनि ॥१२॥ मंत्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा । पूर्वीश्चन प्रसितयस्तरंति तं य इंद्रे कर्मणा भुवत् ॥१३॥ कस्तमिंद्र त्वावसुमा मर्त्यो दधर्षति । श्रद्धा इत्ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ॥१४॥ मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु । तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥१५॥१९॥ तवेदिंद्रावमं वसु त्वं पुष्यसि मध्यमं । सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते ॥१६॥ त्वं विश्वस्य धनदा असि श्रुतो य ईं भवंत्याजयः । तवायं विश्वः पुरु-

हूत पार्थिवोऽवस्युर्नाम भिक्षते ॥१७॥ यदिंद्र यावतस्त्वमेता-
वदहमीशीय। स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रा-
सीय ॥१८॥ शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे।
नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन ॥१९॥ तर-
णिरित्सिषासति वाजं पुरंध्या युजा। आ व इंद्रं पुरुहूतं नमे
गिरा नेमिं तष्टेव सुद्र्वं ॥२०॥२०॥ न दुष्टुती मर्त्यो विंदते वसु
न स्रेधंतं रयिर्नशत्। सुशक्तिरिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये
दिवि ॥२१॥ अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशा-
नमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुषः ॥२२॥ न त्वावाँ
अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। अश्वायंतो
मघवन्निंद्र वाजिनो गव्यंतस्त्वा हवामहे ॥२३॥ अभी षतस्तदा
भरेंद्र ज्यायः कनीयसः। पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च
हव्यः ॥२४॥ परा णुदस्व मघवन्नमित्रान्त्सुवेदा नो वसू कृधि।
अस्माकं बोध्यविता महाधने भवा वृधः सखीनां ॥२५॥ इंद्र
क्रतुं न आ भर पिता पुत्रेभ्यो यथा। शिक्षा णो अस्मिन्पुरुहूत
यामनि जीवा ज्योतिरशीमहि ॥२६॥ मा नो अज्ञाता वृजना
दुराध्यो३ माशिवासो अव क्रमुः। त्वया वयं प्रवतः शश्वतीर-
पोऽति शूर तरामसि ॥२७॥२१॥

॥ ३३ ॥ १–१४ संस्तवो वसिष्ठस्य सपुत्रस्येंद्रेण वा संवादः ॥ १–९ वसिष्ठः ।
१०–१४ वसिष्ठपुत्राः ॥ १–९ वसिष्ठपुत्राः । १०–१४ वसिष्ठः ॥ त्रिष्टुप् ॥

॥३३॥ श्वित्यंचो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि
हि प्रमंदुः। उत्तिष्ठन्वोचे परि बर्हिषो नॄन्न मे दूरादवि-
तवे वसिष्ठाः ॥१॥ दूरादिंद्रमनयन्ना सुतेन तिरो वैशंतम-
ति पांतमुग्रं। पाशद्युम्नस्य वायतस्य सोमात्सुतादिंद्रो अवृ-

णीता वसिष्ठान् ॥ २ ॥ एवेन्नु कं सिंधुमेभिस्ततारेवेन्नु कं भेदमेभिर्जघान । एवेन्नु कं दाशराज्ञे सुदासं प्रावदिंद्रो ब्रह्मणा वो वसिष्ठाः ॥ ३ ॥ जुष्टी नरो ब्रह्मणा वः पितॄणामक्षमव्ययं न किला रिषाथ । यच्छक्वरीषु बृहता रवेणेंद्रे शुष्ममदधाता वसिष्ठाः ॥ ४ ॥ उद्द्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः । वसिष्ठस्य स्तुवत इंद्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकं ॥ ५ ॥ २२ ॥ दंडा इवेद्गोअजनास आसन्परिच्छिन्ना भरता अर्भकासः । अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथंत ॥ ६ ॥ त्रयः कृण्वंति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः । त्रयो घर्मास उषसं सचंते सर्वाँ इत्ताँ अनु विदुर्वसिष्ठाः ॥ ७ ॥ सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः । वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥ ८ ॥ त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरंति । यमेन ततं परिधिं वयंतोऽप्सरस उप सेदुर्वसिष्ठाः ॥ ९ ॥ विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा । तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार ॥ १० ॥ २३ ॥ उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः । द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददंत ॥ ११ ॥ स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः । यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ॥ १२ ॥ सत्रे ह जाताविषिता नमोभिः कुंभे रेतः सिषिचतुः समानं । ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठं ॥ १३ ॥ उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बि-

भन्म वंदात्यग्रे। उपैनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः ॥१४॥२४॥२॥

॥ ३४ ॥ १—२५ वसिष्ठः ॥ १—१५. १८—२५ विश्वे देवाः । १६ अहिः । १७ अहिर्बुध्न्यः ॥ १—२१ द्विपदा । २२—२५ त्रिष्टुप् ॥

॥३४॥ प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी ॥१॥ विदुः पृथिव्या दिवो जनित्रं शृण्वन्त्यापो अध क्षरन्तीः ॥२॥ आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः ॥३॥ आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ॥४॥ अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्त्मना हिनोत ॥५॥ त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरं ॥६॥ उदस्य शुष्माद्भानुर्नार्त बिभर्ति भारं पृथिवी न भूम ॥७॥ ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि ॥८॥ अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वं ॥९॥ आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ॥१०॥२५॥ राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु ॥११॥ अविष्टो अस्मान्विश्वासु विक्ष्वद्युं कृणोत शंसं निनित्सोः ॥१२॥ व्येतु दिद्युद्द्विषामशेवा युयोत विष्वग्रपस्तनूनां ॥१३॥ अवीन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥१४॥ सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥१५॥ अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन् ॥१६॥ मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः ॥१७॥ उत नः एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ॥१८॥ तपन्ति शत्रुं स्व१र्ण भूमा महासेनासो अमेभिरेषां ॥१९॥ आ यन्नः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ॥२०॥२६॥ प्रति नः

स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ॥२१॥ ता नो रा-
सन्रातिषाचो वसून्या रोदसी वरुणानी शृणोतु । वरूत्रीभिः
सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ॥२२॥ तन्नो रा-
यः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः । वनस्पति-
भिः पृथिवी सजोषा उभे रोदसी परि पासतो नः ॥२३॥ अनु
तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इंद्रसखा । अनु विश्वे
मरुतो ये सहासो रायः स्याम धरुणं धियध्यै ॥२४॥ तन्न इंद्रो
वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषंत । शर्मन्स्याम
मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥२५॥२७॥

॥ ३५ ॥ १—१५ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३५॥ शं न इंद्राग्नी भवतामवोभिः शं न इंद्रावरुणा
रातहव्या । शमिंद्रासोमा सुविताय शं योः शं न इंद्रापूषणा वा-
जसातौ ॥१॥ शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः
शमु संतु रायः । शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा
पुरुजातो अस्तु ॥२॥ शं नो धाता शमु धर्ता नो अस्तु शं न
उरूची भवतु स्वधाभिः । शं रोदसी बृहती शं नो अद्रिः शं नो
देवानां सुहवानि संतु ॥३॥ शं नो अग्निर्ज्योतिरनीको अस्तु
शं नो मित्रावरुणावश्विना शं । शं नः सुकृतां सुकृतानि संतु
शं न इषिरो अभि वातु वातः ॥४॥ शं नो द्यावापृथिवी पूर्व-
हूतौ शमंतरिक्षं दृशये नो अस्तु । शं न ओषधीर्वनिनो भवंतु
शं नो रजसस्पतिरस्तु जिष्णुः ॥५॥२८॥ शं न इंद्रो वसुभिर्दे-
वो अस्तु शमादित्येभिर्वरुणः सुशंसः । शं नो रुद्रो रुद्रेभिर्ज-
लाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥६॥ शं नः सोमो भवतु

ब्रह्म शं नः शं नो ग्रावाणः शमु संतु यज्ञाः। शं नः स्वरूणां मित-
यो भवंतु शं नः प्रस्व१ः शम्वस्तु वेदिः॥७॥ शं नः सूर्य उरुचक्षा
उदेतु शं नश्चतस्रः प्रदिशो भवंतु। शं नः पर्वता ध्रुवयो भवंतु शं
नः सिंधवः शमु संत्वापः॥८॥ शं नो अदितिर्भवतु व्रतेभिः शं नो
भवंतु मरुतः स्वर्काः। शं नो विष्णुः शमु पूषा नो अस्तु शं नो
भवित्रं शम्वस्तु वायुः॥९॥ शं नः देवः सविता त्रायमाणः शं नो
भवंतूषसो विभातीः। शं नो पर्जन्यो भवतु प्रजाभ्यः शं नः क्षे-
त्रस्य पतिरस्तु शंभुः॥१०॥२९॥ शं नो देवा विश्वदेवा भवंतु शं
सरस्वती सह धीभिरस्तु। शमभिषाचः शमु रातिषाचः शं नो
दिव्याः पार्थिवाः शं नो अप्याः॥११॥ शं नः सत्यस्य पतयो
भवंतु शं नो अर्वंतः शमु संतु गावः। शं न ऋभवः सुकृतः सुह-
स्ताः शं नो भवंतु पितरो हवेषु॥१२॥ शं नो अज एकपाद्देवो
अस्तु शं नोऽहिर्बुध्न्य१ः शं समुद्रः। शं नो अपां नपात्पेरुरस्तु
शं नः पृश्निर्भवतु देवगोपाः॥१३॥ आदित्या रुद्रा वसवो जुषं-
तेदं ब्रह्म क्रियमाणं नवीयः। शृण्वंतु नो दिव्याः पार्थिवासो
गोजाता उत ये यज्ञियासः॥१४॥ ये देवानां यज्ञिया यज्ञिया-
नां मनोर्यजत्रा अमृता ऋतज्ञाः। ते नो रासंतामुरुगायमद्य
यूयं पात स्वस्तिभिः सदा नः॥१५॥३०॥३॥

॥ ३६ ॥ १–९ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३६॥ प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो
गाः। वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकमध्येधे
अग्निः॥१॥ इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असु-
रा नवीयः। इनो वामन्यः पदवीरदब्धो जनं च मित्रो यत-

ति ब्रुवाणः ॥२॥ आ वातस्य ध्रजंतो रंत इत्या अपीपयंत धेनवो
न सूदाः। महो दिवः सदने जायमानोऽचिक्रदद्वृषभः सस्मिन्नू-
धन् ॥३॥ गिरा य एता युनजद्धरी त इंद्र प्रिया सुरथा शूर धायू।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्यां ॥४॥ य-
जंते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन्। वि पृक्षो
बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठं ॥५॥१॥ आ यत्साकं
यशसो वावशानाः सरस्वती सप्तथी सिंधुमाता। याः सुष्वयंत
सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ॥६॥ उत त्ये नो
मरुतो मंदसाना धियं तोकं च वाजिनोऽवंतु। मा नः परि ख्य-
दक्षरा चरंत्यवीवृधन्युज्यं ते रयिं नः ॥७॥ प्र वो महीमरमतिं
कृणुध्वं प्र पूषणं विदथ्यं१ न वीरं। भगं धियोऽवितारं नो अ-
स्याः सातौ वाजं रातिषाचं पुरंधिं ॥८॥ अच्छायं वो मरुतः
श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः। उत प्रजायै गृणते
वयो धुर्यूयं पात स्वस्तिभिः सदा नः ॥९॥२॥

॥ ३७ ॥ १–८ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३७॥ आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो
अमृक्तः। अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः
पृणध्वं ॥१॥ यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृश ऋभुक्षणो
अमृक्तं। सं यज्ञेषु स्वधावंतः पिबध्वं वि नो राधांसि मतिभिर्द-
यध्वं ॥२॥ उवोचिथ हि मघवन्देष्णं महो अर्भस्य वसुनो वि-
भागे। उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या
॥३॥ त्वमिंद्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा।
वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वंतो हरिवो वसिष्ठाः ॥४॥

सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्व धीभिः । व-
वन्मा नु ते युज्याभिरूती कदा न इंद्र राय आ दशस्येः ॥५॥३॥
वासयसीव वेधसस्त्वं नः कदा न इंद्र वचसो बुबोधः । अस्तं ता-
त्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ॥६॥ अभि
यं देवी निर्ऋतिश्चिदीशे नक्षंत इंद्रं शरदः सुपृक्षः । उप त्रिबं-
धुर्जरदष्टिमेत्यस्ववेशं यं कृणवंत मर्ताः ॥७॥ आ नो राधांसि
सवितः स्तवध्या आ रायो यंतु पर्वतस्य रातौ । सदा नो दिव्यः
पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ॥८॥४॥

॥ ३८ ॥ १–८ वसिष्ठः ॥ १–६[1] सविता । ६[2] सविता भगो वा । ७.८ वाजिनः ॥ त्रिष्टुप् ॥

॥३८॥ उदु ष्य देवः सविता ययाम हिरण्ययीममतिं या-
मशिश्रेत् । नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरू-
वसुर्दधाति ॥१॥ उदु तिष्ठ सवितः श्रुध्य१स्य हिरण्यपाणे
प्रभृतावृतस्य । व्यु१र्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्त-
भोजनं सुवानः ॥२॥ अपि ष्टुतः सविता देवो अस्तु यमा चि-
द्विश्वे वसवो गृणंति । स नः स्तोमान्नमस्य१श्चनो धाद्विश्वेभिः
पातु पायुभिर्नि सूरीन् ॥३॥ अभि यं देव्यदितिर्गृणाति सवं
देवस्य सवितुर्जुषाणा । अभि सम्राजो वरुणो गृणंत्यभि
मित्रासो अर्यमा सजोषाः ॥४॥ अभि ये मिथो वनुषः सपंते
रातिं दिवो रातिषाचः पृथिव्याः । अहिर्बुध्न्य उत नः शृणोतु
वरूत्र्येकधेनुभिर्नि पातु ॥५॥ अनु तन्नो जास्पतिर्मंसीष्ट
रत्नं देवस्य सवितुरियानः । भगमुग्रोऽवसे जोहवीति भगम-
नुग्रो अध याति रत्नं ॥६॥ शं नो भवंतु वाजिनो हवेषु देवता-
ता मितद्रवः स्वर्काः । जंभयंतोऽहिं वृकं रक्षांसि सनेम्यस्म-

द्युयवन्नमीवाः ॥७॥ वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा
अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात
पथिभिर्देवयानैः ॥ ८ ॥ ५ ॥

॥ ३९ ॥ १–७ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३९॥ ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्प्रतीची जूर्णिर्देव-
तातिमेति । भेजाते अद्री रथ्येव पंथामृतं होता न इषितो यजा-
ति ॥१॥ प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इया-
ते । विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान्
॥२॥ ज्मया अत्र वसवो रंत देवा उरावंतरिक्षे मर्जयंत शुभ्राः ।
अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥३॥
ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि संति देवाः । ताँ
अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिं ॥४॥ आग्ने गि-
रो दिव आ पृथिव्या मित्रं वह वरुणमिंद्रमग्निं । आर्यमणम-
दितिं विष्णुमेषां सरस्वती मरुतो मादयंतां ॥५॥ ररे हव्यं मति-
भिर्यज्ञियानां नक्षत्कामं मर्त्यानामसिन्वन् । धाता रयिमवि-
दस्यं सदासां सक्षीमहि युज्येभिर्नु देवैः ॥६॥ नू रोदसी अभिष्टुते
वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः । यच्छंतु चंद्रा उपमं नो
अर्कं यूयं पात स्वस्तिभिः सदा नः ॥७॥ ६ ॥

॥ ४० ॥ १–७ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥४०॥ ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुरा-
णां । यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे
॥१॥ मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिंद्रो अर्यमा
ददातु । दिदेष्टु देव्यदिती रेक्णो वायुश्च यन्नियुवैते भगश्च

॥२॥ सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ। उ-
तेमग्निः सरस्वती जुनंति न तस्य रायः पर्येतास्ति ॥३॥ अयं हि
नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः। सुहवा देव्य-
दितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान् ॥४॥ अस्य देवस्य
मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः। विदे हि रुद्रो रु-
द्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥५॥ मात्र पूषन्ना-
घृण इरस्यो वरूत्री यद्रातिषाचश्च रासन्। मयोभुवो नो अर्वं-
तो नि पांतु वृष्टिं परिज्मा वातो ददातु ॥६॥ नू रोदसी अभिष्टुते
वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः। यच्छंतु चंद्रा उपमं
नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥७॥७॥

॥४१॥ १—७ वसिष्ठः ॥ १ लिंगोक्तदेवताः। २—६ भगः। ७ उषाः॥ १ जगती। २—७ त्रिष्टुप्॥

॥४१॥ प्रातरग्निं प्रातरिंद्रं हवामहे प्रातर्मित्रावरुणा प्रा-
तरश्विना। प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं
हुवेम ॥१॥ प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो वि-
धर्ता। आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भ-
क्षीत्याह ॥२॥ भग प्रणेतर्भग सत्यराधो भगेमां धिय-
मुदवा ददन्नः। भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृ-
वंतः स्याम ॥३॥ उतेदानीं भगवंतः स्यामोत प्रपित्व
उत मध्ये अह्नां। उतोदिता मघवन्सूर्यस्य वयं देवानां
सुमतौ स्याम ॥४॥ भग एव भगवाँ अस्तु देवास्तेन वयं
भगवंतः स्याम। तं त्वा भग सर्व इज्जोहवीति स नो भग पुर-
एता भवेह ॥५॥ समध्वरायोषसो नमंत दधिक्रावेव शुचये
पदाय। अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन

आ वहंतु ॥ ६ ॥ अश्वावतीर्गोमतीर्न उषासो वीरवतीः सद-
मुच्छंतु भद्राः । घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः
सदा नः ॥ ७ ॥ ८ ॥

॥ ४२ ॥ १-६ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥४२॥ प्र ब्रह्माणो अंगिरसो नक्षंत प्र क्रंदनुर्नभन्यस्य वेतु । प्र
धेनव उदप्रुतो नवंत युज्यातामद्री अध्वरस्य पेशः ॥१॥ सुगस्ते
अग्ने सनवित्तो अध्वा युंक्ष्वा सुते हरितो रोहितश्च । ये वा सद्मन्न-
रुषा वीरवाहो हुवे देवानां जनिमानि सत्तः ॥२॥ समु वो यज्ञं म-
हयन्नमोभिः प्र होता मंद्रो रिरिच उपाके । यजस्व सु पुर्वणीक
देवाना यज्ञियामरमतिं ववृत्याः ॥३॥ यदा वीरस्य रेवतो दुरोणे
स्योनशीरतिथिराचिकेतत् । सुप्रीतो अग्निः सुधितो दम आ स
विशे दाति वार्यमियत्यै ॥४॥ इमं नो अग्ने अध्वरं जुषस्व म-
रुत्स्विंद्रे यशसं कृधी नः । आ नक्ता बर्हिः सदतामुषासोशंता
मित्रावरुणा यजेह ॥५॥ एवाग्निं सहस्यं१ वसिष्ठो रायस्कामो
विश्वप्स्न्यस्य स्तौत् । इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्ति-
भिः सदा नः ॥ ६ ॥ ९ ॥

॥ ४३ ॥ १-५ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥ ४३ ॥ प्र वो यज्ञेषु देवयंतो अर्चन्द्यावा नमोभिः पृथि-
वी इषध्यै । येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियंति व-
निनो न शाखाः ॥ १ ॥ प्र यज्ञ एतु हेत्वो न सप्तिरुद्यच्छध्वं
समनसो घृताचीः । स्तृणीत बर्हिरध्वराय साधूर्ध्वा शोचींषि
देवयून्यस्थुः ॥ २ ॥ आ पुत्रासो न मातरं विभृत्राः सानौ
देवासो बर्हिषः सदंतु । आ विश्वाची विदथ्यामनक्त्वग्ने मा नो
देवताता मृधस्कः ॥ ३ ॥ ते सीषपंत जोषमा यजत्रा ऋतस्य

धाराः सुदुघा दुहानाः। ज्येष्ठं वो अद्य मह आ वसूनामा गंतन समनसो यति ष्ठ ॥४॥ एवा नो अग्ने विक्ष्वा दशस्य त्वया वयं सहसावन्नास्क्राः। राया युजा सधमादो अरिष्टा यूयं पात स्वस्तिभिः सदा नः ॥५॥१०॥

॥४४॥ १–५ वसिष्ठः ॥ १ लिंगोक्तदेवताः। २–५ दधिक्राः ॥ १ जगती। २–५ त्रिष्टुप् ॥

॥४४॥ दधिक्रां वः प्रथममश्विनोषसमग्निं समिद्धं भगमूतये हुवे। इंद्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान्द्यावापृथिवी अपः स्वः ॥१॥ दधिक्रामु नमसा बोधयंत उदीराणा यज्ञमुपप्रयंतः। इळां देवीं बर्हिषि सादयंतोऽश्विना विप्रा सुहवा हुवेम ॥२॥ दधिक्रावाणं बुबुधानो अग्निमुप ब्रुव उषसं सूर्यं गां। ब्रध्नं मांश्चतोर्वरुणस्य बभ्रुं ते विश्वास्मद्दुरिता यावयंतु ॥३॥ दधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन्। संविदान उषसा सूर्येणादित्येभिर्वसुभिरंगिरोभिः ॥४॥ आ नो दधिक्राः पथ्यामनक्त्वृतस्य पंथामन्वेतवा उ। शृणोतु नो दैव्यं शर्धो अग्निः शृण्वंतु विश्वे महिषा अमूराः ॥५॥११॥

॥४५॥ १–४ वसिष्ठः ॥ सविता ॥ त्रिष्टुप् ॥

॥४५॥ आ देवो यातु सविता सुरत्नोऽतरिक्षप्रा वहमानो अश्वैः। हस्ते दधानो नर्या पुरूणि निवेशयञ्च प्रसुवञ्च भूम ॥१॥ उदस्य बाहू शिथिरा बृहंता हिरण्यया दिवो अंताँ अनष्टां। नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्यां ॥२॥ स घा नो देवः सविता सहावा साविषद्वसुपतिर्वसूनि। विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः ॥३॥ इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमी-

ऋते सुपाणिं। चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥ १२ ॥

॥ ४६ ॥ १–४ वसिष्ठः ॥ रुद्रः ॥ १–३ जगती । ४ त्रिष्टुप् ॥

॥ ४६ ॥ इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने। अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥ १ ॥ स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति। अवन्नवंतीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव ॥ २ ॥ या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः। सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥ ३ ॥ मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य। आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥ १३ ॥

॥ ४७ ॥ १–४ वसिष्ठः ॥ आपः ॥ त्रिष्टुप् ॥

॥ ४७ ॥ आपो यं वः प्रथमं देवयंत इंद्रपानमूर्मिमकृण्वतेळः। तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमंतं वनेम ॥ १ ॥ तमूर्मिमापो मधुमत्तमं वोऽपां नपादवत्वाशुहेमा। यस्मिन्निंद्रो वसुभिर्मादयाते तमश्याम देवयंतो वो अद्य ॥ २ ॥ शतपवित्राः स्वधया मदंतीर्देवीर्देवानामपि यंति पाथः। ता इंद्रस्य न मिनंति व्रतानि सिंधुभ्यो हव्यं घृतवज्जुहोत ॥ ३ ॥ याः सूर्यो रश्मिभिराततान याभ्य इंद्रो अरदद्गातुमूर्मिं। ते सिंधवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥ १४ ॥

॥ ४८ ॥ १–४ वसिष्ठः ॥ १–३ ऋभवः । ४ ऋभवो विश्वे देवा वा ॥ त्रिष्टुप् ॥

॥ ४८ ॥ ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः

सुतस्य । आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नर्यं वर्तयंतु
॥१॥ ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि ।
वाजो अस्माँ अवतु वाजसाताविंद्रेण युजा तरुषेम वृत्रं ॥२॥ ते
चिद्धि पूर्वीरभि संति शासा विश्वाँ अर्य उपरताति वन्वन् । इंद्रो
विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन्वि नृम्णं ॥३॥
नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः । स-
मस्मे इषं वसवो ददीरन्यूयं पात स्वस्तिभिः सदा नः ॥४॥१५॥

॥ ४९ ॥ १-४ वसिष्ठः ॥ आपः ॥ त्रिष्टुप् ॥

॥४९॥ समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्यनिविश-
मानाः । इंद्रो या वज्री वृषभो रराद् ता आपो देवीरिह मामवंतु
॥१॥ या आपो दिव्या उत वा स्रवंति खनित्रिमा उत वा याः
स्वयंजाः । समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह
मामवंतु ॥२॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवप-
श्यञ्जनानां । मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह
मामवंतु ॥३॥ यासु राजा वरुणो यासु सोमो विश्वे देवा या-
सूर्जं मदंति । वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह
मामवंतु ॥४॥१६॥

॥ ५० ॥ १-४ वसिष्ठः ॥ १ मित्रावरुणौ । २ अग्निः । ३ विश्वे देवाः । ४ नद्यः ॥
१-३ जगती । ४ अतिजगती शक्वरी वा ॥

॥५०॥ आ मां मित्रावरुणेह रक्षतं कुलाययद्विश्वयन्मा
न आ गन् । अजकावं दुर्दृशीकं तिरो दधे मा मां पद्येन रप-
सा विदत्त्सरुः ॥१॥ यद्विजामन्परुषि वंदनं भुवदष्ठीवंतौ
परि कुल्फौ च देहत् । अग्निष्टच्छोचन्नप बाधतामितो मा
मां पद्येन रपसा विदत्त्सरुः ॥२॥ यच्छल्मलौ भवति यन्न-

दीषु यदोषधीभ्यः परि जायते विषं। विश्वे देवा निरितस्तत्सुवंतु मा मां पद्मेन रपसा विदत्त्सरुः ॥३॥ याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः। ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवंतु सर्वा नद्यो अशिमिदा भवंतु ॥४॥१७॥

॥ ५१ ॥ १–३ वसिष्ठः ॥ आदित्याः ॥ त्रिष्टुप् ॥

॥५१॥ आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन। अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥१॥ आदित्यासो अदितिर्मादयंतां मित्रो अर्यमा वरुणो रजिष्ठाः। अस्माकं संतु भुवनस्य गोपाः पिबंतु सोममवसे नो अद्य ॥२॥ आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्व ऋभवश्च विश्वे। इंद्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः ॥३॥१८॥

॥ ५२ ॥ १–३ वसिष्ठः ॥ आदित्याः ॥ त्रिष्टुप् ॥

॥५२॥ आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा। सनेम मित्रावरुणा सनंतो भवेम द्यावापृथिवी भवंतः ॥१॥ मित्रस्तन्नो वरुणो मामहंत शर्म तोकाय तनयाय गोपाः। मा वो भुजेमान्यजातमेनो मा तत्कर्म वसवो यच्चयध्वे ॥२॥ तुरण्यवोऽङ्गिरसो नक्षंत रत्नं देवस्य सवितुरियानाः। पिता च तन्नो महान्यजत्रो विश्वे देवाः समनसो जुषंत ॥३॥१९॥

॥ ५३ ॥ १–३ वसिष्ठः ॥ द्यावापृथिव्यौ ॥ त्रिष्टुप् ॥

॥५३॥ प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाध ईळे बृहती यजत्रे। ते चिद्धि पूर्वे कवयो गृणंतः पुरो मही दधिरे

देवपुत्रे ॥१॥ प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य। आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथं॥२॥ उतो हि वां रत्नधेयानि संति पुरूणि द्यावापृथिवी सुदासे। अस्मे धत्तं यदसदस्कृधोयु यूयं पात स्वस्तिभिः सदा नः ॥३॥२०॥

॥ ५४ ॥ १–३ वसिष्ठः ॥ वास्तोष्पतिः ॥ त्रिष्टुप् ॥

॥५४॥ वास्तोष्पते प्रति जानीह्यस्मान्स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥१॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिंदो। अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥२॥ वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥३॥२१॥

॥ ५५ ॥ १–८ वसिष्ठः ॥ १ वास्तोष्पतिः । २–८ इंद्रः ॥ १ गायत्री । २–४ उपरिष्टाद्बृहती । ५–८ अनुष्टुप् ॥

॥५५॥ अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः ॥१॥ यदर्जुन सारमेय दतः पिशंग यच्छसे। वीव भ्राजंत ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप ॥२॥ स्तेनं राय सारमेय तस्करं वा पुनःसर। स्तोतॄनिंद्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥३॥ त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः। स्तोतॄनिंद्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥४॥ सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः। ससंतु सर्वे ज्ञातयः सस्त्वयमभितो जनः ॥५॥ य आस्ते यश्च चरति यश्च पश्यति नो जनः। तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ॥६॥ सहस्रशृंगो वृषभो यः समुद्रादुदाचरत्।

तेना सहस्येना वयं नि जनान्स्वापयामसि ॥७॥ प्रोष्ठेशया
वह्येशया नारीर्यास्तल्पशीवरीः । स्त्रियो याः पुण्यगंधास्ताः
सर्वाः स्वापयामसि ॥८॥२२॥३॥

॥५६॥ १–२५ वसिष्ठः ॥ मरुतः ॥ १–११ द्विपदा । १२–२५ त्रिष्टुप् ॥

॥५६॥ क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः
॥१॥ नकिर्ह्येषां जनूंषि वेद ते अंग विद्रे मिथो जनित्रं ॥२॥
अभि स्वपूभिर्मिथो वपंत वातस्वनसः श्येना अस्पृध्रन् ॥३॥
एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार ॥४॥ सा
विट् सुवीरा मरुद्भिरस्तु सनात्सहंती पुष्यंती नृम्णं ॥५॥ यामं
येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः ॥६॥ उग्रं
व ओजः स्थिरा शवांस्यधा मरुद्भिर्गणस्तुविष्मान् ॥७॥ शुभ्रो
वः शुष्मः क्रुध्मी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ॥८॥
सनेम्यस्मद्युयोत दिद्युं मा वो दुर्मतिरिह प्रणङ्नः ॥९॥ प्रिया
वो नाम हुवे तुराणामा यत्तृपन्मरुतो वावशानाः ॥१०॥२३॥
स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्व१ः शुंभमानाः
॥११॥ शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शु-
चिभ्यः । ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पा-
वकाः ॥१२॥ अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशि-
श्रियाणाः । वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायु-
धैर्यच्छमानाः ॥१३॥ प्र बुध्न्या व ईरते महांसि प्र नामानि
प्रयज्यवस्तिरध्वं । सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो
जुषध्वं ॥१४॥ यदि स्तुतस्य मरुतो अधीथेत्था विप्रस्य वाजिनो
हवीमन् । मक्षू रायः सुवीर्यस्य दात नू चिद्यमन्य आदभद्-

रावा ॥ १५ ॥ २४ ॥ अत्यासो न ये मरुतः स्वंचो यक्षदृशो न शुभ-
यंत मर्याः । ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः
पयोधाः ॥ १६ ॥ दशस्यंतो नो मरुतो मृळंतु वरिवस्यंतो रोदसी
सुमेके । आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो न-
मध्वं ॥ १७ ॥ आ वो होता जोहवीति सत्तः सत्राचीं रातिं मरुतो
गृणानः । य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व
उक्थैः ॥ १८ ॥ इमे तुरं मरुतो रामयंतीमे सहः सहस आ नमंति ।
इमे शंसं वनुष्यतो नि पांति गुरु द्वेषो अररुषे दधंति ॥ १९ ॥ इमे
रध्रं चिन्मरुतो जुनंति भृमिं चिद्यथा वसवो जुषंत । अप बाधध्वं
वृषणस्तमांसि धत्त विश्वं तनयं तोकमस्मे ॥ २० ॥ २५ ॥ मा वो
दात्रान्मरुतो निरराम मा पश्चाद्दघ्म रथ्यो विभागे । आ नः
स्पार्हे भजतना वसव्ये३ यदीं सुजातं वृषणो वो अस्ति ॥ २१ ॥ सं
यद्धनंत मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु । अध स्मा नो
मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यः ॥ २२ ॥ भूरि चक्र
मरुतः पित्र्याण्युक्थानि या वः शस्यंते पुरा चित् । मरुद्भिरुग्रः
पृतनासु साळ्हा मरुद्भिरित्सनिता वाजमर्वा ॥ २३ ॥ अस्मे
वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता । अपो येन
सुक्षितये तरेमाध स्वमोको अभि वः स्याम ॥ २४ ॥ तन्न इंद्रो
वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषंत । शर्मन्स्याम
मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥ २५ ॥ २६ ॥

॥ ५७ ॥ १–७ वसिष्ठः ॥ मरुतः ॥ त्रिष्टुप् ॥

॥ ५७ ॥ मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदं-
ति । ये रेजयंति रोदसी चिदुर्वी पिन्वंत्युत्सं यदयासुरुग्राः

॥१॥ निचेतारो हि मरुतो गृणंतं प्रणेतारो यजमानस्य मन्म।
अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः ॥२॥
नैतावदन्ये मरुतो यथेमे भ्राजंते रुक्मैरायुधैस्तनूभिः। आ रोद-
सी विश्वपिशः पिशानाः समानमंज्यंजते शुभे कं॥३॥ ऋधक्सा
वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम। मा वस्तस्या-
मपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ॥४॥ कृते
चिदत्र मरुतो रणंतानवद्यासः शुचयः पावकाः। प्र णोऽवत
सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः॥५॥ उत स्तुतासो
मरुतो व्यंतु विश्वेभिर्नामभिर्नरो हवींषि। ददात नो अमृतस्य
प्रजायै जिगृत रायः सूनृता मघानि ॥६॥ आ स्तुतासो मरुतो
विश्व ऊती अच्छा सूरीन्सर्वताता जिगात। ये नस्त्मना शति-
नो वर्धयंति यूयं पात स्वस्तिभिः सदा नः ॥७॥२७॥

॥ ५८ ॥ १–६ वसिष्ठः ॥ मरुतः ॥ त्रिष्टुप् ॥

॥५८॥ प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुवि-
ष्मान्। उत क्षोदंति रोदसी महित्वा नक्षंते नाकं निरृतेर-
वंशात् ॥१॥ जनूश्चिद्वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवो-
ऽयासः। प्र ये महोभिरोजसोत संति विश्वो वो यामन्भयते
स्वर्दृक् ॥२॥ बृहद्वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः
सुष्टुतिं नः। गतो नाध्वा वि तिराति जंतुं प्र णः स्पार्हाभि-
रूतिभिस्तिरेत ॥३॥ युष्मोतो विप्रो मरुतः शतस्वी युष्मो-
तो अर्वा सहुरिः सहस्री। युष्मोतः सम्राळुत हंति वृत्रं
प्र तद्वो अस्तु धूतयो देष्णं ॥४॥ ताँ आ रुद्रस्य मीळ्हुषो
विवासे कुविन्नंसंते मरुतः पुनर्नः। यत्सस्वर्ता जिहीळिरे

यदाविरव तदेनं ईमहे तुराणाम् ॥ ५ ॥ प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषंत । आराच्चिद्द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ २८ ॥

॥ ५९ ॥ १–१२ वसिष्ठः ॥ १–११ मरुतः । १२ रुद्रः ॥ १. ३. ५ बृहती । २. ४. ६ सतोबृहती । ७. ८ त्रिष्टुप् । ९–११ गायत्री । १२ अनुष्टुप् ॥

॥५९॥ यं त्रायध्व इदमिदं देवासो यं च नयथ । तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत ॥१॥ युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः । प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ॥२॥ नहि वश्चरमं चन वसिष्ठः परिमंसते । अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः ॥३॥ नहि व ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः । अभि व आवर्त्सुमतिर्नवीयसी तूयं यात पिपीषवः ॥४॥ ओ षु घृष्विराधसो यातनांधांसि पीतये । इमा वो हव्या मरुतो ररे हि कं मो ष्व१न्यत्र गंतन ॥५॥ आ च नो बर्हिः सदताविता च नः स्पार्हाणि दातवे वसु । अस्रेधंतो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ॥ ६ ॥ २९ ॥ सस्वश्चिद्धि तन्व१ः शुंभमाना आ हंसासो नीलपृष्ठा अपप्तन् । विश्वं शर्धो अभितो मा नि षेद नरो न रण्वाः सवने मदंतः ॥७॥ यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति । द्रुहः पाशान्प्रति स मुचीष्ट तपिष्ठेन हन्मना हंतना तं ॥ ८ ॥ सांतपना इदं हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः ॥ ९ ॥ गृहमेधास आ गत मरुतो माप भूतन । युष्माकोती सुदानवः ॥१०॥ इहेह वः स्वतवसः कवयः सूर्यत्वचः । यज्ञं मरुत आ वृणे ॥११॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥ १२ ॥ ३० ॥ ४ ॥

॥ ६० ॥ १–१२ वसिष्ठः ॥ १ सूर्यः । २–१२ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥ ६० ॥ यद॒द्य सू॑र्य॒ ब्रवो॒ऽना॑गा उ॒द्यन्मि॒त्राय॒ वरु॑णाय स॒त्यं । व॒यं दे॑व॒त्रादि॑ते स्याम॒ तव॑ प्रि॒यासो॑ अर्य॒मन्गृ॒णंतः॑ ॥ १ ॥ ए॒ष स्य मि॑त्रावरुणा नृ॒चक्षा॑ उ॒भे उदे॑ति॒ सूर्यो॑ अ॒भि ज्मन् । विश्व॑स्य स्था॒तुर्जग॑तश्च गो॒पा ऋ॒जु मर्ते॑षु वृजि॒ना च॒ पश्य॑न् ॥ २ ॥ अयु॑क्त स॒प्त ह॒रितः॑ स॒धस्था॒द्या ईं॒ वह॑न्ति॒ सूर्यं॑ घृ॒ताचीः॑ । धामा॑नि मित्रावरुणा यु॒वाकुः॒ सं यो यू॒थेव॒ जनि॑मानि॒ चष्टे॑ ॥ ३ ॥ उद्वां॑ पृ॒क्षासो॒ मधु॑मंतो अस्थु॒रा सूर्यो॑ अरुहच्छु॒क्रमर्णः॑ । यस्मा॑ आदि॒त्या अध्व॑नो॒ रदं॑ति मि॒त्रो अ॑र्य॒मा वरु॑णः स॒जोषाः॑ ॥ ४ ॥ इ॒मे चे॒तारो॒ अनृ॑तस्य॒ भूरे॑र्मि॒त्रो अ॑र्य॒मा वरु॑णो॒ हि संति॑ । इ॒म ऋ॒तस्य॑ वावृधुर्दुरो॒णे श॒ग्मासः॑ पु॒त्रा अदि॑ते॒रद॑ब्धाः ॥ ५ ॥ इ॒मे मि॒त्रो वरु॑णो दू॒ळभा॑सो॒ऽचेत॑सं चिच्चितयंति॒ दक्षैः॑ । अपि॒ क्रतुं॑ सु॒चेत॑सं॒ वत॑न्तस्ति॒रश्चि॒दंहः॑ सु॒पथा॑ नयंति ॥ ६ ॥ १ ॥ इ॒मे दि॒वो अनि॑मिषा पृथि॒व्याश्चि॑कि॒त्वांसो॑ अचे॒तसं॑ नयंति । प्र॒व्रा॒जे चि॑न्न॒द्यो॑ गा॒धम॑स्ति पा॒रं नो॑ अ॒स्य वि॑ष्पि॒तस्य॑ पर्ष॒न् ॥ ७ ॥ यद्गो॒पाव॒ददि॑तिः॒ शर्म॑ भ॒द्रं मि॒त्रो यच्छं॑ति॒ वरु॑णः सु॒दासे॑ । तस्मि॒न्ना तो॒कं तन॑यं॒ दधा॑ना॒ मा क॑र्म देव॒हेळ॑नं तुरासः ॥ ८ ॥ अव॒ वेदिं॒ होत्रा॑भिर्यजेत॒ रिपः॒ काश्चि॑द्वरुण॒ध्रुतः॒ सः । परि॒ द्वेषो॑भिरर्य॒मा वृ॑णक्तू॒रुं सु॒दासे॑ वृषणा उ लो॒कं ॥ ९ ॥ स॒स्वश्चि॒द्धि सम॑ृतिस्त्वे॒षेषा॑मपी॒च्ये॑न॒ सह॑सा॒ सहं॑ते । यु॒ष्मद्भि॒या वृ॑षणो॒ रेज॑माना॒ दक्ष॑स्य चिन्महि॒ना मृ॒ळता॑ नः ॥ १० ॥ यो ब्रह्म॑णे सु॒म॒तिमा॒यजा॑ते॒ वाज॑स्य सा॒तौ प॑र॒मस्य॑ रा॒यः । सीक्ष॑न्त म॒न्युं म॒घवा॑नो अ॒र्य उ॒रु क्षया॑य चक्रिरे सु॒धातु॑ ॥ ११ ॥ इ॒यं दे॑व पु॒रोहि॑तिर्यु॒वभ्यां॑ य॒ज्ञेषु॑ मित्रावरुणावकारि ।

विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः
॥ १२ ॥ २ ॥

॥ ६१ ॥ १–७ वसिष्ठः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥ ६१ ॥ उद्वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान् ।
अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत ॥ १ ॥ प्र
वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति । यस्य
ब्रह्माणि सुक्रतू अवाथ आ यत्क्रत्वा न शरदः पृणैथे ॥ २ ॥ प्रो-
रोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद्बृहतः सुदानू । स्पशो
दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥ ३ ॥ शंसा
मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा । अयन्मा-
सा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ॥ ४ ॥ अमूरा
विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षम् । द्रुहः सचन्ते
अनृता जनानां न वां निण्यान्यचिते अभूवन् ॥ ५ ॥ समु वां
यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः । प्र वां मन्मा-
न्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि ॥ ६ ॥ इयं देव पुरो-
हितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि । विश्वानि दुर्गा पिपृतं
तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ ३ ॥

॥ ६२ ॥ १–६ वसिष्ठः ॥ १–३ सूर्यः । ४–६ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥ ६२ ॥ उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषा-
णाम् । समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृ-
भिर्भूत् ॥ १ ॥ स सूर्य प्रति पुरो न उद्गा एभिः स्तोमेभिरेतशे-
भिरेवैः । प्र नो मित्राय वरुणाय वोचोऽनागसो अर्यम्णे
अग्नये च ॥ २ ॥ वि नः सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो

अग्निः। यच्छंतु चंद्रा उपमं नो अर्कमा नः कामं पूपुरंतु स्तवानाः
॥३॥ द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान
ऋष्वे। मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृ-
णां॥४॥ प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा॥५॥ नू
मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधंतु। सुगा नो
विश्वा सुपथानि संतु यूयं पात स्वस्तिभिः सदा नः॥६॥४॥

॥ ६३ ॥ १—६ वसिष्ठः ॥ १—५[१] सूर्यः । ५[२]. ६ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥६३॥ उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषा-
णां। चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक्तमांसि॥१॥
उद्वेति प्रसवीता जनानां महान्केतुरर्णवः सूर्यस्य। समानं चक्रं
पर्याविवृत्सन्यदेतशो वहति धूर्षु युक्तः॥२॥ विभ्राजमान उष-
सामुपस्थाद्रेभैरुदेत्यनुमद्यमानः। एष मे देवः सविता चच्छंद
यः समानं न प्रमिनाति धाम॥३॥ दिवो रुक्म उरुचक्षा उदे-
ति दूरेअर्थस्तरणिर्भ्राजमानः। नूनं जनाः सूर्येण प्रसूता अ-
यन्नर्थानि कृणवन्नपांसि॥४॥ यत्रा चक्रुरमृता गातुमस्मै
श्येनो न दीयन्नन्वेति पाथः। प्रति वां सूर उदिते विधेम
नमोभिर्मित्रावरुणोत हव्यैः॥५॥ नू मित्रो वरुणो अर्यमा
नस्त्मने तोकाय वरिवो दधंतु। सुगा नो विश्वा सुपथानि संतु
यूयं पात स्वस्तिभिः सदा नः॥६॥५॥

॥ ६४ ॥ १—५ वसिष्ठः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥६४॥ दिवि क्षयंता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो

ददीरन्। हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो
जुषंत ॥१॥ आ राजाना मह ऋतस्य गोपा सिंधुपती क्षत्रिया
यातमर्वाक्। इळां नो मित्रावरुणोत वृष्टिमव दिव इन्वतं जी-
रदानू ॥२॥ मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्ठेभिः पथि-
भिर्नयंतु। ब्रवद्यथा न आदरिः सुदास इषा मदेम सह देवगोपाः
॥३॥ यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च। उक्षे-
थां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथां ॥४॥ एष
स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि। अविष्टं
धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥५॥६॥

॥ ६५ ॥ १–५ वसिष्ठः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥६५॥ प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षं।
ययोरसुर्य१मक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगत्नु ॥१॥
ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयंतीः।
अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ॥२॥
ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय। ऋतस्य मि-
त्रावरुणा पथा वामपो न नावा दुरिता तरेम ॥३॥ आ नो
मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः। प्रति वा-
मत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः ॥४॥ एष स्तोमो
वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि। अविष्टं धियो
जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥५॥७॥

॥ ६६ ॥ १–१९ वसिष्ठः ॥ १–३. १७–१९ मित्रावरुणौ। ४–१३ आदित्याः। १४–१६ सूर्यः ॥
१–९. १७–१९ गायत्री। १०. १२. १४ बृहती। ११. १३. १५ सतोबृहती। १६ पुरउष्णिक् ॥

॥६६॥ प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः। नमस्वा-

न्तुविजातयोः ॥ १ ॥ या धारयंत देवाः सुदक्षा दक्षपितरा । असुर्याय प्रमहसा ॥ २ ॥ ता नः स्तिपा तनूपा वरुण जरितॄणां । मित्र साधयतं धियः ॥ ३ ॥ यदद्य सूर उदितेऽनागा मित्रो अर्यमा । सुवाति सविता भगः ॥ ४ ॥ सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः । ये नो अंहोऽतिपिप्रति ॥ ५ ॥ ८ ॥ उत स्वराजो अदितिरदब्धस्य व्रतस्य ये । महो राजान ईशते ॥ ६ ॥ प्रति वां सूर उदिते मित्रं गृणीषे वरुणं । अर्यमणं रिशादसं ॥ ७ ॥ राया हिरण्यया मतिरियमवृकाय शवसे । इयं विप्रा मेधसातये ॥ ८ ॥ ते स्याम देव वरुण ते मित्र सूरिभिः सह । इषं स्वश्च धीमहि ॥ ९ ॥ बहवः सूरचक्षसोऽग्निजिह्वा ऋतावृधः । त्रीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः ॥ १० ॥ ९ ॥ वि ये दधुः शरदं मासमादहर्यज्ञमक्तुं चादृचं । अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत ॥ ११ ॥ तद्वो अद्य मनामहे सूक्तैः सूर उदिते । यदोहते वरुणो मित्रो अर्यमा यूयमृतस्य रथ्यः ॥ १२ ॥ ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः । तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥ १३ ॥ उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे । यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरं ॥ १४ ॥ शीर्ष्णःशीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः । सप्त स्वसारः सुविताय सूर्यं वहंति हरितो रथे ॥ १५ ॥ १० ॥ तच्चक्षुर्देवहितं शुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं ॥ १६ ॥ काव्येभिरदाभ्या यातं वरुण द्युमत् । मित्रश्च सोमपीतये ॥ १७ ॥ दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा । पिबतं सोममातुजी ॥ १८ ॥ आ यातं

मित्रावरुणा जुषाणावाहुतिं नरा । पातं सोममृतावृधा
॥१९॥११॥

॥ ६७ ॥ १–१० वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥६७॥ प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञि-
येन । यो वां दूतो न धिष्ण्यावजीगरच्छा सूनुर्न पितरा वि-
वक्मि ॥१॥ अशोच्यग्निः समिधानो अस्मे उपो अदृश्रन्तमस-
श्चिदन्ताः । अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जाय-
मानः ॥२॥ अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति ना-
सत्या विवक्वान् । पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता
रथेन ॥३॥ अवोर्वां नूनमश्विना युवाकुर्हुवे यद्वां सुते माध्वी
वसूयुः । आ वां वहन्तु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता
मधूनि ॥४॥ प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं व-
सूयुं । विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती श-
चीभिः ॥५॥१२॥ अविष्टं धीष्वश्विना न आसु प्रजावद्रेतो अह्रयं
नो अस्तु । आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं
गमेम ॥६॥ एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो
अस्मे । अहेळता मनसा यातमर्वागश्नन्ता हव्यं मानुषीषु वि-
क्षु ॥७॥ एकस्मिन्योगे भुरणा समाने परि वां सप्त स्रवतो रथो
गात् । न वायन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥८॥
असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति । प्र ये
बन्धुं सूनृताभिस्तिरन्ते गव्या पृञ्चन्तो अश्व्या मघानि ॥९॥ नू मे
हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् । धत्तं
रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः ॥१०॥१३॥

॥ ६८ ॥ १–९ वसिष्ठः ॥ अश्विनौ ॥ १–७ विराट् । ८. ९ त्रिष्टुप् ॥

॥ ६८ ॥ आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः । हव्यानि च प्रतिभृता वीतं नः ॥ १ ॥ प्र वामंधांसि मद्यान्यस्थुररं गंतं हविषो वीतये मे । तिरो अर्यो हवनानि श्रुतं नः ॥ २ ॥ प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः । अस्मभ्यं सूर्यावसू इयानः ॥ ३ ॥ अयं ह यद्वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद्युवभ्यां । आ वल्गू विप्रो ववृतीत हव्यैः ॥ ४ ॥ चित्रं ह यद्वां भोजनं न्वस्ति न्यत्रये महिष्वंतं युयोतं । यो वामोमानं दधते प्रियः सन् ॥ ५ ॥ १४ ॥ उत त्यद्वां जुरते अश्विना भूच्च्यवानाय प्रतीत्यं हविर्दे । अधि यद्वर्प इतऊति धत्थः ॥ ६ ॥ उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे । निरीं पर्षदरावा यो युवाकुः ॥ ७ ॥ वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना । यावघ्न्यामपिन्वतमपो न स्तर्यं चिच्छक्त्यश्विना शचीभिः ॥ ८ ॥ एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा । इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिः सदा नः ॥ ९ ॥ १५ ॥

॥ ६९ ॥ १–८ वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥ ६९ ॥ आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः । घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान् ॥ १ ॥ स पप्रथानो अभि पंच भूमा त्रिवंधुरो मनसा यातु युक्तः । विशो येन गच्छथो देवयंतीः कुत्रा चिद्यामंमश्विना दधाना ॥ २ ॥ स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमंतं पिबाथः । वि वां रथो वध्वा३ यादमानोऽंतान्दिवो बाधते वर्तनिभ्यां ॥ ३ ॥ युवोः श्रियं परि

योषावृणीत सूर्या दुहिता परितक्म्यायां । यद्देवयन्तमवथः श-
चीभिः परि घ्रंसमोमना वां वयो गात् ॥४॥ यो ह स्य वां रथि-
रा वस्त उस्रा रथो युजानः परियाति वर्तिः । तेन नः शं योरुष-
सो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन् ॥५॥ नरा गौरेव विद्युतं
तृषाणास्माकमद्य सवनोप यातं । पुरुत्रा हि वां मतिभिर्हवन्ते
मा वामन्ये नि यमन्देवयन्तः ॥६॥ युवं भुज्युमवविद्धं समुद्र
उदूहथुरर्णसो अस्रिधानैः । पतत्रिभिरश्रमैरव्यथिभिर्दंसना-
भिरश्विना पारयन्ता ॥७॥ नू मे हवमा शृणुतं युवाना यासिष्टं
वर्तिरश्विनाविरावत् । धत्तं रत्नानि जरतं च सूरीन्यूयं पात
स्वस्तिभिः सदा नः ॥८॥१६॥

॥७०॥ १–७ वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥७०॥ आ विश्ववाराश्विना गतं नः प्र तत्स्थानमवाचि
वां पृथिव्यां । अश्वो न वाजी शुनपृष्ठो अस्थादा यत्से-
दथुर्ध्रुवसे न योनिं ॥१॥ सिषक्ति सा वां सुमतिश्चनिष्ठातापि
घर्मो मनुषो दुरोणे । यो वां समुद्रान्त्सरितः पिपर्त्येतग्वा
चिन्न सुयुजा युजानः ॥२॥ यानि स्थानान्यश्विना दधाथे
दिवो यह्वीष्वोषधीषु विक्षु । नि पर्वतस्य मूर्धनि सदन्तेषं
जनाय दाशुषे वहन्ता ॥३॥ चनिष्टं देवा ओषधीष्वप्सु य-
द्योग्या अश्नवैथे ऋषीणां । पुरूणि रत्ना दधतौ न्य१स्मे
अनु पूर्वाणि चख्यथुर्युगानि ॥४॥ शुश्रुवांसा चिदश्विना
पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणां । प्रति प्र यातं वरमा
जनायास्मे वामस्तु सुमतिश्चनिष्ठा ॥५॥ यो वां यज्ञो ना-
सत्या हविष्मान्कृतब्रह्मा समर्यो३ भवाति । उप प्र यातं वरमा

वसिष्ठमिमा ब्रह्माण्यृच्यंते युवभ्यां ॥६॥ इयं मनीषा इयमश्वि-
ना गीरिमां सुवृक्तिं वृषणा जुषेथां। इमा ब्रह्माणि युवयून्यग्म-
न्यूयं पात स्वस्तिभिः सदा नः ॥७॥१७॥४॥

॥ ७१ ॥ १–६ वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥७१॥ अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय
पंथां। अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतं
॥१॥ उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहंता। युयु-
तमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः ॥२॥ आ
वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयंतु। स्यूमगभ-
स्तिमृतयुग्भिरश्वैराश्विना वसुमंतं वहेथां ॥३॥ यो वां रथो
नृपती अस्ति वोळ्हा त्रिवंधुरो वसुमाँ उस्रयामा। आ न एना
नासत्योप यातमभि यद्वां विश्वप्स्न्यो जिगाति ॥४॥ युवं च्यवानं
जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वं। निरंहसस्तमसः स्पर्त-
मत्रिं नि जाहुषं शिथिरे धातमंतः ॥५॥ इयं मनीषा इयमश्विना
गीरिमां सुवृक्तिं वृषणा जुषेथां। इमा ब्रह्माणि युवयून्यग्मन्यूयं
पात स्वस्तिभिः सदा नः ॥६॥१८॥

॥ ७२ ॥ १–५ वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥७२॥ आ गोमता नासत्या रथेनाश्वावता पुरुश्चंद्रेण
यातं। अभि वां विश्वा नियुतः सचंते स्पार्हया श्रिया तन्वा
शुभाना ॥१॥ आ नो देवेभिरुप यातमर्वाक्सजोषसा नास-
त्या रथेन। युवोर्हि नः सख्या पित्र्याणि समानो बंधुरुत तस्य
वित्तं ॥२॥ उदु स्तोमासो अश्विनोरबुध्रञ्जामि ब्रह्माण्यु-
षसश्च देवीः। आविवासन्रोदसी धिष्ण्येमे अच्छा विप्रो

नासत्या विवक्ति ॥३॥ वि चेदुच्छंत्यश्विना उषासः प्र वां ब्रह्मा-
णि कारवो भरंते। ऊर्ध्वं भानुं सविता देवो अश्रेद्बृहदग्नयः समि-
धा जरंते ॥४॥ आ पश्चातान्नासत्या पुरस्तादाश्विना यातमध-
रादुदक्तात्। आ विश्वतः पांचजन्येन राया यूयं पात स्वस्तिभिः
सदा नः ॥५॥१९॥

॥ ७३ ॥ १–५ वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥७३॥ अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयंतो द-
धानाः। पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः ॥१॥
न्यु प्रियो मनुषः सादि होता नासत्या यो यजते वंदते च। अश्नीतं
मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥२॥
अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथां। श्रुष्टीवेव
प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः ॥३॥ उप त्या
वह्नी गमतो विशं नो रक्षोहणा संभृता वीळुपाणी। समंधां-
स्यग्मत मत्सराणि मा नो मर्धिष्टमा गतं शिवेन ॥४॥ आ प-
श्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात्। आ विश्वतः
पांचजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥५॥२०॥

॥ ७४ ॥ १–६ वसिष्ठः ॥ अश्विनौ ॥ १. ३. ५ बृहती । २. ४. ६ सतोबृहती ॥

॥७४॥ इमा उ वां दिविष्टय उस्रा हवंते अश्विना। अयं वा-
मह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥१॥ युवं चित्रं
ददथुर्भोजनं नरा चोदेथां सूनृतावते। अर्वाग्रथं समनसा नि
यच्छतं पिबतं सोम्यं मधु ॥२॥ आ यातमुप भूषतं मध्वः पि-
बतमश्विना। दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतं
॥३॥ अश्वासो ये वामुप दाशुषो गृहं युवां दीयंति बिभ्रतः। मक्षू-

युभिर्नरा हयेभिरश्विना देवा यातमस्मयू ॥४॥ अधा ह
यंतो अश्विना पृक्षः सचंत सूरयः । ता यंसतो मघवद्भ्यो ध्रुवं
यशश्छर्दिरस्मभ्यं नासत्या ॥५॥ प्र ये ययुरवृकासो रथा
इव नृपातारो जनानां । उत स्वेन शवसा शूशुवुर्नर उत
क्षियंति सुक्षितिं ॥६॥२१॥

॥ ७५ ॥ १–८ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥७५॥ व्यु१षा आवो दिविजा ऋतेनाविष्कृण्वाना म-
हिमानमागात् । अप द्रुहस्तम आवरजुष्टमंगिरस्तमा पथ्या
अजीगः ॥१॥ महे नो अद्य सुविताय बोध्युषो महे सौ-
भगाय प्र यंधि । चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि
श्रवस्युं ॥२॥ एते त्ये भानवो दर्शतायाश्चित्रा उषसो अमृतास
आगुः । जनयंतो दैव्यानि व्रतान्यापृणंतो अंतरिक्षा व्य-
स्थुः ॥३॥ एषा स्या युजाना पराकात्पंच क्षितीः परि सद्यो
जिगाति । अभिपश्यंती वयुना जनानां दिवो दुहिता भुवनस्य
पत्नी ॥४॥ वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे
वसूनां । ऋषिष्टुता जरयंती मघोन्युषा उच्छति वह्निभिर्गृ-
णाना ॥५॥ प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्रन्नु-
षसं वहंतः । याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते
जनाय ॥६॥ सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता
यजत्रैः । रुजदृळ्हानि दददुस्रियाणां प्रति गाव उषसं वा-
वशंत ॥७॥ नू नो गोमद्वीरवद्धेहि रत्नमुषो अश्वावत्पु-
रुभोजो अस्मे । मा नो बर्हिः पुरुषता निदे कर्यूयं पात स्व-
स्तिभिः सदा नः ॥८॥२२॥

॥ ७६ ॥ १–७ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥ ७६ ॥ उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत् । क्रत्वा देवानामजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषाः ॥ १ ॥ प्र मे पंथा देवयाना अदृश्रन्नमर्धंतो वसुभिरिष्कृतासः । अभूदु केतुरुषसः पुरस्तात्प्रतीच्यागादधि हर्म्येभ्यः ॥ २ ॥ तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्यस्य । यतः परि जार इवाचरंत्युषो ददृक्षे न पुनर्यतीव ॥ ३ ॥ त इद्देवानां सधमाद आसन्नृतावानः कवयः पूर्व्यासः । गूळ्हं ज्योतिः पितरो अन्वविंदन्सत्यमंत्रा अजनयन्नुषासं ॥ ४ ॥ समान ऊर्वे अधि संगतासः सं जानते न यतंते मिथस्ते । ते देवानां न मिनंति व्रतान्यमर्धंतो वसुभिर्यादमानाः ॥ ५ ॥ प्रति त्वा स्तोमैरीळते वसिष्ठा उषर्बुधः सुभगे तुष्टुवांसः । गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व ॥ ६ ॥ एषा नेत्री राधसः सूनृतानामुषा उच्छंती रिभ्यते वसिष्ठैः । दीर्घश्रुतं रयिमस्मे दधाना यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ २३ ॥

॥ ७७ ॥ १–६ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥ ७७ ॥ उपो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवंती चरायै । अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि ॥ १ ॥ विश्वं प्रतीची सप्रथा उदस्थाद्रुशद्वासो बिभ्रती शुक्रमश्वैत् । हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेत्र्यह्नामरोचि ॥ २ ॥ देवानां चक्षुः सुभगा वहंती श्वेतं नयंती सुदृशीकमश्वं । उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता ॥ ३ ॥ अंतिवामा दूरे अमित्रमुच्छोर्वीं गव्यूतिमभयं कृधी नः । यावय द्वेष आ भरा वसूनि चो-

दय राधो गृणते मघोनि ॥४॥ अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो
देवि प्रतिरंती न आयुः । इषं च नो दधती विश्ववारे गोमदश्वा-
वद्रथवच्च राधः ॥५॥ यां त्वा दिवो दुहितर्वर्धयंत्युषः सुजाते म-
तिभिर्वसिष्ठाः । सास्मासु धा रयिमृष्वं बृहंतं यूयं पात स्वस्ति-
भिः सदा नः ॥६॥२४॥

॥ ७८ ॥ १—५ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥७८॥ प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अंजयो वि श्र-
यंते । उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि
॥१॥ प्रति षीमग्निर्जरते समिद्धः प्रति विप्रासो मतिभिर्गृणंतः ।
उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरिताप देवी
॥२॥ एता उ त्याः प्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छंतीरुषसो विभा-
तीः । अजीजनन्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टं ॥३॥
अचेति दिवो दुहिता मघोनी विश्वे पश्यंत्युषसं विभातीं । आ-
स्थाद्रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहंति ॥४॥ प्रति
त्वाद्य सुमनसो बुधंतास्माकासो मघवानो वयं च । तिल्विला-
यध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः ॥५॥२५॥

॥ ७९ ॥ १—५ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥७९॥ व्यु१षा आवः पथ्या३ जनानां पंच क्षितीर्मानु-
षीर्बोधयंती । सुसंदृग्भिरुक्षभिर्भानुमश्रेद्वि सूर्यो रोदसी च-
क्षसावः ॥१॥ व्यंजते दिवो अंतेष्वक्तून्विशो न युक्ता
उषसो यतंते । सं ते गावस्तम आ वर्तयंति ज्योतिर्यच्छंति
सवितेव बाहू ॥२॥ अभूदुषा इंद्रतमा मघोन्यजीजनत्सु-
विताय श्रवांसि । वि दिवो देवी दुहिता दधात्यंगि-

रस्तमा सुकृते वसूनि ॥३॥ तावदुषो राधो अस्मभ्यं रास्व या-
वत्स्तोतृभ्यो अरदो गृणाना। यां त्वा जज्ञुर्वृषभस्या रवेण वि
दृळ्हस्य दुरो अद्रेरौर्णोः ॥४॥ देवंदेवं राधसे चोदयंत्यस्मद्र्यक्सू-
नृता ईरयंती। व्युच्छंती नः सनये धियो धा यूयं पात स्वस्तिभिः
सदा नः ॥५॥२६॥

॥ ८० ॥ १–३ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥८०॥ प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा
अबुधन्। विवर्तयंतीं रजसी समंते आविष्कृणवतीं भुवनानि
विश्वा ॥१॥ एषा स्या नव्यमायुर्दधाना गूढ्वी तमो ज्योतिषोषा
अबोधि। अग्र एति युवतिरह्रयाणा प्राचिकितत्सूर्यं यज्ञमग्निं
॥२॥ अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छंतु भद्राः।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः
॥३॥२७॥५॥

॥ ८१ ॥ १–६ वसिष्ठः ॥ उषाः ॥ १.३.५ बृहती । २.४.६ सतोबृहती ॥

॥८१॥ प्रत्यु अदर्श्यायत्यु१च्छंती दुहिता दिवः। अपो महि
व्ययति चक्षसे तमो ज्योतिष्कृणोति सूनरी ॥१॥ उदुस्रियाः सृ-
जते सूर्यः सचाँ उद्यन्नक्षत्रमर्चिवत्। तवेदुषो व्युषि सूर्यस्य च सं
भक्तेन गमेमहि ॥२॥ प्रति त्वा दुहितर्दिव उषो जीरा अभुत्स्म-
हि। या वहसि पुरु स्पार्हं वनन्वति रत्नं न दाशुषे मयः ॥३॥
उच्छंती या कृणोषि मंहना महि प्रख्यै देवि स्वर्दृशे। तस्यास्ते
रत्नभाज ईमहे वयं स्याम मातुर्न सूनवः ॥४॥ तच्चित्रं राध आ
भरोषो यद्दीर्घश्रुत्तमं। यत्ते दिवो दुहितर्मर्तभोजनं तद्रास्व
भुनजामहे ॥५॥ श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अ-

स्मभ्यं गोमतः । चोदयित्री मघोनः सूनृतावत्युषा उच्छदप
स्रिधः ॥ ६ ॥ १ ॥

॥ ८२ ॥ १-१० वसिष्ठः ॥ इंद्रावरुणौ ॥ जगती ॥

॥ ८२ ॥ इंद्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म
यच्छतं । दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः
॥ १ ॥ सम्राळन्यः स्वराळन्य उच्यते वां महांताविंद्रावरुणा म-
हावसू । विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं
दधुः ॥ २ ॥ अन्वपां खान्यतृंतमोजसा सूर्यमैरयतं दिवि प्रभुं । इंद्रा-
वरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः ॥ ३ ॥
युवामिद्युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः ।
ईशाना वस्व उभयस्य कारव इंद्रावरुणा सुहवा हवामहे ॥ ४ ॥
इंद्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना ।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ॥ ५ ॥ २ ॥
महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत्स्वं ।
अजामिमन्यः श्नथयंतमातिरद्दभ्रेभिरन्यः प्र वृणोति भूयसः ॥ ६ ॥
न तमंहो न दुरितानि मर्त्यमिंद्रावरुणा न तपः कुतश्चन । यस्य
देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः ॥ ७ ॥
अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः । युवोर्हि
सख्यमुत वा यदाप्यं मार्डीकमिंद्रावरुणा नि यच्छतं ॥ ८ ॥ अ-
स्माकमिंद्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा । यद्वां
हवंत उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥ ९ ॥ अस्मे
इंद्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छंतु महि शर्म सप्रथः । अवध्रं
ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥ ३ ॥

॥ ८३ ॥ १–१० वसिष्ठः ॥ इंद्रावरुणौ ॥ जगती ॥

॥८३॥ युवां नरा पश्यमानास आप्यं प्राचा गव्यंतः पृथुपर्शवो ययुः। दासा च वृत्रा हतमार्याणि च सुदासमिंद्रावरुणावसावतं॥१॥ यत्रा नरः समयंते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियं। यत्रा भयंते भुवना स्वर्दृशस्तत्रा न इंद्रावरुणाधि वोचतं॥२॥ सं भूम्या अंता ध्वसिरा अदृक्षतेंद्रावरुणा दिवि घोष आरुहत्। अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतं॥३॥ इंद्रावरुणा वधनाभिरप्रति भेदं वन्वंता प्र सुदासमावतं। ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः॥४॥ इंद्रावरुणावभ्या तपंति माघान्यर्यो वनुषामरातयः। युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥५॥४॥ युवां हवंत उभयास आजिष्विंद्रं च वस्वो वरुणं च सातये। यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह॥६॥ दश राजानः समिता अयज्यवः सुदासमिंद्रावरुणा न युयुधुः। सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु॥७॥ दाशराज्ञे परियत्ताय विश्वतः सुदास इंद्रावरुणावशिक्षतं। श्वित्यंचो यत्र नमसा कपर्दिनो धिया धीवंतो असपंत तृत्सवः॥८॥ वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा। हवामहे वां वृषणा सुवृक्तिभिरस्मे इंद्रावरुणा शर्म यच्छतं॥९॥ अस्मे इंद्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छंतु महि शर्म सप्रथः। अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे॥१०॥५॥

॥ ८४ ॥ १–५ वसिष्ठः ॥ इंद्रावरुणौ ॥ त्रिष्टुप् ॥

॥८४॥ आ वां राजानावध्वरे ववृत्यां हव्येभिरिंद्रावरुणा

नमोभिः। प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जि-
गाति ॥१॥ युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सि-
नीथः। परि नो हेळो वरुणस्य वृज्या उरुं न इंद्रः कृणवदु लोकं
॥२॥ कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता।
उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतं ॥३॥
अस्मे इंद्रावरुणा विश्ववारं रयिं धत्तं वसुमंतं पुरुक्षुं। प्र य आ-
दित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ॥४॥ इयमिंद्रं
वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना। सुरत्नासो देववी-
तिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥५॥६॥

॥८५॥ १–५ वसिष्ठः ॥ इंद्रावरुणौ ॥ त्रिष्टुप् ॥

॥८५॥ पुनीषे वामरक्षसं मनीषां सोममिंद्राय वरुणाय जु-
ह्वत्। घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके ॥१॥
स्पर्धंते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतंति। युवं ताँ इं-
द्रावरुणावमित्रान्हतं पराचः शर्वा विषूचः ॥२॥ आपश्चिद्धि
स्वयशसः सदःसु देवीरिंद्रं वरुणं देवता धुः। कृष्टीरन्यो धारयति
प्रविक्ता वृत्राण्यन्यो अप्रतीनि हंति ॥३॥ स सुक्रतुर्ऋतचिदस्तु
होता य आदित्य शवसा वां नमस्वान्। आववर्तदवसे वां ह-
विष्मानसदित्स सुविताय प्रयस्वान् ॥४॥ इयमिंद्रं वरुणमष्ट
मे गीः प्रावत्तोके तनये तूतुजाना। सुरत्नासो देववीतिं गमेम
यूयं पात स्वस्तिभिः सदा नः ॥५॥७॥

॥८६॥ १–८ वसिष्ठः ॥ वरुणः ॥ त्रिष्टुप् ॥

॥८६॥ धीरा त्वस्य महिना जनूंषि वि यस्तस्तंभ रोदसी

चिदुर्वी । प्र नाकमृष्वं नुनुदे बृहंतं द्विता नक्षत्रं पप्रथच्च भूम ॥१॥
उत स्वया तन्वा३ सं वदे तत्कदा न्व१ंतर्वरुणे भुवानि । किं मे
हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यं ॥२॥ पृच्छे
तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छं । समानमिन्मे
कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥३॥ किमागं आस व-
रुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायं । प्र तन्मे वोचो दूळभ
स्वधावोऽव त्वानेना नमसा तुर इयां ॥४॥ अव द्रुग्धानि पि-
त्र्या सृजा नोऽव या वयं चकृमा तनूभिः । अव राजन्पशुतृपं न
तायुं सृजा वत्सं न दाम्नो वसिष्ठं ॥५॥ न स स्वो दक्षो वरुण ध्रु-
तिः सा सुरा मन्युर्विभीदको अचित्तिः । अस्ति ज्यायान्कनीयस
उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥६॥ अरं दासो न मीळ्हुषे
कराण्यहं देवाय भूर्णयेऽनागाः । अचेतयदचितो देवो अर्यो
गृत्सं राये कवितरो जुनाति ॥७॥ अयं सु तुभ्यं वरुण स्वधावो
हृदि स्तोम उपश्रितश्चिदस्तु । शं नः क्षेमे शमु योगे नो अस्तु
यूयं पात स्वस्तिभिः सदा नः ॥८॥८॥

॥ ८७ ॥ १–७ वसिष्ठः ॥ वरुणः ॥ त्रिष्टुप् ॥

॥८७॥ रदत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रिया नदीनां ।
सर्गो न सृष्टो अर्वतीर्ऋतायञ्चकार महीरवनीरहंभ्यः ॥१॥
आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे सस-
वान् । अंतर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रि-
याणि ॥२॥ परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यंति रो-
दसी सुमेके । ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इ
मन्म ॥३॥ उवाच मे वरुणो मेधिराय त्रिः सप्

बिभर्ति । विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शि-
क्षन् ॥४॥ तिस्रो द्यावो निहिता अंतरस्मिन्तिस्रो भूमीरुपराः
षड्विधानाः । गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेंखं हिरण्ययं
शुभे कं ॥५॥ अव सिंधुं वरुणो द्यौरिव स्याद्द्रप्सो न श्वेतो मृग-
स्तुविष्मान् । गंभीरशंसो रजसो विमानः सुपारक्षत्रः सतो
अस्य राजा ॥६॥ यो मृळयाति चक्रुषे चिदागो वयं स्याम व-
रुणे अनागाः । अनु व्रतान्यदितेर्ऋधंतो यूयं पात स्वस्तिभिः
सदा नः ॥७॥९॥

॥ ८८ ॥ १-७ वसिष्ठः ॥ वरुणः ॥ त्रिष्टुप् ॥

॥८८॥ प्र शुंध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व ।
य ईमर्वांचं करते यजत्रं सहस्रामघं वृषणं बृहंतं ॥१॥ अधा न्वस्य
संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि । स्व१र्यदश्मन्नधिपा उ
अंधोऽभि मा वपुर्दृशये निनीयात् ॥२॥ आ यद्रुहाव वरुणश्च
नावं प्र यत्समुद्रमीरयाव मध्यं । अधि यदपां स्नुभिश्चराव प्र
प्रेंख ईंखयावहै शुभे कं ॥३॥ वसिष्ठं ह वरुणो नाव्याधादृषिं च-
कार स्वपा महोभिः । स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्या-
वस्ततनन्यादुषासः ॥४॥ क्व१त्यानि नौ सख्या बभूवुः सचावहे
यदवृकं पुरा चित् । बृहंतं मानं वरुण स्वधावः सहस्रद्वारं जग-
मा गृहं ते ॥५॥ य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि
कृण्वत्सखा ते । मा त एनस्वंतो यक्षिन्भुजेम यंधि ष्मा विप्रः
स्तुवते वरूथं ॥६॥ ध्रुवासु त्वासु क्षितिषु क्षियंतो व्य१स्मत्पाशं
णो मुमोचत् । अवो वन्वाना अदितेरुपस्थाद्यूयं पात स्व-
दा नः ॥७॥१०॥

॥ ८९ ॥ १–५ वसिष्ठः ॥ वरुणः ॥ १–४ गायत्री । ५ जगती ॥

॥८९॥ मो षु वरुण मृन्मयं गृहं राजन्नहं गमं। मृळा सुक्षत्र मृळय॥१॥ यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः। मृळा सुक्षत्र मृळय॥२॥ क्रत्वः समह दीनता प्रतीपं जगमा शुचे। मृळा सुक्षत्र मृळय॥३॥ अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारं। मृळा सुक्षत्र मृळय॥४॥ यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या३श्चरामसि। अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः॥५॥११॥५॥

॥ ९० ॥ १–७ वसिष्ठः ॥ १–४ वायुः । ५–७ इंद्रवायू ॥ त्रिष्टुप् ॥

॥९०॥ प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमंतः सुतासः। वह वायो नियुतो याह्यच्छा पिबा सुतस्यांधसो मदाय॥१॥ ईशानाय प्रहुतिं यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो। कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य॥२॥ राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवं। अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके॥३॥ उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः। गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः॥४॥ ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहंति। इंद्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचंते॥५॥ ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः। इंद्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः॥६॥ अर्वंतो न श्रवसो भिक्षमाणा इंद्रवायू सुष्टुतिभिर्वसिष्ठाः। वाजयंतः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः॥७॥१२॥

॥ ९१ ॥ १–७ वसिष्ठः ॥ १.३ वायुः । २.४–७ इंद्रवायू ॥ त्रिष्टुप् ॥

॥९१॥ कुविदंग नमसा ये वृधासः पुरा देवा अनवद्यास आ-
सन्। ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण॥१॥ उशं-
ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः। इंद्रवायू
सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यं॥२॥ पीवोअन्ना-
न्रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः। ते वायवे
समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः॥३॥ यावत्तर-
स्तन्वो३ यावदोजो यावन्नरश्चक्षसा दीध्यानाः। शुचिं सोमं शु-
चिपा पातमस्मे इंद्रवायू सदतं बर्हिरेदं॥४॥ नियुवाना नियुतः
स्पार्हवीरा इंद्रवायू सरथं यातमर्वाक्। इदं हि वां प्रभृतं मध्वो
अग्रमध प्रीणाना वि मुमुक्तमस्मे॥५॥ या वां शतं नियुतो याः
सहस्रमिंद्रवायू विश्ववाराः सचंते। आभिर्यातं सुविदत्राभि-
रर्वाक्पातं नरा प्रतिभृतस्य मध्वः॥६॥ अर्वंतो न श्रवसो भि-
क्षमाणा इंद्रवायू सुष्टुतिभिर्वसिष्ठाः। वाजयंतः स्ववसे हुवेम
यूयं पात स्वस्तिभिः सदा नः॥७॥१३॥

॥ ९२ ॥ १–५ वसिष्ठः ॥ १.३–५ वायुः । २ इंद्रवायू ॥ त्रिष्टुप् ॥

॥९२॥ आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो
विश्ववार। उपो ते अंधो मद्यमयामि यस्य देव दधिषे पूर्वपेयं
॥१॥ प्र सोता जीरो अध्वरेष्वस्थात्सोममिंद्राय वायवे पिबध्यै।
प्र यद्वां मध्वो अग्रियं भरंत्यध्वर्यवो देवयंतः शचीभिः॥२॥
प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः
॥३॥ ये वायव इंद्रमादनास आदेवासो नितोशनासो अर्यः।
घ्नंतो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमि-

चान् ॥४॥ आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञं । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥५॥१४॥

॥ ९३ ॥ १–८ वसिष्ठः ॥ इंद्राग्नी ॥ त्रिष्टुप् ॥

॥९३॥ शुचिं नु स्तोमं नवजातमद्येंद्राग्नी वृत्रहणा जुषेथां । उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥१॥ ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा । क्षयंतौ रायो यवसस्य भूरेः पृंक्तं वाजस्य स्थविरस्य घृष्वेः ॥२॥ उपो ह यद्विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः । अर्वंतो न काष्ठां नक्षमाणा इंद्राग्नी जोहुवतो नरस्ते ॥३॥ गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजं । इंद्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥४॥ सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते । अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥५॥१५॥ इमामु षु सोमसुतिमुप न एंद्राग्नी सौमनसाय यातं । नू चिद्धि परिमम्नाथे अस्माना वां शश्वद्भिर्ववृतीय वाजैः ॥६॥ सो अग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिंद्रं वोचेः । यत्सीमागश्चकृमा तत्सु मृळ तदर्यमादितिः शिश्रथंतु ॥७॥ एता अग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान् । मेंद्रो नो विष्णुर्मरुतः परि ख्यन्यूयं पात स्वस्तिभिः सदा नः ॥८॥१६॥

॥ ९४ ॥ १–१२ वसिष्ठः ॥ इंद्राग्नी ॥ १–११ गायत्री । १२ अनुष्टुप् ॥

॥९४॥ इयं वामस्य मन्मन इंद्राग्नी पूर्व्यस्तुतिः । अभ्राद्वृष्टिरिवाजनि ॥१॥ शृणुतं जरितुर्हवमिंद्राग्नी वनतं गिरः ।

ईशाना पिप्यतं धियः॥२॥ मा पापत्वाय नो नरेंद्राग्नी माभिश-
स्तये। मा नो रीरधतं निदे॥३॥ इंद्रे अग्ना नमो बृहत्सुवृक्तिमेर-
यामहे। धिया धेना अवस्यवः ॥४॥ ता हि शश्वंत ईळत इत्था
विप्रास ऊतये। सबाधो वाजसातये॥५॥ ता वां गीर्भिर्विपन्यवः
प्रयस्वंतो हवामहे। मेधसाता सनिष्यवः॥६॥१७॥ इंद्राग्नी अ-
वसा गतमस्मभ्यं चर्षणीसहा। मा नो दुःशंस ईशत॥७॥ मा क-
स्य नो अररुषो धूर्तिः प्र णङ्मर्त्यस्य। इंद्राग्नी शर्म यच्छतं ॥८॥
गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे। इंद्राग्नी तद्वनेमहि ॥९॥
यत्सोम आ सुते नर इंद्राग्नी अजोहवुः। सप्तीवंता सपर्यवः॥१०॥
उक्थेभिर्वृत्रहंतमा या मंदाना चिदा गिरा। आंगूषैराविवास-
तः ॥११॥ ताविद्दुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनं। आभोगं
हन्मना हतमुदधिं हन्मना हतं ॥१२॥१८॥

॥९५॥ १-६ वसिष्ठः ॥ १.२.४-६ सरस्वती। ३ सरस्वान् ॥ त्रिष्टुप् ॥

॥९५॥ प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी
पूः। प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिंधु-
रन्याः ॥१॥ एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य
आ समुद्रात्। रायश्चेतंती भुवनस्य भूरेर्घृतं पयो दुदुहे ना-
हुषाय॥२॥ स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञि-
यासु। स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत
॥३॥ उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अ-
स्मिन्। मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा स-
खिभ्यः ॥४॥ इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं
सरस्वति जुषस्व। तव शर्मन्प्रियतमे दधाना उप स्थेयाम

शरणं न वृक्षं॥५॥ अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः। वर्ध शुभ्रे स्तुवते रासि वाजान्यूयं पात स्वस्तिभिः सदा नः॥६॥१९॥

॥ ९६ ॥ १–६ वसिष्ठः ॥ १–३ सरस्वती । ४–६ सरस्वान् ॥ १ बृहती । २ सतोबृहती । ३ प्रस्तारपंक्तिः । ४–६ गायत्री ॥

॥९६॥ बृहदु गायिषे वचोऽसुर्या नदीनां। सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी॥१॥ उभे यत्ते महिना शुभ्रे अंधसी अधिक्षियंति पूरवः। सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनां॥२॥ भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती। गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत्॥३॥ जनीयंतो न्वग्रवः पुत्रीयंतः सुदानवः। सरस्वंतं हवामहे॥४॥ ये ते सरस्व ऊर्मयो मधुमंतो घृतश्चुतः। तेभिर्नोऽविता भव॥५॥ पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः। भक्षीमहि प्रजामिषं॥६॥२०॥

॥ ९७ ॥ १–१० वसिष्ठः ॥ १ इंद्रः । २. ४–८ बृहस्पतिः । ३. ९ इंद्राब्रह्मणस्पती । १० इंद्राबृहस्पती ॥ त्रिष्टुप् ॥

॥९७॥ यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदंति। इंद्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च॥१॥ आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः। यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव॥२॥ तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे। इंद्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा॥३॥ स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति। कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अति सश्चतो अरिष्टान्॥४॥ तमा नो अर्कममृताय जुष्टमिमे धासुरमृता-

सः पुराजाः। शुचिक्रंदं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम
॥५॥२१॥ तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहं-
ति। सहश्चिद्यस्य नीळवत्सधस्थं नभो न रूपमरुषं वसानाः ॥६॥
स हि शुचिः शतपत्रः स शुंध्युर्हिरण्यवाशीरिषिरः स्वर्षाः। बृह-
स्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥७॥
देवी देवस्य रोदसी जनित्री बृहस्पतिं वावृधतुर्महित्वा। द-
क्षाय्याय दक्षता सखायः करद्ब्रह्मणे सुतरा सुगाधा ॥८॥ इयं वां
ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेंद्राय वज्रिणे अकारि। अविष्टं धियो
जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥९॥ बृहस्पते युव-
मिंद्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य। धत्तं रयिं स्तुवते
कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥१०॥२२॥

॥९८॥ १–७ वसिष्ठः ॥ १–६ इंद्रः। ७ इंद्राबृहस्पती ॥ त्रिष्टुप् ॥

॥९८॥ अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षिती-
नां। गौराद्वेदीयाँ अवपानमिंद्रो विश्वाहेद्याति सुतसोम-
मिच्छन् ॥१॥ यद्दधिषे प्रदिवि चार्वन्नं दिवेदिवे पीति-
मिदस्य वक्षि। उत हृदोत मनसा जुषाण उशन्निंद्र प्रस्थि-
तान्पाहि सोमान् ॥२॥ जज्ञानः सोमं सहसे पपाथ प्र ते
माता महिमानमुवाच। एंद्र पप्राथोर्वं१तरिक्षं युधा देवेभ्यो
वरिवश्चकर्थ ॥३॥ यद्योधया महतो मन्यमानान्साक्षाम
तान्बाहुभिः शाशदानान्। यद्वा नृभिर्वृत इंद्राभियुध्यास्तं
त्वयाजिं सौश्रवसं जयेम ॥४॥ प्रेंद्रस्य वोचं प्रथमा कृ-
तानि प्र नूतना मघवा या चकार। यदेददेवीरसहिष्ट
माया अथाभवत्केवलः सोमो अस्य ॥५॥ तवेदं विश्वम-

भितः पश्व्यं१ यत्पश्यसि चक्षसा सूर्यस्य। गवामसि गोपतिरेक इंद्र भक्षीमहि ते प्रयतस्य वस्वः॥६॥ बृहस्पते युवमिंद्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः॥७॥२३॥

॥ ९९ ॥ १–७ वसिष्ठः ॥ १–३.७ विष्णुः । ४–६ इंद्राविष्णू ॥ त्रिष्टुप् ॥

॥९९॥ परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवंति। उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से॥१॥ न ते विष्णो जायमानो न जातो देव महिम्नः परमंतमाप। उदस्तभ्ना नाकमृष्वं बृहंतं दाधर्थ प्राचीं ककुभं पृथिव्याः॥२॥ इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या। व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः॥३॥ उरुं यज्ञाय चक्रथुरु लोकं जनयंता सूर्यमुषासमग्निं। दासस्य चिद्वृषशिप्रस्य माया जघ्नथुर्नरा पृतनाज्येषु॥४॥ इंद्राविष्णू दृंहिताः शंबरस्य नव पुरो नवतिं च श्नथिष्टं। शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान्॥५॥ इयं मनीषा बृहती बृहंतोरुक्रमा तवसा वर्धयंती। ररे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनेष्विंद्र॥६॥ वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं। वर्धंतु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः॥७॥२४॥

॥ १०० ॥ १–७ वसिष्ठः ॥ विष्णुः ॥ त्रिष्टुप् ॥

॥१००॥ नू मर्तो दयते सनिष्यन्यो विष्णव उरुगायाय दाशत्। प्र यः सत्राचा मनसा यजात एतावंतं नर्यमाविवासात्॥१॥ त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो

मतिं दाः। पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चंद्रस्य रायः
॥२॥ त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा। प्र
विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥३॥ वि
चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन्। ध्रुवासो
अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ॥४॥ प्र तत्ते
अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्। तं त्वा गृ-
णामि तवसमतव्यान्क्षयंतमस्य रजसः पराके ॥५॥ किमित्ते
विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि। मा वर्पो अ-
स्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥६॥ वषट्ते विष्णवास
आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं। वर्धंतु त्वा सुष्टुतयो
गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥७॥ २५ ॥ ६ ॥

॥ १०१ ॥ १—६ वसिष्ठः कुमारो वाग्नेयः ॥ पर्जन्यः ॥ त्रिष्टुप् ॥

॥ १०१ ॥ तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्दुह्रे मधु-
दोघमूधः। स वत्सं कृण्वन्गर्भमोषधीनां सद्यो जातो वृषभो
रोरवीति ॥१॥ यो वर्धन ओषधीनां यो अपां यो विश्वस्य
जगतो देव ईशे। स त्रिधातु शरणं शर्म यंसत्त्रिवर्तु ज्योतिः
स्वभिष्ट्य१स्मे ॥२॥ स्तरीरु त्वद्भवति सूत उ त्वद्यथावशं
तन्वं चक्र एषः। पितुः पयः प्रति गृभ्णाति माता तेन पिता
वर्धते तेन पुत्रः ॥३॥ यस्मिन्विश्वानि भुवनानि तस्थुस्तिस्रो
द्यावस्त्रेधा सस्रुरापः। त्रयः कोशास उपसेचनासो मध्वः
श्चोतंत्यभितो विरप्शं ॥४॥ इदं वचः पर्जन्याय स्वराजे हृदो
अस्त्वंतरं तज्जुजोषत्। मयोभुवो वृष्टयः संत्वस्मे सुपि-
प्पला ओषधीर्देवगोपाः ॥५॥ स रेतोधा वृषभः शश्व-

तीनां तस्मिन्नात्मा जगतस्तस्थुषश्च। तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः ॥६॥१॥

॥१०२॥ १-३ वसिष्ठः कुमारो वाग्नेयः ॥ पर्जन्यः ॥ त्रिष्टुप् ॥

॥१०२॥ पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे। स नो यवसमिच्छतु ॥१॥ यो गर्भमोषधीनां गवां कृणोत्यर्वतां। पर्जन्यः पुरुषीणां ॥२॥ तस्मा इदास्ये हविर्जुहोता मधुमत्तमं। इळां नः संयतं करत् ॥३॥२॥

॥१०३॥ १-१० वसिष्ठः ॥ मंडूकाः ॥ १ अनुष्टुप्। २-१० त्रिष्टुप् ॥

॥१०३॥ संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्वितां प्र मंडूका अवादिषुः ॥१॥ दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानं। गवामह न मायुर्वत्सिनीनां मंडूकानां वग्नुरत्रा समेति ॥२॥ यदीमेनाँ उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायां। अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदंतमेति ॥३॥ अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमंदिषातां। मंडूको यदभिवृष्टः कनिष्कन्पृश्निः संपृंक्ते हरितेन वाचं ॥४॥ यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः। सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु ॥५॥३॥ गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषां। समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदंतः ॥६॥ ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदंतः। संवत्सरस्य तदहः परि ष्ठ यन्मंडूकाः प्रावृषीणं बभूव ॥७॥ ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वंतः परिवत्सरीणं। अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवंति गुह्या न के

चित् ॥८॥ देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनंत्येते ।
संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गं ॥९॥ गो-
मायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि । गवां मंडू-
का ददतः शतानि सहस्रसावे प्र तिरंत आयुः ॥१०॥४॥

॥ १०४ ॥ १—२५ वसिष्ठः ॥ १—७. १५. २५ इंद्रासोमौ रक्षोहणौ । ८. १६. १९—२२. २४ इंद्रः । ९. १२. १३ सोमः । १०. १४ अग्निः । ११ देवाः । १७ ग्रावाणः । १८ मरुतः । २३[1] वसिष्ठः । २३[2] पृथिव्यंतरिक्षे ॥ १—६. १८. २१. २३ जगती । ७ त्रिष्टुब्जगती वा । ८—१७. १९. २०. २२. २४ त्रिष्टुप् । २५ अनुष्टुप् ॥

॥१०४॥ इंद्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृ-
धः । परा शृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः
॥१॥ इंद्रासोमा समघशंसमभ्य१घं तपुर्ययस्तु चरुरग्निवाँ इव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥२॥
इंद्रासोमा दुष्कृतो वव्रे अंतरनारंभणे तमसि प्र विध्यतं । यथा
नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः ॥३॥ इंद्रा-
सोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणं । उत्तक्षतं
स्वर्यं१ पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥४॥ इंद्रासोमा
वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः । तपुर्वधेभिरजरे-
भिरत्रिणो नि पर्शाने विध्यतं यंतु निस्वरं ॥५॥५॥ इंद्रासोमा
परि वां भूतु विश्वतं इयं मतिः कक्ष्याश्वेव वाजिना । यां वां हो-
त्रां परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतं ॥६॥
प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भंगुरावतः । इंद्रा-
सोमा दुष्कृते मा सुगं भूद्यो नः कदा चिदभिदासति द्रुहा
॥७॥ यो मा पाकेन मनसा चरंतमभिचष्टे अनृतेभिर्व-
चोभिः । आप इव काशिना संगृभीता असन्नस्त्वासत
इंद्र वक्ता ॥८॥ ये पाकशंसं विहरंत एवैर्ये वा भद्रं दूषयंति

स्वधाभिः । अहये वा तान्प्रददातु सोम आ वा दधातु निर्ऋ-
तेरुपस्थे ॥९॥ यो नो रसं दिप्सति पित्वो अग्ने यो अश्वा-
नां यो गवां यस्तनूनां । रिपुः स्तेनः स्तेयकृद्दभ्रमेतु नि ष
हीयतां तन्वा३ तना च ॥१०॥६॥ परः सो अस्तु तन्वा३ तना च
तिस्रः पृथिवीरधो अस्तु विश्वाः । प्रति शुष्यतु यशो अस्य देवा
यो नो दिवा दिप्सति यश्च नक्तं ॥११॥ सुविज्ञानं चिकितुषे
जनाय सच्चासच्च वचसी पस्पृधाते । तयोर्यत्सत्यं यतरदृजी-
यस्तदित्सोमोऽवति हंत्यासत् ॥१२॥ न वा उ सोमो वृ-
जिनं हिनोति न क्षत्रियं मिथुया धारयंतं । हंति रक्षो हंत्या-
सद्वदंतमुभाविंद्रस्य प्रसितौ शयाते ॥१३॥ यदि वाहमनृतदेव
आस मोघं वा देवाँ अप्यूहे अग्ने । किमस्मभ्यं जातवेदो
हृणीषे द्रोघवाचस्ते निर्ऋथं सचंतां ॥१४॥ अद्या मुरीय
यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य । अधा
स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥१५॥७॥
यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मी-
त्याह । इंद्रस्तं हंतु महता वधेन विश्वस्य जंतोरधमस्प-
दीष्ट ॥१६॥ प्र या जिगाति खर्गलेव नक्तमप द्रुहा
तन्वं१ गूहमाना । वव्राँ अनंताँ अव सा पदीष्ट ग्रावाणो घ्नंतु
रक्षस उपब्दैः ॥१७॥ वि तिष्ठध्वं मरुतो विक्ष्वि१च्छत गृभायत
रक्षसः सं पिनष्टन । वयो ये भूत्वी पतयंति नक्तभिर्ये वा रिपो
दधिरे देवे अध्वरे ॥१८॥ प्र वर्तय दिवो अश्मानमिंद्र सोम-
शितं मघवन्सं शिशाधि । प्राक्तादपाक्तादधरादुदक्तादभि जहि
रक्षसः पर्वतेन ॥१९॥ एत उ त्ये पतयंति श्वयातव इंद्रं
दिप्संति दिप्सवोऽदाभ्यं । शिशीते शक्रः पिशुनेभ्यो वधं नूनं

सृजदशनिं यातुमद्भ्यः ॥२०॥८॥ इंद्रो यातूनामभवत्पराशरो ह-
विर्मथीनामभ्या३ विवासतां। अभीदु शक्रः परशुर्यथा वनं पा-
त्रेव भिंदन्सत एति रक्षसः ॥२१॥ उलूकयातुं शुशुलूकयातुं ज-
हि श्वयातुमुत कोकयातुं। सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण
रक्ष इंद्र ॥२२॥ मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मि-
थुना या किमीदिना। पृथिवी नः पार्थिवात्पात्वंहसोऽतरिक्षं
दिव्यात्पात्वस्मान् ॥२३॥ इंद्र जहि पुमांसं यातुधानमुत स्त्रियं
मायया शाशदानां। विग्रीवासो मूरदेवा ऋदंतु मा ते दृशंत्सूर्य-
मुच्चरंतं ॥२४॥ प्रति चक्ष्व वि चक्ष्वेंद्रश्च सोम जागृतं। रक्षोभ्यो
वधमस्यतमशनिं यातुमद्भ्यः ॥२५॥९॥६॥७॥

॥ इति सप्तमं मंडलं समाप्तं ॥

॥१॥ १.२ प्रगाथो घोरः काण्वो वा। ३–२९ मेधातिथिमेध्यातिथी काण्वौ। ३०–३३ आसंगः प्लायोगिः। ३४ शश्वत्यांगिरस्यासंगस्य पत्नी ॥ १–२९ इंद्रः। ३०–३३ आसंगस्य दानस्तुतिः। ३४ आसंगः ॥ १.३.५–३२ बृहती। २.४ सतोबृहती। ३३.३४ त्रिष्टुप् ॥

॥१॥ मा चिदन्यद्वि शंसत सखायो मा रिषण्यत। इंद्रमित्स्तो-
ता वृषणं सचा सुते मुहुरुक्था च शंसत ॥१॥ अवक्रक्षिणं
वृषभं यथाजुरं गां न चर्षणीसहं। विद्वेषणं संवननोभ-
यंकरं मंहिष्ठमुभयाविनं ॥२॥ यच्चिद्धि त्वा जना इमे नाना
हवंत ऊतये। अस्माकं ब्रह्मेदमिंद्र भूतु तेऽहा विश्वा च वर्धनं
॥३॥ वि तर्तूर्यंते मघवन्विपश्चितोऽर्यो विपो जनानां।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥४॥ महे चन
त्वामद्रिवः परा शुल्काय देयां। न सहस्राय नायुताय वज्रि-
वो न शताय शतामघ ॥५॥१०॥ वस्याँ इंद्रासि मे पितुरुत
भ्रातुरभुंजतः। माता च मे छदयथः समा वसो वसुत्वनाय रा-

धंसे ॥ ६ ॥ कयथ् कदसि पुरुत्रा चिद्धि ते मनः । अलर्षि युध्म खजकृत्पुरंदर् प्र गायत्रा अगासिषुः ॥ ७ ॥ प्रास्मै गायत्रमर्चत वावातुर्यः पुरंदरः । याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत्पुरः ॥ ८ ॥ ये ते संति दशग्विनः शतिनो ये सहस्रिणः । अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि ॥ ९ ॥ आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसं । इंद्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतं ॥ १० ॥ ११ ॥ यत्तुदत्सूर एतशं वंकू वातस्य पर्णिना । वहत्कुत्समार्जुनेयं शतक्रतुस्त्सरद्गंधर्वमस्तृतं ॥ ११ ॥ य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः । संधाता संधिं मघवा पुरूवसुरिष्कर्ता विहुतं पुनः ॥ १२ ॥ मा भूम निष्ट्या इवेंद्र त्वदरणा इव । वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥ १३ ॥ अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् । सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥ १४ ॥ यदि स्तोमं मम श्रवदस्माकमिंद्रमिंदवः । तिरः पवित्रं ससृवांस आशवो मंदंतु तुग्र्यावृधः ॥ १५ ॥ १२ ॥ आ त्व१द्य सधस्तुतिं वावातुः सख्युरा गहि । उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिं ॥ १६ ॥ सोता हि सोममद्रिभिरेमेनमप्सु धावत । गव्या वस्त्रेव वासयंत इन्नरो निर्धुक्षन्वक्षणाभ्यः ॥ १७ ॥ अध ज्मो अध वा दिवो बृहतो रोचनादधि । अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ १८ ॥ इंद्राय सु मदिन्तमं सोमं सोता वरेण्यं । शक्र एणं पीपयद्विश्वया धिया हिन्वानं न वाजयुं ॥ १९ ॥ मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा । भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ २० ॥ १३ ॥ मदेने-

षितं मदमुग्रमुग्रेण शवसा । विश्वेषां तरुतारं मदच्युतं मदे हि
ष्मा ददाति नः ॥२१॥ शेवारे वार्या पुरु देवो मर्ताय दाशुषे । स
सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः ॥२२॥ एंद्र
याहि मत्स्व चित्रेण देव राधसा । सरो न प्रास्युदरं सपीति-
भिरा सोमेभिरुरु स्फिरं ॥२३॥ आ त्वा सहस्रमा शतं युक्ता रथे
हिरण्यये । ब्रह्मयुजो हरय इंद्र केशिनो वहंतु सोमपीतये ॥२४॥
आ त्वा रथे हिरण्यये हरी मयूरशेप्या । शितिपृष्ठा वहतां मध्वो
अंधसो विवक्षणस्य पीतये ॥२५॥१४॥ पिबा त्व१स्य गिर्वणः
सुतस्य पूर्वपा इव । परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय
पत्यते ॥२६॥ य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।
गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥२७॥
त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक् । त्वं भा अनु चरो अध
द्विता यदिंद्र हव्यो भुवः ॥२८॥ मम त्वा सूर उदिते मम मध्यं-
दिने दिवः । मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृ-
त्सत ॥२९॥ स्तुहि स्तुहीदेते घा ते मंहिष्ठासो मघोनां । निंदि-
ताश्वः प्रपथी परमज्या मघस्य मेध्यातिथे ॥३०॥१५॥ आ
यदश्वान्वनन्वतः श्रद्धयाहं रथे रुहं । उत वामस्य वसुन-
श्चिकेतति यो अस्ति याद्वः पशुः ॥३१॥ य ऋज्रा मह्यं
मामहे सह त्वचा हिरण्यया । एष विश्वान्यभ्यस्तु सौभगा-
संगस्य स्वनद्रथः ॥३२॥ अध प्लायोगिरति दासदन्याना-
संगो अग्ने दशभिः सहस्रैः । अधोक्षणो दश मह्यं रुशंतो
नळा इव सरसो निरतिष्ठन् ॥३३॥ अन्वस्य स्थूरं ददृशे
पुरस्तादनस्थ ऊरुरवरंबमाणः । शश्वती नार्यभिचक्ष्याह सु-
भद्रमर्य भोजनं बिभर्षि ॥३४॥१६॥

॥ २ ॥ १–४० मेधातिथिः काण्वः प्रियमेधश्चांगिरसः । ४१. ४२ मेधातिथिः ॥ १–४० इंद्रः । ४१. ४२ विभिंदोर्दानस्तुतिः ॥ १–२७. २९–४२ गायत्री । २८ अनुष्टुप् ॥

॥२॥ इदं वसो सुतमंधः पिबा सुपूर्णमुदरं । अनाभयिन्ररिमा ते ॥१॥ नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः । अश्वो न निक्तो नदीषु ॥२॥ तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणंतः । इंद्र त्वास्मिन्त्सधमादे ॥३॥ इंद्र इत्सोमपा एक इंद्रः सुतपा विश्वायुः । अंतर्देवान्मर्त्यांश्च ॥४॥ न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसं । अपस्पृण्वते सुहार्दं ॥५॥१७॥ गोभिर्यदीमन्ये अस्मन्मृगं न व्रा मृगयंते । अभित्सरंति धेनुभिः ॥६॥ त्रय इंद्रस्य सोमाः सुतासः संतु देवस्य । स्वे क्षये सुतपाव्नः ॥७॥ त्रयः कोशासः श्चोतंति तिस्रश्चम्वः सुपूर्णाः । समाने अधि भार्मन् ॥८॥ शुचिरसि पुरुनिःष्ठाः क्षीरैर्मध्यत आशीतः । दध्ना मंदिष्ठः शूरस्य ॥९॥ इमे त इंद्र सोमास्तीव्रा अस्मे सुतासः । शुक्रा आशिरं याचंते ॥१०॥१८॥ ताँ आशिरं पुरोळाशमिंद्रेमं सोमं श्रीणीहि । रेवंतं हि त्वा शृणोमि ॥११॥ हृत्सु पीतासो युध्यंते दुर्मदासो न सुरायां । ऊधर्न नग्ना जरंते ॥१२॥ रेवाँ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य ॥१३॥ उक्थं चन शस्यमानमगोररिरा चिकेत । न गायत्रं गीयमानं ॥१४॥ मा न इंद्र पीयत्नवे मा शर्धते परा दाः । शिक्षा शचीवः शचीभिः ॥१५॥१९॥ वयमु त्वा तदिदर्था इंद्र त्वायंतः सखायः । कण्वा उक्थेभिर्जरंते ॥१६॥ न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ । तवेदु स्तोमं चिकेत ॥१७॥ इच्छंति देवाः सुन्वंतं न स्वप्नाय स्पृहयंति । यंति प्रमादमतंद्राः ॥१८॥ ओ षु प्र याहि वाजेभिर्मा हृणीथा अभ्यस्मान् । महाँ इव युवजानिः ॥१९॥ मो ष्वद्य दुर्हणावान्त्सायं करदारे अस्मत् । अ-

श्रीर इव जामाता ॥ २० ॥ २० ॥ विद्मा ह्यस्य वीरस्य भूरिदा-
वरीं सुमतिं। त्रिषु जातस्य मनांसि ॥ २१ ॥ आ तू षिंच कण्वमंतं
न घा विद्म शवसानात्। यशस्तरं शतमूतेः ॥ २२ ॥ ज्येष्ठेन सोत-
रिंद्राय सोमं वीराय शक्राय। भरा पिबन्नर्याय ॥ २३ ॥ यो वेदिष्ठो
अव्यथिष्वश्वावंतं जरितृभ्यः। वाजं स्तोतृभ्यो गोमंतं ॥ २४ ॥
पन्यंपन्यमित्सोतार आ धावत मद्याय। सोमं वीराय शूराय
॥ २५ ॥ २१ ॥ पाता वृत्रहा सुतमा घा गमन्नारे अस्मत्। नि
यमते शतमूतिः ॥ २६ ॥ एह हरी ब्रह्मयुजा शग्मा वक्षतः
सखायं। गीर्भिः श्रुतं गिर्वणसं ॥ २७ ॥ स्वादवः सोमा आ
याहि श्रीताः सोमा आ याहि। शिप्रिन्नृषीवः शचीवो नाय-
मच्छा सधमादं ॥ २८ ॥ स्तुतश्च यास्त्वा वर्धंति महे राधसे
नृम्णाय। इंद्र कारिणं वृधंतः ॥ २९ ॥ गिरश्च यास्ते गिर्वाह उक्था
च तुभ्यं तानि। सत्रा दधिरे शवांसि ॥ ३० ॥ २२ ॥ एवेदेष तुवि-
कूर्मिर्वाजाँ एको वज्रहस्तः। सनादमृक्तो दयते ॥ ३१ ॥ हंता वृत्रं
दक्षिणेनेंद्रः पुरू पुरुहूतः। महान्महीभिः शचीभिः ॥ ३२ ॥ य-
स्मिन्विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च। अनु घेन्मंदी
मघोनः ॥ ३३ ॥ एष एतानि चकारेंद्रो विश्वा योऽति शृण्वे।
वाजदावा मघोनां ॥ ३४ ॥ प्रभर्ता रथं गव्यंतमपाकाच्चिद्यम-
वति। इनो वसु स हि वोळ्हा ॥ ३५ ॥ २३ ॥ सनिता विप्रो
अर्वद्भिर्हंता वृत्रं नृभिः शूरः। सत्योऽविता विधंतं ॥ ३६ ॥
यजध्वैनं प्रियमेधा इंद्रं सत्राचा मनसा। यो भूत्सोमैः
सत्यमद्वा ॥ ३७ ॥ गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानं।
कण्वासो गात वाजिनं ॥ ३८ ॥ य ऋते चिद्गास्पदेभ्यो दात्सखा
नृभ्यः शचीवान्। ये अस्मिन्काममश्रियन् ॥ ३९ ॥ इत्था

धीवंतमद्रिवः काण्वं मेध्यातिथिं। मेषो भूतो३भि यन्नयः ॥४०॥
शिक्षा विभिंदो अस्मै चत्वार्ययुता ददत्। अष्टा परः सहस्रा
॥४१॥ उत सु त्ये पयोवृधा माकी रणस्य नप्त्या। जनित्वनाय
मामहे ॥४२॥२४॥

॥ ३ ॥ १–२४ मेध्यातिथिः काण्वः ॥ १–२० इंद्रः । २१–२४ पाकस्थाम्नः कौरयाणस्य दानस्तुतिः ॥ १–२० प्रागाथं । २१ अनुष्टुप् । २२. २३ गायत्री । २४ बृहती ॥

॥३॥ पिबा सुतस्य रसिनो मत्स्वा न इंद्र गोमतः। आपिनो
बोधि सधमाद्यो वृधे३स्माँ अवंतु ते धियः ॥१॥ भूयाम ते सुमतौ
वाजिनो वयं मा नः स्तरभिमातये। अस्माञ्चित्राभिरवताद्-
भिष्टिभिरा नः सुम्नेषु यामय ॥२॥ इमा उ त्वा पुरूवसो गिरो
वर्धंतु या मम। पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैर-
नूषत ॥३॥ अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥४॥ इंद्र-
मिद्देवतातय इंद्रं प्रयत्यध्वरे। इंद्रं समीके वनिनो हवामह इंद्रं
धनस्य सातये ॥५॥२५॥ इंद्रो मह्ना रोदसी पप्रथच्छव इंद्रः सूर्य-
मरोचयत्। इंद्रे ह विश्वा भुवनानि येमिर इंद्रे सुवानास इंदवः
॥६॥ अभि त्वा पूर्वपीतय इंद्र स्तोमेभिरायवः। समीचीनास ऋ-
भवः समस्वरन्रुद्रा गृणंत पूर्व्यं ॥७॥ अस्येदिंद्रो वावृधे वृष्ण्यं शवो
मदे सुतस्य विष्णवि। अद्या तमस्य महिमानमायवोऽनु ष्टुवंति
पूर्वथा ॥८॥ तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये। येना यति-
भ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥९॥ येना समुद्रमसृजो
महीरपस्तदिंद्र वृष्णि ते शवः। सद्यः सो अस्य महिमा न संनशे यं
क्षोणीरनुचक्रदे ॥१०॥२६॥ शग्धी न इंद्र यत्त्वा रयिं यामि सुवीर्यं।
शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य ॥११॥ शग्धी

नो अस्य यद्ध पौरमाविथ धिय इंद्र सिषासतः। शग्धि यथा रु-
शमं श्यावकं कृपमिंद्र प्रावः स्वर्णरं ॥१२॥ कन्नव्यो अतसीनां
तुरो गृणीत मर्त्यः। नही न्वस्य महिमानमिंद्रियं स्वर्गृणंत आ-
नशुः ॥१३॥ कदु स्तुवंत ऋतयंत देवत ऋषिः को विप्र ओहते।
कदा हवं मघवन्निंद्र सुन्वतः कदु स्तुवत आ गमः ॥१४॥ उदु त्ये
मधुमत्तमा गिरः स्तोमास ईरते। सत्राजितो धनसा अक्षितो-
तयो वाजयंतो रथा इव ॥१५॥२७॥ कण्वा इव भृगवः सूर्या इव
विश्वमिद्धीतमानशुः। इंद्रं स्तोमेभिर्महयंत आयवः प्रियमेधा-
सो अस्वरन् ॥१६॥ युक्ष्वा हि वृत्रहंतम हरी इंद्र परावतः।
अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥१७॥ इमे
हि ते कारवो वावशुर्धिया विप्रासो मेधसातये। स त्वं नो मघ-
वन्निंद्र गिर्वणो वेनो न शृणुधी हवं ॥१८॥ निरिंद्र बृहतीभ्यो
वृत्रं धनुभ्यो अस्फुरः। निरर्बुदस्य मृगयस्य मायिनो निः पर्व-
तस्य गा आजः ॥१९॥ निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इं-
द्रियो रसः। निरंतरिक्षादधमो महामहिं कृषे तदिंद्र पौंस्यं
॥२०॥२८॥ यं मे दुरिंद्रो मरुतः पाकस्थामा कौरयाणः। विश्वे-
षां त्मना शोभिष्ठमुपेव दिवि धावमानं ॥२१॥ रोहितं मे पाक-
स्थामा सुधुरं कक्ष्यप्रां। अदाद्रायो विबोधनं ॥२२॥ यस्मा अन्ये
दश प्रति धुरं वहंति वह्नयः। अस्तं वयो न तुग्र्यं ॥२३॥ आत्मा
पितुस्तनूर्वास ओजोदा अभ्यंजनं। तुरीयमिद्रोहितस्य पाक-
स्थामानं भोजं दातारमब्रवं ॥२४॥२९॥

॥४॥ १–२१ देवातिथिः काण्वः ॥ १–१४ इंद्रः। १५–१८ इंद्रः पूषा वा। १९–२१ कुरुंगस्य दानस्तुतिः ॥ १–२० प्रागाथं। २१ पुरउष्णिक् ॥

॥४॥ यदिंद्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः। सिमा

पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥१॥ यद्वा रुमे
रुशमे श्यावके कृप इंद्र मादयसे सचा। कण्वासस्त्वा ब्रह्मभिः
स्तोमवाहस इंद्रा यच्छंत्या गहि ॥२॥ यथा गौरो अपा
कृतं तृष्यन्नेत्यवेरिणं। आपित्वे नः प्रपित्वे तूयमा गहि
कण्वेषु सु सचा पिब ॥३॥ मंदंतु त्वा मघवन्निंद्रेंदवो राधो-
देयाय सुन्वते। आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे
सहः ॥४॥ प्र चक्रे सहसा सहो बभंज मन्युमोजसा। विश्वे त
इंद्र पृतनायवो यहो नि वृक्षा इव येमिरे ॥५॥३०॥ सहस्रेणेव
सचते यवीयुधा यस्त आनळुपस्तुतिं। पुत्रं प्रावर्गं कृणुते सु-
वीर्ये दाश्नोति नमउक्तिभिः ॥६॥ मा भेम मा श्रमिष्मोग्रस्य
सख्ये तव। महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुं ॥७॥
सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति। मध्वा
संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥८॥ अश्वी रथी
सुरूप इद्गोमाँ इदिंद्र ते सखा। श्वात्रभाजा वयसा सचते
सदा चंद्रो याति सभामुप ॥९॥ ऋश्यो न तृष्यन्नवपानमा
गहि पिबा सोमं वशाँ अनु। निमेघमानो मघवन्दिवेदिव
ओजिष्ठं दधिषे सहः ॥१०॥३१॥ अध्वर्यो द्रावया त्वं सोममिंद्रः
पिपासति। उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा
॥११॥ स्वयं चित्स मन्यते दाशुरिर्जनो यत्रा सोमस्य तृंपसि। इदं
ते अन्नं युज्यं समुक्षितं तस्येहि प्र द्रवा पिब ॥१२॥ रथेष्ठाया-
ध्वर्यवः सोममिंद्राय सोतन। अधि ब्रध्नस्याद्रयो वि चक्षते
सुन्वंतो दाश्वध्वरं ॥१३॥ उप ब्रध्नं वावाता वृषणा हरी इंद्रम-
पसु वक्षतः। अर्वांचं त्वा सप्तयोऽध्वरश्रियो वहंतु सवने-
दुप ॥१४॥ प्र पूषणं वृणीमहे युज्याय पुरूवसुं। स शक्र शिक्ष

पुरुहूत नो धिया तुजे राये विमोचन ॥१५॥३२॥ सं नः शिशीहि
भुरिजोरिव क्षुरं रास्व रायो विमोचन । त्वे तन्नः सुवेदमुस्रियं
वसु यं त्वं हिनोषि मर्त्यं ॥१६॥ वेमि त्वा पूषन्नृंजसे वेमि स्तोतव
आघृणे । न तस्य वेम्यरणं हि तद्वसो स्तुषे पज्राय साम्ने ॥१७॥
परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य । अस्माकं
पूषन्नविता शिवो भव मंहिष्ठो वाजसातये ॥१८॥ स्थूरं राधः
शताश्वं कुरुंगस्य दिविष्टिषु । राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्व-
शेष्वमन्महि ॥१९॥ धीभिः सातानि काण्वस्य वाजिनः प्रिय-
मेधैरभिद्युभिः । षष्टिं सहस्रानु निर्मजामजे निर्यूथानि गवामृ-
षिः ॥२०॥ वृक्षाश्चिन्मे अभिपित्वे अरारणुः । गां भजंत मेहनाश्वं
भजंत मेहना ॥२१॥३३॥७॥

॥ ५ ॥ १–३९ ब्रह्मातिथिः काण्वः ॥ १–३७[1] अश्विनौ । ३७[2]–३९ चैद्यस्य कशोर्दानस्तुतिः ॥
१–३६ गायत्री । ३७. ३८ बृहती । ३९ अनुष्टुप् ॥

॥५॥ दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत् । वि भानुं विश्व-
धातनत् ॥१॥ नृवद्दस्रा मनोयुजा रथेन पृथुपाजसा । सचेथे
अश्विनोषसं ॥२॥ युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत ।
वाचं दूतो यथोहिषे ॥३॥ पुरुप्रिया ण ऊतये पुरुमंद्रा पुरूवसू ।
स्तुषे कण्वासो अश्विना ॥४॥ मंहिष्ठा वाजसातमेषयंता शुभ-
स्पती । गंतारा दाशुषो गृहं ॥५॥१॥ ता सुदेवाय दाशुषे सुमेधा-
मवितारिणीं । घृतैर्गव्यूतिमुक्षतं ॥६॥ आ नः स्तोममुप द्रवत्तूयं
श्येनेभिराशुभिः । यातमश्वेभिरश्विना ॥७॥ येभिस्तिस्रः परा-
वतो दिवो विश्वानि रोचना । त्रीँरक्तून्परिदीयथः ॥८॥ उत नो
गोमतीरिष उत सातीरहर्विदा । वि पथः सातये सितं ॥९॥

आ नो गोमंतमश्विना सुवीरं सुरथं रयिं। वोळ्हमश्वावती-
रिषः ॥१०॥२॥ वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी।
पिबतं सोम्यं मधु ॥११॥ अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च
सप्रथः। छर्दिर्यंतमदाभ्यं ॥१२॥ नि षु ब्रह्म जनानां याविष्टं
तूयमा गतं। मो ष्व१न्याँ उपारतं ॥१३॥ अस्य पिबतम-
श्विना युवं मदस्य चारुणः। मध्वो रातस्य धिष्ण्या ॥१४॥
अस्मे आ वहतं रयिं शतवंतं सहस्रिणं। पुरुक्षुं विश्वधायसं
॥१५॥३॥ पुरुत्रा चिद्धि वां नरा विह्वयंते मनीषिणः। वाघ-
द्भिरश्विना गतं ॥१६॥ जनासो वृक्तबर्हिषो हविष्मंतो अरं-
कृतः। युवां हवंते अश्विना ॥१७॥ अस्माकमद्य वामयं स्तोमो
वाहिष्ठो अंतमः। युवाभ्यां भूत्वश्विना ॥१८॥ यो ह वां मधुनो
दृतिराहितो रथचर्षणे। ततः पिबतमश्विना ॥१९॥ तेन नो
वाजिनीवसू पश्वे तोकाय शं गवे। वहतं पीवरीरिषः ॥२०॥४॥
उत नो दिव्या इष उत सिंधूँरहर्विदा। अप द्वारेव वर्षथः
॥२१॥ कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा। यद्वां
रथो विभिष्पतात् ॥२२॥ युवं कण्वाय नासत्यापिरिप्ताय
हर्म्ये। शश्वदूतीर्दशस्यथः ॥२३॥ ताभिरा यातमूतिभिर्न-
व्यसीभिः सुशस्तिभिः। यद्वां वृषण्वसू हुवे ॥२४॥ यथा
चित्कण्वमावतं प्रियमेधमुपस्तुतं। अत्रिं शिंजारमश्विना
॥२५॥५॥ यथोत कृत्व्ये धनेऽंशुं गोष्वगस्त्यं। यथा वाजेषु
सोभरिं ॥२६॥ एतावद्वां वृषण्वसू अतो वा भूयो अश्विना।
गृणंतः सुम्नमीमहे ॥२७॥ रथं हिरण्यवंधुरं हिरण्याभीशुम-
श्विना। आ हि स्थाथो दिविस्पृशं ॥२८॥ हिरण्ययी वां रभिरीषा
अक्षो हिरण्ययः। उभा चक्रा हिरण्यया ॥२९॥ तेन नो वाजिनी-

वसू परावतंश्विदा गतं। उपेमां सुष्टुतिं मम ॥३०॥६॥ आ वहेथे
पराकात्पूर्वीरश्नंतावश्विना। इषो दासीरमर्त्या ॥३१॥ आ नो
द्युम्नैरा श्रवोभिरा राया यातमश्विना। पुरुश्चंद्रा नासत्या ॥३२॥
एह वां प्रुषितप्सवो वयो वहंतु पर्णिनः। अच्छा स्वध्वरं जनं
॥३३॥ रथं वामनुगायसं य इषा वर्तते सह। न चक्रमभि बा-
धते ॥३४॥ हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः। धीजवना ना-
सत्या ॥३५॥७॥ युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू। ता नः
पृंक्तमिषा रयिं ॥३६॥ ता मे अश्विना सनीनां विद्यातं नवानां।
यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनां ॥३७॥
यो मे हिरण्यसंदृशो दश राज्ञो अमंहत। अधस्पदा इच्चैद्यस्य कृ-
ष्टयश्चर्मम्ना अभितो जनाः ॥३८॥ माकिरेना पथा गाद्येनेमे यंति
चेदयः। अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः ॥३९॥८॥१॥

॥ ६ ॥ १–४८ वत्सः काण्वः ॥ १–४५ इंद्रः । ४६–४८ तिरिंदिरस्य पारशव्यस्य
दानस्तुतिः ॥ गायत्री ॥

॥६॥ महाँ इंद्रो य ओजसा पर्जन्यो वृष्टिमाँ इव। स्तोमैर्व-
त्सस्य वावृधे ॥१॥ प्रजामृतस्य पिप्रतः प्र यद्भरंत वह्नयः।
विप्रा ऋतस्य वाहसा ॥२॥ कण्वा इंद्रं यदक्रत स्तोमैर्यज्ञस्य सा-
धनं। जामि ब्रुवत आयुधं ॥३॥ समस्य मन्यवे विशो विश्वा न-
मंत कृष्टयः। समुद्रायेव सिंधवः ॥४॥ ओजस्तदस्य तित्विष उभे
यत्समवर्तयत्। इंद्रश्चर्मेव रोदसी ॥५॥९॥ वि चिद्वृत्रस्य
दोधतो वज्रेण शतपर्वणा। शिरो बिभेद वृष्णिना ॥६॥ इमा
अभि प्र णोनुमो विपामग्रेषु धीतयः। अग्नेः शोचिर्न दिद्युतः
॥७॥ गुहा सतीरुप त्मना प्र यच्छोचंत धीतयः। कण्वा ऋतस्य
धारया ॥८॥ प्र तमिंद्र नशीमहि रयिं गोमंतमश्विनं। प्र ब्रह्म पूर्व-

चिंतये ॥ ९ ॥ अहमिद्धि पितुष्परि मेधामृतस्य जग्रभं । अहं सूर्यं इवाजनि ॥ १० ॥ १० ॥ अहं प्रत्नेन मन्मना गिरः शुंभामि कण्ववत् । येनेंद्रः शुष्ममिद्दधे ॥ ११ ॥ ये त्वामिंद्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः । ममेद्वर्धस्व सुष्टुतः ॥ १२ ॥ यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन् । अपः समुद्रमैरयत् ॥ १३ ॥ नि शुष्ण इंद्र धर्णसिं वज्रं जघंथ दस्यवि । वृषा ह्युग्र शृण्विषे ॥ १४ ॥ न द्याव इंद्रमोजसा नांतरिक्षाणि वज्रिणं । न विव्यचंत भूमयः ॥ १५ ॥ ११ ॥ यस्त इंद्र महीरपः स्तभूयमान आशयत् । नि तं पद्यासु शिश्नथः ॥ १६ ॥ य इमे रोदसी मही समीची समजग्रभीत् । तमोभिरिंद्र तं गुहः ॥ १७ ॥ य इंद्र यतयस्त्वा भृगवो ये च तुष्टुवुः । ममेदुग्र श्रुधी हवं ॥ १८ ॥ इमास्त इंद्र पृश्नयो घृतं दुहत आशिरं । एनामृतस्य पिप्युषीः ॥ १९ ॥ या इंद्र प्रस्वस्त्वासा गर्भमचक्रिरन् । परि धर्मेव सूर्यं ॥ २० ॥ १२ ॥ त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः । त्वां सुतास इंदवः ॥ २१ ॥ तवेदिंद्र प्रणीतिषूत प्रशस्तिरद्रिवः । यज्ञो वितंतसाय्यः ॥ २२ ॥ आ न इंद्र महीमिषं पुरं न दर्षि गोमतीं । उत प्रजां सुवीर्यं ॥ २३ ॥ उत त्यदाश्वश्व्यं यदिंद्र नाहुषीष्वा । अग्रे विक्षु प्रदीदयत् ॥ २४ ॥ अभि व्रजं न तत्निषे सूर उपाकचक्षसं । यदिंद्र मृळयासि नः ॥ २५ ॥ १३ ॥ यदंग तविषीयस इंद्र प्रराजसि क्षितीः । महाँ अपार ओजसा ॥ २६ ॥ तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये । उरुज्रयसमिंदुभिः ॥ २७ ॥ उपह्वरे गिरीणां संगथे च नदीनां । धिया विप्रो अजायत ॥ २८ ॥ अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति । यतो विपान एजति ॥ २९ ॥ आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यंति वासरं । परो

यद्विध्यते दिवा॥३०॥१४॥ कण्वास इंद्र ते मतिं विश्वे वर्धंति पौंस्यं।
उतो शविष्ठ वृष्ण्यं॥३१॥ इमां म इंद्र सुष्टुतिं जुषस्व प्र सु मामव।
उत प्र वर्धया मतिं॥३२॥ उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः।
विप्रा अतक्ष्म जीवसे॥३३॥ अभि कण्वा अनूषतापो न प्रवता
यतीः। इंद्रं वनन्वती मतिः॥३४॥ इंद्रमुक्थानि वावृधुः समुद्र-
मिव सिंधवः। अनुत्तमन्युमजरं॥३५॥१५॥ आ नो याहि परा-
वतो हरिभ्यां हर्यताभ्यां। इममिंद्र सुतं पिब॥३६॥ त्वामिद्वृत्र-
हंतम जनासो वृक्तबर्हिषः। हवंते वाजसातये॥३७॥ अनु त्वा
रोदसी उभे चक्रं न वर्त्येतशं। अनु सुवानास इंदवः॥३८॥ मंद-
स्वा सु स्वर्णर उतेंद्र शर्यणावति। मत्स्वा विवस्वतो मती॥३९॥
वावृधान उप द्यवि वृषा वज्र्यरोरवीत्। वृत्रहा सोमपातमः
॥४०॥१६॥ ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा। इंद्र चो-
ष्कूयसे वसु॥४१॥ अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः।
शतं वहंतु हरयः॥४२॥ इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीं।
कण्वा उक्थेन वावृधुः॥४३॥ इंद्रमिद्विमहीनां मेधे वृणीत मर्त्यः।
इंद्रं सनिष्युरूतये॥४४॥ अर्वांचं त्वा पुरुष्टुत प्रियमेधस्तुता हरी।
सोमपेयाय वक्षतः॥४५॥ शतमहं तिरिंदिरे सहस्रं पर्शावा ददे।
राधांसि याद्वानां॥४६॥ त्रीणि शतान्यर्वतां सहस्रा दश गोनां।
ददुष्पज्राय साम्ने॥४७॥ उदानट् ककुहो दिवमुष्ट्रांश्चतुर्युजो ददत्।
श्रवसा याद्वं जनं॥४८॥१७॥

॥ ७ ॥ १–३६ पुनर्वत्सः काण्वः ॥ मरुतः ॥ गायत्री ॥

॥७॥ प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत्। वि पर्वतेषु
राजथ॥१॥ यदंग तविषीयवो यामं शुभ्रा अचिध्वं। नि पर्व-

ता अहासत ॥ २ ॥ उदीरयंत वायुभिर्वाश्रासः पृश्निमातरः ।
धुक्षंत पिप्युषीमिषं ॥ ३ ॥ वपंति मरुतो मिहं प्र वेपयंति पर्व-
तान् । यद्यामं यांति वायुभिः ॥ ४ ॥ नि यद्यामाय वो गिरिर्नि
सिंधवो विधर्मणे । महे शुष्माय येमिरे ॥ ५ ॥ १८ ॥ युष्माँ उ
नक्तमूतये युष्मान्दिवा हवामहे । युष्मान्प्रयत्यध्वरे ॥ ६ ॥
उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते । वाश्रा अधि ष्णुना
दिवः ॥ ७ ॥ सृजंति रश्मिमोजसा पंथां सूर्याय यातवे । ते
भानुभिर्वि तस्थिरे ॥ ८ ॥ इमां मे मरुतो गिरमिमं स्तोममृभु-
क्षणः । इमं मे वनता हवं ॥ ९ ॥ त्रीणि सरांसि पृश्नयो दुदुह्रे व-
ज्रिणे मधु । उत्सं कवंधमुद्रिणं ॥ १० ॥ १९ ॥ मरुतो यद्ध वो दिवः
सुम्नायंतो हवामहे । आ तू न उप गंतन ॥ ११ ॥ यूयं हि ष्ठा सुदा-
नवो रुद्रा ऋभुक्षणो दमे । उत प्रचेतसो मदे ॥ १२ ॥ आ नो रयिं
मदच्युतं पुरुक्षुं विश्वधायसं । इयर्ता मरुतो दिवः ॥ १३ ॥ अधीव
यद्गिरीणां यामं शुभ्रा अचिध्वं । सुवानैर्मंदध्व इंदुभिः ॥ १४ ॥
एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः । अदाभ्यस्य मन्मभिः
॥ १५ ॥ २० ॥ ये द्रप्सा इव रोदसी धमंत्यनु वृष्टिभिः । उत्सं
दुहंतो अक्षितं ॥ १६ ॥ उदु स्वानेभिरीरत उद्रथैरुदु वा-
युभिः । उत्स्तोमैः पृश्निमातरः ॥ १७ ॥ येनाव तुर्वशं यदुं
येन कण्वं धनस्पृतं । राये सु तस्य धीमहि ॥ १८ ॥ इमा उ वः
सुदानवो घृतं न पिप्युषीरिषः । वर्धान्काण्वस्य मन्मभिः ॥ १९ ॥
क्व नूनं सुदानवो मदथा वृक्तबर्हिषः । ब्रह्मा को वः सपर्यति
॥ २० ॥ २१ ॥ नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः । शर्धाँ
ऋतस्य जिन्वथ ॥ २१ ॥ समु त्ये महतीरपः सं क्षोणी समु
सूर्यं । सं वज्रं पर्वशो दधुः ॥ २२ ॥ वि वृत्रं पर्वशो ययुर्वि पर्व-

ताँ अराजिनः। चक्राणा वृष्णि पौंस्यँ ॥२३॥ अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुं। अन्विंद्रं वृत्रतूर्ये ॥२४॥ विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः। शुभ्रा व्यंजत श्रिये॥२५॥२२॥ उशना यत्परावत उक्ष्णो रंध्रमयातन। द्यौर्न चक्रदद्भिया॥२६॥ आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः। देवास उप गंतन ॥२७॥ यदेषां पृषती रथे प्रष्टिर्वहति रोहितः। यांति शुभ्रा रिणन्नपः ॥२८॥ सुषोमे शर्यणावत्यार्जीके पस्त्यावति। ययुर्निचक्रया नरः ॥२९॥ कदा गच्छाथ मरुत इत्था विप्रं हवमानं। मार्डीकेभिर्नाधमानं ॥३०॥२३॥ कद्ध नूनं कधप्रियो यदिंद्रमजहातन। को वः सखित्व ओहते ॥३१॥ सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः। स्तुषे हिरण्यवाशीभिः ॥३२॥ ओ षु वृष्णः प्रयज्यूना नव्यसे सुविताय। ववृत्यां चित्रवाजान् ॥३३॥ गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः। पर्वताश्चिन्नि येमिरे ॥३४॥ आक्ष्णयावानो वहंत्यंतरिक्षेण पततः। धातारः स्तुवते वयः ॥३५॥ अग्निर्हि जानि पूर्व्यश्छंदो न सूरो अर्चिषा। ते भानुभिर्वि तस्थिरे ॥३६॥२४॥

॥ ८ ॥ १–२३ सध्वंसः काण्वः ॥ अश्विनौ ॥ अनुष्टुप् ॥

॥ ८ ॥ आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवं। दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु ॥१॥ आ नूनं यातमश्विना रथेन सूर्यत्वचा। भुजी हिरण्यपेशसा कवी गंभीरचेतसा ॥२॥ आ यातं नहुषस्पर्यांतरिक्षात्सुवृक्तिभिः। पिबाथो अश्विना मधु कण्वानां सवने सुतं ॥३॥ आ नो यातं दिवस्पर्यांतरिक्षादधप्रिया। पुत्रः कण्वस्य वामिह सुषाव सोम्यं

मधु ॥४॥ आ नो यातमुपश्रुत्यश्विना सोमपीतये । स्वाहा
स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा ॥५॥२५॥ यच्चिद्धि
वां पुर ऋषयो जुहूरेऽवसे नरा । आ यातमश्विना गत-
मुपेमां सुष्टुतिं मम ॥६॥ दिवश्चिद्रोचनादध्या नो गंतं
स्वर्विदा । धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥७॥
किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना । पुत्रः कण्वस्य वा-
मृषिर्गीर्भिर्वत्सो अवीवृधत् ॥८॥ आ वां विप्र इहावसे-
ऽह्वत्स्तोमेभिरश्विना । अरिप्रा वृत्रहंतमा ता नो भूतं म-
योभुवा ॥९॥ आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू ।
विश्वान्यश्विना युवं प्र धीतान्यगच्छतं ॥१०॥२६॥ अतः
सहस्रनिर्णिजा रथेना यातमश्विना । वत्सो वां मधुमद्व-
चोऽशंसीत्काव्यः कविः ॥११॥ पुरुमंद्रा पुरूवसू मनोतरा
रयीणां । स्तोमं मे अश्विनाविममभि वह्नी अनूषातां ॥१२॥
आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया । कृतं न ऋत्विया-
वतो मा नो रीरधतं निदे ॥१३॥ यन्नासत्या परावति यद्वा
स्थो अध्यंबरे । अतः सहस्रनिर्णिजा रथेना यातमश्विना
॥१४॥ यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् । तस्मै
सहस्रनिर्णिजमिषं धत्तं घृतश्चुतं ॥१५॥२७॥ प्रास्मा ऊर्जं
घृतश्चुतमश्विना यच्छतं युवं । यो वां सुम्नाय तुष्टवद्वसूयाद्दा-
नुनस्पती ॥१६॥ आ नो गंतं रिशादसेमं स्तोमं पुरुभुजा ।
कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥१७॥ आ वां विश्वा-
भिरूतिभिः प्रियमेधा अहूषत । राजंतावध्वराणामश्विना
यामहूतिषु ॥१८॥ आ नो गंतं मयोभुवाश्विना शंभुवा युवं ।
यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥१९॥ याभिः

कण्वं मेधातिथिं याभिर्वशं दशव्रजं। याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥२०॥२८॥ याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने। ताभिः ष्व१स्माँ अश्विना प्रावतं वाजसातये ॥२१॥ प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना। पुरुत्रा वृत्रहंतमा ता नो भूतं पुरुस्पृहा ॥२२॥ त्रीणि पदान्यश्विनोराविः सांति गुहा परः। कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि ॥२३॥२९॥

॥९॥ १–२१ शशकर्णः काण्वः ॥ अश्विनौ ॥ १. ४. ६. १४. १५ बृहती। २. ३. २०. २१ गायत्री। ५ ककुप्। ७–९. १३. १६–१९ अनुष्टुप्। १० त्रिष्टुप्। ११ विराट्। १२ जगती ॥

॥९॥ आ नूनमश्विना युवं वत्सस्य गंतमवसे। प्रास्मै यच्छतमवृकं पृथु छर्दिर्युयुतं या अरातयः ॥१॥ यदंतरिक्षे यद्दिवि यत्पंच मानुषाँ अनु। नृम्णं तद्धत्तमश्विना ॥२॥ ये वां दंसांस्यश्विना विप्रासः परिमामृशुः। एवेत्काण्वस्य बोधतं ॥३॥ अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते। अयं सोमो मधुमान्वाजिनीवसू येन वृत्रं चिकेतथः ॥४॥ यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतं। तेन माविष्टमश्विना ॥५॥३०॥ यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः। अयं वां वत्सो मतिभिर्न विंधते हविष्मंतं हि गच्छथः ॥६॥ आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया। आ सोमं मधुमत्तमं घर्मं सिंचादथर्वणि ॥७॥ आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना। आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥८॥ यदद्य वां नासत्योक्थैराचुच्युवीमहि। यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतं ॥९॥ यद्वां कक्षीवाँ उत यद्व्यश्व ऋषिर्यद्वां दीर्घतमा जुहाव। पृथी यद्वां वैन्यः सादनेष्वेवेदतो अश्विना चेत-

येथां ॥१०॥३१॥ यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस्तनूपा। वर्तिस्तोकाय तनयाय यातं ॥११॥ यदिंद्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा। यदादित्येभिर्ऋभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥१२॥ यदद्याश्विनावहं हुवेय वाजसातये। यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥१३॥ आ नूनं यातमश्विनेमा हव्यानि वां हिता। इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥१४॥ यन्नासत्या पराके अर्वाके अस्ति भेषजं। तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतं ॥१५॥३२॥ अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः। व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥१६॥ प्र बोधयोषो अश्विना प्र देवि सूनृते महि। प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत् ॥१७॥ यदुषो यासि भानुना सं सूर्येण रोचसे। आ हायमश्विनो रथो वर्तिर्याति नृपाय्यं ॥१८॥ यदापीतासो अंशवो गावो न दुह्र ऊधभिः। यद्वा वाणीरनूषत प्र देवयंतो अश्विना ॥१९॥ प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे। प्र दक्षाय प्रचेतसा ॥२०॥ यन्नूनं धीभिरश्विना पितुर्योना निषीदथः। यद्वा सुम्नेभिरुक्थ्या ॥२१॥३३॥

॥ १० ॥ १–६ प्रगाथः काण्वः ॥ अश्विनौ ॥ १. ५ बृहती । २ मध्येज्योतिः । ३ अनुष्टुप् । ४ आस्तारपंक्तिः । ६ सतोबृहती ॥

॥१०॥ यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः। यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥१॥ यद्वा यज्ञं मनवे संमिमिक्षथुरेवेत्काण्वस्य बोधतं। बृहस्पतिं विश्वान्देवाँ अहं हुव इंद्राविष्णू अश्विनावाशुहेषसा ॥२॥ त्या न्व१श्विना हुवे सुदंससा गृभे कृता। ययोरस्ति प्र णः सख्यं

देवेष्वध्याप्यं ॥३॥ ययोरधि प्र यज्ञा असूरे संति सूरयः । ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥४॥ यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू । यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतं ॥५॥ यदंतरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु । यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥ ६ ॥ ३४ ॥

॥ ११ ॥ १–१० वत्सः काण्वः ॥ अग्निः ॥ १ प्रतिष्ठा । २ वर्धमाना । ३–९ गायत्री । १० त्रिष्टुप् ॥

॥११॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ॥१॥ त्वमसि प्रशस्यो विदथेषु सहंत्य । अग्ने रथीरध्वराणां ॥२॥ स त्वमस्मदप द्विषो युयोधि जातवेदः । अदेवीरग्ने अरातीः ॥३॥ अंति चित्संतमह यज्ञं मर्तस्य रिपोः । नोप वेषि जातवेदः ॥४॥ मर्ता अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः ॥५॥३५॥ विप्रं विप्रासोऽवसे देवं मर्तास ऊतये । अग्निं गीर्भिर्हवामहे ॥६॥ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् । अग्ने त्वांकामया गिरा ॥७॥ पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः । समत्सु त्वा हवामहे ॥८॥ समत्स्वग्निमवसे वाजयंतो हवामहे । वाजेषु चित्रराधसं ॥९॥ प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व ॥१०॥३६॥८॥५॥

॥ १२ ॥ १–३३ पर्वतः काण्वः ॥ इंद्रः ॥ उष्णिक् ॥

॥ १२ ॥ य इंद्र सोमपातमो मदः शविष्ठ चेतति । येना हंसि न्य१त्रिणं तमीमहे ॥१॥ येना दशग्वमध्रिगुं वेपयंतं स्वर्णरं । येना समुद्रमाविथा तमीमहे ॥२॥ येन सिंधुं महीरपो रथाँ इव

प्रचोदयः। पंथामृतस्य यातवे तमीमहे ॥३॥ इमं स्तोममभिष्टये
घृतं न पूतमद्रिवः। येना नु सद्य ओजसा ववक्षिथ ॥४॥ इमं
जुषस्व गिर्वणः समुद्र इव पिन्वते। इंद्र विश्वाभिरूतिभिर्वव-
क्षिथ ॥५॥१॥ यो नो देवः परावतः सखित्वनाय मामहे। दिवो
न वृष्टिं प्रथयन्ववक्षिथ ॥६॥ ववक्षुरस्य केतवो उत वज्रो
गभस्त्योः। यत्सूर्यो न रोदसी अवर्धयत् ॥७॥ यदि प्रवृद्ध सत्पते
सहस्रं महिषाँ अघः। आदित्त इंद्रियं महि प्र वावृधे ॥८॥
इंद्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति। अग्निर्वनेव सास-
हिः प्र वावृधे ॥९॥ इयं त ऋत्वियावती धीतिरेति नवीयसी।
सपर्यंती पुरुप्रिया मिमीत इत् ॥१०॥२॥ गर्भो यज्ञस्य देवयुः
क्रतुं पुनीत आनुषक्। स्तोमैरिंद्रस्य वावृधे मिमीत इत् ॥११॥
सनिर्मित्रस्य पप्रथ इंद्रः सोमस्य पीतये। प्राची वाशीव सुन्वते
मिमीत इत् ॥१२॥ यं विप्रा उक्थवाहसोऽभिप्रमंदुरायवः।
घृतं न पिप्य आसन्यृतस्य यत् ॥१३॥ उत स्वराजे अ-
दितिः स्तोममिंद्राय जीजनत्। पुरुप्रशस्तमूतय ऋतस्य यत्
॥१४॥ अभि वह्नय ऊतयेऽनूषत प्रशस्तये। न देव विव्रता
हरी ऋतस्य यत् ॥१५॥३॥ यत्सोममिंद्र विष्णवि यद्वा घ त्रित
आप्त्ये। यद्वा मरुत्सु मंदसे समिंदुभिः ॥१६॥ यद्वा शक्र प-
रावति समुद्रे अधि मंदसे। अस्माकमित्सुते रणा समिंदुभिः
॥१७॥ यद्वासि सुन्वतो वृधो यजमानस्य सत्पते। उक्थे वा
यस्य रण्यसि समिंदुभिः ॥१८॥ देवंदेवं वोऽवस इंद्रमिंद्रं गृ-
णीषणि। अधा यज्ञाय तुर्वणे व्यानशुः ॥१९॥ यज्ञेभिर्यज्ञवा-
हसं सोमेभिः सोमपातमं। होत्राभिरिंद्रं वावृधुर्व्यानशुः
॥२०॥४॥ महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः। विश्वा

वसूनि दाशुषे व्यानशुः ॥२१॥ इंद्रं वृत्राय हंतवे देवासो दधिरे पुरः । इंद्रं वाणीरनूषता समोजसे ॥२२॥ महांतं महिना वयं स्तोमेभिर्हवनश्रुतं । अर्कैरभि प्र णोनुमः समोजसे ॥२३॥ न यं विविक्तो रोदसी नांतरिक्षाणि वज्रिणं । अमादिदस्य तित्विषे समोजसः ॥२४॥ यदिंद्र पृतनाज्ये देवास्त्वा दधिरे पुरः । आदित्ते हर्यता हरी ववक्षतुः ॥२५॥५॥ यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः । आदित्ते हर्यता हरी ववक्षतुः ॥२६॥ यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे । आदित्ते हर्यता हरी ववक्षतुः ॥२७॥ यदा ते हर्यता हरी वावृधाते दिवेदिवे । आदित्ते विश्वा भुवनानि येमिरे ॥२८॥ यदा ते मारुतीर्विशस्तुभ्यमिंद्र नियेमिरे । आदित्ते विश्वा भुवनानि येमिरे ॥२९॥ यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः । आदित्ते विश्वा भुवनानि येमिरे ॥३०॥ इमां त इंद्र सुष्टुतिं विप्र इयर्ति धीतिभिः । जामिं पदेव पिप्रतीं प्राध्वरे ॥३१॥ यदस्य धामनि प्रिये समीचीनासो अस्वरन् । नाभा यज्ञस्य दोहना प्राध्वरे ॥३२॥ सुवीर्यं स्वश्व्यं सुगव्यमिंद्र दद्धि नः । होतेव पूर्वचित्तये प्राध्वरे ॥३३॥६॥२॥

॥ १३ ॥ १–३३ नारदः काण्वः ॥ इंद्रः ॥ उष्णिक् ॥

॥१३॥ इंद्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यं । विदे वृधस्य दक्षसो महान्हि षः ॥१॥ स प्रथमे व्योमनि देवानां सदने वृधः । सुपारः सुश्रवस्तमः समप्सुजित् ॥२॥ तमह्वे वाजसातय इंद्रं भराय शुष्मिणं । भवा नः सुम्ने अंतमः सखा वृधे ॥३॥ इयं त इंद्र गिर्वणो रातिः क्षरति सुन्वतः । मंदानो अस्य बर्हिषो वि राजसि ॥४॥ नूनं तदिंद्र दद्धि नो यत्त्वा सुन्वंत ईमहे । रयिं न-

श्चित्रमा भरा स्वर्विदं ॥५॥७॥ स्तोता यत्ते विचर्षणिरति-
प्रशर्धयद्गिरः। वया इवानु रोहते जुषंत यत् ॥६॥ प्रत्नवज्ज-
नया गिरः शृणुधी जरितुर्हवं। मदेमदे ववक्षिथा सुकृत्वने
॥७॥ क्रीळंत्यस्य सूनृता आपो न प्रवता यतीः। अया धिया
य उच्यते पतिर्दिवः ॥८॥ उतो पतिर्य उच्यते कृष्टीनामेक
इद्वशी। नमोवृधैरवस्युभिः सुते रण ॥९॥ स्तुहि श्रुतं विप-
श्चितं हरी यस्य प्रसक्षिणा। गंतारा दाशुषो गृहं नमस्विनः
॥१०॥८॥ तूतुजानो महेमतेऽश्वेभिः प्रुषितप्सुभिः। आ याहि
यज्ञमाशुभिः शमिद्धि ते ॥११॥ इंद्र शविष्ठ सत्पते रयिं गृ-
णत्सु धारय। श्रवः सूरिभ्यो अमृतं वसुत्वनं ॥१२॥ हवे त्वा
सूर उदिते हवे मध्यंदिने दिवः। जुषाण इंद्र सप्तिभिर्न आ
गहि ॥१३॥ आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः। तंतुं
तनुष्व पूर्व्यं यथा विदे ॥१४॥ यच्छक्रासि परावति यदर्वावति
वृत्रहन्। यद्वा समुद्रे अंधसोऽवितेदसि ॥१५॥९॥ इंद्रं वर्धंतु
नो गिर इंद्रं सुतास इंदवः। इंद्रे हविष्मतीर्विशो अरा-
णिषुः ॥१६॥ तमिद्विप्रा अवस्यवः प्रवत्वतीभिरूतिभिः। इंद्रं
क्षोणीरवर्धयन्वया इव ॥१७॥ त्रिकद्रुकेषु चेतनं देवासो
यज्ञमत्नत। तमिद्वर्धंतु नो गिरः सदावृधं ॥१८॥ स्तोता यत्ते
अनुव्रत उक्थान्यृतुथा दधे। शुचिः पावक उच्यते सो
अद्भुतः ॥१९॥ तदिद्रुद्रस्य चेतति यह्वं प्रत्नेषु धामसु। मनो
यत्रा वि तद्दधुर्विचेतसः ॥२०॥१०॥ यदि मे सख्यमावर इमस्य
पाह्यंधसः। येन विश्वा अति द्विषो अतारिम ॥२१॥ कदा त इंद्र
गिर्वणः स्तोता भवाति शंतमः। कदा नो गव्ये अश्व्ये वसौ दधः
॥२२॥ उत ते सुष्टुता हरी वृषणा वहतो रथं। अजुर्यस्य मदिं-

तमं यमीमहे॥२३॥ तमीमहे पुरुष्टुतं यह्वं प्रत्नाभिरूतिभिः। नि
बर्हिषि प्रिये सदद्ध द्विता॥२४॥ वर्धस्वा सु पुरुष्टुत ऋषिष्टुता-
भिरूतिभिः। धुक्षस्व पिप्युषीमिषमवा च नः ॥२५॥११॥ इंद्र
त्वमवितेदसीत्था स्तुवतो अद्रिवः। ऋतादियर्मि ते धियं मनो-
युजं ॥२६॥ इह त्या सधमाद्या युजानः सोमपीतये। हरी इंद्र
प्रतद्वसू अभि स्वर॥२७॥ अभि स्वरंतु ये तव रुद्रासः सक्षत
श्रियं। उतो मरुत्वतीर्विशो अभि प्रयः॥२८॥ इमा अस्य प्रतूर्तयः
पदं जुषंत यद्दिवि। नाभा यज्ञस्य सं दधुर्यथा विदे॥२९॥ अयं
दीर्घाय चक्षसे प्राचि प्रयत्यध्वरे। मिमीते यज्ञमानुषग्विचक्ष्य
॥३०॥१२॥ वृषायमिंद्र ते रथ उतो ते वृषणा हरी। वृषा त्वं शत-
क्रतो वृषा हवः॥३१॥ वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः।
वृषा यज्ञो यमिन्वसि वृषा हवः॥३२॥ वृषा त्वा वृषणं हुवे वज्रिं-
श्चित्राभिरूतिभिः। वावंथ हि प्रतिष्टुतिं वृषा हवः॥३३॥१३॥

॥१४॥ १—१५ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ। इंद्रः॥ गायत्री॥

॥१४॥ यदिंद्राहं यथा त्वमीशीय वस्व एक इत्। स्तोता मे
गोषखा स्यात्॥१॥ शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे।
यदहं गोपतिः स्यां॥२॥ धेनुष्ट इंद्र सूनृता यजमानाय सुन्वते।
गामश्वं पिप्युषी दुहे॥३॥ न ते वर्तास्ति राधस इंद्र देवो न
मर्त्यः। यद्दित्ससि स्तुतो मघं॥४॥ यज्ञ इंद्रमवर्धयद्यद्भूमिं
व्यवर्तयत्। चक्राण ओपशं दिवि॥५॥१४॥ वावृधानस्य
ते वयं विश्वा धनानि जिग्युषः। ऊतिमिंद्रा वृणीमहे॥६॥
व्यं१तरिक्षमतिरन्मदे सोमस्य रोचना। इंद्रो यदभिनद्वलं
॥७॥ उद्गा आजदंगिरोभ्य आविष्कृण्वन्गुहा सतीः। अर्वाचं नु-

नुदे वलं॥८॥ इंद्रेण रोचना दिवो दृळ्हानि दृंहितानि च। स्थि-
राणि न पराणुदे॥९॥ अपामूर्मिर्मदन्निव स्तोम इंद्राजिरायते।
वि ते मदा अराजिषुः॥१०॥१५॥ त्वं हि स्तोमवर्धन इंद्रास्युक्थ-
वर्धनः। स्तोतृणामुत भद्रकृत्॥११॥ इंद्रमित्केशिना हरी सोमपे-
याय वक्षतः। उप यज्ञं सुराधसं॥१२॥ अपां फेनेन नमुचेः शिर
इंद्रोदवर्तयः। विश्वा यदजयः स्पृधः॥१३॥ मायाभिरुत्सिसृप्सत
इंद्र द्यामारुरुक्षतः। अव दस्यूँरधूनुथाः॥१४॥ असुन्वामिंद्र संसदं
विषूचीं व्यनाशयः। सोमपा उत्तरो भवन्॥१५॥१६॥

॥१५॥ १–१३ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ ॥ इंद्रः ॥ उष्णिक् ॥

॥१५॥ तम्वभि प्र गायत पुरुहूतं पुरुष्टुतं। इंद्रं गीर्भिस्त-
विषमा विवासत॥१॥ यस्य द्विबर्हसो बृहत्सहो दाधार
रोदसी। गिरीँरज्राँ अपः स्वर्वृषत्वना॥२॥ स राजसि पु-
रुष्टुतँ एको वृत्राणि जिघ्नसे। इंद्र जैत्रा श्रवस्या च यंतवे॥३॥
तं ते मदं गृणीमसि वृषणं पृत्सु सासहिं। उ लोककृत्नुमद्रि-
वो हरिश्रियं॥४॥ येन ज्योतींष्यायवे मनवे च विवेदिथ।
मंदानो अस्य बर्हिषो वि राजसि॥५॥१७॥ तदद्या चित्त
उक्थिनोऽनु ष्टुवंति पूर्वथा। वृषपत्नीरपो जया दिवेदिवे
॥६॥ तव त्यदिंद्रियं बृहत्तव शुष्ममुत क्रतुं। वज्रं शिशाति
धिषणा वरेण्यं॥७॥ तव द्यौरिंद्र पौंस्यं पृथिवी वर्धति श्रवः।
त्वामापः पर्वतासश्च हिन्विरे॥८॥ त्वां विष्णुर्बृहन्क्षयो मित्रो
गृणाति वरुणः। त्वां शर्धो मदत्यनु मारुतं॥९॥ त्वं वृषा जनानां
मंहिष्ठ इंद्र जज्ञिषे। सत्रा विश्वा स्वपत्यानि दधिषे॥१०॥१८॥
सत्रा त्वं पुरुष्टुतँ एको वृत्राणि तोशसे। नान्य इंद्रात्करणं

भूर्य इन्वति॥११॥ यदिंद्र मन्मशस्त्वा नाना हवंत ऊतयें। अस्मा-
केभिर्नृभिरत्रा स्वर्जय॥१२॥ अरं क्षयाय नो महे विश्वा रूपा-
ण्याविशन्। इंद्रं जैत्राय हर्षया शचीपतिं॥१३॥१९॥

॥१६॥ १–१२ इरिंबिठिः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥१६॥ प्र सम्राजं चर्षणीनामिंद्रं स्तोता नव्यं गीर्भिः। नरं
नृषाहं मंहिष्ठं॥१॥ यस्मिन्नुक्थानि रण्यंति विश्वानि च श्रव-
स्या। अपामवो न समुद्रे॥२॥ तं सुष्टुत्या विवासे ज्येष्ठराजं भरे
कृत्नुं। महो वाजिनं सनिभ्यः॥३॥ यस्यानूना गभीरा मदा
उरवस्तरुत्राः। हर्षुमंतः शूरसातौ॥४॥ तमिद्धनेषु हितेष्वधिवा-
काय हवंते। येषामिंद्रस्ते जयंति॥५॥ तमिच्च्यौत्नैरार्यंति तं कृते-
भिश्चर्षणयः। एष इंद्रो वरिवस्कृत्॥६॥२०॥ इंद्रो ब्रह्मेंद्र ऋषिरिंद्रः
पुरू पुरुहूतः। महान्महीभिः शचीभिः॥७॥ स स्तोम्यः स हव्यः
सत्यः सत्वा तुविकूर्मिः। एकश्चित्सन्नभिभूतिः॥८॥ तमर्केभिस्तं
सामभिस्तं गायत्रैश्चर्षणयः। इंद्रं वर्धंति क्षितयः॥९॥ प्रणेतारं
वस्यो अच्छा कर्तारं ज्योतिः समत्सु। सासह्वांसं युधामित्रान्
॥१०॥ स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः। इंद्रो विश्वा
अति द्विषः॥११॥ स त्वं न इंद्र वाजेभिर्दशस्या च गातुया च।
अच्छा च नः सुम्नं नेषि॥१२॥२१॥

॥१७॥ १–१५ इरिंबिठिः काण्वः ॥ इंद्रः ॥ १–१३ गायत्री । १४ बृहती । १५ सतोबृहती ॥

॥१७॥ आ याहि सुषुमा हि त इंद्र सोमं पिबा इमं। एदं बर्हिः
सदो मम॥१॥ आ त्वा ब्रह्मयुजा हरी वहतामिंद्र केशिना। उप
ब्रह्माणि नः शृणु॥२॥ ब्रह्माणस्त्वा वयं युजा सोमपामिंद्र सो-
मिनः। सुतावंतो हवामहे॥३॥ आ नो याहि सुतावतोऽस्माकं

सुष्टुतीरुप । पिबा सु शिप्रिन्नंधसः ॥ ४ ॥ आ ते सिंचामि कुक्ष्यो-
रनु गात्रा वि धावतु । गृभाय जिह्वया मधु ॥ ५ ॥ २२ ॥ स्वादुष्टे
अस्तु संसुदे मधुमान्तन्वे३ तव । सोमः शमस्तु ते हृदे ॥ ६ ॥ अयमु
त्वा विचर्षणे जनीरिवाभि संवृतः । प्र सोम इंद्र सर्पतु ॥ ७ ॥ तु-
विग्रीवो वपोदरः सुबाहुरंधसो मदे । इंद्रो वृत्राणि जिघ्नते ॥ ८ ॥
इंद्र प्रेहि पुरस्त्वं विश्वस्येशान ओजसा । वृत्राणि वृत्रहञ्जहि ॥ ९ ॥
दीर्घस्ते अस्त्वंकुशो येना वसु प्रयच्छसि । यजमानाय सुन्वते
॥ १० ॥ २३ ॥ अयं त इंद्र सोमो निपूतो अधि बर्हिषि । एहीमस्य
द्रवा पिब ॥ ११ ॥ शाचिगो शाचिपूजनायं रणाय ते सुतः । आ-
खंडल प्र हूयसे ॥ १२ ॥ यस्ते शृंगवृषो नपात्प्रणपात्कुंडपाय्यः ।
न्यस्मिन्दध्र आ मनः ॥ १३ ॥ वास्तोष्पते ध्रुवा स्थूणांसत्रं सोम्या-
नां । द्रप्सो भेत्ता पुरां शश्वतीनामिंद्रो मुनीनां सखा ॥ १४ ॥ पृ-
दाकुसानुर्यजतो गवेषण एकः सन्नभि भूयसः । भूर्णिमश्वं न-
यत्तुजा पुरो गृभेंद्रं सोमस्य पीतये ॥ १५ ॥ २४ ॥

॥ १८ ॥ १–२२ इरिंबिठिः काण्वः ॥ १–७. १०–२२ आदित्याः । ८ अश्विनौ ।
९ अग्निसूर्यानिलाः ॥ उष्णिक् ॥

॥ १८ ॥ इदं ह नूनमेषां सुम्नं भिक्षेत मर्त्यः । आदित्यानामपूर्व्यं
सवीमनि ॥ १ ॥ अनर्वाणो ह्येषां पंथा आदित्यानां । अदब्धाः
संति पायवः सुगेवृधः ॥ २ ॥ तन्सु नः सविता भगो वरुणो
मित्रो अर्यमा । शर्म यच्छंतु सप्रथो यदीमहे ॥ ३ ॥ देवेभिर्दे-
व्यदितेऽरिष्टभर्मन्ना गहि । स्मत्सूरिभिः पुरुप्रिये सुशर्म-
भिः ॥ ४ ॥ ते हि पुत्रासो अदितेर्विदुर्द्वेषांसि योतवे । अंहो-
श्चिदुरुचक्रयोऽनेहसः ॥ ५ ॥ २५ ॥ अदितिर्नो दिवा पशुमदि-
तिर्नक्तमद्वयाः । अदितिः पात्वंहसः सदावृधा ॥ ६ ॥ उत स्या

नो दिवा मतिरदितिरूत्या गमत्। सा शंताति मयस्करदप
स्रिधः ॥७॥ उत त्या दैव्या भिषजा शं नः करतो अश्विना। युयु-
यातामितो रपो अप स्रिधः ॥८॥ शमग्निरग्निभिः करच्छं नस्त-
पतु सूर्यः। शं वातो वात्वरपा अप स्रिधः ॥९॥ अपामीवामप
स्रिधमप सेधत दुर्मतिं। आदित्यासो युयोतना नो अंहसः
॥१०॥२६॥ युयोता शरुमस्मदाँ आदित्यास उतामतिं। ऋधग्द्वेषः
कृणुत विश्ववेदसः ॥११॥ तत्सु नः शर्म यच्छतादित्या यन्मुमो-
चति। एनस्वंतं चिदेनसः सुदानवः ॥१२॥ यो नः कश्चिद्रिरिक्ष-
ति रक्षस्त्वेन मर्त्यः। स्वैः ष एवै रिरिषीष्ट युर्जनः ॥१३॥ समित्त-
मघमश्नवद्दुःशंसं मर्त्यं रिपुं। यो अस्मत्रा दुर्हणावाँ उप द्वयुः
॥१४॥ पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यं। उप द्वयुं चाद्वयुं च
वसवः ॥१५॥२७॥ आ शर्म पर्वतानामोतापां वृणीमहे। द्या-
वाक्षामारे अस्मद्रपस्कृतं ॥१६॥ ते नो भद्रेण शर्मणा युष्माकं
नावा वसवः। अति विश्वानि दुरिता पिपर्तन ॥१७॥ तुचे त-
नाय तत्सु नो द्राघीय आयुर्जीवसे। आदित्यासः सुमहसः कृणो-
तन ॥१८॥ यज्ञो हीळो वो अंतर आदित्या अस्ति मृळत। युष्मे
इद्वो अपि ष्मसि सजात्ये ॥१९॥ बृहद्वरूथं मरुतां देवं त्रातारम-
श्विना। मित्रमीमहे वरुणं स्वस्तये ॥२०॥ अनेहो मित्रार्यमन्नृ-
वद्वरुण शंस्यं। त्रिवरूथं मरुतो यंत नश्छर्दिः ॥२१॥ ये चिद्धि
मृत्युबंधव आदित्या मनवः स्मसि। प्र सू न आयुर्जीवसे तिरे-
तन ॥२२॥२८॥

॥१९॥ १–३७ सोभरिः काण्वः ॥ १–३३ अग्निः। ३४. ३५ आदित्याः। ३६. ३७ त्रसदस्योर्दानस्तुतिः ॥ १–२६. २८–३३ प्रागाथं काकुभं। २७ द्विपदा। ३४ उष्णिक्। ३५ सतोबृहती। ३६ ककुप्। ३७ पंक्तिः ॥

॥१९॥ तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे। देवत्रा

हव्यमोहिरे ॥१॥ विभूतरातिं विप्र चित्रशोचिषमग्निमीळिष्व यंतुरं। अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यं ॥२॥ यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यं। अस्य यज्ञस्य सुक्रतुं ॥३॥ ऊर्जो नपातं सुभगं सुदीदितिमग्निं श्रेष्ठशोचिषं। स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥४॥ यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये। यो नमसा स्वध्वरः ॥५॥२९॥ तस्येदर्वंतो रंहयंत आशवस्तस्य द्युम्नितमं यशः। न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥६॥ स्वग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जां पते। सुवीरस्त्वमस्मयुः ॥७॥ प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः। त्वे क्षेमासो अपि संति साधवस्त्वं राजा रयीणां ॥८॥ सो अद्धा दाश्वध्वरोऽग्ने मर्तः सुभग स प्रशंस्यः। स धीभिरस्तु सनिता ॥९॥ यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते। सो अर्वद्भिः सनिता स विपन्युभिः स शूरैः सनिता कृतं ॥१०॥३०॥ यस्याग्निर्वपुर्गृहे स्तोमं चनो दधीत विश्ववार्यः। हव्या वा वेविषद्विषः ॥११॥ विप्रस्य वा स्तुवतः सहसो यहो मक्षूतमस्य रातिषु। अवोदेवमुपरिमर्त्यं कृधि वसो विविदुषो वचः ॥१२॥ यो अग्निं हव्यदातिभिर्नमोभिर्वा सुदक्षमाविवासति। गिरा वाजिरशोचिषं ॥१३॥ समिधा यो निशिती दाशददितिं धामभिरस्य मर्त्यः। विश्वेत्स धीभिः सुभगो जनाँ अति द्युम्नैरुद्न इव तारिषत् ॥१४॥ तदग्ने द्युम्नमा भर यत्सासहत्सदने कं चिदत्रिणं। मन्युं जनस्य दूढ्यः ॥१५॥३१॥ येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः। वयं तत्ते शवसा गातुवित्त-

मा इंद्रत्वोता विधेमहि ॥ १६ ॥ ते घेदग्ने स्वाध्यो३ ये त्वा
विप्र निदधिरे नृचक्षसं । विप्रासो देव सुक्रतुं ॥ १७ ॥ त
इद्वेदिं सुभग त आहुतिं ते सोतुं चक्रिरे दिवि । त इद्वाजे-
भिर्जिग्युर्महद्धनं ये त्वे कामं न्येरिरे ॥ १८ ॥ भद्रो नो अ-
ग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रश-
स्तयः ॥ १९ ॥ भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः ।
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः
॥ २० ॥ ३२ ॥ ईळे गिरा मनुर्हितं यं देवा दूतमरतिं न्येरिरे ।
यजिष्ठं हव्यवाहनं ॥ २१ ॥ तिग्मजंभाय तरुणाय राजते प्रयो
गायस्यग्नये । यः पिंशते सूनृताभिः सुवीर्यमग्निर्घृतेभिराहुतः
॥ २२ ॥ यदी घृतेभिराहुतो वाशीमग्निर्भरत उच्चाव च ।
असुर इव निर्णिजं ॥ २३ ॥ यो हव्यान्यैरयता मनुर्हितो देव
आसा सुगंधिना । विवासते वार्याणि स्वध्वरो होता देवो
अमर्त्यः ॥ २४ ॥ यदग्ने मर्त्यस्त्वं स्यामहं मित्रमहो अमर्त्यः ।
सहसः सूनवाहुत ॥ २५ ॥ ३३ ॥ न त्वा रासीयाभिशस्तये
वसो न पापत्वाय संत्य । न मे स्तोतामतीवा न दुर्हितः
स्यादग्ने न पापया ॥ २६ ॥ पितुर्न पुत्रः सुभृतो दुरोण आ
देवाँ एतु प्र णो हविः ॥ २७ ॥ तवाहमग्न ऊतिभिर्नेदिष्ठाभिः
सचेय जोषमा वसो । सदा देवस्य मर्त्यः ॥ २८ ॥ तव क्रत्वा
सनेयं तव रातिभिरग्ने तव प्रशस्तिभिः । त्वामिदाहुः प्रमतिं
वसो ममाग्ने हर्षस्व दातवे ॥ २९ ॥ प्र सो अग्ने तवोतिभिः
सुवीराभिस्तिरते वाजभर्मभिः । यस्य त्वं सख्यमावरः
॥ ३० ॥ ३४ ॥ तव द्रप्सो नीलवान्वाश ऋत्विय इंधानः सिष्ण-
वा ददे । त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि

॥३१॥ तमागन्म सोभरयः सहस्रमुष्कं स्वभिष्टिमवसे। सम्राजं
त्रासदस्यवं॥३२॥ यस्य ते अग्ने अन्ये अग्नय उपक्षितो वया इव।
विपो न द्युम्ना नि युवे जनानां तव क्षत्राणि वर्धयन्॥३३॥ य-
मादित्यासो अद्रुहः पारं नयथ मर्त्यं। मघोनां विश्वेषां सुदानवः
॥३४॥ यूयं राजानः कं चिच्चर्षणीसहः क्षयंतं मानुषाँ अनु। वयं
ते वो वरुण मित्रार्यमन्स्यामेदृतस्य रथ्यः॥३५॥ अदान्मे पौरु-
कुत्स्यः पंचाशतं त्रसदस्युर्वधूनां। मंहिष्ठो अर्यः सत्पतिः॥३६॥
उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि। तिसृणां सप्त-
तीनां श्यावः प्रणेता भुवद्वसुर्दियानां पतिः॥३७॥३५॥

॥ २० ॥ १—२६ सोभरिः काण्वः ॥ मरुतः ॥ प्रागाथं काकुभं ॥

॥२०॥ आ गंता मा रिषण्यत प्रस्थावानो माप स्थाता स-
मन्यवः। स्थिरा चिन्नमयिष्णवः॥१॥ वीळुपविभिर्मरुत
ऋभुक्षण आ रुद्रासः सुदीतिभिः। इषा नो अद्या गता पुरु-
स्पृहो यज्ञमा सोभरीयवः॥२॥ विद्मा हि रुद्रियाणां शुष्ममुग्रं
मरुतां शिमीवतां। विष्णोरेषस्य मीळ्हुषां॥३॥ वि द्वीपानि
पापतन्तिष्ठद्दुच्छुनोभे युजंत रोदसी। प्र धन्वान्यैरत शुभ्र-
खादयो यदेजथ स्वभानवः॥४॥ अच्युता चिद्वो अज्मन्ना
नानदति पर्वतासो वनस्पतिः। भूमिर्यामेषु रेजते॥५॥३६॥
अमाय वो मरुतो यातवे द्यौर्जिहीत उत्तरा बृहत्। यत्रा नरो
देदिशते तनूष्वा त्वक्षांसि बाह्वोजसः॥६॥ स्वधामनु श्रियं
नरो महि त्वेषा अमवंतो वृषप्सवः। वहंते अह्रुतप्सवः॥७॥
गोभिर्वाणो अज्यते सोभरीणां रथे कोशे हिरण्यये। गोबंधवः
सुजातास इषे भुजे महांतो नः स्परसे नु॥८॥ प्रति वो वृषदं-

जयो वृष्णे शर्धाय मारुताय भरध्वं। हव्या वृषप्रयाव्णे ॥९॥
वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना। आ श्येनासो
न पक्षिणो वृथा नरो हव्या नो वीतये गत ॥१०॥३७॥
समानमंज्येषां वि भ्राजंते रुक्मासो अधि बाहुषु। दविद्युत-
त्यृष्टयः ॥११॥ त उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे।
स्थिरा धन्वान्यायुधा रथेषु वोऽनीकेष्वधि श्रियः ॥१२॥ येषा-
मर्णो न सप्रथो नाम त्वेषं शश्वतामेकमिद्भुजे। वयो न पित्र्यं
सहः ॥१३॥ तान्वंदस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनां।
अराणां न चरमस्तदेषां दाना मह्ना तदेषां ॥१४॥ सुभगः स
वं ऊतिष्वास पूर्वासु मरुतो व्युष्टिषु। यो वा नूनमुतासति
॥१५॥३८॥ यस्य वा यूयं प्रति वाजिनो नर आ हव्या वीतये
गथ। अभि ष द्युम्नैरुत वाजसातिभिः सुम्ना वो धूतयो नशत्
॥१६॥ यथा रुद्रस्य सूनवो दिवो वशंत्यसुरस्य वेधसः। युवा-
नस्तथेदसत् ॥१७॥ ये चार्हंति मरुतः सुदानवः स्मन्मीळ्हु-
षश्चरंति ये। अतश्चिदा न उप वस्यसा हृदा युवान आ ववृध्वं
॥१८॥ यून ऊ षु नविष्ठया वृष्णः पावकाँ अभि सोभरे गिरा।
गाय गा इव चर्कृषत् ॥१९॥ साहा ये संति मुष्टिहेव हव्यो
विश्वासु पृत्सु होतृषु। वृष्णश्चंद्रान्न सुश्रवस्तमान् गिरा वंदस्व
मरुतो अह ॥२०॥३९॥ गावश्चिद्घा समन्यवः सजात्येन
मरुतः सबंधवः। रिहते ककुभो मिथः ॥२१॥ मर्तश्चिद्वो
नृतवो रुक्मवक्षस उप भ्रातृत्वमायति। अधि नो गात
मरुतः सदा हि व आपित्वमस्ति निध्रुवि ॥२२॥ मरुतो
मारुतस्य न आ भेषजस्य वहता सुदानवः। यूयं सखायः सप्तयः
॥२३॥ याभिः सिंधुमवथ याभिस्तूर्वथ याभिर्दशस्यथा क्रिविं।

मयो नो भूतोतिभिर्मयोभुवः शिवाभिरसचद्विषः ॥२४॥ यत्सिं-
धौ यदसिक्न्यां यत्समुद्रेषु मरुतः सुबर्हिषः। यत्पर्वतेषु भेषजं ॥२५॥
विश्वं पश्यंतो बिभृथा तनूष्वा तेना नो अधि वोचत। क्षमा र-
पो मरुत आतुरस्य न इष्कर्ता विह्रुतं पुनः ॥२६॥४०॥१॥३॥

॥२१॥ १–१८ सोभरिः काण्वः ॥ १–१६ इंद्रः। १७.१८ चित्रस्य दानस्तुतिः ॥ प्रागाथं काकुभं ॥

॥२१॥ वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरंतोऽवस्यवः।
वाजे चित्रं हवामहे ॥१॥ उप त्वा कर्मन्नूतये स नो युवोग्रश्च-
क्राम यो धृषत्। त्वामिद्ध्यवितारं ववृमहे सखाय इंद्र सान-
सिं ॥२॥ आ याहीम इंदवोऽश्वपते गोपत उर्वरापते।
सोमं सोमपते पिब ॥३॥ वयं हि त्वा बंधुमंतमबंधवो वि-
प्रास इंद्र येमिम। या ते धामानि वृषभ तेभिरा गहि विश्वेभिः
सोमपीतये ॥४॥ सीदंतस्ते वयो यथा गोश्रीते मधौ मदिरे
विवक्षणे। अभि त्वामिंद्र नोनुमः ॥५॥१॥ अच्छा च त्वैना न-
मसा वदामसि किं मुहुश्चिद्वि दीधयः। संति कामासो हरिवो
ददिष्ट्वं स्मो वयं संति नो धियः ॥६॥ नूत्ना इदिंद्र ते वयमूती
अभूम नहि नू ते अद्रिवः। विद्मा पुरा परीणसः ॥७॥ विद्मा स-
खित्वमुत शूर भोज्य१मा ते ता वज्रिन्नीमहे। उतो समस्मिन्ना
शिशीहि नो वसो वाजे सुशिप्र गोमति ॥८॥ यो न इदमिदं पुरा
प्र वस्य आनिनाय तमु वः स्तुषे। सखाय इंद्रमूतये ॥९॥ हर्यश्वं
सत्पतिं चर्षणीसहं स हि ष्मा यो अमंदत। आ तु नः स
वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतं ॥१०॥२॥ त्वया ह
स्विद्युजा वयं प्रति श्वसंतं वृषभ ब्रुवीमहि। संस्थे जनस्य गो-
मतः ॥११॥ जयेम कारे पुरुहूत कारिणोऽभि तिष्ठेम दूढ्यः।

नृभिर्वृत्रं हन्याम शूशुयाम चावेरिंद्र प्र णो धियः ॥१२॥ अभ्रा-
तृव्यो अना त्वमनापिरिंद्र जनुषा सनादसि। युधेदापित्वमिच्छसे
॥१३॥ नकी रेवंतं सख्याय विंदसे पीयंति ते सुराश्वः। यदा
कृणोषि नदनुं समूहस्यादित्पितेव हूयसे॥१४॥ मा ते अमाजुरो
यथा मूरास इंद्र सख्ये त्वावतः। नि षदाम सचा सुते॥१५॥३॥
मा ते गोदत्र निरराम राधस इंद्र मा ते गृहामहि। दृळ्हा चिदर्यः
प्र मृशाभ्या भर न ते दामान आदभे॥१६॥ इंद्रो वा घेदियन्मघं
सरस्वती वा सुभगा ददिर्वसु। त्वं वा चित्र दाशुषे॥१७॥ चित्र
इद्राजा राजका इदन्यके यके सरस्वतीमनु। पर्जन्य इव ततनद्धि
वृष्ट्या सहस्रमयुता ददत्॥१८॥४॥

॥२२॥ १—१८ सोभरिः काण्वः ॥ अश्विनौ ॥ १—६ प्रागाथं। ७ बृहती। ८ अनुष्टुप्।
९.१०.१३—१८ प्रागाथं काकुभं। ११ ककुप्। १२ मध्येज्योतिः ॥

॥२२॥ ओ त्यमह्व आ रथमद्या दंसिष्ठमूतये। यमश्विना
सुहवा रुद्रवर्तनी आ सूर्यायै तस्थथुः॥१॥ पूर्वायुषं सुहवं
पुरुस्पृहं भुज्युं वाजेषु पूर्व्यं। सचनावंतं सुमतिभिः सोभरे वि-
द्वेषसमनेहसं॥२॥ इह त्या पुरुभूतमा देवा नमोभिरश्विना।
अर्वाचीना स्ववसे करामहे गंतारा दाशुषो गृहं॥३॥ युवो
रथस्य परि चक्रमीयत ईर्मान्यद्वामिषण्यति। अस्माँ अच्छा
सुमतिर्वां शुभस्पती आ धेनुरिव धावतु॥४॥ रथो यो वां
त्रिवंधुरो हिरण्याभीशुरश्विना। परि द्यावापृथिवी भूषति
श्रुतस्तेन नासत्या गतं॥५॥५॥ दशस्यंता मनवे पूर्व्यं दिवि
यवं वृकेण कर्षथः। ता वामद्य सुमतिभिः शुभस्पती अश्विना
प्र स्तुवीमहि॥६॥ उप नो वाजिनीवसू यातमृतस्य पथि-
भिः। येभिस्तृक्षिं वृषणा त्रासदस्यवं महे क्षत्राय जिन्वथः॥७॥

अयं वामद्रिभिः सुतः सोमो नरा वृषण्वसू। आ यातं सोमपीतये पिबतं दाशुषो गृहे ॥८॥ आ हि रुहतमश्विना रथे कोशे हिरण्यये वृषण्वसू। युंजाथां पीवरीरिषः ॥९॥ याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसं। ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरं ॥१०॥६॥ यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना हवामहे। वयं गीर्भिर्विपन्यवः ॥११॥ ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यं। इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतं ॥१२॥ ताविदा चिदहानां तावश्विना वंदमान उप ब्रुवे। ता ऊ नमोभिरीमहे ॥१३॥ ताविद्दोषा ता उषसि शुभस्पती ता यामन्रुद्रवर्तनी। मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति ख्यतं ॥१४॥ आ सुग्म्याय सुग्म्यं प्राता रथेनाश्विना वा सक्षणी। हुवे पितेव सोभरी ॥१५॥७॥ मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः। आरात्ताच्चिद्भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा ॥१६॥ आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा। गोमद्दस्रा हिरण्यवत् ॥१७॥ सुप्रावर्गं सुवीर्यं सुष्ठु वार्यमनाधृष्टं रक्षस्विना। अस्मिन्ना वामायाने वाजिनीवसू विश्वा वामानि धीमहि ॥१८॥८॥

॥ २३ ॥ १–३० विश्वमना वैयश्वः ॥ अग्निः ॥ उष्णिक् ॥

॥२३॥ ईळिष्वा हि प्रतीव्यं१ यजस्व जातवेदसं। चरिष्णुधूममगृभीतशोचिषं ॥१॥ दामानं विश्वचर्षणेऽग्निं विश्वमनो गिरा। उत स्तुषे विष्पर्धसो रथानां ॥२॥ येषामाबाध ऋग्मिय इषः पृक्षश्च निग्रभे। उपविदा वह्निर्विंदते वसु ॥३॥

उदस्य शोचिरस्थाद्दीदियुषो व्य१जरं । तपुंजंभस्य सुद्युतो गणश्रियः ॥४॥ उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा । अभिख्या भासा बृहता शुशुक्वनिः ॥५॥९॥ अग्ने याहि सुशस्तिभिर्हव्या जुह्वान आनुषक् । यथा दूतो बभूथ हव्यवाहनः ॥६॥ अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनां । तमया वाचा गृणे तमु वः स्तुषे ॥७॥ यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयंत इत् । मित्रं न जने सुधितमृतावनि ॥८॥ ऋतावानमृतायवो यज्ञस्य साधनं गिरा । उपो एनं जुजुषुर्नमसस्पदे ॥९॥ अच्छा नो अंगिरस्तमं यज्ञासो यंतु संयतः । होता यो अस्ति विक्ष्वा यशस्तमः ॥१०॥१०॥ अग्ने तव त्ये अजरेंधानासो बृहद्भाः । अश्वा इव वृषणस्तविषीयवः ॥११॥ स त्वं न ऊर्जां पते रयिं रास्व सुवीर्यं । प्राव नस्तोके तनये समत्स्वा ॥१२॥ यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशि । विश्वेदग्निः प्रति रक्षांसि सेधति ॥१३॥ श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते । नि मायिनस्तपुषा रक्षसो दह ॥१४॥ न तस्य मायया चन रिपुरीशीत मर्त्यः । यो अग्नये ददाश हव्यदातिभिः ॥१५॥११॥ व्यश्वस्त्वा वसुविदमुक्षण्युरप्रीणादृषिः । महो राये तमु त्वा समिधीमहि ॥१६॥ उशना काव्यस्त्वा नि होतारमसादयत् । आयजिं त्वा मनवे जातवेदसं ॥१७॥ विश्वे हि त्वा सजोषसो देवासो दूतमक्रत । श्रुष्टी देव प्रथमो यज्ञियो भुवः ॥१८॥ इमं घा वीरो अमृतं दूतं कृण्वीत मर्त्यः । पावकं कृष्णवर्तनिं विहायसं ॥१९॥ तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषं । विशामग्निमजरं प्रत्नमीड्यं ॥२०॥१२॥ यो अस्मै हव्यदातिभिराहुतिं मर्तोऽविधत् । भूरि पोषं स धत्ते वीरवद्यशः ॥२१॥ प्रथमं

जातवेदसमग्निं यज्ञेषु पूर्व्यं । प्रति स्रुगेति नमसा हविष्मती ॥२२॥ आभिर्विधेमाग्नये ज्येष्ठाभिर्व्यश्ववत् । मंहिष्ठाभिर्मतिभिः शुक्रशोचिषे ॥२३॥ नूनमर्च विहायसे स्तोमेभिः स्थूरयूपवत् । ऋषे वैयश्व दम्यायाग्नये ॥२४॥ अतिथिं मानुषाणां सूनुं वनस्पतीनां । विप्रा अग्निमवसे प्रत्नमीळते ॥२५॥१३॥ महो विश्वाँ अभि षतोऽभि हव्यानि मानुषा । अग्ने नि षत्सि नमसाधि बर्हिषि ॥२६॥ वंस्वा नो वार्या पुरु वंस्व रायः पुरुस्पृहः । सुवीर्यस्य प्रजावतो यशस्वतः ॥२७॥ त्वं वरो सुषाम्णेऽग्ने जनाय चोदय । सदा वसो रातिं यविष्ठ शश्वते ॥२८॥ त्वं हि सुप्रतूरसि त्वं नो गोमतीरिषः । महो रायः सातिमग्ने अपा वृधि ॥२९॥ अग्ने त्वं यशा अस्या मित्रावरुणा वह । ऋतावाना सम्राजा पूतदक्षसा ॥३०॥१४॥

॥ २४ ॥ १–३० विश्वमना वैयश्वः ॥ १–२७ इंद्रः । २८–३० वरोः सौषाम्णस्य दानस्तुतिः ॥ १–२९ उष्णिक् । ३० अनुष्टुप् ॥

॥२४॥ सखाय आ शिषामहि ब्रह्मेंद्राय वज्रिणे । स्तुष ऊ षु वो नृतमाय धृष्णवे ॥१॥ शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा । मघैर्मघोनो अति शूर दाशसि ॥२॥ स नः स्तवान आ भर रयिं चित्रश्रवस्तमं । निरेके चिद्यो हरिवो वसुर्ददिः ॥३॥ आ निरेकमुत प्रियमिंद्र दर्षि जनानां । धृषता धृष्णो स्तवमान आ भर ॥४॥ न ते सव्यं न दक्षिणं हस्तं वरंत आमुरः । न परिबाधो हरिवो गविष्टिषु ॥५॥१५॥ आ त्वा गोभिरिव व्रजं गीर्भिर्ऋणोम्यद्रिवः । आ स्मा कामं जरितुरा मनः पृण ॥६॥ विश्वानि विश्वमनसो धिया नो वृत्रहंतम । उग्र प्रणेतरधि षू वसो गहि ॥७॥ वयं ते अस्य वृत्रहन्विद्याम शूर नव्यसः । वसोः स्पार्हस्य पुरुहूत राधसः ॥८॥ इंद्र यथा ह्य-

स्ति तेऽपरीतं नृतो शवः। अमृक्ता रातिः पुरुहूत दाशुषे ॥९॥
आ वृषस्व महामह महे नृतम राधसे । दृळ्हश्चिद्दृह्य
मघवन्मघत्तये ॥१०॥१६॥ नू अन्यत्रा चिदद्रिवस्त्वन्नो
जग्मुराशसः । मघवञ्छग्धि तव तन्न ऊतिभिः ॥११॥
नह्यं१ग नृतो त्वदन्यं विंदामि राधसे। राये द्युम्नाय शवसे च
गिर्वणः ॥१२॥ एंदुमिंद्राय सिंचत पिबाति सोम्यं मधु। प्र रा-
धसा चोदयाते महित्वना ॥१३॥ उपो हरीणां पतिं दक्षं पृंचं-
तमब्रवं। नूनं श्रुधि स्तुवतो अश्व्यस्य ॥१४॥ नह्यं१ग पुरा चन
जज्ञे वीरतरस्त्वत्। नकी राया नैवथा न भंदना ॥१५॥१७॥
एदु मध्वो मदिंतरं सिंच वाध्वर्यो अंधसः । एवा हि वीरः
स्तवते सदावृधः ॥१६॥ इंद्र स्थातर्हरीणां नकिष्टे पूर्व्य-
स्तुतिं । उदानंश शवसा न भंदना ॥१७॥ तं वो वाजानां
पतिमहूमहि श्रवस्यवः। अप्रायुभिर्यज्ञेभिर्वावृधेन्यं ॥१८॥ एतो
न्विंद्रं स्तवाम सखायः स्तोम्यं नरं। कृष्टीर्यो विश्वा अभ्यस्त्येक
इत् ॥१९॥ अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः। घृतात्स्वा-
दीयो मधुनश्च वोचत ॥२०॥१८॥ यस्यामितानि वीर्या३ न
राधः पर्येतवे । ज्योतिर्न विश्वमभ्यस्ति दक्षिणा ॥२१॥
स्तुहींद्रं व्यश्ववदनूर्मिं वाजिनं यमं। अर्यो गयं मंहमानं वि
दाशुषे॥२२॥ एवा नूनमुप स्तुहि वैयश्व दशमं नवं। सुविद्वांसं
चर्कृत्यं चरणीनां ॥२३॥ वेत्था हि निर्ऋतीनां वज्रहस्त परि-
वृजं। अहरहः शुंध्युः परिपदामिव ॥२४॥ तदिंद्राव आ भर येना
दंसिष्ठ कृत्वने। द्विता कुत्साय शिश्नथो नि चोदय॥२५॥१९॥
तमु त्वा नूनमीमहे नव्यं दंसिष्ठ सन्यसे। स त्वं नो विश्वा अभि-
मातीः सक्षणिः ॥२६॥ य ऋक्षादंहसो मुचद्यो वार्या-

त्सप्त सिंधुषु। वधर्दासस्य तुविनृम्ण नीनमः ॥२७॥ यथा वरो
सुषाम्णे सनिभ्य आवहो रयिं। व्यश्वेभ्यः सुभगे वाजिनीवति
॥२८॥ आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः। स्थूरं च राधः
शतवत्सहस्रवत् ॥२९॥ यत्त्वा पृच्छादीजानः कुहया कुहयाकृते।
एषो अपश्रितो वलो गोमतीमव तिष्ठति ॥३०॥२०॥

॥ २५ ॥ १–२४ विश्वमना वैयश्वः ॥ १–९. १३–२४ मित्रावरुणौ । १०–१२ विश्वे देवाः ॥
१–२२. २४ उष्णिक् । २३ उष्णिग्गर्भा ॥

॥२५॥ ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया। ऋता-
वाना यजसे पूतदक्षसा ॥१॥ मित्रा तना न रथ्या३ वरुणो
यश्च सुक्रतुः। सनात्सुजाता तनया धृतव्रता ॥२॥ ता माता
विश्ववेदसासुर्याय प्रमहसा। मही जजानादितिरृतावरी
॥३॥ महांता मित्रावरुणा सम्राजा देवावसुरा। ऋतावाना-
वृतमा घोषतो बृहत् ॥४॥ नपाता शवसो महः सूनू दक्षस्य
सुक्रतू। सृप्रदानू इषो वास्त्वधि क्षितः ॥५॥२१॥ सं या
दानूनि येमथुर्दिव्याः पार्थिवीरिषः। नभस्वतीरा वां चरंतु
वृष्टयः ॥६॥ अधि या बृहतो दिवो३ऽभि यूथेव पश्यतः। ऋ-
तावाना सम्राजा नमसे हिता ॥७॥ ऋतावाना नि षेदतुः
साम्राज्याय सुक्रतू। धृतव्रता क्षत्रिया क्षत्रमाशतुः ॥८॥ अ-
क्ष्णश्चिद्गातुवित्तरानुल्बणेन चक्षसा। नि चिन्मिषंता नि-
चिरा नि चिक्यतुः ॥९॥ उत नो देव्यदितिरुरुष्यतां नासत्या।
उरुष्यंतु मरुतो वृद्धशवसः ॥१०॥२२॥ ते नो नावमुरुष्यत
दिवा नक्तं सुदानवः। अरिष्यंतो नि पायुभिः सचेमहि ॥११॥
अघ्नते विष्णवे वयमरिष्यंतः सुदानवे। श्रुधि स्वयावन्त्सिंधो
पूर्वचित्तये ॥१२॥ तद्वार्यं वृणीमहे वरिष्ठं गोपयत्यं। मित्रो

यत्पांति वरुणो यदर्यमा ॥१३॥ उत नः सिंधुरपां तन्मरुतस्त-
दश्विना । इंद्रो विष्णुर्मीढ्वांसः सजोषसः ॥१४॥ ते हि ष्मा वनुषो
नरोऽभिमातिं कयस्य चित् । तिग्मं न क्षोदः प्रतिघ्नंति भूर्ण-
यः ॥१५॥२३॥ अयमेक इत्था पुरूरु चष्टे वि विश्पतिः । तस्य
व्रतान्यनु वश्चरामसि ॥१६॥ अनु पूर्वाण्योक्या साम्राज्यस्य स-
श्चिम । मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ॥१७॥ परि यो रश्मिना
दिवोऽतान्ममे पृथिव्याः । उभे आ पप्रौ रोदसी महित्वा ॥१८॥
उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः । अग्निर्न शुक्रः समिधान
आहुतः ॥१९॥ वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः । ईशे हि
पित्वोऽविषस्य दावने ॥२०॥२४॥ तत्सूर्यं रोदसी उभे दोषा व-
स्तोरुप ब्रुवे । भोजेष्वस्माँ अभ्युच्चरा सदा ॥२१॥ ऋज्रमुक्षण्या-
यने रजतं हरयाणे । रथं युक्तमसनाम सुषामणि ॥२२॥ ता मे
अश्व्यानां हरीणां नितोशना । उतो नु कृत्व्यानां नृवाह-
सा ॥२३॥ स्मदभीशू कशावंता विप्रा नविष्ठया मती । महो
वाजिनावर्वंता सचासनं ॥२४॥२५॥

॥२६॥ १–२५ विश्वमना वैयश्वो व्यश्वो वांगिरसः ॥ १–१९ अश्विनौ । २०–२५ वायुः ॥
१–१५. २२–२४ उष्णिक् । १६–१९. २१. २५ गायत्री । २० अनुष्टुप् ॥

॥२६॥ युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु । अतूर्तदक्षा
वृषणा वृषण्वसू ॥१॥ युवं वरो सुषाम्णे महे तने नासत्या ।
अवोभिर्याथो वृषणा वृषण्वसू ॥२॥ ता वामद्य हवामहे
हव्येभिर्वाजिनीवसू । पूर्वीरिष इषयंतावति क्षपः ॥३॥ आ
वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा । उप स्तोमान्तुरस्य
दर्शथः श्रिये ॥४॥ जुहुराणा चिदश्विना मन्येथां वृषण्वसू ।
युवं हि रुद्रा पर्षथो अति द्विषः ॥५॥२६॥ दस्रा हि विश्व-

मानुषक्पृक्षुभिः परिदीयथः। धियंजिन्वा मधुवर्णा शुभस्पती
॥६॥ उप नो यातमश्विना राया विश्वपुषा सह। मघवाना
सुवीरावनपच्युता ॥७॥ आ मे अस्य प्रतीव्य१मिंद्रनासत्या
गतं। देवा देवेभिरद्य सचनस्तमा ॥८॥ वयं हि वां हवामह
उक्षण्यंतो व्यश्ववत्। सुमतिभिरुप विप्राविहा गतं ॥९॥ अ-
श्विना स्वृषे स्तुहि कुवित्ते श्रवतो हवं। नेदीयसः कूळयातः
पणीँरुत ॥१०॥२७॥ वैयश्वस्य श्रुतं नरोतो मे अस्य वेदथः।
सजोषसा वरुणो मित्रो अर्यमा ॥११॥ युवादत्तस्य धिष्ण्या
युवानीतस्य सूरिभिः। अहरहर्वृषणा मह्यं शिक्षतं ॥१२॥
यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव। सपर्यंता शुभे
चक्राते अश्विना ॥१३॥ यो वामुरुव्यचस्तमं चिकेतति
नृपाय्यं। वर्तिरश्विना परि यातमस्मयू ॥१४॥ अस्मभ्यं
सु वृषण्वसू यातं वर्तिर्नृपाय्यं। विषुद्रुहेव यज्ञमूहथुर्गिरा
॥१५॥२८॥ वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा।
युवाभ्यां भूत्वश्विना ॥१६॥ यददो दिवो अर्णव इषो वा
मदथो गृहे। श्रुतमिन्मे अमर्त्या ॥१७॥ उत स्या श्वेतया-
वरी वाहिष्ठा वां नदीनां। सिंधुर्हिरण्यवर्तनिः ॥१८॥ स्म-
देतया सुकीर्त्याश्विना श्वेतया धिया। वहेथे शुभ्रयावाना
॥१९॥ युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो। आन्नो
वायो मधु पिबास्माकं सवना गहि ॥२०॥२९॥ तव वा-
यवृतस्पते त्वष्टुर्जामातरद्भुत। अवांस्या वृणीमहे ॥२१॥
त्वष्टुर्जामातरं वयमीशानं राय ईमहे। सुतावंतो वायुं द्युम्ना
जनासः ॥२२॥ वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यं।
वहस्व महः पृथुपक्षसा रथे ॥२३॥ त्वां हि सुप्सरस्तमं नृ-

षदनेषु हूमहे। ग्रावाणं नाश्वपृष्ठं मंहना॥२४॥ स त्वं नो देव मन-
सा वायो मंदानो अग्रियः। कृधि वाजाँ अपो धियः॥२५॥३०॥

॥ २७ ॥ १–२२ मनुर्वैवस्वतः ॥ विश्वे देवाः ॥ प्रागाथं ॥

॥२७॥ अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे। ऋचा
यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यं॥१॥ आ पशुं गा-
सि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः। विश्वे च नो वसवो
विश्ववेदसो धीनां भूत प्रावितारः॥२॥ प्र सू न एत्वध्वरो३ग्ना
देवेषु पूर्व्यः। आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभा-
नुषु॥३॥ विश्वे हि ष्मा मनवे विश्ववेदसो भुवन्वृधे रिशा-
दसः। अरिष्टेभिः पायुभिर्विश्ववेदसो यंता नोऽवृकं छर्दिः॥४॥
आ नो अद्य समनसो गंता विश्वे सजोषसः। ऋचा गिरा
मरुतो देव्यदिते सदने पस्त्ये महि॥५॥३१॥ अभि प्रिया मरुतो
या वो अश्व्या हव्या मित्र प्रयाथन। आ बर्हिरिंद्रो वरुणस्तुरा
नर आदित्यासः सदंतु नः॥६॥ वयं वो वृक्तबर्हिषो हितप्र-
यस आनुषक्। सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्न-
यः॥७॥ आ प्र यात मरुतो विष्णो अश्विना पूषन्माकीनया
धिया। इंद्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे
॥८॥ वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत। न यद्दूराद्वस-
वो नू चिदंतितो वरूथमादधर्षति॥९॥ अस्ति हि वः स-
जात्यं रिशादसो देवासो अस्त्याप्यं। प्र णः पूर्वस्मै सुविताय
वोचत मक्षू सुम्नाय नव्यसे॥१०॥३२॥ इदा हि व उपस्तुतिमिदा
वामस्य भक्तये। उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्या-
मिव॥११॥ उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो

वरेण्यः । नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः
॥१२॥ देवंदेवं वोऽवसे देवंदेवमभिष्टये । देवंदेवं हुवेम वाज-
सातये गृणंतो देव्या धिया ॥१३॥ देवासो हि ष्मा मनवे समन्यवो
विश्वे साकं सरातयः । ते नो अद्य ते अपरं तुचे तु नो भवंतु वरि-
वोविदः ॥१४॥ प्र वः शंसाम्यद्रुहः संस्थ उपस्तुतीनां । न तं धूर्ति-
र्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत् ॥१५॥ प्र स क्षयं तिरते
वि महीरिषो यो वो वराय दाशति । प्र प्रजाभिर्जायते धर्मण-
स्पर्यरिष्टः सर्व एधते ॥१६॥३३॥ ऋते स विंदते युधः सुगेभिर्यात्य-
ध्वनः । अर्यमा मित्रो वरुणः सरातयो यं त्रायंते सजोषसः ॥१७॥
अज्रे चिदस्मै कृणुथा न्यंचनं दुर्गे चिदा सुसरणं । एषा चिदस्मा-
दशनिः परो नु सास्रेधंती वि नश्यतु ॥१८॥ यदद्य सूर्य उद्यति
प्रियक्षत्रा ऋतं दध । यन्निम्रुचि प्रबुधि विश्ववेदसो यद्वा मध्यं-
दिने दिवः ॥१९॥ यद्वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि
दाशुषे । वयं तद्वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ॥२०॥
यदद्य सूर उदिते यन्मध्यंदिन आतुचि । वामं धत्थ मनवे वि-
श्ववेदसो जुह्वानाय प्रचेतसे ॥२१॥ वयं तद्वः सम्राज आ वृणीमहे
पुत्रो न बहुपाय्यं । अश्याम तदादित्या जुह्वतो हविर्येन वस्यो-
ऽनशामहे ॥२२॥३४॥

॥ २८ ॥ १–५ मनुर्वैवस्वतः ॥ विश्वे देवाः ॥ १–३. ५ गायत्री । ४ पुरउष्णिक् ॥

॥२८॥ ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन् । विदन्नह
द्वितासनन् ॥१॥ वरुणो मित्रो अर्यमा स्मद्रातिषाचो अ-
ग्नयः । पत्नीवंतो वषट्कृताः ॥२॥ ते नो गोपा अपाच्यास्त
उदक्त इत्था न्यक् । पुरस्तात्सर्वया विशा ॥३॥ यथा वशंति देवा-

स्तथेदसत्तदेषां नकिरा मिनत्। अरावा चन मर्त्यः ॥४॥ सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषां। सप्तो अधि श्रियो धिरे ॥५॥३५॥

॥ २९ ॥ १–१० मनुर्वैवस्वतः कश्यपो वा मारीचः ॥ विश्वे देवाः ॥ द्विपदा ॥

॥२९॥ बभ्रुरेको विषुणः सूनरो युवांज्यंक्ते हिरण्ययं ॥१॥ योनिमेक आ संसाद द्योतनो ऽंतर्देवेषु मेधिरः ॥२॥ वाशीमेको बिभर्ति हस्त आयसीमंतर्देवेषु निध्रुविः ॥३॥ वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥४॥ तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ॥५॥ पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनां ॥६॥ त्रीण्येक उरुगायो वि चंक्रमे यत्र देवासो मदंति ॥७॥ विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः ॥८॥ सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ॥९॥ अर्चंत एके महि साम मन्वत तेन सूर्यमरोचयन् ॥१०॥३६॥

॥३०॥ १–४ मनुर्वैवस्वतः ॥ विश्वे देवाः ॥ १ गायत्री । २ पुरउष्णिक् । ३ बृहती । ४ अनुष्टुप् ॥

॥३०॥ नहि वो अस्त्यर्भको देवासो न कुमारकः। विश्वे सतोमहांत इत् ॥१॥ इति स्तुतासो असथा रिशादसो ये स्थ त्रयश्च त्रिंशच्च। मनोर्देवा यज्ञियासः ॥२॥ ते नस्त्राध्वं तेऽवत त उ नो अधि वोचत। मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः ॥३॥ ये देवास इह स्थन विश्वे वैश्वानरा उत। अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत ॥४॥३७॥४॥

॥ ३१ ॥ १–१८ मनुर्वैवस्वतः ॥ १–४ इज्यास्तवो यजमानप्रशंसा च । ५–९ दंपती। १०–१८ दंपत्योराशिषः ॥ १–८. ११–१३ गायत्री । ९. १४ अनुष्टुप् । १० पादनिचृत् । १५–१८ पंक्तिः ॥

॥३१॥ यो यजाति यजात इत्सुनवच्च पचाति च। ब्रह्मे-

दिंद्रस्य चाकनत्॥१॥ पुरोळाशं यो अस्मै सोमं ररत आशिरं।
पादित्तं शक्रो अंहसः ॥२॥ तस्य द्युमाँ असद्रथो देवजूतः
स शूशुवत्। विश्वा वन्वन्नमित्रिया॥३॥ अस्य प्रजावती गृहे-
ऽसश्चंती दिवेदिवे । इळा धेनुमती दुहे ॥४॥ या दंपती
समनसा सुनुत आ च धावतः । देवासो नित्ययाशिरा
॥५॥३८॥ प्रति प्राशव्याँ इतः सम्यंचा बर्हिराशाते । न ता
वाजेषु वायतः ॥६॥ न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः।
श्रवो बृहद्विवासतः ॥७॥ पुत्रिणा ता कुमारिणा विश्वमा-
युर्व्यश्नुतः । उभा हिरण्यपेशसा ॥८॥ वीतिहोत्रा कृतद्वसू
दशस्यंतामृताय कं । समूधो रोमशं हतो देवेषु कृणुतो दुवः
॥९॥ आ शर्म पर्वतानां वृणीमहे नदीनां। आ विष्णोः सचाभु-
वः ॥१०॥३९॥ ऐतु पूषा रयिर्भगः स्वस्ति सर्वधातमः । उरु-
रध्वा स्वस्तये॥११॥ अरमतिरनर्वणो विश्वो देवस्य मनसा।
आदित्यानामनेह इत्॥१२॥ यथा नो मित्रो अर्यमा वरुणः संति
गोपाः।सुगा ऋतस्य पंथाः॥१३॥ अग्निं वः पूर्व्यं गिरा देवमीळे
वसूनां।सपर्यंतः पुरुप्रियं मित्रं न क्षेत्रसाधसं॥१४॥ मक्षू देव-
वतो रथः शूरो वा पृत्सु कासु चित्। देवानां य इन्मनो यज-
मान इयक्षत्यभीदयज्वनो भुवत्॥१५॥ न यजमान रिष्यसि
न सुन्वान न देवयो। देवानां य इन्मनो यजमान इय-
क्षत्यभीदयज्वनो भुवत् ॥१६॥ नकिष्टं कर्मणा नशन्न प्र
योषन्न योषति । देवानां य इन्मनो यजमान इयक्षत्य-
भीदयज्वनो भुवत् ॥१७॥ असदत्र सुवीर्यमुत त्यदाश्वश्व्यं।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्
॥१८॥४०॥२॥

॥ ३२ ॥ १–३० मेधातिथिः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥३२॥ प्र कृतान्यृजीषिणः कण्वा इंद्रस्य गाथया। मदे सोमस्य
वोचत ॥१॥ यः सृबिंदमनर्शनिं पिप्रुं दासमहीशुवं। वधीदुग्रो
रिणन्नपः ॥२॥ न्यर्बुदस्य विष्टपं वर्ष्माणं बृहतस्तिर। कृषे तदिंद्र
पौंस्यं ॥३॥ प्रति श्रुताय वो धृषत्तूर्णाशं न गिरेरधि। हुवे सुशि-
प्रमूतये॥४॥ स गोरश्वस्य वि व्रजं मंदानः सोम्येभ्यः। पुरं न शूर
दर्षसि॥५॥१॥ यदि मे रारणः सुत उक्थे वा दधसे चनः। आरा-
दुप स्वधा गहि॥६॥ वयं घा ते अपि ष्मसि स्तोतार इंद्र गिर्वणः।
त्वं नो जिन्व सोमपाः॥७॥ उत नः पितुमा भर संरराणो अवि-
क्षितं। मघवन्भूरि ते वसु॥८॥ उत नो गोमतस्कृधि हिरण्यवतो
अश्विनः। इळाभिः सं रभेमहि॥९॥ बृबदुक्थं हवामहे सृप्रक-
रस्नमूतये। साधु कृण्वंतमवसे॥१०॥२॥ यः संस्थे चिच्छतक्रतु-
रादीं कृणोति वृत्रहा। जरितृभ्यः पुरूवसुः॥११॥ स नः शक्र-
श्चिदा शकद्दानवाँ अंतराभरः। इंद्रो विश्वाभिरूतिभिः॥१२॥
यो रायो३वनिर्महान्त्सुपारः सुन्वतः सखा। तमिंद्रमभि गायत
॥१३॥ आयंतारं महि स्थिरं पृतनासु श्रवोजितं। भूरेरीशान-
मोजसा॥१४॥ नकिरस्य शचीनां नियंता सूनृतानां। नकिर्व-
क्ता न दादिति॥१५॥३॥ न नूनं ब्रह्मणामृणं प्राशूनामस्ति सुन्व-
तां। न सोमो अप्रता पपे॥१६॥ पन्य इदुप गायत पन्य उक्थानि
शंसत। ब्रह्मा कृणोत पन्य इत्॥१७॥ पन्य आ दर्दिरच्छता सहस्रा
वाज्यवृतः। इंद्रो यो यज्वनो वृधः॥१८॥ वि षू चर स्वधा अनु
कृष्टीनामन्वाहुवः। इंद्र पिब सुतानां॥१९॥ पिब स्वधैनवा-
नामुत यस्तुग्र्ये सचा। उतायमिंद्र यस्तव॥२०॥४॥ अतीहि
मन्युषाविणं सुषुवांसमुपारणे। इमं रातं सुतं पिब॥२१॥ इहि

तिस्रः परावत इहि पंच जनाँ अति । धेना इंद्रावचाकशत् ॥ २२ ॥
सूर्यो रश्मिं यथा सृजा त्वा यच्छंतु मे गिरः । निम्नमापो न स-
ध्र्यक् ॥ २३ ॥ अध्वर्यवा तु हि षिंच सोमं वीराय शिप्रिणे । भरा
सुतस्य पीतये ॥ २४ ॥ य उद्नः फलिगं भिनन्न्य१क्सिंधूँरवासृ-
जत् । यो गोषु पक्वं धारयत् ॥ २५ ॥ ५ ॥ अहन्वृत्रमृचीषम और्ण-
वाभमहीशुवं । हिमेनाविध्यदर्बुदं ॥ २६ ॥ प्र व उग्राय निष्टुरे-
ऽषाळ्हाय प्रसक्षिणे । देवत्तं ब्रह्म गायत ॥ २७ ॥ यो विश्वान्यभि
व्रता सोमस्य मदे अंधसः । इंद्रो देवेषु चेतति ॥ २८ ॥ इह त्या सध-
माद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितं ॥ २९ ॥ अर्वांचं
त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ॥ ३० ॥ ६ ॥

॥ ३३ ॥ १—१९ मेध्यातिथिः काण्वः ॥ इंद्रः ॥ १—१५ बृहती । १६—१८ गायत्री । १९ अनुष्टुप् ॥

॥ ३३ ॥ वयं घ त्वा सुतावंत आपो न वृक्तबर्हिषः । पवित्रस्य
प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥ १ ॥ स्वरंति त्वा सुते
नरो वसो निरेक उक्थिनः । कदा सुतं तृषाण ओक आ गम
इंद्र स्वब्दीव वंसगः ॥ २ ॥ कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि
सहस्रिणं । पिशंगरूपं मघवन्विचर्षणे मक्षू गोमंतमीमहे
॥ ३ ॥ पाहि गायांधसो मद इंद्राय मेध्यातिथे । यः संमिश्लो
हर्योर्यः सुते सचा वज्री रथो हिरण्ययः ॥ ४ ॥ यः सुषव्यः सु-
दक्षिण इनो यः सुक्रतुर्गृणे । य आकरः सहस्रा यः शता-
मघ इंद्रो यः पूर्भिदारितः ॥ ५ ॥ ७ ॥ यो धृषितो योऽवृतो
यो अस्ति श्मश्रुषु श्रितः । विभूतद्युम्नश्च्यवनः पुरुष्टुतः क्रत्वा
गौरिव शाकिनः ॥ ६ ॥ क ईं वेद सुते सचा पिबंतं कद्वयो
दधे । अयं यः पुरो विभिनत्त्योजसा मंदानः शिप्र्यंधसः ॥ ७ ॥

दाना मृगो न वारणः पुरुत्रा चरथं दधे। नकिष्ट्वा नि यमदा सुते
गमो महांश्चरस्योजसा ॥८॥ य उग्रः सन्ननिष्टृतः स्थिरो रणाय
संस्कृतः। यदि स्तोतुर्मघवा शृणवद्धवं नेंद्रो योषत्या गमत् ॥९॥
सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः। वृषा ह्युग्र शृण्विषे परा-
वति वृषो अर्वावति श्रुतः ॥१०॥८॥ वृषणस्ते अभीशवो वृषा
कशा हिरण्ययी। वृषा रथो मघवन्वृषणा हरी वृषा त्वं शतक्रतो
॥११॥ वृषा सोता सुनोतु ते वृषन्नृजीपिन्ना भर। वृषा दधन्वे
वृषणं नदीष्वा तुभ्यं स्थातर्हरीणां ॥१२॥ एंद्र याहि पीतये मधु
शविष्ठ सोम्यं। नायमच्छा मघवा शृणवद्गिरो ब्रह्मोक्था च
सुक्रतुः ॥१३॥ वहंतु त्वा रथेष्ठामा हरयो रथयुजः। तिरश्चिदर्य
सवनानि वृत्रहन्नन्येषां या शतक्रतो ॥१४॥ अस्माकमद्यांतमं
स्तोमं धिष्व महामह। अस्माकं ते सवना संतु शंतमा मदाय
द्युक्ष सोमपाः ॥१५॥९॥ नहि षस्तव नो मम शास्त्रे अन्यस्य
रण्यति। यो अस्मान्वीर आनयत् ॥१६॥ इंद्रश्चिद्घा तदब्रवी-
त्स्त्रिया अशास्यं मनः। उतो अह क्रतुं रघुं ॥१७॥ सप्ती चिद्घा
मदच्युता मिथुना वहतो रथं। एवेद्धूर्वृष्ण उत्तरा ॥१८॥ अधः
पश्यस्व मोपरि संतरां पादकौ हर। मा ते कशप्लकौ दृशन् स्त्री
हि ब्रह्मा बभूविथ ॥१९॥१०॥

॥ ३४ ॥ १–१५ नीपातिथिः काण्वः। १६–१८ सहस्रं वसुरोचिषोऽङ्गिरसः ॥
इंद्रः ॥ १–१५ अनुष्टुप्। १६–१८ गायत्री ॥

॥३४॥ एंद्र याहि हरिभिरुप कण्वस्य सुष्टुतिं। दिवो अमुष्य
शासतो दिवं यय दिवावसो ॥१॥ आ त्वा ग्रावा वदन्निह
सोमी घोषेण यच्छतु। दिवो अमुष्य शासतो दिवं यय दिवा-
वसो ॥२॥ अत्रा वि नेमिरेषामुरां न धूनुते वृकः। दिवो अ-

मुष्य शासंतो दिवं यय दिवावसो ॥ ३ ॥ आ त्वा कण्वा इहा-
वसे हवंते वाजसातये। दिवो अमुष्य शासंतो दिवं यय दिवा-
वसो ॥ ४ ॥ दधामि ते सुतानां वृष्णे न पूर्वपाय्यं। दिवो अमुष्य
शासंतो दिवं यय दिवावसो ॥ ५ ॥ ११ ॥ स्मत्पुरंधिर्न आ गहि
विश्वतोधीर्न ऊतये। दिवो अमुष्य शासंतो दिवं यय दि-
वावसो ॥ ६ ॥ आ नो याहि महेमते सहस्रोते शतामघ।
दिवो अमुष्य शासंतो दिवं यय दिवावसो ॥ ७ ॥ आ त्वा होता
मनुर्हितो देवत्रा वक्षदीड्यः। दिवो अमुष्य शासंतो दिवं यय
दिवावसो ॥ ८ ॥ आ त्वा मदच्युता हरी श्येनं पक्षेव वक्ष-
तः। दिवो अमुष्य शासंतो दिवं यय दिवावसो ॥ ९ ॥ आ या-
ह्यर्य आ परि स्वाहा सोमस्य पीतये। दिवो अमुष्य शासंतो
दिवं यय दिवावसो ॥ १० ॥ १२ ॥ आ नो याह्युपश्रुत्युक्थेषु
रणया इह। दिवो अमुष्य शासंतो दिवं यय दिवावसो ॥ ११ ॥
सरूपैरा सु नो गहि संभृतैः संभृताश्वः। दिवो अमुष्य शासंतो
दिवं यय दिवावसो ॥ १२ ॥ आ याहि पर्वतेभ्यः समुद्रस्या-
धि विष्टपः। दिवो अमुष्य शासंतो दिवं यय दिवावसो ॥ १३ ॥
आ नो गव्यान्यश्व्या सहस्रा शूर दर्दृहि। दिवो अमुष्य शासंतो
दिवं यय दिवावसो ॥ १४ ॥ आ नः सहस्रशो भरायुतानि श-
तानि च। दिवो अमुष्य शासंतो दिवं यय दिवावसो ॥ १५ ॥ आ
यदिंद्रश्च दद्वहे सहस्रं वसुरोचिषः। ओजिष्ठमश्व्यं पशुं ॥ १६ ॥
य ऋज्रा वातरंहसोऽरुषासो रघुष्यदः। भ्राजंते सूर्या इव
॥ १७ ॥ पारावतस्य रातिषु द्रवच्चक्रेष्वाशुषु। तिष्ठं वनस्य
मध्य आ ॥ १८ ॥ १३ ॥

॥३५॥ १–२४ श्यावाश्वः ॥ अश्विनौ ॥ १–२१ उपरिष्टाज्ज्योतिः । २२. २४ पंक्तिः ।
२३ महाबृहती ॥

॥३५॥ अग्निनेन्द्रेण वरुणेन विष्णुनादित्यै रुद्रैर्वसुभिः सचा-
भुवा। सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥१॥ वि-
श्वाभिर्धीभिर्भुवनेन वाजिना दिवा पृथिव्याद्रिभिः सचाभुवा।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥२॥ विश्वैर्देवै-
स्त्रिभिरेकादशैरिहाद्भिर्मरुद्भिर्भृगुभिः सचाभुवा। सजोषसा उ-
षसा सूर्येण च सोमं पिबतमश्विना ॥३॥ जुषेथां यज्ञं बोधतं
हवस्य मे विश्वेह देवौ सवनाव गच्छतं। सजोषसा उषसा सूर्येण
चेषं नो वोळ्हमश्विना ॥४॥ स्तोमं जुषेथां युवशेव कन्यनां वि-
श्वेह देवौ सवनाव गच्छतं। सजोषसा उषसा सूर्येण चेषं नो
वोळ्हमश्विना ॥५॥ गिरो जुषेथामध्वरं जुषेथां विश्वेह देवौ
सवनाव गच्छतं। सजोषसा उषसा सूर्येण चेषं नो वोळ्हम-
श्विना ॥६॥१४॥ हारिद्रवेव पतथो वनेदुप सोमं सुतं महिषेवाव
गच्छथः। सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥७॥
हंसाविव पतथो अध्वगाविव सोमं सुतं महिषेवाव गच्छथः।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥८॥ श्येनाविव
पतथो हव्यदातये सोमं सुतं महिषेवाव गच्छथः। सजोषसा
उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥९॥ पिबतं च तृष्णुतं चा
च गच्छतं प्रजां च धत्तं द्रविणं च धत्तं। सजोषसा उषसा सूर्येण
चोर्जं नो धत्तमश्विना ॥१०॥ जयतं च प्र स्तुतं च प्र चावतं प्रजां
च धत्तं द्रविणं च धत्तं। सजोषसा उषसा सूर्येण चोर्जं नो धत्तम-
श्विना ॥११॥ हतं च शत्रून्यततं च मित्रिणः प्रजां च धत्तं द्रविणं च
धत्तं। सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥१२॥१५॥

मित्रावरुणवंता उत धर्मवंता मरुत्वंता जरितुर्गच्छथो हवं। सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१३॥ अंगिरस्वंता उत विष्णुवंता मरुत्वंता जरितुर्गच्छथो हवं। सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१४॥ ऋभुमंता वृषणा वाजवंता मरुत्वंता जरितुर्गच्छथो हवं। सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१५॥ ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतममीवाः। सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१६॥ क्षत्रं जिन्वतमुत जिन्वतं नॄन्हतं रक्षांसि सेधतममीवाः। सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१७॥ धेनूर्जिन्वतमुत जिन्वतं विशो हतं रक्षांसि सेधतममीवाः। सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१८॥१६॥ अत्रेरिव शृणुतं पूर्व्यस्तुतिं श्यावाश्वस्य सुन्वतो मदच्युता। सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यं ॥१९॥ सर्गाँ इव सृजतं सुष्टुतीरुप श्यावाश्वस्य सुन्वतो मदच्युता। सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यं ॥२०॥ रश्मीँरिव यच्छतमध्वराँ उप श्यावाश्वस्य सुन्वतो मदच्युता। सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यं ॥२१॥ अर्वाग्रथं नि यच्छतं पिबतं सोम्यं मधु। आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२२॥ नमोवाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये। आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२३॥ स्वाहाकृतस्य तृंपतं सुतस्य देवावंधसः। आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२४॥१७॥

॥ ३६ ॥ १–७ श्यावाश्वः ॥ इंद्रः ॥ १–६ शक्वरी । ७ महापंक्तिः ॥

॥३६॥ अवितासि सुन्वतो वृक्तबर्हिषः पिबा सोमं मदाय कं
शतक्रतो । यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः
समप्सुजिन्मरुत्वाँ इंद्र सत्पते ॥१॥ प्राव स्तोतारं मघवन्नव त्वां
पिबा सोमं मदाय कं शतक्रतो । यं ते भागमधारयन्विश्वाः सेहानः
पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र सत्पते ॥२॥ ऊर्जा देवाँ
अवस्योजसा त्वां पिबा सोमं मदाय कं शतक्रतो । यं ते भागमधा-
रयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र सत्पते
॥३॥ जनिता दिवो जनिता पृथिव्याः पिबा सोमं मदाय कं शत-
क्रतो । यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः सम-
प्सुजिन्मरुत्वाँ इंद्र सत्पते ॥४॥ जनिताश्वानां जनिता गवामसि
पिबा सोमं मदाय कं शतक्रतो । यं ते भागमधारयन्विश्वाः सेहानः
पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र सत्पते ॥५॥ अत्रीणां स्तो-
ममद्रिवो महस्कृधि पिबा सोमं मदाय कं शतक्रतो । यं ते भाग-
मधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र
सत्पते ॥६॥ श्यावाश्वस्य सुन्वतस्तथा शृणु यथाशृणोरत्रेः कर्मा-
णि कृण्वतः । प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इंद्र ब्रह्माणि
वर्धयन् ॥७॥१८॥

॥ ३७ ॥ १–७ श्यावाश्वः ॥ इंद्रः ॥ १ अतिजगती । २–७ महापंक्तिः ॥

॥३७॥ प्रेदं ब्रह्म वृत्रतूर्येष्वाविथ प्र सुन्वतः शचीपत इंद्र
विश्वाभिरूतिभिः । माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा
सोमस्य वज्रिवः ॥१॥ सेहान उग्र पृतना अभि द्रुहः शची-
पत इंद्र विश्वाभिरूतिभिः । माध्यंदिनस्य सवनस्य वृत्रहन्न-

नेद्य पिबा सोमस्य वज्रिवः ॥२॥ एकराळस्य भुवनस्य राजसि
शचीपत इंद्र विश्वाभिरूतिभिः । माध्यंदिनस्य सवनस्य वृत्र-
हन्ननेद्य पिबा सोमस्य वज्रिवः ॥३॥ सस्थावाना यवयसि त्व-
मेक इच्छचीपत इंद्र विश्वाभिरूतिभिः । माध्यंदिनस्य सवनस्य
वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥४॥ क्षेमस्य च प्रयुजश्च
त्वमीशिषे शचीपत इंद्र विश्वाभिरूतिभिः । माध्यंदिनस्य सव-
नस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥५॥ क्षत्राय त्वम-
वसि न त्वमाविथ शचीपत इंद्र विश्वाभिरूतिभिः । माध्यंदि-
नस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥६॥
श्यावाश्वस्य रेभतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्व-
तः । प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इंद्र क्षत्राणि वर्ध-
यन् ॥७॥१९॥

॥ ३८ ॥ १–१० श्यावाश्वः ॥ इंद्राग्नी ॥ गायत्री ॥

॥३८॥ यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु । इंद्राग्नी
तस्य बोधतं ॥१॥ तोशासा रथयावाना वृत्रहणापराजिता ।
इंद्राग्नी तस्य बोधतं ॥२॥ इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः ।
इंद्राग्नी तस्य बोधतं ॥३॥ जुषेथां यज्ञमिष्टये सुतं सोमं
सधस्तुती । इंद्राग्नी आ गतं नरा ॥४॥ इमा जुषेथां सवना ये-
भिर्हव्यान्यूहथुः । इंद्राग्नी आ गतं नरा ॥५॥ इमां गायत्रवर्तनिं
जुषेथां सुष्टुतिं मम । इंद्राग्नी आ गतं नरा ॥६॥२०॥ प्रातर्याव-
भिरा गतं देवेभिर्जेन्यावसू । इंद्राग्नी सोमपीतये ॥७॥ श्या-
वाश्वस्य सुन्वतोऽत्रीणां शृणुतं हवं । इंद्राग्नी सोमपीतये ॥८॥
एवा वामह्व ऊतये यथाहुवंत मेधिराः । इंद्राग्नी सोम-

पीतये ॥ ९ ॥ आहं सरस्वतीवतोरिंद्राग्न्योरवो वृणे । याभ्यां गायत्रमृच्यते ॥ १० ॥ २१ ॥

॥ ३९ ॥ १–१० नाभाकः काण्वः ॥ अग्निः ॥ महापंक्तिः ॥

॥ ३९ ॥ अग्निमस्तोष्यृग्मियमग्निमीळा यजध्यै । अग्निर्देवाँ अनक्तु न उभे हि विदथे कविरंतश्चरति दूत्यं१ नभंतामन्यके समे ॥ १ ॥ न्यग्ने नव्यसा वचस्तनूषु शंसमेषां । न्यराती रराव्णां विश्वा अर्यो अरातीरितो युच्छंत्वामुरो नभंतामन्यके समे ॥ २ ॥ अग्ने मन्मानि तुभ्यं कं घृतं न जुह्व आसनि । स देवेषु प्र चिकिद्धि त्वं ह्यसि पूर्व्यः शिवो दूतो विवस्वतो नभंतामन्यके समे ॥ ३ ॥ तत्तदग्निर्वयो दधे यथायथा कृपण्यति । ऊर्जाहुतिर्वसूनां शं च योश्च मयो दधे विश्वस्यै देवहूत्यै नभंतामन्यके समे ॥ ४ ॥ स चिकेत सहीयसाग्निश्चित्रेण कर्मणा । स होता शश्वतीनां दक्षिणाभिरभीवृत इनोति च प्रतीव्यं१ नभंतामन्यके समे ॥ ५ ॥ २२ ॥ अग्निर्जाता देवानामग्निर्वेद मर्तानामपीच्यं । अग्निः स द्रविणोदा अग्निर्द्वारा व्यूर्णुते स्वाहुतो नवीयसा नभंतामन्यके समे ॥ ६ ॥ अग्निर्देवेषु संवसुः स विक्षु यज्ञियास्वा । स मुदा काव्या पुरु विश्वं भूमेव पुष्यति देवो देवेषु यज्ञियो नभंतामन्यके समे ॥ ७ ॥ यो अग्निः सप्तमानुषः श्रितो विश्वेषु सिंधुषु । तमागन्म त्रिपस्त्यं मंधातुर्दस्युहंतममग्निं यज्ञेषु पूर्व्यं नभंतामन्यके समे ॥ ८ ॥ अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः । स त्रीँरेकादशाँ इह यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतो नभंतामन्यके समे ॥ ९ ॥ त्वं नो अग्न आयुषु त्वं देवेषु पूर्व्य वस्व

एकं इद्ज्यसि। त्वामापः परिस्रुतः परि यंति स्वसेतवो नभंतामन्यके समे ॥ १० ॥ २३ ॥

॥ ४० ॥ १–१२ नाभाकः काण्वः ॥ इंद्राग्नी ॥ १. ३–११ महापंक्तिः । २ शक्करी । १२ त्रिष्टुप् ॥

॥ ४० ॥ इंद्राग्नी युवं सु नः सहंता दासथो रयिं। येन दृळ्हा समत्स्वा वीळु चित्साहिषीमह्यग्निर्वनेव वात इन्नभंतामन्यके समे ॥ १ ॥ नहि वां वव्रयामहेऽथेंद्रमिद्यजामहे शविष्ठं नृणां नरं। स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभंतामन्यके समे ॥ २ ॥ ता हि मध्यं भराणामिंद्राग्नी अधिक्षितः। ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतमश्नुतं नरा नभंतामन्यके समे ॥ ३ ॥ अभ्यर्च नभाकवदिंद्राग्नी यजसा गिरा। ययोर्विश्वमिदं जगदियं द्यौः पृथिवी मह्युपस्थे बिभृतो वसु नभंतामन्यके समे ॥ ४ ॥ प्र ब्रह्माणि नभाकवदिंद्राग्निभ्यामिरज्यत। या सप्तबुध्नमर्णवं जिह्मबारमपोर्णुत इंद्र ईशान ओजसा नभंतामन्यके समे ॥ ५ ॥ अपि वृश्च पुराणवद्व्रततेरिव गुष्पितमोजो दासस्य दंभय। वयं तदस्य संभृतं वस्विंद्रेण वि भजेमहि नभंतामन्यके समे ॥ ६ ॥ २४ ॥ यदिंद्राग्नी जना इमे विह्वयंते तना गिरा। अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभंतामन्यके समे ॥ ७ ॥ या नु श्वेताववो दिव उच्चरात उप द्युभिः। इंद्राग्न्योरनु व्रतमुहाना यंति सिंधवो यान्त्सीं बंधादमुंचतां नभंतामन्यके समे ॥ ८ ॥ पूर्वीष्ट इंद्रोपमातयः पूर्वीरुत प्रशस्तयः सूनो हिन्वस्य हरिवः। वस्वो वीरस्यापृचो या नु साधंत नो धियो नभंतामन्यके समे ॥ ९ ॥ तं शिशीता सुवृक्तिभिस्त्वेषं सत्वानमृग्मियं।

उतो नु चिद्य ओजसा शुष्णस्यांडानि भेदति जेषत्स्वर्वतीरपो
नभंतामन्यके समे ॥१०॥ तं शिशीता स्वध्वरं सत्यं सत्वानमृत्वियं ।
उतो नु चिद्य ओहत आंडा शुष्णस्य भेदत्यजैः स्वर्वतीरपो नभं-
तामन्यके समे ॥११॥ एवेंद्राग्निभ्यां पितृवन्नवीयो मंधातृवदं-
गिरस्वदवाचि । त्रिधातुना शर्मणा पातमस्मान्वयं स्याम पत-
यो रयीणां ॥१२॥२५॥

॥ ४१ ॥ १–१० नाभाकः काण्वः ॥ वरुणः ॥ महापंक्तिः ॥

॥४१॥ अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्योऽर्चा वि-
दुष्टरेभ्यः । यो धीता मानुषाणां पश्वो गा इव रक्षति नभंता-
मन्यके समे ॥१॥ तमू षु समना गिरा पितॄणां च मन्मभिः ।
नाभाकस्य प्रशस्तिभिर्यः सिंधूनामुपोदये सप्तस्वसा स मध्यमो
नभंतामन्यके समे ॥२॥ स क्षपः परि षस्वजे न्यु१स्रो मा-
यया दधे स विश्वं परि दर्शतः । तस्य वेनीरनु व्रतमुषस्तिस्रो
अवर्धयन्नभंतामन्यके समे ॥३॥ यः ककुभो निधारयः पृथि-
व्यामधि दर्शतः । स माता पूर्व्यं पदं तद्वरुणस्य सप्त्यं स हि
गोपा इवेर्यो नभंतामन्यके समे ॥४॥ यो धर्ता भुवनानां य
उस्राणामपीच्या३ वेद नामानि गुह्या । स कविः काव्या पुरु
रूपं द्यौरिव पुष्यति नभंतामन्यके समे ॥५॥२६॥ यस्मिन्वि-
श्वानि काव्या चक्रे नाभिरिव श्रिता । त्रितं जूती सपर्यत व्रजे
गावो न संयुजे युजे अश्वाँ अयुक्षत नभंतामन्यके समे ॥६॥ य
आस्वत्क आशये विश्वा जातान्येषां । परि धामानि मर्मृशद्व-
रुणस्य पुरो गये विश्वे देवा अनु व्रतं नभंतामन्यके समे ॥७॥
स समुद्रो अपीच्यस्तुरो द्यामिव रोहति नि यदासु यजुर्दधे ।

स माया अर्चिना पदास्तृणान्नाकमारुहन्नभंतामन्यके समे ॥८॥
यस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः । त्रिरुत्तराणि पप्र-
तुर्वरुणस्य ध्रुवं सदः स सप्तानामिरज्यति नभंतामन्यके समे ॥९॥
यः श्वेताँ अधिनिर्णिजश्चक्रे कृष्णाँ अनु व्रता । स धाम पूर्व्यं ममे
यः स्कंभेन वि रोदसी अजो न द्यामधारयन्नभंतामन्यके समे
॥१०॥२७॥

॥४२॥ १–६ नाभाकः काण्व अर्चनाना वा । अथवा १–३ नाभाकः काण्वः । ४–६ नाभाकः काण्व अर्चनाना वा ॥ १–३ वरुणः । ४–६ अश्विनौ ॥ १–३ त्रिष्टुप् । ४–६ अनुष्टुप् ॥

॥४२॥ अस्तभ्नाद्द्यामसुरो विश्ववेदा अमिमीत वरिमाणं
पृथिव्याः । आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य
व्रतानि ॥१॥ एवा वंदस्व वरुणं बृहंतं नमस्या धीरममृतस्य गो-
पां । स नः शर्म त्रिवरूथं वि यंसत्पातं नो द्यावापृथिवी उपस्थे
॥२॥ इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥३॥ आ
वां ग्रावाणो अश्विना धीभिर्विप्रा अचुच्यवुः । नासत्या सोम-
पीतये नभंतामन्यके समे ॥४॥ यथा वामत्रिरश्विना गीर्भिर्विप्रो
अजोहवीत् । नासत्या सोमपीतये नभंतामन्यके समे ॥५॥ एवा
वामह्व ऊतये यथाहुवंत मेधिराः । नासत्या सोमपीतये नभंता-
मन्यके समे ॥६॥२८॥५॥

॥४३॥ १–३३ विरूप आंगिरसः ॥ अग्निः ॥ गायत्री ॥

॥४३॥ इमे विप्रस्य वेधसोऽग्नेरस्तृतयज्वनः । गिरः स्तो-
मास ईरते ॥१॥ अस्मै ते प्रतिहर्यते जातवेदो विचर्षणे । अग्ने
जनामि सुष्टुतिं ॥२॥ आरोका इव घेदह तिग्मा अग्ने तव
त्विषः । दद्भिर्वनानि बप्सति ॥३॥ हरयो धूमकेतवो वा-

तजूता उप द्यवि । यतंते वृथगग्नयः ॥४॥ एते त्ये वृथगग्नयं
इद्धासः समंदृक्षत । उषसामिव केतवः ॥५॥२९॥ कृष्णा रजांसि
पत्सुतः प्रयाणे जातवेदसः । अग्निर्यद्रोधति क्षमि ॥६॥ धासिं
कृण्वान ओषधीर्बप्सदग्निर्न वायति । पुनर्यन्तरुणीरपि
॥७॥ जिह्वाभिरह नंनमदर्चिषा जंजणाभवन् । अग्निर्वनेषु
रोचते ॥८॥ अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे
सञ्जायसे पुनः ॥९॥ उदग्ने तव तद्घृतादर्ची रोचत आ-
हुतं । निंसानं जुह्वो३ मुखे ॥१०॥३०॥ उक्षान्नाय वशा-
न्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये ॥११॥ उत
त्वा नमसा वयं होतर्वरेण्यक्रतो । अग्ने समिद्भिरीमहे
॥१२॥ उत त्वा भृगुवच्छुचे मनुष्वदग्न आहुत । अंगिरस्वद्ध-
वामहे ॥१३॥ त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता । सखा
सख्या समिध्यसे ॥१४॥ स त्वं विप्राय दाशुषे रयिं देहि सह-
स्रिणं । अग्ने वीरवतीमिषं ॥१५॥३१॥ अग्ने भ्रातः सहस्कृत रो-
हिदश्व शुचिव्रत । इमं स्तोमं जुषस्व मे ॥१६॥ उत त्वाग्ने मम
स्तुतो वाश्राय प्रतिहर्यते । गोष्ठं गाव इवाशत ॥१७॥ तुभ्यं ता
अंगिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे
॥१८॥ अग्निं धीभिर्मनीषिणो मेधिरासो विपश्चितः । अद्म-
सद्याय हिन्विरे ॥१९॥ तं त्वामज्मेषु वाजिनं तन्वाना अग्ने
अध्वरं । वह्निं होतारमीळते ॥२०॥३२॥ पुरुत्रा हि सदृङ्ङसि
विशो विश्वा अनु प्रभुः । समत्सु त्वा हवामहे ॥२१॥ तमी-
ळिष्व य आहुतोऽग्निर्विभ्राजते घृतैः । इमं नः शृणवद्धवं ॥२२॥
तं त्वा वयं हवामहे शृण्वन्तं जातवेदसं । अग्ने घ्नंतमप द्विषः ॥२३॥
विशां राजानमद्भुतमध्यक्षं धर्मणामिमं । अग्निमीळे स उ

अवत् ॥२४॥ अग्निं विश्वायुवेपसं मर्यं न वाजिनं हितं। सप्तिं न वाजयामसि ॥२५॥३३॥ घ्नन्मृध्राण्यप द्विषो दहन्रक्षांसि विश्वहा। अग्ने तिग्मेन दीदिहि ॥२६॥ यं त्वा जनास इंधते मनुष्वदंगिरस्तम। अग्ने स बोधि मे वचः ॥२७॥ यदग्ने दिविजा अस्यप्सुजा वा सहस्कृत। तं त्वा गीर्भिर्हवामहे ॥२८॥ तुभ्यं घेत्ते जना इमे विश्वाः सुक्षितयः पृथक्। धासिं हिन्वंत्यत्तवे ॥२९॥ ते घेदग्ने स्वाध्योऽहा विश्वा नृचक्षसः। तरंतः स्याम दुर्गहा ॥३०॥३४॥ अग्निं मंद्रं पुरुप्रियं शीरं पावकशोचिषं। हृद्भिर्मंद्रेभिरीमहे ॥३१॥ स त्वमग्ने विभावसुः सृजन्त्सूर्यो न रश्मिभिः। शर्धन्तमांसि जिघ्नसे ॥३२॥ तत्ते सहस्व ईमहे दात्रं यन्नोपदस्यंति। त्वदग्ने वार्यं वसु ॥३३॥३५॥

॥४४॥ १–३० विरूप आंगिरसः ॥ अग्निः ॥ गायत्री ॥

॥४४॥ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिं। आस्मिन्हव्या जुहोतन ॥१॥ अग्ने स्तोमं जुषस्व मे वर्धस्वानेन मन्मना। प्रति सूक्तानि हर्य नः ॥२॥ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ आ सादयादिह ॥३॥ उत्ते बृहंतो अर्चयः समिधानस्य दीदिवः। अग्ने शुक्रास ईरते ॥४॥ उप त्वा जुह्वो३ मम घृताचीर्यंतु हर्यत। अग्ने हव्या जुषस्व नः ॥५॥३६॥ मंद्रं होतारमृत्विजं चित्रभानुं विभावसुं। अग्निमीळे स उ श्रवत् ॥६॥ प्रत्नं होतारमीड्यं जुष्टमग्निं कविक्रतुं। अध्वराणामभिश्रियं ॥७॥ जुषाणो अंगिरस्तमेमा हव्यान्यानुषक्। अग्ने यज्ञं नय ऋतुथा ॥८॥ समिधान उ संत्य शुक्रशोच इहा वह। चिकित्वान्दैव्यं जनं ॥९॥ विप्रं होतारमद्रुहं धूमकेतुं

विभावसुं । यज्ञानां केतुमीमहे ॥१०॥३७॥ अग्ने नि पाहि नस्त्वं प्रति ष्म देव रीषतः । भिंधि द्वेषः सहस्कृत ॥११॥ अग्निः प्रत्नेन मन्मना शुंभानस्तन्वं१ स्वां । कविर्विप्रेण वावृधे ॥१२॥ ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषं । अस्मिन्यज्ञे स्वध्वरे ॥१३॥ स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा । देवैरा सत्सि बर्हिषि ॥१४॥ यो अग्निं तन्वो३ दमे देवं मर्तः सपर्यति । तस्मा इद्दीदयद्वसु ॥१५॥३८॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं । अपां रेतांसि जिन्वति ॥१६॥ उदग्ने शुचयस्तव शुक्रा भ्राजंत ईरते । तव ज्योतींष्यर्चयः ॥१७॥ ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः । स्तोता स्यां तव शर्मणि ॥१८॥ त्वामग्ने मनीषिणस्त्वां हिन्वंति चित्तिभिः । त्वां वर्धंतु नो गिरः ॥१९॥ अदब्धस्य स्वधावतो दूतस्य रेभतः सदा । अग्नेः सख्यं वृणीमहे ॥२०॥३९॥ अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः ॥२१॥ उत त्वा धीतयो मम गिरो वर्धंतु विश्वहा । अग्ने सख्यस्य बोधि नः ॥२२॥ यदग्ने स्यामहं त्वं त्वं वा घा स्या अहं । स्युष्टे सत्या इहाशिषः ॥२३॥ वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः । स्याम ते सुमतावपि ॥२४॥ अग्ने धृतव्रताय ते समुद्रायेव सिंधवः । गिरो वाश्रास ईरते ॥२५॥४०॥ युवानं विश्पतिं कविं विश्वादं पुरुवेपसं । अग्निं शुंभामि मन्मभिः ॥२६॥ यज्ञानां रथ्ये वयं तिग्मजंभाय वीळवे । स्तोमैरिषेमाग्नये ॥२७॥ अयमग्ने त्वे अपि जरिता भूतु सत्य । तस्मै पावक मृळय ॥२८॥ धीरो ह्यस्यद्मसद्विप्रो न जागृविः सदा । अग्ने दीदयसि द्यवि ॥२९॥ पुराग्ने दुरितेभ्यः पुरा मृध्रेभ्यः कवे । प्र ण आयुर्वसो तिर ॥३०॥४१॥

॥ ४५ ॥ १–४२ त्रिशोकः काण्वः ॥ १ इंद्राग्नी । २–४२ इंद्रः ॥ गायत्री ॥

॥४५॥ आ घा ये अग्निमिंधते स्तृणंति बर्हिरानुषक्। येषा-
मिंद्रो युवा सखा ॥१॥ बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः।
येषामिंद्रो युवा सखा॥२॥ अयुद्ध इद्युधा वृतं शूर आजति सत्व-
भिः। येषामिंद्रो युवा सखा॥३॥ आ बुंदं वृत्रहा ददे जातः पृच्छद्वि
मातरं। क उग्राः के ह शृण्विरे॥४॥ प्रति त्वा शवसी वदद्गिराव-
प्सो न योधिषत्। यस्ते शत्रुत्वमाचके॥५॥४२॥ उत त्वं मघवञ्छृणु
यस्ते वष्टि ववक्षि तत्। यद्वीळयासि वीळु तत्॥६॥ यदाजिं या-
त्याजिकृदिंद्रः स्वश्वयुरुप। रथीतमो रथीनां॥७॥ वि षु विश्वा अ-
भियुजो वज्रिन्विष्वग्यथा वृह। भवा नः सुश्रवस्तमः॥८॥ अस्माकं
सु रथं पुर इंद्रः कृणोतु सातये। न यं धूर्वंति धूर्तयः ॥९॥ वृज्याम
ते परि द्विषोऽरं ते शक्र दावने। गमेमेदिंद्र गोमतः ॥१०॥४३॥
शनैश्चिद्यंतो अद्रिवोऽश्वावंतः शतग्विनः। विवक्षणा अनेहसः
॥११॥ ऊर्ध्वा हि ते दिवेदिवे सहस्रा सूनृता शता। जरितृभ्यो वि-
मंहते॥१२॥ विद्मा हि त्वा धनंजयमिंद्र दृळ्हा चिदारुजं। आ-
दारिणं यथा गयं॥१३॥ ककुहं चित्त्वा कवे मंदंतु धृष्णविंदवः।
आ त्वा पणिं यदीमहे॥१४॥ यस्ते रेवाँ अदाशुरिः प्रममर्ष म-
घत्तये। तस्य नो वेद आ भर॥१५॥४४॥ इम उ त्वा वि चक्षते स-
खाय इंद्र सोमिनः। पुष्टावंतो यथा पशुं॥१६॥ उत त्वाबधिरं वयं
श्रुत्कर्णं संतमूतये। दूरादिह हवामहे॥१७॥ यच्छुश्रूया इमं हवं
दुर्मर्षं चक्रिया उत। भवेरापिर्नो अंतमः॥१८॥ यच्चिद्धि ते अपि
व्यथिर्जगन्वांसो अमन्महि। गोदा इदिंद्र बोधि नः ॥१९॥ आ
त्वा रंभं न जिव्रयो रर॒भ्मा शवसस्पते। उश्मसि त्वा सधस्थ आ
॥२०॥४५॥ स्तोत्रमिंद्राय गायत पुरुनृम्णाय सत्वने। नकिर्यं वृ-

रणते युधि ॥ २१ ॥ अभि त्वा वृषभा सुते सुतं सृजामि पीतये । तृंपा
व्य॑श्नुही मदं ॥ २२ ॥ मा त्वा मूरा अविष्यवो मोपहस्वान आ
दभन् । माकीं ब्रह्मद्विषो वनः ॥ २३ ॥ इह त्वा गोपरीणसा
महे मंदंतु राधसे । सरो गौरो यथा पिब ॥ २४ ॥ या वृत्रहा परा-
वति सना नवा च चुच्युवे । ता संसत्सु प्र वोचत ॥ २५ ॥ ४६ ॥
अपिबत्कद्रुवः सुतमिंद्रः सहस्रबाह्वे । अत्रादेदिष्ट पौंस्यं ॥ २६ ॥
सत्यं तत्तुर्वशे यदौ विदानो अह्नवाय्यं । व्यानट् तुर्वणे शमि
॥ २७ ॥ तरणिं वो जनानां त्रदं वाजस्य गोमतः । समानमु प्र
शंसिषं ॥ २८ ॥ ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधं । इंद्रं सोमे
सचा सुते ॥ २९ ॥ यः कृंतदिद्वि योन्यं त्रिशोकाय गिरिं पृथुं ।
गोभ्यो गातुं निरेतवे ॥ ३० ॥ ४७ ॥ यद्दधिषे मनस्यसि मंदानः
प्रेदियक्षसि । मा तत्करिंद्र मृळय ॥ ३१ ॥ दभ्रं चिद्धि त्वावतः
कृतं शृण्वे अधि क्षमि । जिगात्विंद्र ते मनः ॥ ३२ ॥ तवेदु ताः
सुकीर्तयोऽसन्नुत प्रशस्तयः । यदिंद्र मृळयासि नः ॥ ३३ ॥
मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु । वधीर्मा शूर
भूरिषु ॥ ३४ ॥ बिभया हि त्वावत उग्रादभिप्रभंगिणः । द-
स्मादहमृतीषहः ॥ ३५ ॥ ४८ ॥ मा सख्युः शूनमा विदे मा
पुत्रस्य प्रभूवसो । आवृत्वद्भूतु ते मनः ॥ ३६ ॥ को नु मर्या
अमिथितः सखा सखायमब्रवीत् । जहा को अस्मदीषते ॥ ३७ ॥
एवारे वृषभा सुतेऽसिन्वन्भूर्यावयः । श्वघ्नीव निवता च-
रन् ॥ ३८ ॥ आ त एता वचोयुजा हरी गृभ्णे सुमद्रथा । यदीं
ब्रह्मभ्य इद्ददः ॥ ३९ ॥ भिंधि विश्वा अप द्विषः परि बाधो
जही मृधः । वसु स्पार्हं तदा भर ॥ ४० ॥ यद्वीळाविंद्र यत्स्थिरे
यत्पर्शाने पराभृतं । वसु स्पार्हं तदा भर ॥ ४१ ॥ यस्य ते

विश्वमानुषो भूरेर्दत्तस्य वेदति। वसु स्पार्हं तदा भर ॥४२॥४९॥३॥

॥४६॥ १–३३ वशोऽश्व्यः ॥ १–२०. २९–३१. ३३ इंद्रः। २१–२४ पृथुश्रवसः कानीतस्य दानस्तुतिः। २५–२८. ३२ वायुः ॥ १ पादनिचृत्। २–४. ६. १०. २३. २९. ३३ गायत्री। ५ ककुप्। ७. ११. १९. २५. २७ बृहती। ८ अनुष्टुप्। ९. २६. २८ सतोबृहती। १२ विपरीता। १३ द्विपदा बृहती। १४ पिपीलिकमध्या। १५ ककुम्न्यंकुशिरा। १६ विराट्। १७ जगती। १८ उपरिष्टाद्बृहती। २० विषमपदा। २१. २२. २४. ३२ पंक्तिः। ३० द्विपदा विराट्। ३१ उष्णिक् ॥

॥४६॥ त्वावतः पुरूवसो वयमिंद्र प्रणेतः। स्मसि स्थातर्हरी-
णां ॥१॥ त्वां हि सत्यमद्रिवो विद्म दातारमिषां। विद्म दातारं
रयीणां ॥२॥ आ यस्य ते महिमानं शतमूते शतक्रतो। गीर्भिर्गृ-
णंति कारवः ॥३॥ सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा। मित्रः
पांत्यद्रुहः ॥४॥ दधानो गोमदश्ववत्सुवीर्यमादित्यजूत एधते। सदा
राया पुरुस्पृहा ॥५॥१॥ तमिंद्रं दानमीमहे शवसानमभीर्वं।
ईशानं राय ईमहे ॥६॥ तस्मिन्हि संत्यूतयो विश्वा अभीरवः सचा।
तमा वहंतु सप्तयः पुरूवसुं मदाय हरयः सुतं ॥७॥ यस्ते मदो वरे-
ण्यो य इंद्र वृत्रहंतमः। य आददिः स्व१र्नृभिर्यः पृतनासु दुष्टरः
॥८॥ यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्वस्ति तरुता। स नः
शविष्ठ सवना वसो गहि गमेम गोमति व्रजे ॥९॥ गव्यो षु णो
यथा पुराश्वयोत रथया। वरिवस्य महामह ॥१०॥२॥ नहि ते
शूर राधसोऽंतं विंदामि सत्रा। दशस्या नो मघवन्नू चिदद्रिवो
धियो वाजेभिराविथ ॥११॥ य ऋष्वः श्रावयत्सखा विश्वेत्स
वेद जनिमा पुरुष्टुतः। तं विश्वे मानुषा युगेंद्रं हवंते तविषं
यतस्रुचः ॥१२॥ स नो वाजेष्ववितां पुरूवसुः पुरःस्थाता।
मघवा वृत्रहा भुवत् ॥१३॥ अभि वो वीरमंधसो मदेषु गाय
गिरा महा विचेतसं। इंद्रं नाम श्रुत्यं शाकिनं वचो यथा
॥१४॥ ददी रेक्णस्तन्वे ददिर्वसु ददिर्वाजेषु पुरुहूत वाजिनं।

नूनमर्थ ॥ १५ ॥ ३ ॥ विश्वेषामिरज्यंतं वसूनां सासह्वांसं चिदस्य
वर्पसः । कृपयतो नूनमत्यर्थं ॥ १६ ॥ महः सु वो अरमिषे स्त-
वामहे मीळ्हुषे अरंगमाय जग्मये । यज्ञेभिर्गीर्भिर्विश्वमनुषां
मरुतामियक्षसि गाये त्वा नमसा गिरा ॥ १७ ॥ ये पातयंते
अज्मभिर्गिरीणां स्नुभिरेषां । यज्ञं महिष्वणीनां सुम्नं तु-
विष्वणीनां प्राध्वरे ॥ १८ ॥ प्रभंगं दुर्मतीनामिंद्र शविष्ठा
भर । रयिमस्मभ्यं युज्यं चोदयन्मते ज्येष्ठं चोदयन्मते ॥ १९ ॥
सनितः सुसनितरुग्र चित्र चेतिष्ठ सूनृत । प्रासहा सम्राट्
सहुरिं सहंतं भुज्युं वाजेषु पूर्व्यं ॥ २० ॥ ४ ॥ आ स एतु य ईवदाँ
अदेवः पूर्तमाददे । यथा चिद्वशो अश्व्यः पृथुश्रवसि कानी-
ते३स्या व्युष्याददे ॥ २१ ॥ षष्टिं सहस्राश्व्यस्यायुतासनमुष्ट्रा-
नां विंशतिं शता । दश श्यावीनां शता दश त्र्यरुषीणां
दश गवां सहस्रा ॥ २२ ॥ दश श्यावा ऋधद्रयो वीतवारास
आशवः । मथ्रा नेमिं नि वावृतुः ॥ २३ ॥ दानासः पृथु-
श्रवसः कानीतस्य सुराधसः । रथं हिरण्ययं ददन्मंहिष्ठः सूरि-
रभूद्वर्षिष्ठमकृत श्रवः ॥ २४ ॥ आ नो वायो महे तने याहि
मखाय पाजसे । वयं हि ते चकृमा भूरि दावने सद्य-
श्चिन्महि दावने ॥ २५ ॥ ५ ॥ यो अश्वेभिर्वहते वस्त उस्रा-
स्त्रिः सप्त सप्ततीनां । एभिः सोमेभिः सोमसुद्भिः सोमपा
दानाय शुक्रपूतपाः ॥ २६ ॥ यो म इमं चिदु त्मनामंदच्चित्रं
दावने । अरट्वे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः ॥ २७ ॥
उचथ्ये३ वपुषि यः स्वराळुत वायो घृतस्नाः । अश्वेषितं
रजेषितं शुनेषितं प्राज्म तदिदं नु तत् ॥ २८ ॥ अध प्रि-
यमिषिराय षष्टिं सहस्रासनं । अश्वानामिन्न वृष्णां ॥ २९ ॥

गावो न यूथमुप यंति वध्रय उप मा यंति वध्रयः ॥३०॥ अध यच्चारथे गणे शतमुष्ट्राँ अचिक्रदत् । अध श्वित्नेषु विंशतिं शता ॥३१॥ शतं दासे बल्बूथे विप्रस्तरुक्ष आ ददे । ते ते वायविमे जना मदंतींद्रगोपा मदंति देवगोपाः ॥३२॥ अध स्या योषणा मही प्रतीची वशमश्व्यं । अधिरुक्मा वि नीयते ॥३३॥ ६॥

॥ ४७ ॥ १–१८ त्रित आप्त्यः ॥ १–१३ आदित्याः । १४–१८ आदित्या उषाश्च ॥ महापंक्तिः ॥

॥४७॥ महि वो महतामवो वरुण मित्र दाशुषे । यमादित्या अभि द्रुहो रक्षथा नेमघं नशदनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१॥ विदा देवा अघानामादित्यासो अपाकृतिं । पक्षा वयो यथोपरि व्य१स्मे शर्म यच्छतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥२॥ व्य१स्मे अधि शर्म तत्पक्षा वयो न यंतन । विश्वानि विश्ववेदसो वरूथ्या मनामहेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥३॥ यस्मा अरासत क्षयं जीवातुं च प्रचेतसः । मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥४॥ परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा । स्यामेदिंद्रस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥५॥७॥ परिह्वृतेदना जनो युष्मादत्तस्य वायति । देवा अदभ्रमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥६॥ न तं तिग्मं चन त्यजो न द्रासदभि तं गुरु । यस्मा उ शर्म सप्रथ आदित्यासो अराध्वमनेहसो व ऊतयः सुऊतयो व ऊतयः ॥७॥ युष्मे देवा अपि ष्मसि युध्यंत इव वर्मसु । यूयं महो न एनसो यूयमर्भादुरुष्यतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥८॥ अदितिर्न उरुष्यत्वदितिः शर्म य-

च्छतु। माता मित्रस्य रेवतोऽर्यम्णो वरुणस्य चानेहसो व ऊतयः सुऊतयो व ऊतयः ॥९॥ यद्देवाः शर्म शरणं यद्भद्रं यदनातुरं। त्रिधातु यद्वरूथ्यं१ तदस्मासु वि यंतनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१०॥८॥ आदित्या अव हि ख्यताधि कूलादिव स्पशः। सुतीर्थमर्वतो यथानु नो नेषथा सुगमनेहसो व ऊतयः सुऊतयो व ऊतयः ॥११॥ नेह भद्रं रक्षस्विने नावयै नोपया उत। गवे च भद्रं धेनवे वीराय च श्रवस्यतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१२॥ यदाविर्यदपीच्यं१ देवासो अस्ति दुष्कृतं। त्रिते तद्विश्वमाप्त्य आरे अस्मद्दधातनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१३॥ यच्च गोषु दुःष्वप्न्यं यच्चास्मे दुहितर्दिवः। त्रिताय तद्विभावर्याप्त्याय परा वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१४॥ निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः। त्रिते दुःष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१५॥९॥ तदन्नाय तदपसे तं भागमुपसेदुषे। त्रिताय च द्विताय चोषो दुःष्वप्न्यं वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१६॥ यथा कलां यथा शफं यथ ऋणं संनयामसि। एवा दुःष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१७॥ अजैष्माद्यासनाम चाभूमानागसो वयं। उषो यस्माद्दुःष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१८॥१०॥

॥४८॥ १—१५ प्रगाथः काण्वः ॥ सोमः ॥ १—४. ६—१५ त्रिष्टुप्। ५ जगती ॥

॥४८॥ स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य। विश्वे यं देवा उत मर्त्यासो मधु ब्रुवंतो अभि सं-

चरंति ॥१॥ अंतश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य । इंदविंद्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ॥२॥ अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् । किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥३॥ शं नो भव हृद आ पीत इंदो पितेव सोम सूनवे सुशेवः । सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ॥४॥ इमे मा पीता यशस उरुष्यवो रथं न गावः समनाह पर्वसु । ते मा रक्षंतु विस्रसश्चरित्रादुत मा स्रामाद्यवयंत्विंदवः ॥५॥११॥ अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः । अथा हि ते मद आ सोम मन्ये रेवाँ इव प्र चरा पुष्टिमच्छ ॥६॥ इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः । सोम राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥७॥ सोम राजन्मृळया नः स्वस्ति तव स्मसि व्रत्यास्तस्य विद्धि । अलर्ति दक्ष उत मन्युरिंदो मा नो अर्यो अनुकामं परा दाः ॥८॥ त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः । यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः ॥९॥ ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः । अयं यः सोमो न्यधाय्यस्मे तस्मा इंद्रं प्रतिरमेम्यायुः ॥१०॥१२॥ अप त्या अस्थुरनिरा अमीवा निरत्रसन्तमिषीचीरभैषुः । आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरंत आयुः ॥११॥ यो न इंदुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश । तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ॥१२॥ त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततंथ । तस्मै

त इंद्रो हविषा विधेम वयं स्याम पतयो रयीणां ॥१३॥ त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः । वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥१४॥ त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः । त्वं न इंद्र ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात् ॥१५॥१३॥६॥

॥ अथ वालखिल्यं ॥

॥ ४९ ॥ १–१० प्रस्कण्वः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥४९॥ अभि प्र वः सुराधसमिंद्रमर्च यथा विदे । यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥१॥ शतानीकेव प्र जिगाति धृष्णुया हंति वृत्राणि दाशुषे । गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥२॥ आ त्वा सुतास इंदवो मदा य इंद्र गिर्वणः । आपो न वज्रिन्नन्वोक्यं१ सरः पृणंति शूर राधसे ॥३॥ अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब । आ यथा मंदसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ॥४॥ आ नः स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः । यं ते स्वधावन्स्वदयंति धेनव इंद्र कण्वेषु रातयः ॥५॥१४॥ उग्रं न वीरं नमसोप सेदिम विभूतिमक्षितावसुं । उद्रीव वज्रिन्नवतो न सिंचते क्षरंतींद्र धीतयः ॥६॥ यद्ध नूनं यद्वा यज्ञे यद्वा पृथिव्यामधि । अतो नो यज्ञमाशुभिर्महेमत उग्र उग्रेभिरा गहि ॥७॥ अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः । येभिरपत्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशे ॥८॥ एतावतस्त ईमह इंद्र सुम्नस्य गोमतः । यथा प्रावो मघवन्मेध्यातिथिं यथा नीपातिथिं

धने॑ ॥ ९ ॥ यथा॒ कण्वे॑ मघवन्त्र॒सद॑स्यवि॒ यथा॑ प॒क्थे दश॑-
व्रजे । यथा॒ गोश॑र्ये॒ अस॑नोर्ऋ॒जिश्व॒नींद्र॒ गोम॒द्धिर॑ण्यवत् ॥ १० ॥ १५ ॥

॥ ५० ॥ १–१० पुष्टिगुः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥ ५० ॥ प्र सु श्रु॒तं सु॒राध॑स॒मर्चा॑ श॒क्रम॒भिष्ट॑ये । यः सु॑न्व॒ते स्तु॑-
व॒ते काम्यं॒ वसु॑ स॒हस्रे॑णेव॒ मंह॑ते ॥ १ ॥ श॒तानी॑का हे॒तयो॑ अस्य
दु॒ष्टरा॒ इंद्र॑स्य स॒मिषो॑ म॒हीः । गि॒रिर्न भु॒ज्मा म॒घव॑त्सु पिन्वते॒ य-
दीं॑ सु॒ता अमं॑दिषुः ॥ २ ॥ यदीं॑ सु॒तास॒ इंद॒वोऽभि प्रि॒यमम॑दिषुः ।
आपो॒ न धा॑यि॒ सव॑नं म॒ आ व॑सो॒ दुघा॑ इ॒वोप॑ दा॒शुषे॑ ॥ ३ ॥ अ॒ने-
हसं॑ वो॒ हव॑मानमू॒तये॒ मध्वः॑ क्षरंति धी॒तयः॑ । आ त्वा॑ वसो॒ हव॑-
मानास॒ इंद॑व॒ उप॑ स्तो॒त्रेषु॑ दधिरे ॥ ४ ॥ आ नः॒ सोमे॑ स्वध्व॒र इ॑या॒-
नो अत्यो॒ न तो॑शते । यं ते॑ स्वदा॒वन्त्स्वदं॑ति गू॒र्तयः॑ पौ॒रे छं॑दयसे
हवं॑ ॥ ५ ॥ १६ ॥ प्र वी॒रमु॒ग्रं विवि॑चिं धन॒स्पृतं॒ विभू॑तिं॒ राध॑सो
म॒हः । उ॒द्रीव॑ वज्रिन्नव॒तो व॑सु॒त्वना सदा॑ पीपेथ दा॒शुषे॑ ॥ ६ ॥ यद्ध॒
नू॒नं प॑रा॒वति॒ यद्वा॑ पृथि॒व्यां दि॒वि । यु॒जा॒न इं॑द्र॒ हरि॑भि॒र्महे॑मत
ऋ॒ष्व ऋ॒ष्वेभि॑रा ग॑हि ॥ ७ ॥ र॒थि॒रासो॒ हर॑यो॒ ये ते॑ अ॒स्रिध॒ ओजो॒
वात॑स्य॒ पिप्र॑ति । येभि॒र्नि दस्युं॒ मनु॑षो नि॒घोष॑यो॒ येभिः॒ स्वः॑
परी॑यसे ॥ ८ ॥ ए॒तावं॑तस्ते वसो वि॒द्याम॑ शूर॒ नव्य॑सः । यथा॒ प्राव॒
एत॑शं॒ कृत्व्ये॒ धने॒ यथा॒ वशं॒ दश॑व्रजे ॥ ९ ॥ यथा॒ कण्वे॑ मघव॒न्मेधे॑
अध्व॒रे दी॒र्घनी॑थे॒ दमू॑नसि । यथा॒ गोश॑र्ये॒ असि॑षासो अद्रिवो॒
मयि॑ गो॒त्रं ह॑रि॒श्रियं॑ ॥ १० ॥ १७ ॥

॥ ५१ ॥ १–१० श्रुष्टिगुः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥ ५१ ॥ यथा॒ मनौ॒ सांव॑रणौ॒ सोम॑मिं॒द्रापि॑बः सु॒तं । नीपा॑-

तिथौ मघवन्मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा ॥ १ ॥ पार्षद्वाणः प्रस्कण्वं समसादयच्छयानं जिव्रिमुद्धितं । सहस्राण्यसिषासद्गवामृषिस्त्वोतो दस्यवे वृकः ॥ २ ॥ य उक्थेभिर्न विंधते चिकिद्य ऋषिचोदनः । इंद्रं तमच्छा वद नव्यस्या मत्यरिषंतं न भोजसे ॥ ३ ॥ यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे । स त्वि१मा विश्वा भुवनानि चिक्रददादिज्जनिष्ट पौंस्यं ॥ ४ ॥ यो नो दाता वसूनामिंद्रं तं हूमहे वयं । विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ॥ ५ ॥ १८ ॥ यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते । तं त्वा वयं मघवन्निंद्र गिर्वणः सुतावंतो हवामहे ॥ ६ ॥ कदा चन स्तरीरसि नेंद्र सश्चसि दाशुषे । उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ ७ ॥ प्र यो ननक्षे अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन् । यदेदस्तंभीत्प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवः ॥ ८ ॥ यस्यायं विश्व आर्यो दासः शेवधिपा अरिः । तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ ९ ॥ तुरण्यवो मधुमंतं घृतश्चुतं विप्रासो अर्कमानृचुः । अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इंदवः ॥ १० ॥ १९ ॥

॥ ५२ ॥ १-१० आयुः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥ ५२ ॥ यथा मनौ विवस्वति सोमं शक्रापिबः सुतं । यथा त्रिते छंद इंद्र जुजोषस्यायौ मादयसे सचा ॥ १ ॥ पृषध्रे मेध्ये मातरिश्वनींद्र सुवाने अमंदथाः । यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजूनसि ॥ २ ॥ य उक्था केवला दधे यः सोमं धृषितापिबत् । यस्मै विष्णुस्त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः ॥ ३ ॥ यस्य त्वमिंद्र स्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो ।

तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः ॥४॥ यो नो
दाता स नः पिता महाँ उग्र ईशानकृत् । अयामन्नुग्रो मघवा पु-
रूवसुर्गोरश्वस्य प्र दातु नः ॥५॥२०॥ यस्मै त्वं वसो दानाय मंहसे
स रायस्पोषमिन्वति । वसूयवो वसुपतिं शतक्रतुं स्तोमैरिंद्रं ह-
वामहे ॥६॥ कदा चन प्र युच्छस्युभे नि पासि जन्मनी । तुरीया-
दित्य हवनं त इंद्रियमा तस्थावमृतं दिवि ॥७॥ यस्मै त्वं मघ-
वन्निंद्र गिर्वणः शिक्षो शिक्षसि दाशुषे । अस्माकं गिर उत सुष्टु-
तिं वसो कण्ववच्छृणुधी हवं ॥८॥ अस्तावि मन्म पूर्व्यं ब्रह्मेंद्राय
वोचत । पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥९॥
समिंद्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यं । सं शुक्रासः
शुचयः सं गवाशिरः सोमा इंद्रममंदिषुः ॥१०॥२१॥

॥ ५३ ॥ १-८ मेध्यः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥५३॥ उपमं त्वा मघोनां ज्येष्ठं च वृषभाणां । पूर्भित्तमं
मघवन्निंद्र गोविदमीशानं राय ईमहे ॥१॥ य आयुं कुत्समं-
तिथिग्वमर्दयो वावृधानो दिवेदिवे । तं त्वा वयं हर्यश्वं शत-
क्रतुं वाजयंतो हवामहे ॥२॥ आ नो विश्वेषां रसं मध्वः सिं-
चंत्वद्रयः । ये परावति सुन्विरे जनेष्वा ये अर्वावतींदवः ॥३॥
विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वंत्वा वसु ।
शीष्टेषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृंपसि ॥४॥२२॥
इंद्र नेदीय एदिहि मितमेधाभिरूतिभिः । आ शंतम शंत-
माभिरभिष्टिभिरा स्वापे स्वापिभिः ॥५॥ आजितुरं सत्प-
तिं विश्वचर्षणिं कृधि प्रजास्वाभगं । प्र सू तिरा शची-
भिर्ये त उक्थिनः क्रतुं पुनत आनुषक् ॥६॥ यस्ते सा-

धिष्ठोऽवसे ते स्याम भरेषु ते। वयं होत्राभिरुत देवहूतिभिः सस-
वांसो मनामहे ॥७॥ अहं हि ते हरिवो ब्रह्म वाजयुराजिं यामि
सदोतिभिः। त्वामिदेव तममे समश्वयुर्गव्युरग्रे मथीनां ॥८॥२३॥

॥५४॥ १–८ मातरिश्वा काण्वः ॥ १.२.५–८ इंद्रः । ३.४ विश्वे देवाः ॥ प्रागाथं ॥

॥५४॥ एतत्त इंद्र वीर्यं गीर्भिर्गृणंति कारवः। ते स्तोभंत ऊर्ज-
मावन्घृतश्चुतं पौरासो नक्षन्धीतिभिः ॥१॥ नक्षंत इंद्रमवसे सुकृ-
त्यया येषां सुतेषु मंदसे। यथा संवर्ते अमदो यथा कृश एवास्मे
इंद्र मत्स्व ॥२॥ आ नो विश्वे सजोषसो देवासो गंतनोप नः।
वसवो रुद्रा अवसे न आ गमञ्छृण्वंतु मरुतो हवं ॥३॥ पूषा
विष्णुर्हवनं मे सरस्वत्यवंतु सप्त सिंधवः। आपो वातः पर्वतासो
वनस्पतिः शृणोतु पृथिवी हवं ॥४॥२४॥ यदिंद्र राधो अस्ति ते
माघोनं मघवत्तम। तेन नो बोधि सधमाद्यो वृधे भगो दानाय
वृत्रहन् ॥५॥ आजिपते नृपते त्वमिद्धि नो वाज आ वक्षि सुक्रतो।
वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृण्विरे ॥६॥ संति
ह्य१र्य आशिष इंद्र आयुर्जनानां। अस्मान्नक्षस्व मघवन्नुपावसे
धुक्षस्व पिप्युषीमिषं ॥७॥ वयं त इंद्र स्तोमेभिर्विधेम त्वमस्माकं
शतक्रतो। महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय
॥८॥२५॥

॥५५॥ १–५ कृशः काण्वः ॥ प्रस्कण्वस्य दानस्तुतिः ॥ १.२.४ गायत्री । ३.५ अनुष्टुप् ॥

॥५५॥ भूरीदिंद्रस्य वीर्यं१ व्यख्यमभ्यायति। राधस्ते दस्यवे
वृक ॥१॥ शतं श्वेतास उक्षणो दिवि तारो न रोचंते। मह्ना
दिवं न तस्तभुः ॥२॥ शतं वेणूञ्छतं शुनः शतं चर्माणि म्ला-

तानि। शतं मे बल्बजस्तुका अरुषीणां चतुःशतं॥३॥ सुदेवाः स्थ
काण्वायना वयोवयो विचरंतः। अश्वासो न चंक्रमत॥४॥ आ-
दित्साप्तस्य चर्किरन्नानूनस्य महि श्रवः। श्यावीरतिध्वसन्पथ-
श्चक्षुषा चन संनशे॥५॥२६॥

॥ ५६ ॥ १–५ पृषध्रः काण्वः ॥ १–४ प्रस्कण्वस्य दानस्तुतिः । ५ अग्निसूर्यौ ॥
१–४ गायत्री । ५ पंक्तिः ॥

॥५६॥ प्रति ते दस्यवे वृक राधो अदर्श्यह्रयं। द्यौर्न प्रथिना श-
वः॥१॥ दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः। नित्याद्रायो अ-
मंहत॥२॥ शतं मे गर्दभानां शतमूर्णावतीनां। शतं दासाँ अति
स्रजः॥३॥ तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता। अश्वाना-
मिन्न यूथ्यां॥४॥ अचेत्यग्निश्चिकितुर्हव्यवाट्स सुमद्रथः। अग्निः शु-
क्रेण शोचिषा बृहत्सूरो अरोचत दिवि सूर्यो अरोचत॥५॥२७॥

॥ ५७ ॥ १–४ मेध्यः काण्वः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥५७॥ युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा।
आगच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः॥१॥ युवां
देवास्त्रय एकादशासः सत्याः सत्यस्य ददृशे पुरस्तात्। अस्माकं
यज्ञं सवनं जुषाणा पातं सोममश्विना दीद्यग्नी॥२॥ पनाय्यं
तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः। सहस्रं शंसा
उत ये गविष्टौ सर्वाँ इत्ताँ उप यात पिबध्यै॥३॥ अयं वां भागो
निहितो यजत्रेमा गिरो नासत्योप यातं। पिबतं सोमं मधुमं-
तमस्मे प्र दाश्वांसमवतं शचीभिः॥४॥२८॥

॥ ५८ ॥ १–३ मेध्यः काण्वः ॥ १ विश्वे देवा ऋत्विजो वा । २. ३ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥५८॥ यमृत्विजो बहुधा कल्पयंतः सचेतसो यज्ञमिमं वहं-

ति। यो अनूचानो ब्राह्मणो युक्त आसीत्का स्विन्तत्र यजमानस्य संवित् ॥ १॥ एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः। एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वं ॥ २॥ ज्योतिष्मंतं केतुमंतं त्रिचक्रं सुखं रथं सुषदं भूरिवारं। चित्रामघा यस्य योगेऽधिजज्ञे तं वां हुवे अति रिक्तं पिबध्यै ॥ ३॥ २९॥

॥ ५९ ॥ १–७ सुपर्णः काण्वः ॥ इंद्रावरुणौ ॥ जगती ॥

॥ ५९॥ इमानि वां भागधेयानि सिस्रत इंद्रावरुणा प्र महे सुतेषु वां। यज्ञेयज्ञे ह सवना भुरण्यथो यत्सुन्वते यजमानाय शिक्षथः ॥ १॥ निःषिध्वरीरोषधीराप आस्तामिंद्रावरुणा महिमानमाशत। या सिस्रतू रजसः पारे अध्वनो ययोः शत्रुर्नकिरादेव ओहते ॥ २॥ सत्यं तदिंद्रावरुणा कृशस्य वां मध्व ऊर्मिं दुहते सप्त वाणीः। ताभिर्दाश्वांसमवतं शुभस्पती यो वामदब्धो अभि पाति चित्तिभिः ॥ ३॥ घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य। या ह वामिंद्रावरुणा घृतश्चुतस्ताभिर्धत्तं यजमानाय शिक्षतं ॥ ४॥ ३०॥ अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानमिंद्रियं। अस्मान्स्विंद्रावरुणा घृतश्चुतस्त्रिभिः साप्तेभिरवतं शुभस्पती ॥ ५॥ इंद्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे। यानि स्थानान्यसृजंत धीरा यज्ञं तन्वानास्तपसाभ्यपश्यं ॥ ६॥ इंद्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तं। प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः ॥ ७॥ ३१॥

॥ इति वालखिल्यं समाप्तं ॥

॥ ६० ॥ १–२० भर्गः प्रागाथः ॥ अग्निः ॥ प्रागाथं ॥

॥ ६०॥ अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे। आ त्वाम-

नक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥१॥ अच्छा हि
त्वा सहसः सूनो अंगिरः स्रुचश्चरंत्यध्वरे । ऊर्जो नपातं घृत-
केशमीमहेऽग्निं यज्ञेषु पूर्व्यं ॥२॥ अग्ने कविर्वेधा असि होता
पावक यक्ष्यः । मंद्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र म-
न्मभिः ॥३॥ अद्रोघमा वहोशतो यविष्ठ्य देवाँ अजस्र वीतये ।
अभि प्रयांसि सुधिता वसो गहि मंदस्व धीतिभिर्हितः ॥४॥
त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतस्कविः । त्वां विप्रासः समि-
धान दीदिव आ विवासंति वेधसः ॥५॥३२॥ शोचा शोचिष्ठ
दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि । देवानां शर्म-
न्मम संतु सूरयः शत्रूषाहः स्वग्नयः ॥६॥ यथा चिद्वृद्धमत-
समग्ने संजूर्वसि क्षमि । एवा दह मित्रमहो यो अस्मध्रुग्दु-
र्मन्मा कश्च वेनति ॥७॥ मा नो मर्ताय रिपवे रक्षस्विने
माघशंसाय रीरधः । अस्रेधद्भिस्तरणिभिर्यविष्ठ्य शिवेभिः
पाहि पायुभिः ॥८॥ पाहि नो अग्न एकया पाह्युत द्विती-
यया । पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥९॥
पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव । त्वा-
मिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥१०॥३३॥ आ
नो अग्ने वयोवृधं रयिं पावक शंस्यं । रास्वा च न उपमाते
पुरुस्पृहं सुनीती स्वयशस्तरं ॥११॥ येन वंसाम पृतनासु शर्ध-
तस्तरंतो अर्य आदिशः । स त्वं नो वर्ध प्रयसा शचीवसो
जिन्वा धियो वसुविदः ॥१२॥ शिशानो वृषभो यथाग्निः शृंगे
दविध्वत् । तिग्मा अस्य हनवो न प्रतिधृषे सुजंभः सहसो यहुः
॥१३॥ नहि ते अग्ने वृषभ प्रतिधृषे जंभासो यद्वितिष्ठसे । स त्वं
नो होतः सुहुतं हविष्कृधि वंस्वा नो वार्या पुरु ॥१४॥ शेषे

वनेषु माचोः सं त्वा मर्तास इंधते। अतंद्रो हव्या वहसि हविष्कृत आदिद्देवेषु राजसि॥१५॥३४॥ सप्त होतारस्तमिदीळते त्वाग्ने सुत्यजमह्रयं। भिनत्स्यद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति ॥१६॥ अग्निमग्निं वो अध्रिगुं हुवेम वृक्तबर्हिषः। अग्निं हितप्रयसः शश्वतीष्वा होतारं चर्षणीनां॥१७॥ केतेन शर्मन्त्सचते सुषामण्यग्ने तुभ्यं चिकित्वना। इषण्यया नः पुरुरूपमा भर वाजं नेदिष्ठमूतये॥१८॥ अग्ने जरितर्विश्पतिस्तेपानो देव रक्षसः। अप्रोषिवान्गृहपतिर्महाँ असि दिवस्पायुर्दुरोणयुः॥१९॥ मा नो रक्ष आ वेशीदाघृणीवसो मा यातुर्यातुमावतां। परोगव्यूत्यनिरामप क्षुधमग्ने सेध रक्षस्विनः॥२०॥३५॥

॥ ६१ ॥ १–१८ भर्गः प्रागाथः ॥ इंद्रः ॥ प्रागाथं ॥

॥६१॥ उभयं शृणवच्च न इंद्रो अर्वागिदं वचः। सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत्॥१॥ तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः। उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः॥२॥ आ वृषस्व पुरूवसो सुतस्येंद्रांधसः। विद्मा हि त्वा हरिवः पृत्सु सासहिमधृष्टं चिद्दधृष्वणिं॥३॥ अप्रामिसत्य मघवन्तथेदसदिंद्र क्रत्वा यथा वशः। सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यंतो अद्रिवः॥४॥ शग्ध्यू३षु शचीपत इंद्र विश्वाभिरूतिभिः। भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥५॥३६॥ पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः। नकिर्हि दानं परिमर्धिषत्त्वे यद्यद्यामि तदा भर॥६॥ त्वं ह्येहि चेरवे विदा भगं वसुत्तये। उद्वावृषस्व मघव-

न्गविष्टय उदिंद्राश्वमिष्टये ॥७॥ त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे । आ पुरंदरं चकृम विप्रवचस इंद्रं गायंतोऽवसे ॥८॥ अविप्रो वा यदविधद्विप्रो वेंद्र ते वचः । स प्र ममंदत्त्वाया शतक्रतो प्राचामन्यो अहंसन ॥९॥ उग्रबाहुर्म्रक्षकृत्वा पुरंदरो यदि मे शृणवद्धवं । वसूयवो वसुपतिं शतक्रतुं स्तोमैरिंद्रं हवामहे ॥१०॥३७॥ न पापासो मनामहे नारायासो न जळ्हवः । यदिन्न्विंद्रं वृषणं सचा सुते सखायं कृणवामहै ॥११॥ उग्रं युयुज्म पृतनासु सासहिमृणकातिमदाभ्यं । वेदा भृमं चित्सनिता रथीतमो वाजिनं यमिदू नशत् ॥१२॥ यत इंद्र भयामहे ततो नो अभयं कृधि । मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि ॥१३॥ त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः । तं त्वा वयं मघवन्निंद्र गिर्वणः सुतावंतो हवामहे ॥१४॥ इंद्रः स्पळुत वृत्रहा परस्पा नो वरेण्यः । स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥१५॥३८॥ त्वं नः पश्चादधरादुत्तरात्पुर इंद्र नि पाहि विश्वतः । आरे अस्मत्कृणुहि दैव्यं भयमारे हेतीरदेवीः ॥१६॥ अद्याद्या श्वःश्व इंद्र त्रास्व परे च नः । विश्वा च नो जरितॄन्त्सत्पते अहा दिवा नक्तं च रक्षिषः ॥१७॥ प्रभंगी शूरो मघवा तुवीमघः संमिश्लो वीर्याय कं । उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥१८॥३९॥

॥ ६२ ॥ १-१२ प्रगाथः काण्वः ॥ इंद्रः ॥ १-६. १०-१२ पंक्तिः । ७-९ बृहती ॥

॥६२॥ प्रो अस्मा उपस्तुतिं भरता यज्जुजोषति । उक्थैरिंद्रस्य माहिनं वयो वर्धंति सोमिनो भद्रा इंद्रस्य रातयः ॥१॥ अयुजो असमो नृभिरेकः कृष्टीरयास्यः । पूर्वीरति प्र वावृधे

विश्वा जातान्योजसा भद्रा इंद्रस्य रातयः ॥२॥ अहितेन चिदर्वता
जीरदानुः सिषासति । प्रवाच्यमिंद्र तत्तव वीर्याणि करिष्यतो
भद्रा इंद्रस्य रातयः ॥३॥ आ याहि कृणवाम त इंद्र ब्रह्माणि वर्ध-
ना । येभिः शविष्ठ चाकनो भद्रमिह श्रवस्यते भद्रा इंद्रस्य रातयः
॥४॥ धृषतश्चिद्धृषन्मनः कृणोषींद्र यत्त्वं । तीव्रैः सोमैः सपर्यतो
नमोभिः प्रतिभूषतो भद्रा इंद्रस्य रातयः ॥५॥ अव चष्ट ऋचीष-
मोऽवताँ इव मानुषः । जुष्ट्वी दक्षस्य सोमिनः सखायं कृणुते युजं
भद्रा इंद्रस्य रातयः ॥६॥४०॥ विश्वे त इंद्र वीर्यं देवा अनु क्रतुं ददुः ।
भुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इंद्रस्य रातयः ॥७॥ गृणे
तदिंद्र ते शव उपमं देवतातये । यद्धंसि वृत्रमोजसा शचीपते भद्रा
इंद्रस्य रातयः ॥८॥ समनेव वपुष्यतः कृणवन्मानुषा युगा । विदे
तदिंद्रश्चेतनमध श्रुतो भद्रा इंद्रस्य रातयः ॥९॥ उज्जातमिंद्र ते
शव उत्त्वामुत्तव क्रतुं । भूरिगो भूरि वावृधुर्मघवन्तव शर्मणि
भद्रा इंद्रस्य रातयः ॥१०॥ अहं च त्वं च वृत्रहन्त्सं युज्याव सनिभ्य
आ । अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इंद्रस्य रातयः
॥११॥ सत्यमिद्वा उ तं वयमिंद्रं स्तवाम नानृतं । महाँ असुन्वतो
वधो भूरि ज्योतींषि सुन्वतो भद्रा इंद्रस्य रातयः ॥१२॥४१॥

॥ ६३ ॥ १–१२ प्रगाथः काण्वः ॥ १–११ इंद्रः । १२ देवाः ॥ १.४.५.७ अनुष्टुप् ।
२.३.६.८–११ गायत्री । १२ त्रिष्टुप् ॥

॥६३॥ स पूर्व्यो महानां वेनः क्रतुभिरानजे । यस्य द्वारा
मनुष्पिता देवेषु धिय आनजे ॥१॥ दिवो मानं नोत्सदन्त्सो-
मपृष्ठासो अद्रयः । उक्था ब्रह्म च शंस्या ॥२॥ स विद्वाँ अंगि-
रोभ्य इंद्रो गा अवृणोदप । स्तुषे तदस्य पौंस्यं ॥३॥ स प्र-

त्वथा कविवृध इंद्रो वाकस्य वक्षणिः। शिवो अर्कस्य होमन्य-
स्मत्रा गंत्ववसे॥४॥ आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः।
श्वात्रमर्का अनूषतेंद्र गोत्रस्य दावने॥५॥ इंद्रे विश्वानि वीर्या
कृतानि कर्त्वानि च। यमर्का अध्वरं विदुः॥६॥४२॥ यत्पांचज-
न्यया विशेंद्रे घोषा असृक्षत। अस्तृणाद्बर्हणा विपो३र्यो मान-
स्य स क्षयः॥७॥ इयमु ते अनुष्टुतिश्चकृषे तानि पौंस्या। प्रावश्च-
क्रस्य वर्तनिं॥८॥ अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे। यवं
न पश्व आ ददे॥९॥ तद्दधाना अवस्यवो युष्माभिर्दक्षपितरः।
स्याम मरुत्वतो वृधे॥१०॥ बळृत्वियाय धाम्न ऋक्वभिः शूर नो-
नुमः। जेषामेंद्र त्वया युजा॥११॥ अस्मे रुद्रा मेहना पर्वतासो वृ-
त्रहत्ये भरहूतौ सजोषाः। यः शंसते स्तुवते धायि पज्र इंद्रज्येष्ठा
अस्माँ अवंतु देवाः॥१२॥४३॥

॥ ६४ ॥ १—१२ प्रगाथः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥६४॥ उत्त्वा मंदंतु स्तोमाः कृणुष्व राधो अद्रिवः। अव
ब्रह्मद्विषो जहि॥१॥ पदा पणीँरराधसो नि बाधस्व महाँ
असि। नहि त्वा कश्चन प्रति॥२॥ त्वमीशिषे सुतानामिंद्र त्व-
मसुतानां। त्वं राजा जनानां॥३॥ एहि प्रेहि क्षयो दिव्या३घो-
षञ्चर्षणीनां। ओभे पृणासि रोदसी॥४॥ त्यं चित्पर्वतं गिरिं
शतवंतं सहस्रिणं। वि स्तोतृभ्यो रुरोजिथ॥५॥ वयमु त्वा
दिवा सुते वयं नक्तं हवामहे। अस्माकं काममा पृण॥६॥४४॥
क्व१स्य वृषभो युवा तुविग्रीवो अनानतः। ब्रह्मा कस्तं सपर्यति
॥७॥ कस्य स्वित्सवनं वृषा जुजुष्वाँ अव गच्छति। इंद्रं क उ स्वि-
दा चके॥८॥ कं ते दाना असक्षत वृत्रहन्कं सुवीर्या। उक्थे क
उ स्विदंतमः॥९॥ अयं ते मानुषे जने सोमः पूरुषु सूयते। तस्ये-

हि प्र द्रवा पिब ॥१०॥ अयं ते शर्यणावति सुषोमायामधि प्रियः। आर्जीकीये मदिंतमः ॥११॥ तमद्य राधसे महे चारुं मदाय घृष्वये। एहीमिंद्र द्रवा पिब ॥१२॥४५॥

॥६५॥ १–१२ प्रगाथः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥६५॥ यदिंद्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः। आ याहि तूयमाशुभिः ॥१॥ यद्वा प्रस्रवणे दिवो मादयासे स्वर्णरे। यद्वा समुद्रे अंधसः ॥२॥ आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे। इंद्र सोमस्य पीतये ॥३॥ आ त इंद्र महिमानं हरयो देव ते महः। रथे वहंतु बिभ्रतः ॥४॥ इंद्र गृणीष उ स्तुषे महाँ उग्र ईशानकृत्। एहि नः सुतं पिब ॥५॥ सुतावंतस्त्वा वयं प्रयस्वंतो हवामहे। इदं नो बर्हिरासदे ॥६॥४६॥ यच्चिद्धि शश्वतामसींद्र साधारणस्त्वं। तं त्वा वयं हवामहे ॥७॥ इदं ते सोम्यं मध्वधुक्षन्नद्रिभिर्नरः। जुषाण इंद्र तत्पिब ॥८॥ विश्वाँ अर्यो विपश्चितोऽति ख्यस्तूयमा गहि। अस्मे धेहि श्रवो बृहत् ॥९॥ दाता मे पृषतीनां राजा हिरण्यवीनां। मा देवा मघवा रिषत् ॥१०॥ सहस्रे पृषतीनामधि श्चंद्रं बृहत्पृथु। शुक्रं हिरण्यमा ददे ॥११॥ नपातो दुर्गहस्य मे सहस्रेण सुराधसः। श्रवो देवेष्वक्रत ॥१२॥४७॥

॥६६॥ १–१५ कलिः प्रागाथः ॥ इंद्रः ॥ १–१४ प्रागाथं । १५ अनुष्टुप् ॥

॥६६॥ तरोभिर्वो विदद्वसुमिंद्रं सबाध ऊतये। बृहद्गायंतः सुतसोमे अध्वरे हुवे भरं न कारिणं ॥१॥ न यं दुध्रा वरंते न स्थिरा मुरो मदे सुशिप्रमंधसः। य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यं ॥२॥ यः शक्रो मृक्षो अश्व्यो यो वा कीजो हिरण्ययः। स ऊर्वस्य रेजयत्यपावृतिमिंद्रो गव्यस्य वृत्रहा

॥३॥ निखातं चिद्यः पुरुसंभृतं वसूदिद्वपति दाशुषे। वज्री सु-
शिप्रो हर्यश्व इत्करदिंद्रः क्रत्वा यथा वशत् ॥४॥ यद्वावंथ पुरुष्टुत
पुरा चिच्छूर नृणां। वयं तत्त इंद्र सं भरामसि यज्ञमुक्थं तुरं वचः
॥५॥४८॥ सचा सोमेषु पुरुहूत वज्रिवो मदाय द्युक्ष सोमपाः।
त्वमिद्धि ब्रह्मकृते काम्यं वसु देष्ठः सुन्वते भुवः ॥६॥ वयमेनमिदा
ह्योऽपीपेमेह वज्रिणं। तस्मा उ अद्य समना सुतं भरा नूनं भूषत
श्रुते ॥७॥ वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति। सेमं
नः स्तोमं जुजुषाण आ गहींद्र प्र चित्रया धिया ॥८॥ कदू
न्व१स्याकृतमिंद्रस्यास्ति पौंस्यं। केनो नु कं श्रोमतेन न शुश्रुवे
जनुषः परि वृत्रहा ॥९॥ कदू महीरधृष्टा अस्य तविषीः कदु वृ-
त्रघ्नो अस्तृतं। इंद्रो विश्वान्बेकनाटाँ अहर्दृश उत क्रत्वा पणीँर-
भि ॥१०॥४९॥ वयं घा ते अपूर्व्येंद्र ब्रह्माणि वृत्रहन्। पुरूतमासः
पुरुहूत वज्रिवो भृतिं न प्र भरामसि ॥११॥ पूर्वीश्चिद्धि त्वे तु-
विकूर्मिन्नाशसो हवंत इंद्रोतयः। तिरश्चिदर्यः सवना वसो गहि
शविष्ठ श्रुधि मे हवं ॥१२॥ वयं घा ते त्वे इद्विंद्र विप्रा अपि ष्म-
सि। नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता ॥१३॥ त्वं
नो अस्या अमतेरुत क्षुधो३ऽभिशस्तेरव स्पृधि। त्वं न ऊती
तव चित्रया धिया शिक्षा शचिष्ठ गातुवित् ॥१४॥ सोम इद्वः
सुतो अस्तु कलयो मा बिभीतन। अपेदेष ध्वस्मायति स्वयं
घैषो अपायति ॥१५॥५०॥

॥६७॥ १–२१ मत्स्यः सामदो मान्यो वा मैत्रावरुणिर्बहवो वा मत्स्या जालनद्धाः ॥
आदित्याः ॥ गायत्री ॥

॥६७॥ त्यान्नु क्षत्रियाँ अव आदित्यान्याचिषामहे। सु-
मृळीकाँ अभिष्टये ॥१॥ मित्रो नो अत्यंहतिं वरुणः पर्षद-

र्यमा। आदित्यासो यथा विदुः ॥२॥ तेषां हि चित्रमुक्थ्यं१ व-
रूथमस्ति दाशुषे। आदित्यानामरंकृते ॥३॥ महि वो मह-
तामवो वरुण मित्रार्यमन्। अवांस्या वृणीमहे ॥४॥ जीवान्नो
अभि धेतनादित्यासः पुरा हथात्। कद्ध स्थ हवनश्रुतः
॥५॥५१॥ यद्वः श्रांताय सुन्वते वरूथमस्ति यच्छर्दिः। तेना
नो अधि वोचत ॥६॥ अस्ति देवा अंहोरुर्वस्ति रत्नमना-
गसः। आदित्या अद्भुतैनसः ॥७॥ मा नः सेतुः सिषेदयं
महे वृणक्तु नस्परि। इंद्र इद्धि श्रुतो वशी ॥८॥ मा नो
मृचा रिपूणां वृजिनानामविष्यवः। देवा अभि प्र मृ-
क्षत ॥९॥ उत त्वामदिते मह्यहं देव्युप ब्रुवे। सुमृळीकाम-
भिष्टये ॥१०॥५२॥ पर्षि दीने गभीर आँ उग्रपुत्रे जिघांसतः।
माकिस्तोकस्य नो रिषत् ॥११॥ अनेहो न उरुव्रज उरूचि
वि प्रसर्तवे। कृधि तोकाय जीवसे ॥१२॥ ये मूर्धानः क्षितीना-
मदब्धासः स्वयशसः। व्रता रक्षंते अद्रुहः ॥१३॥ ते न आस्नो
वृकाणामादित्यासो मुमोचत। स्तेनं बद्धमिवादिते ॥१४॥ अपो
षु ण इयं शरुरादित्या अप दुर्मतिः। अस्मदेत्वजघ्नुषी ॥१५॥५३॥
शश्वद्धि वः सुदानव आदित्या ऊतिभिर्वयं। पुरा नूनं बुभु-
ज्महे ॥१६॥ शश्वंतं हि प्रचेतसः प्रतियंतं चिदेनसः। देवाः
कृणुथ जीवसे ॥१७॥ तत्सु नो नव्यं सन्यस आदित्या यन्मु-
मोचति। बंधाद्बद्धमिवादिते ॥१८॥ नास्माकमस्ति तत्तर
आदित्यासो अतिष्कदे। यूयमस्मभ्यं मृळत ॥१९॥ मा नो हे-
तिर्विवस्वत आदित्याः कृत्रिमा शरुः। पुरा नु जरसो वधीत्
॥२०॥ वि षु द्वेषो व्यंहतिमादित्यासो वि संहितं। विष्वग्वि
वृहता रपः ॥२१॥५४॥४॥

॥ ६८ ॥ १–१९ प्रियमेधः ॥ १–१३ इंद्रः । १४–१९ ऋक्षाश्वमेधयोर्दानस्तुतिः ॥
१. ४. ७. १० अनुष्टुप् । २. ३. ५. ६. ८. ९. ११–१९ गायत्री ॥

॥६८॥ आ त्वा रथं यथोतये सुम्नाय वर्तयामसि। तुविकूर्मि-
मृतीषहमिंद्र शविष्ठ सत्पते ॥१॥ तुविशुष्म तुविक्रतो शचीवो
विश्वया मते। आ पप्राथ महित्वना ॥२॥ यस्य ते महिना महः
परि ज्मायंतमीयतुः। हस्ता वज्रं हिरण्ययं ॥३॥ विश्वानरस्य
वस्पतिमनानतस्य शवसः। एवैश्च चर्षणीनामूती हुवे रथानां
॥४॥ अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः। नाना हवंत ऊत-
ये ॥५॥१॥ परोमात्रमृचीषममिंद्रमुग्रं सुराधसं। ईशानं चिद्वसू-
नां ॥६॥ तंतमिद्राधसे मह इंद्रं चोदामि पीतये। यः पूर्व्यामनुष्टु-
तिमीशे कृष्टीनां नृतुः ॥७॥ न यस्य ते शवसान सख्यमानंश
मर्त्यः। नकिः शवांसि ते नशत् ॥८॥ त्वोतासस्त्वा युजाप्सु सूर्ये
महद्धनं। जयेम पृत्सु वज्रिवः ॥९॥ तं त्वा यज्ञेभिरीमहे तं गी-
र्भिर्गिर्वणस्तम। इंद्र यथा चिदाविथ वाजेषु पुरुमाय्यं ॥१०॥२॥
यस्य ते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः। यज्ञो वितंतसाय्यः
॥११॥ उरु णस्तन्वे तन उरु क्षयाय नस्कृधि। उरु णो यंधि जी-
वसे ॥१२॥ उरुं नृभ्य उरुं गव उरुं रथाय पंथां। देववीतिं मना-
महे ॥१३॥ उप मा षड् द्वाद्वा नरः सोमस्य हर्ष्या। तिष्ठंति स्वादु-
रातयः ॥१४॥ ऋज्राविंद्रोत आ ददे हरी ऋक्षस्य सूनवि। आ-
श्वमेधस्य रोहिता ॥१५॥३॥ सुरथाँ आतिथिग्वे स्वभीशूँरार्क्षे।
आश्वमेधे सुपेशसः ॥१६॥ षळश्वाँ आतिथिग्व इंद्रोते वधूमतः।
सचा पूतक्रतौ सनं ॥१७॥ ऐषु चेतद्वृषण्वत्यंतर्ऋज्रेष्वरुषी। स्व-
भीशुः कशावती ॥१८॥ न युष्मे वाजबंधवो निनित्सुश्चन
मर्त्यः। अवद्यमधि दीधरत् ॥१९॥४॥

॥ ६९ ॥ १—१८ प्रियमेधः ॥ १—१०. १३—१८ इंद्रः । ११[1] विश्वे देवाः । ११[2]. १२ वरुणः ॥ १. ३. ७—१०. १२—१५ अनुष्टुप् । २ उष्णिक् । ४—६ गायत्री । ११. १६ पंक्तिः । १७. १८ बृहती ॥

॥६९॥ प्रप्र वस्त्रिष्टुभमिषं मंदद्वीरायेंदवे । धिया वो मेधसातये पुरंध्या विवासति ॥१॥ नदं व ओदतीनां नदं योयुवतीनां । पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥२॥ ता अस्य सूददोहसः सोमं श्रीणंति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥३॥ अभि प्र गोपतिं गिरेंद्रमर्च यथा विदे । सूनुं सत्यस्य सत्पतिं ॥४॥ आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि । यत्राभि संनवामहे ॥५॥५॥ इंद्राय गाव आशिरं दुदुह्रे वज्रिणे मधु । यत्सीमुपह्वरे विदत् ॥६॥ उद्यद्ब्रध्नस्य विष्टपं गृहमिंद्रश्च गन्वहि । मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ॥७॥ अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चंतु पुत्रका उत पुरं न धृष्ण्वर्चत ॥८॥ अव स्वराति गर्गरो गोधा परि सनिष्वणत् । पिंगा परि चनिष्कददिंद्राय ब्रह्मोद्यतं ॥९॥ आ यत्पतंत्येन्यः सुदुघा अनपस्फुरः । अपस्फुरं गृभायत सोममिंद्राय पातवे ॥१०॥६॥ अपादिंद्रो अपादग्निर्विश्वे देवा अमत्सत । वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ॥११॥ सुदेवो असि वरुण यस्य ते सप्त सिंधवः । अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव ॥१२॥ यो व्यतीँरफाणयत्सुयुक्ताँ उप दाशुषे । तक्वो नेता तदिद्वपुरुपमा यो अमुच्यत ॥१३॥ अतीदु शक्र ओहत इंद्रो विश्वा अति द्विषः । भिनत्कनीन ओदनं पच्यमानं परो गिरा ॥१४॥ अर्भको न कुमारकोऽधि तिष्ठन्नवं रथं । स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुं ॥१५॥ आ तू सुशिप्र दंपते रथं तिष्ठा हिरण्ययं । अध द्युक्षं सचेवहि सहस्रपादमरुषं स्वस्तिगामनेहसं ॥१६॥ तं घेमित्था नमस्विन उप स्वराजमासते । अर्थं चिदस्य

सुधितं यदेतव आवर्तयंति दावने ॥१७॥ अनु प्रत्नस्यौकसः
प्रियमेधास एषां । पूर्वामनु प्रयतिं वृक्तबर्हिषो हितप्रयस
आशत ॥१८॥७॥७॥

॥ ७० ॥ १–१५ पुरुहन्मा ॥ इंद्रः ॥ १–६ प्रागाथं । ७–१२ बृहती । १३ उष्णिक् ।
१४ अनुष्टुप् । १५ पुरउष्णिक् ॥

॥७०॥ यो राजा चर्षणीनां याता रथेभिरध्रिगुः । विश्वासां
तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥१॥ इंद्रं तं शुंभ पुरुह-
न्मन्नवसे यस्य द्विता विधर्तरि । हस्ताय वज्रः प्रति धायि दर्शतो
महो दिवे न सूर्यः ॥२॥ नकिष्टं कर्मणा नशद्यश्चकार सदावृधं ।
इंद्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्ण्वोजसं ॥३॥ अषाळ्हमुग्रं
पृतनासु सासहिं यस्मिन्महीरुरुज्रयः । सं धेनवो जायमाने अ-
नोनवुर्द्यावः क्षामो अनोनवुः ॥४॥ यद्द्याव इंद्र ते शतं शतं भू-
मीरुत स्युः । न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी
॥५॥८॥ आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥६॥ न
सीमदेव आपदिषं दीर्घायो मर्त्यः । एतग्वा चिद्य एतशा युयोजते
हरी इंद्रो युयोजते ॥७॥ तं वो महो महाय्यमिंद्रं दानाय सक्ष-
णिं । यो गाधेषु य आरणेषु हव्यो वाजेष्वस्ति हव्यः ॥८॥ उदू षु
णो वसो महे मृशस्व शूर राधसे । उदू षु मह्यै मघवन्मघत्तय उ-
दिंद्र श्रवसे महे ॥९॥ त्वं न इंद्र ऋतयुस्त्वानिदो नि तृंपसि । मध्ये
वसिष्व तुविनृम्णोर्वोर्नि दासं शिश्नथो हथैः ॥१०॥९॥ अन्यव्र-
तममानुषमयज्वानमदेवयुं । अव स्वः सखा दुधुवीत पर्वतः सु-
घ्नाय दस्युं पर्वतः ॥११॥ त्वं न इंद्रासां हस्ते शविष्ठ दावने । धानानां
न सं गृभायास्मयुर्द्विः सं गृभायास्मयुः ॥१२॥ सखायः क्रतुमि-

च्छत कथा राधाम शरस्य। उपस्तुतिं भोजः सूरिर्यो अह्रयः
॥१३॥ भूरिभिः समह ऋषिभिर्बर्हिष्मद्भिः स्तविष्यसे। यदि-
त्थमेकमेकमिच्छर वत्सान्पराददः ॥१४॥ कर्णगृह्या मघवा
शौरदेव्यो वत्सं नस्त्रिभ्य आनयत्। अजां सूरिर्न धातवे
॥१५॥१०॥

॥७१॥ १—१५ सुदीतिपुरुमीळ्हौ तयोर्वान्यतरः ॥ अग्निः ॥ १—९ गायत्री । १०—१५ प्रागाथं ॥

॥७१॥ त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः। उत द्वि-
षो मर्त्यस्य ॥१॥ नहि मन्युः पौरुषेय ईशे हि वः प्रियजात। त्व-
मिदसि क्षपावान् ॥२॥ स नो विश्वेभिर्देवेभिरूर्जो नपाद्भद्रशोचे।
रयिं देहि विश्ववारं ॥३॥ न तमग्ने अरातयो मर्तं युवंत रायः। यं
त्रायसे दाश्वांसं ॥४॥ यं त्वं विप्र मेधसातावग्ने हिनोषि धनाय।
स तवोती गोषु गंता ॥५॥११॥ त्वं रयिं पुरुवीरमग्ने दाशुषे मर्ताय।
प्र णो नय वस्यो अच्छ ॥६॥ उरुष्या णो मा परा दा अघायते जा-
तवेदः। दुराध्ये३ मर्ताय ॥७॥ अग्ने माकिष्टे देवस्य रातिमदेवो
युयोत। त्वमीशिषे वसूनां ॥८॥ स नो वस्व उप मास्यूर्जो नपा-
न्माहिनस्य। सखे वसो जरितृभ्यः ॥९॥ अच्छा नः शीरशोचिषं
गिरो यंतु दर्शतं। अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये
॥१०॥१२॥ अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणां। द्विता
यो भूदमृतो मर्त्येष्वा होता मंद्रतमो विशि ॥११॥ अग्निं वो देवय-
ज्ययाग्निं प्रयत्यध्वरे। अग्निं धीषु प्रथममग्निमर्वत्यग्निं क्षैत्राय सा-
धसे ॥१२॥ अग्निरिषां सख्ये ददातु न ईशे यो वार्याणां। अग्निं तोके
तनये शश्वदीमहे वसुं संतं तनूपां ॥१३॥ अग्निमीळिष्वावसे गा-
थाभिः शीरशोचिषं। अग्निं राये पुरुमीळ्ह श्रुतं नरोऽग्निं सुदीतये

छर्दिः ॥१४॥ अग्निं द्वेषो योतवै नो गृणीमस्यग्निं शं योश्च दातवे। विश्वासु विक्ष्ववितेव हव्यो भुवद्वस्तुर्ऋषूणां ॥१५॥१३॥

॥ ७२ ॥ १—१८ हर्यतः प्रागाथः ॥ अग्निर्हवींषि वा ॥ गायत्री ॥

॥७२॥ हविष्कृणुध्वमा गमदध्वर्युर्वनते पुनः। विद्वाँ अस्य प्रशासनं ॥१॥ नि तिग्ममभ्यं१ंशुं सीदद्धोता मनावधि। जुषाणो अस्य सख्यं ॥२॥ अंतरिच्छंति तं जने रुद्रं परो मनीषया। गृभ्णंति जिह्वया ससं ॥३॥ जाम्यतीतपे धनुर्वयोधा अरुहद्वनं। दृषदं जिह्वयावधीत् ॥४॥ चरन्वत्सो रुशन्निह निदातारं न विंदते। वेति स्तोतव अंब्यं ॥५॥१४॥ उतो न्वस्य यन्महदश्वावद्योजनं बृहत्। दामा रथस्य ददृशे ॥६॥ दुहंति सप्तैकामुप द्वा पंच सृजतः। तीर्थे सिंधोरधि स्वरे ॥७॥ आ दशभिर्विवस्वत इंद्रः कोशमचुच्यवीत्। खेदया त्रिवृता दिवः ॥८॥ परि त्रिधातुरध्वरं जूर्णिरेति नवीयसी। मध्वा होतारो अंजते ॥९॥ सिंचंति नमसावतमुच्चाचक्रं परिज्मानं। नीचीनबारमक्षितं ॥१०॥१५॥ अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु। अवतस्य विसर्जने ॥११॥ गाव उपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥१२॥ आ सुते सिंचत श्रियं रोदस्योरभिश्रियं। रसा दधीत वृषभं ॥१३॥ ते जानत स्वमोक्यं१ सं वत्सासो न मातृभिः। मिथो नसंत जामिभिः ॥१४॥ उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि। इंद्रे अग्ना नमः स्वः ॥१५॥१६॥ अधुक्षत्पिप्युषीमिषमूर्जं सप्तपदीमरिः। सूर्यस्य सप्त रश्मिभिः ॥१६॥ सोमस्य मित्रावरुणोदिता सूर आ ददे। तदातुरस्य भेषजं ॥१७॥ उतो न्वस्य यत्पदं हर्यतस्य निधान्यं। परि द्यां जिह्वयातनत् ॥१८॥१७॥

॥ ७३ ॥ १–१८ गोपवन आत्रेयः सप्तवध्रिर्वा ॥ अश्विनौ ॥ गायत्री ॥

॥७३॥ उदीराथामृतायते युंजाथामश्विना रथं। अंति षद्भूतु
वामवः॥१॥ निमिषश्चिज्जवीयसा रथेना यातमश्विना। अंति
षद्भूतु वामवः॥२॥ उप स्तृणीतमत्रये हिमेन घर्ममश्विना। अं-
ति षद्भूतु वामवः॥३॥ कुह स्थः कुह जग्मथुः कुह श्येनेव पेतथुः।
अंति षद्भूतु वामवः॥४॥ यदद्य कर्हि कर्हि चिच्छुश्रूयातमिमं
हवं। अंति षद्भूतु वामवः॥५॥१८॥ अश्विना यामहूतमा नेदिष्ठं
याम्याप्यं। अंति षद्भूतु वामवः॥६॥ अवंतमत्रये गृहं कृणुतं यु-
वमश्विना। अंति षद्भूतु वामवः॥७॥ वरेथे अग्निमातपो वदते
वल्ग्वत्रये। अंति षद्भूतु वामवः॥८॥ प्र सप्तवध्रिराशसा धारा-
मग्नेरशायत। अंति षद्भूतु वामवः॥९॥ इहा गतं वृषण्वसू शृणुतं म
इमं हवं। अंति षद्भूतु वामवः॥१०॥१९॥ किमिदं वां पुराणवज्ज-
रतोरिव शस्यते। अंति षद्भूतु वामवः॥११॥ समानं वां सजात्यं
समानो बंधुरश्विना। अंति षद्भूतु वामवः॥१२॥ यो वां रजां-
स्यश्विना रथो वियाति रोदसी। अंति षद्भूतु वामवः॥१३॥ आ
नो गव्येभिरश्व्यैः सहस्रैरुप गच्छतं। अंति षद्भूतु वामवः॥१४॥
मा नो गव्येभिरश्व्यैः सहस्रेभिरति ख्यतं। अंति षद्भूतु वामवः
॥१५॥ अरुणप्सुरुषा अभूदकर्ज्योतिर्ऋतावरी। अंति षद्भूतु
वामवः॥१६॥ अश्विना सु विचाकशद्वृक्षं परशुमाँ इव। अंति
षद्भूतु वामवः॥१७॥ पुरं न धृष्णवा रुज कृष्णया बाधितो वि-
शा। अंति षद्भूतु वामवः॥१८॥२०॥

॥ ७४ ॥ १–१५ गोपवन आत्रेयः ॥ १–१२ अग्निः। १३–१५ श्रुतर्वण आर्क्ष्यस्य दानस्तुतिः ॥
१. ४. ७. १०. १३–१५ अनुष्टुप्। २. ३. ५. ६. ८. ९. ११. १२ गायत्री ॥

॥७४॥ विशोविशो वो अतिथिं वाजयंतः पुरुप्रियं। अ-

ग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥१॥ यं जनासो हविष्मन्तो
मित्रं न सर्पिरासुतिं । प्रशंसन्ति प्रशस्तिभिः ॥२॥ पन्यांसं जात-
वेदसं यो देवतात्युद्यता । हव्यान्यैरयद्दिवि ॥३॥ आगन्म वृत्रहन्तमं
ज्येष्ठमग्निमानवं । यस्य श्रुतर्वा बृहन्नार्क्षो अनीक एधते ॥४॥
अमृतं जातवेदसं तिरस्तमांसि दर्शतं । घृताहवनमीड्यं ॥५॥२१॥
सबाधो यं जना इमेऽग्निं हव्येभिरीळते । जुह्वानासो यतस्रुचः
॥६॥ इयं ते नव्यसी मतिरग्ने अधाय्यस्मदा । मन्द्र सुजात सुक्रतो-
ऽमूर दस्मातिथे ॥७॥ सा ते अग्ने शंतमा चनिष्ठा भवतु प्रिया ।
तया वर्धस्व सुष्टुतः ॥८॥ सा द्युम्नैर्द्युम्निनी बृहदुपोप श्रवसि
श्रवः । दधीत वृत्रतूर्ये ॥९॥ अश्वमिद्गां रथप्रां त्वेषमिन्द्रं न सत्प-
तिं । यस्य श्रवांसि तूर्वथ पन्यम्पन्यं च कृष्टयः ॥१०॥२२॥ यं त्वा
गोपवनो गिरा चनिष्ठदग्ने अङ्गिरः । स पावक श्रुधी हवं ॥११॥
यं त्वा जनास ईळते सबाधो वाजसातये । स बोधि वृत्रतूर्ये
॥१२॥ अहं हुवान आर्क्षे श्रुतर्वणि मदच्युति । शर्धांसीव स्तुका-
विनां मृक्षा शीर्षा चतुर्णां ॥१३॥ मां चत्वार आशवः शविष्ठस्य
द्रवित्नवः । सुरथासो अभि प्रयो वक्षन्वयो न तुग्र्यं ॥१४॥ सत्य-
मित्त्वा महेनदि परुष्ण्यव देदिशं । नेमापो अश्वदातरः शवि-
ष्ठादस्ति मर्त्यः ॥१५॥२३॥

॥ ७५ ॥ १–१६ विरूपः ॥ अग्निः ॥ गायत्री ॥

॥७५॥ युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव । नि हो-
ता पूर्व्यः सदः ॥१॥ उत नो देव देवाँ अच्छा वोचो विदुष्टरः ।
श्रद्विश्वा वार्या कृधि ॥२॥ त्वं ह यद्यविष्ठ्य सहसः सूनवाहुत ।
ऋतावा यज्ञियो भुवः ॥३॥ अयमग्निः सहस्रिणो वाजस्य

शतिनस्पतिः। मूर्धा कवी रयीणां॥४॥ तं नेमिमृभवो यथा नमस्व सहूतिभिः। नेदीयो यज्ञमंगिरः॥५॥२४॥ तस्मै नूनमभिद्यवे वाचा विरूप नित्यया। वृष्णे चोदस्व सुष्टुतिं॥६॥ कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः। पणिं गोषु स्तरामहे॥७॥ मा नो देवानां विशः प्रस्नातीरिवोस्राः। कृशं न हासुरघ्न्याः॥८॥ मा नः समस्य दूढ्य१ःपरिद्वेषसो अंहतिः। ऊर्मिर्न नावमा वधीत्॥९॥ नमस्ते अग्न ओजसे गृणंति देव कृष्टयः। अमैरमित्रमर्दय॥१०॥२५॥ कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिं। उरुकृदुरु णस्कृधि॥११॥ मा नो अस्मिन्महाधने परा वर्ग्भारभृद्यथा। संवर्गं सं रयिं जय॥१२॥ अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छुना। वर्धा नो अमवच्छवः॥१३॥ यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा। तं घेदग्निर्वृधावति॥१४॥ परस्या अधि संवतोऽवरॉं अभ्या तर। यत्राहमस्मि तॉं अव॥१५॥ विद्मा हि ते पुरा वयमग्ने पितुर्यथावसः। अधा ते सुम्नमीमहे॥१६॥२६॥

॥ ७६ ॥ १–१२ कुरुसुतिः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥७६॥ इमं नु मायिनं हुव इंद्रमीशानमोजसा। मरुत्वंतं न वृंजसे॥१॥ अयमिंद्रो मरुत्सखा वि वृत्रस्याभिनच्छिरः। वज्रेण शतपर्वणा॥२॥ वावृधानो मरुत्सखेंद्रो वि वृत्रमैरयत्। सृजन्समुद्रिया अपः॥३॥ अयं ह येन वा इदं स्वर्मरुत्वता जितं। इंद्रेण सोमपीतये॥४॥ मरुत्वंतमृजीषिणमोजस्वंतं विरप्शिनं। इंद्रं गीर्भिर्हवामहे॥५॥ इंद्रं प्रत्नेन मन्मना मरुत्वंतं हवामहे। अस्य सोमस्य पीतये॥६॥२७॥ मरुत्वॉं इंद्र मीढ्वः पिबा सोमं शतक्रतो। अस्मिन्यज्ञे पुरुष्टुत॥७॥ तुभ्येदिंद्र म-

रुत्वंते सुताः सोमासो अद्रिवः। हृदा हूयंत उक्थिनः॥८॥ पिबे-
दिंद्र मरुत्सखा सुतं सोमं दिविष्टिषु। वज्रं शिशान ओजसा
॥९॥ उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः। सोममिंद्र चमू
सुतं॥१०॥ अनु त्वा रोदसी उभे क्रक्षमाणमकृपेतां। इंद्र यद्द-
स्युहाभवः॥११॥ वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशं। इंद्रात्प-
-रि तन्वं ममे॥१२॥२८॥

॥ ७७ ॥ १–११ कुरुसुतिः काण्वः ॥ इंद्रः ॥ १–९ गायत्री । १० बृहती । ११ सतोबृहती ॥

॥७७॥ जज्ञानो नु शतक्रतुर्वि पृच्छदिति मातरं। क उग्राः के
ह शृण्विरे॥१॥ आदीं शवस्यब्रवीदौर्णवाभमहीशुवं। ते पुत्र संतु
निष्टुरः॥२॥ समित्तान्वृत्रहाखिदत्खे अराँ इव खेदया। प्रवृद्धो
दस्युहाभवत्॥३॥ एकया प्रतिधापिबत्साकं सरांसि त्रिंशतं।
इंद्रः सोमस्य काणुका॥४॥ अभि गंधर्वमतृणदबुध्नेषु रजःस्वा।
इंद्रो ब्रह्मभ्य इद्वृधे॥५॥२९॥ निराविध्यद्गिरिभ्य आ धारयत्प-
क्वमोदनं। इंद्रो बुंदं स्वाततं॥६॥ शतब्रध्न इषुस्तव सहस्रपर्ण
एक इत्। यमिंद्र चकृषे युजं॥७॥ तेन स्तोतृभ्य आ भर नृभ्यो
नारिभ्यो अत्तवे। सद्यो जात ऋभुष्ठिर॥८॥ एता च्यौत्नानि ते
कृता वर्षिष्ठानि परीणसा। हृदा वीड्वधारयः॥९॥ विश्वेत्ता वि-
ष्णुराभरदुरुक्रमस्त्वेषितः। शतं महिषान्क्षीरपाकमोदनं वराह-
मिंद्र एमुषं॥१०॥ तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुंदो
हिरण्ययः। उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृ-
धा॥११॥३०॥

॥ ७८ ॥ १–१० कुरुसुतिः काण्वः ॥ इंद्रः ॥ १–९ गायत्री । १० बृहती ॥

॥७८॥ पुरोळाशं नो अंधस इंद्र सहस्रमा भर। शता च शूर

गोनां ॥१॥ आ नो भर व्यंजनं गामश्वमभ्यंजनं। सचा मना हिरण्यया ॥२॥ उत नः कर्णशोभना पुरूणि धृष्णवा भर। त्वं हि शृण्विषे वसो ॥३॥ नकीं वृधीक इंद्र ते न सुषा न सुदा उत। नान्यस्त्वच्छूर वाघतः ॥४॥ नकीमिंद्रो निकर्तवे न शक्रः परिशक्तवे। विश्वं शृणोति पश्यति ॥५॥३१॥ स मन्युं मर्त्यानामदब्धो नि चिकीषते। पुरा निदश्चिकीषते ॥६॥ क्रत्व इत्पूर्णमुदरं तुरस्यास्ति विधतः। वृत्रघ्नः सोमपाव्नः ॥७॥ त्वे वसूनि संगता विश्वा च सोम सौभगा। सुदात्वपरिह्वृता ॥८॥ त्वामिद्यवयुर्मम कामो गव्युर्हिरण्ययुः। त्वामश्वयुरेषते ॥९॥ तवेदिंद्राहमाशसा हस्ते दात्रं चना ददे। दिनस्य वा मघवन्त्संभृतस्य वा पूर्धि यवस्य काशिना ॥१०॥३२॥

॥ ७९ ॥ १-९ कृत्नुर्भार्गवः ॥ सोमः ॥ १-८ गायत्री । ९ अनुष्टुप् ॥

॥७९॥ अयं कृत्नुरगृभीतो विश्वजिदुद्भिदित्सोमः। ऋषिर्विप्रः काव्येन ॥१॥ अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत्तुरं। प्रेमंधः ख्यन्निः श्रोणो भूत् ॥२॥ त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः। उरु यंतासि वरूथं ॥३॥ त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन्। यावीरघस्य चिद्द्वेषः ॥४॥ अर्थिनो यंति चेदर्थं गच्छानिद्ददुषो रातिं। ववृज्युस्तृष्यतः कामं ॥५॥३३॥ विदद्यत्पूर्व्यं नष्टमुदीमृतायुमीरयत्। प्रेमायुस्तारीदतीर्णं ॥६॥ सुशेवो नो मृळयाकुरदृप्तक्रतुरवातः। भवा नः सोम शं हृदे ॥७॥ मा नः सोम सं वीविजो मा वि बीभिषथा राजन्। मा नो हार्दि त्विषा वधीः ॥८॥ अव यत्स्वे सधस्थे देवानां दुर्मतीरीक्षे। राजन्नप द्विषः सेध मीढ्वो अप स्रिधः सेध ॥९॥३४॥

॥ ८० ॥ १–१० एकद्यूनौंधसः ॥ १–९ इंद्रः । १० देवाः ॥ १–९ गायत्री । १० त्रिष्टुप् ॥

॥८०॥ नह्य१न्यं बळाकरं मर्डितारं शतक्रतो। त्वं नं इंद्र मृ-
ळय॥१॥ यो नः शश्वत्पुराविथामृध्रो वाजसातये। स त्वं नं इंद्र
मृळय ॥२॥ किमंग रध्रचोदनः सुन्वानस्यावितेदसि। कुवि-
त्स्विंद्र णः शकः॥३॥ इंद्र प्र णो रथमव पश्चाच्चित्संतमद्रिवः। पु-
रस्तादेनं मे कृधि॥४॥ हंतो नु किमाससे प्रथमं नो रथं कृधि।
उपमं वाजयु श्रवः॥५॥३५॥ अवा नो वाजयुं रथं सुकरं ते कि-
मित्परि। अस्मान्त्सु जिग्युषस्कृधि॥६॥ इंद्र दह्यस्व पूरसि भद्रा त
एति निष्कृतं। इयं धीर्ऋत्वियावती॥७॥ मा सीमवद्य आ भा-
गुर्वी काष्ठा हितं धनं। अपावृक्ता अरत्नयः॥८॥ तुरीयं नाम
यज्ञियं यदा करस्तदुश्मसि। आदित्पतिर्न ओहसे॥९॥ अवीवृ-
धद्वो अमृता अमंदीदेकद्यूर्देवा उत याश्च देवीः। तस्मा उ राधः
कृणुत प्रशस्तं प्रातर्मक्षू धियावसुर्जगम्यात्॥१०॥३६॥८॥

॥ ८१ ॥ १–९ कुसीदी काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥८१॥ आ तू नं इंद्र क्षुमंतं चित्रं ग्राभं सं गृभाय। महाहस्ती
दक्षिणेन॥१॥ विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघं।
तुविमात्रमवोभिः॥२॥ नहि त्वा शूर देवा न मर्तासो दि-
त्संतं। भीमं न गां वारयंते॥३॥ एतो न्विंद्रं स्तवामेशानं
वस्वः स्वराजं। न राधसा मर्धिषन्नः॥४॥ प्र स्तोषदुप गा-
सिषच्छ्रवत्साम गीयमानं। अभि राधसा जुगुरत्॥५॥३७॥ आ
नो भर दक्षिणेनाभि सव्येन प्र मृश। इंद्र मा नो वसोर्निर्भाक्
॥६॥ उप क्रमस्वा भर धृषता धृष्णो जनानां। अदाशूष्टरस्य
वेदः॥७॥ इंद्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः। अस्मा-

भिः सु तं संनुहि ॥८॥ सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चंद्राः ।
वशैश्च मक्षू जरंते ॥९॥३८॥५॥

॥ ८२ ॥ १–९ कुसीदी काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥८२॥ आ प्र द्रव परावतोऽर्वावतश्च वृत्रहन् । मध्वः प्रति
प्रभर्मणि ॥१॥ तीव्राः सोमास आ गहि सुतासो मादयिष्णवः ।
पिबा दधृग्यथोचिषे॥२॥ इषा मंदस्वादु तेऽरं वराय मन्यवे।भुवत्त
इंद्र शं हृदे ॥३॥ आ त्वशत्रवा गहि न्युक्थानि च हूयसे । उपमे
रोचने दिवः ॥४॥ तुभ्यायमद्रिभिः सुतो गोभिः श्रीतो मदाय कं।
प्र सोम इंद्र हूयते॥५॥१॥ इंद्र श्रुधि सु मे हवमस्मे सुतस्य गोमतः।
वि पीतिं तृप्तिमश्नुहि॥६॥ य इंद्र चमसेष्वा सोमश्चमूषु ते सुतः।
पिबेदस्य त्वमीशिषे॥७॥ यो अप्सु चंद्रमा इव सोमश्चमूषु ददृशे।
पिबेदस्य त्वमीशिषे॥८॥ यं ते श्येनः पदाभरत्तिरो रजांस्यस्पृतं।
पिबेदस्य त्वमीशिषे ॥९॥२॥

॥ ८३ ॥ १–९ कुसीदी काण्वः ॥ विश्वे देवाः ॥ गायत्री ॥

॥८३॥ देवानामिदवो महत्तदा वृणीमहे वयं । वृष्णाम-
स्मभ्यमूतये ॥१॥ ते नः संतु युजः सदा वरुणो मित्रो अर्यमा ।
वृधासश्च प्रचेतसः ॥२॥ अति नो विष्पिता पुरु नौभिरपो न
पर्षथ । यूयमृतस्य रथ्यः ॥३॥ वामं नो अस्त्वर्यमन्वामं व-
रुण शंस्यं । वामं ह्यावृणीमहे ॥४॥ वामस्य हि प्रचेतस ईशा-
नासो रिशादसः । नेमादित्या अघस्य यत् ॥५॥३॥ वयमिद्वः
सुदानवः क्षियंतो यांतो अध्वन्ना । देवा वृधाय हूमहे ॥६॥
अधि न इंद्रैषां विष्णो सजात्यानां । इता मरुतो अश्विना
॥७॥ प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या । मातुर्गर्भे भरा-

महे ॥८॥ यूयं हि ष्ठा सुदानव इंद्रज्येष्ठा अभिद्यवः। अधा चिद्व
उत ब्रुवे ॥९॥४॥

॥ ८४ ॥ १–९ उशना काव्यः ॥ अग्निः ॥ गायत्री ॥

॥८४॥ प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियं। अग्निं रथं न वे-
द्यं ॥१॥ कविमिव प्रचेतसं यं देवासो अध द्विता। नि मर्त्येष्वा-
दधुः ॥२॥ त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः। रक्षा तोक-
मुत त्मना ॥३॥ कया ते अग्ने अंगिर ऊर्जो नपादुपस्तुतिं। वराय
देव मन्यवे ॥४॥ दाशेम कस्य मनसा यज्ञस्य सहसो यहो। कदु
वोच इदं नमः ॥५॥५॥ अधा त्वं हि नस्करो विश्वा अस्मभ्यं सु-
क्षितीः। वाजद्रविणसो गिरः ॥६॥ कस्य नूनं परीणसो धियो
जिन्वसि दंपते। गोषाता यस्य ते गिरः ॥७॥ तं मर्जयंत सुक्रतुं
पुरोयावानमाजिषु। स्वेषु क्षयेषु वाजिनं ॥८॥ क्षेति क्षेमेभिः
साधुभिर्नकिर्यं घ्नंति हंति यः। अग्ने सुवीर एधते ॥९॥६॥

॥ ८५ ॥ १–९ कृष्णः ॥ अश्विनौ ॥ गायत्री ॥

॥८५॥ आ मे हवं नासत्याश्विना गच्छतं युवं। मध्वः सोमस्य
पीतये ॥१॥ इमं मे स्तोममश्विनेमं मे शृणुतं हवं। मध्वः सोम-
स्य पीतये ॥२॥ अयं वां कृष्णो अश्विना हवते वाजिनीवसू। म-
ध्वः सोमस्य पीतये ॥३॥ शृणुतं जरितुर्हवं कृष्णस्य स्तुवतो नरा।
मध्वः सोमस्य पीतये ॥४॥ छर्दिर्यंतमदाभ्यं विप्राय स्तुवते न-
रा। मध्वः सोमस्य पीतये ॥५॥७॥ गच्छतं दाशुषो गृहमित्था
स्तुवतो अश्विना। मध्वः सोमस्य पीतये ॥६॥ युंजाथां रासभं रथे
वीड्वंगे वृषण्वसू। मध्वः सोमस्य पीतये ॥७॥ त्रिवंधुरेण त्रि-
वृता रथेना यातमश्विना। मध्वः सोमस्य पीतये ॥८॥ नू

मे गिरो नासत्याश्विना प्रावतं युवं। मध्वः सोमस्य पीतये ॥९॥८॥

॥ ८६ ॥ १–५ कृष्णो विश्वको वा कार्ष्णिः ॥ अश्विनौ ॥ जगती ॥

॥८६॥ उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः। ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतं॥१॥ कथा नूनं वां विमना उप स्तवद्युवं धियं ददथुर्वस्यइष्टये। ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतं॥२॥ युवं हि ष्मा पुरुभुजेममेधतुं विष्णाप्वे ददथुर्वस्यइष्टये। ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतं॥३॥ उत त्यं वीरं धनसामृजीषिणं दूरे चित्सन्तमवसे हवामहे। यस्य स्वादिष्ठा सुमतिः पितुर्यथा मा नो वि यौष्टं सख्या मुमोचतं॥४॥ ऋतेन देवः सविता शमायत ऋतस्य शृंगमुर्विया वि पप्रथे। ऋतं सासाह महि चित्पृतन्यतो मा नो वि यौष्टं सख्या मुमोचतं॥५॥९॥

॥ ८७ ॥ १–६ कृष्णो द्युम्नीको वा वासिष्ठः प्रियमेधो वा ॥ अश्विनौ ॥ प्रागाथं ॥

॥८७॥ द्युम्नी वां स्तोमो अश्विना क्रिविर्न सेक आ गतं। मध्वः सुतस्य स दिवि प्रियो नरा पातं गौराविवेरिणे॥१॥ पिबतं घर्मं मधुमन्तमश्विना बर्हिः सीदतं नरा। ता मन्दसाना मनुषो दुरोण आ नि पातं वेदसा वयः॥२॥ आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत। ता वर्तिर्यातमुप वृक्तबर्हिषो जुष्टं यज्ञं दिविष्टिषु॥३॥ पिबतं सोमं मधुमन्तमश्विना बर्हिः सीदतं सुमत्। ता वावृधाना उप सुष्टुतिं दिवो गन्तं गौराविवेरिणं॥४॥ आ नूनं यातमश्विनाश्वेभिः प्रुषितप्सुभिः। दस्रा हिरण्यवर्तनी शुभस्पती पातं सोम-

मृतावृधा॥५॥ वयं हि वां हवामहे विपन्यवो विप्रासो वाजसा-
तये। ता वल्गू दस्रा पुरुदंससा धियाश्विना श्रुष्ट्या गतं॥६॥१०॥

॥ ८८ ॥ १–६ नोधाः ॥ इंद्रः ॥ प्रागाथं ॥

॥८८॥ तं वो दस्ममृतीषहं वसोर्मंदानमंधसः। अभि वत्सं न
स्वसरेषु धेनव इंद्रं गीर्भिर्नवामहे॥१॥ द्युक्षं सुदानुं तविषीभि-
रावृतं गिरिं न पुरुभोजसं। क्षुमंतं वाजं शतिनं सहस्रिणं मक्षू
गोमंतमीमहे॥२॥ न त्वा बृहंतो अद्रयो वरंत इंद्र वीळवः।
यद्दित्ससि स्तुवते मावते वसु नकिष्टदा मिनाति ते॥३॥ योद्धा-
सि क्रत्वा शवसोत दंसना विश्वा जाताभि मज्मना। आ त्वाय-
मर्क ऊतये ववर्तति यं गोतमा अजीजनन्॥४॥ प्र हि रिरिक्ष
ओजसा दिवो अंतेभ्यस्परि। न त्वा विव्याच रज इंद्र पार्थिवमनु
स्वधां ववक्षिथ॥५॥ नकिः परिष्टिर्मघवन्मघस्य ते यद्दाशुषे
दशस्यसि। अस्माकं बोध्युचथस्य चोदिता मंहिष्ठो वाजसा-
तये॥६॥११॥

॥ ८९ ॥ १–७ नृमेधपुरुमेधौ ॥ इंद्रः ॥ १–४ प्रागाथं। ५. ६ अनुष्टुप्। ७ बृहती ॥

॥८९॥ बृहदिंद्राय गायत मरुतो वृत्रहंतमं। येन ज्योति-
रजनयन्नृतावृधो देवं देवाय जागृवि॥१॥ अपाधमदभि-
शस्तीरशस्तिहाथेंद्रो द्युम्न्याभवत्। देवास्त इंद्र सख्याय ये-
मिरे बृहद्भानो मरुद्गण॥२॥ प्र व इंद्राय बृहते मरुतो
ब्रह्मार्चत। वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्व-
णा॥३॥ अभि प्र भर धृषता धृषन्मनः श्रवश्चित्ते असद्बृ-
हत्। अर्षंत्वापो जवसा वि मातरो हनो वृत्रं जया स्वः
॥४॥ यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय। तत्पृथिवीम-

प्रथयस्तदस्तभ्ना उत द्यां ॥५॥ तत्ते यज्ञो अजायत तदर्क उत हस्कृ-
तिः। तद्विश्वमभिभूरसि यज्जातं यच्च जंत्वं ॥६॥ आमासु पक्वमैरय
आ सूर्यं रोहयो दिवि। घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्व-
णसे बृहत् ॥७॥१२॥

॥९०॥ १–६ नृमेधपुरुमेधौ ॥ इंद्रः ॥ प्रागाथं ॥

॥९०॥ आ नो विश्वासु हव्य इंद्रः समत्सु भूषतु। उप ब्रह्माणि
सवनानि वृत्रहा परमज्या ऋचीषमः ॥१॥ त्वं दाता प्रथमो राध-
सामस्यसि सत्य ईशानकृत्। तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य
शवसो महः ॥२॥ ब्रह्मा त इंद्र गिर्वणः क्रियंते अनतिद्भुता। इमा
जुषस्व हर्यश्व योजनेंद्र या ते अमन्महि ॥३॥ त्वं हि सत्यो मघवन्न-
नानतो वृत्रा भूरि न्यृंजसे। स त्वं शविष्ठ वज्रहस्त दाशुषेऽर्वाञ्चं
रयिमा कृधि ॥४॥ त्वमिंद्र यशा अस्यृजीषी शवसस्पते। त्वं वृत्रा-
णि हंस्यप्रतीन्येक इदनुत्ता चर्षणीधृता ॥५॥ तमु त्वा नूनमसुर
प्रचेतसं राधो भागमिवेमहे। महीव कृत्तिः शरणा त इंद्र प्र ते
सुम्ना नो अश्नवन् ॥६॥१३॥

॥९१॥ १–७ अपालात्रेयी ॥ इंद्रः ॥ १.२ पंक्तिः । ३–७ अनुष्टुप् ॥

॥९१॥ कन्या३ वारवायती सोममपि स्रुताविदत्। अस्तं
भरंत्यब्रवीदिंद्राय सुनवै त्वा शक्राय सुनवै त्वा ॥१॥ असौ य
एषि वीरको गृहंगृहं विचाकशत्। इमं जंभसुतं पिब धाना-
वंतं करंभिणमपूपवंतमुक्थिनं ॥२॥ आ चन त्वा चिकि-
त्सामोऽधि चन त्वा नेमसि। शनैरिव शनकैरिवेंद्रायेंदो
परि स्रव ॥३॥ कुविच्छकत्कुवित्करत्कुविन्नो वस्यसस्करत्।
कुवित्पतिद्विषो यतीरिंद्रेण संगमामहै ॥४॥ इमानि त्रीणि

विष्टपा तानींद्र वि रोहय। शिरस्ततस्योर्वरामादिदं म उपोदरे ॥५॥ असौ च या न उर्वरादिमां तन्वं१ मम। अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि॥६॥ खे रथस्य खेऽनसः खे युगस्य शतक्रतो। अपालामिंद्र त्रिष्पूत्व्यकृणोः सूर्यत्वचं ॥७॥१४॥

॥ ९२ ॥ १–३३ श्रुतकक्षः सुकक्षो वा ॥ इंद्रः ॥ १ अनुष्टुप्। २–३३ गायत्री ॥

॥९२॥ पांतमा वो अंधस इंद्रमभि प्र गायत। विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनां ॥१॥ पुरुहूतं पुरुष्टुतं गाथान्यं१ सनश्रुतं। इंद्र इति ब्रवीतन ॥२॥ इंद्र इन्नो महानां दाता वाजानां नृतुः। महाँ अभिज्ञ्वा यमत् ॥३॥ अपादु शिप्र्यंधसः सुदक्षस्य प्रहोषिणः। इंदोरिंद्रो यवाशिरः ॥४॥ तम्वभि प्रार्चतेंद्रं सोमस्य पीतये। तदिद्ध्यस्य वर्धनं ॥५॥१५॥ अस्य पीत्वा मदानां देवो देवस्यौजसा। विश्वाभि भुवना भुवत् ॥६॥ त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतं। आ च्यावयस्यूतये ॥७॥ युध्मं संतमनर्वाणं सोमपामनपच्युतं। नरमवार्यक्रतुं ॥८॥ शिक्षा ण इंद्र राय आ पुरु विद्वाँ ऋचीषम। अवा नः पार्ये धने ॥९॥ अतश्चिदिंद्र ण उपा याहि शतवाजया। इषा सहस्रवाजया ॥१०॥१६॥ अयाम धीवंतो धियोऽर्वद्भिः शक्र गोदरे। जयेम पृत्सु वज्रिवः ॥११॥ वयमु त्वा शतक्रतो गावो न यवसेष्वा। उक्थेषु रणयामसि ॥१२॥ विश्वा हि मर्त्यत्वनानुकामा शतक्रतो। अगन्म वज्रिन्नाशसः ॥१३॥ त्वे सु पुत्र शवसोऽवृत्रन्कामकातयः। न त्वामिंद्राति रिच्यते ॥१४॥ स नो वृषन्त्सनिष्ठया सं घोरया द्रवित्न्वा। धियाविड्ढि पुरंध्या ॥१५॥१७॥ यस्ते नूनं शतक्रतविंद्र द्युम्नितमो मदः। तेन नूनं मदे मदेः ॥१६॥ यस्ते चित्रश्र-

वस्तमो य इंद्र वृत्रहंतमः। य ओजोदातमो मदः॥१७॥ विद्मा हि
यस्ते अद्रिवस्त्वादत्तः सत्य सोमपाः। विश्वासु दस्म कृष्टिषु॥१८॥
इंद्राय मद्वने सुतं परि ष्टोभंतु नो गिरः। अर्कमर्चंतु कारवः॥१९॥
यस्मिन्विश्वा अधि श्रियो रणंति सप्त संसदः। इंद्रं सुते हवामहे
॥२०॥१८॥ त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत। तमिद्वर्धंतु नो
गिरः॥२१॥ आ त्वा विशंत्विंदवः समुद्रमिव सिंधवः। न त्वामिं-
द्राति रिच्यते॥२२॥ विव्यक्थ महिना वृषन्भक्षं सोमस्य जागृवे।
य इंद्र जठरेषु ते॥२३॥ अरं त इंद्र कुक्षये सोमो भवतु वृत्रहन्।
अरं धामभ्य इंदवः॥२४॥ अरमश्वाय गायति श्रुतकक्षो अरं गवे।
अरमिंद्रस्य धाम्ने॥२५॥ अरं हि ष्मा सुतेषु णः सोमेष्विंद्र भूषसि।
अरं ते शक्र दावने॥२६॥१९॥ पराकात्ताच्चिदद्रिवस्त्वां नक्षंत
नो गिरः। अरं गमाम ते वयं॥२७॥ एवा ह्यसि वीरयुरेवा शूर
उत स्थिरः। एवा ते राध्यं मनः॥२८॥ एवा रातिस्तुवीमघ विश्वे-
भिर्धायि धातृभिः। अधा चिदिंद्र मे सचा॥२९॥ मो षु ब्रह्मेव तं-
द्रयुर्भुवो वाजानां पते। मत्स्वा सुतस्य गोमतः॥३०॥ मा न इंद्रा-
भ्या३दिशः सूरो अक्तुष्वा यमन्। त्वा युजा वनेम तत्॥३१॥ त्व-
येदिंद्र युजा वयं प्रति ब्रुवीमहि स्पृधः। त्वमस्माकं तव स्मसि
॥३२॥ त्वामिद्धि त्वायवोऽनुनोनुवतश्चरान्। सखाय इंद्र का-
रवः॥३३॥२०॥

॥९३॥ १–३४ सुकक्षः॥ १–३३ इंद्रः। ३४ इंद्र ऋभवश्च॥ गायत्री॥

॥९३॥ उद्घेदभि श्रुतामघं वृषभं नर्यापसं। अस्तारमेषि
सूर्य॥१॥ नव यो नवतिं पुरो बिभेद बाह्वोजसा। अहिं
च वृत्रहावधीत्॥२॥ स न इंद्रः शिवः सखाश्वावद्गोम-
द्यवमत्। उरुधारेव दोहते॥३॥ यदद्य कच्च वृत्रहन्नु-

दगा अभि सूर्ये। सर्वं तदिंद्र ते वशे ॥४॥ यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे। उतो तत्सत्यमित्तव ॥५॥२१॥ ये सोमासः परावति ये अर्वावति सुन्विरे। सर्वांस्ताँ इंद्र गच्छसि ॥६॥ तमिंद्रं वाजयामसि महे वृत्राय हंतवे। स वृषा वृषभो भुवत् ॥७॥ इंद्रः स दामने कृत ओजिष्ठः स मदे हितः। द्युम्नी श्लोकी स सोम्यः ॥८॥ गिरा वज्रो न संभृतः सबलो अनपच्युतः। ववक्ष ऋष्वो अस्तृतः ॥९॥ दुर्गे चिन्नः सुगं कृधि गृणान इंद्र गिर्वणः। त्वं च मघवन्वशः ॥१०॥२२॥ यस्य ते नू चिदादिशं न मिनंति स्वराज्यं। न देवो नाध्रिगुर्जनः ॥११॥ अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः। उभे सुशिप्र रोदसी ॥१२॥ त्वमेतदधारयः कृष्णासु रोहिणीषु च। परुष्णीषु रुशत्पयः ॥१३॥ वि यदहेरध त्विषो विश्वे देवासो अक्रमुः। विदन्मृगस्य ताँ अमः ॥१४॥ आदु मे निवरो भुवद्वृत्रहादिष्ट पौंस्यं। अजातशत्रुरस्तृतः ॥१५॥२३॥ श्रुतं वो वृत्रहंतमं प्र शर्धं चर्षणीनां। आ शुषे राधसे महे ॥१६॥ अया धिया च गव्यया पुरुणामन्पुरुष्टुत। यत्सोमेसोम आभवः ॥१७॥ बोधिन्मना इदस्तु नो वृत्रहा भूर्यासुतिः। शृणोतु शक्र आशिषं ॥१८॥ कया त्वं न ऊत्याभि प्र मंदसे वृषन्। कया स्तोतृभ्य आ भर ॥१९॥ कस्य वृषा सुते सचा नियुत्वान्वृषभो रणत्। वृत्रहा सोमपीतये ॥२०॥२४॥ अभी षु णस्त्वं रयिं मंदसानः सहस्रिणं। प्रयंता बोधि दाशुषे ॥२१॥ पत्नीवंतः सुता इम उशंतो यंति वीतये। अपां जग्मिर्निचुंपुणः ॥२२॥ इष्टा होत्रा असृक्षतेंद्रं वृधासो अध्वरे। अच्छावभृथमोजसा ॥२३॥ इह त्या सधमाद्या हरी हिरण्यकेश्या। वोळ्हामभि प्रयो

हितं ॥२४॥ तुभ्यं सोमाः सुता इमे स्तीर्णं बर्हिर्विभावसो। स्तोतृभ्य इंद्रमा वह ॥२५॥२५॥ आ ते दक्षं वि रोचना दधद्रत्ना वि दाशुषे। स्तोतृभ्य इंद्रमर्चत ॥२६॥ आ ते दधामींद्रियमुक्था विश्वा शतक्रतो। स्तोतृभ्य इंद्र मृळय ॥२७॥ भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो। यदिंद्र मृळयासि नः ॥२८॥ स नो विश्वान्या भर सुवितानि शतक्रतो। यदिंद्र मृळयासि नः ॥२९॥ त्वामिद्वृत्रहंतम सुतावंतो हवामहे। यदिंद्र मृळयासि नः ॥३०॥२६॥ उप नो हरिभिः सुतं याहि मदानां पते। उप नो हरिभिः सुतं ॥३१॥ द्विता यो वृत्रहंतमो विद इंद्रः शतक्रतुः। उप नो हरिभिः सुतं ॥३२॥ त्वं हि वृत्रहन्नेषां पाता सोमानामसि। उप नो हरिभिः सुतं ॥३३॥ इंद्र इषे ददातु न ऋभुक्षणमृभुं रयिं। वाजी ददातु वाजिनं ॥३४॥२७॥९॥

॥ ९४ ॥ १–१२ बिंदुः पूतदक्षो वा ॥ मरुतः ॥ गायत्री ॥

॥९४॥ गौर्धयति मरुतां श्रवस्युर्माता मघोनां। युक्ता वह्नी रथानां ॥१॥ यस्या देवा उपस्थे व्रता विश्वे धारयंते। सूर्यामासा दृशे कं ॥२॥ तत्सु नो विश्वे अर्य आ सदा गृणंति कारवः। मरुतः सोमपीतये ॥३॥ अस्ति सोमो अयं सुतः पिबंत्यस्य मरुतः। उत स्वराजो अश्विना ॥४॥ पिबंति मित्रो अर्यमा तना पूतस्य वरुणः। त्रिषधस्थस्य जावतः ॥५॥ उतो न्वस्य जोषमाँ इंद्रः सुतस्य गोमतः। प्रातर्होतेव मत्सति ॥६॥२८॥ कद्त्विषंत सूरयस्तिर आप इव स्रिधः। अर्षंति पूतदक्षसः ॥७॥ कद्वो अद्य महानां देवानामवो वृणे। त्मना च दस्मवर्चसां ॥८॥ आ ये विश्वा पार्थिवानि पप्रथन्रोचना दिवः। मरुतः सोमपीतये ॥९॥ त्यान्नु पूतदक्षसो दिवो वो मरुतो हुवे। अस्य सोमस्य पी-

तये॥१०॥ त्यान्नु ये वि रोदसी तस्तभुर्मरुतो हुवे। अस्य सोमस्य पीतये॥११॥ त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे। अस्य सोमस्य पीतये॥१२॥२९॥

॥ ९५ ॥ १–७ तिरश्चीः ॥ इंद्रः ॥ अनुष्टुप् ॥

॥९५॥ आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः। अभि त्वा समनूषतेंद्र वत्सं न मातरः॥१॥ आ त्वा शुक्रा अचुच्यवुः सुतास इंद्र गिर्वणः। पिबा त्व१स्यांधस इंद्र विश्वासु ते हितं॥२॥ पिबा सोमं मदाय कमिंद्र श्येनाभृतं सुतं। त्वं हि शश्वतीनां पती राजा विशामसि॥३॥ श्रुधी हवं तिरश्च्या इंद्र यस्त्वा सपर्यति। सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि॥४॥ इंद्र यस्ते नवीयसीं गिरं मंद्रामजीजनत्। चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीं॥५॥३०॥ तमु ष्टवाम यं गिर इंद्रमुक्थानि वावृधुः। पुरूण्यस्य पौंस्या सिषासंतो वनामहे॥६॥ एतो न्विंद्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु॥७॥ इंद्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः। शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः॥८॥ इंद्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे। शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि॥९॥३१॥

॥ ९६ ॥ १–२१ तिरश्चीर्द्युतानो वा मारुतः ॥ १–१४¹. १६–२१ इंद्रः । १४² मरुतः ।
१५ इंद्राबृहस्पती ॥ १–३. ५–२१ त्रिष्टुप् । ४ विराट् ॥

॥९६॥ अस्मा उषास आतिरंत याममिंद्राय नक्तमूर्म्याः सुवाचः। अस्मा आपो मातरः सप्त तस्थुर्नृभ्यस्तराय सिंधवः सुपाराः॥१॥ अतिविद्धा विथुरेणा चिदस्त्रा त्रिः सप्त सानु संहिता गिरीणां। न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार॥२॥ इंद्रस्य वज्र आयसो निमिश्ल इंद्रस्य बाह्वो-

भूयिष्ठमोजः। शीर्षन्निंद्रस्य क्रतवो निरेक आसन्नेषंत श्रुत्या उपाके ॥३॥ मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानां। मन्ये त्वा सत्वनामिंद्र केतुं मन्ये त्वा वृषभं चर्षणीनां ॥४॥ आ यद्वज्रं बाह्वोरिंद्र धत्से मदच्युतमहये हंतवा उ। प्र पर्वता अनवंत प्र गावः प्र ब्रह्माणो अभिनक्षंत इंद्रं ॥५॥३२॥ तमु ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात्। इंद्रेण मित्रं दिधिषेम गीर्भिरुपो नमोभिर्वृषभं विशेम ॥६॥ वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः। मरुद्भिरिंद्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥७॥ त्रिः षष्टिस्त्वा मरुतो वावृधाना उस्रा इव राशयो यज्ञियासः। उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम ॥८॥ तिग्ममायुधं मरुतामनीकं कस्त इंद्र प्रति वज्रं दधर्ष। अनायुधासो असुरा अदेवाश्चक्रेण ताँ अप वप ऋजीषिन् ॥९॥ मह उग्राय तवसे सुवृक्तिं प्रेरय शिवतमाय पश्वः। गिर्वाहसे गिर इंद्राय पूर्वीर्धेहि तन्वे कुविदंग वेदत् ॥१०॥३३॥ उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनां। नि स्पृश धिया तन्वि श्रुतस्य जुष्टतरस्य कुविदंग वेदत् ॥११॥ तद्विविड्ढि यत्त इंद्रो जुजोषत्स्तुहि सुष्टुतिं नमसा विवास। उप भूष जरितर्मा रुवण्यः श्रावया वाचं कुविदंग वेदत् ॥१२॥ अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः। आवत्तमिंद्रः शच्या धमंतमप स्नेहितीर्नृमणा अधत्त ॥१३॥ द्रप्समपश्यं विषुणे चरंतमुपह्वरे नद्यो अंशुमत्याः। नभो न कृष्णमवतस्थिवांसमिष्यामि वो वृषणो युध्यताजौ ॥१४॥ अध द्रप्सो अंशुमत्या उपस्थेऽधारयत्तन्वं तित्विषाणः। विशो

अदेवीरभ्या३ चरंतीर्बृहस्पतिना युजेंद्रः ससाहे ॥१५॥३४॥ त्वं
ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिंद्र। गूळ्हे द्या-
वापृथिवी अन्वविंदो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥१६॥ त्वं ह
त्यदप्रतिमानमोजो वज्रेण वज्रिन्धृषितो जघंथ। त्वं शुष्णस्या-
वातिरो वधत्रैस्त्वं गा इंद्र शच्येदविंदः ॥१७॥ त्वं ह त्यद्वृषभ चर्ष-
णीनां घनो वृत्राणां तविषो बभूथ। त्वं सिंधूँरसृजस्तस्तभानान्
त्वमपो अजयो दासपत्नीः ॥१८॥ स सुक्रतू रणिता यः सुतेष्व-
नुत्तमन्युर्यो अहेव रेवान्। य एक इन्नर्यपांसि कर्ता स वृत्रहा
प्रतीदन्यमाहुः ॥१९॥ स वृत्रहेंद्रश्चर्षणीधृत्तं सुष्टुत्या हव्यं हुवेम।
स प्राविता मघवा नोऽधिवक्ता स वाजस्य श्रवस्यस्य दाता
॥२०॥ स वृत्रहेंद्र ऋभुक्षाः सद्यो जज्ञानो हव्यो बभूव। कृण्वन्न-
पांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः ॥२१॥३५॥

॥ ९७ ॥ १—१५ रेभः काश्यपः ॥ इंद्रः ॥ १—९ बृहती । १०. १३ अतिजगती ।
११. १२ उपरिष्टाद्बृहती । १४ त्रिष्टुप् । १५ जगती ॥

॥९७॥ या इंद्र भुज आभरः स्वर्वाँ असुरेभ्यः। स्तोतार-
मिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥१॥ यमिंद्र दधिषे
त्वमश्वं गां भागमव्ययं। यजमाने सुन्वति दक्षिणावति तस्मिन्
तं धेहि मा पणौ ॥२॥ य इंद्र सस्त्यव्रतोऽनुष्वापमदेवयुः।
स्वैः ष एवैर्मुमुरत्पोष्यं रयिं सनुतर्धेहि तं ततः ॥३॥ यच्छ-
क्रासि परावति यदर्वावति वृत्रहन्। अतस्त्वा गीर्भिर्द्यु-
गदिंद्र केशिभिः सुतावाँ आ विवासति ॥४॥ यद्वासि
रोचने दिवः समुद्रस्याधि विष्टपि। यत्पार्थिवे सदने वृत्र-
हंतम यदंतरिक्ष आ गहि ॥५॥३६॥ स नः सोमेषु सोम-

पाः सुतेषु शवसस्पते। मादयस्व राधसा सूनृतावतेंद्र राया परी-
णसा ॥६॥ मा न इंद्र परा वृणग्भवा नः सधमाद्यः। त्वं न ऊती
त्वमिन्न आप्यं मा न इंद्र परा वृणक् ॥७॥ अस्मे इंद्र सचा सुते नि
षदा पीतये मधु। कृधी जरित्रे मघवन्नवो महदस्मे इंद्र सचा सुते
॥८॥ न त्वा देवास आशत न मर्त्यासो अद्रिवः। विश्वा जातानि
शवसाभिभूरसि न त्वा देवास आशत ॥९॥ विश्वाः पृतना अभि-
भूतरं नरं सजूस्ततक्षुरिंद्रं जजनुश्च राजसे। क्रत्वा वरिष्ठं वर आ-
मुरिमुतोग्रमोजिष्ठं तवसं तरस्विनं ॥१०॥३७॥ समीं रेभासो
अस्वरन्निंद्रं सोमस्य पीतये। स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा
समूतिभिः ॥११॥ नेमिं नमंति चक्षसा मेषं विप्रा अभिस्वरा।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥१२॥ तमिंद्रं
जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि। मं-
हिष्ठो गीर्भिरा च यज्ञियो ववर्तद्राये नो विश्वा सुपथा कृणोतु
वज्री ॥१३॥ त्वं पुर इंद्र चिकिदेना व्योजसा शविष्ठ शक्र नाश-
यध्यै। त्वद्विश्वानि भुवनानि वज्रिन्द्यावा रेजेते पृथिवी च भीषा
॥१४॥ तन्म ऋतमिंद्र शूर चित्र पात्वपो न वज्रिन्दुरिताति पर्षि
भूरि। कदा न इंद्र राय आ दशस्येर्विश्वप्स्न्यस्य स्पृहयाय्यस्य रा-
जन् ॥१५॥३८॥६॥

॥९८॥ १—१२ नृमेधः ॥ इंद्रः ॥ १—६. ८ उष्णिक्। ७. १०. ११ ककुप्। ९. १२ पुरउष्णिक् ॥

॥९८॥ इंद्राय साम गायत विप्राय बृहते बृहत्। धर्मकृते
विपश्चिते पनस्यवे ॥१॥ त्वमिंद्राभिभूरसि त्वं सूर्यमरोचयः।
विश्वकर्मा विश्वदेवो महाँ असि ॥२॥ विभ्राजञ्ज्योतिषा
स्व१रगच्छो रोचनं दिवः। देवास्त इंद्र सख्याय येमिरे ॥३॥

एंद्र नो गधि प्रियः सत्राजिदगोह्यः । गिरिर्न विश्वतस्पृथुः पति-
र्दिवः ॥४॥ अभि हि सत्य सोमपा उभे बभूथ रोदसी । इंद्रासि
सुन्वतो वृधः पतिर्दिवः ॥५॥ त्वं हि शश्वतीनामिंद्र दर्ता पुरामसि ।
हंता दस्योर्मनोर्वृधः पतिर्दिवः ॥६॥१॥ अधा हींद्र गिर्वण उप
त्वा कामान्महः ससृज्महे । उदेव यंत उदभिः ॥७॥ वार्ण त्वा य-
व्याभिर्वर्धंति शूर ब्रह्माणि । वावृध्वांसं चिदद्रिवो दिवेदिवे ॥८॥
युंजंति हरी इषिरस्य गाथयोरौ रथ उरुयुगे । इंद्रवाहा वचोयुजा
॥९॥ त्वं न इंद्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे । आ वीरं
पृतनाषहं ॥१०॥ त्वं हि नः पिता वसो त्वं माता शतक्रतो बभू-
विथ । अधा ते सुम्नमीमहे ॥११॥ त्वां शुष्मिन्पुरुहूत वाजयंतमुप
ब्रुवे शतक्रतो । स नो रास्व सुवीर्यं ॥१२॥२॥

॥ ९९ ॥ १-८ नृमेधः ॥ इंद्रः ॥ प्रागाथं ॥

॥ ९९ ॥ त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः । स इंद्र
स्तोमवाहसामिह श्रुध्युप स्वसरमा गहि ॥१॥ मत्स्वा सुशिप्र
हरिवस्तदीमहे त्वे आ भूषंति वेधसः । तव श्रवांस्युपमान्यु-
क्थ्या सुतेष्विंद्र गिर्वणः ॥२॥ श्रायंत इव सूर्यं विश्वेदिंद्रस्य
भक्षत । वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम
॥३॥ अनर्शरातिं वसुदामुप स्तुहि भद्रा इंद्रस्य रातयः । सो अ-
स्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥४॥ त्वमिंद्र
प्रतूर्तिष्वभि विश्वा असि स्पृधः । अशस्तिहा जनिता विश्वतूरसि
त्वं तूर्य तरुष्यतः ॥५॥ अनु ते शुष्मं तुरयंतमीयतुः क्षोणी शिशुं
न मातरा । विश्वास्ते स्पृधः श्नथयंत मन्यवे वृत्रं यदिंद्र तूर्वसि
॥६॥ इत ऊती वो अजरं प्रहेतारमप्रहितं । आशुं जेतारं

होतारं रथीतममर्तूतं तुग्र्यावृधं ॥७॥ इष्कर्तारमनिष्कृतं सहस्कृतं शतमूतिं शतक्रतुं। समानमिंद्रमवसे हवामहे वसवानं वसूजुवं ॥८॥३॥

॥१००॥ १—३. ६—१२ नेमो भार्गवः। ४. ५ इंद्रः॥ १—९. १२ इंद्रः। १०. ११ वाक् ॥ १—५. १०—१२ त्रिष्टुप्। ६ जगती। ७—९ अनुष्टुप्॥

॥१००॥ अयं त एमि तन्वा पुरस्ताद्विश्वे देवा अभि मा यंति पश्चात्। यदा मह्यं दीधरो भागमिंद्रादिन्मया कृणवो वीर्याणि ॥१॥ दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः। असश्च त्वं दक्षिणतः सखा मेऽधा वृत्राणि जंघनाव भूरि॥२॥ प्र सु स्तोमं भरत वाजयंत इंद्राय सत्यं यदि सत्यमस्ति। नेंद्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम॥३॥ अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना। ऋतस्य मा प्रदिशो वर्धयंत्यादर्दिरो भुवना दर्दरीमि॥४॥ आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे। मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदञ्छिशुमंतः सखायः ॥५॥ विश्वेत्ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निंद्र सुन्वते। पारावतं यत्पुरुसंभृतं वस्वपावृणोः शरभाय ऋषिबंधवे ॥६॥४॥ प्र नूनं धावता पृथङ्नेह यो वो अवावरीत्। नि षीं वृत्रस्य मर्मणि वज्रमिंद्रो अपीपतत्॥७॥ मनोजवा अयमान आयसीमतरत्पुरं। दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत्॥८॥ समुद्रे अंतः शयत उद्ना वज्रो अभीवृतः। भरंत्यस्मै संयतः पुरःप्रस्रवणा बलिं॥९॥ यद्वाग्वदंत्यविचेतनानि राष्ट्री देवानां निषसाद मंद्रा। चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम॥१०॥ देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति। सा नो

मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥११॥ सखे विष्णो
वितरं वि क्रमस्व द्यौर्देहि लोकं वज्राय विष्कभे। हनाव वृत्रं
रिणचाव सिंधूनिंद्रस्य यंतु प्रसवे विसृष्टाः ॥१२॥५॥

॥ १०१ ॥ १–१६ जमदग्निर्भार्गवः ॥ १–५[३] मित्रावरुणौ । ५[४]. ६ आदित्याः । ७. ८ अश्विनौ । ९. १० वायुः । ११. १२ सूर्यः । १३ उषाः सूर्यप्रभा वा । १४ पवमानः । १५. १६ गौः ॥ १. ५. ७. ९. ११. १३ बृहती । २. ४. ६. ८. १०. १२ सतोबृहती । ३ गायत्री । १४–१६ त्रिष्टुप् ॥

॥१०१॥ ऋधगित्था स मर्त्यः शशमे देवतातये। यो नूनं मि-
त्रावरुणावभिष्टय आचक्रे हव्यदातये ॥१॥ वर्षिष्ठक्षत्रा उरुच-
क्षसा नरा राजाना दीर्घश्रुत्तमा। ता बाहुता न दंसना रथर्यतः
साकं सूर्यस्य रश्मिभिः ॥२॥ प्र यो वां मित्रावरुणाजिरो दूतो
अद्रवत्। अयःशीर्षा मदेरघुः ॥३॥ न यः संपृच्छे न पुनर्हवीतवे न
संवादाय रमते। तस्मान्नो अद्य समृतेरुरुष्यतं बाहुभ्यां न उरु-
ष्यतं ॥४॥ प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो। वरूथ्यं वरुणे
छंद्यं वचः स्तोत्रं राजसु गायत ॥५॥६॥ ते हिन्विरे अरुणं जेन्यं
वस्वेकं पुत्रं तिसृणां। ते धामान्यमृता मर्त्यानामदब्धा अभि च-
क्षते ॥६॥ आ मे वचांस्युद्यता द्युमत्तमानि कर्त्वा। उभा यातं ना-
सत्या सजोषसा प्रति हव्यानि वीतये ॥७॥ रातिं यद्वामरक्षसं
हवामहे युवाभ्यां वाजिनीवसू। प्राचीं होत्रां प्रतिरंतावितं नरा
गृणाना जमदग्निना ॥८॥ आ नो यज्ञं दिविस्पृशं वायो याहि
सुमन्मभिः। अंतः पवित्र उपरि श्रीणानो३यं शुक्रो अयामि
ते ॥९॥ वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये। अथा
नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरं ॥१०॥७॥ बण्म-
हाँ असि सूर्य बळादित्य महाँ असि। महस्ते सतो महिमा पन-
स्यतेऽद्धा देव महाँ असि ॥११॥ बट् सूर्य श्रवसा महाँ असि

सत्रा देव महाँ असि। मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यं ॥१२॥ इयं या नीच्यर्किणी रूपा रोहिण्या कृता। चित्रेव प्रत्यदर्श्यायत्य१ंतर्दशसु बाहुषु ॥१३॥ प्रजा ह तिस्रो अत्यायमीयुर्न्य१न्या अर्कमभितो विविश्रे। बृहद्ध तस्थौ भुवनेष्वंतः पवमानो हरित आ विवेश ॥१४॥ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥१५॥ वचोविदं वाचमुदीरयंतीं विश्वाभिर्धीभिरुपतिष्ठमानां। देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः ॥१६॥८॥

॥१०२॥ १—२२ प्रयोगो भार्गव अग्निर्वा पावको बार्हस्पत्यः। अथवाग्नी गृहपतियविष्ठौ सहसः सुतौ तयोर्वान्यतरः ॥ अग्निः ॥ गायत्री ॥

॥१०२॥ त्वमग्ने बृहद्वयो दधासि देव दाशुषे। कविर्गृहपतिर्युवा ॥१॥ स न ईळानया सह देवाँ अग्ने दुवस्युवा। चिकिद्विभानवा वह ॥२॥ त्वया ह स्विद्युजा वयं चोदिष्ठेन यविष्ठ्य। अभि ष्मो वाजसातये ॥३॥ और्वभृगुवच्छुचिमप्रवानवदा हुवे। अग्निं समुद्रवाससं ॥४॥ हुवे वातस्वनं कविं पर्जन्यक्रंद्यं सहः। अग्निं समुद्रवाससं ॥५॥९॥ आ सवं सवितुर्यथा भगस्येव भुजिं हुवे। अग्निं समुद्रवाससं ॥६॥ अग्निं वो वृधंतमध्वराणां पुरूतमं। अच्छा नप्त्रे सहस्वते ॥७॥ अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या। अस्य क्रत्वा यशस्वतः ॥८॥ अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते। आ वाजैरुप नो गमत् ॥९॥ विश्वेषामिह स्तुहि होतॄणां यशस्तमं। अग्निं यज्ञेषु पूर्व्यं ॥१०॥१०॥ शीरं पावकशोचिषं ज्येष्ठो यो दमेष्वा। दीदाय दीर्घश्रुत्तमः ॥११॥ तमर्वंतं न सानसिं गृणीहि विप्र शुष्मिणं।

मित्रं न यातयज्जनं ॥ १२ ॥ उप त्वा जामयो गिरो देदिशतीर्हवि-
ष्कृतः । वायोरनीके अस्थिरन् ॥ १३ ॥ यस्य त्रिधात्ववृतं बर्हि-
स्तस्थावसंदिनं । आपश्चिन्नि दधा पदं ॥ १४ ॥ पदं देवस्य मीळ्हु-
षोऽनाधृष्टाभिरूतिभिः । भद्रा सूर्य इवोपदृक् ॥ १५ ॥ ११ ॥ अग्ने
घृतस्य धीतिभिस्तेपानो देव शोचिषा । आ देवान्वक्षि यक्षि
च ॥ १६ ॥ तं त्वाजनंत मातरः कविं देवासो अंगिरः । हव्यवाह-
ममर्त्यं ॥ १७ ॥ प्रचेतसं त्वा कवेऽग्ने दूतं वरेण्यं । हव्यवाहं नि
षेदिरे ॥ १८ ॥ नहि मे अस्त्यघ्न्या न स्वधितिर्वनन्वति । अथैता-
दृग्भरामि ते ॥ १९ ॥ यदग्ने कानि कानि चिदा ते दारूणि दध्म-
सि । ता जुषस्व यविष्ठ्य ॥ २० ॥ यदत्त्युपजिह्विका यद्वम्रो अति-
सर्पति । सर्वं तदस्तु ते घृतं ॥ २१ ॥ अग्निमिंधानो मनसा धियं
सचेत मर्त्यः । अग्निमीधे विवस्वभिः ॥ २२ ॥ १२ ॥

॥ १०३ ॥ १–१४ सोभरिः काण्वः ॥ १–१३ अग्निः । १४ अग्निर्मरुतश्च ॥ १–४. ६ बृहती ।
५ विराड्रूपा । ७. ९. ११. १३ सतोबृहती । ८. १२ ककुप् । १० ह्रसीयसी । १४ अनुष्टुप् ॥

॥ १०३ ॥ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः । उपो
षु जातमार्यस्य वर्धनमग्निं नक्षंत नो गिरः ॥ १ ॥ प्र दैवो-
दासो अग्निर्देवाँ अच्छा न मज्मना । अनु मातरं पृथिवीं वि
वावृते तस्थौ नाकस्य सानवि ॥ २ ॥ यस्माद्रेजंत कृष्टयश्चर्कृत्यानि
कृण्वतः । सहस्रसां मेधसाताविव त्मनाग्निं धीभिः सपर्यत ॥ ३ ॥
प्र यं राये निनीषसि मर्तो यस्ते वसो दाशत् । स वीरं धत्ते
अग्न उक्थशंसिनं त्मना सहस्रपोषिणं ॥ ४ ॥ स दृळ्हे चिदभि
तृणत्ति वाजमर्वता स धत्ते अक्षिति श्रवः । त्वे देवत्रा सदा
पुरूवसो विश्वा वामानि धीमहि ॥ ५ ॥ १३ ॥ यो विश्वा दयते
वसु होता मंद्रो जनानां । मधोर्न पात्रा प्रथमान्यस्मै प्र

स्तोमा यंत्यग्नये ॥६॥ अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यंते देवयवः। उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनां ॥७॥ प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे। उपस्तुतासो अग्नये ॥८॥ आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः। कुविन्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत् ॥९॥ प्रेष्ठमु प्रियाणां स्तुह्यासावातिथिं। अग्निं रथानां यमं ॥१०॥१४॥ उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति। दुष्टरा यस्य प्रवणे नोर्मयो धिया वाजं सिषासतः ॥११॥ मा नो हृणीतामतिथिर्वसुरग्निः पुरुप्रशस्त एषः। यः सुहोता स्वध्वरः ॥१२॥ मो ते रिषन्ये अच्छोक्तिभिर्वसोऽग्ने केभिश्चिदेवैः। कीरिश्चिद्धि त्वामीट्टे दूत्याय रातहव्यः स्वध्वरः ॥१३॥ आग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये। सोभर्या उप सुष्टुतिं मादयस्व स्वर्णरे ॥१४॥१५॥१०॥८॥

॥ इत्यष्टमं मंडलं समाप्तं ॥

॥१॥ १–१० मधुच्छंदाः ॥ पवमानः सोमः ॥ गायत्री ॥

॥१॥ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इंद्राय पातवे सुतः ॥१॥ रक्षोहा विश्वचर्षणिरभि योनिमयोहतं। द्रुणा सधस्थमासदत् ॥२॥ वरिवोधातमो भव मंहिष्ठो वृत्रहंतमः। पर्षि राधो मघोनां ॥३॥ अभ्यर्ष महानां देवानां वीतिमंधसा। अभि वाजमुत श्रवः ॥४॥ त्वामच्छा चरामसि तदिदर्थं दिवेदिवे। इंदो त्वे न आशसः ॥५॥१६॥ पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता। वारेण शश्वता तना ॥६॥ तमीम-

रवीः समये आ गृभ्णंति योषणो दश। स्वसारः पार्ये दिवि ॥७॥ तमीं हिन्वंत्यग्रुवो धमंति बाकुरं दृतिं। त्रिधातु वारणं मधु ॥८॥ अभी३ममघ्न्या उत श्रीणंति धेनवः शिशुं। सोममिंद्राय पातवे ॥९॥ अस्येदिंद्रो मदेष्वा विश्वा वृत्राणि जिघ्नते। शूरो मघा च मंहते ॥१०॥१७॥

॥ २ ॥ १–१० मेधातिथिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२॥ पवस्व देववीरति पवित्रं सोम रंह्या। इंद्रमिंदो वृषा विश ॥१॥ आ वच्यस्व महि प्सरो वृषेंदो द्युम्नवत्तमः। आ योनिं धर्णसिः सदः ॥२॥ अधुक्षत प्रियं मधु धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः ॥३॥ महांतं त्वा महीरन्वापो अर्षंति सिंधवः। यद्गोभिर्वासयिष्यसे ॥४॥ समुद्रो अप्सु मामृजे विष्टंभो धरुणो दिवः। सोमः पवित्रे अस्मयुः ॥५॥१८॥ अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सं सूर्येण रोचते ॥६॥ गिरस्त इंद ओजसा मर्मृज्यंते अपस्युवः। याभिर्मदाय शुंभसे ॥७॥ तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे। तव प्रशस्तयो महीः ॥८॥ अस्मभ्यमिंदविंद्रयुर्मध्वः पवस्व धारया। पर्जन्यो वृष्टिमाँ इव ॥९॥ गोषा इंदो नृषा अस्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः ॥१०॥१९॥

॥ ३ ॥ १–१० शुनःशेपः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३॥ एष देवो अमर्त्यः पर्णवीरिव दीयति। अभि द्रोणान्यासदं ॥१॥ एष देवो विपा कृतोऽति ह्वरांसि धावति। पवमानो अदाभ्यः ॥२॥ एष देवो विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृज्यते ॥३॥ एष विश्वानि वार्या शूरो यन्निव सत्वभिः। पवमानः सिषासति ॥४॥ एष देवो रथर्यति प-

वमानो दशस्यति। आविष्कृणोति वग्वनुं ॥५॥२०॥ एष वि-
प्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे ॥६॥ एष
दिवं वि धावति तिरो रजांसि धारया। पवमानः कनिक्रदत्
॥७॥ एष दिवं व्यासरत्तिरो रजांस्यस्पृतः। पवमानः स्वध्वरः॥८॥
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति ॥९॥
एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः। धारया पवते सुतः
॥१०॥२१॥

॥ ४ ॥ १–१० हिरण्यस्तूपः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४॥ सना च सोम जेषि च पवमान महि श्रवः। अथा नो
वस्यसस्कृधि ॥१॥ सना ज्योतिः सना स्व१र्विश्वा च सोम सौ-
भगा। अथा नो वस्यसस्कृधि ॥२॥ सना दक्षमुत क्रतुमप सोम
मृधो जहि। अथा नो वस्यसस्कृधि॥३॥ पवीतारः पुनीतन सो-
ममिंद्राय पातवे। अथा नो वस्यसस्कृधि ॥४॥ त्वं सूर्ये न आ भज
तव क्रत्वा तवोतिभिः। अथा नो वस्यसस्कृधि॥५॥२२॥ तव क्रत्वा
तवोतिभिर्ज्योक्पश्येम सूर्यं। अथा नो वस्यसस्कृधि ॥६॥ अभ्यर्ष
स्वायुध सोम द्विबर्हसं रयिं। अथा नो वस्यसस्कृधि॥७॥ अभ्य१-
र्षानपच्युतो रयिं समत्सु सासहिः। अथा नो वस्यसस्कृधि ॥८॥
त्वां यज्ञैरवीवृधन्पवमान विधर्मणि। अथा नो वस्यसस्कृधि॥९॥
रयिं नश्चित्रमश्विनमिंदो विश्वायुमा भर। अथा नो वस्यसस्कृधि
॥१०॥२३॥

॥ ५ ॥ १–११ असितः काश्यपो देवलो वा ॥ आप्रियः ॥ १–७ गायत्री । ८–११ अनुष्टुप् ॥

॥५॥ समिद्धो विश्वतस्पतिः पवमानो वि राजति। प्रीणन्
वृषा कनिक्रदत् ॥१॥ तनूनपात्पवमानः शृंगे शिशानो अर्ष-

ति। अंतरिक्षेण रारंजत्॥ २॥ ईळेन्यः पवमानो रयिर्वि राजति द्युमान्। मधोर्धाराभिरोजसा॥ ३॥ बर्हिः प्राचीनमोजसा पवमानः स्तृणन्हरिः। देवेषु देव ईयते॥ ४॥ उदातैर्जिहते बृहद्द्वारो देवीर्हिरण्ययीः। पवमानेन सुष्टुताः॥ ५॥ २४॥ सुशिल्पे बृहती मही पवमानो वृषण्यति। नक्तोषासा न दर्शते॥ ६॥ उभा देवा नृचक्षसा होतारा दैव्या हुवे। पवमान इंद्रो वृषा॥ ७॥ भारती पवमानस्य सरस्वतीळा मही। इमं नो यज्ञमा गमन्तिस्रो देवीः सुपेशसः॥ ८॥ त्वष्टारमग्रजां गोपां पुरोयावानमा हुवे। इंदुरिंद्रो वृषा हरिः पवमानः प्रजापतिः॥ ९॥ वनस्पतिं पवमान मध्वा समंग्धि धारया। सहस्रवल्शं हरितं भ्राजमानं हिरण्ययं॥ १०॥ विश्वे देवाः स्वाहाकृतिं पवमानस्या गत। वायुर्बृहस्पतिः सूर्योऽग्निरिंद्रः सजोषसः॥ ११॥ २५॥

॥ ६ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ ६॥ मंद्रया सोम धारया वृषा पवस्व देवयुः। अव्यो वारेष्वस्मयुः॥ १॥ अभि त्यं मद्यं मदमिंदविंद्र इति क्षर। अभि वाजिनो अर्वतः॥ २॥ अभि त्यं पूर्व्यं मदं सुवानो अर्ष पवित्र आ। अभि वाजमुत श्रवः॥ ३॥ अनु द्रप्सास इंदव आपो न प्रवतासरन्। पुनाना इंद्रमाशत॥ ४॥ यमत्यमिव वाजिनं मृजंति योषणो दश। वने क्रीळंतमत्यविं॥ ५॥ २६॥ तं गोभिर्वृषणं रसं मदाय देववीतये। सुतं भराय सं सृज॥ ६॥ देवो देवाय धारयेंद्राय पवते सुतः। पयो यदस्य पीपयत्॥ ७॥ आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः। प्रत्नं नि पाति काव्यं॥ ८॥ एवा पुनान इंद्रयुर्मदं मदिष्ठ वीतये। गुहा चिद्दधिषे गिरः॥ ९॥ २७॥

॥ ७ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ ७ ॥ असृग्रमिंदवः पथा धर्मन्नृतस्य सुश्रियः । विदाना
अस्य योजनं ॥ १ ॥ प्र धारा मध्वो अग्रियो महीरपो वि गाहते ।
हविर्हविष्षु वंद्यः ॥ २ ॥ प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने ।
सद्माभि सत्यो अध्वरः ॥ ३ ॥ परि यत्काव्या कविर्नृम्णा वसानो
अर्षति । स्वर्वाजी सिषासति ॥ ४ ॥ पवमानो अभि स्पृधो विशो
राजेव सीदति । यदीमृण्वंति वेधसः ॥ ५ ॥ २८ ॥ अव्यो वारे परि
प्रियो हरिर्वनेषु सीदति । रेभो वनुष्यते मती ॥ ६ ॥ स वायु-
मिंद्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मभिः ॥ ७ ॥
आ मित्रावरुणा भगं मध्वः पवंत ऊर्मयः । विदाना अस्य श-
क्मभिः ॥ ८ ॥ अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये । श्रवो
वसूनि सं जितं ॥ ९ ॥ २९ ॥

॥ ८ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ ८ ॥ एते सोमा अभि प्रियमिंद्रस्य काममक्षरन् । वर्धंतो अ-
स्य वीर्यं ॥ १ ॥ पुनानासश्चमूषदो गच्छंतो वायुमश्विना । ते नो
धांतु सुवीर्यं ॥ २ ॥ इंद्रस्य सोम राधसे पुनानो हार्दि चोदय । ऋत-
स्य योनिमासदं ॥ ३ ॥ मृजंति त्वा दश क्षिपो हिन्वंति सप्त धीतयः ।
अनु विप्रा अमादिषुः ॥ ४ ॥ देवेभ्यस्त्वा मदाय कं सृजानमति
मेष्यः । सं गोभिर्वासयामसि ॥ ५ ॥ ३० ॥ पुनानः कलशेष्वा वस्त्रा-
ण्यरुषो हरिः । परि गव्यान्यव्यत ॥ ६ ॥ मघोन आ पवस्व नो जहि
विश्वा अप द्विषः । इंदो सखायमा विश ॥ ७ ॥ वृष्टिं दिवः परि स्रव
द्युम्नं पृथिव्या अधि । सहो नः सोम पृत्सु धाः ॥ ८ ॥ नृचक्षसं त्वा
वयमिंद्रपीतं स्वर्विदं । भक्षीमहि प्रजामिषं ॥ ९ ॥ ३१ ॥

॥ ९ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ ९ ॥ परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः । सुवानो या-
ति कविक्रतुः ॥१॥ प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे । वीत्यर्ष
चनिष्ठया ॥२॥ स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् । म-
हान्मही ऋतावृधा ॥३॥ स सप्त धीतिभिर्हितो नद्यो अजिन्व-
दद्रुहः । या एकमक्षि वावृधुः ॥४॥ ता अभि संतमस्तृतं महे युवा-
नमा दधुः । इंदुमिंद्र तव व्रते ॥ ५ ॥ ३२ ॥ अभि वह्निरमर्त्यः सप्त
पश्यति वावहिः । क्रिविर्देवीरतर्पयत् ॥६॥ अवा कल्पेषु नः पुम-
स्तमांसि सोम योध्याः । तानि पुनान जंघनः ॥७॥ नू नव्यसे नवी-
यसे सूक्ताय साधया पथः । प्रत्नवद्रोचया रुचः ॥८॥ पवमान
महि श्रवो गामश्वं रासि वीरवत् । सना मेधां सना स्वः ॥९॥३३॥

॥ १० ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१०॥ प्र स्वानासो रथा इवार्वंतो न श्रवस्यवः । सोमासो
राये अक्रमुः ॥ १ ॥ हिन्वानासो रथा इव दधन्विरे गभस्त्योः ।
भरासः कारिणामिव ॥ २ ॥ राजानो न प्रशस्तिभिः सोमासो
गोभिरंजते । यज्ञो न सप्त धातृभिः ॥३॥ परि सुवानास इंदवो म-
दाय बर्हणा गिरा । सुता अर्षंति धारया ॥४॥ आपानासो विव-
स्वंतो जनंत उषसो भगं । सूरा अण्वं वि तन्वते ॥५॥३४॥ अप
द्वारा मतीनां प्रत्ना ऋण्वंति कारवः । वृष्णो हरस आयवः ॥६॥
समीचीनास आसते होतारः सप्तजामयः । पदमेकस्य पिप्रतः
॥७॥ नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा । कवेरपत्यमा
दुहे ॥८॥ अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितं । सूरः पश्यति
चक्षसा ॥ ९ ॥ ३५ ॥

॥ ११ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥११॥ उपास्मै गायता नरः पवमानायेंदवे। अभि देवाँ इयक्षते ॥१॥ अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः। देवं देवाय देवयु ॥२॥ स नः पवस्व शं गवे शं जनाय शमर्वते। शं राजन्नोषधीभ्यः ॥३॥ बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे। सोमाय गाथमर्चत ॥४॥ हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन। मधावा धावता मधु ॥५॥३६॥ नमसेदुप सीदत दध्नेदभि श्रीणीतन। इंदुमिंद्रे दधातन ॥६॥ अमित्रहा विचर्षणिः पवस्व सोम शं गवे। देवेभ्यो अनुकामकृत् ॥७॥ इंद्राय सोम पातवे मदाय परि षिच्यसे। मनश्चिन्मनसस्पतिः ॥८॥ पवमान सुवीर्यं रयिं सोम रिरीहि नः। इंदविंद्रेण नो युजा ॥९॥३७॥

॥ १२ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१२॥ सोमा असृग्रमिंदवः सुता ऋतस्य सादने। इंद्राय मधुमत्तमाः ॥१॥ अभि विप्रा अनूषत गावो वत्सं न मातरः। इंद्रं सोमस्य पीतये ॥२॥ मदच्युत्क्षेति सादने सिंधोरूर्मा विपश्चित्। सोमो गौरी अधि श्रितः ॥३॥ दिवो नाभा विचक्षणोऽव्यो वारे महीयते। सोमो यः सुक्रतुः कविः ॥४॥ यः सोमः कलशेष्वाँ अंतः पवित्र आहितः। तमिंदुः परि षस्वजे ॥५॥३८॥ प्र वाचमिंदुरिष्यति समुद्रस्याधि विष्टपि। जिन्वन्कोशं मधुश्चुतं ॥६॥ नित्यस्तोत्रो वनस्पतिर्धीनामंतः सबर्दुघः। हिन्वानो मानुषा युगा ॥७॥ अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति। विप्रस्य धारया कविः ॥८॥ आ पवमान धारय रयिं सहस्रवर्चसं। अस्मे इंदो स्वाभुवं ॥९॥३९॥७॥

॥ १३ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१३॥ सोमः पुनानो अर्षति सहस्रधारो अत्यविः। वायो-
रिंद्रस्य निष्कृतं ॥१॥ पवमानमवस्यवो विप्रमभि प्र गायत।
सुष्वाणं देववीतये॥२॥ पवंते वाजसातये सोमाः सहस्रपाजसः।
गृणाना देववीतये॥३॥ उत नो वाजसातये पवस्व बृहतीरिषः।
द्युमदिंदो सुवीर्यं॥४॥ ते नः सहस्रिणं रयिं पवंतामा सुवीर्यं। सु-
वाना देवास इंदवः॥५॥१॥ अत्या हियाना न हेतृभिरसृग्रं वा-
जसातये। वि वारमव्यमाशवः॥६॥ वाश्रा अर्षंतींदवोऽभि
वत्सं न धेनवः। दधन्विरे गभस्त्योः॥७॥ जुष्ट इंद्राय मत्सरः पव-
मान कनिक्रदत्। विश्वा अप द्विषो जहि॥८॥ अपघ्नंतो अ-
राव्णः पवमानाः स्वर्दृशः। योनावृतस्य सीदत॥९॥२॥

॥ १४ ॥ १–८ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१४॥ परि प्रासिष्यदत्कविः सिंधोरूर्मावधि श्रितः। कारं
बिभ्रत्पुरुस्पृहं॥१॥ गिरा यदी सबंधवः पंच व्राता अपस्यवः। प-
रिष्कृण्वंति धर्णसिं॥२॥ आदस्य शुष्मिणो रसे विश्वे देवा अम-
त्सत। यदी गोभिर्वसायते॥३॥ निरिणानो वि धावति जहच्छ-
र्याणि तान्वा। अत्रा सं जिघ्नते युजा॥४॥ नप्तीभिर्यो विवस्वतः
शुभ्रो न मामृजे युवा। गाः कृण्वानो न निर्णिजं॥५॥३॥ अति
श्रिती तिरश्चता गव्या जिगात्यण्व्या। वग्नुमियर्ति यं विदे॥६॥
अभि क्षिपः समग्मत मर्जयंतीरिषस्पतिं। पृष्ठा गृभ्णत वाजिनः
॥७॥ परि दिव्यानि मर्मृशद्विश्वानि सोम पार्थिवा। वसूनि या-
ह्यस्मयुः॥८॥४॥

॥ १५ ॥ १–८ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१५॥ एष धिया यात्यण्व्या शूरो रथेभिराशुभिः।

गच्छन्निंद्रस्य निष्कृतं ॥१॥ एष पुरू धियायते बृहते देवतातये। यत्रामृतास आसते ॥२॥ एष हितो वि नीयतेऽंतः शुभ्रावता पथा। यदी तुंजंति भूर्णयः ॥३॥ एष शृंगाणि दोधुवच्छिशीते यूथ्यो३ वृषा। नृम्णा दधान ओजसा ॥४॥ एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः। पतिः सिंधूनां भवन् ॥५॥ एष वसूनि पिब्दना परुषा ययिवाँ अति। अव शादेषु गच्छति ॥६॥ एतं मृजंति मर्ज्यमुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः ॥७॥ एतमु त्यं दश क्षिपो मृजंति सप्त धीतयः। स्वायुधं मदिंतमं ॥८॥५॥

॥ १६ ॥ १–८ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१६॥ प्र ते सोतार ओण्यो३ रसं मदाय घृष्वये। सर्गो न तक्त्येतशः ॥१॥ क्रत्वा दक्षस्य रथ्यमपो वसानमंधसा। गोषामण्वेषु सश्चिम ॥२॥ अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज। पुनीहींद्राय पातवे ॥३॥ प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति। क्रत्वा सधस्थमासदत् ॥४॥ प्र त्वा नमोभिरिंदव इंद्र सोमा असृक्षत। महे भराय कारिणः ॥५॥ पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति ॥६॥ दिवो न सानु पिप्युषी धारा सुतस्य वेधसः। वृथा पवित्रे अर्षति ॥७॥ त्वं सोम विपश्चितं तना पुनान आयुषु। अव्यो वारं वि धावसि ॥८॥६॥

॥ १७ ॥ १–८ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१७॥ प्र निम्नेनेव सिंधवो घ्नंतो वृत्राणि भूर्णयः। सोमा असृग्रमाशवः ॥१॥ अभि सुवानास इंदवो वृष्टयः पृथिवीमिव। इंद्रं सोमासो अक्षरन् ॥२॥ अत्यूर्मिर्मत्सरो मदः सोमः प-

विचे अर्षति। विघ्नन्रक्षांसि देवयुः॥३॥ आ कलशेषु धावति प-
विचे परि षिच्यते। उक्थैर्यज्ञेषु वर्धते॥४॥ अति त्री सोम रोचना
रोहन्न भ्राजसे दिवं। इष्णन्त्सूर्यं न चोदयः॥५॥ अभि विप्रा अनूषत
मूर्धन्यज्ञस्य कारवः। दधानाश्चक्षसि प्रियं॥६॥ तमु त्वा वाजिनं
नरो धीभिर्विप्रा अवस्यवः। मृजंति देवतातये॥७॥ मधोर्धारा-
मनु क्षर तीव्रः सधस्थमासदः। चारुर्ऋताय पीतये॥८॥७॥

॥१८॥ १—७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१८॥ परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः। मदेषु स-
र्वधा असि॥१॥ त्वं विप्रस्त्वं कविर्मधु प्र जातमंधसः। मदेषु सर्वधा
असि॥२॥ तव विश्वे सजोषसो देवासः पीतिमाशत। मदेषु सर्व-
धा असि॥३॥ आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे। मदेषु
सर्वधा असि॥४॥ य इमे रोदसी मही सं मातरेव दोहते। मदेषु
सर्वधा असि॥५॥ परि यो रोदसी उभे सद्यो वाजेभिरर्षति। मदेषु
सर्वधा असि॥६॥ स शुष्मी कलशेष्वा पुनानो अचिक्रदत्। मदेषु
सर्वधा असि॥७॥८॥

॥१९॥ १—७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१९॥ यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु। तन्नः पु-
नान आ भर॥१॥ युवं हि स्थः स्वर्पती इंद्रश्च सोम गोपती।
ईशाना पिप्यतं धियः॥२॥ वृषा पुनान आयुषु स्तनयन्नधि
बर्हिषि। हरिः सन्योनिमासदत्॥३॥ अवावशंत धीतयो वृ-
षभस्याधि रेतसि। सूनोर्वत्सस्य मातरः॥४॥ कुविद्वृषण्यं-
तीभ्यः पुनानो गर्भमादधत्। याः शुक्रं दुहते पयः॥५॥ उप
शिक्षापतस्थुषो भियसमा धेहि शत्रुषु। पवमान विदा रयिं॥६॥

नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर। दूरे वा सतो अंति वा ॥७॥९॥

॥ २० ॥ १—७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२०॥ प्र कविर्देववीतयेऽव्यो वारेभिरर्षति। साह्वान्विश्वा अभि स्पृधः ॥१॥ स हि ष्मा जरितृभ्य आ वाजं गोमंतमिन्वति। पवमानः सहस्रिणं ॥२॥ परि विश्वानि चेतसा मृशसे पवसे मती। स नः सोम श्रवो विदः ॥३॥ अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिं। इषं स्तोतृभ्य आ भर ॥४॥ त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ। पुनानो वह्ने अद्भुत ॥५॥ स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति ॥६॥ क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि। दधत्स्तोत्रे सुवीर्यं ॥७॥१०॥

॥ २१ ॥ १—७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२१॥ एते धावंतींदवः सोमा इंद्राय घृष्वयः। मत्सरासः स्वर्विदः ॥१॥ प्रवृण्वंतो अभियुजः सुष्वये वरिवोविदः। स्वयं स्तोत्रे वयस्कृतः ॥२॥ वृथा क्रीळंत इंदवः सधस्थमभ्येकमित्। सिंधोरूर्मा व्यक्षरन् ॥३॥ एते विश्वानि वार्या पवमानास आशत। हिता न सप्तयो रथे ॥४॥ आस्मिन्पिशंगमिंदवो दधाता वेनमादिशे। यो अस्मभ्यमरावा ॥५॥ ऋभुर्न रथ्यं नवं दधाता केतमादिशे। शुक्राः पवध्वमर्णसा ॥६॥ एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत। सतः प्रासाविषुर्मतिं ॥७॥११॥

॥ २२ ॥ १—७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२२॥ एते सोमास आशवो रथा इव प्र वाजिनः। सर्गाः

सृष्टा अहेषत ॥१॥ एते वाता इवोरवः पर्जन्यस्येव वृष्टयः । अग्ने-
रिव भ्रमा वृथा ॥२॥ एते पूता विपश्चितः सोमासो दध्याशिरः ।
विपा व्यानशुर्धियः ॥३॥ एते मृष्टा अमर्त्याः ससृवांसो न शश्र-
मुः । इयक्षंतः पथो रजः ॥४॥ एते पृष्ठानि रोदसोर्विप्रयंतो व्या-
नशुः । उतेदमुत्तमं रजः ॥५॥ तंतुं तन्वानमुत्तममनु प्रवत आशत ।
उतेदमुत्तमाय्यं ॥६॥ त्वं सोम पणिभ्य आ वसु गव्यानि धारयः ।
ततं तंतुमचिक्रदः ॥७॥१२॥

॥२३॥ १–७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२३॥ सोमा असृग्रमाशवो मधोर्मदस्य धारया । अभि वि-
श्वानि काव्या ॥१॥ अनु प्रत्नास आयवः पदं नवीयो अक्रमुः । रुचे
जनंत सूर्यं ॥२॥ आ पवमान नो भरार्यो अदाशुषो गयं । कृधि प्र-
जावतीरिषः ॥३॥ अभि सोमास आयवः पवंते मद्यं मदं । अभि
कोशं मधुश्चुतं ॥४॥ सोमो अर्षति धर्णसिर्दधान इंद्रियं रसं । सु-
वीरो अभिशस्तिपाः ॥५॥ इंद्राय सोम पवसे देवेभ्यः सधमाद्यः ।
इंदो वाजं सिषाससि ॥६॥ अस्य पीत्वा मदानामिंद्रो वृत्राण्यप्र-
ति । जघान जघनच्च नु ॥७॥१३॥

॥२४॥ १–७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२४॥ प्र सोमासो अधन्विषुः पवमानास इंदवः । श्री-
णाना अप्सु मृंजत ॥१॥ अभि गावो अधन्विषुरापो न प्रवता
यतीः । पुनाना इंद्रमाशत ॥२॥ प्र पवमान धन्वसि सोमेंद्राय
पातवे । नृभिर्यतो वि नीयसे ॥३॥ त्वं सोम नृमादनः पवस्व
चर्षणीसहे । सस्निर्यो अनुमाद्यः ॥४॥ इंदो यदद्रिभिः सुतः
पवित्रं परिधावसि । अरमिंद्रस्य धाम्ने ॥५॥ पवस्व वृत्रह-

तमोक्थेभिरनुमाद्यः। शुचिः पावको अद्भुतः ॥६॥ शुचिः पावक उच्यते सोमः सुतस्य मध्वः। देवावीरघशंसहा ॥७॥१४॥१॥

॥ २५ ॥ १-६ दृळ्हच्युत आगस्त्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२५॥ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः ॥१॥ पवमान धिया हितो३ऽभि योनिं कनिक्रदत्। धर्मणा वायुमा विश ॥२॥ सं देवैः शोभते वृषा कविर्योनावधि प्रियः। वृत्रहा देववीतमः ॥३॥ विश्वा रूपाण्याविशन्पुनानो याति हर्यतः। यत्रामृतास आसते ॥४॥ अरुषो जनयन्गिरः सोमः पवत आयुषक्। इंद्रं गच्छन्कविक्रतुः ॥५॥ आ पवस्व मदिंतम पवित्रं धारया कवे। अर्कस्य योनिमासदं ॥६॥१५॥

॥ २६ ॥ १-६ इध्मवाहो दार्ढच्युतः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२६॥ तममृक्षंत वाजिनमुपस्थे अदितेरधि। विप्रासो अण्व्या धिया ॥१॥ तं गावो अभ्यनूषत सहस्रधारमक्षितं। इंदुं धर्तारमा दिवः ॥२॥ तं वेधां मेधयाह्यन्पवमानमधि द्यवि। धर्णसिं भूरिधायसं ॥३॥ तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः। पतिं वाचो अदाभ्यं ॥४॥ तं सानावधि जामयो हरिं हिन्वंत्यद्रिभिः। हर्यतं भूरिचक्षसं ॥५॥ तं त्वा हिन्वंति वेधसः पवमान गिरावृधं। इंदविंद्राय मत्सरं ॥६॥१६॥

॥ २७ ॥ १-६ नृमेधः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२७॥ एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्नप स्रिधः ॥१॥ एष इंद्राय वायवे स्वर्जित्परि षिच्यते। पवित्रे दक्षसाधनः ॥२॥ एष नृभिर्वि नीयते दिवो मूर्धा

वृषा॑ सु॒तः । सोमो॑ वने॑षु विश्व॒वित् ॥३॥ ए॒ष गव्यु॑रचिक्रद॒त्पव॑मानो हिरण्य॒युः । इंदुः॑ सत्रा॒जिदस्तृ॑तः ॥४॥ ए॒ष सूर्ये॑ण हासते पव॑मानो॒ अधि॒ द्यवि॑ । प॒वित्रे॑ मत्स॒रो मदः॑ ॥५॥ ए॒ष शु॒ष्म्य॑सिष्यदद॒न्तरि॑क्षे॒ वृषा॒ हरिः॑ । पु॒ना॒न इंदु॒रिंद्र॒मा ॥६॥१७॥

॥ २८ ॥ १–६ प्रियमेधः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२८॥ ए॒ष वा॒जी हि॒तो नृभि॑र्विश्व॒विन्मन॑स॒स्पतिः॑ । अव्यो॒ वारं॒ वि धा॑वति ॥१॥ ए॒ष प॒वित्रे॑ अक्षर॒त्सोमो॑ दे॒वेभ्यः॑ सु॒तः । विश्वा॒ धामा॑न्याविश॒न् ॥२॥ ए॒ष दे॒वः शु॑भायते॒ऽधि॒ योना॒वम॑र्त्यः । वृ॒त्र॒हा दे॑व॒वीत॑मः ॥३॥ ए॒ष वृषा॒ कनि॑क्रदद्द॒शभि॑र्जा॒मिभि॑र्य॒तः । अ॒भि द्रोणा॑नि धावति ॥४॥ ए॒ष सूर्य॑मरोचय॒त्पव॑मानो॒ विच॑र्षणिः । विश्वा॒ धामा॑नि विश्व॒वित् ॥५॥ ए॒ष शु॒ष्म्यदा॑भ्यः॒ सोमः॑ पुना॒नो अ॑र्षति । दे॒वा॒वीर॑घशंस॒हा ॥६॥१८॥

॥ २९ ॥ १–६ नृमेधः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२९॥ प्रास्य॒ धारा॑ अक्षर॒न्वृष्णः॑ सु॒तस्यौज॑सा । दे॒वाँ अनु॑ प्र॒भूष॑तः ॥१॥ सप्ति॑ मृजंति वे॒धसो॑ गृ॒णंतः॑ का॒रवो॑ गि॒रा । ज्योति॑र्जज्ञा॒नमु॒क्थ्य॑म् ॥२॥ सु॒षहा॑ सोम॒ तानि॑ ते पुना॒नाय॑ प्रभूवसो । वर्धा॑ समु॒द्रमु॒क्थ्य॑म् ॥३॥ विश्वा॒ वसू॑नि सं॒जय॒न्पव॑स्व सोम॒ धार॑या । इ॒नु द्वेषां॑सि स॒ध्र्य॑क् ॥४॥ रक्षा॒ सु नो॒ अर॑रुषः स्व॒नात्स॑मस्य॒ कस्य॑ चित् । नि॒दो यत्र॑ मुमु॒च्महे॑ ॥५॥ एंदो॒ पार्थि॑वं र॒यिं दि॒व्यं प॑वस्व॒ धार॑या । द्यु॒मंतं॒ शुष्म॒मा भ॑र ॥६॥१९॥

॥ ३० ॥ १–६ बिंदुः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३०॥ प्र धारा॑ अस्य शु॒ष्मिणो॒ वृथा॑ प॒वित्रे॑ अक्षरन् । पु॒नानो॒

वाचमिष्यति ॥१॥ इंदुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत्। इयर्ति वग्नुमिंद्रियं॥२॥ आ नः शुष्मं नृषाह्यं वीरवंतं पुरुस्पृहं। पवस्व सोम धारया॥३॥ प्र सोमो अति धारया पवमानो असिष्यदत्। अभि द्रोणान्यासदं॥४॥ अप्सु त्वा मधुमत्तमं हरिं हिन्वंत्यद्रिभिः। इंदविंद्राय पीतये॥५॥ सुनोता मधुमत्तमं सोममिंद्राय वज्रिणे। चारुं शर्धाय मत्सरं॥६॥२०॥

॥ ३१ ॥ १–६ गोतमः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३१॥ प्र सोमासः स्वाध्य१ः पवमानासो अक्रमुः। रयिं कृण्वंति चेतनं॥१॥ दिवस्पृथिव्या अधि भवेंदो द्युम्नवर्धनः। भवा वाजानां पतिः॥२॥ तुभ्यं वाता अभिप्रियस्तुभ्यमर्षंति सिंधवः। सोम वर्धंति ते महः॥३॥ आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं। भवा वाजस्य संगथे॥४॥ तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितं। वर्षिष्ठे अधि सानवि॥५॥ स्वायुधस्य ते सतो भुवनस्य पते वयं। इंदो सखित्वमुश्मसि॥६॥२१॥

॥ ३२ ॥ १–६ श्यावाश्वः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३२॥ प्र सोमासो मदच्युतः श्रवसे नो मघोनः। सुता विदथे अक्रमुः॥१॥ आदीं त्रितस्य योषणो हरिं हिन्वंत्यद्रिभिः। इंदुमिंद्राय पीतये॥२॥ आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिं। अत्यो न गोभिरज्यते॥३॥ उभे सोमावचाकशन्मृगो न तक्तो अर्षसि। सीदन्नृतस्य योनिमा॥४॥ अभि गावो अनूषत योषा जारमिव प्रियं। अगन्नाजिं यथा हितं॥५॥ अस्मे धेहि द्युमद्यशो मघवद्भ्यश्च मह्यं च। सनिं मेधामुत श्रवः॥६॥२२॥

॥ ३३ ॥ १–६ त्रितः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३३॥ प्र सोमासो विपश्चितोऽपां न यंत्यूर्मयः। वनानि महिषा इव॥१॥ अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया। वाजं गोमंतमक्षरन्॥२॥ सुता इंद्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षंति विष्णवे॥३॥ तिस्रो वाच उदीरते गावो मिमंति धेनवः। हरिरेति कनिक्रदत्॥४॥ अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः। मर्मृज्यंते दिवः शिशुं॥५॥ रायः समुद्रांश्चतुरोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणः॥६॥२३॥

॥ ३४ ॥ १–६ त्रितः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३४॥ प्र सुवानो धारया तनेंदुर्हिन्वानो अर्षति। रुजद्दृळ्हा व्योजसा॥१॥ सुत इंद्राय वायवे वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे॥२॥ वृषाणं वृषभिर्यतं सुन्वंति सोममद्रिभिः। दुहंति शक्मना पयः॥३॥ भुवत्त्रितस्य मर्ज्यो भुवदिंद्राय मत्सरः। सं रूपैरज्यते हरिः॥४॥ अभीमृतस्य विष्टपं दुहते पृश्निमातरः। चारु प्रियतमं हविः॥५॥ समेनमह्रुता इमा गिरो अर्षंति सस्रुतः। धेनूर्वाश्रो अवीवशत्॥६॥२४॥

॥ ३५ ॥ १–६ प्रभूवसुः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३५॥ आ नः पवस्व धारया पवमान रयिं पृथुं। यया ज्योतिर्विदासि नः॥१॥ इंदो समुद्रमींखय पवस्व विश्वमेजय। रायो धर्ता न ओजसा॥२॥ त्वया वीरेण वीरवोऽभि ष्याम पृतन्यतः। क्षरा णो अभि वार्यं॥३॥ प्र वाजमिंदुरिष्यति सिषासन्वाजसा ऋषिः। व्रता विदान आयुधा॥४॥ तं गीर्भिर्वाचमींखयं पुनानं वासयामसि। सोमं जनस्य गोपतिं॥५॥ विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः। पुनानस्य प्रभूवसोः॥६॥२५॥

॥ ३६ ॥ १–६ प्रभूवसुः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३६॥ असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः । कार्ष्मन्वाजी
न्यक्रमीत् ॥१॥ स वह्निः सोम जागृविः पवस्व देववीरति । अभि
कोशं मधुश्चुतं ॥२॥ स नो ज्योतींषि पूर्व्य पवमान वि रोचय । क्रत्वे
दक्षाय नो हिनु ॥३॥ शुंभमान ऋतायुभिर्मृज्यमानो गभस्त्योः ।
पवते वारे अव्यये ॥४॥ स विश्वा दाशुषे वसु सोमो दिव्यानि पा-
र्थिवा । पवतामांतरिक्ष्या ॥५॥ आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम
रोहसि । वीरयुः शवसस्पते ॥६॥२६॥

॥ ३७ ॥ १–६ रहूगणः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३७॥ स सुतः पीतये वृषा सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि
देवयुः ॥१॥ स पवित्रे विचक्षणो हरिरर्षति धर्णसिः । अभि योनिं
कनिक्रदत् ॥२॥ स वाजी रोचना दिवः पवमानो वि धावति ।
रक्षोहा वारमव्ययं ॥३॥ स त्रितस्याधि सानवि पवमानो अरो-
चयत् । जामिभिः सूर्यं सह ॥४॥ स वृत्रहा वृषा सुतो वरिवोवि-
ददाभ्यः । सोमो वाजमिवासरत् ॥५॥ स देवः कविनेषितो३भि
द्रोणानि धावति । इंदुरिंद्राय मंहना ॥६॥२७॥

॥ ३८ ॥ १–६ रहूगणः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३८॥ एष उ स्य वृषा रथोऽव्यो वारेभिरर्षति । गच्छन्वाजं
सहस्रिणं ॥१॥ एतं त्रितस्य योषणो हरिं हिन्वंत्यद्रिभिः । इंदुमिं-
द्राय पीतये ॥२॥ एतं त्यं हरितो दश मर्मृज्यंते अपस्युवः । या-
भिर्मदाय शुंभते ॥३॥ एष स्य मानुषीष्वा श्येनो न विक्षु सीदति ।
गच्छंजारो न योषितं ॥४॥ एष स्य मद्यो रसोऽव चष्टे दिवः
शिशुः । य इंदुर्वारमाविशत् ॥५॥ एष स्य पीतये सुतो हरिरर्षति
धर्णसिः । क्रंदन्योनिमभि प्रियं ॥६॥२८॥

॥ ३९ ॥ १–६ बृहन्मतिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३९॥ आशुरर्ष बृहन्मते परि प्रियेण धाम्ना। यत्र देवा इति ब्रुवन्॥१॥ परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः। वृष्टिं दिवः परि स्रव ॥२॥ सुत एति पवित्र आ त्विषिं दधान ओजसा। विचक्षाणो विरोचयन्॥३॥ अयं स यो दिवस्परि रघुयामा पवित्र आ। सिंधोरूर्मा व्यक्षरत् ॥४॥ आविवासन्परावतो अथो अर्वावतः सुतः। इंद्राय सिच्यते मधु ॥५॥ समीचीना अनूषत हरिं हिन्वंत्यद्रिभिः। योनावृतस्य सीदत ॥६॥२९॥

॥ ४० ॥ १–६ बृहन्मतिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४०॥ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुंभंति विप्रं धीतिभिः ॥१॥ आ योनिमरुणो रुहद्गमदिंद्रं वृषा सुतः। ध्रुवे सदसि सीदति ॥२॥ नू नो रयिं महामिंदोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणं॥३॥ विश्वा सोम पवमान द्युम्नानींदवा भर। विदाः सहस्रिणीरिषः ॥४॥ स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यं। जरितुर्वर्धया गिरः ॥५॥ पुनान इंदवा भर सोम द्विबर्हसं रयिं। वृषन्निंदो न उक्थ्यं ॥६॥३०॥

॥ ४१ ॥ १–६ मेध्यातिथिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४१॥ प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः। घ्नंतः कृष्णामप त्वचं ॥१॥ सुवितस्य मनामहेऽति सेतुं दुराव्यं। साह्वांसो दस्युमव्रतं ॥२॥ शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः। चरंति विद्युतो दिवि ॥३॥ आ पवस्व महीमिषं गोमदिंदो हिरण्यवत्। अश्वावद्वाजवत्सुतः ॥४॥ स पवस्व विचर्षण आ मही रोदसी पृण। उषाः सूर्यो न रश्मिभिः ॥५॥

परि णः शर्मयंत्या धारया सोम विश्वतः । सरा रसेव विष्टपं ॥ ६ ॥ ३१ ॥

॥ ४२ ॥ १—६ मेध्यातिथिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४२॥ जनयन्रोचना दिवो जनयन्नप्सु सूर्यं । वसानो गा अपो हरिः ॥१॥ एष प्रत्नेन मन्मना देवो देवेभ्यस्परि । धारया पवते सुतः ॥२॥ वावृधानाय तूर्वये पवंते वाजसातये । सोमाः सहस्रपाजसः ॥३॥ दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते । क्रंदन्देवाँ अजीजनत् ॥४॥ अभि विश्वानि वार्याभि देवाँ ऋतावृधः । सोमः पुनानो अर्षति ॥५॥ गोमन्नः सोम वीरवदश्वावद्वाजवत्सुतः । पवस्व बृहतीरिषः ॥६॥३२॥

॥ ४३ ॥ १—६ मेध्यातिथिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४३॥ यो अत्य इव मृज्यते गोभिर्मदाय हर्यतः । तं गीर्भिर्वासयामसि ॥१॥ तं नो विश्वा अवस्युवो गिरः शुंभंति पूर्वथा । इंदुमिंद्राय पीतये ॥२॥ पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः । विप्रस्य मेध्यातिथेः ॥३॥ पवमान विदा रयिमस्मभ्यं सोम सुश्रियं । इंदो सहस्रवर्चसं ॥४॥ इंदुरत्यो न वाजसृत्कनिक्रंति पवित्र आ । यदक्षारति देवयुः ॥५॥ पवस्व वाजसातये विप्रस्य गृणतो वृधे । सोम रास्व सुवीर्यं ॥६॥३३॥८॥६॥

॥ ४४ ॥ १—६ अयास्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४४॥ प्र ण इंदो महे तन ऊर्मिं न बिभ्रदर्षसि । अभि देवाँ अयास्यः ॥१॥ मती जुष्टो धिया हितः सोमो हिन्वे परावति । विप्रस्य धारया कविः ॥२॥ अयं देवेषु जागृविः सुत एति पवित्र आ । सोमो याति विचर्षणिः ॥३॥ स नः पवस्व वा-

जयुर्ध्वंत्राणग्धारमध्वरं। बर्हिष्माँ आ विवासति॥४॥ स नो भगाय वायवे विप्रवीरः सदावृधः। सोमो देवेष्वा यमत्॥५॥ स नो अद्य वसुत्तये क्रतुविद्गातुवित्तमः। वाजं जेषि श्रवो बृहत्॥६॥१॥

॥ ४५ ॥ १—६ अयास्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४५॥ स पवस्व मदाय कं नृचक्षा देववीतये। इंदविंद्राय पीतये॥१॥ स नो अर्षाभि दूत्यं१ त्वमिंद्राय तोशसे। देवान्त्सखिभ्य आ वरं॥२॥ उत त्वामरुणं वयं गोभिरंज्मो मदाय कं। वि नो राये दुरो वृधि॥३॥ अत्यू पवित्रमक्रमीद्वाजी धुरं न यामनि। इंदुर्देवेषु पत्यते॥४॥ समी सखायो अस्वरन्वने क्रीळंतमत्यविं। इंदुं नावा अनूषत॥५॥ तया पवस्व धारया यया पीतो विचक्षसे। इंदो स्तोत्रे सुवीर्यं॥६॥२॥

॥ ४६ ॥ १—६ अयास्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४६॥ असृग्रन्देववीतयेऽत्यासः कृत्व्या इव। क्षरंतः पर्वतावृधः॥१॥ परिष्कृतास इंदवो योषेव पित्र्यावती। वायुं सोमा असृक्षत॥२॥ एते सोमास इंदवः प्रयस्वंतश्चमू सुताः। इंद्रं वर्धंति कर्मभिः॥३॥ आ धावता सुहस्त्यः शुक्रा गृभ्णीत मंथिना। गोभिः श्रीणीत मत्सरं॥४॥ स पवस्व धनंजय प्रयंता राधसो महः। अस्मभ्यं सोम गातुवित्॥५॥ एतं मृजंति मर्ज्यं पवमानं दश क्षिपः। इंद्राय मत्सरं मदं॥६॥३॥

॥ ४७ ॥ १—५ कविर्भार्गवः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४७॥ अया सोमः सुकृत्यया महश्चिदभ्यवर्धत। मंदान उदृषायते॥१॥ कृतानीदस्य कर्त्वा चेतंते दस्युतर्हं-

णा। कृणा च धृष्णुश्चयते ॥२॥ आत्सोम इंद्रियो रसो वज्रः सहस्रसा भुवत्। उक्थं यदस्य जायते ॥३॥ स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति। यदी मर्मृज्यते धियः ॥४॥ सिषासतू रयीणां वाजेष्ववंतामिव। भरेषु जिग्युषामसि ॥५॥४॥

॥४८॥ १–५ कविर्भार्गवः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४८॥ तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः। चारुं सुकृत्ययेमहे ॥१॥ संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदं। शतं पुरो रुरुक्षणिं ॥२॥ अतस्त्वा रयिमभि राजानं सुक्रतो दिवः। सुपर्णो अव्यथिर्भरत् ॥३॥ विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरं। गोपामृतस्य विर्भरत् ॥४॥ अधा हिन्वान इंद्रियं ज्यायो महित्वमानशे। अभिष्टिकृद्विचर्षणिः ॥५॥५॥

॥४९॥ १–५ कविर्भार्गवः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४९॥ पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि। अयक्ष्मा बृहतीरिषः ॥१॥ तया पवस्व धारया यया गाव इहागमन्। जन्यास उप नो गृहं ॥२॥ घृतं पवस्व धारया यज्ञेषु देववीतमः। अस्मभ्यं वृष्टिमा पव ॥३॥ स न ऊर्जे व्य१व्ययं पवित्रं धाव धारया। देवासः शृणवन्हि कं ॥४॥ पवमानो असिष्यद्रक्षांस्यपजंघनत्। प्रत्नवद्रोचयन्रुचः ॥५॥६॥

॥५०॥ १–५ उचथ्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५०॥ उत्ते शुष्मास ईरते सिंधोरूर्मेरिव स्वनः। वाणस्य चोदया पविं ॥१॥ प्रसवे त उदीरते तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि ॥२॥ अव्यो वारे परि प्रियं हरिं हिन्वंत्यद्रिभिः। पवमानं मधुश्चुतं ॥३॥ आ पवस्व मदिं-

तम पवित्रं धारया कवे । अर्कस्य योनिमासदं ॥४॥ स पवस्व मदिंतम गोभिरंजानो अक्तुभिः । इंदविंद्राय पीतये ॥५॥७॥

॥ ५१ ॥ १–५ उचथ्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५१॥ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज । पुनीहींद्राय पातवे ॥१॥ दिवः पीयूषमुत्तमं सोममिंद्राय वज्रिणे । सुनोता मधुमत्तमं ॥२॥ तव त्य इंदो अंधसो देवा मधोर्व्यश्नते । पवमानस्य मरुतः ॥३॥ त्वं हि सोम वर्धयंत्सुतो मदाय भूर्णये । वृषंत्स्तोतारमूतये ॥४॥ अभ्यर्ष विचक्षण पवित्रं धारया सुतः । अभि वाजमुत श्रवः ॥५॥८॥

॥ ५२ ॥ १–५ उचथ्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५२॥ परि द्युक्षः सनद्रयिर्भरद्वाजं नो अंधसा । सुवानो अर्ष पवित्र आ ॥१॥ तव प्रत्नेभिरध्वभिरव्यो वारे परि प्रियः । सहस्रधारो यात्तना ॥२॥ चरुर्न यस्तमींखयेंदो न दानमींखय । वधैर्वधस्नवींखय ॥३॥ नि शुष्ममिंदवेषां पुरुहूत जनानां । यो अस्माँ आदिदेशति ॥४॥ शतं न इंद ऊतिभिः सहस्रं वा शुचीनां । पवस्व मंहयद्रयिः ॥५॥९॥

॥ ५३ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५३॥ उत्ते शुष्मासो अस्थू रक्षो भिंदंतो अद्रिवः । नुदस्व याः परिस्पृधः ॥१॥ अया निजघ्निरोजसा रथसंगे धने हिते । स्तवा अबिभ्युषा हृदा ॥२॥ अस्य व्रतानि नाधृषे पवमानस्य दूढ्या । रुज यस्त्वा पृतन्यति ॥३॥ तं हिन्वंति मदच्युतं हरिं नदीषु वाजिनं । इंदुमिंद्राय मत्सरं ॥४॥१०॥

॥ ५४ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५४॥ अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिं ॥१॥ अयं सूर्यइवोपदृगयं सरांसि धावति । सप्त प्रवत आ दिवं ॥२॥ अयं विश्वानि तिष्ठति पुनानो भुवनोपरि । सोमो देवो न सूर्यः ॥३॥ परि णो देववीतये वाजाँ अर्षसि गोमतः । पुनान इंदविंद्रयुः ॥४॥११॥

॥ ५५ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५५॥ यवंयवं नो अंधसा पुष्टंपुष्टं परि स्रव । सोम विश्वा च सौभगा ॥१॥ इंदो यथा तव स्तवो यथा ते जातमंधसः । नि बर्हिषि प्रिये सदः ॥२॥ उत नो गोविदश्ववित्पवस्व सोमांधसा । मक्षूतमेभिरहभिः ॥३॥ यो जिनाति न जीयते हंति शत्रुमभीत्य । स पवस्व सहस्रजित् ॥४॥१२॥

॥ ५६ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५६॥ परि सोम ऋतं बृहदाशुः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥१॥ यत्सोमो वाजमर्षति शतं धारा अपस्युवः । इंद्रस्य सख्यमाविशन् ॥२॥ अभि त्वा योषणो दश जारं न कन्यानूषत । मृज्यसे सोम सातये ॥३॥ त्वमिंद्राय विष्णवे स्वादुरिंदो परि स्रव । नॄंत्स्तोतॄन्पाह्यंहसः ॥४॥१३॥

॥ ५७ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५७॥ प्र ते धारा असश्चतो दिवो न यंति वृष्टयः । अच्छा वाजं सहस्रिणं ॥१॥ अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति । हरिस्तुंजान आयुधा ॥२॥ स मर्मृजान आयुभिरिभो राजेव सुव्रतः । श्येनो न वंसु षीदति ॥३॥ स नो विश्वा दिवो वसूतो पृथिव्या अधि । पुनान इंदवा भर ॥४॥१४॥

॥ ५८ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५८॥ तरत्स मंदी धावति धारा सुतस्यांधसः। तरत्स मंदी धावति॥१॥ उस्रा वेद वसूनां मर्तस्य देव्यवसः। तरत्स मंदी धावति ॥२॥ ध्वस्रयोः पुरुषंत्योरा सहस्राणि दद्महे। तरत्स मंदी धावति॥३॥ आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे। तरत्स मंदी धावति॥४॥१५॥

॥ ५९ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५९॥ पवस्व गोजिदश्वजिद्विश्वजित्सोम रण्यजित्। प्रजावद्रत्नमा भर॥१॥ पवस्वाद्भ्यो अदाभ्यः पवस्वौषधीभ्यः। पवस्व धिषणाभ्यः॥२॥ त्वं सोम पवमानो विश्वानि दुरिता तर। कविः सीद नि बर्हिषि॥३॥ पवमान स्वर्विदो जायमानोऽभवो महान्। इंदो विश्वाँ अभीदसि॥४॥१६॥

॥ ६० ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ १. २. ४ गायत्री । ३ पुरउष्णिक् ॥

॥६०॥ प्र गायत्रेण गायत पवमानं विचर्षणिं। इंदुं सहस्रचक्षसं॥१॥ तं त्वा सहस्रचक्षसमथो सहस्रभर्णसं। अति वारमपाविषुः॥२॥ अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति। इंद्रस्य हार्द्याविशन्॥३॥ इंद्रस्य सोम राधसे शं पवस्व विचर्षणे। प्रजावद्रेत आ भर॥४॥१७॥२॥

॥ ६१ ॥ १–३० अमहीयुः ॥ पवमानः सोमः ॥ गायत्री ॥

॥६१॥ अया वीती परि स्रव यस्त इंदो मदेष्वा। अवाहन्नवतीर्नव॥१॥ पुरः सद्य इत्थाधिये दिवोदासाय शंबरं। अध त्यं तुर्वशं यदुं॥२॥ परि णो अश्वमश्वविद्गोमदिंदो हिरण्यवत्। क्षरा सहस्रिणीरिषः॥३॥ पवमानस्य ते वयं पवित्रम-

भ्युंदतः। सखित्वमा वृणीमहे ॥४॥ ये ते पवित्रमूर्मयोऽभि-
क्षरंति धारया। तेभिर्नः सोम मृळय ॥५॥१८॥ स नः पुनान
आ भर रयिं वीरवतीमिषं। ईशानः सोम विश्वतः ॥६॥ एतमु
त्यं दश क्षिपो मृजंति सिंधुमातरं। समादित्येभिरख्यत ॥७॥
समिंद्रेणोत वायुना सुत एति पवित्र आ। सं सूर्यस्य रश्मिभिः
॥८॥ स नो भगाय वायवे पूष्णे पवस्व मधुमान्। चारुर्मित्रे
वरुणे च ॥९॥ उच्चा ते जातमंधसो दिवि षद्भूम्या ददे। उग्रं
शर्म महि श्रवः ॥१०॥१९॥ एना विश्वान्यर्य आ द्युम्नानि मा-
नुषाणां। सिषासंतो वनामहे ॥११॥ स न इंद्राय यज्यवे वरु-
णाय मरुद्भ्यः। वरिवोवित्परि स्रव ॥१२॥ उपो षु जातमप्तुरं
गोभिर्भंगं परिष्कृतं। इंदुं देवा अयासिषुः ॥१३॥ तमिद्वर्धंतु
नो गिरो वत्सं संशिश्वरीरिव। य इंद्रस्य हृदंसनिः ॥१४॥ अर्षा
णः सोम शं गवे धुक्षस्व पिप्युषीमिषं। वर्धा समुद्रमुक्थ्यं
॥१५॥२०॥ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुं। ज्योति-
र्वैश्वानरं बृहत् ॥१६॥ पवमानस्य ते रसो मदो राजन्नदुच्छुनः।
वि वारमव्यमर्षति ॥१७॥ पवमान रसस्तव दक्षो वि राजति
द्युमान्। ज्योतिर्विश्वं स्वर्दृशे ॥१८॥ यस्ते मदो वरेण्यस्तेना
पवस्वांधसा। देवावीरघशंसहा ॥१९॥ जघ्निर्वृत्रममित्रियं स-
स्निर्वाजं दिवेदिवे। गोषा उ अश्वसा असि ॥२०॥२१॥
संमिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः। सीदञ्छ्येनो
न योनिमा ॥२१॥ स पवस्व य आविथेंद्रं वृत्राय हंतवे।
वव्रिवांसं महीरपः ॥२२॥ सुवीरासो वयं धना जयेम सोम
मीढ्वः। पुनानो वर्ध नो गिरः ॥२३॥ त्वोतासस्तवावसा
स्याम वन्वंत आमुरः। सोम व्रतेषु जागृहि ॥२४॥ अपघ्नन्प-

वते मृधोऽप सोमो अराव्णः। गच्छन्निंद्रस्य निष्कृतं॥२५॥२२॥
महो नो राय आ भर पवमान जही मृधः। रास्वेंदो वीरवद्य-
शः॥२६॥ न त्वा शतं चन ह्रुतो राधो दित्संतमा मिनन्। यत्पु-
नानो मखस्यसे॥२७॥ पवस्वेंदो वृषा सुतः कृधी नो यशसो
जने। विश्वा अप द्विषो जहि॥२८॥ अस्य ते सख्ये वयं तवेंदो
द्युम्न उत्तमे। सासह्याम पृतन्यतः॥२९॥ या ते भीमान्यायुधा
तिग्मानि संति धूर्वणे। रक्षा समस्य नो निदः॥३०॥२३॥

॥ ६२ ॥ १–३० जमदग्निः ॥ पवमानः सोमः ॥ गायत्री ॥

॥६२॥ एते असृग्रमिंदवस्तिरः पवित्रमाशवः। विश्वान्यभि
सौभगा॥१॥ विघ्नंतो दुरिता पुरु सुगा तोकाय वाजिनः। तना
कृण्वंतो अर्वते॥२॥ कृण्वंतो वरिवो गवेऽभ्यर्षंति सुष्टुतिं। इळा-
मस्मभ्यं संयतं॥३॥ असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो
न योनिमासदत्॥४॥ शुभ्रमंधो देववातमप्सु धूतो नृभिः सुतः।
स्वदंति गावः पयोभिः॥५॥२४॥ आदीमश्वं न हेतारोऽशूशु-
भन्नमृताय। मध्वो रसं सधमादे॥६॥ यास्ते धारा मधुश्चुतोऽसृ-
ग्रमिंद ऊतये। ताभिः पवित्रमासदः॥७॥ सो अर्षेंद्राय पीतये
तिरो रोमाण्यव्यया। सीदन्योना वनेष्वा॥८॥ त्वमिंदो परि स्रव
स्वादिष्ठो अंगिरोभ्यः। वरिवोविद्घृतं पयः॥९॥ अयं विचर्ष-
णिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत्॥१०॥२५॥
एष वृषा वृषव्रतः पवमानो अशस्तिहा। करद्वसूनि दाशुषे
॥११॥ आ पवस्व सहस्रिणं रयिं गोमंतमश्विनं। पुरुश्चंद्रं पुरु-
स्पृहं॥१२॥ एष स्य परि षिच्यते मर्मृज्यमान आयुभिः। उरु-
गायः कविक्रतुः॥१३॥ सहस्रोतिः शतामघो विमानो रजसः

कविः। इंद्राय पवते मदः॥१४॥ गिरा जात इह स्तुत इंदुरिंद्राय धीयते। विर्योना वसताविव॥१५॥२६॥ पवमानः सुतो नृभिः सोमो वाजमिवासरत्। चमूषु शक्मनासदं॥१६॥ तं त्रिपृष्ठे त्रिवंधुरे रथे युंजंति यातवे। ऋषीणां सप्त धीतिभिः॥१७॥ तं सोतारो धनस्पृतमाशुं वाजाय यातवे। हरिं हिनोत वाजिनं॥१८॥ आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति॥१९॥ आ तं इंदो मदाय कं पयो दुहंत्यायवः। देवा देवेभ्यो मधु॥२०॥२७॥ आ नः सोमं पवित्र आ सृजता मधुमत्तमं। देवेभ्यो देवश्रुत्तमं॥२१॥ एते सोमा असृक्षत गृणानाः श्रवसे महे। मदिंतमस्य धारया॥२२॥ अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि। सनद्वाजः परि स्रव॥२३॥ उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः। गृणानो जमदग्निना॥२४॥ पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः। अभि विश्वानि काव्या॥२५॥ ॥२८॥ त्वं समुद्रिया अपोऽग्रियो वाच ईरयन्। पवस्व विश्वमेजय॥२६॥ तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे। तुभ्यमर्षंति सिंधवः॥२७॥ प्र ते दिवो न वृष्टयो धारा यंत्यसश्चतः। अभि शुक्रामुपस्तिरं॥२८॥ इंद्रायेंदुं पुनीतनोग्रं दक्षाय साधनं। ईशानं वीतिराधसं॥२९॥ पवमान ऋतः कविः सोमः पवित्रमासदत्। दधत्स्तोत्रे सुवीर्यं॥३०॥२९॥

॥ ६३ ॥ १–३० निध्रुविः काश्यपः ॥ पवमानः सोमः ॥ गायत्री ॥

॥६३॥ आ पवस्व सहस्रिणं रयिं सोम सुवीर्यं। अस्मे श्रवांसि धारय॥१॥ इषमूर्जं च पिन्वस इंद्राय मत्सरिंतमः। चमूष्वा नि षीदसि॥२॥ सुत इंद्राय विष्णवे सोमः कलशे अक्षरत्।

मधुमाँ अस्तु वायवे ॥३॥ एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः । सोमा ऋतस्य धारया ॥४॥ इंद्रं वर्धंतो अप्तुरः कृण्वंतो विश्वमार्यं । अपघ्नंतो अराव्णः ॥५॥३०॥ सुता अनु स्वमा रजोऽभ्यर्षंति बभ्रवः । इंद्रं गच्छंत इंदवः ॥६॥ अया पवस्व धारया यया सूर्यमरोचयः । हिन्वानो मानुषीरपः ॥७॥ अयुक्त सूर एतशं पवमानो मनावधि । अंतरिक्षेण यातवे ॥८॥ उत त्या हरितो दश सूरो अयुक्त यातवे । इंदुरिंद्र इति ब्रुवन् ॥९॥ परीतो वायवे सुतं गिर इंद्राय मत्सरं । अव्यो वारेषु सिंचत ॥१०॥ ॥३१॥ पवमान विदा रयिमस्मभ्यं सोम दुष्टरं । यो दूणाशो वनुष्यता ॥११॥ अभ्यर्ष सहस्रिणं रयिं गोमंतमश्विनं । अभि वाजमुत श्रवः ॥१२॥ सोमो देवो न सूर्योऽद्रिभिः पवते सुतः । दधानः कलशे रसं ॥१३॥ एते धामान्यार्या शुक्रा ऋतस्य धारया । वाजं गोमंतमक्षरन् ॥१४॥ सुता इंद्राय वज्रिणे सोमासो दध्याशिरः । पवित्रमत्यक्षरन् ॥१५॥३२॥ प्र सोम मधुमत्तमो राये अर्ष पवित्र आ । मदो यो देववीतमः ॥१६॥ तमी मृजंत्यायवो हरिं नदीषु वाजिनं । इंदुमिंद्राय मत्सरं ॥१७॥ आ पवस्व हिरण्यवदश्वावत्सोम वीरवत् । वाजं गोमंतमा भर ॥१८॥ परि वाजे न वाजयुमव्यो वारेषु सिंचत । इंद्राय मधुमत्तमं ॥१९॥ कविं मृजंति मर्ज्यं धीभिर्विप्रा अवस्यवः । वृषा कनिक्रदर्षति ॥२०॥३३॥ वृषणं धीभिरप्तुरं सोममृतस्य धारया । मती विप्राः समस्वरन् ॥२१॥ पवस्व देवायुषगिंद्रं गच्छतु ते मदः । वायुमा रोह धर्मणा ॥२२॥ पवमान नि तोशसे रयिं सोम श्रवाय्यं । प्रियः समुद्रमा विश ॥२३॥ अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः । नुदस्वादेवयुं जनं ॥२४॥

पर्वमाना असृक्षत सोमाः शुक्रास इंदवः। अभि विश्वानि काव्या
॥२५॥३४॥ पर्वमानास आशवः शुभ्रा असृग्रमिंदवः। घ्नंतो वि-
श्वा अप द्विषः ॥२६॥ पर्वमाना दिवस्पर्यंतरिक्षादसृक्षत। पृथि-
व्या अधि सानवि ॥२७॥ पुनानः सोम धारयेंदो विश्वा अप
स्रिधः। जहि रक्षांसि सुक्रतो ॥२८॥ अपघ्नन्त्सोम रक्षसोऽभ्यर्ष
कनिक्रदत्। द्युमंतं शुष्ममुत्तमं ॥२९॥ अस्मे वसूनि धारय सोम
दिव्यानि पार्थिवा। इंदो विश्वानि वार्या ॥३०॥३५॥

॥ ६४ ॥ १–३० कश्यपः ॥ पवमानः सोमः ॥ गायत्री ॥

॥६४॥ वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः। वृषा
धर्माणि दधिषे ॥१॥ वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः।
सत्यं वृषन्वृषेदसि ॥२॥ अश्वो न चक्रदो वृषा सं गा इंदो
समर्वतः। वि नो राये दुरो वृधि ॥३॥ असृक्षत प्र वाजिनो
गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः ॥४॥ शुंभमाना
ऋतायुभिर्मृज्यमाना गभस्त्योः। पवंते वारे अव्यये ॥५॥३६॥
ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवंतामांत-
रिक्ष्या ॥६॥ पर्वमानस्य विश्ववित्प्र ते सर्गा असृक्षत। सूर्य-
स्येव न रश्मयः ॥७॥ केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्ष-
सि। समुद्रः सोम पिन्वसे ॥८॥ हिन्वानो वाचमिष्यसि पर्वमान
विधर्मणि। अक्रान्देवो न सूर्यः ॥९॥ इंदुः पविष्ट चेतनः प्रियः
कवीनां मती। सृजदश्वं रथीरिव ॥१०॥३७॥ ऊर्मिर्यस्ते प-
वित्र आ देवावीः पर्यक्षरत्। सीदन्नृतस्य योनिमा ॥११॥
स नो अर्ष पवित्र आ मदो यो देववीतमः। इंदविंद्राय पी-
तये ॥१२॥ इषे पवस्व धारया मृज्यमानो मनीषिभिः। इंदो

रुचाभि गा इहि ॥१३॥ पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः। हरे सृजान आशिरं ॥१४॥ पुनानो देववीतय इंद्रस्य याहि निष्कृतं। द्युतानो वाजिभिर्यतः ॥१५॥३८॥ प्र हिन्वानास इंदवोऽच्छा समुद्रमाशवः। धिया जूता असृक्षत ॥१६॥ मर्मृजानास आयवो वृथा समुद्रमिंदवः। अग्मन्नृतस्य योनिमा ॥१७॥ परि णो याह्यस्मयुर्विश्वा वसून्योजसा। पाहि नः शर्म वीरवत् ॥१८॥ मिमाति वह्निरेतशः पदं युजान ऋक्वभिः। प्र यत्समुद्र आहितः ॥१९॥ आ यद्योनिं हिरण्ययमाशुर्ऋतस्य सीदति। जहात्यप्रचेतसः ॥२०॥३९॥ अभि वेना अनूषतेयक्षंति प्रचेतसः। मज्जंत्यविचेतसः ॥२१॥ इंद्रायेंदो मरुत्वते पवस्व मधुमत्तमः। ऋतस्य योनिमासदं ॥२२॥ तं त्वा विप्रा वचोविदः परिष्कृण्वंति वेधसः। सं त्वा मृजंत्यायवः ॥२३॥ रसं ते मित्रो अर्यमा पिबंति वरुणः कवे। पवमानस्य मरुतः ॥२४॥ त्वं सोम विपश्चितं पुनानो वाचमिष्यसि। इंदो सहस्रभर्णसं ॥२५॥४०॥ उतो सहस्रभर्णसं वाचं सोम मखस्युवं। पुनान इंदवा भर ॥२६॥ पुनान इंदवेषां पुरुहूत जनानां। प्रियः समुद्रमा विश ॥२७॥ दविद्युतत्या रुचा परिष्टोभंत्या कृपा। सोमाः शुक्रा गवाशिरः ॥२८॥ हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत्। सीदंतो वनुषो यथा ॥२९॥ ऋधक्सोम स्वस्तये संजग्मानो दिवः कविः। पवस्व सूर्यो दृशे ॥३०॥४१॥१॥

॥ ६५ ॥ १–३० भृगुर्वारुणिर्जमदग्निर्वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥६५॥ हिन्वंति सूरमुस्रयः स्वसारो जामयस्पतिं। महामिंदुं महीयुवः ॥१॥ पवमान रुचारुचा देवो देवेभ्यस्परि। विश्वा

वसून्या विश ॥ २ ॥ आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
इषे पवस्व संयतं ॥ ३ ॥ वृषा ह्यसि भानुना द्युमंतं त्वा हवा-
महे । पवमान स्वाध्यः ॥ ४ ॥ आ पवस्व सुवीर्यं मंदमानः
स्वायुध । इहो ष्विंदवा गहि ॥ ५ ॥ १ ॥ यदद्भिः परिषिच्यसे
मृज्यमानो गभस्त्योः । द्रुणा सधस्थमश्नुषे ॥ ६ ॥ प्र सोमाय
व्यश्ववत्पवमानाय गायत । महे सहस्रचक्षसे ॥ ७ ॥ यस्य वर्णं
मधुश्चुतं हरिं हिन्वंत्यद्रिभिः । इंदुमिंद्राय पीतये ॥ ८ ॥ तस्य ते
वाजिनो वयं विश्वा धनानि जिग्युषः । सखित्वमा वृणीमहे ॥ ९ ॥
वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वा दधान ओजसा
॥ १० ॥ २ ॥ तं त्वा धर्तारमोण्यो३ः पवमान स्वर्दृशं । हिन्वे वाजेषु
वाजिनं ॥ ११ ॥ अया चित्तो विपानया हरिः पवस्व धारया ।
युजं वाजेषु चोदय ॥ १२ ॥ आ न इंदो महीमिषं पवस्व विश्वदर्श-
तः । अस्मभ्यं सोम गातुवित् ॥ १३ ॥ आ कलशा अनूषतेंदो
धाराभिरोजसा । एंद्रस्य पीतये विश ॥ १४ ॥ यस्य ते मद्यं रसं
तीव्रं दुहंत्यद्रिभिः । स पवस्वाभिमातिहा ॥ १५ ॥ ३ ॥ राजा
मेधाभिरीयते पवमानो मनावधि । अंतरिक्षेण यातवे ॥ १६ ॥
आ न इंदो शतग्विनं गवां पोषं स्वश्व्यं । वहा भगत्तिमूतये
॥ १७ ॥ आ नः सोम सहो जुवो रूपं न वर्चसे भर । सुष्वाणो देव-
वीतये ॥ १८ ॥ अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ।
सीदञ्छ्येनो न योनिमा ॥ १९ ॥ अप्सा इंद्राय वायवे वरुणाय
मरुद्भ्यः । सोमो अर्षति विष्णवे ॥ २० ॥ ४ ॥ इषं तोकाय नो दध-
दस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणं ॥ २१ ॥ ये सोमासः
परावति ये अर्वावति सुन्विरे । ये वादः शर्यणावति ॥ २२ ॥ य
आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानां । ये वा जनेषु पंचसु ॥ २३ ॥

ते नो वृष्टिं दिवस्परि पवंतामा सुवीर्यं । सुवाना देवास इंदवः ॥२४॥ पवते हर्यतो हरिर्गृणानो जमदग्निना । हिन्वानो गोरधि त्वचि ॥२५॥५॥ प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः । श्रीणाना अप्सु मृंजत ॥२६॥ तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये । स पवस्वानया रुचा ॥२७॥ आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे । पांतमा पुरुस्पृहं ॥२८॥ आ मंद्रमा वरेण्यमा विप्रमा मनीषिणं । पांतमा पुरुस्पृहं ॥२९॥ आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा । पांतमा पुरुस्पृहं ॥३०॥६॥

॥ ६६ ॥ १–३० शतं वैखानसाः ॥ १–१८. २२–३० पवमानः सोमः । १९–२१ अग्निः ॥ १–१७. १९–३० गायत्री । १८ अनुष्टुप् ॥

॥ ६६ ॥ पवस्व विश्वचर्षणेऽभि विश्वानि काव्या । सखा सखिभ्य ईड्यः ॥१॥ ताभ्यां विश्वस्य राजसि ये पवमान धामनी । प्रतीची सोम तस्थतुः ॥२॥ परि धामानि यानि ते त्वं सोमासि विश्वतः । पवमान ऋतुभिः कवे ॥३॥ पवस्व जनयन्निषोऽभि विश्वानि वार्या । सखा सखिभ्य ऊतये ॥४॥ तव शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते । पवित्रं सोम धामभिः ॥५॥७॥ तवेमे सप्त सिंधवः प्रशिषं सोम सिस्रते । तुभ्यं धावंति धेनवः ॥६॥ प्र सोम याहि धारया सुत इंद्राय मत्सरः । दधानो अक्षिति श्रवः ॥७॥ समु त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः । विप्रमाजा विवस्वतः ॥८॥ मृजंति त्वा समग्रुवोऽव्ये जीरावधि ष्वणि । रेभो यदज्यसे वने ॥९॥ पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत । अर्वंतो न श्रवस्यवः ॥१०॥८॥ अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये । अवावशंत धीतयः ॥११॥ अच्छा समुद्रमिंदवोऽस्तं गावो न धेनवः । अग्मन्नृतस्य योनिमा ॥१२॥ प्र ण इंदो महे रण

आपो अर्षति सिंधवः। यज्ञोभिर्वासयिष्यसे ॥१३॥ अस्य ते सख्ये वयमियंक्षंतस्त्वोतयः। इंदो सखित्वमुश्मसि ॥१४॥ आ पवस्व गविष्टये महे सोम नृचक्षसे। एंद्रस्य जठरे विश ॥१५॥९॥ महाँ असि सोम ज्येष्ठ उग्राणामिंद ओजिष्ठः। युध्वा सञ्छश्वज्जिगेथ ॥१६॥ य उग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः। भूरिदाभ्यश्चिन्मंहीयान् ॥१७॥ त्वं सोम सूर एषस्तोकस्य साता तनूनां। वृणीमहे सख्याय वृणीमहे युज्याय ॥१८॥ अग्न आयूंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनां ॥१९॥ अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः। तमीमहे महागयं ॥२०॥१०॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं। दधद्रयिं मयि पोषं ॥२१॥ पवमानो अति स्रिधोऽभ्यर्षति सुष्टुतिं। सूरो न विश्वदर्शतः ॥२२॥ स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः। इंदुरत्यो विचक्षणः ॥२३॥ पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत्। कृष्णा तमांसि जंघनत् ॥२४॥ पवमानस्य जंघ्नतो हरेश्चंद्रा असृक्षत। जीरा अजिरशोचिषः ॥२५॥११॥ पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चंद्रो मरुद्गणः ॥२६॥ पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्यं ॥२७॥ प्र सुवान इंदुरक्षाः पवित्रमत्यव्ययं। पुनान इंदुरिंद्रमा ॥२८॥ एष सोमो अधि त्वचि गवां क्रीळत्यद्रिभिः। इंद्रं मदाय जोहुवत् ॥२९॥ यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः। तेन नो मृळ जीवसे ॥३०॥१२॥

॥६७॥ १–३ भरद्वाजः। ४–६ कश्यपः। ७–९ गोतमः। १०–१२ अत्रिः। १३–१५ विश्वामित्रः। १६–१८ जमदग्निः। १९–२१ वसिष्ठः। २२–३२ पवित्रो वसिष्ठो वोभौ वा॥ १–९. १३–२२. २८–३० पवमानः सोमः। १०–१२ पवमानः सोमः पूषा वा। २३. २४ अग्निः। २५ अग्निः सविता वा। २६ अग्निरग्निर्वा सविता च। २७ अग्निर्विश्वे देवा वा। ३१. ३२ पावमान्यध्येतृस्तुतिः॥ १–१५. १९–२६. २८. २९ गायत्री। १६–१८ द्विपदा गायत्री। २७. ३१. ३२ अनुष्टुप्। ३० पुरउष्णिक्॥

॥६७॥ त्वं सोमासि धारयुर्मंद्र ओजिष्ठो अध्वरे। पवस्व मंह-
यद्रयिः॥१॥ त्वं सुतो नृमादनो दधन्वान्मत्सरिंतमः। इंद्राय सूरि-
रंधसा॥२॥ त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमंतं शुष्म-
मुत्तमं॥३॥ इंदुर्हिन्वानो अर्षति तिरो वाराण्यव्यया। हरिर्वाज-
मचिक्रदत्॥४॥ इंदो व्यव्यमर्षसि वि श्रवांसि वि सौभगा। वि
वाजान्सोम गोमतः॥५॥१३॥ आ न इंदो शतग्विनं रयिं गोमं-
तमश्विनं। भरा सोम सहस्रिणं॥६॥ पवमानास इंदवस्तिरः प-
वित्रमाशवः। इंद्रं यामेभिराशत॥७॥ ककुहः सोम्यो रस इंदुरिं-
द्राय पूर्व्यः। आयुः पवत आयवे॥८॥ हिन्वंति सूरमुस्रयः पवमानं
मधुश्चुतं। अभि गिरा समस्वरन्॥९॥ अविता नो अजाश्वः पूषा
यामनियामनि। आ भक्षत्कन्यासु नः॥१०॥१४॥ अयं सोमः क-
पर्दिने घृतं न पवते मधु। आ भक्षत्कन्यासु नः॥११॥ अयं त आ-
घृणे सुतो घृतं न पवते शुचि। आ भक्षत्कन्यासु नः॥१२॥ वाचो
जंतुः कवीनां पवस्व सोम धारया। देवेषु रत्नधा असि॥१३॥
आ कलशेषु धावति श्येनो वर्म वि गाहते। अभि द्रोणा क-
निक्रदत्॥१४॥ परि प्र सोम ते रसोऽसर्जि कलशे सुतः। श्येनो
न तक्तो अर्षति॥१५॥१५॥ पवस्व सोम मंदयन्निंद्राय मधु-
मत्तमः॥१६॥ असृग्रन्देववीतये वाजयंतो रथा इव॥१७॥
ते सुतासो मदिंतमाः शुक्रा वायुमसृक्षत॥१८॥ ग्राव्णा तुन्नो
अभिष्टुतः पवित्रं सोम गच्छसि। दधत्स्तोत्रे सुवीर्यं॥१९॥

एष तुन्नो अभिष्टुतः पवित्रमति गाहते । रक्षोहा वारमव्ययं ॥ २० ॥ १६ ॥ यदंति यच्च दूरके भयं विंदति मामिह । पवमान वि तज्जहि ॥ २१ ॥ पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु नः ॥ २२ ॥ यत्ते पवित्रमर्चिष्यग्ने विततमंतरा । ब्रह्म तेन पुनीहि नः ॥ २३ ॥ यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि नः । ब्रह्मसवैः पुनीहि नः ॥ २४ ॥ उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥ २५ ॥ १७ ॥ त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोम धामभिः । अग्ने दक्षैः पुनीहि नः ॥ २६ ॥ पुनंतु मां देवजनाः पुनंतु वसवो धिया । विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ॥ २७ ॥ प्र प्यायस्व प्र स्यंदस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः ॥ २८ ॥ उप प्रियं पनिप्नतं युवानमाहुतीवृधं । अगन्म बिभ्रतो नमः ॥ २९ ॥ अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम । आखुं चिदेव देव सोम ॥ ३० ॥ यः पावमानीरध्येत्यृषिभिः संभृतं रसं । सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥ ३१ ॥ पावमानीर्यो अध्येत्यृषिभिः संभृतं रसं । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकं ॥ ३२ ॥ १८ ॥ ३ ॥

॥ ६८ ॥ १-१० वत्सप्रिर्भालंदनः ॥ पवमानः सोमः ॥ १-९ जगती । १० त्रिष्टुप् ॥

॥ ६८ ॥ प्र देवमच्छा मधुमंत इंदवोऽसिष्यदंत गाव आ न धेनवः । बर्हिषदो वचनावंत ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥ १ ॥ स रोरुवदभि पूर्वा अचिक्रददुपारुहः श्रथयन्स्वादते हरिः । तिरः पवित्रं परियन्नुरु ज्रयो नि शर्याणि दधते देव आ वरं ॥ २ ॥ वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता । मही अपारे रजसी

विवेविदद्भिव्रजन्नक्षितं पाज आ ददे ॥३॥ स मातरा विचरन्वा-
जयन्नपः प्र मेधिरः स्वधया पिन्वते पदं । अंशुर्यवेन पिपिशे यतो
नृभिः सं जामिभिर्नसते रक्षते शिरः ॥४॥ सं दक्षेण मनसा जायते
कविर्ऋतस्य गर्भो निहितो यमा परः । यूना ह संता प्रथमं वि
जज्ञतुर्गुहा हितं जनिम नेममुद्यतं ॥५॥१९॥ मंद्रस्य रूपं विवि-
दुर्मनीषिणः श्येनो यदंधो अभरत्परावतः । तं मर्जयंत सुवृधं न-
दीष्वाँ उशंतमंशुं परियंतमृग्मियं ॥६॥ त्वां मृजंति दश योषणः
सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितं । अव्यो वारेभिरुत देव-
हूतिभिर्नृभिर्यतो वाजमा दर्षि सातये ॥७॥ परिप्रयंतं वय्यं सुषं-
सदं सोमं मनीषा अभ्यनूषत स्तुभः । यो धारया मधुमाँ ऊर्मिणा
दिव इयर्ति वाचं रयिषाळमर्त्यः ॥८॥ अयं दिव इयर्ति विश्वमा
रजः सोमः पुनानः कलशेषु सीदति । अद्भिर्गोभिर्मृज्यते अद्रि-
भिः सुतः पुनान इंदुर्वरिवो विदत्प्रियं ॥९॥ एवा नः सोम
परिषिच्यमानो वयो दधच्चित्रतमं पवस्व । अद्वेषे द्यावापृथिवी
हुवेम देवा धत्त रयिमस्मे सुवीरं ॥१०॥२०॥

॥ ६९ ॥ १—१० हिरण्यस्तूपः ॥ पवमानः सोमः ॥ १—८ जगती । ९.१० त्रिष्टुप् ॥

॥६९॥ इषुर्न धन्वन्प्रति धीयते मतिर्वत्सो न मातुरुप
सर्ज्यूधनि । उरुधारेव दुहे अग्र आयत्यस्य व्रतेष्वपि सोम
इष्यते ॥१॥ उपो मतिः पृच्यते सिच्यते मधु मंद्राजनी चोदते
अंतरासनि । पवमानः संतनिः प्रघ्नतामिव मधुमान्द्रप्सः
परि वारमर्षति ॥२॥ अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते
नप्तीरदितेर्ऋतं यते । हरिरक्रान्यजतः संयतो मदो नृम्णा शि-
शानो महिषो न शोभते ॥३॥ उक्षा मिमाति प्रति यंति धेनवो

देवस्य देवीरुप यंति निष्कृतं। अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत॥४॥ अमृक्तेन रुशता वाससा हरिरमर्त्यो निर्णिजानः परि व्यत। दिवस्पृष्ठं बर्हणा निर्णिजे कृतोपस्तरणं चम्वोर्नभस्मयं॥५॥२१॥ सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते। तंतुं ततं परि सर्गास आशवो नेंद्रादृते पवते धाम किं चन॥६॥ सिंधोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत। शं नो निवेशे द्विपदे चतुष्पदेऽस्मे वाजाः सोम तिष्ठंतु कृष्टयः॥७॥ आ नः पवस्व वसुमद्धिरण्यवदश्वावद्गोमद्यवमत्सुवीर्यं। यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः॥८॥ एते सोमाः पवमानास इंद्रं रथा इव प्र ययुः सातिमच्छ। सुताः पवित्रमति यंत्यव्यं हित्वी वव्रिं हरितो वृष्टिमच्छ॥९॥ इंदविंद्राय बृहते पवस्व सुमृळीको अनवद्यो रिशादाः। भरा चंद्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः॥१०॥२२॥

॥ ७० ॥ १-१० रेणुर्वैश्वामित्रः ॥ पवमानः सोमः ॥ १-९ जगती । १० त्रिष्टुप् ॥

॥ ७० ॥ त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि। चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत॥१॥ स भिक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे। तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः॥२॥ ते अस्य संतु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु। येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत॥३॥ स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा। व्रतानि पानो अमृतस्य

चारुणा उभे नृचक्षा अनु पश्यते विशौ ॥४॥ स मर्मृजान इंद्रियाय
धायस ओभे अंता रोदसी हर्षते हितः । वृषा शुष्मेण बाधते वि
दुर्मतीरादेदिशानः शर्यहेव शुरुधः ॥५॥२३॥ स मातरा न ददृ-
शान उस्त्रियो नानददेति मरुतामिव स्वनः । जानन्नृतं प्रथमं
यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ॥६॥ रुवति भीमो वृष-
भस्तविष्यया शृंगे शिशानो हरिणी विचक्षणः । आ योनिं सोमः
सुकृतं नि षीदति गव्ययी त्वग्भवति निर्णिगव्ययी ॥७॥ शुचिः
पुनानस्तन्वमरेपसमव्ये हरिर्न्यधाविष्ट सानवि । जुष्टो मित्राय
वरुणाय वायवे त्रिधातु मधु क्रियते सुकर्मभिः ॥८॥ पवस्व
सोम देववीतये वृषेंद्रस्य हार्दि सोमधानमा विश । पुरा नो
बाधाद्दुरितातिं पारय क्षेत्रविद्धि दिश आहा विपृच्छते ॥९॥
हितो न सप्तिरभि वाजमर्षेंद्रस्येंदो जठरमा पवस्व । नावा
न सिंधुमति पर्षि विद्वाञ्छूरो न युध्यन्नव नो निदः स्पः
॥१०॥२४॥

॥७१॥ १—९ ऋषभो वैश्वामित्रः ॥ पवमानः सोमः ॥ १—८ जगती । ९ त्रिष्टुप् ॥

॥७१॥ आ दक्षिणा सृज्यते शुष्म्या३सदं वेति द्रुहो रक्षसः
पाति जागृविः । हरिरोपशं कृणुते नभस्पय उपस्तिरे च-
म्वो३र्ब्रह्म निर्णिजे ॥१॥ प्र कृष्टिहेव शूष एति रोरुवदसुर्यं१ वर्णं
नि रिणीते अस्य तं । जहाति वव्रिं पितुरेति निष्कृतमुपप्रुतं
कृणुते निर्णिजं तना ॥२॥ अद्रिभिः सुतः पवते गभस्त्योर्वृ-
षायते नभसा वेपते मती । स मोदते नसते साधते गिरा नें-
निक्ते अप्सु यजते परीमणि ॥३॥ परि द्युक्षं सहसः पर्वतावृधं
मध्वः सिंचंति हर्म्यस्य सक्षणिं । आ यस्मिन्गावः सुहुताद

ऊर्धनि मूर्धञ्छ्रीणंत्यग्रियं वरीमभिः ॥४॥ समी रथं न भुरिजो-
रहेषत दश स्वसारो अदितेरुपस्थ आ। जिगादुप जयति गोर-
पीच्यं पदं यदस्य मतुथा अजीजनन् ॥५॥२५॥ श्येनो न योनिं
सदनं धिया कृतं हिरण्ययमासदं देव एषति। ए रिणंति बर्हिषि
प्रियं गिराश्वो न देवाँ अप्येति यज्ञियः ॥६॥ परा व्यक्तो अरुषो
दिवः कविर्वृषा त्रिपृष्ठो अनविष्ट गा अभि। सहस्रणीतिर्यतिः
परायती रेभो न पूर्वीरुषसो वि राजति ॥७॥ त्वेषं रूपं कृणुते
वर्णो अस्य स यत्राशयत्समृता सेधति स्रिधः। अप्सा याति स्व-
धया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ॥८॥ उक्षेव यूथा
परियन्नरावीदधि त्विषीरधित सूर्यस्य। दिव्यः सुपर्णोऽव चक्षत
क्षां सोमः परि क्रतुना पश्यते जाः ॥९॥२६॥

॥७२॥ १-९ हरिमंतः ॥ पवमानः सोमः ॥ जगती ॥

॥७२॥ हरिं मृजंत्यरुषो न युज्यते सं धेनुभिः कलशे
सोमो अज्यते। उद्वाचमीरयति हिन्वते मती पुरुष्टुतस्य कति
चित्परिप्रियः ॥१॥ साकं वदंति बहवो मनीषिण इंद्रस्य
सोमं जठरे यदादुहुः। यदी मृजंति सुगभस्तयो नरः सनी-
ळाभिर्दशभिः काम्यं मधु ॥२॥ अरममाणो अत्येति गा
अभि सूर्यस्य प्रियं दुहितुस्तिरो रवं। अन्वस्मै जोषमभ-
रद्विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः ॥३॥ नृ-
धूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इंदुर्ऋत्वि-
यः। पुरंधिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम
इंद्र ते ॥४॥ नृबाहुभ्यां चोदितो धारया सुतोऽनुष्वधं पवते
सोम इंद्र ते। आप्राः क्रतून्समजैरध्वरे मतीर्वेर्न द्रुषच्चम्वो३रा-

संदृशिः॥५॥२७॥ अंशुं दुहंति स्तनयंतमक्षितं कविं कवयोऽप-
सो मनीषिणः। समी गावो मतयो यंति संयत ऋतस्य योना
सदने पुनर्भुवः॥६॥ नाभा पृथिव्या धरुणो महो दिवो३ऽपामूर्मौ
सिंधुष्वंतरुक्षितः। इंद्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते
चारु मत्सरः॥७॥ स तू पवस्व परि पार्थिवं रजः स्तोत्रे शि-
क्षन्नाधून्वते च सुक्रतो। मा नो निर्भाग्वसुनः सादनस्पृशो रयिं
पिशंगं बहुलं वसीमहि॥८॥ आ तू न इंदो शतदात्वश्व्यं सहस्र-
दातु पशुमद्धिरण्यवत्। उप मास्व बृहती रेवतीरिषोऽधि
स्तोत्रस्य पवमान नो गहि॥९॥२८॥

॥७३॥ १-९ पवित्रः ॥ पवमानः सोमः ॥ जगती ॥

॥७३॥ स्रक्वे द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरंत
नाभयः। त्रीन्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतम-
पीपरन्॥१॥ सम्यक् सम्यंचो महिषा अहेषत सिंधोरूर्मावधि
वेना अवीविपन्। मधोर्धाराभिर्जनयंतो अर्कमित्प्रियामिंद्रस्य
तन्वमवीवृधन्॥२॥ पवित्रवंतः परि वाचमासते पितैषां प्रत्नो
अभि रक्षति व्रतं। महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरु-
णेष्वारभं॥३॥ सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा
असश्चतः। अस्य स्पशो न नि मिषंति भूर्णयः पदेपदे पाशिनः सं-
ति सेतवः॥४॥ पितुर्मातुरध्या ये समस्वरन्नृचा शोचंतः संदहंतो
अव्रतान्। इंद्रद्विष्टामप धमंति मायया त्वचमसिक्नीं भूमनो दि-
वस्परि॥५॥२९॥ प्रत्नान्मानादध्या ये समस्वरञ्छ्लोकयंत्रासो
रभसस्य मंतवः। अपानक्षासो बधिरा अहासत ऋतस्य पंथां
न तरंति दुष्कृतः॥६॥ सहस्रधारे वितते पवित्र आ वाचं पु-

नंति कवयो मनीषिणः। रुद्रास एषामिषिरासो अद्रुहः स्पशः
स्वंचः सुदृशो नृचक्षसः ॥७॥ ऋतस्य गोपा न दभाय सुक्रतुस्त्री
ष पवित्रा हृद्यं१तरा दधे। विद्वान्स विश्वा भुवनाभि पश्यत्य-
वाजुष्टान्विध्यति कर्ते अव्रतान् ॥८॥ ऋतस्य तंतुर्विततः पवित्र
आ जिह्वाया अग्रे वरुणस्य मायया। धीराश्चित्तत्समिनक्षंत
आशतात्रा कर्तमव पदात्यप्रभुः ॥९॥३०॥

॥७४॥ १–९ कक्षीवान् ॥ पवमानः सोमः ॥ १–७.९ जगती । ८ त्रिष्टुप् ॥

॥७४॥ शिशुर्न जातोऽव चक्रदद्वने स्व१र्यद्वाज्यरुषः सि-
षासति। दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्म
सप्रथः ॥१॥ दिवो यः स्कंभो धरुणः स्वातत आपूर्णो अंशुः
पर्येति विश्वतः। सेमे मही रोदसी यक्षदावृता समीचीने
दाधार समिषः कविः ॥२॥ महि प्सरः सुकृतं सोम्यं मधूर्वी
गव्यूतिरदितेर्ऋतं यते। ईशे यो वृष्टेरित उस्रियो वृषापां
नेता य इतऊतिर्ऋग्मियः ॥३॥ आत्मन्वन्नभो दुह्यते घृतं
पय ऋतस्य नाभिरमृतं वि जायते। समीचीनाः सुदानवः
प्रीणंति तं नरो हितमव मेहंति पेरवः ॥४॥ अरावीदंशुः
सचमान ऊर्मिणा देवाव्यं१मनुषे पिन्वति त्वचं। दधाति
गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे ॥५॥३१॥
सहस्रधारेऽव ता असश्चतस्तृतीये संतु रजसि प्रजावतीः।
चतस्रो नाभो निहिता अवो दिवो हविर्भरंत्यमृतं घृतश्चुतः
॥६॥ श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वां असुरो वेद
भूमनः। धिया शमी सचते सेमभि प्रवद्दिवस्कवंधमव दर्षदु-
द्रिणं ॥७॥ अध श्वेतं कलशं गोभिरक्तं कार्ष्मन्ना वाज्यक्र-

मीत्ससवान्। आ हिन्विरे मनसा देवयंतः कक्षीवते शतहिं-
माय गोनां ॥८॥ अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं
वि पवमान धावति। स मृज्यमानः कविभिर्मदिंतम स्वद-
स्वेंद्राय पवमान पीतये ॥९॥३२॥

॥७५॥ १-५ कविः ॥ पवमानः सोमः ॥ जगती ॥

॥७५॥ अभि प्रियाणि पवते चनोहितो नामानि यह्वो
अधि येषु वर्धते। आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वंच-
मरुहद्विचक्षणः ॥१॥ ऋतस्य जिह्वा पवते मधु प्रियं वक्ता
पतिर्धियो अस्या अदाभ्यः। दधाति पुत्रः पित्रोरपीच्यं१ नाम
तृतीयमधि रोचने दिवः ॥२॥ अव द्युतानः कलशाँ अचिक्र-
दन्नृभिर्येमानः कोश आ हिरण्यये। अभीमृतस्य दोहना अनू-
षताधि त्रिपृष्ठ उषसो वि राजति ॥३॥ अद्रिभिः सुतो मति-
भिश्चनोहितः प्ररोचयन्रोदसी मातरा शुचिः। रोमाण्यव्या
समया वि धावति मधोर्धारा पिन्वमाना दिवेदिवे ॥४॥
परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरं।
ये ते मदा आहनसो विहायसस्तेभिरिंद्रं चोदय दातवे मघं
॥५॥३३॥२॥

॥७६॥ १-५ कविः ॥ पवमानः सोमः ॥ जगती ॥

॥७६॥ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमा-
द्यो नृभिः। हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुते
नदीष्वा ॥१॥ शूरो न धत्त आयुधा गभस्त्योः स्वः१ सिषासन्र-
थिरो गविष्टिषु। इंद्रस्य शुष्ममीरयन्नपस्युभिरिंदुर्हिन्वानो
अज्यते मनीषिभिः ॥२॥ इंद्रस्य सोम पवमान ऊर्मिणा त-
विष्यमाणो जठरेष्वा विश। प्र णः पिन्व विद्युदभ्रेव रोदसी

धिया न वाजाँ उप मासि शश्वतः ॥ ३ ॥ विश्वस्य राजा पवते स्वर्दृश ऋतस्य धीतिमृषिषाळवीवशत्। यः सूर्यस्यासिरेण मृज्यते पिता मतीनामसमष्टकाव्यः ॥ ४ ॥ वृषेव यूथा परि कोशमर्षस्यपामुपस्थे वृषभः कनिक्रदत्। स इंद्राय पवसे मत्सरिंतमो यथा जेषाम समिथे त्वोतयः ॥ ५ ॥ १ ॥

॥ ७७ ॥ १-५ कविः ॥ पवमानः सोमः ॥ जगती ॥

॥ ७७ ॥ एष प्र कोशे मधुमाँ अचिक्रददिंद्रस्य वज्रो वपुषो वपुष्टरः। अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षति पयसेव धेनवः ॥ १ ॥ स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः। स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा ॥ २ ॥ ते नः पूर्वास उपरास इंदवो महे वाजाय धन्वंतु गोमते। ईक्षेण्यासो अह्यो३न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः ॥ ३ ॥ अयं नो विद्वान्वनवद्वनुष्यत इंदुः सत्राचा मनसा पुरुष्टुतः। इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजं ॥ ४ ॥ चक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते। असावि मित्रो वृजनेषु यज्ञियोऽत्यो न यूथे वृषयुः कनिक्रदत् ॥ ५ ॥ २ ॥

॥ ७८ ॥ १-५ कविः ॥ पवमानः सोमः ॥ जगती ॥

॥ ७८ ॥ प्र राजा वाचं जनयन्नसिष्यददपो वसानो अभि गा इयक्षति। गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतं ॥ १ ॥ इंद्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने। पूर्वीर्हि ते स्रुतयः संति यातवे सहस्रमश्वा हरयश्चमूषदः ॥ २ ॥ समुद्रिया अप्सरसो मनीषिणमासीना अंतरभि सोममक्षरन्। ता ईं हिन्वंति हर्म्यस्य सक्ष-

णिं याचंते सुम्नं पवमानमक्षितं ॥ ३ ॥ गोजिन्नः सोमो रथ-
जिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित् । यं देवासश्चक्रिरे
पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवं ॥ ४ ॥ एतानि सोम
पवमानो अस्मयुः सत्यानि कृण्वन्द्रविणान्यर्षसि । जहि शत्रु-
मंतिके दूरके च य उर्वीं गव्यूतिमभयं च नस्कृधि ॥ ५ ॥ ३ ॥

॥ ७९ ॥ १–५ कविः ॥ पवमानः सोमः ॥ जगती ॥

॥७९॥ अचोदसो नो धन्वंत्विंदवः प्र सुवानासो बृहद्दिवेषु
हरयः । वि च नशन्न इषो अरातयोऽर्यो नशंत सनिषंत नो
धियः ॥१॥ प्र णो धन्वंत्विंदवो मदच्युतो धना वा येभिरर्वतो
जुनीमसि । तिरो मर्तस्य कस्य चित्परिह्वृतिं वयं धनानि वि-
श्वधा भरेमहि ॥२॥ उत स्वस्या अरात्या अरिर्हि ष उतान्य-
स्या अरात्या वृको हि षः । धन्वन्न तृष्णा समरीत ताँ अभि
सोम जहि पवमान दुराध्यः ॥ ३ ॥ दिवि ते नाभा परमो य
आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः । अद्रयस्त्वा बप्सति
गोरधि त्वच्य१प्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ॥४॥ एवा त इंदो
सुभ्वं सुपेशसं रसं तुंजंति प्रथमा अभिश्रियः । निदंनिदं पव-
मान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ॥५॥४॥

॥ ८० ॥ १–५ वसुर्भारद्वाजः ॥ पवमानः सोमः ॥ जगती ॥

॥८०॥ सोमस्य धारा पवते नृचक्षस ऋतेन देवान्हवते दि-
वस्परि । बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि
विव्यचुः ॥१॥ यं त्वा वाजिन्नघ्न्या अभ्यनूषतायोहतं योनि-
मा रोहसि द्युमान् । मघोनामायुः प्रतिरन्महि श्रव इंद्राय
सोम पवसे वृषा मदः ॥२॥ ऐंद्रस्य कुक्षा पवते मदिंतम

ऊर्जं वसानः श्रवसे सुमंगलः । प्रत्यङ् स विश्वा भुवनाभि
पप्रथे क्रीळन्हरिरत्यः स्यंदते वृषा ॥३॥ तं त्वा देवेभ्यो मधु-
मत्तमं नरः सहस्रधारं दुहते दश क्षिपः । नृभिः सोम प्रच्युतो
ग्रावभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित् ॥ ४ ॥ तं
त्वा हस्तिनो मधुमंतमद्रिभिर्दुहंत्यप्सु वृषभं दश क्षिपः । इंद्रं
सोम मादयन्दैव्यं जनं सिंधोरिवोर्मिः पवमानो अर्षसि
॥ ५ ॥ ५ ॥

॥ ८१ ॥ १–५ वसुर्भारद्वाजः ॥ पवमानः सोमः ॥ १–४ जगती । ५ त्रिष्टुप् ॥

॥८१॥ प्र सोमस्य पवमानस्योर्मय इंद्रस्य यंति जठरं
सुपेशसः । दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमं-
दिषुः सुताः ॥१॥ अच्छा हि सोमः कलशाँ असिष्यददत्यो न
वोळ्हा रघुवर्तनिर्वृषा । अथा देवानामुभयस्य जन्मनो विद्वाँ
अश्नोत्यमुत इतश्च यत् ॥ २ ॥ आ नः सोम पवमानः किरा
वस्विंदो भव मघवा राधसो महः । शिक्षा वयोधो वसवे सु
चेतुना मा नो गयमारे अस्मत्परा सिचः ॥३॥ आ नः पूषा
पवमानः सुरातयो मित्रो गच्छंतु वरुणः सजोषसः । बृहस्प-
तिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥ ४ ॥
उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।
भगो नृशंस उर्वं१तरिक्षं विश्वे देवाः पवमानं जुषंत ॥५॥६॥

॥ ८२ ॥ १–५ वसुर्भारद्वाजः ॥ पवमानः सोमः ॥ १–४ जगती । ५ त्रिष्टुप् ॥

॥८२॥ असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि
गा अचिक्रदत् । पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं
घृतवंतमासदं ॥ १ ॥ कविर्वेधस्या पर्येषि माहिनमत्यो न
मृष्टो अभि वाजमर्षसि । अपसेधन्दुरिता सोम मृळय घृतं

वसा॑नः॒ परि॑ यासि नि॒र्णिज॑म् ॥२॥ प॒र्जन्यः॑ पि॒ता म॑हि॒षस्य॑
प॒र्णिनो॒ नाभा॑ पृथि॒व्या गि॒रिषु॒ क्षयं॑ दधे । स्वसा॑र॒ आपो॑ अ॒-
भि गा उ॒तास॑र॒न्त्सं ग्राव॑भिर्नसते वी॒ते अ॑ध्व॒रे ॥३॥ जा॒येव॒
पत्या॒वधि॒ शेव॑ मंहसे॒ पज्रा॑या गर्भ शृणु॒हि ब्रवी॑मि ते । अ॒ं-
तर्वाणी॑षु॒ प्र च॑रा॒ सु जी॒वसे॑ऽनि॒न्द्यो वृ॒जने॑ सोम जागृहि ॥४॥
यथा॒ पूर्वे॑भ्यः शत॒सा अमृ॑ध्रः सहस्र॒साः प॒र्यया॒ वाज॑मिंदो ।
ए॒वा प॑वस्व सुवि॒ताय॒ नव्य॑से॒ तव॑ व्र॒तमन्वापः॑ सचंते ॥५॥७॥

॥ ८३ ॥ १–५ पवित्रः ॥ पवमानः सोमः ॥ जगती ॥

॥८३॥ प॒वित्रं॑ ते॒ वित॑तं ब्रह्मणस्पते प्र॒भुर्गात्रा॑णि॒ पर्ये॑षि
वि॒श्वतः॑ । अत॑प्ततनू॒र्न तदा॒मो अ॑श्नुते शृ॒तास॒ इद्वह॑न्त॒स्तत्स-
मा॑शत ॥१॥ तपो॑ष्प॒वित्रं॒ वित॑तं दि॒वस्प॒दे शोचं॑तो अस्य॒
तंत॑वो॒ व्य॑स्थिरन् । अवं॑त्यस्य पवी॒तार॑मा॒शवो॑ दि॒वस्पृ॒ष्ठमधि॑
तिष्ठंति॒ चेत॑सा ॥२॥ अरू॑रुचदु॒षसः॒ पृश्नि॑रग्नि॒य उ॒क्षा बि॑भर्ति॒
भुव॑नानि वाज॒युः । मा॒या॒विनो॑ ममिरे अस्य मा॒यया॑ नृ॒च-
क्ष॑सः पि॒तरो॒ गर्भ॒मा द॑धुः ॥३॥ गं॒ध॒र्व इ॒त्था प॒दम॑स्य रक्षति॒
पाति॑ दे॒वानां॒ जनि॑मा॒न्यद्भु॑तः । गृ॒भ्णाति॑ रि॒पुं नि॒धया॑ नि-
धाप॑तिः सु॒कृत्त॑मा॒ मधु॑नो भ॒क्षमा॑शत ॥४॥ ह॒विर्ह॑विष्मो॒
महि॒ सद्म॒ दैव्यं॒ नभो॒ वसा॑नः॒ परि॑ यास्यध्व॒रम् । राजा॑ प॒वित्र॑-
रथो॒ वाज॒मारु॑हः स॒हस्र॑भृष्टिर्जयसि॒ श्रवो॑ बृ॒हत् ॥५॥८॥

॥ ८४ ॥ १–५ प्रजापतिर्वाच्यः ॥ पवमानः सोमः ॥ जगती ॥

॥८४॥ पव॑स्व देव॒माद॑नो॒ विच॑र्षणिर॒प्सा इंद्रा॑य॒ वरु॑णाय
वा॒यवे॑ । कृ॒धी नो॑ अ॒द्य वरि॑वः स्वस्ति॒मदु॑रुक्षि॒तौ गृ॑णी-
हि॒ दैव्यं॒ जन॑म् ॥१॥ आ यस्त॒स्थौ भुव॑ना॒न्यम॑र्त्यो॒ विश्वा॑नि॒
सोमः॒ परि॒ तान्य॑र्षति । कृ॒ण्वन्त्सं॒चृतं॒ विचृ॑त॒मभि॑ष्टय॒ इंदुः॑

सिषक्त्युषसं न सूर्यः ॥२॥ आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः । आ विद्युता पवते धारया सुत इंद्रं सोमो मादयन्दैव्यं जनं ॥ ३ ॥ एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधं । इंदुः समुद्रमुदियर्ति वायुभिरेंद्रस्य हार्दि कलशेषु सीदति ॥ ४ ॥ अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणंति मतिभिः स्वर्विदं । धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ॥५॥९॥

॥ ८५ ॥ १-१२ वेनो भार्गवः ॥ पवमानः सोमः ॥ १-१० जगती । ११. १२ त्रिष्टुप् ॥

॥८५॥ इंद्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह । मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वंत इह संत्विंदवः ॥१॥ अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः । जहि शत्रूँरभ्या भंदनायतः पिबेंद्र सोममव नो मृधो जहि ॥२॥ अदब्ध इंदो पवसे मदिंतम आत्मेंद्रस्य भवसि धासिरुत्तमः । अभि स्वरंति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥३॥ सहस्रणीथः शतधारो अद्भुत इंद्रायेंदुः पवते काम्यं मधु । जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥४॥ कनिक्रदत्कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि । मर्मृज्यमानो अत्यो न सानसिरिंद्रस्य सोम जठरे समक्षरः ॥५॥ स्वादुः पवस्व दिव्याय जन्मने स्वादुरिंद्राय सुहवीतुनाम्ने । स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥६॥१०॥ अत्यं मृजंति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते । पवमाना अभ्यर्षंति सुष्टुतिमेंद्रं विशंति मदिरास इंदवः ॥ ७ ॥ पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः । माकिर्नो अस्य परि-

घृतिरीशतेंदो जयेम त्वया धनंधनं ॥८॥ अधि द्यामस्थाद्वृषभो वि-
चक्षणोऽरूरुचद्वि दिवो रोचना कविः। राजा पवित्रमत्येति
रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ॥९॥ दिवो नाके मधुजिह्वा
असश्चतो वेना दुहंत्युक्षणं गिरिष्ठां। अप्सु द्रप्सं वावृधानं समुद्र
आ सिंधोरूर्मा मधुमंतं पवित्र आ ॥१०॥ नाके सुपर्णमुपपप्ति-
वांसं गिरो वेनानामकृपंत पूर्वीः। शिशुं रिहंति मतयः पनिप्नतं
हिरण्ययं शकुनं क्षामणि स्थां ॥११॥ ऊर्ध्वो गंधर्वो अधि नाके
अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य। भानुः शुक्रेण शोचिषा
व्यद्यौत्प्रारूरुचद्रोदसी मातरा शुचिः ॥ १२ ॥ ११ ॥ ४ ॥

॥ ८६ ॥ १–१० आकृष्टा माषाः । ११–२० सिकता निवावरी । २१–३० पृश्नयो-ऽजाः । ३१–४० त्रय ऋषिगणाः । ४१–४५ अत्रिः । ४६–४८ गृत्समदः ॥ पवमानः सोमः ॥ जगती ॥

॥८६॥ प्र त आशवः पवमान धीजवो मदा अर्षंति रघुजा
इव त्मना। दिव्याः सुपर्णा मधुमंत इंदवो मदिंतमासः
परि कोशमासते ॥१॥ प्र ते मदासो मदिरास आशवोऽसृक्षत
रथ्यासो यथा पृथक्। धेनुर्न वत्सं पयसाभि वज्रिणमिंद्रमिंद-
वो मधुमंत ऊर्मयः ॥२॥ अत्यो न हियानो अभि वाजमर्ष स्व-
र्वित्कोशं दिवो अद्रिमातरं। वृषा पवित्रे अधि सानो अव्यये
सोमः पुनान इंद्रियाय धायसे ॥३॥ प्र त आश्विनीः पवमान
धीजुवो दिव्या असृग्रन्पयसा धरीमणि। प्रांतर्ऋषयः स्थावि-
रीरसृक्षत ये त्वा मृजंत्यृषिषाण वेधसः ॥४॥ विश्वा धामानि
विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यंति केतवः। व्यानशिः
पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥५॥१२॥ उ-
भयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यंति केतवः। यदी प-
वित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ॥६॥

यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतं।
सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥७॥
राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं सचते सिंधुषु श्रितः।
अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो म-
हो दिवः ॥८॥ दिवो न सानु स्तनयन्नचिक्रदद्द्यौश्च यस्य
पृथिवी च धर्मभिः। इंद्रस्य सख्यं पवते विवेविदत्सोमः पुना-
नः कलशेषु सीदति ॥९॥ ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता
देवानां जनिता विभूवसुः। दधाति रत्नं स्वधयोरपीच्यं मदिं-
तमो मत्सर इंद्रियो रसः ॥१०॥१३॥ अभिक्रंदन्कलशं वाज्य-
र्षति पतिर्दिवः शतधारो विचक्षणः। हरिर्मित्रस्य सदनेषु
सीदति मर्मृजानोऽविभिः सिंधुभिर्वृषा ॥११॥ अग्रे सिंधूनां
पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छति। अग्रे वा-
जस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ॥१२॥
अयं मतवाञ्छकुनो यथा हितोऽव्ये ससार पवमान ऊर्मि-
णा। तव क्रत्वा रोदसी अंतरा कवे शुचिर्धिया पवते सोम
इंद्र ते ॥१३॥ द्रापिं वसानो यजतो दिविस्पृशमंतरिक्षप्रा
भुवनेष्वर्पितः। स्वर्जज्ञानो नभसाभ्यक्रमीत्प्रत्नमस्य पितर-
मा विवासति ॥१४॥ सो अस्य विशे महि शर्म यच्छति यो
अस्य धाम प्रथमं व्यानशे। पदं यदस्य परमे व्योमन्यतो विश्वा
अभि सं याति संयतः ॥१५॥१४॥ प्रो अयासीदिंदुरिंद्रस्य नि-
ष्कृतं सखा सख्युर्न प्र मिनाति संगिरं। मर्य इव युवतिभिः
समर्षति सोमः कलशे शतयाम्ना पथा ॥१६॥ प्र वो धियो मं-
द्रयुवो विपन्युवः पनस्युवः संवसनेष्वक्रमुः। सोमं मनीषा अ-
भ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः ॥१७॥ आ नः सोम

संयतं पिप्युषीमिषमिंदो पवस्व पवमानो अस्रिधं । या
नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यं ॥१८॥
वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो
दिवः । क्राणा सिंधूनां कलशाँ अवीवशदिंद्रस्य हार्दाविश-
न्मनीषिभिः ॥१९॥ मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः
परि कोशाँ अचिक्रदत् । त्रितस्य नाम जनयन्मधु क्षरदिंद्रस्य
वायोः सख्याय कर्तवे ॥२०॥१५॥ अयं पुनान उषसो वि
रोचयदयं सिंधुभ्यो अभवदु लोककृत् । अयं त्रिः सप्त दुदुहान
आशिरं सोमो हृदे पवते चारु मत्सरः ॥२१॥ पवस्व सोम
दिव्येषु धामसु सृजान इंदो कलशे पवित्र आ । सीदन्निंद्रस्य
जठरे कनिक्रदन्नृभिर्यतः सूर्यमारोहयो दिवि ॥२२॥ अद्रिभिः
सुतः पवसे पवित्र आँ इंदविंद्रस्य जठरेष्वाविशन् । त्वं नृ-
चक्षा अभवो विचक्षण सोम गोत्रमंगिरोभ्योऽवृणोरप
॥२३॥ त्वां सोम पवमानं स्वाध्योऽनु विप्रासो अमदन्नव-
स्यवः । त्वां सुपर्ण आभरद्दिवस्परींदो विश्वाभिर्मतिभिः
परिष्कृतं ॥२४॥ अव्ये पुनानं परि वार ऊर्मिणा हरिं नवंते
अभि सप्त धेनवः । अपामुपस्थे अध्यायवः कविमृतस्य योना
महिषा अहेषत ॥२५॥१६॥ इंदुः पुनानो अति गाहते मृधो
विश्वानि कृण्वन्सुपथानि यज्यवे । गाः कृण्वानो निर्णिजं
हर्यतः कविरत्यो न क्रीळन्परि वारमर्षति ॥२६॥ असश्चतः
शतधारा अभिश्रियो हरिं नवंतेऽव ता उदन्युवः । क्षिपो मृ-
जंति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ॥२७॥
तवेमाः प्रजा दिव्यस्य रेतसस्त्वं विश्वस्य भुवनस्य राजसि । अ-
थेदं विश्वं पवमान ते वशे त्वमिंदो प्रथमो धामधा असि ॥२८॥

त्वं समुद्रो असि विश्ववित्कवे तवेमाः पंच प्रदिशो विधर्मणि। त्वं द्यां च पृथिवीं चाति जभ्रिषे तव ज्योतींषि पवमान सूर्यः ॥२९॥ त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे। त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ॥३०॥१७॥ प्र रेभ एत्यति वारमव्ययं वृषा वनेष्ववं चक्रदद्धरिः। सं धीतयो वावशाना अनूषत शिशुं रिहंति मतयः पनिप्नतं ॥३१॥ स सूर्यस्य रश्मिभिः परि व्यत तंतुं तन्वानस्त्रिवृतं यथा विदे। नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतं ॥३२॥ राजा सिंधूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत्। सहस्रधारः परि षिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः ॥३३॥ पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया। गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि ॥३४॥ इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि। इंद्राय मद्वा मद्यो मदः सुतो दिवो विष्टंभ उपमो विचक्षणः ॥३५॥१८॥ सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितं। अपां गंधर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥३६॥ ईशान इमा भुवनानि वीयसे युजान इंदो हरितः सुपर्ण्यः। तास्ते क्षरंतु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठंतु कृष्टयः ॥३७॥ त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि। स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥३८॥ गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इंदो भुवनेष्वर्पितः। त्वं सुवीरो असि सोम विश्ववित्तं त्वा विप्रा उप गिरेम आसते ॥३९॥ उन्मध्व ऊर्मिर्वननां अतिष्ठिपदपो वसा-

नो महिषो वि गाहते। राजा पवित्ररथो वाजमारुहत्सहस्र-
भृष्टिर्जयति श्रवो बृहत् ॥४०॥१९॥ स भंदना उदियर्ति
प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि। ब्रह्म प्रजावद्रयि-
मश्वपस्त्यं पीत इंदविंद्रमस्मभ्यं याचतात् ॥४१॥ सो अग्रे
अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः। द्वा
जना यातयन्नंतरीयते नरा च शंसं दैव्यं च धर्तरि ॥४२॥ अंजते
व्यंजते समंजते क्रतुं रिहंति मधुनाभ्यंजते। सिंधोरुच्छ्वासे
पतयंतमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ॥४३॥ विप-
श्चिते पवमानाय गायत मही न धारात्यंधो अर्षति। अहिर्न
जूर्णामति सर्पति त्वचमत्यो न क्रीळन्नसरद्वृषा हरिः ॥४४॥
अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः
॥४५॥२०॥ असर्जि स्कंभो दिव उद्यतो मदः परि त्रिधातुर्भु-
वनान्यर्षति। अंशुं रिहंति मतयः पनिप्नतं गिरा यदि
निर्णिजमृग्मिणो ययुः ॥४६॥ प्र ते धारा अत्यण्वानि मेष्यः
पुनानस्य संयतो यंति रंहयः। यद्गोभिरिंदो चम्वोः समज्यस
आ सुवानः सोम कलशेषु सीदसि ॥४७॥ पवस्व सोम क्रतु-
विन्न उक्थ्योऽव्यो वारे परि धाव मधु प्रियं। जहि विश्वा-
न्रक्षस इंदो अत्रिणो बृहद्वदेम विदथे सुवीराः ॥४८॥२१॥

॥ ८७ ॥ १-९ उशनाः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥८७॥ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वा-
जमर्ष। अश्वं न त्वा वाजिनं मर्जयंतोऽच्छा बर्हीं रशनाभिर्नयं-
ति ॥१॥ स्वायुधः पवते देव इंदुरशस्तिहा वृजनं रक्षमाणः। पि-
ता देवानां जनिता सुदक्षो विष्टंभो दिवो धरुणः पृथिव्याः ॥२॥

ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन । स
चिद्विवेद निहितं यदासामपीच्यं१गुह्यं नाम गोनां ॥ ३ ॥
एष स्य ते मधुमाँ इंद्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।
सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥ ४ ॥
एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।
पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः
॥ ५ ॥ २२ ॥ परि हि ष्मा पुरुहूतो जनानां विश्वासरद्भोजना
पूयमानः । अथा भर श्येनभृत प्रयांसि रयिं तुंजानो अभि
वाजमर्ष ॥ ६ ॥ एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो
अदधावदर्वा । तिग्मे शिशानो महिषो न शृंगे गा गव्यन्नभि
शूरो न सत्वा ॥ ७ ॥ एषा ययौ परमादंतरद्रेः कूचित्सतीरूर्वे
गा विवेद । दिवो न विद्युत्स्तनयंत्यभ्रैः सोमस्य ते पवत इंद्र
धारा ॥ ८ ॥ उत स्म राशिं परि यासि गोनामिंद्रेण सोम सरथं
पुनानः । पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता
उपष्टुत् ॥ ९ ॥ २३ ॥

॥ ८८ ॥ १-८ उशनाः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥ ८८ ॥ अयं सोम इंद्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इंदुं मदाय युज्याय सोमं ॥ १ ॥ स ईं रथो
न भुरिषाळयोजि महः पुरूणि सातये वसूनि । आदीं विश्वा
नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवंत ॥ २ ॥ वायुर्न यो
नियुत्वाँ इष्टयामा नासत्येव हव आ शंभविष्ठः । विश्ववारो
द्रविणोदा इव त्मन्पूषेव धीजवनोऽसि सोम ॥ ३ ॥ इंद्रो न यो
महा कर्माणि चक्रिर्हंता वृत्राणामसि सोम पूर्भित् । पैद्वो न
हि त्वमहिनाम्नां हंता विश्वस्यासि सोम दस्योः ॥ ४ ॥ अग्निर्न

यो वन आ मृज्यमानो वृथा पाजांसि कृणुते नदीषु । जनो
न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिं ॥५॥ एते
सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः । वृथा
समुद्रं सिंधवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ॥६॥
शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् । आ-
पो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ॥७॥
राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम । शुचि-
ष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥८॥२४॥

॥ ८९ ॥ १-७ उशनाः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥८९॥ प्रो स्य वह्निः पथ्याभिरस्यान्दिवो न वृष्टिः पवमानो
अक्षाः । सहस्रधारो असदन्न्य१स्मे मातुरुपस्थे वन आ च सोमः
॥१॥ राजा सिंधूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठां ।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जां ॥२॥
सिंहं नसंत मध्वो अयासं हरिमरुषं दिवो अस्य पतिं । शूरो
युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ॥३॥
मधुपृष्ठं घोरमयासमश्वं रथे युंजंत्युरुचक्र ऋष्वं । स्वसार ईं
जामयो मर्जयंति सनाभयो वाजिनमूर्जयंति ॥४॥ चतस्र
ईं घृतदुहः सचंते समाने अंतर्धरुणे निषत्ताः । ता ईमर्षंति
नमसा पुनानास्ता ईं विश्वतः परि षंति पूर्वीः ॥५॥ वि-
ष्टंभो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते
अस्य । असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इंद्रि-
याय ॥६॥ वन्वन्नवातो अभि देववीतिमिंद्राय सोम वृत्रहा
पवस्व । शग्धि महः पुरुश्चंद्रस्य रायः सुवीर्यस्य पतयः
स्याम ॥७॥२५॥

॥ ९० ॥ १–६ वसिष्ठः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥९०॥ प्र हिन्वानो जनिता रोदस्यो रथो न वाजं स-
निषन्नयासीत् । इंद्रं गच्छन्नायुधा संशिशानो विश्वा वसु
हस्तयोरादधानः ॥१॥ अभि त्रिपृष्ठं वृषणं वयोधामांगूषा-
णामवावशंत वाणीः । वना वसानो वरुणो न सिंधून्वि
रत्नधा दयते वार्याणि ॥२॥ शूरग्रामः सर्ववीरः सहावाञ्जेता
पवस्व सनिता धनानि । तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळ्हः
साह्वान्पृतनासु शत्रून् ॥३॥ उरुगव्यूतिरभयानि कृण्वन्त्समी-
चीने आ पवस्वा पुरंधी । अपः सिषासन्नुषसः स्व१र्गाः सं
चिक्रदो महो अस्मभ्यं वाजान् ॥४॥ मत्सि सोम वरुणं मत्सि
मित्रं मत्सींद्रमिंदो पवमान विष्णुं । मत्सि शर्धो मारुतं मत्सि
देवान्मत्सि महामिंद्रमिंदो मदाय ॥५॥ एवा राजेव क्रतुमाँ
अमेन विश्वा घनिघ्नद्दुरिता पवस्व । इंदो सूक्ताय वचसे वयो
धा यूयं पात स्वस्तिभिः सदा नः ॥६॥२६॥३॥

॥ ९१ ॥ १–६ कश्यपः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥९१॥ असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो
मनीषी । दश स्वसारो अधि सानो अव्येऽजंति वह्निं सदना-
न्यच्छ ॥१॥ वीती जनस्य दिव्यस्य कव्यैरधि सुवानो नहुषेभि-
रिंदुः । प्र यो नृभिरमृतो मर्त्येभिर्मर्मृजानोऽविभिर्गोभिरद्भिः
॥२॥ वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो
गोः । सहस्रमृक्वा पथिभिर्वचोविदध्वस्मभिः सूरो अण्वं
वि याति ॥३॥ रुजा दृळ्हा चिद्रक्षसः सदांसि पुनान इंद
ऊर्णुहि वि वाजान् । वृश्चोपरिष्टात्तुजता वधेन ये अंति दू-
रादुपनायमेषां ॥४॥ स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः
कृणुहि प्राचः । ये दुःषहासो वनुषा बृहंतस्तांस्ते अश्याम

पुरुकृत्पुरुक्षो ॥५॥ एवा पुनानो अपः स्व१र्गा अस्मभ्यं तो-
का तनयानि भूरि। शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः
सूर्यं दृशये रिरीहि॥ ६ ॥ १ ॥

॥ ९२ ॥ १-६ कश्यपः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥ ९२ ॥ परि सुवानो हरिरंशुः पवित्रे रथो न सर्जि सनये
हियानः। आपच्छ्लोकमिंद्रियं पूयमानः प्रति देवाँ अजुषत
प्रयोभिः ॥१॥ अच्छा नृचक्षा असरत्पवित्रे नाम दधानः क-
विरस्य योनौ। सीदन्होतेव सदने चमूषूपेमग्मन्नृषयः सप्त
विप्राः ॥ २ ॥ प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सद
एति नित्यं। भुवद्विश्वेषु काव्येषु रंतानु जनान्यतते पंच धीरः
॥ ३ ॥ तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकाद-
शासः। दश स्वधाभिरधि सानो अव्ये मृजंति त्वा नद्यः सप्त
यह्वीः ॥४॥ तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संन-
संत। ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकं
॥५॥ परि सद्मेव पशुमांति होता राजा न सत्यः समितीरि-
यानः। सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो
वनेषु ॥ ६ ॥ २ ॥

॥ ९३ ॥ १-५ नोधाः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥९३॥ साकमुक्षो मर्जयंत स्वसारो दश धीरस्य धीतयो धनु-
त्रीः। हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥१॥
सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः।
मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः
॥२॥ उत प्र पिप्य ऊधरघ्न्याया इंदुर्धाराभिः सचते सुमेधाः।
मूर्धानं गावः पयसा चमूष्वभि श्रीणंति वसुभिर्न निक्तैः

॥ ३ ॥ स नो देवेभिः पवमान रदेंदो रयिमश्विनं वावशानः ।
रथिरायतामुशती पुरंधिरस्मद्र्य१गा दावने वसूनां ॥४॥ नू नो
रयिमुप मास्व नृवंतं पुनानो वाताप्यं विश्वश्चंद्रं । प्र वंदितु-
रिंदो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ५ ॥ ३ ॥

॥ ९४ ॥ १–५ कण्वः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥९४॥ अधि यदस्मिन्वाजिनीव शुभः स्पर्धंते धियः सूर्ये न
विशः । अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय
मन्म ॥ १ ॥ द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्र-
थंत । धियः पिन्वानाः स्वसरे न गाव ऋतायंतीरभि वावश्र
इंदुं ॥ २ ॥ परि यत्कविः काव्या भरते शूरो न रथो भुवनानि
विश्वा । देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः
॥३॥ श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो
दधाति । श्रियं वसाना अमृतत्वमायन्भवंति सत्या समिथा
मितद्रौ ॥ ४ ॥ इषमूर्जमभ्य१र्षाश्वं गामुरु ज्योतिः कृणुहि
मत्सि देवान् । विश्वानि हि सुषहा तानि तुभ्यं पवमान
बाधसे सोम शत्रून् ॥ ५ ॥ ४ ॥

॥ ९५ ॥ १–५ प्रस्कण्वः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥ ९५ ॥ कनिक्रंति हरिरा सृज्यमानः सीदन्वनस्य जठरे
पुनानः । नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत
स्वधाभिः ॥१॥ हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव
नावं । देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि
प्रवाचे ॥ २ ॥ अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते
सोममच्छ । नमस्यंतीरुप च यंति सं चा च विशंत्युशतीरु-
शंतं ॥ ३ ॥ तं मर्मृजानं महिषं न सानावंशुं दुहंत्युक्षणं गि-

रिष्टां। तं वावशानं मतयः सचंते त्रितो बिभर्ति वरुणं समुद्रे
॥४॥ इष्यन्वाचमुपवक्तेव होतुः पुनान इंदो वि ष्या मनीषां।
इंद्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥५॥५॥

॥ ९६ ॥ १–२४ प्रतर्दनो दैवोदासिः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥९६॥ प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य
सेना। भद्रान्कृण्वन्निंद्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभ-
सानि दत्ते ॥१॥ समस्य हरिं हरयो मृजंत्यश्वहयैरनिशितं
नमोभिः। आ तिष्ठति रथमिंद्रस्य सखा विद्वाँ एना सुमतिं
यात्यच्छ ॥२॥ स नो देव देवताते पवस्व महे सोम प्सरस
इंद्रपानः। कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या
पुनानः ॥३॥ अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृ-
हते। तदुशंति विश्व इमे सखायस्तदहं वश्मि पवमान सोम
॥४॥ सोमः पवते जनिता मतीनां जनिता दिवो जनिता
पृथिव्याः। जनिताग्नेर्जनिता सूर्यस्य जनितेंद्रस्य जनितोत
विष्णोः ॥५॥६॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां
महिषो मृगाणां। श्येनो गृध्राणां स्वधितिर्वनानां सोमः प-
वित्रमत्येति रेभन् ॥६॥ प्रावीविपद्वाच ऊर्मिं न सिंधुर्गिरः
सोमः पवमानो मनीषाः। अंतः पश्यन्वृजनेमावराण्या ति-
ष्ठति वृषभो गोषु जानन् ॥७॥ स मत्सरः पृत्सु वन्वन्नवातः
सहस्ररेता अभि वाजमर्ष। इंद्रायेंदो पवमानो मनीष्यं१ंशोरू-
र्मिमीरय गा इषण्यन् ॥८॥ परि प्रियः कलशे देववात इंद्राय
सोमो रण्यो मदाय। सहस्रधारः शतवाज इंदुर्वाजी न सप्तिः
समना जिगाति ॥९॥ स पूर्व्यो वसुविज्जायमानो मृजानो
अप्सु दुदुहानो अद्रौ। अभिशस्तिपा भुवनस्य राजा विदद्गातुं

ब्रह्मणे पूयमानः ॥ १० ॥ ७ ॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः । वन्वन्नवातः परिधींरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥ ११ ॥ यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् । एवा पवस्व द्रविणं दधान इंद्रे सं तिष्ठ जनयायुधानि ॥ १२ ॥ पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये । अव द्रोणानि घृतवांति सीद मदिंतमो मत्सर इंद्रपानः ॥ १३ ॥ वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ । सं सिंधुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ॥ १४ ॥ एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः । पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोह्ळा ॥ १५ ॥ ८ ॥ स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम । अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम ॥ १६ ॥ शिशुं जज्ञानं हर्यतं मृजंति शुंभंति वह्निं मरुतो गणेन । कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥ १७ ॥ ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनां । तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥ १८ ॥ चमूषच्छ्येनः शकुनो विभृत्वा गोविंदुर्द्रप्स आयुधानि बिभ्रत् । अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ १९ ॥ मर्यो न शुभ्रस्तन्वं मृजानोऽत्यो न सृत्वा सनये धनानां । वृषेव यूथा परि कोशमर्षन्कनिक्रदच्चम्वो३रा विवेश ॥ २० ॥ ९ ॥ पवस्वेंदो पवमानो महोभिः कनिक्रदत्परि वाराण्यर्ष । क्रीळञ्चम्वो३रा विश पूयमान इंद्रं ते रसो मदिरो ममत्तु ॥ २१ ॥ प्रास्य धारा बृहतीरसृग्रन्नक्तो गोभिः

कलशाँ आ विवेश। साम कृण्वन्त्सामन्यो विपश्चित्क्रंदन्नेत्यभि सख्युर्न जामिं ॥२२॥ अपघ्नन्नेषि पवमान शत्रून्प्रियां न जारो अभिगीत इंदुः। सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता॥२३॥ आ ते रुचः पवमानस्य सोम योषेव यंति सुदुघाः सुधाराः। हरिरानीतः पुरुवारो अप्स्वचिक्रदत्कलशे देवयूनां ॥२४॥१०॥५॥

॥ ९७ ॥ १–३ वसिष्ठः । ४–६ इंद्रप्रमतिर्वासिष्ठः । ७–९ वृषगणो वासिष्ठः । १०–१२ मन्युर्वासिष्ठः । १३–१५ उपमन्युर्वासिष्ठः । १६–१८ व्याघ्रपाद्वासिष्ठः । १९–२१ शक्तिर्वासिष्ठः। २२–२४ कर्णश्रुद्वासिष्ठः। २५–२७ मृळीको वासिष्ठः। २८–३० वसुक्रो वासिष्ठः। ३१–४४ पराशरः। ४५–५८ कुत्सः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥९७॥ अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसं। सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमांति होता॥१॥ भद्रा वस्त्रा समन्या३ वसानो महान्कविर्निवचनानि शंसन्। आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥२॥ समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे। अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः॥३॥ प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय। स्वादुः पवाते अति वारमव्यमा सीदाति कलशं देवयुर्नः॥४॥ इंदुर्देवानामुप सख्यमायन्त्सहस्रधारः पवते मदाय। नृभिः स्तवानो अनु धाम पूर्वमगन्निंद्रं महते सौभगाय॥५॥११॥ स्तोत्रे राये हरिरर्षा पुनान इंद्रं मदो गच्छतु ते भराय। देवैर्याहि सरथं राधो अच्छा यूयं पात स्वस्तिभिः सदा नः॥६॥ प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति। महिव्रतः शुचिबंधुः पावकः पदा वराहो अभ्येति रेभन्॥७॥ प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः। आंगूष्यं१ पव-

मानं सखायो दुर्मर्षं साकं प्र वदंति वाणं ॥८॥ स रंहत उरु-
गायस्य जूतिं वृथा क्रीळंतं मिमते न गावः। परीणसं कृणुते
तिग्मशृंगो दिवा हरिर्ददृशे नक्तमृज्रः ॥९॥ इंदुर्वाजी पवते
गोन्योघा इंद्रे सोमः सह इन्वन्मदाय। हंति रक्षो बाधते पर्य-
रातीर्वरिवः कृण्वन्वृजनस्य राजा ॥१०॥१२॥ अध धारया
मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः। इंदुरिंद्रस्य सख्यं
जुषाणो देवो देवस्य मत्सरो मदाय ॥११॥ अभि प्रियाणि प-
वते पुनानो देवो देवान्स्वेन रसेन पृंचन्। इंदुर्धर्माण्यृतुथा
वसानो दश क्षिपो अव्यत सानो अव्ये ॥१२॥ वृषा शोणो
अभिकनिक्रदद्गा नदयन्नेति पृथिवीमुत द्यां। इंद्रस्येव वग्नुरा
शृण्व आजौ प्रचेतयन्नर्षति वाचमेमां ॥१३॥ रसाय्यः पयसा
पिन्वमान ईरयन्नेषि मधुमंतमंशुं। पवमानः संतनिमेषि
कृण्वन्निंद्राय सोम परिषिच्यमानः ॥१४॥ एवा पवस्व म-
दिरो मदायोदग्राभस्य नमयन्वधस्नैः। परि वर्णं भरमाणो
रुशंतं गव्युर्नो अर्ष परि सोम सिक्तः ॥१५॥१३॥ जुष्टी न इंदो
सुपथा सुगान्युरौ पवस्व वरिवांसि कृण्वन्। घनेव वि-
ष्वग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ॥१६॥ वृ-
ष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुं।
स्तुकेव वीता धन्वा विचिन्वन्बंधूंरिमाँ अवराँ इंदो वायून्
॥१७॥ ग्रंथिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं
च सोम। अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान्
॥१८॥ जुष्टो मदाय देवतात इंदो परि ष्णुना धन्व सानो अव्ये।
सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये ॥१९॥
अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ।

एते शुक्रासो धन्वंति सोमा देवासस्ताँ उप याता पिबध्यै
॥२०॥१४॥ एवा न इंदो अभि देववीतिं परि स्रव नभो अ-
र्णश्चमूषु। सोमो अस्मभ्यं काम्यं बृहंतं रयिं ददातु वीरवंतमुग्रं
॥२१॥ तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य वा धर्मणि क्षो-
रनीके। आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव
इंदुं ॥२२॥ प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सु-
मेधाः। धर्मा भुवद्वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम
॥२३॥ पवित्रेभिः पवमानो नृचक्षा राजा देवानामुत म-
र्त्यानां। द्विता भुवद्रयिपती रयीणामृतं भरत्सुभृतं चार्विंदुः
॥२४॥ अर्वाँ इव श्रवसे सातिमच्छेंद्रस्य वायोरभि वीति-
मर्ष। स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवि-
त्पुनानः ॥२५॥१५॥ देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं
धन्वंतु सोमाः। आयज्यवः सुमतिं विश्ववारा होतारो न दि-
वियजो मंद्रतमाः ॥२६॥ एवा देव देवताते पवस्व महे सोम
प्सरसे देवपानः। महश्चिद्धि ष्मसि हिताः समर्ये कृधि सुष्ठाने
रोदसी पुनानः ॥२७॥ अश्वो न क्रदो वृषभिर्युजानः सिंहो न
भीमो मनसो जवीयान्। अर्वाचीनैः पथिभिर्ये रजिष्ठा आ
पवस्व सौमनसं न इंदो ॥२८॥ शतं धारा देवजाता असृग्र-
न्त्सहस्रमेनाः कवयो मृजंति। इंदो सनित्रं दिव आ पवस्व
पुरएतासि महतो धनस्य ॥२९॥ दिवो न सर्गा असमृग्रमह्नां
राजा न मित्रं प्र मिनाति धीरः। पितुर्न पुत्रः क्रतुभिर्यतान
आ पवस्व विशे अस्या अजीतिं ॥३०॥१६॥ प्र ते धारा मधु-
मतीरसृग्रन्वारान्यत्पूतो अत्येष्यव्यान्। पवमान पवसे धाम
गोनां जज्ञानः सूर्यमपिन्वो अर्कैः ॥३१॥ कनिक्रदन्नु पथा-

मृतस्य शुक्रो वि भास्यमृतस्य धाम । स इंद्राय पवसे मत्स-
रवान्हिन्वानो वाचं मतिभिः कवीनां ॥३२॥ दिव्यः सुपर्णो-
ऽव चक्षि सोम पिन्वन्धाराः कर्मणा देववीतौ । एंदो विश
कलशं सोमधानं क्रंदन्निहि सूर्यस्योप रश्मिं ॥३३॥ तिस्रो
वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषां । गावो
यंति गोपतिं पृच्छमानाः सोमं यंति मतयो वावशानाः ॥३४॥
सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छ-
मानाः । सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं
नवंते ॥३५॥१७॥ एवा नः सोम परिषिच्यमान आ पवस्व
पूयमानः स्वस्ति । इंदुमा विश बृहता रवेण वर्धया वाचं
जनया पुरंधिं ॥३६॥ आ जागृविर्विप्र ऋता मतीनां सोमः
पुनानो असदच्चमूषु । सपंति यं मिथुनासो निकामा अध्व-
र्यवो रथिरासः सुहस्ताः ॥३७॥ स पुनान उप सूरे न धातोभे
अप्रा रोदसी वि ष आवः । प्रिया चिद्यस्य प्रियसास ऊती स
तू धनं कारिणे न प्र यंसत् ॥३८॥ स वर्धिता वर्धनः पूयमानः
सोमो मीढ्वाँ अभि नो ज्योतिषावीत् । येना नः पूर्वे पितरः पद-
ज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ॥३९॥ अक्रान्त्समुद्रः प्रथमे
विधर्मञ्जनयन्प्रजा भुवनस्य राजा । वृषा पवित्रे अधि सानो
अव्ये बृहत्सोमो वावृधे सुवान इंदुः ॥४०॥१८॥ महत्तत्सोमो
महिषश्चकारापां यद्गर्भोऽवृणीत देवान् । अदधादिंद्रे पवमान
ओजोऽजनयत्सूर्ये ज्योतिरिंदुः ॥४१॥ मत्सि वायुमिष्टये राधसे
च मत्सि मित्रावरुणा पूयमानः । मत्सि शर्धो मारुतं मत्सि दे-
वान्मत्सि द्यावापृथिवी देव सोम ॥४२॥ ऋजुः पवस्व वृजिनस्य
हंतापामीवां बाधमानो मृधश्च । अभिश्रीणन्पयः पयसाभि

गोनामिंद्रस्य त्वं तवं वयं सखायः ॥४३॥ मध्वः सूदं पवस्व वस्व उत्सं वीरं च न आ पंवस्वा भगं च। स्वदस्वेंद्राय पवमान इंदो रयिं च न आ पंवस्वा समुद्रात् ॥४४॥ सोमः सुतो धारयात्यो न हित्वा सिंधुर्न निम्नमभि वाज्यंक्षाः। आ योनिं वन्यमसदत्पुनानः समिंदुर्गोभिरसरत्समद्भिः ॥४५॥१९॥ एष स्य ते पवत इंद्र सोमश्चमूषु धीरं उशते तवस्वान्। स्वर्चक्षा रथिरः सत्यशुष्मः कामो न यो देवयतामसर्जि ॥४६॥ एष प्रत्नेन वयंसा पुनानस्तिरो वर्पांसि दुहितुर्दधानः। वसानः शर्मं त्रिवरूथमप्सु होतेव याति समनेषु रेभन् ॥४७॥ नू नस्त्वं रथिरो देव सोम परि स्रव चम्वोः पूयमानः। अप्सु स्वादिष्ठो मधुमाँ ऋतावा देवो न यः सविता सत्यमन्मा ॥४८॥ अभि वायुं वीत्यर्षा गृणानो३ऽभि मित्रावरुणा पूयमानः। अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुं ॥४९॥ अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः। अभि चंद्रा भर्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥५०॥२०॥ अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः। अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ॥५१॥ अया पवा पवस्वैना वसूनि मांश्चत्व इंदो सरसि प्र धन्व। ब्रध्नश्चिदत्र वातो न जूतः पुरुमेधश्चित्तकवे नरं दात् ॥५२॥ उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे। षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥५३॥ महीमे अस्य वृषनाम शूषे मांश्चत्वे वा पृशने वा वधत्रे। अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ॥५४॥ सं त्री पवित्रा विततान्येष्यन्वेकं धावसि पूयमानः। असि भगो असि दात्रस्य दा-

तासिं मघवा मघवद्भ्य इंदो ॥५५॥२१॥ एष विश्ववित्पवते मनीषी
सोमो विश्वस्य भुवनस्य राजा। द्रप्साँ ईरयन्विदथेष्विंदुर्वि वार-
मव्यं समयाति याति ॥५६॥ इंदुं रिहंति महिषा अदब्धाः पदे रेभंति
कवयो न गृध्राः। हिन्वंति धीरा दशभिः क्षिपाभिः समंजते रूप-
मपां रसेन ॥५७॥ त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम
शश्वत्। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत
द्यौः ॥५८॥२२॥

॥ ९८ ॥ १–१२ अंबरीष ऋजिश्वा च ॥ पवमानः सोमः ॥ १–१०. १२ अनुष्टुप्।
११ बृहती ॥

॥९८॥ अभि नो वाजसातमं रयिमर्ष पुरुस्पृहं। इंदो सहस्र-
भर्णसं तुविद्युम्नं विभ्वासहं ॥१॥ परि ष्य सुवानो अव्ययं रथे
न वर्माव्यत। इंदुरभि द्रुणा हितो हियानो धाराभिरक्षाः ॥२॥
परि ष्य सुवानो अक्षा इंदुरव्ये मदच्युतः। धारा य ऊर्ध्वो अ-
ध्वरे भ्राजा नैति गव्ययुः ॥३॥ स हि त्वं देव शश्वते वसु मर्ताय
दाशुषे। इंदो सहस्रिणं रयिं शतात्मानं विवाससि ॥४॥ वयं
ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः। नि नेदिष्ठतमा इषः
स्याम सुम्नस्याध्रिगो ॥५॥ द्विर्यं पंच स्वयशसं स्वसारो अद्रि-
संहतं। प्रियमिंद्रस्य काम्यं प्रस्नापयंत्यूर्मिणं ॥६॥२३॥ परि त्यं
हर्यतं हरिं बभ्रुं पुनंति वारेण। यो देवान्विश्वाँ इत्परि मदेन
सह गच्छति ॥७॥ अस्य वो ह्यवसा पांतो दक्षसाधनं। यः सू-
रिषु श्रवो बृहद्दधे स्व१र्ण हर्यतः ॥८॥ स वां यज्ञेषु मानवी
इंदुर्जनिष्ट रोदसी। देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि
॥९॥ इंद्राय सोम पातवे वृत्रघ्ने परि षिच्यसे। नरे च दक्षिणा-
वते देवाय सदनासदे ॥१०॥ ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे
अक्षरन्। अपप्रोथंतः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः ॥११॥

तं सखायः पुरोरुचं यूयं वयं च सूरयः। अश्याम वाजगंध्यं सनेम वाजपस्त्यं ॥ १२ ॥ २४ ॥

॥ ९९ ॥ १-८ रेभसूनू काश्यपौ ॥ पवमानः सोमः ॥ १ बृहती । २-८ अनुष्टुप् ॥

॥९९॥ आ हर्यताय धृष्णवे धनुस्तन्वंति पौंस्यं। शुक्रां वयंत्यसुराय निर्णिजं विपामग्रे महीयुवः ॥१॥ अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते। यदी विवस्वतो धियो हरिं हिन्वंति यातवे ॥२॥ तमस्य मर्जयामसि मदो य इंद्रपातमः। यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥३॥ तं गाथया पुराण्या पुनानमभ्यनूषत। उतो कृपंत धीतयो देवानां नाम बिभ्रतीः ॥४॥ तमुक्षमाणमव्यये वारे पुनंति धर्णसिं। दूतं न पूर्वचित्तय आ शासते मनीषिणः ॥५॥२५॥ स पुनानो मदिंतमः सोमश्चमूषु सीदति। पशौ न रेत आदधत्पतिर्वचस्यते धियः ॥६॥ स मृज्यते सुकर्मभिर्देवो देवेभ्यः सुतः। विदे यदासु संददिर्महीरपो वि गाहते ॥७॥ सुत इंदो पवित्र आ नृभिर्यतो वि नीयसे। इंद्राय मत्सरिंतमश्चमूष्वा नि षीदसि ॥८॥२६॥

॥ १०० ॥ १-९ रेभसूनू काश्यपौ ॥ पवमानः सोमः ॥ अनुष्टुप् ॥

॥१००॥ अभी नवंते अद्रुहः प्रियमिंद्रस्य काम्यं। वत्सं न पूर्व आयुनि जातं रिहंति मातरः॥१॥ पुनान इंदवा भर सोम द्विबर्हसं रयिं। त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे॥२॥ त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः। त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि॥३॥ परि ते जिग्युषो यथा धारा सुतस्य धावति। रंहमाणा व्य१व्ययं वारं वाजीव सानसिः॥४॥ क्रत्वे दक्षाय नः कवे पवस्व सोम धारया। इंद्राय पातवे सुतो मित्राय वरुणाय च॥५॥२७॥ पवस्व वाजसातमः पवित्रे धारया सुतः। इंद्राय सोम विष्णवे

देवेभ्यो मधुमत्तमः ॥६॥ त्वां रिहंति मातरो हरिं पवित्रे अद्रुहः। वत्सं जातं न धेनवः पवमान विधर्मणि ॥७॥ पवमान महि श्रवश्चित्रेभिर्यासि रश्मिभिः। शर्धन्तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ॥८॥ त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे। प्रतिं द्रापिममुंचथाः पवमान महित्वना ॥ ९ ॥ २८ ॥ ४ ॥

॥ १०१ ॥ १–३ अंधीगुः श्यावाश्विः। ४–६ ययातिर्नाहुषः। ७–९ नहुषो मानवः। १०–१२ मनुः सांवरणः। १३–१६ प्रजापतिः॥ पवमानः सोमः॥ १. ४–१६ अनुष्टुप्। २. ३ गायत्री॥

॥१०१॥ पुरोजिती वो अंधसः सुताय मादयित्नवे। अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यं ॥१॥ यो धारया पावकया परिप्रस्यंदते सुतः। इंदुरश्वो न कृत्व्यः ॥२॥ तं दुरोषमभी नरः सोमं विश्वाच्या धिया। यज्ञं हिन्वंत्यद्रिभिः ॥३॥ सुतासो मधुमत्तमाः सोमा इंद्राय मंदिनः। पवित्रवंतो अक्षरन्देवान्गच्छंतु वो मदाः ॥४॥ इंदुरिंद्राय पवत इति देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ॥५॥१॥ सहस्रधारः पवते समुद्रो वाचमीखयः। सोमः पती रयीणां सखेंद्रस्य दिवेदिवे ॥६॥ अयं पूषा रयिर्भगः सोमः पुनानो अर्षति। पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥७॥ समु प्रिया अनूषत गावो मदाय घृष्वयः। सोमासः कृणवते पथः पवमानास इंदवः ॥८॥ य ओजिष्ठस्तमा भर पवमान श्रवाय्यं। यः पंच चर्षणीरभि रयिं येन वनामहे ॥९॥ सोमाः पवंत इंदवोऽस्मभ्यं गातुवित्तमाः। मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥१०॥२॥ सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि। इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥ ११ ॥ एते पूता विपश्चितः सोमासो दध्याशिरः। सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥१२॥ प्र सुन्वानस्यांधसो मर्तो न वृत तद्वचः। अप

श्वानमराधसं हता मखं न भृगवः ॥१३॥ आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः। सरज्जारो न योषणां वरो न योनिमासदं ॥१४॥ स वीरो दक्षसाधनो वि यस्तस्तंभ रोदसी। हरिः पवित्रे अव्यत वेधा न योनिमासदं ॥१५॥ अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि। कनिक्रदद्वृषा हरिरिंद्रस्याभ्येति निष्कृतं ॥१६॥३॥

॥१०२॥ १–८ त्रितः ॥ पवमानः सोमः ॥ उष्णिक् ॥

॥१०२॥ क्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिं। विश्वा परि प्रिया भुवदध द्विता ॥१॥ उप त्रितस्य पाष्यो३रभक्त यद्गुहा पदं। यज्ञस्य सप्त धामभिरध प्रियं ॥२॥ त्रीणि त्रितस्य धारया पृष्ठेष्वेरया रयिं। मिमीते अस्य योजना वि सुक्रतुः ॥३॥ जज्ञानं सप्त मातरो वेधामशासत श्रिये। अयं ध्रुवो रयीणां चिकेत यत् ॥४॥ अस्य व्रते सजोषसो विश्वे देवासो अद्रुहः। स्पार्हा भवंति रंतयो जुषंत यत् ॥५॥४॥ यमी गर्भमृतावृधो दृशे चारुमजीजनन्। कविं मंहिष्ठमध्वरे पुरुस्पृहं ॥६॥ समीचीने अभि त्मना यह्वी ऋतस्य मातरा। तन्वाना यज्ञमानुषग्यदंजते ॥७॥ क्रत्वा शुक्रेभिरक्षभिर्ऋणोरप व्रजं दिवः। हिन्वन्नृतस्य दीधितिं प्राध्वरे ॥८॥५॥

॥१०३॥ १–६ द्वित आप्त्यः ॥ पवमानः सोमः ॥ उष्णिक् ॥

॥१०३॥ प्र पुनानाय वेधसे सोमाय वच उद्यतं। भृतिं न भरा मतिभिर्जुजोषते ॥१॥ परि वाराण्यव्यया गोभिरंजानो अर्षति। त्री षधस्था पुनानः कृणुते हरिः ॥२॥ परि कोशं मधुश्चुतमव्यये वारे अर्षति। अभि वाणीर्ऋषीणां सप्त

नूषत ॥३॥ परि स्तोता मतीनां विश्वदेवो अदाभ्यः। सोमः पुना-
नश्चम्वोर्विशद्धरिः ॥४॥ परि दैवीरनु स्वधा इंद्रेण याहि सरथं।
पुनानो वाघद्वाघद्भिरमर्त्यः ॥५॥ परि सप्तिर्न वाजयुर्देवो दे-
वेभ्यः सुतः। व्यानशिः पवमानो वि धावति ॥६॥६॥६॥

॥ १०४ ॥ १–६ पर्वतनारदौ द्वे शिखंडिन्यौ वा काश्यपावप्सरसौ ॥ पवमानः सोमः ॥ उष्णिक् ॥

॥१०४॥ सखाय आ नि षीदत पुनानाय प्र गायत। शिशुं
न यज्ञैः परि भूषत श्रिये ॥१॥ समी वत्सं न मातृभिः सृजता
गयसाधनं। देवाव्यं१मदमभि द्विशवसं ॥२॥ पुनाता दक्षसा-
धनं यथा शर्धाय वीतये। यथा मित्राय वरुणाय शंतमः
॥३॥ अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत। गोभिष्टे वर्ण-
मभि वासयामसि ॥४॥ स नो मदानां पत इंदो देवप्सरा
असि। सखेव सख्ये गातुवित्तमो भव ॥५॥ सनेमि कृध्य१-
स्मदा रक्षसं कं चिदत्रिणं। अपादेवं द्वयुमंहो युयोधि नः
॥६॥७॥

॥ १०५ ॥ १–६ पर्वतनारदौ ॥ पवमानः सोमः ॥ उष्णिक् ॥

॥१०५॥ तं वः सखायो मदाय पुनानमभि गायत। शिशुं न
यज्ञैः स्वदयंत गूर्तिभिः ॥१॥ सं वत्स इव मातृभिरिंदुर्हिन्वानो
अज्यते। देवावीर्मदो मतिभिः परिष्कृतः ॥२॥ अयं दक्षाय
साधनोऽयं शर्धाय वीतये। अयं देवेभ्यो मधुमत्तमः सुतः
॥३॥ गोमन्न इंदो अश्ववत्सुतः सुदक्ष धन्व। शुचिं ते वर्णमधि
गोषु दीधरं ॥४॥ स नो हरीणां पत इंदो देवप्सरस्तमः। सखेव
सख्ये नर्यो रुचे भव ॥५॥ सनेमि त्वमस्मदाँ अदेवं कं चिद-
त्रिणं। साह्वाँ इंदो परि बाधो अप द्वयुं ॥६॥८॥

॥ १०६ ॥ १–३ अग्निश्चाक्षुषः। ४–६ चक्षुर्मानवः। ७–९ मनुराप्सवः। १०–१४
अग्निः॥ पवमानः सोमः॥ उष्णिक्॥

॥१०६॥ इंद्रमच्छ सुता इमे वृषणं यंतु हरयः। श्रुष्टी जातास इं-
दवः स्वर्विदः॥१॥ अयं भराय सानसिरिंद्राय पवते सुतः। सोमो
जैत्रस्य चेतति यथा विदे॥२॥ अस्येदिंद्रो मदेष्वा ग्राभं गृभ्णीत
सानसिं। वज्रं च वृषणं भरत्समप्सुजित्॥३॥ प्र धन्वा सोम जागृ-
विरिंद्रायेंदो परि स्रव। द्युमंतं शुष्ममा भरा स्वर्विदं॥४॥ इंद्राय
वृषणं मदं पवस्व विश्वदर्शतः। सहस्रयामा पथिकृद्विचक्षणः
॥५॥९॥ अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः। सहस्रं याहि प-
थिभिः कनिक्रदत्॥६॥ पवस्व देववीतय इंदो धाराभिरोजसा।
आ कलशं मधुमान्त्सोम नः सदः॥७॥ तव द्रप्सा उदप्रुत इंद्रं मदाय
वावृधुः। त्वां देवासो अमृताय कं पपुः॥८॥ आ नः सुतास इंदवः
पुनाना धावता रयिं। वृष्टिद्यावो रीत्यापः स्वर्विदः॥९॥ सोमः पु-
नान ऊर्मिणाव्यो वारं वि धावति। अग्रे वाचः पवमानः कनि-
क्रदत्॥१०॥१०॥ धीभिर्हिन्वंति वाजिनं वने क्रीळंतमत्यविं।
अभि त्रिपृष्ठं मतयः समस्वरन्॥११॥ असर्जि कलशाँ अभि मीळ्हे
सप्तिर्न वाजयुः। पुनानो वाचं जनयन्नसिष्यदत्॥१२॥ पवते हर्यतो
हरिरति ह्वरांसि रंह्या। अभ्यर्षन्त्स्तोतृभ्यो वीरवद्यशः॥१३॥ अया
पवस्व देवयुर्मधोर्धारा असृक्षत। रेभन्पवित्रं पर्येषि विश्वतः
॥ १४ ॥ ११ ॥

॥ १०७ ॥ १–२६ सप्तर्षयः॥ पवमानः सोमः॥ १. ४. ६. ८–१०. १२. १४. १७.
१९. २१. २३. २५. बृहती। २. ५. ७. ११. १३. १५. १८. २०. २२. २४. २६
सतोबृहती। ३. १६ द्विपदा॥

॥ १०७ ॥ परीतो षिंचता सुतं सोमो य उत्तमं हविः। द-
धन्वाँ यो नर्यो अप्स्व१ंतरा सुषाव सोममद्रिभिः ॥ १ ॥
नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिंतरः। सुते

चित्त्वाप्सु मदामो अंधसा श्रीणंतो गोभिरुत्तरं ॥ २ ॥ परि
सुवानश्चक्षसे देवमादनः क्रतुरिंदुर्विचक्षणः ॥ ३ ॥ पुनानः
सोम धारयापो वसानो अर्षसि । आ रत्नधा योनिमृतस्य
सीदस्युत्सो देव हिरण्ययः ॥ ४ ॥ दुहान ऊधर्दिव्यं मधु प्रियं
प्रत्नं सधस्थमासदत् । आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो
विचक्षणः ॥ ५ ॥ १२ ॥ पुनानः सोम जागृविरव्यो वारे परि
प्रियः । त्वं विप्रो अभवोऽंगिरस्तमो मध्वा यज्ञं मिमिक्ष नः
॥ ६ ॥ सोमो मीढ्वान्पवते गातुवित्तम ऋषिर्विप्रो विच-
क्षणः । त्वं कविरभवो देववीतम आ सूर्यं रोहयो दिवि ॥ ७ ॥
सोम उ षुवाणः सोतृभिरधि ष्णुभिरवीनां । अश्वयेव हरि-
ता याति धारया मंद्रया याति धारया ॥ ८ ॥ अनूपे गोमान्गो-
भिरक्षाः सोमो दुग्धाभिरक्षाः । समुद्रं न संवरणान्यग्मन्मंदी
मदाय तोशते ॥ ९ ॥ आ सोम सुवानो अद्रिभिस्तिरो वारा-
ण्यव्यया । जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे
॥ १० ॥ १३ ॥ स मामृजे तिरो अण्वानि मेष्यो मीळ्हे सप्तिर्न वा-
जयुः । अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिरृक्व-
भिः ॥ ११ ॥ प्र सोम देववीतये सिंधुर्न पिप्ये अर्णसा । अंशोः प-
यसा मदिरो न जागृविरच्छा कोशं मधुश्चुतं ॥ १२ ॥ आ हर्यतो
अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः । तमीं हिन्वंत्यपसो य-
था रथं नदीष्वा गभस्त्योः ॥ १३ ॥ अभि सोमास आयवः पवंते
मद्यं मदं । समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः
॥ १४ ॥ तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् । अ-
र्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥ १५ ॥ १४ ॥
नृभिर्येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः ॥ १६ ॥

इंद्राय पवते मदः सोमो मरुत्वते सुतः। सहस्रधारो अत्यव्यमर्षति तमीं मृजंत्यायवः ॥१७॥ पुनानश्चमू जनयन्मतिं कविः सोमो देवेषु रण्यति। अपो वसानः परि गोभिरुत्तरः सीदन्वनेष्वव्यत ॥१८॥ तवाहं सोम रारण सख्य इंदो दिवेदिवे। पुरूणि बभ्रो नि चरंति मामव परिधींरति ताँ इहि ॥१९॥ उताहं नक्तमुत सोम ते दिवा सख्याय बभ्र ऊधनि। घृणा तपंतमति सूर्यं परः शकुना इव पप्तिम ॥२०॥१५॥ मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि। रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥२१॥ मृजानो वारे पवमानो अव्यये वृषाव चक्रदो वने। देवानां सोम पवमान निष्कृतं गोभिरंजानो अर्षसि ॥२२॥ पवस्व वाजसातयेऽभि विश्वानि काव्या। त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ॥२३॥ स तू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः। त्वां विप्रासो मतिभिर्विचक्षण शुभ्रं हिन्वंति धीतिभिः ॥२४॥ पवमाना असृक्षत पवित्रमति धारया। मरुत्वंतो मत्सरा इंद्रिया हया मेधामभि प्रयांसि च ॥२५॥ अपो वसानः परि कोशमर्षतींदुर्हियानः सोतृभिः। जनयञ्ज्योतिर्मंदना अवीवशद्गाः कृण्वानो न निर्णिजं ॥ २६ ॥ १६ ॥

॥ १०८ ॥ १. २ गौरिवीतिः। ३. १४–१६ शक्तिः। ४. ५ ऊरुः। ६. ७ ऋजिश्वा। ८. ९ ऊर्ध्वसद्मा। १०. ११ कृतयशाः। १२. १३ ऋणंचयः ॥ पवमानः सोमः ॥ १. ३. ५. ७. ९. ११. १५ ककुप्। २. ४. ६. ८. १०. १२. १४. १६ सतोबृहती। १३ गायत्री यवमध्या ॥

॥१०८॥ पवस्व मधुमत्तम इंद्राय सोम क्रतुवित्तमो मदः। महि द्युक्षतमो मदः ॥१॥ यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीता स्वर्विदः। स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥२॥ त्वं ह्यं१ग दैव्या पवमान जनिमानि द्यु-

मत्तमः। अमृतत्वाय घोषयः ॥३॥ येना नवग्वो दध्यङ्ङपोर्णुते
येन विप्रास आपिरे। देवानां सुम्ने अमृतस्य चारुणो येन
श्रवांस्यानशुः ॥४॥ एष स्य धारया सुतोऽव्यो वारेभिः पवते
मदिंतमः। क्रीळन्नूर्मिरपामिव ॥५॥१७॥ य उस्रिया अप्या
अंतरश्मनो निर्गा अकृंतदोजसा। अभि व्रजं तत्निषे गव्य-
मश्व्यं वर्मीव धृष्णवा रुज ॥६॥ आ सोता परि षिंचताश्वं न
स्तोममप्तुरं रजस्तुरं। वनक्रक्षमुदप्रुतं ॥७॥ सहस्रधारं वृषभं
पयोवृधं प्रियं देवाय जन्मने। ऋतेन य ऋतजातो विवा-
वृधे राजा देव ऋतं बृहत् ॥८॥ अभि द्युम्नं बृहद्यश इषस्पते
दिदीहि देव देवयुः। वि कोशं मध्यमं युव ॥९॥ आ वच्यस्व
सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः। वृष्टिं दिवः
पवस्व रीतिमपां जिन्वा गविष्टये धियः ॥१०॥१८॥ एतमु
त्यं मदच्युतं सहस्रधारं वृषभं दिवो दुहुः। विश्वा वसूनि बि-
भ्रतं ॥११॥ वृषा वि जज्ञे जनयन्नमर्त्यः प्रतपञ्ज्योतिषा तमः।
स सुष्टुतः कविभिर्निर्णिजं दधे त्रिधात्वस्य दंससा ॥१२॥ स
सुन्वे यो वसूनां यो रायामानेता य इळानां। सोमो यः
सुक्षितीनां ॥१३॥ यस्य न इंद्रः पिबाद्यस्य मरुतो यस्य वा-
र्यमणा भगः। आ येन मित्रावरुणा करामह एंद्रमवसे महे
॥१४॥ इंद्राय सोम पातवे नृभिर्यतः स्वायुधो मदिंतमः।
पवस्व मधुमत्तमः ॥१५॥ इंद्रस्य हार्दि सोमधानमा विश
समुद्रमिव सिंधवः। जुष्टो मित्राय वरुणाय वायवे दिवो
विष्टंभ उत्तमः ॥१६॥१९॥

॥१०९॥ १–२२ अग्नयो धिष्ण्या ऐश्वराः ॥ पवमानः सोमः ॥ द्विपदा ॥

॥१०९॥ परि प्र धन्वेंद्राय सोम स्वादुर्मित्राय पूष्णे भगाय

॥१॥ इंद्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ॥२॥
एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥३॥ प-
वस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥४॥ शुक्रः
पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै ॥५॥ दिवो धर्ता-
सि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥६॥ पवस्व सोम
द्युम्नी सुधारो महामवीनामनु पूर्व्यः ॥७॥ नृभिर्येमानो जज्ञानः
पूतः क्षरद्विश्वानि मंद्रः स्वर्वित् ॥८॥ इंदुः पुनानः प्रजामुराणः
करद्विश्वानि द्रविणानि नः ॥९॥ पवस्व सोम क्रत्वे दक्षायाश्वो
न निक्तो वाजी धनाय ॥१०॥२०॥ तं ते सोतारो रसं मदाय पु-
नंति सोमं महे द्युम्नाय ॥११॥ शिशुं जज्ञानं हरिं मृजंति पवित्रे
सोमं देवेभ्य इंदुं ॥१२॥ इंदुः पविष्ट चारुर्मदायापामुपस्थे कवि-
र्भगाय ॥ १३ ॥ बिभर्ति चार्विंद्रस्य नाम येन विश्वानि वृत्रा
जघान ॥१४॥ पिबंत्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः
सुतस्य ॥१५॥ प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वा-
रमव्यं ॥१६॥ स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्री-
णानः ॥१७॥ प्र सोम याहींद्रस्य कुक्षा नृभिर्येमानो अद्रिभिः
सुतः ॥१८॥ असर्जि वाजी तिरः पवित्रमिंद्राय सोमः सहस्रधारः
॥१९॥ अंजंत्येनं मध्वो रसेनेंद्राय वृष्ण इंदुं मदाय ॥२०॥ देवेभ्य-
स्त्वा वृथा पाजसेऽपो वसानं हरिं मृजंति ॥ २१ ॥ इंदुरिंद्राय
तोशते नि तोशते श्रीणन्नुग्रो रिणन्नपः ॥ २२ ॥ २१ ॥

॥ ११० ॥ १–१२ त्र्यरुणत्रसदस्यू ॥ पवमानः सोमः ॥ १–३ अनुष्टुप्पिपीलिकमध्या ।
४–९ ऊर्ध्वबृहती । १०–१२ विराट् ॥

॥११०॥ पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः । द्वि-
षस्तरध्या ऋणया न ईयसे ॥१॥ अनु हि त्वा सुतं सोम मदाम-

सि महे संमर्येराज्ये । वाजाँ अभि पवमान प्र गाहसे ॥ २ ॥ अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरया रंहमाणः पुरंध्या ॥ ३ ॥ अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः । सदासरो वाजमच्छा सनिष्यदत् ॥ ४ ॥ अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितं । शर्याभिर्न भरमाणो गभस्त्योः ॥ ५ ॥ आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत । वारं न देवः सविता व्यूर्णुते ॥ ६ ॥ २२ ॥ त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः । स त्वं नो वीर वीर्याय चोदय ॥ ७ ॥ दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत । इंद्रमभि जायमानं समस्वरन् ॥ ८ ॥ अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना । यूथे न निःष्ठा वृषभो वि तिष्ठसे ॥ ९ ॥ सोमः पुनानो अव्यये वारे शिशुर्न क्रीळन्पवमानो अक्षाः । सहस्रधारः शतवाज इंदुः ॥ १० ॥ एष पुनानो मधुमाँ ऋतावेंद्रायेंदुः पवते स्वादुरूर्मिः । वाजसनिर्वरिवोविद्वयोधाः ॥ ११ ॥ स पवस्व सहमानः पृतन्यून्सेधन्रक्षांस्यप दुर्गहाणि । स्वायुधः सासह्वान्सोम शत्रून् ॥ १२ ॥ २३ ॥

॥ १११ ॥ १–३ अनानतः पारुच्छेपिः ॥ पवमानः सोमः ॥ अत्यष्टिः ॥

॥ १११ ॥ अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः । धारा सुतस्य रोचते पुनानो अरुषो हरिः । विश्वा यद्रूपा परियात्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥ १ ॥ त्वं त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे । परावतो न साम तद्यत्रा रणंति धीतयः । त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥ २ ॥

पूर्वामनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो
दैव्यो दर्शतो रथः। अग्मन्नुक्थानि पौंस्येंद्रं जैत्राय हर्षयन्।
वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥३॥२४॥

॥ ११२ ॥ १-४ शिशुः ॥ पवमानः सोमः ॥ पंक्तिः ॥

॥११२॥ नानानं वा उ नो धियो वि व्रतानि जनानां।
तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वंतमिच्छतींद्रायेंदो परि स्रव
॥१॥ जरतीभिरोषधीभिः पर्णेभिः शकुनानां। कार्मारो अश्म-
भिर्द्युभिर्हिरण्यवंतमिच्छतींद्रायेंदो परि स्रव ॥२॥ कारुरहं
ततो भिषगुपलप्रक्षिणी नना। नानाधियो वसूयवोऽनु गा
इव तस्थिमेंद्रायेंदो परि स्रव ॥३॥ अश्वो वोळ्हा सुखं रथं
हसनामुपमंत्रिणः। शेपो रोमण्वंतौ भेदौ वारिन्मंडूक इच्छ-
तींद्रायेंदो परि स्रव ॥४॥२५॥

॥ ११३ ॥ १-११ कश्यपः ॥ पवमानः सोमः ॥ पंक्तिः ॥

॥११३॥ शर्यणावति सोममिंद्रः पिबतु वृत्रहा। बलं दधान
आत्मनि करिष्यन्वीर्यं महदिंद्रायेंदो परि स्रव ॥१॥ आ पवस्व
दिशां पत आर्जीकात्सोम मीढ्वः। ऋतवाकेन सत्येन श्रद्धया
तपसा सुत इंद्रायेंदो परि स्रव ॥२॥ पर्जन्यवृद्धं महिषं तं
सूर्यस्य दुहिताभरत्। तं गंधर्वाः प्रत्यगृभ्णन्तं सोमे रसमा-
दधुरिंद्रायेंदो परि स्रव ॥३॥ ऋतं वदन्नृतद्युम्न सत्यं वदन्स-
त्यकर्मन्। श्रद्धां वदन्सोम राजन्धात्रा सोम परिष्कृत इंद्रा-
येंदो परि स्रव ॥४॥ सत्यमुग्रस्य बृहतः सं स्रवंति संस्रवाः।
सं यंति रसिनो रसाः पुनानो ब्रह्मणा हर इंद्रायेंदो परि स्रव
॥५॥२६॥ यत्र ब्रह्मा पवमान छंदस्यां३ वाचं वदन्। ग्राव्णा सोमे

महीयते सोमेनानंदं जनयन्निंद्रायेंदो परि स्रव ॥६॥ यत्र ज्योतिरजस्रं यस्मिँल्लोके स्वर्हितं। तस्मिन्मां धेहि पवमानामृते लोके अक्षित इंद्रायेंदो परि स्रव ॥७॥ यत्र राजा वैवस्वतो यत्रावरोधनं दिवः। यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥८॥ यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः। लोका यत्र ज्योतिष्मंतस्तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥९॥ यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपं। स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥१०॥ यत्रानंदाश्च मोदाश्च मुदः प्रमुद आसते। कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥११॥२७॥

॥ ११४ ॥ १-४ कश्यपः ॥ पवमानः सोमः ॥ पंक्तिः ॥

॥११४॥ य इंदोः पवमानस्यानु धामान्यक्रमीत्। तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इंद्रायेंदो परि स्रव ॥१॥ ऋषे मंत्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः। सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिंद्रायेंदो परि स्रव ॥२॥ सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः। देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इंद्रायेंदो परि स्रव ॥३॥ यत्ते राजञ्छृतं हविस्तेन सोमाभि रक्ष नः। अरातीवा मा नस्तारीन्मो च नः किं चनाममदिंद्रायेंदो परि स्रव ॥४॥२८॥७॥९॥

॥ इति नवमं मंडलं समाप्तं ॥

॥ १ ॥ १-७ त्रितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१॥ अग्रे बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो ज्यो-
तिषागात्। अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मा-
न्यप्राः ॥१॥ स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओष-
धीषु। चित्रः शिशुः परि तमांस्यक्तून्प्र मातृभ्यो अधि कनि-
क्रदद्गाः ॥२॥ विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्नभि
पाति तृतीयं। आसा यदस्य पयो अक्रत स्वं सचेतसो अभ्य-
र्चन्त्यत्र ॥३॥ अत उ त्वा पितुभृतो जनित्रीरन्नावृधं प्रति चरन्त्यन्नैः।
ता ईं प्रत्येषि पुनरन्यरूपा असि त्वं विक्षु मानुषीषु होता ॥४॥
होतारं चित्ररथमध्वरस्य यज्ञस्ययज्ञस्य केतुं रुशन्तं। प्रत्यर्धिं दे-
वस्यदेवस्य मह्ना श्रिया त्व१ग्निमतिथिं जनानां ॥५॥ स तु
वस्त्राण्यध पेशनानि वसानो अग्निर्नाभा पृथिव्याः। अरुषो
जातः पद इळायाः पुरोहितो राजन्यक्षीह देवान् ॥६॥ आ
हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततंथ। प्र
याह्यच्छोशतो यविष्ठाथा वह सहस्येह देवान् ॥७॥२९॥

॥ २ ॥ १-७ त्रितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥२॥ पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँरृतुपते
यजेह। ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः
॥१॥ वेषि होत्रमुत पोत्रं जनानां मंधातासि द्रविणोदा ऋ-
तावा। स्वाहा वयं कृणवामा हवींषि देवो देवान्यजत्वग्नि-
रर्हन् ॥२॥ आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु
प्रवोळ्हुं। अग्निर्विद्वान्त्स यजात्सेदु होता सो अध्वरान्त्स
ऋतून्कल्पयाति ॥३॥ यद्वो वयं प्रमिनाम व्रतानि विदु-
षां देवा अविदुष्टरासः। अग्निष्टद्विश्वमा पृणाति विद्वान्ये-

भिर्देवाँ ऋतुभिः कल्पयाति ॥४॥ यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः । अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो यजाति ॥५॥ विश्वेषां ह्यध्वराणामनीकं चित्रं केतुं जनिता त्वा जजान । स आ यजस्व नृवतीरनु क्षाः स्पार्हा इषः क्षुमतीर्विश्वजन्याः ॥६॥ यं त्वा द्यावापृथिवी यं त्वापस्त्वष्टा यं त्वा सुजनिमा जजान । पन्थामनु प्रविद्वान्पितृयाणं द्युमदग्ने समिधानो वि भाहि ॥ ७ ॥ ३० ॥

॥ ३ ॥ १-७ त्रितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥३॥ इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि । चिकिद्वि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥१॥ कृष्णां यदेनीमभि वर्पसा भूज्जनयन्योषां बृहतः पितुर्जाम् । ऊर्ध्वं भानुं सूर्यस्य स्तभायन्दिवो वसुभिररतिर्वि भाति ॥२॥ भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् । सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥३॥ अस्य यामासो बृहतो न वग्नूनिन्धाना अग्नेः सख्युः शिवस्य । ईड्यस्य वृष्णो बृहतः स्वासो भामासो यामन्नक्तवश्चिकित्रे ॥४॥ स्वना न यस्य भामासः पवन्ते रोचमानस्य बृहतः सुदिवः । ज्येष्ठेभिर्यस्तेजिष्ठैः क्रीळुमद्भिर्वर्षिष्ठेभिर्भानुभिर्नक्षति द्याम् ॥५॥ अस्य शुष्मासो ददृशानपवेर्जेहमानस्य स्वनयन्नियुद्भिः । प्रत्नेभिर्यो रुशद्भिर्देवतमो वि रेभद्भिररतिर्भाति विभ्वा ॥६॥ स आ वक्षि महि न आ च सत्सि दिवस्पृथिव्योररतिर्युवत्योः । अग्निः सुतुकः सुतुकेभिरश्वै रभस्वद्भी रभस्वाँ एह गम्याः ॥ ७ ॥ ३१ ॥

॥ ४ ॥ १–७ त्रितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥४॥ प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वंद्यो नो हवेषु । ध-
न्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् ॥१॥ यं त्वा ज-
नासो अभि संचरंति गाव उष्णमिव व्रजं यविष्ठ । दूतो देवाना-
मसि मर्त्यानामंतर्महाँश्चरसि रोचनेन ॥२॥ शिशुं न त्वा जेन्यं वर्ध-
यंती माता बिभर्ति सचनस्यमाना । धनोरधि प्रवता यासि हर्य-
ञ्जिगीषसे पशुरिवावसृष्टः ॥३॥ मूरा अमूर न वयं चिकित्वो महि-
त्वमग्ने त्वमंग वित्से । शये वव्रिश्चरति जिह्वयादन्रेरिह्यते युवतिं
विश्पतिः सन् ॥४॥ कूचिज्जायते सनयासु नव्यो वने तस्थौ पलि-
तो धूमकेतुः । अस्नातापो वृषभो न प्र वेति सचेतसो यं प्रणयंत
मर्ताः ॥५॥ तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीतां ।
इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरंगैः ॥६॥ ब्रह्म
च ते जातवेदो नमश्चेयं च गीः सदमिद्वर्धनी भूत् । रक्षा णो अग्ने
तनयानि तोका रक्षोत नस्तन्वो३ अप्रयुच्छन् ॥ ७ ॥ ३२ ॥

॥ ५ ॥ १–७ त्रितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥५॥ एकः समुद्रो धरुणो रयीणामस्मद्धृदो भूरिजन्मा वि
चष्टे । सिषक्त्यूधर्निण्योरुपस्थ उत्सस्य मध्ये निहितं पदं वेः
॥१॥ समानं नीळं वृषणो वसानाः सं जग्मिरे महिषा
अर्वतीभिः । ऋतस्य पदं कवयो नि पांति गुहा नामानि
दधिरे पराणि ॥२॥ ऋतायिनी मायिनी सं दधाते मि-
त्वा शिशुं जज्ञतुर्वर्धयंती । विश्वस्य नाभिं चरतो ध्रुवस्य कवे-
श्चित्तंतुं मनसा वियंतः ॥३॥ ऋतस्य हि वर्तनयः सुजातमिषो
वाजाय प्रदिवः सचंते । अधीवासं रोदसी वावसाने घृतैरन्नै-
र्वावृधाते मधूनां ॥४॥ सप्त स्वसृररुषीर्वावशानो विद्वान्मध्व

उज्जंभारा दृशे कं। अंतर्यैमे अंतरिक्षे पुराजा इच्छन्वव्रिमवि-
दत्पूषणस्य ॥५॥ सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिद-
भ्यंहुरो गात्। आयोर्ह स्कंभ उपमस्य नीळे पथां विसर्गे
धरुणेषु तस्थौ ॥६॥ असच्च सच्च परमे व्योमन्दक्षस्य जन्मन-
दितेरुपस्थे। अग्निर्ह नः प्रथमजा ऋतस्य पूर्व आयुनि
वृषभश्च धेनुः ॥७॥३३॥५॥

॥ ६ ॥ १–७ त्रितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥६॥ अयं स यस्य शर्मन्नवोभिरग्नेरेधते जरिताभिष्टौ। ज्ये-
ष्ठेभिर्यो भानुभिर्ऋषूणां पर्येति परिवीतो विभावा ॥१॥ यो
भानुभिर्विभावा विभात्यग्निर्देवेभिर्ऋतावाजस्रः। आ यो वि-
वाय सख्या सखिभ्योऽपरिह्वृतो अत्यो न सप्तिः ॥२॥ ईशे
यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ। आ यस्मि-
न्मना हवींष्यग्नावरिष्टरथः स्कभ्नाति शूषैः ॥३॥ शूषेभिर्वृधो
जुषाणो अर्केर्देवाँ अच्छा रघुपत्वा जिगाति। मंद्रो होता स
जुह्वा३ यजिष्ठः संमिश्लो अग्निरा जिघर्ति देवान् ॥४॥ तमु-
स्रामिंद्रं न रेजमानमग्निं गीर्भिर्नमोभिरा कृणुध्वं। आ यं
विप्रासो मतिभिर्गृणंति जातवेदसं जुह्वं सहानां ॥५॥ सं य-
स्मिन्विश्वा वसूनि जग्मुर्वाजे नाश्वाः सप्तीवंत एवैः। अस्मे
ऊतीरिंद्रवाततमा अर्वाचीना अग्न आ कृणुष्व ॥६॥ अधा
ह्यग्ने मह्ना निषद्या सद्यो जज्ञानो हव्यो बभूथ। तं ते देवासो
अनु केतमायन्नधावर्धंत प्रथमास ऊमाः ॥७॥१॥

॥ ७ ॥ १–७ त्रितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७॥ स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यज-
थाय देव। सचेमहि तव दस्म प्रकेतैरुरुष्या ण उरुभिर्देव शंसैः

॥१॥ इमा अग्ने मतयस्तुभ्यं जाता गोभिरश्वैरभि गृणंति राधः।
यदा ते मर्तो अनु भोगमानड्वसो दधानो मतिभिः सुजात
॥२॥ अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित्सखायं।
अग्नेरनीकं बृहतः सपर्यं दिवि शुक्रं यजतं सूर्यस्य ॥३॥ सिध्रा
अग्ने धियो अस्मे सनुत्रीर्यं त्रायसे दम आ नित्यहोता। ऋ-
तावा स रोहिदश्वः पुरुक्षुर्द्युभिरस्मा अहभिर्वाममस्तु ॥४॥
द्युभिर्हितं मित्रमिव प्रयोगं प्रत्नमृत्विजमध्वरस्य जारं। बाहु-
भ्यामग्निमायवोऽजनंत विक्षु होतारं न्यसादयंत ॥५॥ स्वयं
यजस्व दिवि देव देवान्किं ते पाकः कृणवदप्रचेताः। यथा-
यज ऋतुभिर्देव देवानेवा यजस्व तन्वं सुजात ॥६॥ भवा
नो अग्नेऽवितोत गोपा भवा वयस्कृदुत नो वयोधाः। रा-
स्वा च नः सुमहो हव्यदातिं त्रास्वोत नस्तन्वो३अप्रयुच्छन्
॥७॥२॥

॥ ८ ॥ १–९ त्रिशिरास्त्वाष्ट्रः ॥ १–६ अग्निः । ७–९ इंद्रः ॥ त्रिष्टुप् ॥

॥८॥ प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोर-
वीति । दिवश्चिदंताँ उपमाँ उदानळपामुपस्थे महिषो
ववर्ध ॥१॥ मुमोद गर्भो वृषभः ककुद्मानस्रेमा वत्सः शिमी-
वाँ अरावीत्। स देवतात्युद्यतानि कृण्वन्स्वेषु क्षयेषु प्र-
थमो जिगाति ॥२॥ आ यो मूर्धानं पित्रोररब्ध न्यध्वरे दधिरे
सूरो अर्णः। अस्य पत्मन्नरुषीरश्वबुध्ना ऋतस्य योनौ तन्वो जु-
षंत ॥३॥ उषउषो हि वसो अग्रमेषि त्वं यमयोरभवो विभा-
वा। ऋताय सप्त दधिषे पदानि जनयन्मित्रं तन्वे३स्वायै ॥४॥
भुवश्चक्षुर्मह ऋतस्य गोपा भुवो वरुणो यदृताय वेषि। भुवो
अपां नपाज्जातवेदो भुवो दूतो यस्य हव्यं जुजोषः ॥५॥३॥ भुवो

यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि
मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहं ॥ ६ ॥ अस्य
त्रितः क्रतुना वव्रे अंतरिच्छन्धीतिं पितुरेवैः परस्य । सचस्य-
मानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति ॥ ७ ॥ स पि-
त्र्याण्यायुधानि विद्वानिंद्रेषित आप्त्यो अभ्ययुध्यत् । त्रिशीर्षा-
णं सप्तरश्मिं जघन्वान्त्वाष्ट्रस्य चिन्निः ससृजे त्रितो गाः ॥ ८ ॥
भूरीदिंद्र उदिनक्षंतमोजोऽवाभिनत्सत्पतिर्मन्यमानं । त्वाष्ट्रस्य
चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क् ॥ ९ ॥ ४ ॥

॥ ९ ॥ १–९ त्रिशिरास्त्वाष्ट्रः सिंधुद्वीपो वांबरीषः ॥ आपः ॥ १–४. ६ गायत्री । ५ वर्धमाना । ७ प्रतिष्ठा । ८. ९ अनुष्टुप् ॥

॥ ९ ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय
चक्षसे ॥ १ ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव
मातरः ॥ २ ॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो ज-
नयथा च नः ॥ ३ ॥ शं नो देवीरभिष्टय आपो भवंतु पीतये । शं योर-
भि स्रवंतु नः ॥ ४ ॥ ईशाना वार्याणां क्षयंतीश्चर्षणीनां । अपो या-
चामि भेषजं ॥ ५ ॥ अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा । अ-
ग्निं च विश्वशंभुवं ॥ ६ ॥ आपः पृणीत भेषजं वरूथं तन्वे३ मम ।
ज्योक् च सूर्यं दृशे ॥ ७ ॥ इदमापः प्र वहत यत्किं च दुरितं मयि । यद्वा-
हमभिदुद्रोह यद्वा शेप उतानृतं ॥ ८ ॥ आपो अद्यान्वचारिषं रसेन
समगस्महि । पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥ ९ ॥ ५ ॥

॥ १० ॥ १. ३. ५–७. ११. १३ यमी वैवस्वती । २. ४. ८–१०. १२. १४ यमो वैवस्वतः ॥ १. ३. ५–७. ११. १३ यमो वैवस्वतः । २. ४. ८–१०. १२. १४ यमी वैवस्वती ॥ त्रिष्टुप् ॥

॥ १० ॥ ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं
जगन्वान् । पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दी-

ध्यानः ॥१॥ न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भ-
वाति । महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि
ख्यन् ॥२॥ उशंति घा ते अमृतास एतदेकस्य चित्त्यजसं
मर्त्यस्य । नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्व१मा
विविश्याः ॥३॥ न यत्पुरा चकृमा कद्ध नूनमृता वदंतो अनृतं
रपेम । गंधर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि
तन्नौ ॥४॥ गर्भे नु नौ जनिता दंपती कर्देवस्त्वष्टा सविता
विश्वरूपः । नकिरस्य प्र मिनंति व्रतानि वेद नावस्य पृथिवी
उत द्यौः ॥५॥६॥ को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह
प्र वोचत् । बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वी-
च्या नॄन् ॥६॥ यमस्य मा यम्यं१काम आगन्त्समाने योनौ
सहशेय्याय । जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव
चक्रा ॥७॥ न तिष्ठंति न नि मिषंत्येते देवानां स्पश इह ये
चरंति । अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा
॥८॥ रात्रीभिरस्मा अहभिर्दशस्येत्सूर्यस्य चक्षुर्मुहुरुन्मिमी-
यात् । दिवा पृथिव्या मिथुना सबंधू यमीर्यमस्य बिभृयाद-
जामि ॥९॥ आ घा ता गच्छानुत्तरा युगानि यत्र जामयः
कृणवन्नजामि । उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सु-
भगे पतिं मत् ॥१०॥७॥ किं भ्रातासद्यदनाथं भवाति किमु
स्वसा यन्निरृतिर्निगच्छात् । काममूता बह्वे३तद्रपामि त-
न्वा मे तन्वं१सं पिपृग्धि ॥११॥ न वा उ ते तन्वा तन्वं१सं
पपृच्यां पापमाहुर्यः स्वसारं निगच्छात् । अन्येन मत्प्रमुदः
कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥१२॥ बतो बतासि
यम नैव ते मनो हृदयं चाविदाम । अन्या किल त्वां कक्ष्येव

युक्तं परि ष्वजाते लिबुजेव वृक्षं ॥१३॥ अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षं। तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्रां ॥ १४ ॥ ८ ॥

॥ ११ ॥ १-९ हविर्धान आंगिः ॥ अग्निः ॥ १-६ जगती । ७-९ त्रिष्टुप् ॥

॥११॥ वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः। विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजतु यज्ञियाँ ऋतून ॥१॥ रपद्गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु मे मनः। इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥२॥ सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती। यदीमुशन्तमुशतामनु ऋतुमग्निं होतारं विदथाय जीजनन् ॥३॥ अध त्यं द्रप्सं विभ्वं विचक्षणं विराभरदिषितः श्येनो अध्वरे। यदी विशो वृणते दस्ममार्या अग्निं होतारमध धीरजायत ॥४॥ सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः। विप्रस्य वा यच्छशमान उक्थ्यं वाजं ससवाँ उपयासि भूरिभिः ॥५॥९॥ उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति। विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ॥६॥ यस्ते अग्ने सुमतिं मर्तो अक्षत्सहसः सूनो अति स प्र शृण्वे। इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान्भूषति द्यून् ॥७॥ यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र। रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात् ॥८॥ श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुं। आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥९॥१०॥

॥ १२ ॥ १–९ हविर्धान आंगिः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१२॥ द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवा-
चा । देवो यन्मर्तान्यजथाय कृण्वन्सीदद्धोता प्रत्यङ् स्वमसुं यन्
॥१॥ देवो देवान्परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान् ।
धूमकेतुः समिधा भाऋजीको मंद्रो होता नित्यो वाचा यजी-
यान् ॥२॥ स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयंत उ-
र्वी । विश्वे देवा अनु तत्ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ॥३॥
अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे ।
अहा यद्द्यावोऽसुनीतिमयन्मध्वा नो अत्र पितरा शिशीताम् ॥४॥
किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद ।
मित्रश्चिद्धि ष्मा जुहुराणो देवाञ्छ्लोको न यातामपि वाजो अ-
स्ति ॥५॥११॥ दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति ।
यमस्य यो मनवते सुमंत्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥६॥ यस्मि-
न्देवा विदथे मादयंते विवस्वतः सदने धारयंते । सूर्ये ज्योति-
रदधुर्मास्यक्तून्परि द्योतनिं चरतो अजस्रा ॥७॥ यस्मिन्देवा
मन्मनि संचरंत्यपीच्ये३न वयमस्य विद्म । मित्रो नो अत्रा-
दितिरनागान्सविता देवो वरुणाय वोचत् ॥८॥ श्रुधी नो
अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम् । आ नो वह
रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥ ९ ॥ १२ ॥

॥ १३ ॥ १–५ विवस्वानादित्यः ॥ हविर्धाने ॥ १–४ त्रिष्टुप् । ५ जगती ॥

॥१३॥ युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वंतु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः
॥ १ ॥ यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयंतः ।
आ सीदतं स्वमु लोकं विदाने स्वासस्थे भवतमिंदवे नः

॥२॥ पंच पदानि रुपो अन्वरोहं चतुष्पदीमन्वेमि व्रतेन। अक्षरेण
प्रति मिम एतामृतस्य नाभावधि सं पुनामि॥३॥ देवेभ्यः कम-
वृणीत मृत्युं प्रजायै कममृतं नावृणीत। बृहस्पतिं यज्ञमकृण्वत
ऋषिं प्रियां यमस्तन्वं१ प्रारिरेचीत्॥४॥ सप्त क्षरंति शिशवे म-
रुत्वते पित्रे पुत्रासो अप्यवीवतन्नृतं। उभे इदस्योभयस्य राजत
उभे यतेते उभयस्य पुष्यतः ॥ ५ ॥ १३ ॥

॥१४॥ १–१६ यमः॥ १–५. १३–१६ यमः। ६ लिंगोक्तदेवताः। ७–९ लिंगोक्तदेवताः
पितरो वा। १०–१२ श्वानौ॥ १–१२ त्रिष्टुप्। १३. १४. १६ अनुष्टुप्। १५ बृहती॥

॥ १४ ॥ परेयिवांसं प्रवतो महीरनु बहुभ्यः पंथामनुपस्प-
शानं। वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य
॥ १ ॥ यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा
उ। यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या३ अनु स्वाः
॥ २ ॥ मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधा-
नः। यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये
मदंति ॥ ३ ॥ इमं यम प्रस्तरमा हि सीदांगिरोभिः पितृभिः
संविदानः। आ त्वा मंत्राः कविशस्ता वहंत्वेना राजन्हविषा
मादयस्व ॥ ४ ॥ अंगिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह
मादयस्व। विवस्वंतं हुवे यः पिता तेऽस्मिन्यज्ञे बर्हिष्या नि-
षद्य ॥५॥१४॥ अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः
सोम्यासः। तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे
स्याम ॥६॥ प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः
परेयुः। उभा राजाना स्वधया मदंता यमं पश्यासि वरुणं च
देवं ॥ ७ ॥ सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्यो-
मन्। हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः

॥ ८ ॥ अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोक-
मक्रन् । अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै
॥ ९ ॥ अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना
पथा । अथा पितॄन्त्सुविदत्राँ उपेहि यमेन ये सधमादं मदंति
॥ १० ॥ १५ ॥ यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी
नृचक्षसौ । ताभ्यामेनं परि देहि राजन्त्स्वस्ति चास्मा अ-
नमीवं च धेहि ॥ ११ ॥ उरूणसावसुतृपा उदुंबलौ यमस्य
दूतौ चरतो जनाँ अनु । तावस्मभ्यं दृशये सूर्याय पुनर्दाता-
मसुमद्येह भद्रं ॥ १२ ॥ यमाय सोमं सुनुत यमाय जुहुता
हविः । यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥ १३ ॥ यमाय
घृतवद्धविर्जुहोत प्र च तिष्ठत । स नो देवेष्वा यमद्दीर्घमायुः
प्र जीवसे ॥ १४ ॥ यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन । इदं
नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥ १५ ॥ त्रिकद्रुके-
भिः पतति षळुर्वीरेकमिद्बृहत् । त्रिष्टुब्गायत्री छंदांसि सर्वा
ता यम आहिता ॥ १६ ॥ १६ ॥

॥ १५ ॥ १-१४ शंखो यामायनः ॥ पितरः ॥ १-१०. १२-१४ त्रिष्टुप् । ११ जगती ॥

॥ १५ ॥ उदीरतामवर उत्परास उन्मध्यमाः पितरः सो-
म्यासः । असुं य ईयुरवृका ऋतज्ञास्ते नोऽवंतु पितरो हवेषु
॥ १ ॥ इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥ २ ॥
आहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च
विष्णोः । बर्हिषदो ये स्वधया सुतस्य भजंत पित्वस्त इहाग-
मिष्ठाः ॥ ३ ॥ बर्हिषदः पितर ऊत्य१र्वागिमा वो हव्या चकृमा
जुषध्वं । त आ गतावसा शंतमेनाथा नः शं योररपो दधात

॥४॥ उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमंतु त इह श्रुवंत्वधि ब्रुवंतु तेऽवंत्वस्मान् ॥५॥१७॥
आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे । मा
हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥६॥
आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय । पु-
त्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥७॥ ये
नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः । तेभि-
र्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥८॥ ये तातृ-
षुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः । आग्ने
याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ॥९॥ ये
सत्यासो हविरदो हविष्पा इंद्रेण देवैः सरथं दधानाः । आग्ने
याहि सहस्रं देववंदैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ॥१०॥१८॥
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन
॥११॥ त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि
॥१२॥ ये चेह पितरो ये च नेह यांश्च विद्म याँ उ च न प्र-
विद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व
॥१३॥ ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया
मादयंते । तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्प-
यस्व ॥१४॥१९॥

॥ १६ ॥ १–१४ दमनो यामायनः ॥ अग्निः ॥ १–१० त्रिष्टुप् । ११–१४ अनुष्टुप् ॥

॥१६॥ मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षि-
पो मा शरीरं । यदा शृतं कृणवो जातवेदोऽथेमेनं प्र हिणु-

तात्पितृभ्यः ॥१॥ शृतं यदा करसि जातवेदोऽथेमेनं परि
दत्तात्पितृभ्यः। यदा गच्छात्यसुनीतिमेतामथा देवानां वश-
नीर्भवाति ॥२॥ सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ
पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र ते हितमोष-
धीषु प्रति तिष्ठा शरीरैः ॥३॥ अजो भागस्तपसा तं तपस्व
तं ते शोचिस्तपतु तं ते अर्चिः। यास्ते शिवास्तन्वो जातवे-
दस्ताभिर्वहेनं सुकृतामु लोकं ॥४॥ अव सृज पुनरग्ने पितृभ्यो
यस्त आहुतश्चरति स्वधाभिः। आयुर्वसान उप वेतु शेषः
सं गच्छतां तन्वा जातवेदः ॥५॥२०॥ यत्ते कृष्णः शकुन आ-
तुतोद पिपीलः सर्प उत वा श्वापदः। अग्निष्टद्विश्वादगदं
कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश ॥६॥ अग्नेर्वर्म परि
गोभिर्व्ययस्व सं प्रोर्णुष्व पीवसा मेदसा च। नेत्त्वा धृष्णु-
र्हरसा जर्हृषाणो दधृग्विधक्ष्यन्पर्यङ्खयाते ॥७॥ इममग्ने
चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानां।
एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयंते ॥८॥
क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥९॥
यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जात-
वेदसं। तं हरामि पितृयज्ञाय देवं स घर्ममिन्वात्परमे स-
धस्थे ॥१०॥२१॥ यो अग्निः क्रव्यवाहनः पितॄन्यक्षदृतावृधः।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥११॥ उशंतस्त्वा
नि धीमह्युशंतः समिधीमहि। उशन्नुशत आ वह पितॄ-
न्हविषे अत्तवे ॥१२॥ यं त्वमग्ने समदहस्तमु निर्वापया
पुनः। कियांब्वत्र रोहतु पाकदूर्वा व्यल्कशा ॥१३॥ शीतिके

शीतिकावति ह्लादिके ह्लादिकावति । मंडूक्या३सु सं गम इमं स्व१ग्निं हर्षय ॥ १४ ॥ २२ ॥ १ ॥

॥ १७ ॥ १–१४ देवश्रवा यामायनः ॥ १. २ सरण्यूः । ३–६ पूषा । ७–९ सरस्वती । १०. १४ आपः । ११–१३ आपः सोमो वा ॥ १–१२ त्रिष्टुप । १३ अनुष्टुप्पुरस्ताद्बृहती वा । १४ अनुष्टुप ॥

॥१७॥ त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश
॥१॥ अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते।
उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ॥२॥
पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः । स
त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥३॥ आ-
युर्विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात्।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥४॥
पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत्।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रजानन् ॥५॥२३॥
प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः । उभे
अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन् ॥६॥
सरस्वतीं देवयंतो हवंते सरस्वतीमध्वरे तायमाने। सरस्व-
तीं सुकृतो अह्वयंत सरस्वती दाशुषे वार्यं दात् ॥७॥ सरस्वति
या सरथं ययाथ स्वधाभिर्देवि पितृभिर्मदंती। आसद्यास्मि-
न्बर्हिषि मादयस्वानमीवा इष आ धेह्यस्मे ॥८॥ सरस्वतीं यां
पितरो हवंते दक्षिणा यज्ञमभिनक्षमाणाः। सहस्रार्घमिळो
अत्र भागं रायस्पोषं यजमानेषु धेहि ॥९॥ आपो अस्मान्मा-
तरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु। विश्वं हि रिप्रं प्रवहंति

देवीरुदिदाभ्यः शुचिरा पूत एमि ॥१०॥२४॥ द्रप्सश्चस्कंद प्रथमाँ अनु द्यूनिमं च योनिमनु यश्च पूर्वः। समानं योनिमनु संचरंतं द्रप्सं जुहोम्यनु सप्त होत्राः ॥११॥ यस्ते द्रप्सः स्कंदति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात्। अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतं ॥१२॥ यस्ते द्रप्सः स्कन्नो यस्ते अंशुरवश्च यः परः स्रुचा। अयं देवो बृहस्पतिः सं तं सिंचतु राधसे ॥१३॥ पयस्वतीरोषधयः पयस्वन्मामकं वचः। अपां पयस्वदित्पयस्तेन मा सह शुंधत ॥१४॥२५॥

॥ १८ ॥ १–१४ संकुसुको यामायनः ॥ १–४ मृत्युः । ५ धाता । ६ त्वष्टा । ७–१३ पितृमेधः । १४ पितृमेधः प्रजापतिर्वा ॥ १–१०. १२ त्रिष्टुप् । ११ प्रस्तारपंक्तिः । १३ जगती । १४ अनुष्टुप् ॥

॥१८॥ परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥१॥ मृत्योः पदं योपयंतो यदैत द्राघीय आयुः प्रतरं दधानाः। आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः ॥२॥ इमे जीवा वि मृतैराववृत्रन्नभूद्भद्रा देवहूतिर्नो अद्य। प्रांचो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः ॥३॥ इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतं। शतं जीवंतु शरदः पुरूचीरंतर्मृत्युं दधतां पर्वतेन ॥४॥ यथाहान्यनुपूर्वं भवंति यथ ऋतव ऋतुभिर्यंति साधु। यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषां ॥५॥२६॥ आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ। इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः ॥६॥ इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा सं विशंतु। अनश्रवोऽनमीवाः सुरत्ना आ रोहंतु जनयो योनि-

मये ॥ ७ ॥ उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष
एहि । हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ
॥ ८ ॥ धनुर्हस्तादाददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय ।
अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम
॥ ९ ॥ उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवां ।
ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात्
॥ १० ॥ २७ ॥ उच्छ्वंचस्व पृथिवि मा नि बाधथाः सूपायनास्मै
भव सूपवंचना । माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि
॥ ११ ॥ उच्छ्वंचमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि
श्रयंतां । ते गृहासो घृतश्चुतो भवंतु विश्वाहास्मै शरणाः संत्वत्र
॥ १२ ॥ उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो अहं
रिषं । एतां स्थूणां पितरो धारयंतु तेऽत्रा यमः सादना ते मि-
नोतु ॥ १३ ॥ प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः । प्र-
तीचीं जग्रभा वाचमश्वं रशनया यथा ॥ १४ ॥ २८ ॥ ६ ॥

॥ १९ ॥ १–८ मथितो यामायनो भृगुर्वा वारुणिश्च्यवनो वा भार्गवः ॥ १[१]. २–८ आपो गावो वा । १[२]. अग्नीषोमौ ॥ १–५. ७. ८. अनुष्टुप् । ६ गायत्री ॥

॥ १९ ॥ नि वर्तध्वं मानु गातास्मान्त्सिषक्त रेवतीः ।
अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिं ॥ १ ॥ पुनरेना
नि वर्तय पुनरेना न्या कुरु । इंद्र एणा नि यच्छत्वग्नि-
रेना उपाजतु ॥ २ ॥ पुनरेता नि वर्ततामस्मिन्पुष्यंतु गो-
पतौ । इहैवाग्ने नि धारयेह तिष्ठतु या रयिः ॥ ३ ॥ यन्नियानं
न्ययनं संज्ञानं यत्परायणं । आवर्तनं निवर्तनं यो गोपा
अपि तं हुवे ॥ ४ ॥ य उदानड्व्ययनं य उदानट्परा-
यणं । आवर्तनं निवर्तनमपि गोपा नि वर्ततां ॥ ५ ॥

आ निवर्त नि वर्तय पुनर्न इंद्र गा देहि । जीवाभिर्भुनजामहै
॥६॥ परि वो विश्वतो दध ऊर्जा घृतेन पयसा । ये देवाः के च
यज्ञियास्ते रय्या सं सृजंतु नः ॥७॥ आ निवर्तन वर्तय नि नि-
वर्तन वर्तय । भूम्याश्चतस्रः प्रदिशस्ताभ्य एना नि वर्तय ॥८॥१॥

॥ २० ॥ १–१० विमद ऐंद्रः प्राजापत्यो वा वसुकृद्वा वासुक्रः ॥ अग्निः ॥ १ एकपदा (पाद एव वा शांत्यर्थः) । २ अनुष्टुप् । ३–८ गायत्री । ९ विराट् । १० त्रिष्टुप् ॥

॥२०॥ भद्रं नो अपि वातय मनः ॥१॥ अग्निमीळे भुजां य-
विष्ठं शासा मित्रं दुर्धरीतुं । यस्य धर्मन्त्स्व१रेनीः सपर्यंति मा-
तुरूधः ॥२॥ यमासा कृपनीळं भासाकेतुं वर्धयंति । भ्राजते
श्रेणिदन् ॥३॥ अर्यो विशां गातुरेति प्र यदानड्दिवो अंतान् ।
कविरभ्रं दीद्यानः ॥४॥ जुषद्धव्या मानुषस्योर्ध्वस्तस्थावृभ्वा यज्ञे ।
मिन्वन्त्सद्म पुर एति ॥५॥ स हि क्षेमो हविर्यज्ञः श्रुष्टीदस्य गा-
तुरेति । अग्निं देवा वाशीमंतं ॥६॥२॥ यज्ञासाहं दुव इषेऽग्निं
पूर्वस्य शेवस्य । अद्रेः सूनुमायुमाहुः ॥७॥ नरो ये के चास्मदा
विश्वेत्ते वाम आ स्युः । अग्निं हविषा वर्धंतः ॥८॥ कृष्णः श्वेतो-
ऽरुषो यामो अस्य ब्रध्न ऋज्र उत शोणो यशस्वान् । हिर-
ण्यरूपं जनिता जजान ॥९॥ एवा ते अग्ने विमदो मनीषामूर्जो
नपादमृतेभिः सजोषाः । गिर आ वक्षत्सुमतीरियान इषमूर्जं
सुक्षितिं विश्वमाभाः ॥१०॥३॥

॥ २१ ॥ १–८ विमद ऐंद्रः प्राजापत्यो वा वसुकृद्वा वासुक्रः ॥ अग्निः ॥ आस्तारपंक्तिः ॥

॥२१॥ आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे । यज्ञाय
स्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे ॥१॥
त्वामु ते स्वाभुवः शुंभंत्यश्वराधसः । वेति त्वामुपसेचनी वि
वो मद ऋजीतिरग्न आहुतिर्विवक्षसे ॥२॥ त्वे धर्माण आ-

सते जुहूभिः सिंचतीरिव। कृष्णा रूपाण्यर्जुना वि वो मदे वि-
श्वा अधि श्रियो धिषे विवक्षसे ॥३॥ यमग्ने मन्यसे रयिं सह-
सावन्नमर्त्य। तमा नो वाजसातये वि वो मदे यज्ञेषु चित्रमा
भरा विवक्षसे ॥४॥ अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या।
भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे
॥५॥४॥ त्वां यज्ञेष्वीळतेऽग्ने प्रयत्यध्वरे। त्वं वसूनि काम्या वि वो
मदे विश्वा दधासि दाशुषे विवक्षसे ॥६॥ त्वां यज्ञेष्वृत्विजं चारु-
मग्ने नि षेदिरे। घृतप्रतीकं मनुषो वि वो मदे शुक्रं चेतिष्ठमक्ष-
भिर्विवक्षसे ॥७॥ अग्ने शुक्रेण शोचिषोरु प्रथयसे बृहत्। अभि-
क्रंदन्वृषायसे वि वो मदे गर्भं दधासि जामिषु विवक्षसे ॥८॥५॥

॥ २२ ॥ १-१५ विमद ऐंद्रः प्राजापत्यो वा वसुकृद्वा वासुक्रः ॥ इंद्रः ॥
१-४. ६. ८. १०-१४ पुरस्ताद्बृहती। ५. ७. ९ अनुष्टुप्। १५ त्रिष्टुप्॥

॥२२॥ कुह श्रुत इंद्रः कस्मिन्नद्य जने मित्रो न श्रूयते। ऋषी-
णां वा यः क्षये गुहा वा चर्कृषे गिरा ॥१॥ इह श्रुत इंद्रो अस्मे
अद्य स्तवे वज्र्यृचीषमः। मित्रो न यो जनेष्वा यशश्चक्रे असा-
म्या ॥२॥ महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतु-
जिः। भर्ता वज्रस्य धृष्णोः पिता पुत्रमिव प्रियं ॥३॥ युजानो
अश्वा वातस्य धुनी देवो देवस्य वज्रिवः। स्यंता पथा विरुक्म-
ता सृजानः स्तोष्यध्वनः ॥४॥ त्वं त्या चिद्वातस्याश्वागा ऋज्रा
त्मना वहध्यै। ययोर्देवो न मर्त्यो यंता नकिर्विदाय्यः ॥५॥६॥
अध ग्मंतोशना पृच्छते वां कदर्था न आ गृहं। आ जग्मथुः
पराकाद्दिवश्च ग्मश्च मर्त्यं ॥६॥ आ न इंद्र पृक्षसेऽस्माकं
ब्रह्मोद्यतं। तत्त्वा याचामहेऽवः शुष्णं यद्धन्नमानुषं ॥७॥ अ-
कर्मा दस्युरभि नो अमंतुरन्यव्रतो अमानुषः। त्वं तस्या-

मिन्त्रहन्वधर्दासस्य दंभय ॥८॥ त्वं न इंद्र शूर शूरैरुत त्वोतासो
बर्हणा । पुरुत्रा ते वि पूर्तयो नवंत क्षोणयो यथा ॥९॥ त्वं ता-
न्वृत्रहत्ये चोदयो नॄन्कार्पाणे शूर वज्रिवः । गुहा यदी कवीनां
विशां नक्षत्रशवसां ॥१०॥७॥ मक्षू ता त इंद्र दानाप्नस आ-
क्षाणे शूर वज्रिवः । यद्ध शुष्णस्य दंभयो जातं विश्वं सया-
वभिः ॥११॥ माकुध्र्यगिंद्र शूर वस्वीरस्मे भूवन्नभिष्टयः ।
वयंवयं त आसां सुम्ने स्याम वज्रिवः ॥१२॥ अस्मे ता त इंद्र
संतु सत्याहिंसंतीरुपस्पृशः । विद्याम यासां भुजो धेनूनां न
वज्रिवः ॥१३॥ अहस्ता यदपदी वर्धत क्षाः शचीभिर्वेद्यानां ।
शुष्णं परि प्रदक्षिणिद्विश्वायवे नि शिश्नथः ॥१४॥ पिबापि-
बेदिंद्र शूर सोमं मा रिषण्यो वसवान वसुः सन् । उत
त्रायस्व गृणतो मघोनो महश्च रायो रेवतस्कृधी नः ॥१५॥८॥

॥ २३ ॥ १–७ विमद ऐंद्रः प्राजापत्यो वा वसुकृद्वा वासुक्रः ॥ इंद्रः ॥ १. ७
त्रिष्टुप् । २–४. ६ जगती । ५ अभिसारिणी ॥

॥२३॥ यजामह इंद्रं वज्रदक्षिणं हरीणां रथ्यं विव्रतानां ।
प्र श्मश्रु दोधुवदूर्ध्वथा भूद्वि सेनाभिर्दयमानो वि राधसा ॥१॥
हरी न्वस्य या वने विदे वस्विंद्रो मघैर्मघवा वृत्रहा भुवत् ।
ऋभुर्वाज ऋभुक्षाः पत्यते शवोऽव क्ष्णौमि दासस्य नाम
चित् ॥२॥ यदा वज्रं हिरण्यमिदथा रथं हरी यमस्य वहतो
वि सूरिभिः । आ तिष्ठति मघवा सनश्रुत इंद्रो वाजस्य दीर्घ-
श्रवसस्पतिः ॥३॥ सो चिन्नु वृष्टिर्यूथ्या स्वा सचाँ इंद्रः श्म-
श्रूणि हरिताभि प्रुष्णुते । अव वेति सुक्षयं सुते मधूदिद्धूनोति
वातो यथा वनं ॥४॥ यो वाचा विवाचो मृध्रवाचः पुरू
सहस्राशिवा जघान । तत्तदिदस्य पौंस्यं गृणीमसि पितेव

यस्तविषी वावृधे शवः ॥५॥ स्तोमं त इंद्र विमदा अंजीज-
नन्नपूर्व्यं पुरुतमं सुदानवे । विद्मा ह्यस्य भोजनमिनस्य यदा
पशुं न गोपाः करामहे ॥ ६ ॥ माकिर्न एना सख्या वि यौ-
षुस्तव चेंद्र विमदस्य च ऋषेः । विद्मा हि ते प्रमतिं देव
जामिवदस्मे ते संतु सख्या शिवानि ॥ ७ ॥ ९ ॥

॥ २४ ॥ विमद ऐंद्रः प्राजापत्यो वा वसुकृद्वा वासुक्रः ॥ १-३ इंद्रः । ४-६ अश्विनौ ॥ १-३ आस्तारपंक्तिः । ४-६ अनुष्टुप् ॥

॥२४॥ इंद्र सोममिमं पिब मधुमंतं चमू सुतं । अस्मे रयिं नि
धारय वि वो मदे सहस्रिणं पुरूवसो विवक्षसे ॥१॥ त्वां यज्ञेभिरु-
क्थैरुप हव्येभिरीमहे । शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि
वार्यं विवक्षसे ॥२॥ यस्पतिर्वार्याणामसि रध्रस्य चोदिता । इंद्र
स्तोतॄणामविता वि वो मदे द्विषो नः पाह्यंहसो विवक्षसे ॥३॥
युवं शक्रा मायाविना समीची निरमंथतं । विमदेन यदीळिता
नासत्या निरमंथतं ॥४॥ विश्वे देवा अकृपंत समीच्योर्निष्पतंत्योः ।
नासत्यावब्रुवन्देवाः पुनरा वहतादिति ॥५॥ मधुमन्मे परायणं
मधुमत्पुनरायनं । ता नो देवा देवतया युवं मधुमतस्कृतं ॥६॥१०॥

॥ २५ ॥ १-११ विमद ऐंद्रः प्राजापत्यो वा वसुकृद्वा वासुक्रः ॥ सोमः ॥ आस्तारपंक्तिः ॥

॥२५॥ भद्रं नो अपि वातय मनो दक्षमुत क्रतुं । अधा ते सख्ये
अंधसो वि वो मदे रणन्गावो न यवसे विवक्षसे ॥१॥ हृदिस्पृ-
शस्त आसते विश्वेषु सोम धामसु । अधा कामा इमे मम वि
वो मदे वि तिष्ठंते वसूयवो विवक्षसे ॥२॥ उत व्रतानि सोम
ते प्राहं मिनामि पाक्या । अधा पितेव सूनवे वि वो मदे मृळा
नो अभि चिद्वधाद्विवक्षसे ॥३॥ समु प्र यंति धीतयः सर्गासोऽव-

ताँ इ॑व । क्रतुं॑ नः सोम जी॒वसे॒ वि वो॒ मदे॑ धा॒रया॑ चम॒साँ इ॑व॒ विव॑क्षसे ॥ ४ ॥ तव॒ त्ये सो॑म॒ शक्ति॑भि॒र्निका॑मासो॒ व्यृ॑ण्विरे । गृत्स॑स्य॒ धीरा॑स्त॒वसो॒ वि वो॒ मदे॑ व्र॒जं गोम॑न्तम॒श्विनं॒ विव॑क्षसे ॥ ५ ॥ ११ ॥ प॒शुं नः॑ सोम रक्षसि पुरु॒त्रा विष्ठि॑तं॒ जग॑त् । स॒माकृ॑णोषि जी॒वसे॒ वि वो॒ मदे॒ विश्वा॑ सं॒पश्य॒न्भुव॑ना॒ विव॑क्षसे ॥ ६ ॥ त्वं नः॑ सोम वि॒श्वतो॑ गो॒पा अदा॑भ्यो भव । सेध॑ राजन्न॒प स्रिधो॒ वि वो॒ मदे॒ मा नो॑ दुः॒शंस॒ ईश॑ता॒ विव॑क्षसे ॥ ७ ॥ त्वं नः॑ सोम सु॒क्रतु॑र्वयो॒धेया॑य जागृहि । क्षे॒त्र॒वित्त॑रो॒ मनु॑षो॒ वि वो॒ मदे॑ द्रु॒हो नः॑ पा॒ह्यंह॑सो॒ विव॑क्षसे ॥ ८ ॥ त्वं नो॑ वृत्रहन्त॒मेन्द्र॑स्येन्दो शि॒वः सखा॑ । यत्सीं॒ हव॑न्ते समि॒थे वि वो॒ मदे॒ युध्य॑मानास्तो॒कसा॑तौ॒ विव॑क्षसे ॥ ९ ॥ अ॒यं घ॒ स तु॒रो मद॒ इन्द्र॑स्य वर्धत प्रि॒यः । अ॒यं क॒क्षीव॑तो म॒हो वि वो॒ मदे॑ म॒तिं विप्र॑स्य वर्धय॒द्विव॑क्षसे ॥ १० ॥ अ॒यं विप्रा॑य दा॒शुषे॒ वाजाँ॑ इयर्ति॒ गोम॑तः । अ॒यं स॒प्तभ्य॒ आ वरं॒ वि वो॒ मदे॒ प्रान्धं श्रो॒णं च॑ तारिष॒द्विव॑क्षसे ॥ ११ ॥ १२ ॥

॥ २६ ॥ १–९ विमद ऐन्द्रः प्राजापत्यो वा वसुकृद्वा वासुक्रः ॥ पूषा ॥ १. ४. उष्णिक् । २. ३. ५–९ अनुष्टुप् ॥

॥ २६ ॥ प्र ह्यच्छा॑ मनी॒षाः स्पा॒र्हा यन्ति॑ नि॒युतः॑ । प्र द॒स्रा नि॒युद्र॑थः पू॒षा अ॑विष्टु॒ माहि॑नः ॥ १ ॥ यस्य॒ त्यन्म॑हि॒त्वं वा॒ताप्य॑म॒यं जनः॑ । विप्र॒ आ वं॑सद्धी॒तिभि॒श्चिके॑त सुष्टु॒ती॒नां ॥ २ ॥ स वे॑द सुष्टुती॒नामिन्दु॒र्न पू॒षा वृषा॑ । अ॒भि प्सुरः॑ प्रुषायति व्र॒जं न॒ आ प्रु॑षायति ॥ ३ ॥ मं॒सी॒महि॑ त्वा व॒यम॒स्माकं॑ देव पूषन् । म॒ती॒नां च॒ साध॑नं॒ विप्रा॑णां चाध॒वं ॥ ४ ॥ प्रत्य॑र्धिर्य॒ज्ञाना॑मश्वह॒यो रथा॑नां । ऋषिः॒ स यो मनु॑र्हितो॒ विप्र॑स्य यावयत्स॒खः ॥ ५ ॥ १३ ॥ आ॒धीष॑माणायाः॒ पतिः॑ शु॒चाया॑श्च शु॒चस्य॑ च । वा॒सो॒वा॒योऽवी॑ना॒मा वासां॑सि॒ मर्मृ॑जत् ॥ ६ ॥ इ॒नो वाजा॑नां॒ प-

तिरिनः पुष्टीनां सखा । प्र श्मश्रु हर्यतो दूधोद्वि वृथा यो अ-
दाभ्यः ॥७॥ आ ते रथस्य पूषन्नजा धुरं ववृत्युः । विश्वस्यार्थिनः
सखा सनोजा अनपच्युतः ॥८॥ अस्माकमूर्जा रथं पूषा अविष्टु
माहिनः । भुवद्वाजानां वृध इमं नः शृणवद्धवं ॥९॥१४॥

॥ २७ ॥ १-२४ वसुक्र ऐंद्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२७॥ असत्सु मे जरितः साभिवेगो यत्सुन्वते यजमा-
नाय शिक्षं । अनाशीर्दामहमस्मि प्रहंता सत्यध्वृतं वृजिना-
यंतमाभुं ॥१॥ यदीदहं युधये संनयान्यदेवयून्तन्वा३ शूशुजा-
नान् । अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पंचदशं नि
षिंचं ॥२॥ नाहं तं वेद य इति ब्रवीत्यदेवयून्त्समरणे जघ-
न्वान् । यदावाख्यत्समरणमृघावदादिद्ध मे वृषभा प्र
ब्रुवंति ॥३॥ यदज्ञातेषु वृजनेष्वासं विश्वे सतो मघवानो म
आसन् । जिनामि वेत्क्षेम आ संतमाभुं प्र तं क्षिणां पर्वते
पादगृह्य ॥४॥ न वा उ मां वृजने वारयंते न पर्वतासो
यदहं मनस्ये । मम स्वनात्कृधुकर्णो भयात एवेदनु द्यून्कि-
रणः समेजात् ॥५॥१५॥ दर्शन्न्वत्र शृतपाँ अनिंद्रान्बा-
हुक्षदः शरवे पत्यमानान् । घृषुं वा ये निनिदुः सखायमध्यू
न्वेषु पवयो ववृत्युः ॥६॥ अभूर्वौक्षीर्व्यु१ आयुरानड्दर्षन्नु
पूर्वो अपरो नु दर्षत् । द्वे पवस्ते परि तं न भूतो यो अस्य
पारे रजसो विवेष ॥७॥ गावो यवं प्रयुता अर्यो अक्षन्ता
अपश्यं सहगोपाश्चरंतीः । हवा इदर्यो अभितः समाय-
न्कियदासु स्वपतिश्छंदयाते ॥८॥ सं यद्वयं यवसादो जना-
नामहं यवाद उर्वज्रे अंतः । अत्रा युक्तोऽवसातारमि-
च्छादथो अयुक्तं युनजद्ववन्वान् ॥९॥ अत्रेदु मे मंससे

सत्यमुक्त्वा द्विपाच्च यच्चतुष्पात्संसृजानि । स्त्रीभिर्यो अत्र वृषणं
पृतन्यादयुद्धो अस्य वि भजानि वेदः ॥ १० ॥ १६ ॥ यस्यानक्षा
दुहिता जात्वास कस्तां विद्वाँ अभि मन्याते अंधां । कतरो
मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात् ॥ ११ ॥
कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण ।
भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित्
॥ १२ ॥ पत्तो जगार प्रत्यंचमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथं ।
आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिं ॥ १३ ॥
बृहन्नच्छायो अपलाशो अर्वा तस्थौ माता विषितो अत्ति
गर्भः । अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनु-
रूधः ॥ १४ ॥ सप्त वीरासो अधरादुदायन्नष्टोत्तरात्तात्समज-
ग्मिरन्ते । नव पश्चातात्स्थिविमंत आयन्दश प्राक्सानु वि
तिरंत्यश्नः ॥ १५ ॥ १७ ॥ दशानामेकं कपिलं समानं तं हिन्वंति
क्रतवे पार्याय । गर्भं माता सुधितं वक्षणास्ववेनंतं तुषयंती
बिभर्ति ॥ १६ ॥ पीवानं मेषमपचंत वीरा न्युप्ता अक्षा अनु
दीव आसन् । द्वा धनुं बृहतीमप्स्वं१तः पवित्रवंता चरतः पु-
नंता ॥ १७ ॥ वि क्रोशनासो विष्वंच आयन्पचाति नेमो नहि
पक्षदर्धः । अयं मे देवः सविता तदाह द्रून्न इद्वनवत्सर्पिरन्नः
॥ १८ ॥ अपश्यं ग्रामं वहमानमारादचक्रया स्वधया वर्त-
मानं । सिषक्त्यर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो
नवीयान् ॥ १९ ॥ एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधी-
र्मुहुरिन्ममंधि । आपश्चिदस्य वि नशंत्यर्थं सूरश्च मर्क उपरो
बभूवान् ॥ २० ॥ १८ ॥ अयं यो वज्रः पुरुधा विवृत्तोऽवः सू-
र्यस्य बृहतः पुरीषात् । श्रव इदेना परो अन्यदस्ति तदव्य-

थी जरिमाणंस्तरंति ॥२१॥ वृक्षेवृक्षे नियंता मीमयद्गौस्ततो वयः
प्र पंतान्पूरुषादंः । अथेदं विश्वं भुवनं भयात इंद्राय सुन्वदृषंये च
शिक्षत् ॥२२॥ देवानां मानें प्रथमा अंतिष्ठन्कृंतत्रादेषामुपंरा उ-
दांयन् । त्रयंस्तपंति पृथिवीमंनूपा द्वा बृबूंकं वहतः पुरींषं ॥२३॥
सा ते जीवातुंरुत तस्यं विद्धि मा स्मैतादृगपं गूहः समर्ये । आविः
स्वंः कृणुते गूहंते बुसं स पादुरस्य निर्णिजो न मुंच्यते ॥२४॥१९॥

॥ २८ ॥ १–१२ इंद्रवसुक्रयोः संवाद ऐंद्रः (१ इंद्रस्य स्नुषा परोक्षवदिंद्रमाह) ॥
त्रिष्टुप् ॥

॥ २८ ॥ विश्वो ह्य१न्यो अरिराजगाम ममेदह श्वशुरो ना
जंगाम । जक्षीयाद्धाना उत सोमं पपीयात्स्वाशितः पु-
नरस्तं जगायात् ॥ १ ॥ स रोरुवद्वृषभस्तिग्मशृंगो वर्ष्मंन्तस्थौ
वरिमन्ना पृथिव्याः । विश्वेष्वेनं वृजनेषु पामि यो मे कु-
क्षी सुतसोमः पृणाति ॥२॥ अद्रिणा ते मंदिन इंद्र तूयान्सु-
न्वंति सोमान्पिबसि त्वमेषां । पचंति ते वृषभाँ अत्सि तेषां
पृक्षेण यन्मंघवन्हूयमानः ॥ ३ ॥ इदं सु मे जरितरा चिंकिद्धि
प्रतीपं शापं नद्यो वहंति । लोपाशः सिंहं प्रत्यंचमत्साः क्रोष्टा
वराहं निरंतक्त कक्षात् ॥४॥ कथा त एतदहमा चिंकेतं गृत्स-
स्य पाकस्तवसो मनीषां । त्वं नो विद्वाँ ऋतुथा वि वोचो यमर्धं
ते मघवन्क्षेम्या धूः ॥५॥ एवा हि मां तवसं वर्धयंति दिव-
श्चिन्मे बृहत उत्तरा धूः । पुरू सहस्रा नि शिशामि साकमशत्रुं
हि मा जनिता जजान ॥६॥२०॥ एवा हि मां तवसं जज्ञुरुग्रं
कर्मन्कर्मन्वृषणमिंद्र देवाः । वधीं वृत्रं वज्रेण मंदसानोऽप व्रजं
महिना दाशुषे वं ॥ ७ ॥ देवास आयन्परशूँरबिभ्रन्वना वृश्चं-
तो अभि विड्भिरायन् । नि सुद्र्वं१दधतो वक्षणासु यत्रा कृ-

पीटमनु तद्दहंति ॥८॥ शशः क्षुरं प्रत्यंचं जगाराद्रिं लोगेन व्यं-
भेदमारात् । बृहंतं चिद्दहते रंधयानि वयंद्वत्सो वृषभं शू-
शुवानः ॥९॥ सुपर्ण इत्था नखमा सिषायावरुद्धः परिपदं
न सिंहः । निरुद्धश्चिन्महिषस्तर्ष्यावान्गोधा तस्मा अयथं
कर्षदेतत् ॥१०॥ तेभ्यो गोधा अयथं कर्षदेतद्ये ब्रह्मणः प्रति-
पीयंत्यन्नैः । सिम उक्ष्णोऽवसृष्टाँ अदंति स्वयं बलानि तन्वः
शृणानाः ॥११॥ एते शमीभिः सुशमी अभूवन्ये हिन्विरे त-
न्व१ः सोम उक्थैः । नृवद्वदन्नुप नो माहि वाजान्दिवि श्रवो
दधिषे नाम वीरः ॥१२॥२१॥

॥२९॥ १–८ वसुक्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२९॥ वने न वा यो न्यधायि चाकञ्छुचिर्वां स्तोमो भु-
रणावजीगः । यस्येदिंद्रः पुरुदिनेषु होता नृणां नर्यो नृतमः
क्षपावान् ॥१॥ प्र ते अस्या उषसः प्रापरस्या नृतौ स्याम
नृतमस्य नृणां । अनु त्रिशोकः शतमावहन्नॄन्कुत्सेन रथो यो
असत्ससवान् ॥२॥ कस्ते मद इंद्र रंत्यो भूद्दुरो गिरो अभ्यु१-
ग्रो वि धाव । कद्वाहो अर्वागुप मा मनीषा आ त्वा शक्या-
मुपमं राधो अन्नैः ॥३॥ कदु द्युम्नमिंद्र त्वावतो नॄन्कया धिया
करसे कन्न आगन् । मित्रो न सत्य उरुगाय भृत्या अन्ने स-
मस्य यदसन्मनीषाः ॥४॥ प्रेरय सूरो अर्थं न पारं ये अस्य
कामं जनिधा इव ग्मन् । गिरश्च ये ते तुविजात पूर्वीर्नर इंद्र
प्रतिशिक्षंत्यन्नैः ॥५॥२२॥ मात्रे नु ते सुमिते इंद्र पूर्वी द्यौर्म-
ज्मना पृथिवी काव्येन । वराय ते घृतवंतः सुतासः स्वाद्मन्भ-
वंतु पीतये मधूनि ॥६॥ आ मध्वो अस्मा असिचन्नमत्रमिं-
द्राय पूर्णं स हि सत्यराधाः । स वावृधे वरिमन्ना पृथिव्या अभि

ऋत्वा नर्यः पौंस्यैश्च ॥ ७ ॥ व्यानळिंद्रः पृतनाः स्वोजा आस्मै
यतंते सख्याय पूर्वीः । आ स्मा रथं न पृतनासु तिष्ठ यं भद्र-
या सुमत्या चोदयासे ॥ ८ ॥ २३ ॥ २ ॥

॥ ३० ॥ १–१५ कवष ऐलूषः ॥ आप अपांनपाद्वा ॥ त्रिष्टुप् ॥

॥ ३० ॥ प्र देवत्रा ब्रह्मणे गातुरेत्वपो अच्छा मनसो न प्र-
युक्ति । महीं मित्रस्य वरुणस्य धासिं पृथुज्रयसे रीरधा सुवृक्तिं
॥ १ ॥ अध्वर्यवो हविष्मंतो हि भूताच्छाप इतोशतीरुशंतः ।
अव याश्चष्टे अरुणः सुपर्णस्तमास्यध्वमूर्मिमद्या सुहस्ताः ॥ २ ॥
अध्वर्यवोऽप इता समुद्रमपां नपातं हविषा यजध्वं । स वो
ददूर्मिमद्या सुपूतं तस्मै सोमं मधुमंतं सुनोत ॥ ३ ॥ यो अनि-
ध्मो दीदयदप्स्वं१तर्यं विप्रास ईळते अध्वरेषु । अपां नपा-
न्मधुमतीरपो दा याभिरिंद्रो वावृधे वीर्याय ॥ ४ ॥ याभिः
सोमो मोदते हर्षते च कल्याणीभिर्युवतिभिर्न मर्यः । ता अ-
ध्वर्यो अपो अच्छा परेहि यदासिंचा ओषधीभिः पुनीतात्
॥ ५ ॥ २४ ॥ एवेद्यूने युवतयो नमंत यदीमुशन्नुशतीरेत्यच्छ ।
सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिषणापश्च देवीः
॥ ६ ॥ यो वो वृताभ्यो अकृणोदु लोकं यो वो मह्या अभि-
शस्तेरमुंचत् । तस्मा इंद्राय मधुमंतमूर्मिं देवमादनं प्र हिं-
णोतनापः ॥ ७ ॥ प्रास्मै हिनोत मधुमंतमूर्मिं गर्भो यो वः
सिंधवो मध्व उत्सः । घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः शृणुता
हवं मे ॥ ८ ॥ तं सिंधवो मत्सरमिंद्रपानमूर्मिं प्र हेत य उभे
इयर्ति । मदच्युतमौशानं नभोजां परि त्रितंतुं विचरंतमुत्सं
॥ ९ ॥ आववृततीरध नु द्विधारा गोषुयुधो न नियवं चरंतीः ।
ऋषे जनित्रीर्भुवनस्य पत्नीरपो वंदस्व सवृधः सयोनीः

॥१०॥२५॥ हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानां। ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः ॥११॥ आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च। रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धात् ॥१२॥ प्रति यदापो अदृश्रमायतीर्घृतं पयांसि बिभ्रतीर्मधूनि। अध्वर्युभिर्मनसा संविदाना इंद्राय सोमं सुषुतं भरंतीः ॥१३॥ एमा अग्मन्रेवतीर्जीवधन्या अध्वर्यवः सादयता सखायः। नि बर्हिषि धत्तन सोम्यासोऽपां नप्त्रा संविदानास एनाः ॥१४॥ आग्मन्नाप उशतीर्बर्हिरेदं न्यध्वरे असदन्देवयंतीः। अध्वर्यवः सुनुतेंद्राय सोममभूदु वः सुशका देवयज्या ॥१५॥२६॥

॥ ३१ ॥ १–११ कवष ऐलूषः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३१॥ आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः। तेभिर्वयं सुषखायो भवेम तरंतो विश्वा दुरिता स्याम ॥१॥ परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत्। उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ॥२॥ अधायि धीतिरससृग्रमंशास्तीर्थे न दस्ममुप यंत्यूमाः। अभ्यानश्म सुवितस्य शूषं नवेदसो अमृतानामभूम ॥३॥ नित्यश्चाकन्यात्स्वपतिर्दमूना यस्मा उ देवः सविता जजान। भगो वा गोभिरर्यमेमनज्यात्सो अस्मै चारुश्छदयदुत स्यात् ॥४॥ इयं सा भूया उषसामिव क्षा यद्ध क्षुमंतः शवसा समायन्। अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यंतु वाजाः ॥५॥२७॥ अस्येदेषा सुमतिः पप्रथानाभवत्पूर्व्या भूमना गौः। अस्य सनीळा असुरस्य योनौ समान आ भरणे

बिभ्रमाणाः ॥६॥ किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः । संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरंत ॥७॥ नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति । त्वचं पवित्रं कृणुत स्वधावान्यदीं सूर्यं न हरितो वहंति ॥८॥ स्तेगो न क्षामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम । मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकं ॥९॥ स्तरीर्यत्सूत सद्यो अज्यमाना व्यथिरव्यथीः कृणुत स्वगोपा । पुत्रो यत्पूर्वः पित्रोर्जनिष्ट शम्यां गौर्जगार यद्ध पृच्छान् ॥१०॥ उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी । प्र कृष्णाय रुशदपिन्वतोधर्ऋतमत्र नकिरस्मा अपीपेत् ॥११॥२८॥

॥ ३२ ॥ १–९ कवष ऐलूषः ॥ विश्वे देवाः ॥ १–५ जगती । ६–९ त्रिष्टुप् ॥

॥३२॥ प्र सु ग्मंता धियसानस्य सक्षणि वरेभिर्वराँ अभि षु प्रसीदतः । अस्माकमिंद्र उभयं जुजोषति यत्सोम्यस्यांधसो बुबोधति ॥१॥ वींद्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुष्टुत । ये त्वा वहंति मुहुरध्वराँ उप ते सु वन्वंतु वग्वनाँ अराधसः ॥२॥ तदिन्मे छंत्सद्वपुषो वपुष्टरं पुत्रो यज्जानं पित्रोरधीयति । जाया पतिं वहति वग्नुना सुमत्पुंस इद्भद्रो वहतुः परिष्कृतः ॥३॥ तदित्सधस्थमभि चारु दीधय गावो यच्छासन्वहतुं न धेनवः । माता यन्मंतुर्यूथस्य पूर्व्याभि वाणस्य सप्तधातुरिज्जनः ॥४॥ प्र वोऽच्छा रिरिचे देवयुष्पदमेको रुद्रेभिर्याति तुर्वणिः । जरा वा येष्वमृतेषु दावने परि व ऊमेभ्यः सिंचता मधु ॥५॥२९॥ निधीयमानमपगूळ्हमप्सु प्र मे देवानां व्रतपा उवाच । इंद्रो विद्वाँ अनु

हि त्वां चचक्ष तेनाहमग्ने अनुशिष्ट आगां ॥६॥ अक्षेत्रवित्क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः। एतद्वै भद्रमनुशासनस्योत स्रुतिं विंदत्यंजसीनां ॥७॥ अद्येदु प्राणीदममन्निमाहापीवृतो अधयन्मातुरूधः। एमेनमाप जरिमा युवानमहेळन्वसुः सुमना बभूव ॥८॥ एतानि भद्रा कलश क्रियाम कुरुश्रवण ददतो मघानि। दान इद्वो मघवानः सो अस्त्वयं च सोमो हृदि यं बिभर्मि ॥९॥३०॥७॥

॥ ३३ ॥ १–९ कवष ऐलूषः ॥ १ विश्वे देवाः । २.३ इंद्रः । ४.५ कुरुश्रवणस्य त्रासदस्यवस्य दानस्तुतिः । ६–९ उपमश्रवा मित्रातिथिपुत्रः ॥ १ त्रिष्टुप् । २ बृहती । ३ सतोबृहती । ४–९ गायत्री ॥

॥३३॥ प्र मा युयुज्रे प्रयुजो जनानां वहामि स्म पूषणमंतरेण। विश्वे देवासो अध मामरक्षन्दुःशासुरागादिति घोष आसीत् ॥१॥ सं मा तपंत्यभितः सपत्नीरिव पर्शवः। नि बाधते अमतिर्नग्नता जसुर्वेर्न वेवीयते मतिः ॥२॥ मूषो न शिश्ना व्यदंति माध्यः स्तोतारं ते शतक्रतो। सकृत्सु नो मघवन्निंद्र मृळयाधा पितेव नो भव ॥३॥ कुरुश्रवणमावृणि राजानं त्रासदस्यवं। मंहिष्ठं वाघतामृषिः ॥४॥ यस्य मा हरितो रथे तिस्रो वहंति साधुया। स्तवै सहस्रदक्षिणे ॥५॥१॥ यस्य प्रस्वादसो गिर उपमश्रवसः पितुः। क्षेत्रं न रण्वमूचुषे ॥६॥ अधि पुत्रोपमश्रवो नपान्मित्रातिथेरिहि। पितुष्टे अस्मि वंदिता ॥७॥ यदीशीयामृतानामुत वा मर्त्यानां। जीवेदिन्मघवा मम ॥८॥ न देवानामति व्रतं शतात्मा चन जीवति। तथा युजा वि वावृते ॥९॥२॥

॥ ३४ ॥ १–१४ कवष ऐलूष अक्षो वा मौजवान् ॥ १. ७. ९. १२. १३ अक्षकृषिप्रशंसा । २–६. ८. १०. ११. १४ अक्षकितवनिंदा ॥ १–६. ८–१४ त्रिष्टुप् । ७ जगती ॥

॥३४॥ प्रावेपा मा बृहतो मादयंति प्रवातेजा इरिणे वर्वृ-

तानाः। सोमस्येव मौजवतस्य भक्षो विभीदको जागृवि-
र्मह्यमच्छान् ॥१॥ न मा मिमेथ न जिहीळ एषा शिवा
सखिभ्य उत मह्यमासीत्। अक्षस्याहमेकपरस्य हेतोरनुव्र-
तामप जायामरोधं ॥२॥ द्वेष्टि श्वश्रूरप जाया रुणद्धि न
नाथितो विंदते मर्डितारं। अश्वस्येव जरतो वस्न्यस्य नाहं
विंदामि कितवस्य भोगं ॥३॥ अन्ये जायां परि मृशंत्यस्य
यस्यागृधद्वेदने वाज्य१क्षः। पिता माता भ्रातर एनमाहुर्न जा-
नीमो नयता बद्धमेतं ॥४॥ यदादीध्ये न दविषाण्येभिः परा-
यद्भ्योऽव हीये सखिभ्यः। न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां
निष्कृतं जारिणीव ॥५॥३॥ सभामेति कितवः पृच्छमानो
जेष्यामीति तन्वा३ शूशुजानः। अक्षासो अस्य वि तिरंति
कामं प्रतिदीव्ने दधत आ कृतानि ॥६॥ अक्षास इदंकुशिनो
नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः। कुमारदेष्णा ज-
यतः पुनर्हणो मध्वा संपृक्ताः कितवस्य बर्हणा ॥७॥ त्रिपंचाशः
क्रीळति व्रात एषां देव इव सविता सत्यधर्मा। उग्रस्य
चिन्मन्यवे ना नमंते राजा चिदेभ्यो नम इत्कृणोति ॥८॥
नीचा वर्तंत उपरि स्फुरंत्यहस्तासो हस्तवंतं सहंते। दिव्या
अंगारा इरिणे न्युप्ताः शीताः संतो हृदयं निर्दहंति ॥९॥ जाया
तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित्। ऋणावा
बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥१०॥४॥ स्त्रियं
दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिं। पूर्वाह्णे
अश्वान्युयुजे हि बभ्रून्त्सो अग्नेरंते वृषलः पपाद ॥११॥ यो वः
सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव। तस्मै कृ-
णोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि ॥१२॥ अक्षै-

मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः। तत्र
गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥१३॥
मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु।
नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु॥१४॥५॥

॥ ३५ ॥ १–१४ लुशो धानाकः ॥ विश्वे देवाः ॥ १–१२ जगती। १३. १४ त्रिष्टुप् ॥

॥ ३५ ॥ अबुध्रमु त्य इंद्रवंतो अग्नयो ज्योतिर्भरंत उषसो
व्युष्टिषु। मही द्यावापृथिवी चेततामपोऽद्या देवानामव आ
वृणीमहे ॥१॥ दिवस्पृथिव्योरव आ वृणीमहे मातृन्त्सिंधून्प-
र्वताञ्छर्यणावतः। अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः
सुवानो अद्या कृणोतु नः ॥२॥ द्यावा नो अद्य पृथिवी अ-
नागसो मही त्रायेतां सुविताय मातरा। उषा उच्छंत्यप बा-
धतामघं स्वस्त्य१ग्निं समिधानमीमहे ॥३॥ इयं न उस्रा प्रथ-
मा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु। आरे मन्युं दुर्विदत्रस्य
धीमहि स्वस्त्य१ग्निं समिधानमीमहे॥४॥ प्र याः सिस्रते सूर्यस्य
रश्मिभिर्ज्योतिर्भरंतीरुषसो व्युष्टिषु। भद्रा नो अद्य श्रवसे व्यु-
च्छत स्वस्त्य१ग्निं समिधानमीमहे ॥५॥६॥ अनमीवा उषस
आ चरंतु न उदग्नयो जिहतां ज्योतिषा बृहत्। आयुक्षाता-
मश्विना तूतुजिं रथं स्वस्त्य१ग्निं समिधानमीमहे ॥६॥ श्रेष्ठं नो
अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि। रायो ज-
नित्रीं धिषणामुप ब्रुवे स्वस्त्य१ग्निं समिधानमीमहे ॥७॥ पि-
पर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या३अमन्महि।
विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्य१ग्निं समिधानमीमहे
॥८॥ अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साध
ईमहे। आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्य१ग्निं समि-

धानमीमहे ॥ ९ ॥ आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतॄन्। इंद्रं मित्रं वरुणं सातये भगं स्वस्त्य१ग्निं समिधानमीमहे ॥ १० ॥ ७ ॥ त आदित्या आ गता सर्वतातये वृधे नो यज्ञमवता सजोषसः। बृहस्पतिं पूषणमश्विना भगं स्वस्त्य१ग्निं समिधानमीमहे ॥ ११ ॥ तन्नो देवा यच्छत सुप्रवाचनं छर्दिरादित्याः सुभरं नृपाय्यं। पश्वे तोकाय तनयाय जीवसे स्वस्त्य१ग्निं समिधानमीमहे ॥ १२ ॥ विश्वे अद्य मरुतो विश्व ऊती विश्वे भवंत्वग्नयः समिद्धाः। विश्वे नो देवा अवसा गमंतु विश्वमस्तु द्रविणं वाजो अस्मे ॥ १३ ॥ यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः। यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ॥ १४ ॥ ८ ॥

॥ ३६ ॥ १–१४ लुशो धानाकः ॥ विश्वे देवाः ॥ १–१२ जगती। १३. १४ त्रिष्टुप् ॥

॥ ३६ ॥ उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा। इंद्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः ॥ १ ॥ द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः। मा दुर्विदत्रा निरृतिर्न ईशत तद्देवानामवो अद्या वृणीमहे ॥ २ ॥ विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः। स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ॥ ३ ॥ ग्रावा वदन्नप रक्षांसि सेधतु दुःष्वप्न्यं निरृतिं विश्वमत्रिणं। आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ॥ ४ ॥ एंद्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिरृक्वो अर्चतु। सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ॥ ५ ॥ ९ ॥ दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं

सुम्नमिष्टये । प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या
वृणीमहे ॥ ६ ॥ उप ह्वये सुहवं मारुतं गणं पावकमृष्वं स-
ख्याय शंभुवं । रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो
अद्या वृणीमहे ॥७॥ अपां पेरुं जीवधन्यं भरामहे देवाव्यं सु-
हवमध्वरश्रियं । सुरश्मिं सोममिंद्रियं यमीमहि तद्देवानाम-
वो अद्या वृणीमहे ॥ ८ ॥ सनेम तत्सुसनिता सनित्वभिर्वयं
जीवा जीवपुत्रा अनागसः । ब्रह्मद्विषो विष्वगेनो भरेरत
तद्देवानामवो अद्या वृणीमहे ॥ ९ ॥ ये स्था मनोर्यज्ञियास्ते
शृणोतन यद्वो देवा ईमहे तद्ददातन । जैत्रं क्रतुं रयिमद्वी-
रवद्यशस्तद्देवानामवो अद्या वृणीमहे ॥ १० ॥ १० ॥ महदद्य
महतामा वृणीमहेऽवो देवानां बृहतामनर्वणां । यथा वसु
वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे ॥११॥ महो
अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये । श्रेष्ठे
स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥१२॥
ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः । ते
सौभगं वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे ॥ १३ ॥
सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरा-
त्तात् । सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घ-
मायुः ॥ १४ ॥ ११ ॥

॥ ३७ ॥ १–१२ अभितपाः सौर्यः ॥ सूर्यः ॥ १–९. ११. १२ जगती । १० त्रिष्टुप् ॥

॥३७॥ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं
सपर्यत । दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत
॥१॥ सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र त-
तनन्नहानि च । विश्वमन्यन्नि विशते यदेजति विश्वाहापो

विश्वाहोदेति सूर्यः ॥२॥ न ते अदेवः प्रदिवो नि वासते यदे-
तशेभिः पतरै रथर्यसि । प्राचीनमन्यदनु वर्तते रज उदन्येन
ज्योतिषा यासि सूर्य ॥३॥ येन सूर्य ज्योतिषा बाधसे तमो
जगच्च विश्वमुदियर्षि भानुना । तेनास्मद्विश्वामनिरामनाहु-
तिमपामीवामप दुःष्वप्न्यं सुव ॥४॥ विश्वस्य हि प्रेषितो
रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु । यदद्य त्वा सूर्यो-
पब्रवामहै तं नो देवा अनु मंसीरत क्रतुं ॥५॥ तं नो द्यावा-
पृथिवी तन्न आप इंद्रः शृण्वंतु मरुतो हवं वचः । मा शूने
भूम सूर्यस्य संदृशि भद्रं जीवंतो जरणामशीमहि ॥६॥१२॥
विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावंतो अनमीवा अना-
गसः । उद्यंतं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम
सूर्य ॥७॥ महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वंतं चक्षुषे-
चक्षुषे मयः । आरोहंतं बृहतः पाजसस्परि वयं जीवाः प्रति
पश्येम सूर्य ॥८॥ यस्य ते विश्वा भुवनानि केतुना प्र चेरते
नि च विशंते अक्तुभिः । अनागास्त्वेन हरिकेश सूर्याह्नाह्ना
नो वस्यसावस्यसोदिहि ॥९॥ शं नो भव चक्षसा शं नो अ-
ह्ना शं भानुना शं हिमा शं घृणेन । यथा शमध्वञ्छमसद्दुरोणे
तत्सूर्य द्रविणं धेहि चित्रं ॥१०॥ अस्माकं देवा उभयाय ज-
न्मने शर्म यच्छत द्विपदे चतुष्पदे । अदत्पिबदूर्जयमानमा-
शितं तदस्मे शं योररपो दधातन ॥११॥ यद्वो देवाश्चकृम
जिह्वया गुरु मनसो वा प्रयुती देवहेळनं । अरावा यो नो
अभि दुच्छुनायते तस्मिन्तदेनो वसवो नि धेतन ॥१२॥१३॥

॥ ३८ ॥ १-५ इंद्रो मुष्कवान् ॥ इंद्रः ॥ जगती ॥

॥३८॥ अस्मिन्न इंद्र पृत्सुतौ यशस्वति शिमीवति क्रंदसि

प्रावं सातये। यत्र गोषाता धृषितेषु खादिषु विष्वक्पतंति
दिद्यवो नृषाह्ये ॥१॥ स नः क्षुमंतं सदने व्यूर्णुहि गोअर्णसं
रयिमिंद्र श्रवाय्यं। स्याम ते जयतः शक्र मेदिनो यथा वय-
मुश्मसि तद्वसो कृधि ॥२॥ यो नो दास आर्यो वा पुरुष्टुता-
देव इंद्र युधये चिकेतति। अस्माभिष्टे सुषहाः संतु शत्रवस्त्वया
वयं तान्वनुयाम संगमे ॥३॥ यो दभ्रेभिर्हव्यो यश्च भूरिभिर्यो
अभीके वरिवोविन्नृषाह्ये। तं विखादे सस्निमद्य श्रुतं नरम-
र्वाचमिंद्रमवसे करामहे ॥४॥ स्ववृजं हि त्वामहमिंद्र शुश्र-
वानानुदं वृषभ रध्रचोदनं। प्र मुंचस्व परि कुत्सादिहा गहि
किमु त्वावान्मुष्कयोर्बद्ध आसते ॥५॥१४॥

॥३९॥ १-१४ घोषा काक्षीवती ॥ अश्विनौ ॥ १-१३ जगती। १४ त्रिष्टुप् ॥

॥३९॥ यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो
हविष्मता। शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं
हवामहे ॥१॥ चोदयतं सूनृताः पिन्वतं धिय उत्पुरंधीरीरयतं
तदुश्मसि। यशसं भागं कृणुतं नो अश्विना सोमं न चारुं
मघवत्सु नस्कृतं ॥२॥ अमाजुरश्चिद्भवथो युवं भगोऽनाशो-
श्चिदवितारापमस्य चित्। अंधस्य चिन्नासत्या कृशस्य चि-
द्युवामिदाहुर्भिषजा रुतस्य चित् ॥३॥ युवं च्यवानं सनयं
यथा रथं पुनर्युवानं चरथाय तक्षथुः। निष्टौग्र्यमूहथुरद्भ्य-
स्परि विश्वेत्ता वां सवनेषु प्रवाच्या ॥४॥ पुराणा वां
वीर्या३ प्र ब्रवा जनेऽथो हासथुर्भिषजा मयोभुवा। ता
वां नु नव्यावसे करामहेऽयं नासत्या श्रदरिर्यथा दधत्
॥५॥१५॥ इयं वामह्वे शृणुतं मे अश्विना पुत्रायेव पितरा
मह्यं शिक्षतं। अनापिरज्ञा असजात्यामतिः पुरा तस्या अ-

भिशस्तेरवं स्पृतं ॥६॥ युवं रथेन विमदाय शुंध्युवं न्यूहथुः
पुरुमित्रस्य योषणां। युवं हवं वध्रिमत्या अगच्छतं युवं सुषु-
तिं चक्रथुः पुरंधये ॥७॥ युवं विप्रस्य जरणामुपेयुषः पुनः
कलेरकृणुतं युवद्वयः। युवं वंदनमृश्यदादुदूपथुर्युवं सद्यो वि-
श्पलामेतवे कृथः ॥८॥ युवं ह रेभं वृषणा गुहा हितमुदैरयतं
ममृवांसमश्विना। युवमृबीसमुत तप्तमत्रय ओमन्वंतं चक्रथुः
सप्तवध्रये ॥९॥ युवं श्वेतं पेदवेऽश्विनाश्वं नवभिर्वाजैर्नवती च
वाजिनं। चर्कृत्यं ददथुर्द्रावयत्सखं भगं न नृभ्यो हव्यं मयोभुवं
॥१०॥१६॥ न तं राजानावदिते कुतश्चन नांहो अश्नोति दु-
रितं नकिर्भयं। यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः
पत्न्या सह ॥११॥ आ तेन यातं मनसो जवीयसा रथं यं
वामृभवश्चक्रुरश्विना। यस्य योगे दुहिता जायते दिव उभे
अहनी सुदिने विवस्वतः ॥१२॥ ता वर्तिर्यातं जयुषा वि
पर्वतमपिन्वतं शयवे धेनुमश्विना। वृकस्य चिद्वर्तिकामंत-
रास्याद्युवं शचीभिर्ग्रसिताममुंचतं ॥१३॥ एतं वां स्तोमम-
श्विनावकर्मातक्षाम भृगवो न रथं। न्यमृक्षाम योषणां न
मर्ये नित्यं न सूनुं तनयं दधानाः ॥१४॥१७॥

॥ ४० ॥ १-१४ घोषा काक्षीवती ॥ अश्विनौ ॥ जगती ॥

॥४०॥ रथं यांतं कुह को ह वां नरा प्रति द्युमंतं सुविताय
भूषति। प्रातर्यावाणं विभ्वं विशेविशे वस्तोर्वस्तोर्वहमानं
धिया शमि ॥१॥ कुह स्विद्दोषा कुह वस्तोरश्विना कुहा-
भिपित्वं करतः कुहोषतुः। को वां शयुत्रा विधवेव देवरं मर्यं
न योषा कृणुते सधस्थ आ ॥२॥ प्रातर्जरेथे जरणेव कापया
वस्तोर्वस्तोर्यजता गच्छथो गृहं। कस्य ध्वस्रा भवथः कस्य वा

नरा राजपुत्रेव सवनाव गच्छथः ॥३॥ युवां मृगेव वारणा
मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे । युवं होत्रामृ-
तुथा जुह्वते नरेषं जनाय वहथः शुभस्पती ॥४॥ युवां ह घोषा
पर्यश्विना यती राज्ञ ऊचे दुहिता पृच्छे वां नरा । भूतं मे
अह्न उत भूतमक्तवेऽश्वावते रथिने शक्तमर्वते ॥५॥१८॥ युवं
कवी ष्ठः पर्यश्विना रथं विशो न कुत्सो जरितुर्नशायथः । यु-
वोर्ह मक्षा पर्यश्विना मध्वासा भरत निष्कृतं न योषणा ॥६॥
युवं ह भुज्युं युवमश्विना वशं युवं शिंजारमुशनामुपारथुः ।
युवो ररावा परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥७॥
युवं ह कृशं युवमश्विना शयुं युवं विधंतं विधवामुरुष्यथः। युवं
सनिभ्यः स्तनयंतमश्विनाप व्रजमूर्णुथः सप्तास्यं ॥८॥ जनिष्ट
योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु । आस्मै
रीयंते निवनेव सिंधवोऽस्मा अह्ने भवति तत्पतित्वनं ॥९॥
जीवं रुदंति वि मयंते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे
॥१०॥१९॥ न तस्य विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः
क्षेति योनिषु । प्रियोस्रियस्य वृषभस्य रेतिनो गृहं गमेमा-
श्विना तदुश्मसि ॥११॥ आ वामगन्त्सुमतिर्वाजिनीवसू न्य-
श्विना हृत्सु कामा अयंसत । अभूतं गोपा मिथुना शुभस्पती
प्रिया अर्यम्णो दुर्यां अशीमहि ॥१२॥ ता मंदसाना मनुषो
दुरोण आ धत्तं रयिं सहवीरं वचस्यवे । कृतं तीर्थं सुप्रपाणं
शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतं ॥१३॥ क्व स्विदद्य क-
तमास्वश्विना विक्षु दस्रा मादयेते शुभस्पती । क ईं नि येमे
कतमस्य जग्मतुर्विप्रस्य वा यजमानस्य वा गृहं ॥१४॥२०॥

॥ ४१ ॥ १-३ सुहस्त्यो घौषेयः ॥ अश्विनौ ॥ जगती ॥

॥४१॥ समानमु त्यं पुरुहूतमुक्थ्यं१रथं त्रिचक्रं सवना गनि-
ग्मतं। परिज्मानं विदथ्यं सुवृक्तिभिर्वयं व्युष्टा उषसो हवामहे
॥१॥ प्रातर्युजं नासत्याधि तिष्ठथः प्रातर्यावाणं मधुवाहनं रथं।
विशो येन गच्छथो यज्वरीर्नरा कीरेश्चिद्यज्ञं होतृमंतमश्विना
॥२॥ अध्वर्युं वा मधुपाणिं सुहस्त्यमग्निधं वा धृतदक्षं दमूनसं।
विप्रस्य वा यत्सवनानि गच्छथोऽत आ यातं मधुपेयमश्विना
॥ ३ ॥ २१ ॥

॥ ४२ ॥ १-११ कृष्णः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ४२ ॥ अस्तेव सु प्रतरं लायमस्यन्भूषन्निव प्र भरा स्तो-
ममस्मै। वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम
इंद्रं ॥१॥ दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जार-
मिंद्रं। कोशं न पूर्णं वसुना न्यृष्टमा च्यावय मघदेयाय शूरं
॥ २ ॥ किमंग त्वा मघवन्भोजमाहुः शिशीहि मा शिशयं त्वा
शृणोमि। अप्नस्वती मम धीरस्तु शक्र वसुविदं भगमिंद्रा भरा
नः ॥३॥ त्वां जना ममसत्येष्विंद्र संतस्थाना वि ह्वयंते समीके।
अत्रा युजं कृणुते यो हविष्मान्नासुन्वता सख्यं वष्टि शूरः ॥४॥
धनं न स्यंद्रं बहुलं यो अस्मै तीव्रान्त्सोमाँ आसुनोति प्रय-
स्वान्। तस्मै शत्रून्त्सुतुकान्प्रातरह्नो नि स्वष्ट्रान्युवति हंति वृत्रं
॥५॥२२॥ यस्मिन्वयं दधिमा शंसमिंद्रे यः शिश्राय मघवा का-
ममस्मे। आराच्चित्सन्भयतामस्य शत्रुर्न्यस्मै द्युम्ना जन्या नमं-
तां ॥ ६ ॥ आराच्छत्रुमप बाधस्व दूरमुग्रो यः शंबः पुरुहूत
तेन। अस्मे धेहि यवमद्गोमदिंद्र कृधी धियं जरित्रे वाज-
रत्नां ॥७॥ प्र यमंतर्वृषसवासो अग्मन्तीव्राः सोमा बहुलां-
तास इंद्रं। नाह दामानं मघवा नि यंसन्नि सुन्वते वहति

भूरि धामं ॥ ८ ॥ उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी विचिनोति काले । यो देवकामो न धनां रुणद्धि समित्तं राया सृजति स्वधावान् ॥९॥ गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वां । वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥१०॥ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः । इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११ ॥ २३ ॥ ३ ॥

॥ ४३ ॥ १–११ कृष्णः ॥ इंद्रः ॥ १–९ जगती । १०. ११ त्रिष्टुप् ॥

॥ ४३ ॥ अच्छा म इंद्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत । परि ष्वजंते जनयो यथा पतिं मर्यं न शुंध्युं मघवानमूतये ॥१॥ न घा त्वद्रिगप वेति मे मनस्त्वे इत्कामं पुरुहूत शिश्रय । राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्त्सु सोमेऽवपानमस्तु ते ॥२॥ विषूवृदिंद्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते । तस्येदिमे प्रवणे सप्त सिंधवो वयो वर्धंति वृषभस्य शुष्मिणः ॥३॥ वयो न वृक्षं सुपलाशमासदन्त्सोमास इंद्रं मंदिनश्चमूषदः । प्रैषामनीकं शवसा दविद्युतद्विदत्स्व१र्मनवे ज्योतिरार्यं ॥४॥ कृतं न श्वघ्नी वि चिनोति देवने संवर्गं यन्मघवा सूर्यं जयत् । न तत्ते अन्यो अनु वीर्यं शकन्न पुराणो मघवन्नोत नूतनः ॥५॥२४॥ विशंविशं मघवा पर्यशायत जनानां धेना अवचाकशद्वृषा । यस्याह शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः ॥६॥ आपो न सिंधुमभि यत्समक्षरन्त्सोमास इंद्रं कुल्या इव ह्रदं । वर्धंति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना ॥ ७ ॥ वृषा न क्रुद्धः पतयद्रजःस्वा यो अर्यपत्नीरकृणोदिमा अपः ।

स सुन्वते मघवा जीरदानवेऽविंदज्ज्योतिर्मनवे हविष्मते ॥ ८ ॥
उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराण-
वत् । वि रोचतामरुषो भानुना शुचिः स्व१र्ण शुक्रं शुशु-
चीत सत्पतिः ॥ ९ ॥ गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत
विश्वां । वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम
॥ १० ॥ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु
॥ ११ ॥ २५ ॥

॥ ४४ ॥ १–११ कृष्णः ॥ इंद्रः ॥ १–३. १०. ११ त्रिष्टुप् । ४–९ जगती ॥

॥ ४४ ॥ आ यात्विंद्रः स्वपतिर्मदाय यो धर्मणा तूतुजान-
स्तुविष्मान् । प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता
वृष्ण्येन ॥ १ ॥ सुष्ठामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृ-
पते गभस्तौ । शीभं राजन्सुपथा याह्यर्वाङ् वर्धाम ते पपुषो
वृष्ण्यानि ॥ २ ॥ एंद्रवाहो नृपतिं वज्रबाहुमुग्रमुग्रासस्तवि-
षास एनं । प्रत्वक्षसं वृषभं सत्यशुष्ममेमस्मत्रा सधमादो
वहंतु ॥ ३ ॥ एवा पतिं द्रोणसाचं सचेतसमूर्जः स्कंभं धरुण
आ वृषायसे । ओजः कृष्व सं गृभाय त्वे अप्यसो यथा के-
निपानामिनो वृधे ॥ ४ ॥ गमन्नस्मे वसून्या हि शंसिषं स्वा-
शिषं भरमा याहि सोमिनः । त्वमीशिषे सास्मिन्ना सत्सि
बर्हिष्यनाधृष्या तव पात्राणि धर्मणा ॥ ५ ॥ २६ ॥ पृथक्
प्रायन्प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा । न ये
शेकुर्यज्ञियां नावमारुहमीर्मैव ते न्यविशंत केपयः ॥ ६ ॥
एवैवापागपरे संतु दूढ्योऽश्वा येषां दुर्युज आयुयुज्रे । इत्था
ये प्रागुपरे संति दावने पुरूणि यत्र वयुनानि भोजना

॥७॥ गिरीँरज्रान्रेजमानाँ अधारयद्द्यौः क्रंददंतरिक्षाणि को-
पयत् । समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वा मद
उक्थानि शंसति ॥ ८ ॥ इमं बिभर्मि सुकृतं ते अंकुशं येना-
रुजासि मघवञ्छफारुजः । अस्मिन्सु ते सवने अस्त्वोक्यं
सुत इष्टौ मघवन्बोध्याभगः ॥ ९ ॥ गोभिष्टरेमामतिं दुरेवां
यवेन क्षुधं पुरुहूत विश्वां । वयं राजभिः प्रथमा धनान्यस्माकेन
वृजनेना जयेम ॥ १० ॥ बृहस्पतिर्नः परि पातु पश्चादुतोत्त-
रस्मादधरादघायोः । इंद्रः पुरस्तादुत मध्यतो नः सखा सखि-
भ्यो वरिवः कृणोतु ॥ ११ ॥ २७ ॥

॥ ४५ ॥ १-१२ वत्सप्रिः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥४५॥ दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जात-
वेदाः । तृतीयमप्सु नृमणा अजस्रमिंधान एनं जरते स्वाधीः
॥ १ ॥ विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता
पुरुत्रा । विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आ-
जगंथ ॥ २ ॥ समुद्रे त्वा नृमणा अप्स्वं१तर्नृचक्षा ईधे दिवो
अग्न ऊधन् । तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महि-
षा अवर्धन् ॥ ३ ॥ अक्रंददग्निः स्तनयन्निव द्यौः क्षामा रेरि-
हद्वीरुधः समंजन् । सद्यो जज्ञानो वि हीमिद्धो अख्यदा रो-
दसी भानुना भात्यंतः ॥ ४ ॥ श्रीणामुदारो धरुणो रयीणां
मनीषाणां प्रार्पणः सोमगोपाः । वसुः सूनुः सहसो अप्सु राजा
वि भात्यग्र उषसामिधानः ॥ ५ ॥ विश्वस्य केतुर्भुवनस्य गर्भ
आ रोदसी अपृणाज्जायमानः । वीळुं चिदद्रिमभिनत्पराय-
ञ्जना यदग्निमयजंत पंच ॥ ६ ॥ २८ ॥ उशिक्पावको अरतिः
सुमेधा मर्तेष्वग्निरमृतो नि धायि । इयर्ति धूममरुषं भरि-

अदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥ ७ ॥ दृशानो रुक्म उर्विया
व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतो अभवद्वयोभि-
र्यदेनं द्यौर्जनयत्सुरेताः ॥ ८ ॥ यस्ते अद्य कृणवद्भद्रशोचेऽपूपं
देव घृतवन्तमग्ने । प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देव-
भक्तं यविष्ठ ॥ ९ ॥ आ तं भज सौश्रवसेष्वग्न उक्थउक्थ आ
भज शस्यमाने । प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भि-
नददुज्जनित्वैः ॥ १० ॥ त्वामग्ने यजमाना अनु द्यून्विश्वा वसु
दधिरे वार्याणि । त्वया सह द्रविणमिच्छमाना व्रजं गोमन्त-
मुशिजो वि वव्रुः ॥ ११ ॥ अस्ताव्यग्निर्नरां सुशेवो वैश्वानर
ऋषिभिः सोमगोपाः । अद्वेषे द्यावापृथिवी हुवेम देवा धत्त
रयिमस्मे सुवीरं ॥ १२ ॥ २९ ॥ ८ ॥ ७ ॥

॥ ४६ ॥ १–१० वत्सप्रिः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥४६॥ प्र होता जातो महान्नभोविन्नृषद्मा सीदद्पामुपस्थे। दधिर्यो धायि स ते वयांसि यंता वसूनि विधते तनूपाः ॥१॥ इमं विधंतो अपां सधस्थे पशुं न नष्टं पदैरनु ग्मन्। गुहा चतंतमुशिजो नमोभिरिच्छंतो धीरा भृगवोऽविंदन् ॥२॥ इमं त्रितो भूर्यविंदद्दिच्छन्वैभूवसो मूर्धन्यघ्न्यायाः। स शेवृधो जात आ हर्म्येषु नाभिर्युवा भवति रोचनस्य ॥३॥ मंद्रं होतारमुशिजो नमोभिः प्रांचं यज्ञं नेतारमध्वराणां। विशामकृण्वन्नरतिं पावकं हव्यवाहं दधतो मानुषेषु ॥४॥ प्र भूर्जयंतं महां विपोधां मूरा अमूरं पुरां दर्माणं। नयंतो गर्भं वनां धियं धुर्हिरिश्मश्रुं नार्वाणं धनर्चं ॥५॥१॥ नि पस्त्यासु त्रितः स्तभूयन्परिवीतो योनौ सीददंतः। अतः संगृभ्या विशां दमूना विधर्मणायंत्रैरीयते नॄन् ॥६॥ अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः। श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥७॥ प्र जिह्वया भरते वेपो अग्निः प्र वयुनानि चेतसा पृथिव्याः। तमायवः शुचयंतं पावकं मंद्रं होतारं दधिरे यजिष्ठं ॥८॥ द्यावा यमग्निं पृथिवी जनिष्टामापस्त्वष्टा भृगवो यं सहोभिः। ईळेन्यं प्रथमं मातरिश्वा देवास्ततक्षुर्मनवे यजत्रं ॥९॥ यं त्वा देवा दधिरे हव्यवाहं पुरुस्पृहो मानुषासो यजत्रं। स यामन्नग्ने स्तुवते वयो धाः प्र देवयन्यशसः सं हि पूर्वीः ॥१०॥२॥

॥ ४७ ॥ १–८ सप्तगुः ॥ इंद्रो वैकुंठः ॥ त्रिष्टुप् ॥

॥४७॥ जगृभ्मा ते दक्षिणमिंद्र हस्तं वसूयवो वसुपते वसूनां। विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं

दाः ॥१॥ स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणां।
चर्कृत्यं शंस्यं भूरिवारमस्मभ्यं चित्रं वृषणं रयिं दाः॥२॥ सुब्रह्माणं
देववंतं बृहंतमुरुं गभीरं पृथुबुध्नमिंद्र। श्रुतऋषिमुग्रमभिमा-
तिषाहमस्मभ्यं चित्रं वृषणं रयिं दाः॥३॥ सनद्वाजं विप्रवीरं त-
रुत्रं धनस्पृतं शूशुवांसं सुदक्षं। दस्युहनं पूर्भिदमिंद्र सत्यमस्मभ्यं
चित्रं वृषणं रयिं दाः ॥४॥ अश्वावंतं रथिनं वीरवंतं सहस्रिणं
शतिनं वाजमिंद्र। भद्रव्रातं विप्रवीरं स्वर्षामस्मभ्यं चित्रं वृषणं
रयिं दाः ॥५॥३॥ प्र सप्तगुमृतधीतिं सुमेधां बृहस्पतिं मतिरच्छा
जिगाति। य आंगिरसो नमसोपसद्योऽस्मभ्यं चित्रं वृषणं रयिं
दाः॥६॥ वनीवानो मम दूतास इंद्रं स्तोमाश्चरंति सुमतीरियाना-
नाः। हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः
॥७॥ यत्त्वा यामि दद्धि तन्न इंद्र बृहंतं क्षयमसमं जनानां। अभि
तद्द्यावापृथिवी गृणीतामस्मभ्यं चित्रं वृषणं रयिं दाः॥८॥४॥

॥ ४८ ॥ १–११ इंद्रो वैकुंठः ॥ इंद्रो वैकुंठः ॥ १–६. ८. ९ जगती। ७. १०. ११ त्रिष्टुप् ॥

॥४८॥ अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि
शश्वतः। मां हवंते पितरं न जंतवोऽहं दाशुषे वि भजामि भो-
जनं॥१॥ अहमिंद्रो रोधो वक्षो अथर्वणस्त्रिताय गा अजनय-
महेरधि। अहं दस्युभ्यः परि नृम्णमा ददे गोत्रा शिक्षन् दधीचे
मातरिश्वने॥२॥ मह्यं त्वष्टा वज्रमतक्षदायसं मयि देवासोऽवृ-
जन्नपि क्रतुं। ममानीकं सूर्यस्येव दुष्टरं मामार्यंति कृतेन
कर्त्वेन च॥३॥ अहमेतं गव्ययमश्व्यं पशुं पुरीषिणं सायके-
ना हिरण्ययं। पुरू सहस्रा नि शिशामि दाशुषे यन्मा सोमास
उक्थिनो अमंदिषुः॥४॥ अहमिंद्रो न परा जिग्य इद्धनं न

मृत्यवेऽव तस्थे कदा चन। सोममिन्मा सुन्वंतो याचता वसु न मे
पूरवः सख्ये रिषाथन ॥५॥५॥ अहमेताञ्छाश्वसतो द्वाद्वेंद्रं ये वज्रं
युधयेऽकृण्वत। आह्वयमानाँ अव हन्मनाहनं दृळ्हा वदन्ननं-
मस्युर्नमस्विनः ॥६॥ अभी३दमेकमेको अस्मि निष्षाळभी द्वा
किमु त्रयः करंति। खले न पर्षान्प्रति हन्मि भूरि किं मा निंदंति
शत्रवोऽनिंद्राः ॥७॥ अहं गुंगुभ्यो अतिथिग्वमिष्करमिषं न
वृत्रतुरं विक्षु धारयं। यत्पर्णयघ्न उत वा करंजहे प्राहं महे वृत्रहत्ये
अशुश्रवि ॥८॥ प्र मे नमी साप्य इषे भुजे भूद्गवामेषे सख्या कृणुत
द्विता। दिद्युं यदस्य समिथेषु मंहयमादिदेनं शंस्यमुक्थ्यं करं ॥९॥
प्र नेमस्मिन्ददृशे सोमो अंतर्गोपा नेममाविरस्था कृणोति। स
तिग्मशृंगं वृषभं युयुत्सन्द्रुहस्तस्थौ बहुले बद्धो अंतः ॥१०॥
आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम।
ते मा भद्राय शवसे ततक्षुरपराजितमस्तृतमषाळ्हं ॥११॥६॥

॥४९॥ १–११ इंद्रो वैकुंठः ॥ इंद्रो वैकुंठः ॥ १. ३–१० जगती। २. ११ त्रिष्टुप् ॥

॥४९॥ अहं दां गृणते पूर्व्यं वस्वहं ब्रह्म कृणवं मह्यं वर्धनं।
अहं भुवं यजमानस्य चोदितायज्वनः साक्षि विश्वस्मिन्भरे
॥१॥ मां धुरिंद्रं नाम देवता दिवश्च ग्मश्चापां च जंतवः। अहं
हरी वृषणा विव्रता रघू अहं वज्रं शवसे धृष्ण्वा ददे ॥२॥
अहमत्कं कवये शिश्नथं हथैरहं कुत्समावमाभिरूतिभिः। अहं
शुष्णस्य श्नथिता वधर्यमं न यो रर आर्यं नाम दस्यवे ॥३॥
अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रंधयं।
अहं भुवं यजमानस्य राजनि प्र यद्भरे तुजये न प्रियाधृषे
॥४॥ अहं रंधयं मृगयं श्रुतर्वणे यन्माजिहीत वयुना चना-

नुषक् । अहं वेशं नम्रमायवेऽकरमहं सव्याय पड्गृभिमरंधयं
॥५॥७॥ अहं स यो नववास्त्वं बृहद्रथं सं वृत्रेव दासं वृत्रहारुजं।
यद्वर्धयंतं प्रथयंतमानुषग्दूरे पारे रजसो रोचनाकरं ॥६॥ अहं
सूर्यस्य परि याम्याशुभिः प्रैतशेभिर्वहमान ओजसा। यन्मा सा-
वो मनुष आह निर्णिज ऋधक्कृषे दासं कृत्व्यं हथैः ॥७॥ अहं
सप्तहा नहुषो नहुष्टरः प्राश्रावयं शवसा तुर्वशं यदुं। अहं न्य१न्यं
सहसा सहस्करं नव व्राधतो नवतिं च वक्षयं॥८॥ अहं सप्त स-
वतो धारयं वृषा द्रवित्न्वः पृथिव्यां सीरा अधि। अहमर्णांसि वि
तिरामि सुक्रतुर्युधा विदं मनवे गातुमिष्टये ॥९॥ अहं तदासु
धारयं यदासु न देवश्चन त्वष्टाधारयद्रुशत्। स्पार्हं गवामूधःसु व-
क्षणास्वा मधोर्मधु श्वात्र्यं सोममाशिरं ॥१०॥ एवा देवाँ इंद्रो
विव्ये नॄन् प्र च्यौत्नेन मघवा सत्यराधाः। विश्वेत्ता ते हरिवः
शचीवोऽभि तुरासः स्वयशो गृणंति ॥११॥८॥

॥५०॥ १-७ इंद्रो वैकुंठः ॥ इंद्रो वैकुंठः ॥ १. २. ६. ७ जगती । ३. ४ अभिसारिणी । ५ त्रिष्टुप् ॥

॥५०॥ प्र वो महे मंदमानायांधसोऽर्चा विश्वानराय वि-
श्वाभुवे। इंद्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी
सपर्यतः ॥१॥ सो चिन्नु सख्या नर्य इनः स्तुतश्चर्कृत्य इंद्रो
मावते नरे। विश्वासु धूर्षु वाजकृत्येषु सत्पते वृत्रे वाप्स्व१भि
शूर मंदसे ॥२॥ के ते नर इंद्र ये त इषे ये ते सुम्नं सध-
न्य१मियक्षान्। के ते वाजायासुर्याय हिन्विरे के अप्सु स्वासूर्व-
रासु पौंस्ये ॥३॥ भुवस्त्वमिंद्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु
यज्ञियः। भुवो नॄँश्च्यौत्नो विश्वस्मिन्भरे ज्येष्ठश्च मंत्रो विश्व-
चर्षणे ॥४॥ अवा नु कं ज्यायान् यज्ञवनसो महीं त ओमात्रां

कृष्टयो विदुः। असो नु कमजरो वर्धाश्च विश्वेदेता सवना तूतुमा
कृषे॥५॥ एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसो या-
नि दधिषे। वराय ते पात्रं धर्मणे तना यज्ञो मंत्रो ब्रह्मोद्यतं वचः
॥६॥ ये ते विप्र ब्रह्मकृतः सुते सचा वसूनां च वसुनश्च दावने। प्र
ते सुम्नस्य मनसा पथा भुवन्मदे सुतस्य सोम्यस्यांधसः॥७॥९॥

॥५१॥ १.३.५.७.९ देवाः। २.४.६.८ अग्निः सौचीकः॥ १.३.५.७.९ अग्निः सौचीकः। २.४.६.८ देवाः॥ त्रिष्टुप्॥

॥५१॥ महत्तदुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवे-
शिथापः। विश्वा अपश्यद्बहुधा ते अग्ने जातवेदस्तन्वो देव
एकः॥१॥ को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा
पर्यपश्यत्। क्वाह मित्रावरुणा क्षियंत्यग्नेर्विश्वाः समिधो देव-
यानीः॥२॥ ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वो-
षधीषु। तं त्वा यमो अचिकेच्चित्रभानो दशांतरुष्यादतिरो-
चमानं॥३॥ होत्रादहं वरुण बिभ्यदायं नेदेव मा युन-
जन्नत्र देवाः। तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चि-
केताहमग्निः॥४॥ एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि
क्षेष्यग्ने। सुगान्पथः कृणुहि देवयानान्वह हव्यानि सुमन-
स्यमानः॥५॥१०॥ अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वान-
मन्वावरीवुः। तस्माद्भिया वरुण दूरमायं गौरो न क्षेप्नोरविजे
ज्यायाः॥६॥ कुर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न
रिष्याः। अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सु-
जात॥७॥ प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वंतं हविषो
दत्त भागं। घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु

देवाः ॥८॥ तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वंतो हविषः संतु भागाः। तवाग्ने यज्ञो३ऽयमस्तु सर्वस्तुभ्यं नमंतां प्रदिशश्चतस्रः ॥९॥११॥

॥ ५२ ॥ १–६ अग्निः सौचीकः ॥ देवाः ॥ त्रिष्टुप् ॥

॥५२॥ विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन्निषद्य। प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ॥१॥ अहं होता न्यसीदं यजीयान् विश्वे देवा मरुतो मा जुनंति। अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुतिर्वां ॥२॥ अयं यो होता किरु स यमस्य कमप्यूहे यत्समंजंति देवाः। अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहं ॥३॥ मां देवा दधिरे हव्यवाहमपम्लुक्तं बहु कृच्छ्रा चरंतं। अग्निर्विद्वान्यज्ञं नः कल्पयाति पंचयामं त्रिवृतं सप्ततंतुं ॥४॥ आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवः कराणि। आ बाह्वोर्वज्रमिंद्रस्य धेयामथेमा विश्वाः पृतना जयाति ॥५॥ त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन्। औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयंत ॥६॥१२॥

॥ ५३ ॥ १–३. ६–११ देवाः । ४. ५ अग्निः सौचीकः ॥ १–३. ६–११ अग्निः सौचीकः । ४. ५ देवाः ॥ १–५. ८ त्रिष्टुप् । ६. ७. ९–११ जगती ॥

॥५३॥ यमैच्छाम मनसा सो३ऽयमागाद्यज्ञस्य विद्वान्परुषश्चिकित्वान्। स नो यक्षद्देवताता यजीयान्नि हि षत्सदंतरः पूर्वो अस्मत् ॥१॥ अराधि होता निषदा यजीयानभि प्रयांसि सुधितानि हि ख्यत्। यजामहै यज्ञियान्हंत देवाँ ईळामहा ईड्याँ आज्येन ॥२॥ साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्यां। स आयुरागात्सुरभिर्वसानो

भद्रामकर्देवहूतिं नो अद्य ॥३॥ तदद्य वाचः प्रथमं मसीय येना-
सुराँ अभि देवा असाम । ऊर्जाद उत यज्ञियासः पंच जना मम
होत्रं जुषध्वं ॥४॥ पंच जना मम होत्रं जुषंतां गोजाता उत ये
यज्ञियासः । पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पा-
त्वस्मान् ॥५॥१३॥ तंतुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः
पथो रक्ष धिया कृतान् । अनुल्बणं वयत जोगुवामपो मनुर्भव
जनया दैव्यं जनं ॥६॥ अक्षानहो नह्यतनोत सोम्या इष्कृणुध्वं
रशना ओत पिंशत । अष्टावंधुरं वहताभितो रथं येन देवासो
अनयन्नभि प्रियं ॥७॥ अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र
तरता सखायः । अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरे-
माभि वाजान् ॥८॥ त्वष्टा माया वेदपसामपस्तमो बिभ्रत्पात्रा
देवपानानि शंतमा । शिशीते नूनं परशुं स्वायसं येन वृश्चा-
देतशो ब्रह्मणस्पतिः ॥९॥ सतो नूनं कवयः सं शिशीत वाशी-
भिर्याभिरमृताय तक्षथ । विद्वांसः पदा गुह्यानि कर्तन येन
देवासो अमृतत्वमानशुः ॥१०॥ गर्भे योषामदधुर्वत्समासन्य-
पीच्येन मनसोत जिह्वया । स विश्वाहा सुमना योग्या अभि
सिषासनिर्वनते कार इज्जितिं ॥११॥१४॥

॥५४॥ १—६ बृहदुक्थो वामदेव्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥५४॥ तां सु ते कीर्तिं मघवन्महित्वा यत्त्वा भीते रोद-
सी अह्वयेतां । प्रावो देवाँ आतिरो दासमोजः प्रजायै
त्वस्यै यदशिक्ष इंद्र ॥१॥ यदचरस्तन्वा वावृधानो बला-
नींद्र प्रब्रुवाणो जनेषु । मायेत्सा ते यानि युद्धान्याहुर्नाद्य
शत्रुं ननु पुरा विवित्से ॥२॥ क उ नु ते महिमनः समस्यास्म-

त्पूर्वे ऋषयोऽतमापुः। यन्मातरं च पितरं च साकमजनयथास्तन्वः१ः स्वायाः॥३॥ चत्वारि ते असुर्याणि नामादाभ्यानि महिषस्य संति। त्वमंग तानि विश्वानि वित्से येभिः कर्माणि मघवञ्चकर्थ॥४॥ त्वं विश्वा दधिषे केवलानि यान्याविर्या च गुहा वसूनि। काममिन्मे मघवन्मा वि तारीस्त्वमाज्ञाता त्वमिंद्रासि दाता॥५॥ यो अदधाज्ज्योतिषि ज्योतिरंतर्यो असृजन्मधुना सं मधूनि। अध प्रियं शूषमिंद्राय मन्म ब्रह्मकृतो बृहदुक्थादवाचि॥६॥१५॥

॥५५॥ १–८ बृहदुक्थो वामदेव्यः॥ इंद्रः॥ त्रिष्टुप्॥

॥५५॥ दूरे तन्नाम गुह्यं पराचैर्यत्त्वा भीते अह्वयेतां वयोधै। उदस्तभ्नाः पृथिवीं द्यामभीके भ्रातुः पुत्रान्मघवन्तित्विषाणः॥१॥ महत्तन्नाम गुह्यं पुरुस्पृग्येन भूतं जनयो येन भव्यं। प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशंत पंच॥२॥ आ रोदसी अपृणादोत मध्यं पंच देवाँ ऋतुशः सप्तसप्त। चतुस्त्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन॥३॥ यदुष औच्छः प्रथमा विभानामजनयो येन पुष्टस्य पुष्टं। यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकं॥४॥ विधुं दद्राणं समने बहूनां युवानं संतं पलितो जगार। देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान॥५॥१६॥ शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः। यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता॥६॥ ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री। ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायंत देवाः॥७॥ युजा कर्माणि जनयन्विश्वौजा

अशस्तिहा विश्वमनास्तुराषाट्। पीत्वी सोमस्य दिव आ वृ-
धानः शूरो निर्युधाधमद्दस्यून् ॥ ८ ॥ १७ ॥

॥ ५६ ॥ १–७ बृहदुक्थो वामदेव्यः ॥ विश्वे देवाः ॥ १–३. ७ त्रिष्टुप् । ४–६ जगती ॥

॥ ५६ ॥ इदं त एकं पर ऊं त एकं तृतीयेन ज्योतिषा सं विश-
स्व। संवेशने तन्व१श्चारुरेधि प्रियो देवानां परमे जनित्रे ॥ १ ॥
तनूष्टे वाजिन्तन्वं१ नयंती वाममस्मभ्यं धातु शर्म तुभ्यं। अह्रुतो
महो धरुणाय देवान्दिवीव ज्योतिः स्वमा मिमीयाः ॥ २ ॥ वा-
ज्यसि वाजिनेना सुवेनीः सुवितः स्तोमं सुवितो दिवं गाः। सु-
वितो धर्म प्रथमानु सत्या सुवितो देवान्त्सुवितोऽनु पत्म ॥ ३ ॥
महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुं। समविव्य-
चुरुत यान्यत्विषुरैषां तनूषु नि विविशुः पुनः ॥ ४ ॥ सहोभिर्विश्वं
परि चक्रमू रजः पूर्वा धामान्यमिता मिमानाः। तनूषु विश्वा
भुवना नि येमिरे प्रासारयंत पुरुध प्रजा अनु ॥ ५ ॥ द्विधा सून-
वोऽसुरं स्वर्विदमास्थापयंत तृतीयेन कर्मणा। स्वां प्रजां पि-
तरः पित्र्यं सह आवरेष्वदधुस्तंतुमाततं ॥ ६ ॥ नावा न क्षोदः
प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा। स्वां प्रजां बृह-
दुक्थो महित्वावरेष्वदधादा परेषु ॥ ७ ॥ १८ ॥

॥ ५७ ॥ १–६ बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्च गौपायनाः ॥ विश्वे देवाः ॥ गायत्री ॥

॥ ५७ ॥ मा प्र गाम पथो वयं मा यज्ञादिंद्र सोमिनः। मां-
तः स्थुर्नो अरातयः ॥ १ ॥ यो यज्ञस्य प्रसाधनस्तंतुर्देवेष्वा-
ततः। तमाहुतं नशीमहि ॥ २ ॥ मनो न्वा हुवामहे नाराशंसेन
सोमेन। पितॄणां च मन्मभिः ॥ ३ ॥ आ त एतु मनः पुनः क्रत्वे
दक्षाय जीवसे। ज्योक् च सूर्यं दृशे ॥ ४ ॥ पुनर्नः पितरो मनो द-

दातु दैव्यो जनः । जीवं व्रातं सचेमहि ॥५॥ वयं सोम व्रते तव
मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥६॥१९॥

॥ ५८ ॥ १–१२ बंध्वादयो गौपायनाः ॥ मनआवर्तनं ॥ अनुष्टुप् ॥

॥५८॥ यत्ते यमं वैवस्वतं मनो जगाम दूरकं । तत्त आ वर्तया-
मसीह क्षयाय जीवसे ॥१॥ यत्ते दिवं यत्पृथिवीं मनो जगाम
दूरकं । तत्त आ वर्तयामसीह क्षयाय जीवसे ॥२॥ यत्ते भूमिं चतुर्भृ-
ष्टिं मनो जगाम दूरकं । तत्त आ वर्तयामसीह क्षयाय जीवसे ॥३॥
यत्ते चतस्रः प्रदिशो मनो जगाम दूरकं । तत्त आ वर्तयामसीह
क्षयाय जीवसे ॥४॥ यत्ते समुद्रमर्णवं मनो जगाम दूरकं । तत्त आ
वर्तयामसीह क्षयाय जीवसे ॥५॥ यत्ते मरीचीः प्रवतो मनो
जगाम दूरकं । तत्त आ वर्तयामसीह क्षयाय जीवसे ॥६॥२०॥ यत्ते
अपो यदोषधीर्मनो जगाम दूरकं । तत्त आ वर्तयामसीह क्षयाय
जीवसे ॥७॥ यत्ते सूर्यं यदुषसं मनो जगाम दूरकं । तत्त आ वर्त-
यामसीह क्षयाय जीवसे ॥८॥ यत्ते पर्वतान्बृहतो मनो जगाम
दूरकं । तत्त आ वर्तयामसीह क्षयाय जीवसे ॥९॥ यत्ते विश्वमिदं
जगन्मनो जगाम दूरकं । तत्त आ वर्तयामसीह क्षयाय जीवसे
॥१०॥ यत्ते पराः परावतो मनो जगाम दूरकं । तत्त आ वर्तया-
मसीह क्षयाय जीवसे ॥११॥ यत्ते भूतं च भव्यं च मनो जगाम
दूरकं । तत्त आ वर्तयामसीह क्षयाय जीवसे ॥१२॥२१॥

॥ ५९ ॥ १–१० बंध्वादयो गौपायनाः ॥ १–३ निर्ऋतिः । ४ निर्ऋतिः सोमश्च । ५. ६ असुनीतिः । ७ लिंगोक्ता देवताः । ८. ९. १०[१] द्यावापृथिव्यौ । १०[२] द्यावापृथिव्याविंद्रश्च ॥ १–७ त्रिष्टुप् । ८ पंक्तिः । ९ महापंक्तिः । १० पंक्त्युत्तरा ॥

॥५९॥ प्र तार्यायुः प्रतरं नवीयः स्थातारेव क्रतुमता
रथस्य । अध च्यवान उत्तवीत्यर्थं परातरं सु निर्ऋ-

तिर्जिहीतां ॥१॥ सामन्नु राये निधिमन्न्वन्नं करामहे सु पुरुध श्रवांसि। ता नो विश्वानि जरिता ममत्तु परातरं सु निर्ऋतिर्जिहीतां ॥२॥ अभी ष्व१र्यः पौंस्यैर्भवेम द्यौर्न भूमिं गिरयो नाज्रान्। ता नो विश्वानि जरिता चिकेत परातरं सु निर्ऋतिर्जिहीतां ॥३॥ मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यमुच्चरंतं। द्युभिर्हितो जरिमा सू नो अस्तु परातरं सु निर्ऋतिर्जिहीतां ॥४॥ असुनीते मनो अस्मासु धारय जीवातवे सु प्र तिरा न आयुः। रारंधि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्धयस्व ॥५॥२२॥ असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगं। ज्योक् पश्येम सूर्यमुच्चरंतमनुमते मृळया नः स्वस्ति ॥६॥ पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरंतरिक्षं। पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः ॥७॥ शं रोदसी सुबंधवे यह्वी ऋतस्य मातरा। भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥८॥ अव द्वके अव त्रिका दिवश्चरंति भेषजा। क्षमा चरिष्ण्वेककं भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥९॥ समिंद्रेरय गामनड्वाहं य आवहदुशीनराण्या अनः। भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥१०॥२३॥

॥६०॥ १–५. ७–१२ बंध्वाद्यो गौपायनाः। ६ अगस्त्यस्य स्वसैषां माता॥ १–४. ६ असमाती राजा। ५ इंद्रः। ७–११ सुबंधोर्जीविताह्वानं। १२ हस्तः॥ १–५ गायत्री। ६. ७. १०–१२ अनुष्टुप्। ८. ९ पंक्तिः॥

॥६०॥ आ जनं त्वेषसंदृशं माहीनानामुपस्तुतं। अगन्म बिभ्रतो नमः ॥१॥ असमातिं नितोशनं त्वेषं निययिनं रथं। भजेरथस्य सत्पतिं ॥२॥ यो जनान्महिषाँ इवातितस्थौ पवीरवान्। उतापवीरवान्युधा ॥३॥ यस्येक्ष्वाकुरुप व्रते

रेवान्मराय्येधते। दिवीव पंच कृष्टयः ॥४॥ इंद्र क्षत्रासमातिषु र-
थप्रोष्ठेषु धारय। दिवीव सूर्यं दृशे ॥५॥ अगस्त्यस्य नद्भ्यः सप्ती यु-
नक्षि रोहिता। पणीन्न्यक्रमीरभि विश्वान्राजन्नराधसः ॥६॥२४॥
अयं मातायं पितायं जीवातुरागमत्। इदं तव प्रसर्पणं सुबंधवे-
हि निरिहि ॥७॥ यथा युगं वरत्रया नह्यंति धरुणाय कं। एवा दा-
धार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥८॥ यथेयं
पृथिवी मही दाधारेमान्वनस्पतीन्। एवा दाधार ते मनो जी-
वातवे न मृत्यवेऽथो अरिष्टतातये ॥९॥ यमादहं वैवस्वतात्सु-
बंधोर्मन आभरं। जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥१०॥
न्य१ग्वातोऽव वाति न्यक्तपति सूर्यः। नीचीनमघ्न्या दुहे न्यग्भ-
वतु ते रपः ॥११॥ अयं मे हस्तो भगवानयं मे भगवत्तरः। अयं
मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥१२॥२५॥४॥

॥६१॥ १–२७ नाभानेदिष्ठो मानवः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥६१॥ इदमित्था रौद्रं गूर्तवचा ब्रह्म क्रत्वा शच्यामंतराजौ।
क्राणा यदस्य पितरा मंहनेष्ठाः पर्षत्पक्थे अहन्ना सप्त होतॄन्
॥१॥ स इद्दानाय दभ्याय वन्वञ्च्यवानः सूदैरमिमीत वेदिं।
तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिंचत्
॥२॥ मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो
द्रवंता। आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं
गभस्तौ ॥३॥ कृष्णा यद्गोष्वरुणीषु सीदद्दिवो नपाताश्विना
हुवे वां। वीतं मे यज्ञमा गतं मे अन्नं ववन्वांसा नेषमस्मृ-
तध्रू ॥४॥ प्रथिष्ट यस्य वीरकर्ममिष्णदनुष्ठितं नु नर्यो
अपौहत्। पुनस्तदा वृहति यत्कनाया दुहितुरा अनु-

भृतमनर्वा ॥ ५ ॥ २६ ॥ मध्या यत्कर्त्वमभवदभीके कामं कृ-
ण्वाने पितरि युवत्यां । मनानग्रेतो जहतुर्वियंता सानौ नि-
षिक्तं सुकृतस्य योनौ ॥ ६ ॥ पिता यत्स्वां दुहितरमधि-
ष्कन्क्ष्मया रेतः संजग्मानो नि षिंचत् । स्वाध्योऽजनयन्ब्रह्म
देवा वास्तोष्पतिं व्रतपां निरतक्षन् ॥ ७ ॥ स ईं वृषा न फेन-
मस्यदाजौ स्मदा परैदप दभ्रचेताः । सरत्पदा न दक्षि-
णा परावृङ् न ता नु मे पृशन्यो जगृभ्रे ॥ ८ ॥ मक्षू न वह्निः
प्रजाया उपब्दिरग्निं न नग्न उप सीददूधः । सनितेध्मं
सनितोत वाजं स धर्ता जज्ञे सहसा यवीयुत् ॥ ९ ॥ मक्षू कना-
याः सख्यं नवग्वा ऋतं वदंत ऋतयुक्तिमग्मन् । द्विबर्हसो
य उप गोपमागुरदक्षिणासो अच्युता दुदुक्षन् ॥ १० ॥ २७ ॥
मक्षू कनायाः सख्यं नवीयो राधो न रेत ऋतमित्तुरण्यन् ।
शुचि यत्ते रेक्ण आयजंत सबर्दुघायाः पय उस्रियायाः ॥ ११ ॥
पश्वा यत्पश्चा वियुता बुधंतेति ब्रवीति वक्तरी रराणः । व-
सोर्वसुत्वा कारवोऽनेहा विश्वं विवेष्टि द्रविणमुप क्षु ॥ १२ ॥
तदिन्न्वस्य परिषद्वानो अग्मन्पुरू सदंतो नार्षदं बिभित्सन् ।
वि शुष्णस्य संग्रथितमनर्वा विदत्पुरुप्रजातस्य गुहा यत्
॥ १३ ॥ भर्गो ह नामोत यस्य देवाः स्व१र्ण ये त्रिषधस्थे निषेदुः ।
अग्निर्ह नामोत जातवेदाः श्रुधी नो होतर्ऋतस्य होता-
ध्रुक् ॥ १४ ॥ उत त्या मे रौद्रावर्चिमंता नासत्याविंद्र गूर्तये
यजध्यै । मनुष्वद्वृक्तबर्हिषे रराणा मंदू हितप्रयसा विक्षु यज्यू
॥ १५ ॥ २८ ॥ अयं स्तुतो राजा वंदि वेधा अपश्च विप्रस्तरति
स्वसेतुः । स कक्षीवंतं रेजयत्सो अग्निं नेमिं न चक्रमर्वतो
रघुद्रु ॥ १६ ॥ स द्विबंधुर्वैतरणो यष्टा सबर्धुं धेनुमस्वं दुह-

ध्यै। सं यन्मित्रावरुणा वृंज उक्थैर्ज्येष्ठेभिरर्यमणं वरूथैः ॥१७॥
तद्वंधुः सूरिर्दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन्। सा
नो नाभिः परमास्य वा घाहं तत्पश्चा कतिथश्चिदास॥१८॥ इयं
मे नाभिरिह मे सधस्थमिमे मे देवा अयमस्मि सर्वः। द्विजा अह
प्रथमजा ऋतस्येदं धेनुरदुहज्जायमाना॥१९॥ अधासु मंद्रो अ-
रतिर्विभावाव स्यति द्विवर्तनिर्वनेषाट्। ऊर्ध्वा यच्छ्रेणिर्न शि-
शुर्दन्मक्षू स्थिरं शेवृधं सूत माता॥२०॥२९॥ अधा गाव उपमातिं
कनाया अनु श्वांतस्य कस्य चित्परेयुः। श्रुधि त्वं सुद्रविणो नस्त्वं
याळाश्वघ्नस्य वावृधे सूनृताभिः॥२१॥ अध त्वमिंद्र विद्ध्य१स्मा-
न्महो राये नृपते वज्रबाहुः। रक्षा च नो मघोनः पाहि सूरीन-
नेहसस्ते हरिवो अभिष्टौ॥२२॥ अध यद्राजाना गविष्टौ सरत्स-
रण्युः कारवे जरण्युः। विप्रः प्रेष्ठः स ह्येषां बभूव परा च वक्षदुत
पर्षदेनान्॥२३॥ अधा न्वस्य जेन्यस्य पुष्टौ वृथा रेभंत ईमहे तदू
नु। सरण्युरस्य सूनुरश्वो विप्रश्चासि श्रवसश्च सातौ॥२४॥ यु-
वोर्यदि सख्यायास्मे शर्धाय स्तोमं जुजुषे नमस्वान्। विश्वत्र
यस्मिन्ना गिरः समीचीः पूर्वीव गातुर्दाशत्सूनृतायै॥२५॥ स
गृणानो अद्भिर्देववानिति सुबंधुर्नमसा सूक्तैः। वर्धदुक्थैर्वचो-
भिरा हि नूनं व्यध्वैति पयस उस्रियायाः॥२६॥ त ऊ षु णो महो
यजत्रा भूत देवास ऊतये सजोषाः। ये वाजाँ अनयता वियंतो
ये स्था निचेतारो अमूराः॥२७॥३०॥१॥

॥६२॥ १—११ नाभानेदिष्ठो मानवः ॥ १—६ विश्वे देवा अंगिरसो वा । ७ विश्वे देवाः । ८—११ सावर्णेर्दानस्तुतिः ॥ १—४ जगती । ५.८.९ अनुष्टुप् । ६ बृहती । ७ सतोबृहती । १० गायत्री । ११ त्रिष्टुप् ॥

॥६२॥ ये यज्ञेन दक्षिणया समक्ता इंद्रस्य सख्यममृतत्वमा-

नश। तेभ्यो भद्रमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेध-
सः ॥१॥ य उदाजन्पितरो गोमयं वस्वृतेनाभिंदन्परिवत्सरे व-
लं। दीर्घायुत्वमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेध-
सः ॥२॥ य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन्पृथिवीं मातरं वि।
सुप्रजास्त्वमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥३॥
अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन। सु-
ब्रह्मण्यमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥४॥
विरूपास इदृषयस्त इद्गंभीरवेपसः। ते अंगिरसः सूनवस्ते अग्नेः
परि जज्ञिरे ॥५॥१॥ ये अग्नेः परि जज्ञिरे विरूपासो दिवस्परि।
नवग्वो नु दशग्वो अंगिरस्तमः सचा देवेषु मंहते ॥६॥ इंद्रेण
युजा निः सृजंत वाघतो व्रजं गोमंतमश्विनं। सहस्रं मे ददतो
अष्टकर्ण्य१ः श्रवो देवेष्वक्रत ॥७॥ प्र नूनं जायतामयं मनुस्तो-
क्मेव रोहतु। यः सहस्रं शताश्वं सद्यो दानाय मंहते ॥८॥ न तम-
श्नोति कश्चन दिव इव सान्वारभं। सावर्ण्यस्य दक्षिणा वि
सिंधुरिव पप्रथे ॥९॥ उत दासा परिविषे स्मद्दिष्टी गोपरीण-
सा। यदुस्तुर्वश्च मामहे ॥१०॥ सहस्रदा ग्रामणीर्मा रिषन्मनुः
सूर्येणास्य यतमानैतु दक्षिणा। सावर्णेर्देवाः प्र तिरंत्वायुर्य-
स्मिन्नश्रांता असनाम वाजं ॥११॥२॥

॥६३॥ १–१७ गयः प्लातः ॥ १–१४. १७ विश्वे देवाः। १५. १६ पथ्या स्वस्तिः ॥ १–१४ जगती।
१५ जगती त्रिष्टुब्वा। १६. १७ त्रिष्टुप् ॥

॥६३॥ परावतो ये दिधिषंत आप्यं मनुप्रीतासो जनिमा
विवस्वतः। ययातेर्ये नहुष्यस्य बर्हिषि देवा आसते ते अधि ब्रु-
वंतु नः ॥१॥ विश्वा हि वो नमस्यानि वंद्या नामानि देवा उत
यज्ञियानि वः। ये स्थ जाता अदितेरद्भ्यस्परि ये पृथिव्यास्ते

मं इह श्रुता हवं ॥ २ ॥ येभ्यो माता मधुमत्पिन्वते पयः पीयूषं द्यौरदितिरद्रिबर्हाः । उक्थशुष्मान्वृषभरान्त्स्वप्नसस्ताँ आदित्याँ अनु मदा स्वस्तये ॥ ३ ॥ नृचक्षसो अनिमिषंतो अर्हणा बृहद्देवासो अमृतत्वमानशुः । ज्योतीरथा अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये ॥ ४ ॥ सम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृता दधिरे दिवि क्षयं । ताँ आ विवास नमसा सुवृक्तिभिर्महो आदित्याँ अदितिं स्वस्तये ॥ ५ ॥ ३ ॥ को वः स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यति ष्ठन । को वोऽध्वरं तुविजाता अरं करद्यो नः पर्षदत्यंहः स्वस्तये ॥ ६ ॥ येभ्यो होत्रां प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः । त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ॥ ७ ॥ य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मंतवः । ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये ॥ ८ ॥ भरेष्विंद्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनं । अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥ ९ ॥ सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिं । दैवीं नावं स्वरित्रामनागसमस्रवंतीमा रुहेमा स्वस्तये ॥ १० ॥ ४ ॥ विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः । सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ॥ ११ ॥ अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रामघायतः । आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये ॥ १२ ॥ अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि । यमादित्यासो नयथा सुनीतिभिरति विश्वानि

दुरिता स्वस्तये ॥१३॥ यं देवासोऽवथ वाजसातौ यं शूरसाता म-
रुतो हिते धने । प्रातर्यावाणं रथमिंद्र सानसिमरिष्यंतमा रुहेमा
स्वस्तये ॥१४॥ स्वस्ति नः पथ्यासु धन्वसु स्वस्त्य१प्सु वृजने स्वर्व-
ति । स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन
॥१५॥ स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति । सा
नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ॥१६॥ एवा
प्लतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी । ईशाना-
सो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥१७॥५॥

॥ ६४ ॥ १–१७ गयः प्लातः ॥ विश्वे देवाः ॥ १–११. १३–१५ जगती । १२. १६. १७ त्रिष्टुप् ॥

॥६४॥ कथा देवानां कतमस्य यामनि सुमंतु नाम शृण्वतां
मनामहे । को मृळाति कतमो नो मयस्करत्कतम ऊती अभ्या
ववर्तति ॥१॥ क्रतूयंति क्रतवो हृत्सु धीतयो वेनंति वेनाः
पतयंत्या दिशः । न मर्डिता विद्यते अन्य एभ्यो देवेषु मे
अधि कामा अयंसत ॥२॥ नरा वा शंसं पूषणमगोह्यमग्निं
देवेद्धमभ्यर्चसे गिरा । सूर्यामासा चंद्रमसा यमं दिवि त्रितं
वातमुषसमक्तुमश्विना ॥३॥ कथा कविस्तुवीरवान्कया गिरा
बृहस्पतिर्वावृधते सुवृक्तिभिः । अज एकपात्सुहवेभिर्ऋक्व-
भिरहिः शृणोतु बुध्न्यो३हवीमनि ॥४॥ दक्षस्य वादिते
जन्मनि व्रते राजाना मित्रावरुणा विवाससि । अतूर्तपं-
थाः पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु ॥५॥६॥
ते नो अर्वंतो हवनश्रुतो हवं विश्वे शृण्वंतु वाजिनो मि-
तद्रवः । सहस्रसा मेधसाताविव त्मना महो ये धनं समिथेषु
जभ्रिरे ॥६॥ प्र वो वायुं रथयुजं पुरंधिं स्तोमैः कृणुध्वं स-

ख्याय॑ पूषण॑ । ते हि दे॒वस्य॑ सवि॒तुः सवी॑मनि॒ क्रतुं॒ सच॑न्ते
स॒चितः॒ सचे॑तसः ॥७॥ त्रिः स॒प्त स॒स्रा न॒द्यो॑ म॒हीर॒पो वन॒-
स्पती॒न्पर्व॑ताँ अ॒ग्निमू॒तये॑ । कृ॒शानु॒मस्तॄ॒न्तिष्यं॑ स॒धस्थ॒ आ रु॒द्रं
रु॒द्रेषु॑ रु॒द्रियं॑ हवामहे ॥८॥ सर॑स्वती स॒रयुः॑ सिन्धु॑रू॒र्मिभि॑र्म॒हो
म॒हीरव॒सा य॑न्तु॒ वक्ष॑णीः । दे॒वीरापो॑ मा॒तरः॑ सूदयि॒त्न्वो॑ घृ॒त-
व॒त्पयो॒ मधु॑मन्नो अर्चत ॥९॥ उ॒त मा॒ता बृ॒हद्दि॒वा शृ॑णोतु
न॒स्त्वष्टा॑ दे॒वेभि॒र्जनि॑भिः पि॒ता वचः॑ । ऋ॒भु॒क्षा वाजो॒ रथ॒-
स्पति॒र्भगो॑ र॒ण्वः शंसः॑ शशमा॒नस्य॑ पातु नः ॥१०॥७॥ र॒ण्वः
संदृ॑ष्टौ पितु॒माँ इ॑व॒ क्षयो॑ भ॒द्रा रु॒द्राणां॑ म॒रुता॒मुप॑स्तुतिः ।
गोभिः॑ ष्याम य॒शसो॒ जने॒ष्वा सदा॑ देवास॒ इळ॑या सचेमहि
॥११॥ यां मे॒ धियं॒ मरु॑त॒ इन्द्र॒ देवा॒ अद॑दात वरुण मित्र यू॒यं ।
तां पी॑पयत॒ पय॑सेव धे॒नुं कु॒विद्गिरो॒ अधि॒ रथे॒ वहा॑थ ॥१२॥
कु॒विद॒ङ्ग प्रति॒ यथा॑ चिद॒स्य नः॑ सजा॒त्य॑स्य मरुतो॒ बुबो॑धथ ।
नाभा॒ यत्र॑ प्रथ॒मं सं॒नसा॑महे॒ तत्र॑ जामि॒त्वमदि॑ति॒र्दधा॑तु नः
॥१३॥ ते हि द्यावा॑पृथि॒वी मा॒तरा॑ म॒ही दे॒वी दे॒वाञ्जन्म॑ना
य॒ज्ञिये॑ इ॒तः । उ॒भे बि॑भृत उ॒भयं॒ भरी॑मभिः पु॒रू रेतां॑सि पि॒तृ-
भि॑श्च सिञ्चतः ॥१४॥ वि षा होत्रा॒ विश्व॑मश्नोति॒ वार्यं॒ बृह॒-
स्पति॑र॒रम॑तिः॒ पनी॑यसी । ग्रावा॒ यत्र॑ मधु॒षुदु॒च्यते॑ बृ॒हदवी॑व-
शन्त म॒तिभि॑र्मनी॒षिणः॑ ॥१५॥ ए॒वा क॒विस्तु॑वी॒रवाँ॑ ऋ॒तज्ञा
द्र॑विण॒स्युर्द्रवि॑णसश्चका॒नः । उ॒क्थेभि॑र॒त्र म॒तिभि॑श्च॒ विप्रो॒-
ऽपी॑पय॒द्गयो॑ दि॒व्यानि॒ जन्म॑ ॥१६॥ ए॒वा प्र॒तेः सू॒नुर॑वीवृधन्नो॒
विश्व॑ आदित्या अदिते मनी॒षी । ई॒शा॒नासो॒ नरो॒ अम॑र्त्ये॒ना-
स्ता॑वि॒ जनो॑ दि॒व्यो गये॑न ॥१७॥८॥

॥ ६५ ॥ १—१५ वसुकर्णो वासुक्रः ॥ विश्वे देवाः ॥ १—१४ जगती । १५ त्रिष्टुप् ॥

॥६५॥ अग्निरिंद्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः। आदित्या विष्णुर्मरुतः स्वर्बृहत्सोमो रुद्रो अदितिर्ब्रह्मणस्पतिः ॥१॥ इंद्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा३ समोकसा। अंतरिक्षं मह्या पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन् ॥२॥ तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधां। ये अप्सवमर्णवं चित्रराधसस्ते नो रासंतां महये सुमित्र्याः ॥३॥ स्वर्णरमंतरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कंभुरोजसा। पृक्षा इव महयंतः सुरातयो देवाः स्तवंते मनुषाय सूरयः ॥४॥ मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः। ययोर्धाम धर्मणा रोचते बृहद्ययोरुभे रोदसी नाधसी वृतौ ॥५॥९॥ या गौर्वर्तनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः। सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥६॥ दिवक्षसो अग्निजिह्वा ऋतावृध ऋतस्य योनिं विमृशंत आसते। द्यां स्कंभित्व्य१प आ चक्रुरोजसा यज्ञं जनित्वी तन्वी३ नि मामृजुः ॥७॥ परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा। द्यावापृथिवी वरुणाय सव्रते घृतवत्पयो महिषाय पिन्वतः ॥८॥ पर्जन्यावाता वृषभा पुरीषिणेंद्रवायू वरुणो मित्रो अर्यमा। देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये ॥९॥ त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये। बृहस्पतिं वृत्रखादं सुमेधसमिंद्रियं सोमं धनसा उ ईमहे ॥१०॥१०॥ ब्रह्म गामश्वं जनयंत ओषधीर्वनस्पतीन्पृथिवीं पर्वताँ अपः। सूर्यं दिवि रोहयंतः सुदानव आर्या व्रता विसृ-

जंतो अधि क्षमि ॥११॥ भुज्युमंहसः पिपृथो निरश्विना श्यावं
पुत्रं वध्रिमत्या अजिन्वतं । कमद्युवं विमदायोहथुर्युवं विष्णा-
प्वं१ विश्वकायाव सृजथः ॥१२॥ पावीरवी तन्यतुरेकपादजो
दिवो धर्ता सिंधुरापः समुद्रियः । विश्वे देवासः शृणवन्वचांसि
मे सरस्वती सह धीभिः पुरंध्या ॥१३॥ विश्वे देवाः सह धीभिः
पुरंध्या मनोर्यजत्रा अमृता ऋतज्ञाः । रातिषाचो अभिषाचः
स्वर्विदः स्व१र्गिरो ब्रह्म सूक्तं जुषेरत ॥१४॥ देवान्वसिष्ठो अमृ-
तान्ववंदे ये विश्वा भुवनाभि प्रतस्थुः । ते नो रासंतामुरुगायमद्य
यूयं पात स्वस्तिभिः सदा नः ॥१५॥११॥

॥ ६६ ॥ १–१५ वसुकर्णो वासुक्रः ॥ विश्वे देवाः ॥ १–१४ जगती । १५ त्रिष्टुप् ॥

॥६६॥ देवान्हुवे बृहच्छ्रवसः स्वस्तये ज्योतिष्कृतो अ-
ध्वरस्य प्रचेतसः । ये वावृधुः प्रतरं विश्ववेदस इंद्रज्येष्ठासो
अमृता ऋतावृधः ॥१॥ इंद्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य
ज्योतिषो भागमानशुः । मरुद्गणे वृजने मन्म धीमहि मा-
घोने यज्ञं जनयंत सूरयः ॥२॥ इंद्रो वसुभिः परि पातु नो गय-
मादित्यैर्नो अदितिः शर्म यच्छतु । रुद्रो रुद्रेभिर्देवो मृळयाति
नस्त्वष्टा नो ग्नाभिः सुविताय जिन्वतु ॥३॥ अदितिर्द्यावापृ-
थिवी ऋतं महदिंद्राविष्णू मरुतः स्वर्बृहत् । देवाँ आदित्याँ
अवसे हवामहे वसून्रुद्रान्त्सवितारं सुदंससं ॥४॥ सरस्वान्धी-
भिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना । ब्रह्मकृतो
अमृता विश्ववेदसः शर्म नो यंसन् त्रिवरूथमंहसः ॥५॥१२॥
वृषा यज्ञो वृषणः संतु यज्ञिया वृषणो देवा वृषणो हवि-
ष्कृतः । वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो

वृषस्तुभः ॥६॥ अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृष-
णा उप ब्रुवे । यावीजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं
वि यंसतः ॥७॥ धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्व-
राणामभिश्रियः । अग्निहोतार ऋतसापो अद्रुहोऽपो असृ-
जन्ननु वृत्रतूर्ये ॥८॥ द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्व-
निनानि यज्ञिया । अंतरिक्षं स्व१रा पप्रुरूतये वशं देवासस्त-
न्वी३ नि मामृजुः ॥९॥ धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या
महिषस्य तन्यतोः । आप ओषधीः प्र तिरंतु नो गिरो भगो रा-
तिर्वाजिनो यंतु मे हवं ॥१०॥१३॥ समुद्रः सिंधू रजो अंतरिक्ष-
मज एकपात्तनयित्नुरर्णवः । अहिर्बुध्न्यः शृणवद्वचांसि मे विश्वे
देवास उत सूरयो मम ॥११॥ स्याम वो मनवो देववीतये प्रांचं
नो यज्ञं प्र णयत साधुया । आदित्या रुद्रा वसवः सुदानव इमा
ब्रह्म शस्यमानानि जिन्वत ॥१२॥ दैव्या होतारा प्रथमा पुरोहित
ऋतस्य पंथामन्वेमि साधुया । क्षेत्रस्य पतिं प्रतिवेशमीमहे
विश्वान्देवाँ अमृताँ अप्रयुच्छतः ॥१३॥ वसिष्ठासः पितृवद्वाच-
मक्रत देवाँ ईळाना ऋषिवत्स्वस्तये । प्रीता इव ज्ञातयः काम-
मेत्यास्मे देवासोऽव धूनुता वसु ॥१४॥ देवान्वसिष्ठो अमृ-
तान्ववंदे ये विश्वा भुवनाभि प्रतस्थुः । ते नो रासंतामुरुगायमद्य
यूयं पात स्वस्तिभिः सदा नः ॥१५॥१४॥

॥ ६७ ॥ १–१२ अयास्यः ॥ बृहस्पतिः ॥ त्रिष्टुप् ॥

॥६७॥ इमां धियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहती-
मविंदत् । तुरीयं स्विज्जनयद्विश्वजन्योऽयास्य उक्थमिंद्राय
शंसन् ॥१॥ ऋतं शंसंत ऋजु दीध्याना दिवस्पुत्रासो असुरस्य

वीराः । विप्रं पदमंगिरसो दधाना यज्ञस्य धाम प्रथमं मनंत ॥ २ ॥ हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् । बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत् ॥ ३ ॥ अवो द्वाभ्यां पर एकया गा गुहा तिष्ठंतीरनृतस्य सेतौ । बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ॥ ४ ॥ विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृंतत् । बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ॥ ५ ॥ इंद्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता रवेण । स्वेदांजिभिराशिरमिच्छमानोऽरोदयत्पणिमा गा अमुष्णात् ॥ ६ ॥ १५ ॥ स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरददः । ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट् ॥ ७ ॥ ते सत्येन मनसा गोपतिं गा इयानास इषणयंत धीभिः । बृहस्पतिर्मिथोअवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ॥ ८ ॥ तं वर्धयंतो मतिभिः शिवाभिः सिंहमिव नानदतं सधस्थे । बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुं ॥ ९ ॥ यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म । बृहस्पतिं वृषणं वर्धयंतो नाना संतो बिभ्रतो ज्योतिरासा ॥ १० ॥ सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः । पश्चा मृधो अप भवंतु विश्वास्तद्रोदसी शृणुतं विश्वमिन्वे ॥ ११ ॥ इंद्रो मह्ना महतो अर्णवस्य वि मूर्धानमभिनदर्बुदस्य । अहन्नहिमरिणात्सप्त सिंधून्देवैर्द्यावापृथिवी प्रावतं नः ॥ १२ ॥ १६ ॥

॥ ६८ ॥ १–१२ अयास्यः ॥ बृहस्पतिः ॥ त्रिष्टुप् ॥

॥६८॥ उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव
घोषाः। गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्य१र्का अना-
वन् ॥१॥ सं गोभिराङ्गिरसो नक्षमाणो भग इवेदर्यमणं नि-
नाय। जने मित्रो न दम्पती अनक्ति बृहस्पते वाजयाशूँरिवाजौ
॥२॥ साध्वर्या अतिथिनीरिषिराः स्पार्हाः सुवर्णा अनवद्य-
रूपाः। बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव
स्थिविभ्यः ॥३॥ आप्रुषायन्मधुन ऋतस्य योनिमवक्षिपन्नर्क
उल्कामिव द्योः। बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उद्नेव वि
त्वचं बिभेद ॥४॥ अप ज्योतिषा तमो अन्तरिक्षादुद्नः शीपा-
लमिव वात आजत्। बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात
आ चक्र आ गाः ॥५॥ यदा वलस्य पीयतो जसुं भेद्बृहस्प-
तिरग्नितपोभिरर्कैः। दद्भिर्न जिह्वा परिविष्टमाददाविर्निधीँ-
रकृणोदुस्रियाणां ॥६॥१७॥ बृहस्पतिरमत हि त्यदासां नाम
स्वरीणां सदने गुहा यत्। आण्डेव भित्त्वा शकुनस्य गर्भमु-
दुस्रियाः पर्वतस्य त्मनाजत् ॥७॥ अश्नापिनद्धं मधु पर्यप-
श्यन्मत्स्यं न दीन उदनि क्षियन्तं। निष्टज्जभार चमसं न
वृक्षाद्बृहस्पतिर्विरवेणा विकृत्य ॥८॥ सोषामविन्दत्स स्व१ः
सो अग्निं सो अर्केण वि बबाधे तमांसि। बृहस्पतिर्गोव-
पुषो वलस्य निर्मज्जानं न पर्वणो जभार ॥९॥ हिमेव पर्णा
मुषिता वनानि बृहस्पतिनाकृपयद्वलो गाः। अनानुकृत्य-
मपुनश्चकार यात्सूर्यामासा मिथ उच्चरातः ॥१०॥ अभि श्यावं
न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन्। रात्र्यां तमो
अदधुर्ज्योतिरहन्बृहस्पतिर्भिनदद्रिं विदद्गाः ॥११॥ इदम-

कर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति। बृहस्पतिः स हि
गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात्॥१२॥१८॥५॥

॥ ६९ ॥ १–१२ सुमित्रो वाध्र्यश्वः ॥ अग्निः ॥ १. २ जगती । ३–१२ त्रिष्टुप् ॥

॥ ६९ ॥ भद्रा अग्नेर्वध्र्यश्वस्य संदृशो वामी प्रणीतिः सु-
रणा उपेतयः । यदीं सुमित्रा विशो अग्र इन्धते घृतेनाहुतो
जरते दविद्युतत् ॥ १ ॥ घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं
घृतम्वस्य मेदनं । घृतेनाहुत उर्विया वि पप्रथे सूर्य इव
रोचते सर्पिरासुतिः ॥ २ ॥ यत्ते मनुर्यदनीकं सुमित्रः सं-
मीधे अग्ने तदिदं नवीयः । स रेवच्छोच स गिरो जुषस्व
स वाजं दर्षि स इह श्रवो धाः ॥ ३ ॥ यं त्वा पूर्वमीळि-
तो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व । स नः स्तिपा
उत भवा तनूपा दात्रं रक्षस्व यदिदं ते अस्मे ॥ ४ ॥ भवा
द्युम्नी वाध्र्यश्वोत गोपा मा त्वा तारीदभिमातिर्जनानां ।
शूर इव धृष्णुश्च्यवनः सुमित्रः प्र नु वोचं वाध्र्यश्वस्य
नाम ॥ ५ ॥ समज्र्या पर्वत्या३ वसूनि दासा वृत्राण्यार्या
जिगेथ । शूर इव धृष्णुश्च्यवनो जनानां त्वमग्ने पृतनायूँर-
भि ष्याः ॥ ६ ॥ १९ ॥ दीर्घतंतुर्बृहदुक्षायमग्निः सहस्रस्तरीः
शतनीथ ऋभ्वा । द्युमान् द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु
दीदयो देवयत्सु ॥ ७ ॥ त्वे धेनुः सुदुघा जातवेदोऽसश्च-
तेव समना सबर्धुक् । त्वं नृभिर्दक्षिणावद्भिरग्ने सुमित्रे-
भिरिध्यसे देवयद्भिः ॥ ८ ॥ देवाश्चित्ते अमृता जातवेदो
महिमानं वाध्र्यश्व प्र वोचन् । यत्संपृच्छं मानुषीर्वि-
श आयन्त्वं नृभिरजयस्त्वावृधेभिः ॥ ९ ॥ पितेव पुत्रम-

बिभरुपस्थे त्वामग्ने वध्र्यश्वः सपर्यन् । जुषाणो अस्य समिधं यविष्ठोत पूर्वाँ अवनोर्व्राधतश्चित् ॥१०॥ शश्वदग्निर्वध्र्यश्वस्य शत्रून्नृभिर्जिगाय सुतसोमवद्भिः । समनं चिददहश्चित्रभानोऽव व्राधंतमभिनद्वृधश्चित् ॥११॥ अयमग्निर्वध्र्यश्वस्य वृत्रहा सनकात्प्रेद्धो नमसोपवाक्यः । स नो अजामीँरुत वा विजामीनभि तिष्ठ शर्धतो वाध्र्यश्व ॥१२॥२०॥

॥ ७० ॥ १—११ सुमित्रो वाध्र्यश्वः ॥ आप्रं ॥ त्रिष्टुप् ॥

॥७०॥ इमां मे अग्ने समिधं जुषस्वेळस्पदे प्रति हर्या घृताचीं । वर्ष्मन्पृथिव्याः सुदिनत्वे अह्नामूर्ध्वो भव सुक्रतो देवयज्या ॥१॥ आ देवानामग्रयावेह यातु नराशंसो विश्वरूपेभिरश्वैः । ऋतस्य पथा नमसा मियेधो देवेभ्यो देवतमः सुषूदत् ॥२॥ शश्वत्तममीळते दूत्याय हविष्मंतो मनुष्यासो अग्निं । वहिष्ठैरश्वैः सुवृता रथेना देवान्वक्षि नि षदेह होता ॥३॥ वि प्रथतां देवजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूत्वस्मे । अहेळता मनसा देव बर्हिरिंद्रज्येष्ठाँ उशतो यक्षि देवान् ॥४॥ दिवो वा सानु स्पृशता वरीयः पृथिव्या वा मात्रया वि श्रयध्वं । उशतीर्द्वारो महिना महद्भिर्देवं रथं रथयुर्धारयध्वं ॥५॥२१॥ देवी दिवो दुहितरा सुशिल्पे उषासानक्ता सदतां नि योनौ । आ वां देवास उशती उशंत उरौ सीदंतु सुभगे उपस्थे ॥६॥ ऊर्ध्वो ग्रावा बृहदग्निः समिद्धः प्रिया धामान्यदितेरुपस्थे । पुरोहितावृत्विजा यज्ञे अस्मिन् विदुष्टरा द्रविणमा यजेथां ॥७॥ तिस्रो देवीर्बर्हिरिदं वरीय आ सीदत चकृमा वः स्योनं । मनुष्वद्यज्ञं सुधिता हवींषीळा देवी घृतपदी जुषंत ॥८॥

देवं त्वष्टर्यद्ध चारुत्वमानड्यदंगिरसामभवः सचाभूः। स देवानां
पाथ उप प्र विद्वानुशन्यक्षि द्रविणोदः सुरत्नः ॥ ९ ॥ वनस्पते
रशनया नियूया देवानां पाथ उप वक्षि विद्वान्। स्वदाति देवः
कृणवद्धवींष्यवतां द्यावापृथिवी हवं मे ॥ १० ॥ आग्ने वह वरु-
णमिष्टये न इंद्रं दिवो मरुतो अंतरिक्षात्। सीदंतु बर्हिर्विश्व आ
यजत्राः स्वाहा देवा अमृता मादयंतां ॥ ११ ॥ २२ ॥

॥ ७१ ॥ १–११ बृहस्पतिः ॥ ज्ञानं ॥ १–८. १०. ११ त्रिष्टुप् । ९ जगती ॥

॥ ७१ ॥ बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं द-
धानाः । यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं
गुहाविः ॥ १ ॥ सक्तुमिव तितउना पुनंतो यत्र धीरा मनसा
वाचमक्रत । अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मी-
र्निहिताधि वाचि ॥ २ ॥ यज्ञेन वाचः पदवीयमायन्तामन्व-
विंदन्नृषिषु प्रविष्टां । तामाभृत्या व्यदधुः पुरुत्रा तां सप्त
रेभा अभि सं नवंते ॥ ३ ॥ उत त्वः पश्यन्न ददर्श वाच-
मुत त्वः शृण्वन्न शृणोत्येनां । उतो त्वस्मै तन्वं१ वि सस्रे जा-
येव पत्य उशती सुवासाः ॥ ४ ॥ उत त्वं सख्ये स्थिरपीतमा-
हुर्नैनं हिन्वंत्यपि वाजिनेषु । अधेन्वा चरति माययैष वाचं
शुश्रुवाँ अफलामपुष्पां ॥ ५ ॥ २३ ॥ यस्तित्याज सचिविदं
सखायं न तस्य वाच्यपि भागो अस्ति । यदीं शृणोत्यलकं
शृणोति नहि प्रवेद सुकृतस्य पंथां ॥ ६ ॥ अक्षण्वंतः कर्ण-
वंतः सखायो मनोजवेष्वसमा बभूवुः । आदघ्नास उपक-
क्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥ ७ ॥ हृदा तष्टेषु मनसो
जवेषु यद्ब्राह्मणाः संयजंते सखायः । अत्राह त्वं वि जहुर्वे-

द्धाभिरोहंब्रह्माणो वि चरंत्यु त्वे ॥८॥ इमे ये नार्वाङ्न परश्चरंति न ब्राह्मणासो न सुतेकरासः। त एते वाचमभिपद्य पापया सिरीस्तंत्रं तन्वते अप्रजज्ञयः ॥९॥ सर्वे नंदंति यशसागतेन सभासाहेन सख्या सखायः। किल्बिषस्पृत्पितुषणिर्ह्येषामरं हितो भर्वति वाजिनाय ॥१०॥ ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्करीषु। ब्रह्मा त्वो वदंति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥११॥२४॥२॥

॥७२॥ १–९ बृहस्पतिर्बृहस्पतिर्वा लौक्य अदितिर्वा दाक्षायणी ॥ देवाः ॥ अनुष्टुप् ॥

॥७२॥ देवानां नु वयं जाना प्र वोचाम विपन्यया। उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ॥१॥ ब्रह्मणस्पतिरेता सं कर्मार इवाधमत्। देवानां पूर्व्ये युगेऽसतः सदजायत ॥२॥ देवानां युगे प्रथमेऽसतः सदजायत। तदाशा अन्वजायंत तदुत्तानपदस्परि ॥३॥ भूर्जज्ञ उत्तानपदो भुव आशा अजायंत। अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ॥४॥ अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव। तां देवा अन्वजायंत भद्रा अमृतबंधवः ॥५॥१॥ यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत। अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत ॥६॥ यद्देवा यतयो यथा भुवनान्यपिन्वत। अत्रा समुद्र आ गूळ्हमा सूर्यमजभर्तन ॥७॥ अष्टौ पुत्रासो अदितेर्ये जातास्तन्व१स्परि। देवाँ उप प्रैत्सप्तभिः परा मार्ताण्डमास्यत् ॥८॥ सप्तभिः पुत्रैरदितिरुप प्रैत्पूर्व्यं युगं। प्रजायै मृत्यवे त्वत्पुनर्मार्ताण्डमाभरत् ॥९॥२॥

॥७३॥ १–११ गौरिवीतिः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥७३॥ जनिष्ठा उग्रः सहसे तुराय मंद्र ओजिष्ठो बहुला-

भिमानः। अवर्धन्निंद्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा
॥१॥ द्रुहो निषत्ता पृशनी चिदेवैः पुरू शंसेन वावृधुष्ट इंद्रं। अ-
भीवृतेव ता महापदेन ध्वांतात्प्रपित्वादुदरंत गर्भाः ॥२॥ ऋष्वा
ते पादा प्र यज्जिगास्यवर्धन्वाजा उत ये चिदत्र। त्वमिंद्र साला-
वृकान्सहस्रमासन्दधिषे अश्विना ववृत्याः॥३॥ समना तूर्णिरुप
यासि यज्ञमा नासत्या सख्याय वक्षि। वसाव्यामिंद्र धारयः स-
हस्राश्विना शूर ददतुर्मघानि ॥४॥ मंदमान ऋतादधि प्रजायै
सखिभिरिंद्र इषिरेभिरर्थं। आभिर्हि माया उप दस्युमागान्मिहः
प्र तम्रा अवपत्तमांसि ॥५॥३॥ सनामाना चिद्ध्वसयो न्यस्मा
अवाहन्निंद्र उषसो यथानः। ऋष्वैरगच्छः सखिभिर्निकामैः
साकं प्रतिष्ठा हृद्या जघंथ ॥६॥ त्वं जघंथ नमुचिं मखस्युं दासं
कृण्वान ऋषये विमायं। त्वं चकर्थ मनवे स्योनान्पथो देवत्रां-
जसेव यानान् ॥७॥ त्वमेतानि पप्रिषे वि नामेशान इंद्र दधिषे
गभस्तौ। अनु त्वा देवाः शवसा मदंत्युपरिबुध्नान्वनिनश्चकर्थ
॥८॥ चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छद्यात्।
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥९॥
अश्वादियायेति यद्वदंत्योजसो जातमुत मन्य एनं। मन्यो-
रियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इंद्रो अस्य वेद ॥१०॥
वयः सुपर्णा उप सेदुरिंद्रं प्रियमेधा ऋषयो नाधमानाः।
अप ध्वांतमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य१स्मान्निधयेव बद्धान्
॥११॥४॥

॥७४॥ १-६ गौरिवीतिः ॥ इंद्रः ॥ त्रिष्टुप्॥

॥७४॥ वसूनां वा चर्कृष इयक्षन्धिया वा यज्ञैर्वा रोदस्योः।

अवँतो वा ये रयिमंतः सातौ वनुं वा ये सुश्रुणं सुश्रुतो धुः ॥१॥
हवं एषामसुरो नक्षत द्यां श्रवस्यता मनसा निंसत क्षां। चक्षा-
णा यत्र सुवितार्य देवा द्यौर्न वारेभिः कृणवंत स्वैः ॥२॥ इयमे-
षाममृतानां गीः सर्वताता ये कृपणंत रत्नं। धियं च यज्ञं च सा-
धंतस्ते नो धांतु वसव्य १ मसामि ॥३॥ आ तत्त इंद्रायवः पनंताभि
य ऊर्वं गोमंतं तितृत्सान्। सकृत्स्वं १ ये पुरुपुत्रां महीं सहस्रधारां
बृहतीं दुदुक्षन् ॥४॥ शचीव इंद्रमवसे कृणुध्वमनानतं दमयंतं
पृतन्यून्। ऋभुक्षणं मघवानं सुवृक्तिं भर्ता यो वज्रं नर्यं पुरुक्षुः
॥५॥ यद्वावान पुरुतमं पुराषाळा वृत्रहेंद्रो नामान्यप्राः। अचेति
प्रासहस्पतिस्तुविष्मान्यदीमुश्मसि कर्तवे करत्तत् ॥६॥५॥

॥ ७५ ॥ १–९ सिंधुक्षित्प्रैयमेधः ॥ नद्यः ॥ जगती ॥

॥ ७५ ॥ प्र सु व आपो महिमानमुत्तमं कारुर्वोचाति स-
दने विवस्वतः। प्र सप्तसप्त त्रेधा हि चक्रमुः प्र सृत्वरीणामति
सिंधुरोजसा ॥१॥ प्र तेऽरदद्वरुणो यातवे पथः सिंधो यद्वाजाँ
अभ्यद्रवस्त्वं। भूम्या अधि प्रवता यासि सानुना यदेषामग्रं
जगतामिरज्यसि ॥२॥ दिवि स्वनो यतते भूम्योपर्यनंतं शु-
ष्ममुदियर्ति भानुना। अभ्रादिव प्र स्तनयंति वृष्टयः सिं-
धुर्यदेति वृषभो न रोरुवत् ॥३॥ अभि त्वा सिंधो शिशुमिन्न
मातरो वाश्रा अर्षंति पयसेव धेनवः। राजेव युध्वा नयसि
त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि ॥४॥ इमं मे गंगे
यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या। असिक्न्या
मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥५॥६॥
तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या। त्वं

सिंधो कुभंया गोमतीं क्रुमुं मेहुल्वा सरथं याभिरीयसे ॥ ६ ॥ ऋजीत्येनी रुशंती महित्वा परि ज्रयांसि भरते रजांसि । अदंब्धा सिंधुरपसामपस्तमाश्वा न चित्रा वपुषीव दर्शता ॥ ७ ॥ स्वश्वा सिंधुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती । ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधं ॥ ८ ॥ सुखं रथं युयुजे सिंधुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ । महान्ह्यस्य महिमा पनस्यतेऽदंब्धस्य स्वयंशसो विरप्शिनः ॥ ९ ॥ ७ ॥

॥ ७६ ॥ १–८ जरत्कर्ण ऐरावतः सर्पः ॥ ग्रावाणः ॥ जगती ॥

॥ ७६ ॥ आ वं ऋंजस ऊर्जां व्युष्टिष्विंद्रं मरुतो रोदसी अनक्तन । उभे यथा नो अहंनी सचाभुवा सदःसदो वरिवस्यात उद्भिदा ॥ १ ॥ तदु श्रेष्ठं सवनं सुनोतनात्यो न हस्तयतो अद्रिः सोतरि । विदद्ध्य१र्यो अभिभूति पौंस्यं महो राये चित्तरुते यदर्वतः ॥ २ ॥ तदिद्ध्यस्य सवनं विवेरपो यथा पुरा मनवे गातुमश्रेत् । गोअर्णसि त्वाष्ट्रे अश्वनिर्णिजि प्रेमध्वरेष्वध्वरां अशिश्रयुः ॥ ३ ॥ अप हत रक्षसो भंगुरावतः स्कभायत निर्ऋतिं सेधतामतिं । आ नो रयिं सर्ववीरं सुनोतन देवाव्यं भरत श्लोकमद्रयः ॥ ४ ॥ दिवश्चिदा वोऽमवत्तरेभ्यो विभ्वना चिदाश्वपस्तरेभ्यः । वायोश्चिदा सोमरभस्तरेभ्योऽग्नेश्चिदर्च पितुकृत्तरेभ्यः ॥ ५ ॥ ८ ॥ भुरंतु नो यशसः सोत्वंधसो ग्रावाणो वाचा दिविता दिवित्मता । नरो यत्र दुहते काम्यं मध्वाघोषयंतो अभितो मिथस्तुरः ॥ ६ ॥ सुन्वंति सोमं रथिरासो अद्रयो निरस्य रसं गविषो दुहंति ते । दुहंत्यूधरुपसेचनाय कं नरो हव्या न

मर्जयंत आसभिः ॥७॥ एते नरः स्वपसो अभूतन य इंद्राय सुनुथ सोममद्रयः । वामंवामं वो दिव्याय धाम्ने वसुवसु वः पार्थिवाय सुन्वते ॥८॥९॥

॥७७॥ १–८ स्यूमरश्मिर्भार्गवः ॥ मरुतः ॥ १–४. ६–८ त्रिष्टुप् । ५ जगती ॥

॥७७॥ अभ्रप्रुषो न वाचा प्रुषा वसु हविष्मंतो न यज्ञा विजानुषः । सुमारुतं न ब्रह्माणमर्हसे गणमस्तोष्येषां न शोभसे ॥१॥ श्रिये मर्यासो अंजीरँकृण्वत सुमारुतं न पूर्वीरति क्षपः । दिवस्पुत्रास एता न येतिर आदित्यासस्ते अक्रा न वावृधुः ॥२॥ प्र ये दिवः पृथिव्या न बर्हणा त्मना रिरिच्रे अभ्रान्न सूर्यः । पाजस्वंतो न वीराः पनस्यवो रिशादसो न मर्या अभिद्यवः ॥३॥ युष्माकं बुध्ने अपां न यामनि विथुर्यति न मही श्रथर्यति । विश्वप्सुर्यज्ञो अर्वागयं सु वः प्रयस्वंतो न सत्राच आ गत ॥४॥ यूयं धूर्षु प्रयुजो न रश्मिभिर्ज्योतिष्मंतो न भासा व्युष्टिषु । श्येनासो न स्वयशसो रिशादसः प्रवासो न प्रसितासः परिप्रुषः ॥५॥१०॥ प्र यद्वहध्वे मरुतः पराकाद्यूयं महः संवरणस्य वस्वः । विदानासो वसवो राध्यस्याराच्चिद्द्वेषः सनुतर्युयोत ॥६॥ य उदृचि यज्ञे अध्वरेष्ठा मरुद्भ्यो न मानुषो ददाशत् । रेवत्स वयो दधते सुवीरं स देवानामपि गोपीथे अस्तु ॥७॥ ते हि यज्ञेषु यज्ञियास ऊमा आदित्येन नाम्ना शंभविष्ठाः । ते नोऽवंतु रथतूर्मनीषां महश्च यामन्नध्वरे चकानाः ॥८॥११॥

॥७८॥ १–८ स्यूमरश्मिर्भार्गवः ॥ मरुतः ॥ १. ३. ४. ८ त्रिष्टुप् । २. ५–७ जगती ॥

॥७८॥ विप्रासो न मन्मभिः स्वाध्यो देवाव्योऽ३ न यज्ञैः स्वप्नसः । राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अ-

रेपसः ॥१॥ अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः
सद्यऊतयः । प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा
ऋतं यते ॥२॥ वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा
विरोकिणः । वर्मण्वंतो न योधाः शिमीवंतः पितॄणां न शंसाः
सुरातयः ॥३॥ रथानां न ये१ऽराः सनाभयो जिगीवांसो न शूरा
अभिद्यवः । वरेयवो न मर्या घृतप्रुषोऽभिस्वर्तारो अर्कं न सुष्टुभः
॥४॥ अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदा-
नवः । आपो न निम्नैरुदभिर्जिगत्नवो विश्वरूपा अंगिरसो न
सामभिः ॥५॥१२॥ ग्रावाणो न सूरयः सिंधुमातर आदर्दिरासो
अद्रयो न विश्वहा । शिशूला न क्रीळयः सुमातरो महाग्रामो
न यामन्नुत त्विषा ॥६॥ उषसां न केतवोऽध्वरश्रियः शुभंयवो
नांजिभिर्व्यश्वितन् । सिंधवो न ययियो भ्राजदृष्टयः परावतो न
योजनानि ममिरे ॥७॥ सुभागान्नो देवाः कृणुता सुरत्नान-
स्मान्त्स्तोतॄन्मरुतो वावृधानाः । अधि स्तोत्रस्य सख्यस्य गात
सनाद्धि वो रत्नधेयानि संति ॥८॥१३॥

॥७९॥ १-७ अग्निः सौचीको वैश्वानरो वा सप्तिर्वा वाजंभरः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७९॥ अपश्यमस्य महतो महित्वममर्त्यस्य मर्त्यासु
विक्षु । नाना हनू विभृते सं भरेते असिन्वती बप्सती
भूर्यत्तः ॥१॥ गुहा शिरो निहितमृधगक्षी असिन्वन्नत्ति जि-
ह्वया वनानि । अत्राण्यस्मै पड्भिः सं भरंत्युत्तानहस्ता नमसा-
धि विक्षु ॥२॥ प्र मातुः प्रतरं गुह्यमिच्छन्कुमारो न वीरुधः
सर्पदुर्वीः । ससं न पक्वमविदच्छुचंतं रिरिह्वांसं रिप उपस्थे
अंतः ॥३॥ तद्वामृतं रोदसी प्र ब्रवीमि जायमानो मातरा

गर्भो अत्ति । नाहं देवस्य मर्त्यश्चिकेताग्निरङ्ग विचेताः स प्रचेताः ॥४॥ यो अस्मा अन्नं तृष्वा३दधात्याज्यैर्घृतैर्जुहोति पुष्यति । तस्मै सहस्रमक्षभिर्वि चक्षेऽग्ने विश्वतः प्रत्यङ्ङसि त्वं ॥५॥ किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान् । अक्रीळन्क्रीळन्हरिरत्तवेऽदन्वि पर्वशश्चकर्त गामिवासिः ॥६॥ विषूचो अश्वान्युयुजे वनेजा ऋजीतिभी रशनाभिर्गृभीतान् । चक्षदे मित्रो वसुभिः सुजातः समानृधे पर्वभिर्वावृधानः ॥७॥१४॥

॥ ८० ॥ १–७ अग्निः सौचीको वैश्वानरो वा ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ ८० ॥ अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठां । अग्नी रोदसी वि चरत्समंजन्नग्निर्नारीं वीरकुक्षिं पुरंधिं ॥१॥ अग्नेरप्नसः समिदस्तु भद्राग्निर्मही रोदसी आ विवेश । अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि ॥२॥ अग्निर्ह त्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथं । अग्निरत्रिं घर्म उरुष्यदंतरग्निर्नृमेधं प्रजयासृजत्सं ॥३॥ अग्निर्दाद्द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति । अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा ॥४॥ अग्निमुक्थैर्ऋषयो वि ह्वयंतेऽग्निं नरो यामनि बाधितासः । अग्निं वयो अंतरिक्षे पतंतोऽग्निः सहस्रा परि याति गोनां ॥५॥ अग्निं विश ईळते मानुषीर्या अग्निं मनुषो नहुषो वि जाताः । अग्निर्गांधर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता ॥६॥ अग्नये ब्रह्म ऋभवस्ततक्षुरग्निं महामवोचामा सुवृक्तिं । अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व ॥७॥१५॥

॥ ८१ ॥ १–७ विश्वकर्मा भौवनः ॥ विश्वकर्मा ॥ त्रिष्टुप् ॥

॥८१॥ य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः। स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश ॥१॥ किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत्। यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥२॥ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥३॥ किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥४॥ या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा। शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥५॥ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम्। मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥६॥ वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम। स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥७॥१६॥

॥ ८२ ॥ १–७ विश्वकर्मा भौवनः ॥ विश्वकर्मा ॥ त्रिष्टुप् ॥

॥८२॥ चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने। यदेदन्ता अददृहन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम् ॥१॥ विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत सन्दृक्। तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन्पर एकमाहुः ॥२॥ यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा। यो देवानां नामधा एक एव तं सम्प्रश्नं भुवना यन्त्यन्या ॥३॥ त आयजन्त द्रविणं सम-

स्मा ऋषयः पूर्वे जरितारो न भूना। असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥४॥ परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति। कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यंत विश्वे ॥५॥ तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छंत विश्वे। अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥६॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव। नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति ॥७॥१७॥

॥ ८३ ॥ १-७ मन्युस्तापसः ॥ मन्युः ॥ १ जगती । २-७ त्रिष्टुप् ॥

॥८३॥ यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुष्यति विश्वमानुषक्। साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ॥१॥ मन्युरिंद्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः। मन्युं विश ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ॥२॥ अभीहि मन्यो तवसस्तवीयान्तपसा युजा वि जहि शत्रून्। अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥३॥ त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः। विश्वचर्षणिः सहुरिः सहावानस्मास्वोजः पृतनासु धेहि ॥४॥ अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः। तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि ॥५॥ अयं ते अस्म्युप मेह्यर्वाङ् प्रतीचीनः सहुरे विश्वधायः। मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूँरुत बोध्यापेः ॥६॥ अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जंघनाव भूरि। जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ॥७॥१८॥

॥८४॥ १–७ मन्युस्तापसः॥ मन्युः॥ १–३ त्रिष्टुप्। ४–७ जगती॥

॥८४॥ त्वया मन्यो सरथमारुजंतो हर्षमाणासो धृषिता म-
रुत्वः। तिग्मेषव आयुधा संशिशाना अभि प्र यंतु नरो अग्निरू-
पाः॥१॥ अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत
एधि। हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुद-
स्व॥२॥ सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि
शत्रून्। उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वं॥३॥
एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि।
अकृत्तरुक्त्वया युजा वयं द्युमंतं घोषं विजयाय कृण्महे॥४॥ वि-
जेषकृदिंद्र इवानवब्रवो३ऽस्माकं मन्यो अधिपा भवेह। प्रियं ते
नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ॥५॥ आभूत्या
सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरं। क्रत्वा नो मन्यो
सह मेद्येधि महाधनस्य पुरुहूत संसृजि॥६॥ संसृष्टं धनमुभयं
समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः। भियं दधाना हृदयेषु श-
त्रवः पराजितासो अप नि लयंतां॥७॥१९॥६॥

॥८५॥ १–४७ सूर्या सावित्री॥ १–५ सोमः। ६–१६ सूर्याविवाहः। १७ देवाः। १८ सोमार्कौ। १९ चंद्रमाः। २०–२८ नृणां विवाहमंत्रा आशीःप्रायाः। २९. ३० वधूवासःसंस्पर्शनिंदा। ३१ यक्ष्मनाशिनी दंपत्योः। ३२–४७ सूर्या॥ १–१३. १५–१७. २२. २५. २८–३३. ३५. ३८–४२. ४५–४७ अनुष्टुप्। १४. १९–२१. २३. २४. २६. ३६. ३७. ४४ त्रिष्टुप्। १८. २७. ४३ जगती। ३४ उरोबृहती॥

॥८५॥ सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः। ऋतेना-
दित्यास्तिष्ठंति दिवि सोमो अधि श्रितः॥१॥ सोमेनादि-
त्या बलिनः सोमेन पृथिवी मही। अथो नक्षत्राणामेषामु-
पस्थे सोम आहितः॥२॥ सोमं मन्यते पपिवान्यत्संपिं-
षंत्योषधिं। सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन
॥३॥ आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः। ग्राव्णा-

मिच्छृण्वन्तिष्ठसि न ते अश्नाति पार्थिवः ॥४॥ यत्त्वा देव
प्रपिबन्ति तत आ प्यायसे पुनः । वायुः सोमस्य रक्षिता
समानां मास आकृतिः ॥५॥२०॥ रैभ्यासीदनुदेयी नाराशंसी
न्योचनी । सूर्याया भद्रमिद्वासो गाथयैति परिष्कृतं ॥६॥
चित्तिरा उपबर्हणं चक्षुरा अभ्यंजनं । द्यौर्भूमिः कोश
आसीद्यदयात्सूर्या पतिं ॥७॥ स्तोमा आसन्प्रतिधयः कुरीरं
छंद ओपशः । सूर्याया अश्विना वराग्निरासीत्पुरोगवः
॥८॥ सोमो वधूयुरभवदश्विनास्तामुभा वरा । सूर्यां य-
त्पत्ये शंसंतीं मनसा सविताददात् ॥९॥ मनो अस्या अन
आसीद्द्यौरासीदुत छदिः । शुक्रावनड्वाहावास्तां यदया-
त्सूर्या गृहं ॥१०॥२१॥ ऋक्सामाभ्यामभिहितौ गावौ ते
सामनावितः । श्रोत्रं ते चक्रे आस्तां दिवि पंथाश्चराचरः
॥११॥ शुची ते चक्रे यात्या व्यानो अक्ष आहतः । अनो
मनस्मयं सूर्यारोहत्प्रयती पतिं ॥१२॥ सूर्याया वहतुः
प्रागात्सविता यमवासृजत् । अघासु हन्यंते गावोऽर्जुन्योः
पर्युह्यते ॥१३॥ यदश्विना पृच्छमानावयातं त्रिचक्रेण व-
॰हतुं सूर्यायाः । विश्वे देवा अनु तद्वामजानन्पुत्रः पितरा-
ववृणीत पूषा ॥१४॥ यदयातं शुभस्पती वरेयं सूर्यामुप ।
क्वैकं चक्रं वामासीत्क्व देष्ट्राय तस्थथुः ॥१५॥२२॥ द्वे ते
चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः । अथैकं चक्रं यद्गुहा तदद्धा-
तय इद्विदुः ॥१६॥ सूर्यायै देवेभ्यो मित्राय वरुणाय च ।
ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः ॥१७॥ पूर्वापरं
चरतो माययैतौ शिशू क्रीळंतौ परि यातो अध्वरं । वि-
श्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः ॥१८॥

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रं । भागं देवेभ्यो वि दधात्यायन्प्र चंद्रमास्तिरते दीर्घमायुः ॥ १९ ॥ सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रं। आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥ २० ॥ २३ ॥ उदीर्ष्वातः पतिवती ह्येऽ३षा विश्वावसुं नमसा गीर्भिरीळे । अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥ २१ ॥ उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा । अन्यामिच्छ प्रफर्व्यं१ सं जायां पत्या सृज ॥ २२ ॥ अनृक्षरा ऋजवः संतु पंथा येभिः सखायो यंति नो वरेयं। समर्यमा सं भगो नो निनीयात्सं जास्पत्यं सुयममस्तु देवाः ॥ २३ ॥ प्र त्वा मुंचामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः । ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥ २४ ॥ प्रेतो मुंचामि नामुतः सुबद्धाममुतस्करं । यथेयमिंद्र मीढ्वः सुपुत्रा सुभगासति ॥ २५ ॥ २४ ॥ पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन । गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥ २६ ॥ इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि। एना पत्या तन्वं१ सं सृजस्वाधा जिव्री विदथमा वदाथः ॥ २७ ॥ नीललोहितं भवति कृत्यासक्तिर्व्यज्यते । एधंते अस्या ज्ञातयः पतिर्बंधेषु बध्यते ॥ २८ ॥ परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु। कृत्यैषा पद्वती भूत्व्या जाया विशते पतिं ॥ २९ ॥ अश्रीरा तनूर्भवति रुशती पापयामुया । पतिर्यद्वध्वो३ वाससा स्वमंगमभिधित्सते ॥ ३० ॥ २५ ॥ ये वध्वश्चंद्रं वहतुं यक्ष्मा यंति जनादनु । पुनस्तान्यज्ञिया देवा नयंतु यत आगताः ॥ ३१ ॥ मा

विदन्परिपंथिनो य आसीदंति दंपती । सुगेभिर्दुर्गमतीं-
तामप द्रांत्वरातयः ॥ ३२ ॥ सुमंगलीरियं वधूरिमां समेत
पश्यंत । सौभाग्यमस्यै दत्वायाथास्तं वि परेतन ॥ ३३ ॥
तृष्टमेतत्कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे । सूर्यां यो ब्रह्मा
विद्यात्स इद्वाधूयमर्हति ॥ ३४ ॥ आशसनं विशसनमथो
अधिविकर्तनं । सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु
शुंधति ॥ ३५ ॥ २६ ॥ गृभ्णामि ते सौभगत्वाय हस्तं मया
पत्या जरदष्टिर्यथासः । भगो अर्यमा सविता पुरंधिर्मह्यं
त्वादुर्गार्हपत्याय देवाः ॥ ३६ ॥ तां पूषञ्छिवतमामेरयस्व
यस्यां बीजं मनुष्या३ वपंति । या न ऊरू उशती वि-
श्रयाते यस्यामुशंतः प्रहराम शेपं ॥ ३७ ॥ तुभ्यमग्रे पर्य-
वहन्सूर्यां वहतुना सह । पुनः पतिभ्यो जायां दा अग्ने
प्रजया सह ॥ ३८ ॥ पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतं ॥ ३९ ॥ सोमः
प्रथमो विविदे गंधर्वो विविद उत्तरः । तृतीयो अग्निष्टे
पतिस्तुरीयस्ते मनुष्यजाः ॥ ४० ॥ २७ ॥ सोमो ददद्गंधर्वाय
गंधर्वो ददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां
॥ ४१ ॥ इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतं । क्रीळंतौ
पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥ ४२ ॥ आ नः प्रजां जनयतु
प्रजापतिराजरसाय समनक्त्वर्यमा । अदुर्मंगलीः पतिलो-
कमा विश शं नो भव द्विपदे शं चतुष्पदे ॥ ४३ ॥ अघो-
रचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः । वीर-
सूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥ ४४ ॥
इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृणु । दशास्यां पुत्राना

धेहि पतिमेकादशं कृधि ॥४५॥ सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव। ननांदरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥४६॥ समंजंतु विश्वे देवाः समापो हृदयानि नौ। सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥४७॥२८॥३॥

॥८६॥ १–२३ वृषाकपिरैंद्र इंद्राणींद्रश्च समूदिरे ॥ पंक्तिः ॥

॥८६॥ वि हि सोतोरसृक्षत नेंद्रं देवममंसत। यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिंद्र उत्तरः ॥१॥ परा हींद्र धावसि वृषाकपेरति व्यथिः। नो अह प्र विंदस्यन्यत्र सोमपीतये विश्वस्मादिंद्र उत्तरः ॥२॥ किमयं त्वां वृषाकपिश्चकार हरितो मृगः। यस्मा इरस्यसीदु न्व१र्यो वा पुष्टिमद्वसु विश्वस्मादिंद्र उत्तरः ॥३॥ यमिमं त्वं वृषाकपिं प्रियमिंद्राभिरक्षसि। श्वा न्वस्य जंभिषदपि कर्णे वराहयुर्विश्वस्मादिंद्र उत्तरः ॥४॥ प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत्। शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिंद्र उत्तरः ॥५॥१॥ न मत्स्त्री सुभसत्तरा न सुयाशुतरा भुवत्। न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिंद्र उत्तरः ॥६॥ उवे अंब सुलाभिके यथेवांग भविष्यति। भसन्मे अंब सक्थि मे शिरो मे वीव हृष्यति विश्वस्मादिंद्र उत्तरः ॥७॥ किं सुबाहो स्वंगुरे पृथुष्टो पृथुजाघने। किं शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिंद्र उत्तरः ॥८॥ अवीरामिव मामयं शरारुरभि मन्यते। उताहमस्मि वीरिणींद्रपत्नी मरुत्सखा विश्वस्मादिंद्र उत्तरः ॥९॥ संहोत्रं स्म पुरा नारी समनं वाव गच्छति। वेधा ऋतस्य वीरिणींद्रपत्नी म-

हीयते विश्वस्मादिंद्र उत्तरः ॥१०॥२॥ इंद्राणीमासु नारिषु
सुभगामहमश्रवं । नह्यस्या अपरं चन जरसा मरते प-
तिर्विश्वस्मादिंद्र उत्तरः ॥११॥ नाहमिंद्राणि रारण सख्यु-
र्वृषाकपेर्ऋते । यस्येदमप्यं हविः प्रियं देवेषु गच्छति वि-
श्वस्मादिंद्र उत्तरः ॥१२॥ वृषाकपायि रेवति सुपुत्र आदु
सुस्नुषे । घसत्त इंद्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मा-
दिंद्र उत्तरः ॥१३॥ उक्ष्णो हि मे पंचदश साकं पचंति विंश-
तिं । उताहमद्मि पीव इदुभा कुक्षी पृणंति मे विश्वस्मादिंद्र
उत्तरः ॥१४॥ वृषभो न तिग्मशृंगोऽतर्यूथेषु रोरुवत् । मंथस्त
इंद्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिंद्र उत्तरः ॥१५॥३॥
न सेशे यस्य रंबतेऽतरा सक्थ्या३ कपृत् । सेदीशे यस्य
रोमशं निषेदुषो विजृंभते विश्वस्मादिंद्र उत्तरः ॥१६॥
न सेशे यस्य रोमशं निषेदुषो विजृंभते । सेदीशे यस्य रंबते-
ऽतरा सक्थ्या३ कपृद्विश्वस्मादिंद्र उत्तरः ॥१७॥ अयमिंद्र
वृषाकपिः परस्वंतं हतं विदत् । असिं सूनां नवं चरुमादेध-
स्यान आचितं विश्वस्मादिंद्र उत्तरः ॥१८॥ अयमेमि विचा-
कशद्विचिन्वन्दासमार्यं । पिबामि पाकसुत्वनोऽभि धीरम-
चाकशं विश्वस्मादिंद्र उत्तरः ॥१९॥ धन्व च यत्कृंतत्रं च
कति स्वित्ता वि योजना । नेदीयसो वृषाकपेऽस्तमे-
हि गृहाँ उप विश्वस्मादिंद्र उत्तरः ॥२०॥ पुनरेहि वृषा-
कपे सुविता कल्पयावहै । य एषः स्वप्ननंशनोऽस्तमेषि
पथा पुनर्विश्वस्मादिंद्र उत्तरः ॥२१॥ यदुदंचो वृषाकपे
गृहमिंद्राजगंतन । क्व१स्य पुल्वघो मृगः कमगञ्जनयोपनो
विश्वस्मादिंद्र उत्तरः ॥२२॥ पर्शुर्ह नाम मानवी साकं स-

सूव विंशतिं। भद्रं भल त्यस्या अभूद्यस्या उदरमामयद्विश्वस्मा-
दिंद्र उत्तरः ॥२३॥४॥

॥८७॥ १–२५ पायुः ॥ अग्नी रक्षोहा ॥ १–२१ त्रिष्टुप्। २२–२५ अनुष्टुप्॥

॥८७॥ रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि
शर्म। शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः
पातु नक्तँ॥१॥ अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः
समिद्धः। आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वा-
सन्॥२॥ उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं
च। उतांतरिक्षे परि याहि राजञ्जंभैः सं धेह्यभि यातुधानान्
॥३॥ यज्ञैरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दि-
हानः। ताभिर्विध्य हृदये यातुधानान्प्रतीचो बाहून्प्रति भङ्ध्ये-
षां॥४॥ अग्ने त्वचं यातुधानस्य भिंधि हिंस्राशनिर्हरसा हंत्वेनं।
प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णं
॥५॥५॥ यत्रेदानीं पश्यसि जातवेदस्तिष्ठंतमग्न उत वा चरंतं।
यद्वांतरिक्षे पथिभिः पतंतं तमस्ता विध्य शर्वा शिशानः
॥६॥ उतालब्धं स्पृणुहि जातवेद आलेभानादृष्टिभिर्यातु-
धानात्। अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विंका-
स्तमदंत्वेनीः॥७॥ इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो
य इदं कृणोति। तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे
रंधयैनं॥८॥ तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्रांचं वसुभ्यः प्र
णय प्रचेतः। हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातु-
धाना नृचक्षः॥९॥ नृचक्षा रक्षः परि पश्य विक्षु तस्य
त्रीणि प्रति शृणीह्यग्रा। तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा

मूलं यातुधानस्य वृश्च ॥१०॥६॥ त्रिर्यातुधानः प्रसितिं त
एत्वृतं यो अग्ने अनृतेन हंति । तमर्चिषा स्फूर्जयञ्जातवेदः
समक्षमेनं गृणते नि वृङ्धि ॥११॥ तदग्ने चक्षुः प्रति धेहि रेभे
शफारुजं येन पश्यसि यातुधानं । अथर्ववज्ज्योतिषा दै-
व्येन सत्यं धूर्वंतमचितं न्योष ॥१२॥ यदग्ने अद्य मिथुना
शपातो यद्वाचस्तृष्टं जनयंत रेभाः । मन्योर्मनसः शरव्या३ जा-
यते या तया विध्य हृदये यातुधानान् ॥१३॥ परा शृणीहि
तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि । परार्चिषा
मूरदेवाञ्छृणीहि परासुतृपो अभि शोशुचानः ॥१४॥ प-
राद्य देवा वृजिनं शृणंतु प्रत्यगेनं शपथा यंतु तृष्टाः । वा-
चास्तेनं शरव ऋच्छंतु मर्मन्विश्वस्यैतु प्रसितिं यातुधानः
॥१५॥७॥ यः पौरुषेयेण क्रविषा समंक्ते यो अश्व्येन पशुना
यातुधानः । यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हर-
सापि वृश्च ॥१६॥ संवत्सरीणं पय उस्रियायास्तस्य माशी-
द्यातुधानो नृचक्षः । पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यंच-
मर्चिषा विध्य मर्मन् ॥१७॥ विषं गवां यातुधानाः पिबंत्वा
वृश्च्यंतामदितये दुरेवाः । परैनान्देवः सविता ददातु परा
भागमोषधीनां जयंतां ॥१८॥ सनादग्ने मृणसि यातुधानान्न
त्वा रक्षांसि पृतनासु जिग्युः । अनु दह सहमूरान्क्रव्यादो
मा ते हेत्या मुक्षत दैव्यायाः ॥१९॥ त्वं नो अग्ने अधरादुद-
क्तात्त्वं पश्चादुत रक्षा पुरस्तात् । प्रति ते ते अजरासस्तपिष्ठा
अघशंसं शोशुचतो दहंतु ॥२०॥८॥ पश्चात्पुरस्तादधरादुद-
क्तात्कविः काव्येन परि पाहि राजन् । सखे सखायमजरो ज-
रिम्णेऽग्ने मर्ताँ अमर्त्यस्त्वं नः ॥२१॥ परि त्वाग्ने पुरं वयं विप्रं

सहस्य धीमहि। धृषद्वर्णं दिवेदिवे हंतारं भंगुरावतां ॥२२॥ वि-
षेण भंगुरावतः प्रति ष्म रक्षसो दह। अग्ने तिग्मेन शोचिषा
तपुरग्राभिर्ऋष्टिभिः ॥२३॥ प्रत्यग्ने मिथुना दह यातुधाना कि-
मीदिना। सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः ॥२४॥
प्रत्यग्ने हरसा हरः शृणीहि विश्वतः प्रति। यातुधानस्य रक्षसो
बलं वि रुज वीर्यं ॥२५॥९॥

॥ ८८ ॥ १—१९ मूर्धन्वानांगिरसो वामदेव्यो वा ॥ सूर्यवैश्वानरौ ॥ त्रिष्टुप् ॥

॥८८॥ हविष्पांतमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ।
तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथंत ॥१॥ गीर्णं
भुवनं तमसापगूळ्हमाविः स्वरभवज्जाते अग्नौ। तस्य देवाः
पृथिवी द्यौरुतापोऽरणयन्नोषधीः सख्ये अस्य ॥२॥ देवेभिर्न्वि-
षितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहंतं। यो भानुना पृथिवीं
द्यामुतेमामाततान रोदसी अंतरिक्षं ॥३॥ यो होतासीत्प्रथमो
देवजुष्टो यं समांजन्नाज्येना वृणानाः। स पतत्रीत्वरं स्था ज-
गद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः ॥४॥ यज्जातवेदो भुवनस्य
मूर्धन्नतिष्ठो अग्ने सह रोचनेन। तं त्वाहेम मतिभिर्गी-
र्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः ॥५॥१०॥ मूर्धा भुवो
भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्। मायामू तु
यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥६॥ दृशेन्यो यो
महिना समिद्धोऽरोचत दिवियोनिर्विभावा। तस्मिन्नग्नौ
सूक्तवाकेन देवा हविर्विश्व आजुहवुस्तनूपाः ॥७॥ सूक्तवाकं
प्रथममादिदग्निमादिद्धविरजनयंत देवाः। स एषां यज्ञो
अभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः ॥८॥ यं दे-

वासोऽजनयंताग्निं यस्मिन्नाजुह्वुर्भुवनानि विश्वा । सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा ॥ ९॥ स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्रां । तमू अकृण्वन् त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः ॥ १० ॥ ११ ॥ यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयं । यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा ॥ ११ ॥ विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् । आ यस्ततानोषसो विभातीरपो ऊर्णोति तमो अर्चिषा यन् ॥ १२ ॥ वैश्वानरं कवयो यज्ञियासोऽग्निं देवा अजनयन्नजुर्यं । नक्षत्रं प्रत्नममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहंतं ॥ १३ ॥ वैश्वानरं विश्वहा दीदिवांसं मंत्रैरग्निं कविमच्छा वदामः । यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात् ॥ १४ ॥ द्वे स्रुती अशृणवं पितॄणामहं देवानामुत मर्त्यानां । ताभ्यामिदं विश्वमेजत्समेति यदंतरा पितरं मातरं च ॥ १५ ॥ १२ ॥ द्वे समीची बिभृतश्चरंतं शीर्षतो जातं मनसा विमृष्टं । स प्रत्यङ्विश्वा भुवनानि तस्थावप्रयुच्छन्तरणिर्भ्राजमानः ॥ १६ ॥ यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद । आ शेकुरित्सधमादं सखायो नक्षंत यज्ञं क इदं वि वोचत् ॥ १७ ॥ कत्यग्नयः कति सूर्यासः कत्युषासः कत्यु स्विदापः । नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कं ॥ १८ ॥ यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसंते मातरिश्वः । तावद्दधात्युप यज्ञमायन्ब्राह्मणो होतुरवरो निषीदन् ॥ १९ ॥ १३ ॥

॥ ८९ ॥ १–१८ रेणुः ॥ १–४. ६–१८ इंद्रः । ५ इंद्रासोमौ ॥ त्रिष्टुप् ॥

॥८९॥ इंद्रं स्तवा नृतमं यस्य मह्ना विबबाधे रोचना वि
ज्मो अंतान्। आ यः पप्रौ चर्षणीधृद्वरोभिः प्र सिंधुभ्यो रिरि-
चानो महित्वा ॥१॥ स सूर्यः पर्युरू वरांस्येंद्रो ववृत्याद्रथ्येव
चक्रा। अतिष्ठंतमपस्य१ं न सर्गं कृष्णा तमांसि त्विष्या जघान
॥२॥ समानमस्मा अनपावृदर्च क्ष्मया दिवो असमं ब्रह्म नव्यं।
वि यः पृष्ठेव जनिमान्यर्य इंद्रश्चिकाय न सखायमीषे ॥३॥
इंद्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात्। यो
अक्षेणेव चक्रिया शचीभिर्विष्वक्तस्तंभ पृथिवीमुत द्यां ॥४॥
आपांतमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी।
सोमो विश्वान्यतसा वनानि नार्वागिंद्रं प्रतिमानानि देभुः
॥५॥१४॥ न यस्य द्यावापृथिवी न धन्व नांतरिक्षं नाद्रयः
सोमो अक्षाः। यदस्य मन्युरधिनीयमानः शृणाति वीळु
रुजति स्थिराणि ॥६॥ जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो
अरदन्न सिंधून्। बिभेद गिरिं नवमिन्न कुंभमा गा इंद्रो
अकृणुत स्वयुग्भिः ॥७॥ त्वं ह त्यदृणया इंद्र धीरोऽसिर्न पर्व
वृजिना शृणासि। प्र ये मित्रस्य वरुणस्य धाम युजं न जना
मिनंति मित्रं ॥८॥ प्र ये मित्रं प्रार्यमणं दुरेवाः प्र संगिरः प्र
वरुणं मिनंति। न्य१मित्रेषु वधमिंद्र तुम्रं वृषन्वृषाणमरुषं शिं-
शीहि॥९॥ इंद्रो दिव इंद्र ईशे पृथिव्या इंद्रो अपामिंद्र इत्पर्वतानां।
इंद्रो वृधामिंद्र इन्मेधिराणामिंद्रः क्षेमे योगे हव्य इंद्रः॥१०॥१५॥
प्राक्तुभ्य इंद्रः प्र वृधो अहभ्यः प्रांतरिक्षात्प्र समुद्रस्य धासेः। प्र वा-
तस्य प्रथसः प्र ज्मो अंतात्प्र सिंधुभ्यो रिरिचे प्र क्षितिभ्यः॥११॥
प्र शोशुचत्या उषसो न केतुरसिन्वा ते वर्ततामिंद्र हेतिः। अश्मे-

व विध्य दिव आ सृजानस्तपिष्ठेन हेषसा द्रोघमित्रान् ॥१२॥ अ-
न्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः । अन्विंद्रं रोदसी
वावशाने अन्वापो अजिहत जायमानं ॥१३॥ कर्हि स्वित्सा त
इंद्र चेत्यासदघस्य यद्भिनदो रक्ष एषत् । मित्रक्रुवो यच्छसने न
गावः पृथिव्या आपृगमुया शयंते ॥१४॥ शत्रूयंतो अभि ये न-
स्ततस्रे महि व्राधंत ओगणास इंद्र । अंधेनामित्रास्तमसा सचं-
तां सुज्योतिषो अक्तवस्ताँ अभि ष्युः ॥१५॥ पुरूणि हि त्वा सवना
जनानां ब्रह्माणि मंदन्गृणतामृषीणां । इमामाघोषन्नवसा स-
हूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ् ॥१६॥ एवा ते वयमिंद्र
भुंजतीनां विद्याम सुमतीनां नवानां । विद्याम वस्तोरवसा
गृणंतो विश्वामित्रा उत त इंद्र नूनं ॥१७॥ शुनं हुवेम मघवा-
नमिंद्रमस्मिन्भरे नृतमं वाजसातौ । शृण्वंतमुग्रमूतये समत्सु
घ्नंतं वृत्राणि संजितं धनानां ॥१८॥१९॥

॥९०॥ १-१६ नारायणः ॥ पुरुषः ॥ १-१५ अनुष्टुप् । १६ त्रिष्टुप् ॥

॥९०॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भू-
मिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं ॥१॥ पुरुष एवेदं सर्वं
यद्भूतं यच्च भव्यं । उतामृतत्वस्येशानो यदन्नेनातिरोहति
॥२॥ एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादो-
ऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥ त्रिपा-
दूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः । ततो विष्वङ्व्यक्रा-
मत्साशनानशने अभि ॥४॥ तस्माद्विराळजायत विरा-
जो अधि पूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो
पुरः ॥५॥१७॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।

वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥६॥ तं यज्ञं ब-
र्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजंत साध्या ऋष-
यश्च ये ॥७॥ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं । पशून्तांश्चक्रे
वायव्यानारण्यान्ग्राम्याश्च ये ॥८॥ तस्माद्यज्ञात्सर्वहुत ऋचः
सामानि जज्ञिरे । छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत
॥९॥ तस्मादश्वा अजायंत ये के चोभयादतः । गावो ह जज्ञिरे
तस्मात्तस्माज्जाता अजावयः ॥१०॥१८॥ यत्पुरुषं व्यदधुः क-
तिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू का ऊरू पादा
उच्येते ॥११॥ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू
तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥१२॥ चंद्रमा मनसो जा-
तश्चक्षोः सूर्यो अजायत । मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत
॥१३॥ नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत । पद्भ्यां
भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥१४॥ सप्तास्यास-
न्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्न-
न्पुरुषं पशुं ॥१५॥ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथ-
मान्यासन् । ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति
देवाः ॥१६॥१९॥७॥

॥९१॥ १–१५ अरुणो वैतहव्यः ॥ अग्निः ॥ १–१४ जगती । १५ त्रिष्टुप् ॥

॥९१॥ सं जागृवद्भिर्जरमाण इध्यते दमे दमूना इष-
यन्निळस्पदे । विश्वस्य होता हविषो वरेण्यो विभुर्वि-
भावा सुषखा सखीयते ॥१॥ स दर्शतश्रीरतिथिर्गृहेगृहे
वनेवने शिश्रिये तक्ववीरिव । जनंजनं जन्यो नाति मन्यते
विश आ क्षेति विश्यो३ विशंविशं ॥२॥ सुदक्षो दक्षैः क्रतुना-

सि सुक्रतुरग्ने कविः काव्येनासि विश्ववित् । वसुर्वसूनां
क्षयसि त्वमेक इद्द्यावा च यानि पृथिवी च पुष्यतः ॥ ३ ॥
प्रजानन्नग्ने तव योनिमृत्वियमिळायास्पदे घृतवंतमासदः ।
आ ते चिकित्र उषसामिवेतयोऽरेपसः सूर्यस्येव रश्म-
यः ॥ ४ ॥ तव श्रियो वर्ष्यस्येव विद्युतश्चित्राश्चिकित्र उष-
सां न केतवः । यदोषधीरभिसृष्टो वनानि च परि स्वयं
चिनुषे अन्नमास्ये ॥ ५ ॥ २० ॥ तमोषधीर्दधिरे गर्भमृत्वियं त-
मापो अग्निं जनयंत मातरः । तमित्समानं वनिनश्च वीरु-
धोऽन्तर्वतीश्च सुवते च विश्वहा ॥ ६ ॥ वातोपधूत इषितो
वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे । आ ते यतंते र-
थ्यो३ यथा पृथक्शर्धांस्यग्ने अजराणि धक्षतः ॥ ७ ॥ मेधाकारं
विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिं । तमिदर्भे
हविष्या समानमित्तमिन्महे वृणते नान्यं त्वत् ॥ ८ ॥ त्वामि-
दत्र वृणते त्वायवो होतारमग्ने विदथेषु वेधसः । यद्देवयंतो
दधति प्रयांसि ते हविष्मंतो मनवो वृक्तबर्हिषः ॥ ९ ॥ तवाग्ने
होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः । तव प्र-
शास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥ १० ॥
॥ २१ ॥ यस्तुभ्यमग्ने अमृताय मर्त्यः समिधा दाशदुत वा
हविष्कृति । तस्य होता भवसि यासि दूत्य१मुप ब्रूषे यजस्य-
ध्वरीयसि ॥ ११ ॥ इमा अस्मै मतयो वाचो अस्मदाँ ऋचो
गिरः सुष्टुतयः समग्मत । वसूयवो वसवे जातवेदसे वृद्धासु
चिद्वर्धनो यासु चाकनत् ॥ १२ ॥ इमां प्रत्नाय सुष्टुतिं नवी-
यसीं वोचेयमस्मा उशते शृणोतु नः । भूया अंतरा हृद्यस्य
निस्पृशे जायेव पत्य उशती सुवासाः ॥ १३ ॥ यस्मिन्नश्वास

ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः । कीलालपे
सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥१४॥ अहाव्यग्ने
हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः । वाजसनिं रयिमस्मे
सुवीरं प्रशस्तं धेहि यशसं बृहंतं ॥१५॥२२॥

॥९२॥ १–१५ शार्यातो मानवः ॥ विश्वे देवाः ॥ जगती ॥

॥९२॥ यज्ञस्य वो रथ्यं विश्पतिं विशां होतारमक्तोरति-
थिं विभावसुं । शोचञ्छुष्कासु हरिणीषु जर्भुरद्वृषा केतुर्यजतो
द्यामशायत ॥१॥ इममंजस्पामुभये अकृण्वत धर्माणमग्निं
विदथस्य साधनं । अक्तुं न यह्वमुषसः पुरोहितं तनूनपा-
तमरुषस्य निंसते ॥२॥ बळस्य नीथा वि पणेश्च मन्महे
वया अस्य प्रहुता आसुरत्तवे । यदा घोरासो अमृतत्वमा-
शतादिज्जनस्य दैव्यस्य चर्किरन् ॥३॥ ऋतस्य हि प्रसितिर्-
द्यौरुरु व्यचो नमो मह्य१रमतिः पनीयसी । इंद्रो मित्रो
वरुणः सं चिकित्रिरेऽथो भगः सविता पूतदक्षसः ॥४॥ प्र
रुद्रेण ययिना यंति सिंधवस्तिरो महीमरमतिं दधन्विरे । ये-
भिः परिज्मा परियन्नुरु ज्रयो वि रोरुवज्जठरे विश्वमुक्षते
॥५॥२३॥ क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो अ-
सुरस्य नीळयः । तेभिश्चष्टे वरुणो मित्रो अर्यमेंद्रो देवेभिरर्वशे-
भिरर्वशः ॥६॥ इंद्रे भुजं शशमानास आशत सूरो दृशीके वृषणश्च
पौंस्ये । प्र ये न्वस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः
॥७॥ सूरश्चिदा हरितो अस्य रीरमदिंद्रादा कश्चिद्भयते त-
वीयसः । भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरिः
स्तन्नबाधितः ॥८॥ स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय

नमसा दिदिष्टन। येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति
स्वयशा निकामभिः॥९॥ ते हि प्रजाया अभरंत वि श्रवो बृह-
स्पतिर्वृषभः सोमजामयः। यज्ञैरथर्वा प्रथमो वि धारयद्देवा द-
क्षैर्भृगवः सं चिकित्रिरे॥१०॥२४॥ ते हि द्यावापृथिवी भूरिरे-
तसा नराशंसश्चतुरंगो यमोऽदितिः। देवस्त्वष्टा द्रविणोदा ऋ-
भुक्षणः प्र रोदसी मरुतो विष्णुरर्हिरे॥११॥ उत स्य न उशिजा-
मुर्विया कविरहिः शृणोतु बुध्न्यो३ हवीमनि। सूर्यामासा वि-
चरंता दिविक्षिता धिया शमीनहुषी अस्य बोधतं॥१२॥ प्र नः
पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये। आत्मानं
वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतं॥१३॥
विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि।
ग्नाभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानं नृमणा अधा पतिं
॥१४॥ रेभदत्र जनुषा पूर्वो अंगिरा ग्रावाण ऊर्ध्वा अभि चक्षु-
रध्वरं। येभिर्विहाया अभवद्विचक्षणः पाथः सुमेकं स्वधितिर्व-
नन्वति॥१५॥२५॥

॥९३॥ १–१५ तान्वः पार्थ्यः॥ विश्वे देवाः॥ १.४–८.१०.१२.१४ प्रस्तारपंक्तिः।
२.३.१३ अनुष्टुप्। ९ अक्षरैःपंक्तिः। ११ न्यंकुसारिणी। १५ पुरस्ताद्बृहती॥

॥९३॥ महि द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी
सदं नः। तेभिर्नः पातं सह्यस एभिर्नः पातं शूषणि॥१॥
यज्ञेयज्ञे स मर्त्यो देवान्त्सपर्यति। यः सुम्नैर्दीर्घश्रुत्तम आ-
विवासात्येनान्॥२॥ विश्वेषामिरज्यवो देवानां वार्महः।
विश्वे हि विश्वमहसो विश्वे यज्ञेषु यज्ञियाः॥३॥ ते घा राजानो
अमृतस्य मंद्रा अर्यमा मित्रो वरुणः परिज्मा। कद्रुद्रो नृणां
स्तुतो मरुतः पूषणो भगः॥४॥ उत नो नक्तमपां वृषण्वसू

सूर्यामासा सदनाय सधन्या। सचा यत्सादेषामहिर्बुध्नेषु बुध्न्यः
॥५॥२६॥ उत नो देवावश्विना शुभस्पती धामभिर्मित्रावरुणा
उरुष्यतां। महः स राय एषतेऽति धन्वेव दुरिता ॥६॥ उत नो
रुद्रा चिन्मृळतामश्विना विश्वे देवासो रथस्पतिर्भगः। ऋभुर्वाज
ऋभुक्षणः परिज्मा विश्ववेदसः ॥७॥ ऋभुर्ऋभुक्षा ऋभुर्विधतो
मद आ ते हरी जूजुवानस्य वाजिना। दुष्टरं यस्य साम चिदृध-
ग्यज्ञो न मानुषः ॥८॥ कृधी नो अह्रयो देव सवितः स च स्तुषे
मघोनां। सहो न इंद्रो वह्निभिर्न्येषां चर्षणीनां चक्रं रश्मिं न
योयुवे ॥९॥ ऐषु द्यावापृथिवी धातं महदस्मे वीरेषु विश्वचर्ष-
णि श्रवः। पृक्षं वाजस्य सातये पृक्षं रायोत तुर्वणे ॥१०॥२७॥
एतं शंसमिंद्रास्मयुष्ट्वं कूचित्संतं सहसावन्नभिष्टये सदा पाह्य-
भिष्टये। मेदतां वेदता वसो ॥११॥ एतं मे स्तोमं तना न सूर्ये द्यु-
तद्यामानं वावृधंत नृणां। संवननं नाश्व्यं तष्टेवानपच्युतं ॥१२॥
वावर्त येषां राया युक्तैषां हिरण्ययी। नेमधिता न पौंस्या
वृथेव विष्टांता ॥१३॥ प्र तद्दुःशीमे पृथवाने वेने प्र रामे वो-
चमसुरे मघवत्सु। ये युक्त्वाय पंच शतास्मयु पथा विश्राव्ये-
षां ॥१४॥ अधीन्न्वत्र सप्ततिं च सप्त च। सद्यो दिदिष्ट तान्वः
सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः ॥१५॥२८॥

॥९४॥ १–१४ अर्बुदः काद्रवेयः सर्पः ॥ ग्रावाणः ॥ १–४. ६. ८–१३ जगती। ५. ७. १४ त्रिष्टुप् ॥

॥९४॥ प्रैते वदंतु प्र वयं वदाम ग्रावभ्यो वाचं वदता व-
दद्भ्यः। यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेंद्राय
सोमिनः ॥१॥ एते वदंति शतवत्सहस्रवदभि क्रंदंति ह-
रितेभिरासभिः। विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतु-

श्वित्पूर्वं हविरद्यमाशत ॥२॥ एते वदंत्यविदन्नना मधु न्यूंखयंते अधि पक्व आमिषि । वृक्षस्य शाखामरुणस्य बप्सतस्ते सूर्भर्वा वृषभाः प्रेमराविषुः ॥३॥ बृहद्वदंति मदिरेण मंदिनेंद्रं क्रोशंतोऽविदन्नना मधुं । संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयंतः पृथिवीमुपब्दिभिः ॥४॥ सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः । न्य१ङ्नि यंत्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः ॥५॥२९॥ उग्रा इव प्रवहंतः समायमुः साकं युक्ता वृषणो बिभ्रतो धुरः । यच्छ्वसंतो जग्रसाना अराविषुः शृण्व एषां प्रोथथो अर्वतामिव ॥६॥ दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः । दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः ॥७॥ ते अद्रयो दशयंत्रास आशवस्तेषामाधानं पर्येति हर्यतं । त ऊं सुतस्य सोम्यस्यांधसोंऽशोः पीयूषं प्रथमस्य भेजिरे ॥८॥ ते सोमादो हरी इंद्रस्य निंसतेंऽशुं दुहंतो अध्यासते गवि । तेभिर्दुग्धं पपिवान्त्सोम्यं मध्विंद्रो वर्धते प्रथते वृषायते ॥९॥ वृषा वो अंशुर्न किला रिषाथनेळावंतः सदमित्स्थनाशिताः । रैवत्येव महसा चारवः स्थन यस्य ग्रावाणो अजुषध्वमध्वरं ॥१०॥३०॥ तृदिला अतृदिलासो अद्रयोऽश्रमणा अशृथिता अमृत्यवः । अनातुरा अजराः स्थामविष्णवः सुपीवसो अतृषिता अतृष्णजः ॥११॥ ध्रुवा एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युंजते । अजुर्यासो हरिषाचो हरिद्रव आ द्यां रवेण पृथिवीमशुश्रवुः ॥१२॥ तदिद्वदंत्यद्रयो विमोचने यामन्नंजस्पा इव घेदुपब्दिभिः । वपंतो बीजमिव धान्याकृतः पृंचंति सोमं न मिनंति

बप्संतः ॥१३॥ सुते अध्वरे अधि वाचमक्रता क्रीळयो न मातरं
तुदंतः । वि षू मुंचा सुषुवुषो मनीषां वि वर्तंतामद्रयश्चायमा-
नाः ॥१४॥३१॥४॥

॥ ९५ ॥ १. ३. ६. ८–१०. १२. १४. १७ पुरूरवा ऐळः । २. ४. ५. ७. ११. १३. १५. १६. १८ उर्वशी ॥
१. ३. ६. ८–१०. १२. १४. १७ उर्वशी । २. ४. ५. ७. ११. १३. १५. १६. १८ पुरूरवा ऐळः ॥
त्रिष्टुप् ॥

॥९५॥ हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै
नु । न नौ मंत्रा अनुदितास एते मयस्करन्परतरे चनाहन् ॥१॥
किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव । पुरू-
रवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥२॥ इषुर्न श्रिय
इषुधेरसना गोषाः शतसा न रंहिः । अवीरे क्रतौ वि दविद्युत-
न्नोरा न मायुं चितयंत धुनयः ॥३॥ सा वसु दधती श्वशुराय वय
उषो यदि वष्ट्यंतिगृहात् । अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं
श्नथिता वैतसेन ॥४॥ त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म
मेऽव्यत्यै पृणासि । पुरूरवोऽनु ते केतमायं राजा मे वीर त-
न्व१स्तदासीः ॥५॥१॥ या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदेच-
क्षुर्न ग्रंथिनी चरण्युः । ता अंजयोऽरुणयो न सस्रुः श्रिये गावो
न धेनवोऽनवंत ॥६॥ समस्मिञ्जायमान आसत ग्ना उतेम-
वर्धन्नद्य१ः स्वगूर्ताः । महे यत्त्वा पुरूरवो रणायावर्धयन्दस्यु-
हत्याय देवाः ॥७॥ सचा यदासु जहतीष्वत्कममानुषीषु मानुषो
निषेवे । अप स्म मत्तरसंती न भुज्युस्ता अत्रसन्रथस्पृशो ना-
श्वाः ॥८॥ यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्र-
तुभिर्न पृंक्ते । ता आतयो न तन्वः शुंभत स्वा अश्वासो न
क्रीळयो दंदशानाः ॥९॥ विद्युन्न या पतंती दविद्योद्भरंती मे
अप्या काम्यानि । जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत

दीर्घमायुः ॥१०॥२॥ जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः। अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि ॥११॥ कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन्। को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥१२॥ प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रंदद्आध्ये शिवायै। प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः ॥१३॥ सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गंतवा उ। अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥१४॥ पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन्। न वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयान्येता ॥१५॥३॥ यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः। घृतस्य स्तोकं सकृदह्न आश्नां तादिवेदं तातृपाणा चरामि ॥१६॥ अंतरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः। उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ॥१७॥ इति त्वा देवा इम आहुरैळ यथेमेतद्भवसि मृत्युबंधुः। प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥१८॥४॥

॥९६॥ १–१३ बरुः सर्वहरिर्वैंद्रः ॥ हरिस्तुतिः ॥ १–११ जगती। १२, १३ त्रिष्टुप् ॥

॥९६॥ प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदं। घृतं न यो हरिभिश्चारु सेचत आ त्वा विशंतु हरिवर्पसं गिरः ॥१॥ हरिं हि योनिमभि ये समस्वरन्हिन्वंतो हरी दिव्यं यथा सदः। आ यं पृणंति हरिभिर्न धेनव इंद्राय शूषं हरिवंतमर्चत ॥२॥ सो अस्य वज्रो हरितो य आयसो हरिर्नि-

कामो हरिरा गभस्त्योः। द्युम्नी सुशिप्रो हरिमन्युसायक इंद्रे नि रूपा हरिता मिमिक्षिरे ॥३॥ दिवि न केतुरधि धायि हर्यतो विव्यचद्वज्रो हरितो न रंह्या। तुददहिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिंभरः ॥४॥ त्वंत्वमहर्यथा उपस्तुतः पूर्वेभिरिंद्र हरिकेश यज्वभिः। त्वं हर्यसि तव विश्वमुक्थ्य१मसामि राधो हरिजात हर्यतं ॥५॥५॥ ता वज्रिणं मंदिनं स्तोम्यं मद इंद्रं रथे वहतो हर्यता हरी। पुरूण्यस्मै सवनानि हर्यत इंद्राय सोमा हरयो दधन्विरे ॥६॥ अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन्हरयो हरी तुरा। अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवंतमानशे ॥७॥ हरिश्मशारुर्हरिकेश आयसस्तुरस्पेये यो हरिपा अवर्धत। अर्वद्भिर्यो हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी ॥८॥ स्रुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः। प्र यत्कृते चमसे मर्मृजद्धरी पीत्वा मदस्य हर्यतस्यांधसः ॥९॥ उत स्म सद्म हर्यतस्य पस्त्यो३रत्यो न वाजं हरिवाँ अचिक्रदत्। मही चिद्धि धिषणाहर्यदोजसा बृहद्वयो दधिषे हर्यतश्चिदा ॥१०॥६॥ आ रोदसी हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियं। प्र पस्त्यमसुर हर्यतं गोराविष्कृधि हरये सूर्याय ॥११॥ आ त्वा हर्यंतं प्रयुजो जनानां रथे वहंतु हरिशिप्रमिंद्र। पिबा यथा प्रतिभृतस्य मध्वो हर्यन्यज्ञं सधमादे दशोणिं ॥१२॥ अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते। ममद्धि सोमं मधुमंतमिंद्र सत्रा वृषञ्जठर आ वृषस्व ॥१३॥७॥

॥ ९७ ॥ १–२३ भिषगाथर्वणः ॥ ओषधीस्तुतिः ॥ अनुष्टुप् ॥

॥९७॥ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु
बभ्रूणामहं शतं धामानि सप्त च ॥१॥ शतं वो अंब धामानि
सहस्रमुत वो रुहः। अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥२॥
ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः। अश्वा इव सजित्व-
रीर्वीरुधः पारयिष्ण्वः ॥३॥ ओषधीरिति मातरस्तद्वो देवीरुप
ब्रुवे। सनेयमश्वं गां वास आत्मानं तव पूरुष ॥४॥ अश्वत्थे वो
निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ
पूरुषं ॥५॥८॥ यत्रौषधीः समग्मत राजानः समिताविव। विप्रः
स उच्यते भिषग्रक्षोहामीवचातनः ॥६॥ अश्वावतीं सोमाव-
तीमूर्जयंतीमुदोजसं। आवित्सि सर्वा ओषधीरस्मा अरिष्टता-
तये ॥७॥ उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते। धनं सनि-
ष्यंतीनामात्मानं तव पूरुष ॥८॥ इष्कृतिर्नाम वो माताथो
यूयं स्थ निष्कृतीः। सीराः पतत्रिणीः स्थन यदामयति निष्कृथ
॥९॥ अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः। ओषधीः
प्राचुच्यवुर्यत्किं च तन्वो३ रपः ॥१०॥९॥ यदिमा वाजयन्नह-
मोषधीर्हस्त आदधे। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो
यथा ॥११॥ यस्यौषधीः प्रसर्पथांगमंगं परुष्परुः। ततो यक्ष्मं
वि बाधध्व उग्रो मध्यमशीरिव ॥१२॥ साकं यक्ष्म प्र पत चाषेण
किकिदीविना। साकं वातस्य ध्राज्या साकं नश्य निहाकया
॥१३॥ अन्या वो अन्यामवत्वन्यान्यस्या उपावत। ताः सर्वाः
संविदाना इदं मे प्रावता वचः ॥१४॥ याः फलिनीर्या
अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो
मुंचंत्वंहसः ॥१५॥१०॥ मुंचंतु मा शपथ्या३दथो वरुण्या-

दुत। अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥१६॥ अवप-
तंतीरवदन्दिव ओषधयस्परि। यं जीवमश्नवामहै न स रिष्याति
पूरुषः ॥१७॥ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः।
तासां त्वमस्युत्तमारं कामाय शं हृदे ॥१८॥ या ओषधीः सोमरा-
ज्ञीर्विष्ठिताः पृथिवीमनु। बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यं
॥१९॥ मा वो रिषत्खनिता यस्मै चाहं खनामि वः। द्विपच्चतु-
ष्पदस्माकं सर्वमस्त्वनातुरं ॥२०॥ याश्चेदमुपशृण्वंति याश्च दूरं
परागताः। सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यं ॥२१॥ ओष-
धयः सं वदंते सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं रा-
जन्पारयामसि ॥२२॥ त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः।
उपस्तिरस्तु सो३स्माकं यो अस्माँ अभिदासति ॥२३॥११॥

॥ ९८ ॥ १–१२ देवापिरार्ष्टिषेणः ॥ देवाः ॥ त्रिष्टुप् ॥

॥९८॥ बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो
वासि पूषा। आदित्यैर्वा यद्वसुभिर्मरुत्वान्स पर्जन्यं शंत-
नवे वृषाय ॥१॥ आ देवो दूतो अजिरश्चिकित्वान्त्वद्देवापे
अभि मामगच्छत्। प्रतीचीनः प्रति मामा ववृत्स्व दधामि
ते द्युमतीं वाचमासन् ॥२॥ अस्मे धेहि द्युमतीं वाचमा-
सन्बृहस्पते अनमीवामिषिरां। यया वृष्टिं शंतनवे वनाव दि-
वो द्रप्सो मधुमाँ आ विवेश ॥३॥ आ नो द्रप्सा मधुमंतो
विशंत्विंद्र देह्यधिरथं सहस्रं। नि षीद होत्रमृतुथा यजस्व
देवान्देवापे हविषा सपर्य ॥४॥ आर्ष्टिषेणो होत्रमृषिर्नि-
षीदन्देवापिर्देवसुमतिं चिकित्वान्। स उत्तरस्मादधरं स-
मुद्रमपो दिव्या असृजद्वर्ष्या अभि ॥५॥ अस्मिन्त्समुद्रे अध्यु-

त्तरस्मिन्नापो देवेभिर्निवृता अतिष्ठन्। ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मृक्षिणीषु॥६॥१२॥ यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत्। देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत्॥७॥ यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे। विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमंतं॥८॥ त्वां पूर्व ऋषयो गीर्भिरायन्त्वामध्वरेषु पुरुहूत विश्वे। सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि॥९॥ एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा। तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि॥१०॥ एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इंद्राय भागं। विद्वान्पथ ऋतुशो देवयानानप्यौलानं दिवि देवेषु धेहि॥११॥ अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध। अस्मात्समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह॥१२॥१३॥

॥ ९९ ॥ १–१२ वम्रो वैखानसः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥९९॥ कं नश्चित्रमिषण्यसि चिकित्वान्पृथुग्मानं वाश्रं वावृधध्यै। कत्तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमपिन्वत्॥१॥ स हि द्युता विद्युता वेति साम पृथुं योनिमसुरत्वा ससाद। स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः॥२॥ स वाजं यातापदुष्पदा यन्त्स्वर्षाता परि षदत्सनिष्यन्। अनर्वा यच्छतदुरस्य वेदो घ्नञ्छिश्नदेवाँ अभि वर्पसा भूत्॥३॥ स यह्व्यो३वनीर्गोष्वर्वा जुहोति प्रधन्यासु सस्रिः। अपादो यत्र युज्यासोऽरथा द्रोण्य-

श्वास ईरते घृतं वाः ॥४॥ स रुद्रेभिरशस्तवार ऋभ्वा हित्वी
गयमारेअवद्य आगात् । वम्रस्य मन्ये मिथुना विवव्री अन्नम-
भीत्यारोदयन्मुषायन् ॥५॥ स इद्दासं तुवीरवं पतिर्दन्षळक्षं
त्रिशीर्षाणं दमन्यत् । अस्य त्रितो न्वोजसा वृधानो विपा
वराहमयोअग्रया हन् ॥६॥१४॥ स द्रुह्वणे मनुष ऊर्ध्वसान आ
साविषदर्शसानाय शरुं । स नृतमो नहुषोऽस्मत्सुजातः पु-
रोऽभिनदर्हन्दस्युहत्ये ॥७॥ सो अभ्रियो न यवस उदन्यन्क्षयाय
गातुं विदन्नो अस्मे । उप यत्सीददिन्दुं शरीरैः श्येनोऽयो-
पाष्टिर्हन्ति दस्यून् ॥८॥ स व्राधतः शवसानेभिरस्य कुत्साय
शुष्णं कृपणे परादात् । अयं कविमनयच्छस्यमानमत्कं यो
अस्य सनितोत नृणां ॥९॥ अयं दशस्यन्नर्येभिरस्य दस्मो दे-
वेभिर्वरुणो न मायी । अयं कनीन ऋतुपा अवेद्यमिमीताररुं
यश्चतुष्पात् ॥१०॥ अस्य स्तोमेभिरौशिज ऋजिश्वा व्रजं दर-
यद्वृषभेण पिप्रोः । सुत्वा यद्यजतो दीदयद्गीः पुर इयानो
अभि वर्पसा भूत् ॥११॥ एवा महो असुर वक्षथाय वम्रकः
पड्भिरुप सर्पदिन्द्रं । स इयानः करति स्वस्तिमस्मा इषमूर्जं सु-
क्षितिं विश्वमाभाः ॥१२॥१५॥८॥

॥१००॥ १—१२ दुवस्युर्वान्दनः ॥ विश्वे देवाः ॥ १—११ जगती । १२ त्रिष्टुप् ॥

॥१००॥ इन्द्र दृह्य मघवन्त्वावदिद्भुज इह स्तुतः सुतपा
बोधि नो वृधे । देवेभिर्नः सविता प्रावतु श्रुतमा सर्वता-
तिमदितिं वृणीमहे ॥१॥ भराय सु भरत भागमृत्वियं प्र वा-
यवे शुचिपे क्रन्ददिष्टये । गौरस्य यः पयसः पीतिमानश आ
सर्वतातिमदितिं वृणीमहे ॥२॥ आ नो देवः सविता साविष-

इयं ऋजूयते यजमानाय सुन्वते । यथा देवान्प्रतिभूषेम पाक-
वदा सर्वतातिमदितिं वृणीमहे ॥३॥ इंद्रो अस्मे सुमना अस्तु
विश्वहा राजा सोमः सुवितस्याध्येतु नः । यथायथा मित्रधि-
तानि संदधुरा सर्वतातिमदितिं वृणीमहे ॥४॥ इंद्र उक्थेन
शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः । यज्ञो मनुः प्रमतिर्नः
पिता हि कमा सर्वतातिमदितिं वृणीमहे ॥५॥ इंद्रस्य नु सुकृतं
दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः । यज्ञश्च भूद्विदथे
चारुरंतम आ सर्वतातिमदितिं वृणीमहे ॥६॥१६॥ न वो गुहा
चकृम भूरि दुष्कृतं नाविष्ट्यं वसवो देवहेळनं । माकिर्नो देवा
अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ॥७॥ अपामीवां
सविता साविषन्न्य१ग्वरीय इदप सेधंत्वद्रयः । ग्रावा यत्र मधु-
षुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ॥८॥ ऊर्ध्वो ग्रावा
वसवोऽस्तु सोतरि विश्वा द्वेषांसि सनुतर्युयोत । स नो देवः
सविता पायुरीड्य आ सर्वतातिमदितिं वृणीमहे ॥९॥ ऊर्जं गा-
वो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अंङ्ध्वे । तनूरेव
तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ॥१०॥ क्रतुप्रावा
जरिता शश्वतामव इंद्र इद्भद्रा प्रमतिः सुतावतां । पूर्णमूधर्दिव्यं
यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे ॥११॥ चित्रस्ते भानुः
क्रतुप्रा अभिष्टिः संति स्पृधो जरणिप्रा अधृष्टाः । रजिष्ठया रज्या
पश्व आ गोस्तूतूर्षति पर्यग्रं दुवस्युः ॥१२॥१७॥

॥१०१॥ १–१२ बुधः सौम्यः ॥ विश्वे देवा ऋत्विजो वा ॥ १–३. ७. ८. १०. ११ त्रिष्टुप् । ४. ६ गायत्री । ५ बृहती । ९. १२ जगती ॥

॥१०१॥ उद्बुध्यध्वं समनसः सखायः समग्निमिंध्वं बहवः
सनीळाः । दधिक्रामग्निमुषसं च देवीमिंद्रावतोऽवसे नि

ह्वये वः ॥१॥ मंद्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं
कृणुध्वं। इष्कृणुध्वमायुधारं कृणुध्वं प्रांचं यज्ञं प्र णयता सखायः
॥२॥ युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजं। गिरा
च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥३॥ सीरा
युंजंति कवयो युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नया ॥४॥
निराहावान्कृणोतन सं वरत्रा दधातन। सिंचामहा अवत-
मुद्रिणं वयं सुषेकमनुपक्षितं ॥५॥ इष्कृताहावमवतं सुवरत्रं
सुषेचनं। उद्रिणं सिंचे अक्षितं ॥६॥१८॥ प्रीणीताश्वान्हितं
जयाथ स्वस्तिवाहं रथमित्कृणुध्वं। द्रोणाहावमवतमश्मचक्र-
मंसत्रकोशं सिंचता नृपाणं ॥७॥ व्रजं कृणुध्वं स हि वो नृपा-
णो वर्म सीव्यध्वं बहुला पृथूनि। पुरः कृणुध्वमायसीरधृष्टा मा
वः सुस्रोच्चमसो दृंहता तं ॥८॥ आ वो धियं यज्ञियां वर्त ऊतये
देवा देवीं यजतां यज्ञियामिह। सा नो दुहीयद्यवसेव गत्वी सह-
स्रधारा पयसा मही गौः ॥९॥ आ तू षिंच हरिमीं द्रोरुपस्थे
वाशीभिस्तक्षताश्मन्मयीभिः। परि ष्वजध्वं दश कक्ष्याभिरुभे
धुरौ प्रति वह्निं युनक्त ॥१०॥ उभे धुरौ वह्निरापिब्दमानो-
ऽतर्योनेव चरति द्विजानिः। वनस्पतिं वन आस्थापयध्वं नि
षू दधिध्वमखनंत उत्सं ॥११॥ कपृन्नरः कपृथमुद्दधातन चोद-
यत खुदत वाजसातये। निष्टिग्र्यः पुत्रमा च्यावयोतय इंद्रं
सबाध इह सोमपीतये ॥१२॥१९॥

॥१०२॥ १–१२ मुद्गलो भार्म्यश्वः ॥ द्रुघण इंद्रो वा ॥ १. ३. १२ बृहती । २. ४–११ त्रिष्टुप् ॥

॥१०२॥ प्र ते रथं मिथूकृतमिंद्रोऽवतु धृष्णुया। अस्मिन्ना-
जौ पुरुहूत श्रवाय्ये धनभक्षेषु नोऽव ॥१॥ उत्स्म वातो

वहति वासो अस्या अधिरथं यदजयत्सहस्रं। रथीरभून्मुद्गला-
नी गविष्टौ भरे कृतं व्यचेदिंद्रसेना ॥२॥ अंतर्यच्छ जिघांसतो
वज्रमिंद्राभिदासतः। दासस्य वा मघवन्नार्यस्य वा सनुतर्यवया
वधं ॥३॥ उद्नो ह्रदमपिबज्जर्हृषाणः कूटं स्म तृंहदभिमातिमेति।
प्र मुष्कभारः श्रव इच्छमानोऽजिरं बाहू अभरत्सिषासन् ॥४॥
न्यक्रंदयन्नुपयंत एनममेहयन्वृषभं मध्य आजेः। तेन सूभर्वं श-
तवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ॥५॥ ककर्दवे वृषभो युक्त
आसीदवावचीत्सारथिरस्य केशी। दुधेर्युक्तस्य द्रवतः सहानस
ऋच्छंति ष्मा निष्पदो मुद्गलानीं ॥६॥२०॥ उत प्रधिमुद्दहन्नस्य
विद्वानुपायुनग्वंसगमत्र शिक्षन्। इंद्र उदावत्पतिमघ्न्याना-
मरंहत पद्याभिः ककुद्मान् ॥७॥ शुनमष्ट्राव्यचरत्कपर्दी वर-
त्रायां दार्वानह्यमानः। नृम्णानि कृण्वन्बहवे जनाय गाः
पस्पशानस्तविषीरधत्त ॥८॥ इमं तं पश्य वृषभस्य युंजं का-
ष्ठाया मध्ये द्रुघणं शयानं। येन जिगाय शतवत्सहस्रं गवां
मुद्गलः पृतनाज्येषु ॥९॥ आरे अघा को न्वि१त्था ददर्श
यं युंजंति तम्वा स्थापयंति। नास्मै तृणं नोदकमा भरंत्युत्तरो
धुरो वहति प्रदेदिशत् ॥१०॥ परिवृक्तेव पतिविद्यमानट् पी-
प्याना कूचक्रेणेव सिंचन्। एषैष्या चिद्रथ्या जयेम सुमं-
गलं सिनवदस्तु सातं ॥११॥ त्वं विश्वस्य जगतश्चक्षुरिंद्रासि
चक्षुषः। वृषा यदाजिं वृषणा सिषाससि चोदयन्वध्रिणा यु-
जा ॥१२॥२१॥

॥१०३॥ १—१३ अप्रतिरथ ऐंद्रः ॥ १—३. ५—११ इंद्रः। ४ बृहस्पतिः। १२ अप्वा।
१३ इंद्रो मरुतो वा ॥ १—१२ त्रिष्टुप्। १३ अनुष्टुप् ॥

॥१०३॥ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभण-

र्षणीनां । संक्रंदनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिंद्रः ॥ १ ॥ संक्रंदनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिंद्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ २ ॥ स इषुहस्तैः स निषंगिभिर्वशी संस्रष्टा स युध इंद्रो गणेन । संसृष्टजित्सोमपा बाहुशर्ध्यु१ग्रधन्वा प्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः । प्रभंजन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां ॥ ४ ॥ बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहोजा जैत्रमिंद्र रथमा तिष्ठ गोवित् ॥ ५ ॥ गोत्रभिदं गोविदं वज्रबाहुं जयंतमज्म प्रमृणंतमोजसा । इमं सजाता अनु वीरयध्वमिंद्रं सखायो अनु सं रभध्वं ॥ ६ ॥ २२ ॥

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिंद्रः । दुश्च्यवनः पृतनाषाळयुध्यो३ऽस्माकं सेना अवतु प्र युत्सु ॥ ७ ॥ इंद्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रं ॥ ८ ॥ इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रं । महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥ ९ ॥ उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यंतु घोषाः ॥ १० ॥ अस्माकमिंद्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयंतु । अस्माकं वीरा उत्तरे भवंत्वस्माँ उ देवा अवता हवेषु ॥ ११ ॥ अमीषां चित्तं प्रतिलोभयंती गृहाणांगान्यप्वे परेहि । अभि प्रेहि निर्दह हृत्सु शोकैरंधेनामित्रास्तमसा

सचंतां ॥१२॥ प्रेता जयता नर इंद्रो वः शर्म यच्छतु। उग्रा वः संतु बाहवोऽनाधृष्या यथासथ ॥१३॥२३॥

॥१०४॥ १–११ अष्टको वैश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१०४॥ असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयं। तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इंद्र पिबा सुतस्य ॥१॥ अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व। मिमिक्षुर्यमद्रय इंद्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः ॥२॥ प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां प्रयै सुतस्य हर्यश्व तुभ्यं। इंद्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ॥३॥ ऊती शचीवस्तव वीर्येण वयो दधाना उशिज ऋतज्ञाः। प्रजावदिंद्र मनुषो दुरोणे तस्थुर्गृणंतः सधमाद्यासः ॥४॥ प्रणीतिभिष्टे हर्यश्व सुष्टोः सुषुम्नस्य पुरुरुचो जनासः। मंहिष्ठामूतिं वितिरे दधानाः स्तोतार इंद्र तव सूनृताभिः ॥५॥२४॥ उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य। इंद्र त्वा यज्ञः क्षममाणमानड् दाश्वाँ अस्यध्वरस्य प्रकेतः ॥६॥ सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिं। उप भूषंति गिरो अप्रतीतमिंद्रं नमस्या जरितुः पनंत ॥७॥ सप्तापो देवीः सुरणा अमृक्ता याभिः सिंधुमतर इंद्र पूर्भित्। नवतिं स्रोत्या नव च स्रवंतीर्देवेभ्यो गातुं मनुषे च विंदः ॥८॥ अपो महीरभिशस्तेरमुंचोऽजागरास्वधि देव एकः। इंद्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वायुस्तन्वं पुपुष्याः ॥९॥ वीरेण्यः क्रतुरिंद्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे। आर्दयद्वृत्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः ॥१०॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं

वाजसातौ । शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥११॥२५॥

॥१०५॥ १—११ कौत्सो दुर्मित्रो नाम्ना सुमित्रो गुणतः सुमित्रो वा नाम्ना दुर्मित्रो गुणतः ॥ इंद्रः ॥ १ उष्णिग्गायत्री वा । २.७ पिपीलिकमध्या । ३—६.८—१० उष्णिक् । ११ त्रिष्टुप् ॥

॥१०५॥ कदा वसो स्तोत्रं हर्यत आव श्मशा रुधद्वाः । दीर्घं सुतं वाताप्याय ॥१॥ हरी यस्य सुयुजा विव्रता वेरर्वंतानु शेपा । उभा रजी न केशिना पतिर्दन् ॥२॥ अप योरिंद्रः पापज आ मर्तो न शश्रमाणो बिभीवान् । शुभे यद्युयुजे तविषीवान् ॥३॥ सचायोरिंद्रश्चर्कृष आँ उपानसः सपर्यन् । नदयोर्विव्रतयोः शूर इंद्रः ॥४॥ अधि यस्तस्थौ केशवंता व्यचस्वंता न पुष्ट्यै । वनोति शिप्राभ्यां शिप्रिणीवान् ॥५॥२६॥ प्रास्तौदृष्वौजा ऋष्वेभिस्ततक्ष शूरः शवसा । ऋभुर्न क्रतुभिर्मातरिश्वा ॥६॥ वज्रं यश्चक्रे सुहनाय दस्यवे हिरीमशो हिरीमान् । अरुतहनुरद्भुतं न रजः ॥७॥ अव नो वृजिना शिशीह्यृचा वनेमानृचः । नाब्रह्मा यज्ञ ऋधग्जोषति त्वे ॥८॥ ऊर्ध्वा यत्ते त्रेतिनी भूद्यज्ञस्य धूर्षु सद्मन् । सजूर्नावं स्वयशसं सचायोः ॥९॥ श्रिये ते पृश्निरुपसेचनी भूच्छ्रिये दर्विररेपाः । यया स्वे पात्रे सिंचस उत् ॥१०॥ शतं वा यदसुर्य प्रति त्वा सुमित्र इत्थास्तौद्दुर्मित्र इत्थास्तौत् । आवो यद्दस्युहत्ये कुत्सपुत्रं प्रावो यद्दस्युहत्ये कुत्सवत्सं ॥११॥२७॥५॥

॥१०६॥ १—११ भूतांशः काश्यपः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥१०६॥ उभा उ नूनं तदिदर्थयेथे वि तन्वाथे धियो वस्त्रापसेव । सध्रीचीना यातवे प्रेमजीगः सुदिनेव पृक्ष आ तंसयेथे ॥१॥ उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव

ष्वात्र्या शासुरेथः। दूतेव हि ष्ठो यशसा जनेषु माप स्थातं महि-
षेवावपानात् ॥२॥ साकंयुजा शकुनस्येव पक्षा पश्वेव चित्रा
यजुरा गमिष्टं। अग्निरिव देवयोर्दीदिवांसा परिज्मानेव य-
जथः पुरुत्रा ॥३॥ आपी वो अस्मे पितरेव पुत्रोग्रेव रुचा नृप-
तीव तुर्यै। इर्येव पुष्ट्यै किरणेव भुज्यै श्रुष्टीवानेव हवमा गमिष्टं
॥४॥ वंसगेव पूषर्या शिंबाता मित्रेव ऋता शतरा शातपंता।
वाजेवोच्चा वयसा घर्म्येष्ठा मेषेवेषा सपर्या३ पुरीषा ॥५॥१॥
सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका। उदन्यजेव
जेमना मदेरू ता मे जराय्वजरं मरायु ॥६॥ पज्रेव चर्चरं जारं
मरायु क्षद्मेवार्थेषु तर्तरीथ उग्रा। ऋभू नापत्खरमज्रा खरज्रु-
र्वायुर्न पर्फरत्क्षयद्रयीणां ॥७॥ घर्मेव मधु जठरे सनेरू भगे-
विता तुर्फरी फारिवारं। पतरेव चचरा चंद्रनिर्णिङ्मनऋंगा
मनन्या३ न जग्मी ॥८॥ बृहंतेव गंभरेषु प्रतिष्ठां पादेव गाधं
तरते विदाथः। कर्णेव शासुरनु हि स्मराथोंऽशेव नो भजतं
चित्रमप्नः ॥९॥ आरंगरेव मध्वेरयेथे सारघेव गवि नीची-
नबारे। कीनारेव स्वेदमासिष्विदाना क्षामेवोर्जा सूयव-
सात्सचेथे ॥१०॥ ऋध्याम स्तोमं सनुयाम वाजमा नो मंत्रं
सरथेहोप यातं। यशो न पक्वं मधु गोष्वंतरा भूतांशो अश्विनोः
काममप्राः ॥११॥२॥

॥१०७॥ १–११ दिव्यो दक्षिणा वा प्राजापत्या ॥ दक्षिणा तद्दातारो वा ॥ १–३.५–११
त्रिष्टुप्। ४ जगती ॥

॥१०७॥ आविरभून्महि माघोनमेषां विश्वं जीवं तम-
सो निरमोचि। महि ज्योतिः पितृभिर्दत्तमागादुरुः पंथा

दक्षिणाया अदर्शि ॥१॥ उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्व-
दाः सह ते सूर्येण। हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्र
तिरंत आयुः ॥२॥ दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो
नहि ते पृणंति। अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः
पृणंति ॥३॥ शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते
हविः। ये पृणंति प्र च यच्छंति संगमे ते दक्षिणां दुहते सप्तमा-
तरं ॥४॥ दक्षिणावान्प्रथमो हूत एति दक्षिणावान्ग्रामणीरग्र-
मेति। तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय
॥५॥३॥ तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशा-
सं। स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ॥६॥
दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चंद्रमुत यद्धिरण्यं।
दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजा-
नन् ॥७॥ न भोजा मम्रुर्न न्यर्थमीयुर्न रिष्यंति न व्यथंते ह भो-
जाः। इदं यद्विश्वं भुवनं स्वश्चैतत्सर्वं दक्षिणैभ्यो ददाति ॥८॥ भो-
जा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं१ या सुवासाः।
भोजा जिग्युरंतःपेयं सुराया भोजा जिग्युर्ये अहूताः प्रयंति
॥९॥ भोजायाश्वं सं मृजंत्याशुं भोजायास्ते कन्या३ शुंभमाना।
भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रं
॥१०॥ भोजमश्वाः सुष्ठुवाहो वहंति सुवृद्रथो वर्तते दक्षि-
णायाः। भोजं देवासोऽवता भरेषु भोजः शत्रून्समनीकेषु
जेता ॥११॥४॥

॥१०८॥ १. ३. ५. ७. ९ पणयोऽसुराः। २. ४. ६. ८. १०. ११ सरमा देवशुनी ॥ १. ३. ५. ७. ९ सरमा। २. ४. ६. ८. १०. ११ पणयः ॥ त्रिष्टुप् ॥

॥१०८॥ किमिच्छंती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः

पराचैः। कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि ॥१॥ इंद्रस्य दूतीरिषिता चरामि मह इच्छंती पणयो निधीन्वः। अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि ॥२॥ कीदृङ्ङिंद्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात्। आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति ॥३॥ नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात्। न तं गूहंति स्रवतो गभीरा हता इंद्रेण पणयः शयध्वे ॥४॥ इमा गावः सरमे या ऐच्छः परि दिवो अंतान्सुभगे पतंती। कस्त एना अव सृजादयुध्व्युतास्माकमायुधा संति तिग्मा ॥५॥५॥ असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः संतु पापीः। अधृष्टो व एतवा अस्तु पंथा बृहस्पतिर्व उभया न मृळात् ॥६॥ अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः। रक्षंति तं पणयो ये सुगोपा रेकु पदमलकमा जगंथ ॥७॥ एह गमन्नृषयः सोमशिता अयास्यो अंगिरसो नवग्वाः। त एतमूर्वं वि भजंत गोनामथैतद्वचः पणयो वमन्नित् ॥८॥ एवा च त्वं सरम आजगंथ प्रबाधिता सहसा दैव्येन। स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ॥९॥ नाहं वेद भ्रातृत्वं नो स्वसृत्वमिंद्रो विदुरंगिरसश्च घोराः। गोकामा मे अच्छदयन्यदायमपात इत पणयो वरीयः ॥१०॥ दूरमित पणयो वरीय उद्गावो यंतु मिनतीर्ऋतेन। बृहस्पतिर्या अविंदन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ॥११॥६॥

॥१०९॥ १–७ जुहूर्ब्रह्मजायोर्ध्वनाभा वा ब्राह्मः॥ विश्वे देवाः॥ १–५ त्रिष्टुप्। ६. ७ अनुष्टुप्॥

॥१०९॥ तेऽवदन्प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलि-

लो मातरिश्वा। वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा
ऋतेन॥१॥ सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणी-
यमानः। अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या
निनाय॥२॥ हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेयमिति चेद-
वोचन्। न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य
॥३॥ देवा एतस्यामवदंत पूर्वे सप्तऋषयस्तपसे ये निषेदुः। भीमा
जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन्॥४॥ ब्रह्म-
चारी चरति वेविषद्विषः स देवानां भवत्येकमंगं। तेन जाया-
मन्वविंदद्बृहस्पतिः सोमेन नीतां जुह्वं१न देवाः॥५॥ पुनर्वै
देवा अददुः पुनर्मनुष्या उत। राजानः सत्यं कृण्वाना ब्रह्मजायां
पुनर्ददुः॥६॥ पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषं। ऊर्जं
पृथिव्या भक्त्वायोरुगायमुपासते॥७॥७॥

॥११०॥ १-११ जमदग्निस्तत्सुतो वा रामः॥ आप्रियः॥ त्रिष्टुप्॥

॥११०॥ समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि
जातवेदः। आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि
प्रचेताः॥१॥ तनूनपात्पथ ऋतस्य यानान्मध्वा समंजन्स्वद-
या सुजिह्व। मन्मानि धीभिरुत यज्ञमृंधन्देवत्रा च कृ-
णुह्यध्वरं नः॥२॥ आजुह्वान ईड्यो वंद्यश्चा याह्यग्ने वसु-
भिः सजोषाः। त्वं देवानामसि यह्व होता स एनान्यक्षी-
षितो यजीयान्॥३॥ प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तो-
रस्या वृज्यते अग्रे अह्नां। व्यु प्रथते वितरं वरीयो देवेभ्यो
अदितये स्योनं॥४॥ व्यचस्वतीरुर्विया वि श्रयंतां पतिभ्यो
न जनयः शुंभमानाः। देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भ-

वत सुप्रायणाः ॥५॥८॥ आ सुष्वयंती यजते उपाके उषासानक्ता
सदतां नि योनौ। दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्र-
पिशं दधाने ॥६॥ दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं
मनुषो यजध्यै। प्रचोदयंता विदथेषु कारू प्राचीनं ज्योतिः प्रदि-
शा दिशंता ॥७॥ आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चे-
तयंती। तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदंतु ॥८॥ य
इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा। तमद्य
होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥९॥ उपा-
वसृज त्मन्या समंजन्देवानां पाथ ऋतुथा हवींषि। वनस्पतिः
शमिता देवो अग्निः स्वदंतु हव्यं मधुना घृतेन ॥१०॥ सद्यो जा-
तो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः। अस्य होतुः प्र-
दिश्यृतस्य वाचि स्वाहाकृतं हविरदंतु देवाः ॥११॥९॥

॥ १११ ॥ १—१० अष्ट्रादंष्ट्रो वैरूपः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१११॥ मनीषिणः प्र भरध्वं मनीषां यथायथा मतयः
संति नृणां। इंद्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वण-
स्युर्विदानः ॥१॥ ऋतस्य हि सदसो धीतिरद्यौत्सं गार्ष्टेयो
वृषभो गोभिरानट्। उदतिष्ठत्तविषेणा रवेण महांति चित्सं
विव्याचा रजांसि ॥२॥ इंद्रः किल श्रुत्या अस्य वेद स हि
जिष्णुः पथिकृत्सूर्याय। आन्मेनां कृण्वन्नच्युतो भुवद्गोः पतिर्दि-
वः सनजा अप्रतीतः ॥३॥ इंद्रो मह्ना महतो अर्णवस्य व्रता-
मिनादंगिरोभिर्गृणानः। पुरूणि चिन्नि तताना रजांसि
दाधार यो धरुणं सत्यताता ॥४॥ इंद्रो दिवः प्रतिमानं पृथि-
व्या विश्वा वेद सवना हंति शुष्णं। महीं चिद्द्यामातनो-

त्सूर्येण चास्कंभ चित्कंभनेन स्कभीयान् ॥५॥१०॥ वज्रेण हि वृत्र-
हा वृत्रमस्तरदेवस्य शूशुवानस्य मायाः । वि धृष्णो अत्र धृषता
जघंथाथाभवो मघवन्बाह्वोजाः ॥६॥ सचंत यदुषसः सूर्येण चि-
त्रामस्य केतवो रामविंदन् । आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो
नकिरद्धा नु वेद ॥७॥ दूरं किल प्रथमा जग्मुरासामिंद्रस्य याः
प्रसवे सस्रुरापः । क्व स्विदग्रं क्व बुध्न आसामापो मध्यं क्व वो नू-
नमंतः ॥८॥ सृजः सिंधूँरहिना जग्रसानाँ आदिदेताः प्र विविज्रे
जवेन । मुमुक्षमाणा उत या मुमुचेऽधेदेता न रमंते नितिक्ताः
॥९॥ सध्रीचीः सिंधुमुशतीरिवायन्त्सनाज्जार आरितः पूर्भि-
दासां । अस्तमा ते पार्थिवा वसून्यस्मे जग्मुः सूनृता इंद्र पूर्वीः
॥१०॥११॥

॥११२॥ १–१० नभःप्रभेदनो वैरूपः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥११२॥ इंद्र पिब प्रतिकामं सुतस्य प्रातःसावस्तव हि पू-
र्वपीतिः । हर्षस्व हंतवे शूर शत्रूनुक्थेभिष्टे वीर्या३ प्र ब्रवाम
॥१॥ यस्ते रथो मनसो जवीयानेंद्र तेन सोमपेयाय याहि ।
तूयमा ते हरयः प्र द्रवंतु येभिर्यासि वृषभिर्मंदमानः ॥२॥ ह-
रित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व । अस्माभिरिंद्र
सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य ॥३॥ यस्य त्यत्ते
महिमानं मदेष्विमे मही रोदसी नाविविक्तां । तदोक आ
हरिभिरिंद्र युक्तैः प्रियेभिर्याहि प्रियमन्नमच्छ ॥४॥ यस्य
शश्वत्पपिवाँ इंद्र शत्रूननानुकृत्या रण्या चकर्थ । स ते पुरंधिं
तविषीमियर्ति स ते मदाय सुत इंद्र सोमः ॥५॥१२॥ इदं ते
पात्रं सनवित्तमिंद्र पिबा सोममेना शतक्रतो । पूर्ण आहावो
मदिरस्य मध्वो यं विश्व इदभिहर्यंति देवाः ॥६॥ वि हि त्वा-

मिंद्र पुरुधा जनासो हितप्रयसो वृषभ ह्वयंते। अस्माकं ते मधुमत्तमानीमा भुवन्त्सवना तेषु हर्य ॥७॥ प्र तं इंद्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि। सतीनमन्युरश्रथायो अद्रिं सुवेदनामकृणोर्ब्रह्मणे गां ॥८॥ नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनां। न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥९॥ अभिख्या नो मघवन्नाधमानान्त्सखे बोधि वसुपते सखीनां। रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥१०॥१३॥९॥

॥ ११३ ॥ १–१० शतप्रभेदनो वैरूपः ॥ इंद्रः ॥ १–९ जगती । १० त्रिष्टुप् ॥

॥११३॥ तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनु शुष्ममावतां। यदैत्कृण्वानो महिमानमिंद्रियं पीत्वी सोमस्य क्रतुमाँ अवर्धत ॥१॥ तमस्य विष्णुर्महिमानमोजसांशुं दधन्वान्मधुनो वि रप्शते। देवेभिरिंद्रो मघवा सयावभिर्वृत्रं जघन्वाँ अभवद्वरेण्यः ॥२॥ वृत्रेण यदहिना बिभ्रदायुधा समस्थिथा युधये शंसमाविदे। विश्वे ते अत्र मरुतः सह त्मनावर्धन्नुग्र महिमानमिंद्रियं ॥३॥ जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभि पौंस्यं रणं। अवृश्चदद्रिमव सस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुं ॥४॥ आदिंद्रः सत्रा तविषीरपत्यत वरीयो द्यावापृथिवी अबाधत। अवाभरद्धृषितो वज्रमायसं शेवं मित्राय वरुणाय दाशुषे ॥५॥१४॥ इंद्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयंत मन्यवे। वृत्रं यदुग्रो व्यवृश्चदोजसापो बिभ्रतं तमसा परीवृतं ॥६॥ या वीर्याणि प्रथमानि कर्त्वा महित्वेभिर्यतमानौ समीयतुः। ध्वांतं तमोऽव दध्वसे हत इंद्रो मह्ना पूर्वहूताव-

पत्यत ॥७॥ विश्वे देवासो अध वृष्ण्यानि तेऽवर्धयन्त्सोमवत्या
वचस्यया । दृब्धं वृत्रमहिमिंद्रस्य हन्मनाग्निर्न जंभैस्तृष्वन्नमाव-
यत् ॥८॥ भूरि दक्षेभिर्वचनेभिर्ऋक्वभिः सख्येभिः सख्यानि प्र
वोचत । इंद्रो धुनिं च चुमुरिं च दंभयञ्छ्रद्धामनस्या शृणुते द-
भीतये ॥९॥ त्वं पुरूण्या भरा स्वश्व्या येभिर्मंसै निवचनानि शं-
सन् । सुगेभिर्विश्वा दुरिता तरेम विदो षु ण उर्विया गाधमद्य
॥१०॥१५॥

॥११४॥ १–१० सध्रिर्वैरूपो घर्मो वा तापसः ॥ विश्वे देवाः ॥ १–३. ५–१० त्रिष्टुप् । ४ जगती ॥

॥११४॥ घर्मा समंता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम । दिवस्पयो दिधिषाणा अवेषन्विदुर्देवाः सहसामानमर्कं ॥१॥ तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घश्रुतो वि हि जानंति वह्नयः । तासां नि चिक्युः कवयो निदानं परेषु या गुह्येषु व्रतेषु ॥२॥ चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते । तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयं ॥३॥ एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे । तं पाकेन मनसापश्यमंतितस्तं माता रेळ्हि स उ रेळ्हि मातरं ॥४॥ सुपर्णं विप्राः कवयो वचोभिरेकं संतं बहुधा कल्पयंति । छंदांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश ॥५॥१६॥ षट्त्रिंशांश्च चतुरः कल्पयंतश्छंदांसि च दधत आद्वादशं । यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयंति ॥६॥ चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयंति सप्त । आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबंते सुतस्य ॥७॥ सहस्रधा पंचदशान्युक्था यावद्द्यावापृथिवी तावदित्तत् । सहस्रधा महिमानः

सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक् ॥ ८ ॥ कश्छंदसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद । कमृत्विजामष्टमं शूरमाहुर्हरी इंद्रस्य नि चिकाय कः स्वित् ॥ ९ ॥ भूम्या अंतं पर्येके चरंति रथस्य धूर्षु युक्तासो अस्थुः । श्रमस्य दायं वि भजंत्येभ्यो यदा यमो भवति हर्म्ये हितः ॥ १० ॥ १७ ॥

॥ ११५ ॥ १–९ उपस्तुतो वार्ष्टिहव्यः ॥ अग्निः ॥ १–७ जगती । ८ त्रिष्टुप् । ९ शक्वरी ॥

॥ ११५ ॥ चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावप्येति धातवे । अनूधा यदि जीजनदधा च नु ववक्ष सद्यो महि दूत्यं चरन् ॥ १ ॥ अग्निर्ह नाम धायि दन्नपस्तमः सं यो वना युवते भस्मना दता । अभिप्रमुरा जुह्वा स्वध्वर इनो न प्रोथमानो यवसे वृषा ॥ २ ॥ तं वो विं न द्रुषदं देवमंधस इंदुं प्रोथंतं प्रवपंतमर्णवं । आसा वह्निं न शोचिषा विरप्शिनं महिव्रतं न सरजंतमध्वनः ॥ ३ ॥ वि यस्य ते ज्रयसानस्याजर धक्षोर्न वाताः परि संत्यच्युताः । आ रण्वासो युयुधयो न सत्वनं त्रितं नशंत प्र शिषंत इष्टये ॥ ४ ॥ स इदग्निः कण्वतमः कण्वसखार्यः परस्यांतरस्य तरुषः । अग्निः पातु गृणतो अग्निः सूरीनग्निर्ददातु तेषामवो नः ॥ ५ ॥ १८ ॥ वाजिंतमाय सह्यसे सुपित्र्य तृषु च्यवानो अनु जातवेदसे । अनुद्रे चिद्यो धृषता वरं सते महिंतमाय धन्वनेदविष्यते ॥ ६ ॥ एवाग्निर्मर्तैः सह सूरिभिर्वसुः ष्टवे सहसः सूनरो नृभिः । मित्रासो न ये सुधिता ऋतायवो द्यावो न द्युम्नैरभि संति मानुषान् ॥ ७ ॥ ऊर्जो नपात्सहसावन्निति त्वोपस्तुतस्य वंदते वृषा वाक् । त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥ ८ ॥ इति त्वाग्ने वृष्टिहव्यस्य पुत्रा उपस्तुतास

ऋषयोऽवोचन्। तांश्च पाहि गृणतश्च सूरीन्वषड्वषळित्यूर्ध्वा-
सो अनक्षन्नमो नम इत्यूर्ध्वासो अनक्षन् ॥९॥१९॥

॥ ११६ ॥ १–९ अग्नियुतः स्थौरोऽग्नियूपो वा स्थौरः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥११६॥ पिबा सोमं महत इंद्रियाय पिबा वृत्राय हंतवे श-
विष्ठ। पिब राये शवसे हूयमानः पिब मध्वस्तृपदिंद्रा वृषस्व
॥१॥ अस्य पिब क्षुमतः प्रस्थितस्येंद्र सोमस्य वरमा सुतस्य।
स्वस्तिदा मनसा मादयस्वार्वाचीनो रेवते सौभगाय ॥२॥ म-
मत्तु त्वा दिव्यः सोम इंद्र ममत्तु यः सूयते पार्थिवेषु। ममत्तु येन
वरिवश्चकर्थ ममत्तु येन निरिणासि शत्रून् ॥३॥ आ द्विबर्हा अ-
मिनो यात्विंद्रो वृषा हरिभ्यां परिषिक्तमंधः। गव्या सुतस्य
प्रभृतस्य मध्वः सत्रा खेदामरुशहा वृषस्व ॥४॥ नि तिग्मानि
भ्राशयन्भ्राश्यान्यव स्थिरा तनुहि यातुजूनां। उग्राय ते सहो
बलं ददामि प्रतीत्या शत्रून्विगदेषु वृश्च ॥५॥२०॥ व्यर्य इंद्र
तनुहि श्रवांस्योजः स्थिरेव धन्वनोऽभिमातीः। अस्मद्र्यग्वा-
वृधानः सहोभिरनिभृष्टस्तन्वं वावृधस्व ॥६॥ इदं हविर्मघव-
न्तुभ्यं रातं प्रति सम्राळहृणानो गृभाय। तुभ्यं सुतो मघवन्तुभ्यं
पक्वो३ऽद्धींद्र पिब च प्रस्थितस्य ॥७॥ अद्धीदिंद्र प्रस्थितेमा ह-
वींषि चनो दधिष्व पचतोत सोमं। प्रयस्वंतः प्रति हर्यामसि
त्वा सत्याः संतु यजमानस्य कामाः ॥८॥ प्रेंद्राग्निभ्यां सुवचस्या-
मियर्मि सिंधाविव प्रेरयं नावमर्कैः। अया इव परि चरंति देवा
ये अस्मभ्यं धनदा उद्भिदश्च ॥९॥२१॥

॥ ११७ ॥ १–९ भिक्षुः ॥ धनान्नदानप्रशंसा ॥ १. २ जगती । ३–९ त्रिष्टुप् ॥

॥११७॥ न वा उ देवाः क्षुधमिद्वधं ददुरुताशितमुप ग-

च्छंति मृत्यवः। उतो रयिः पृणतो नोप दस्यत्युतापृणन्मर्डितारं
न विंदते ॥१॥ य आध्राय चकमानाय पित्वोऽन्नवान्त्सन्रफि-
तायोपजग्मुषे। स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डितारं
न विंदते ॥२॥ स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृ-
शाय। अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायं ॥३॥
न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः।
अपास्मात्प्रेयान्न तदोको अस्ति पृणंतमन्यमरणं चिदिच्छेत्
॥४॥ पृणीयादिन्नाधमानाय तव्यान्द्राघीयांसमनु पश्येत पं-
थां। ओ हि वर्तंते रथ्येव चक्रान्यमन्यमुप तिष्ठंत रायः ॥५॥२२॥
मोघमन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य। नार्य-
मणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥६॥
कृषन्नित्फाल आशितं कृणोति यन्नध्वानमप वृंक्ते चरित्रैः।
वदन्ब्रह्मावदतो वनीयान्पृणन्नापिरपृणंतमभि ष्यात् ॥७॥
एकपाद्भूयो द्विपदो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात्।
चतुष्पादेति द्विपदामभिस्वरे संपश्यन्पंक्तीरुपतिष्ठमानः ॥८॥
समौ चिद्धस्तौ न समं विविष्टः सम्मातरा चिन्न समं दुहाते।
यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्संतौ न समं पृणीतः
॥९॥२३॥

॥ ११८ ॥ १–९ उरुक्षय आमहीयवः ॥ अग्नी रक्षोहा ॥ गायत्री ॥

॥११८॥ अग्ने हंसि न्य१त्रिणं दीद्यन्मर्त्येष्वा। स्वे क्षये शु-
चिव्रत ॥१॥ उत्तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे। यत्त्वा
स्रुचः समस्थिरन् ॥२॥ स आहुतो वि रोचतेऽग्निरीळे-
न्यो गिरा। स्रुचा प्रतीकमज्यते ॥३॥ घृतेनाग्निः समज्यते मधु-

प्रतीक आहुतः। रोचमानो विभावसुः ॥४॥ जरमाणः समिध्यसे देवेभ्यो हव्यवाहन। तं त्वा हवंत मर्त्याः ॥५॥२४॥ तं मर्ता अमर्त्यं घृतेनाग्निं सपर्यत। अदाभ्यं गृहपतिं ॥६॥ अदाभ्येन शोचिषाग्ने रक्षस्त्वं दह। गोपा ऋतस्य दीदिहि ॥७॥ स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः। उरुक्षयेषु दीद्यत् ॥८॥ तं त्वा गीर्भिरुरुक्षया हव्यवाहं समीधिरे। यजिष्ठं मानुषे जने ॥९॥२५॥

॥ ११९ ॥ १-१३ लब ऐंद्रः ॥ आत्मस्तुतिः ॥ गायत्री ॥

॥११९॥ इति वा इति मे मनो गामश्वं सनुयामिति। कुवित्सोमस्यापामिति ॥१॥ प्र वाता इव दोधत उन्मा पीता अयंसत। कुवित्सोमस्यापामिति ॥२॥ उन्मा पीता अयंसत रथमश्वा इवाशवः। कुवित्सोमस्यापामिति ॥३॥ उप मा मतिरस्थित वाश्रा पुत्रमिव प्रियं। कुवित्सोमस्यापामिति ॥४॥ अहं तष्टेव वंधुरं पर्यचामि हृदा मतिं। कुवित्सोमस्यापामिति ॥५॥ नहि मे अक्षिपच्चनाच्छांत्सुः पंच कृष्टयः। कुवित्सोमस्यापामिति ॥६॥२६॥ नहि मे रोदसी उभे अन्यं पक्षं चन प्रति। कुवित्सोमस्यापामिति ॥७॥ अभि द्यां महिना भुवमभी३मां पृथिवीं महीं। कुवित्सोमस्यापामिति ॥८॥ हंताहं पृथिवीमिमां नि दधानीह वेह वा। कुवित्सोमस्यापामिति ॥९॥ ओषमित्पृथिवीमहं जंघनानीह वेह वा। कुवित्सोमस्यापामिति ॥१०॥ दिवि मे अन्यः पक्षो३ऽधो अन्यमचीकृषं। कुवित्सोमस्यापामिति ॥११॥ अहमस्मि महामहोऽभिनभ्यमुदीषितः। कुवित्सोमस्यापामिति ॥१२॥ गृहो याम्यरंकृतो देवेभ्यो हव्यवाहनः। कुवित्सोमस्यापामिति ॥१३॥२७॥६॥

॥ १२० ॥ १—९ बृहद्दिव आथर्वणः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१२०॥ तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदंत्यूमाः ॥१॥
वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति। अव्य-
नच्च व्यनच्च सस्नि सं ते नवंत प्रभृता मदेषु ॥२॥ त्वे क्रतुमपि
वृंजंति विश्वे द्विर्यदेते त्रिर्भवंत्यूमाः। स्वादोः स्वादीयः स्वादुना
सृजा समदः सु मधु मधुनाभि योधीः ॥३॥ इति चिद्धि त्वा धना
जयंतं मदेमदे अनुमदंति विप्राः। ओजीयो धृष्णो स्थिरमा त-
नुष्व मा त्वा दभन्यातुधाना दुरेवाः॥४॥ त्वया वयं शाशद्महे रणेषु
प्रपश्यंतो युधेन्यानि भूरि। चोदयामि त आयुधा वचोभिः सं ते
शिशामि ब्रह्मणा वयांसि ॥५॥१॥ स्तुषेय्यं पुरुवर्पसमृभ्वमिन-
तममाप्त्यमाप्त्यानां। आ दर्षते शवसा सप्त दानून्प्र साक्षते प्रति-
मानानि भूरि ॥६॥ नि तद्दधिषेऽवरं परं च यस्मिन्नाविथावसा
दुरोणे। आ मातरा स्थापयसे जिगत्नू अत इनोषि कर्वरा पुरू-
णि ॥७॥ इमा ब्रह्म बृहद्दिवो विवक्तींद्राय शूषमग्रियः स्वर्षाः।
महो गोत्रस्य क्षयति स्वराजो दुरश्च विश्वा अवृणोदप स्वाः
॥८॥ एवा महान्बृहद्दिवो अथर्वावोचत्स्वां तन्व१मिंद्रमेव।
स्वसारो मातरिभ्वरीररिप्रा हिन्वंति च शवसा वर्धयंति च
॥९॥२॥

॥ १२१ ॥ १—१० हिरण्यगर्भः प्राजापत्यः ॥ कः ॥ त्रिष्टुप् ॥

॥१२१॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक
आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा
विधेम ॥१॥ य आत्मदा बलदा यस्य विश्व उपासते प्र-
शिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्युः कस्मै देवाय ह-

विषा विधेम ॥२॥ यः प्राणतो निमिषतो महित्वैक इद्राजा
जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा
विधेम ॥३॥ यस्येमे हिमवंतो महित्वा यस्य समुद्रं रसया सहा-
हुः। यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥४॥
येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः। यो
अंतरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥३॥
यं क्रंदसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने। यत्रा-
धि सूर उदितो विभाति कस्मै देवाय हविषा विधेम॥६॥ आपो
ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयंतीरग्निं। ततो देवानां
समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥७॥ यश्चिदापो
महिना पर्यपश्यद्दक्षं दधाना जनयंतीर्यज्ञं। यो देवेष्वधि देव
एक आसीत्कस्मै देवाय हविषा विधेम ॥८॥ मा नो हिंसीज्ज-
निता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान। यश्चापश्चंद्रा
बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥९॥ प्रजापते न
त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहु-
मस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥१०॥४॥

॥१२२॥ १-८ चित्रमहा वासिष्ठः ॥ अग्निः ॥ १.५ त्रिष्टुप्। २-४.६-८ जगती ॥

॥१२२॥ वसुं न चित्रमहसं गृणीषे वामं शेवमतिथिमद्वि-
षेण्यं। स रासते शुरुधो विश्वधायसोऽग्निर्होता गृहपतिः
सुवीर्यं ॥१॥ जुषाणो अग्ने प्रति हर्य मे वचो विश्वानि विद्वा-
न्वयुनानि सुक्रतो। घृतनिर्णिग्ब्रह्मणे गातुमेरय तव देवा
अजनयन्ननु व्रतं ॥२॥ सप्त धामानि परियन्नमर्त्यो दा-
शद्दाशुषे सुकृते मामहस्व। सुवीरेण रयिणाग्ने स्वाभुवा

यस्त आनट् समिधा तं जुषस्व ॥३॥ यज्ञस्य केतुं प्रथमं पुरोहितं
हविष्मंत ईळते सप्त वाजिनं । शृण्वंतमग्निं घृतपृष्ठमुक्षणं पृणंतं
देवं पृणते सुवीर्यं ॥४॥ त्वं दूतः प्रथमो वरेण्यः स हूयमानो अ-
मृताय मत्स्व । त्वां मर्जयन्मरुतो दाशुषो गृहे त्वां स्तोमेभिर्भृगवो
वि रुरुचुः ॥५॥५॥ इषं दुहन्सुदुघां विश्वधायसं यज्ञप्रिये यजमा-
नाय सुक्रतो । अग्ने घृतस्नुस्त्रिर्ऋतानि दीद्यद्वर्तिर्यज्ञं परियन्त्सु-
क्रतूयसे ॥६॥ त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजंत
मानुषाः । त्वां देवा महयाय्याय वावृधुराज्यमग्ने निमृजंतो अ-
ध्वरे ॥७॥ नि त्वा वसिष्ठा अह्वंत वाजिनं गृणंतो अग्ने विदथेषु
वेधसः । रायस्पोषं यजमानेषु धारय यूयं पात स्वस्तिभिः सदा
नः ॥८॥६॥

॥ १२३ ॥ १–८ वेनः ॥ वेनः ॥ त्रिष्टुप् ॥

॥ १२३ ॥ अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो
विमाने । इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी
रिहंति ॥१॥ समुद्रादूर्मिमुदियर्ति वेनो नभोजाः पृष्ठं हर्यतस्य
दर्शि । ऋतस्य सानावधि विष्टपि भ्राट् समानं योनिमभ्य-
नूषत व्राः ॥२॥ समानं पूर्वीरभि वावशानास्तिष्ठन्वत्सस्य
मातरः सनीळाः । ऋतस्य सानावधि चक्रमाणा रिहंति म-
ध्वो अमृतस्य वाणीः ॥३॥ जानंतो रूपमकृपंत विप्रा मृगस्य
घोषं महिषस्य हि ग्मन् । ऋतेन यंतो अधि सिंधुमस्थुर्वि-
दद्गंधर्वो अमृतानि नाम ॥४॥ अप्सरा जारमुपसिष्मियाणा
योषा बिभर्ति परमे व्योमन् । चरत्प्रियस्य योनिषु प्रियः
सन्त्सीदत्पक्षे हिरण्यये स वेनः ॥५॥७॥ नाके सुपर्णमुप
यत्पतंतं हृदा वेनंतो अभ्यचक्षत त्वा । हिरण्यपक्षं वरु-

णस्य दूतं यमस्य योनौ शकुनं भुरण्युं ॥ ६ ॥ ऊर्ध्वो गंधर्वो अधि
नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि । वसानो अत्कं
सुरभिं दृशे कं स्व१र्ण नाम जनत प्रियाणि ॥ ७ ॥ द्रप्सः समुद्र-
मभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन् । भानुः शु-
क्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥ ८ ॥ ८ ॥

॥ १२४ ॥ १. ५–९ अग्निवरुणसोमानां निहवः । २–४ अग्निः ॥ १–४ अग्निः ।
५–८ यथानिपातं । ९ इंद्रः ॥ १–६. ८. ९ त्रिष्टुप् । ७ जगती ॥

॥ १२४ ॥ इमं नो अग्न उप यज्ञमेहि पंचयामं त्रिवृतं स-
प्ततंतुं । असो हव्यवाळुत नः पुरोगा ज्योगेव दीर्घं तम
आशयिष्ठाः ॥ १ ॥ अदेवाद्देवः प्रचता गुहा यन्प्रपश्यमानो
अमृतत्वमेमि । शिवं यत्संतमशिवो जहामि स्वात्सख्या-
दरणीं नाभिमेमि ॥ २ ॥ पश्यन्नन्यस्या अतिथिं वयाया
ऋतस्य धाम वि मिमे पुरूणि । शंसामि पित्रे असुराय
शेवमयज्ञियाद्यज्ञियं भागमेमि ॥ ३ ॥ बह्वीः समा अकरमंत-
रस्मिन्निंद्रं वृणानः पितरं जहामि । अग्निः सोमो वरुणस्ते
च्यवंते पर्यावर्द्राष्ट्रं तदवाम्यायन् ॥ ४ ॥ निर्माया उ त्ये असु-
रा अभूवन्त्वं च मा वरुण कामयासे । ऋतेन राजन्ननृतं
विविंचन्मम राष्ट्रस्याधिपत्यमेहि ॥ ५ ॥ ९ ॥ इदं स्वरिद-
मिदास वाममयं प्रकाश उर्व१तरिक्षं । हनाव वृत्रं निरेहि
सोम हविष्ट्वा संतं हविषा यजाम ॥ ६ ॥ कविः कवित्वा दिवि
रूपमासजदप्रभूती वरुणो निरपः सृजत् । क्षेमं कृण्वाना
जनयो न सिंधवस्ता अस्य वर्णं शुचयो भरिभ्रति ॥ ७ ॥ ता
अस्य ज्येष्ठमिंद्रियं सचंते ता ईमा क्षेति स्वधया मदंतीः । ता ईं
विशो न राजानं वृणाना बीभत्सुवो अप वृत्रादतिष्ठन् ॥ ८ ॥

बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरंतं। अनुष्टुभ-
मनु चर्चूर्यमाणमिंद्रं नि चिक्युः कवयो मनीषा ॥ ९ ॥ १० ॥

॥ १२५ ॥ १–८ वागांभृणी ॥ वागांभृणी ॥ १. ३–८ त्रिष्टुप्। २ जगती ॥

॥ १२५ ॥ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्विनोभा ॥ १ ॥
अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगं। अहं दधामि
द्रविणं हविष्मते सुप्राव्ये३ यजमानाय सुन्वते ॥ २ ॥ अहं राष्ट्री सं-
गमनी वसूनां चिकितुषी प्रथमा यज्ञियानां। तां मा देवा व्यदधुः
पुरुत्रा भूरिस्थात्रां भूर्यावेशयंतीं ॥ ३ ॥ मया सो अन्नमत्ति यो वि-
पश्यति यः प्राणिति य ईं शृणोत्युक्तं। अमंतवो मां त उप क्षियं-
ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥ ४ ॥ अहमेव स्वयमिदं वदामि
जुष्टं देवेभिरुत मानुषेभिः। यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं
तमृषिं तं सुमेधां ॥ ५ ॥ ११ ॥ अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे
शरवे हंतवा उं। अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ
विवेश ॥ ६ ॥ अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वं१ तः स-
मुद्रे। ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि
॥ ७ ॥ अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ॥ ८ ॥ १२ ॥

॥ १२६ ॥ १–८ कुल्मलबर्हिषः शैलूषिरंहोमुग्वा वामदेव्यः ॥ विश्वे देवाः ॥ १–७ उपरि-
ष्टाद्बृहती। ८ त्रिष्टुप् ॥

॥ १२६ ॥ न तमंहो न दुरितं देवासो अष्ट मर्त्यं। सजोषसो य-
मर्यमा मित्रो नयंति वरुणो अति द्विषः ॥ १ ॥ तद्धि वयं वृणीमहे
वरुण मित्रार्यमन्। येना निरंहसो यूयं पाथ नेथा च मर्त्यम-

ति द्विषः ॥२॥ ते नूनं नोऽयमूतये वरुणो मित्रो अर्यमा । नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पर्षण्यति द्विषः ॥३॥ यूयं विश्वं परि पाथ वरुणो मित्रो अर्यमा । युष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोऽति द्विषः ॥४॥ आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा । उग्रं मरुद्भी रुद्रं हुवेमेंद्रमग्निं स्वस्तयेऽति द्विषः ॥५॥ नेतार ऊ षु णस्तिरो वरुणो मित्रो अर्यमा । अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः ॥६॥ शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा । शर्म यच्छंतु सप्रथ आदित्यासो यदीमहे अति द्विषः ॥७॥ यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुंचता यजत्राः । एवो ष्व१स्मन्मुंचता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥८॥१३॥

॥१२७॥ १-८ कुशिकः सौभरो रात्रिर्वा भारद्वाजी ॥ रात्रिस्तवः ॥ गायत्री ॥

॥१२७॥ रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः । विश्वा अधि श्रियोऽधित ॥१॥ ओर्वप्रा अमर्त्या निवतो देव्यु१द्वतः । ज्योतिषा बाधते तमः ॥२॥ निरु स्वसारमस्कृतोषसं देव्यायती । अपेदु हासते तमः ॥३॥ सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि । वृक्षे न वसतिं वयः ॥४॥ नि ग्रामासो अविक्षत नि पद्वंतो नि पक्षिणः । नि श्येनासश्चिदर्थिनः ॥५॥ यावया वृक्यं१ वृकं यवय स्तेनमूर्म्ये । अथा नः सुतरा भव ॥६॥ उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित । उष ऋणेव यातय ॥७॥ उप ते गा इवाकरं वृणीष्व दुहितर्दिवः । रात्रि स्तोमं न जिग्युषे ॥८॥१४॥

॥१२८॥ १-९ विहव्यः ॥ विश्वे देवाः ॥ १-८ त्रिष्टुप् । ९ जगती ॥

॥१२८॥ ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेंधानास्तन्वं

पुषेम। मह्यं नमंतां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम॥१॥
मम देवा विहवे संतु सर्व इंद्रवंतो मरुतो विष्णुरग्निः। ममांत-
रिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन्॥२॥ मयि
देवा द्रविणमा यजंतां मय्याशीरस्तु मयि देवहूतिः। दैव्या हो-
तारो वनुषंत पूर्वेऽरिष्टाः स्याम तन्वा सुवीराः॥३॥ मह्यं यजंतु
मम यानि हव्याकूतिः सत्या मनसो मे अस्तु। एनो मा नि गां
कतमच्चनाहं विश्वे देवासो अधि वोचता नः॥४॥ देवीः षळु-
र्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वं। मा हास्महि प्रजया
मा तनूभिर्मा रधाम द्विषते सोम राजन्॥५॥१५॥ अग्ने मन्युं प्र-
तिनुदन्परेषामदब्धो गोपाः परि पाहि नस्त्वं। प्रत्यंचो यंतु नि-
गुतः पुनस्तेऽमैषां चित्तं प्रबुधां वि नेशत्॥६॥ धाता धातॄणां
भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहं। इमं यज्ञमश्विनो-
भा बृहस्पतिर्देवाः पांतु यजमानं न्यर्थात्॥७॥ उरुव्यचा नो म-
हिषः शर्म यंसदस्मिन्हवे पुरुहूतः पुरुक्षुः। स नः प्रजायै हर्यश्व
मृळयेंद्र मा नो रीरिषो मा परा दाः॥८॥ ये नः सपत्ना अप
ते भवंत्विंद्राग्निभ्यामव बाधामहे तान्। वसवो रुद्रा आदित्या
उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन्॥९॥१६॥१०॥

॥१२९॥ १—७ प्रजापतिः परमेष्ठी ॥ भाववृत्तं ॥ त्रिष्टुप्॥

॥१२९॥ नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो
व्योमा परो यत्। किमावरीवः कुह कस्य शर्मन्नंभः
किमासीद्गहनं गभीरं॥१॥ न मृत्युरासीदमृतं न तर्हि
न रात्र्या अह्न आसीत्प्रकेतः। आनीदवातं स्वधया त-
देकं तस्माद्धान्यन्न परः किं चनास॥२॥ तम आसीत्-

मसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदं। तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकं ॥३॥ कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्। सतो बंधुमसति निरविंदन्हृदि प्रतीष्या कवयो मनीषा ॥४॥ तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्। रेतोधा आसन्महिमान आसन्स्वधा अवस्तात्प्रयतिः परस्तात् ॥५॥ को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः। अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥६॥ इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न। यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद ॥७॥१७॥

॥१३०॥ १-७ यज्ञः प्राजापत्यः ॥ भाववृत्तं ॥ १ जगती । २-७ त्रिष्टुप् ॥

॥१३०॥ यो यज्ञो विश्वतस्तंतुभिस्तत एकशतं देवकर्मेभिरायतः। इमे वयंति पितरो य आययुः प्र वयाप वयेत्यासते तते ॥१॥ पुमाँ एनं तनुत उत्कृणत्ति पुमान्वि तत्ने अधि नाके अस्मिन्। इमे मयूखा उप सेदुरू सदः सामानि चक्रुस्तसराण्योतवे ॥२॥ कासीत्प्रमा प्रतिमा किं निदानमाज्यं किमासीत्परिधिः क आसीत्। छंदः किमासीत्प्रउगं किमुक्थं यद्देवा देवमयजंत विश्वे ॥३॥ अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं बभूव। अनुष्टुभा सोम उक्थैर्महस्वान्बृहस्पतेर्बृहती वाचमावत् ॥४॥ विराण्मित्रावरुणयोरभिश्रीरिंद्रस्य त्रिष्टुबिह भागो अह्नः। विश्वान्देवाञ्जगत्या विवेश तेन चाकॢप्र ऋषयो मनुष्याः ॥५॥ चाकॢप्रे तेन ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे। प-

श्यन्मन्ये मनसा चक्षसा तान्य इमं यज्ञमयजंत पूर्वे ॥६॥ सह-
स्तोमाः सहच्छंदस आवृतः सहप्रमा ऋषयः सप्त दैव्याः। पूर्वेषां
पंथामनुदृश्य धीरा अन्वालेभिरे रथ्यो३ न रश्मीन् ॥७॥१८॥

॥१३१॥ १–७ सुकीर्तिः काक्षीवतः ॥ १–३. ६. ७ इंद्रः । ४. ५ अश्विनौ ॥
१–३. ५–७ त्रिष्टुप् । ४ अनुष्टुप् ॥

॥१३१॥ अप प्राचं इंद्र विश्वाँ अमित्रानपापाचो अभिभूते
नुदस्व। अपोदीचो अप शूराधराच उरौ यथा तव शर्मन्मदेम
॥१॥ कुविदंग यवमंतो यवं चिद्यथा दांत्यनुपूर्वं वियूय। इहेहैषां
कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥२॥ नहि
स्थूर्यृतुथा यातमस्ति नोत श्रवो विविदे संगमेषु। गव्यंत इंद्रं
सख्याय विप्रा अश्वायंतो वृषणं वाजयंतः ॥३॥ युवं सुरामम-
श्विना नमुचावासुरे सचा। विपिपाना शुभस्पती इंद्रं कर्मस्वा-
वतं ॥४॥ पुत्रमिव पितरावश्विनोभेंद्रावथुः काव्यैर्दंसनाभिः।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥५॥
इंद्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥६॥ तस्य
वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम। स सुत्रामा
स्ववाँ इंद्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥७॥१९॥

॥१३२॥ १–७ शकपूतो नार्मेधः ॥ १ लिंगोक्तदेवताः । २–७ मित्रावरुणौ ॥ १ न्यंकुसा-
रिणी । २. ६ प्रस्तारपंक्तिः । ३–५ विराड्रूपा । ७ महासतोबृहती ॥

॥१३२॥ ईजानमिद्द्यौर्गूर्तावसुरीजानं भूमिरभि प्रभूष-
णि। ईजानं देवावश्विनावभि सुम्नैरवर्धतां ॥१॥ ता वां मि-
त्रावरुणा धारयत्क्षिती सुषुम्नेषितत्वता यजामसि। युवोः
क्राणाय सख्यैरभि ष्याम रक्षसः ॥२॥ अधा चिन्नु यद्दि-

धिषामहे वामभि प्रियं रेक्णः पत्यमानाः । दद्वाँ वा यत्पुष्यति रेक्णः सम्वारन्नकिरस्य मघानि ॥३॥ असावन्यो असुर सूयत द्यौस्त्वं विश्वेषां वरुणासि राजा । मूर्धा रथस्य चाकन्नैतावतैनसांतकधुक् ॥४॥ अस्मिन्त्स्वे३तच्छकपूत एनो हिते मित्रे निगतान्हंति वीरान् । अवोर्वा यद्धात्तनूष्ववः प्रियासु यज्ञियास्ववा ॥५॥ युवोर्हि मातादितिर्विचेतसा द्यौर्न भूमिः पयसा पुपूतनि । अव प्रिया दिदिष्टन सूरो निनिक्त रश्मिभिः ॥६॥ युवं ह्यप्नराजावसीदतं तिष्ठद्रथं न धूर्षदं वनर्षदं । ता नः कणूकयंतीर्नृमेधस्त्रे अंहसः सुमेधस्त्रे अंहसः ॥७॥२०॥

॥१३३॥ १–७ सुदाः पैजवनः ॥ इंद्रः ॥ १–३ शक्वरी । ४–६ महापंक्तिः । ७ त्रिष्टुप् ॥

॥१३३॥ प्रोष्वस्मै पुरोरथमिंद्राय शूषमर्चत । अभीके चिदु लोककृत्संगे समत्सु वृत्रहास्माकं बोधि चोदिता नभंतामन्यकेषां ज्याका अधि धन्वसु ॥१॥ त्वं सिंधूँरवासृजोऽधराचो अहन्नहिं । अशत्रुरिंद्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे नभंतामन्यकेषां ज्याका अधि धन्वसु ॥२॥ वि षु विश्वा अरातयोऽर्यो नशंत नो धियः । अस्तासि शत्रवे वधं यो न इंद्र जिघांसति या ते रातिर्ददिर्वसु नभंतामन्यकेषां ज्याका अधि धन्वसु ॥३॥ यो न इंद्राभितो जनो वृकायुरादिदेशति । अधस्पदं तमीं कृधि विबाधो असि सासहिर्नभंतामन्यकेषां ज्याका अधि धन्वसु ॥४॥ यो न इंद्राभिदासति सनाभिर्यश्च निष्ट्यः । अव तस्य बलं तिर महीव द्यौरध त्मना नभंतामन्यकेषां ज्याका अधि धन्वसु ॥५॥ वयमिंद्र त्वायवः सखित्वमा रभामहे । ऋतस्य नः पथा नयाति

विश्वानि दुरिता नभंतामन्यकेषां ज्याका अधि धन्वसु ॥ ६ ॥
अस्मभ्यं सु त्वमिंद्र तां शिक्ष या दोहते प्रति वरं जरित्रे। अच्छिं-
द्रोध्नी पीपयद्यथा नः सहस्रधारा पयसा मही गौः ॥ ७ ॥ २१ ॥

॥ १३४ ॥ १–६[१] मांधाता यौवनाश्वः । ६[२]. ७ गोधा ॥ इंद्रः ॥ १–६ महापंक्तिः । ७ पंक्तिः ॥

॥ १३४ ॥ उभे यदिंद्र रोदसी आपप्राथोषा इव । महांतं त्वा
महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजी-
जनत् ॥ १ ॥ अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरं । अधस्पदं
तमीं कृधि यो अस्माँ आदिदेशति देवी जनित्र्यजीजनद्भद्रा
जनित्र्यजीजनत् ॥ २ ॥ अव त्या बृहतीरिषो विश्वश्चंद्रा अमि-
त्रहन् । शचीभिः शक्र धूनुहींद्र विश्वाभिरूतिभिर्देवी जनित्र्य-
जीजनद्भद्रा जनित्र्यजीजनत् ॥ ३ ॥ अव यत्त्वं शतक्रतविंद्र वि-
श्वानि धूनुषे । रयिं न सुन्वते सचा सहस्रिणीभिरूतिभिर्देवी
जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ४ ॥ अव स्वेदा इवाभितो
विष्वक्पतंतु दिद्यवः । दूर्वाया इव तंतवो व्य१स्मदेतु दुर्मतिर्देवी
जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ५ ॥ दीर्घं ह्यंकुशं यथा
शक्तिं बिभर्षि मंतुमः । पूर्वेण मघवन्पदाजो वयां यथा यमो
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ६ ॥ नकिर्देवा मि-
नीमसि नकिरा योपयामसि मंत्रश्रुत्यं चरामसि । पक्षेभिर-
पिकक्षेभिरत्राभि सं रभामहे ॥ ७ ॥ २२ ॥

॥ १३५ ॥ १–७ कुमारो यामायनः ॥ यमः ॥ अनुष्टुप् ॥

॥ १३५ ॥ यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः । अत्रा
नो विश्पतिः पिता पुराणाँ अनु वेनति ॥ १ ॥ पुराणाँ अनु-

वेनंतं चरंतं पापयामुया। असूयन्नभ्यंचाकशं तस्मा अस्पृहयं
पुनः ॥२॥ यं कुमार नवं रथमचक्रं मनसाकृणोः। एकेषं वि-
श्वतः प्रांचमपश्यन्नधि तिष्ठसि ॥३॥ यं कुमार प्रावर्तयो रथं
विप्रेभ्यस्परि। तं सामानु प्रावर्तत समितो नाव्याहितं ॥४॥ कः
कुमारमजनयद्रथं को निरवर्तयत्। कः स्वित्तदद्य नो ब्रूयादनु-
देयी यथाभवत् ॥५॥ यथाभवदनुदेयी ततो अग्रमजायत।
पुरस्ताद्बुध्न आततः पश्चान्निरयणं कृतं ॥६॥ इदं यमस्य सादनं
देवमानं यदुच्यते। इयमस्य धम्यते नाळीरयं गीर्भिः परिष्कृ-
तः ॥७॥२३॥

॥१३६॥ १–७ मुनयो वातरशनाः ॥ १ जूतिः। २ वातजूतिः। ३ विप्रजूतिः। ४ वृषाणकः।
५ करिक्रतः। ६ एतशः। ७ ऋष्यशृंगः ॥ केशिनः ॥ अनुष्टुप् ॥

॥१३६॥ केश्य१ग्निं केशी विषं केशी बिभर्ति रोदसी। केशी
विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥१॥ मुनयो वातरशनाः पि-
शंगा वसते मला। वातस्यानु ध्राजिं यंति यद्देवासो अविक्षत
॥२॥ उन्मदिता मौनेयेन वातां आ तस्थिमा वयं। शरीरेदस्माकं
यूयं मर्तासो अभि पश्यथ ॥३॥ अंतरिक्षेण पतति विश्वा रूपा-
वचाकशत्। मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः ॥४॥ वात-
स्याश्वो वायोः सखाथ देवेषितो मुनिः। उभौ समुद्रावा क्षेति
यश्च पूर्व उतापरः ॥५॥ अप्सरसां गंधर्वाणां मृगाणां चरणे च-
रन्। केशी केतस्य विद्वान्त्सखा स्वादुर्मदिंतमः ॥६॥ वायुरस्मा
उपामंथत्पिनष्टि स्मा कुनंनमा। केशी विषस्य पात्रेण यद्रुद्रे-
णापिबत्सह ॥७॥२४॥

॥१३७॥ १–७ सप्त ऋषय एकर्चाः ॥ विश्वे देवाः ॥ अनुष्टुप् ॥

॥१३७॥ उत देवा अवहितं देवा उन्नयथा पुनः। उता-

गंश्चक्रुषं देवा देवा जीवयथा पुनः ॥ १ ॥ द्वाविमौ वातौ वात
आ सिंधोरा परावतः । दक्षं ते अन्य आ वातु परान्यो वातु
यद्रपः ॥ २ ॥ आ वात वाहि भेषजं वि वात वाहि यद्रपः । त्वं
हि विश्वभेषजो देवानां दूत ईयसे ॥ ३ ॥ आ त्वागमं शंतातिभि-
रथो अरिष्टतातिभिः । दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि
ते ॥ ४ ॥ त्रायंतामिह देवास्त्रायतां मरुतां गणः । त्रायंतां विश्वा
भूतानि यथायमरपा असत् ॥ ५ ॥ आप इद्वा उ भेषजीरापो अ-
मीवचातनीः । आपः सर्वस्य भेषजीस्तास्ते कृण्वंतु भेषजं ॥ ६ ॥
हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी । अनामयित्नु-
भ्यां त्वा ताभ्यां त्वोप स्पृशामसि ॥ ७ ॥ २५ ॥

॥ १३८ ॥ १–६ अंग औरवः ॥ इंद्रः ॥ जगती ॥

॥ १३८ ॥ तव त्य इंद्र सख्येषु वह्नय ऋतं मन्वाना
व्यदर्दिरुर्वलं । यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय म-
न्मन्नह्यश्च दंसयः ॥ १ ॥ अवासृजः प्रस्वः श्वंचयो गिरी-
नुदाज उस्रा अपिबो मधु प्रियं । अवर्धयो वनिनो अस्य
दंससा शुशोच सूर्य ऋतजातया गिरा ॥ २ ॥ वि सूर्यो मध्ये
अमुचद्रथं दिवो विदद्दासाय प्रतिमानमार्यः । दृळ्हानि
पिप्रोरसुरस्य मायिन इंद्रो व्यास्यच्चकृवाँ ऋजिश्वना ॥ ३ ॥
अनाधृष्टानि धृषितो व्यास्यन्निधीँरदेवाँ अमृणदयास्यः ।
मासेव सूर्यो वसु पुर्यमा ददे गृणानः शत्रूँरशृणाद्विरु-
क्मता ॥ ४ ॥ अयुद्धसेनो विभ्वा विभिंदता दाशद्वृत्रहा
तुज्यानि तेजते । इंद्रस्य वज्रादबिभेदभिश्नथः प्राक्राम-
च्छुंध्यूरजहादुषा अनः ॥ ५ ॥ एता त्या ते श्रुत्यानि केवला य-

देक एकमकृणोरयज्ञं । मासां विधानमदधा अधि द्यवि त्वया
विभिन्नं भरति प्रधिं पिता ॥६॥२६॥

॥१३९॥ १—६ विश्वावसुर्देवगंधर्वः ॥ १—३ सविता । ४—६ विश्वावसुः ॥ त्रिष्टुप् ॥

॥१३९॥ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ
अजस्रं । तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वा भुवनानि
गोपाः ॥१॥ नृचक्षा एष दिवो मध्य आस्त आपप्रिवान्रोदसी
अंतरिक्षं । स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुं
॥२॥ रायो बुध्नः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः ।
देव इव सविता सत्यधर्मेंद्रो न तस्थौ समरे धनानां ॥३॥ विश्वा-
वसुं सोम गंधर्वमापो ददृशुषीस्तदृतेना व्यायन् । तदन्ववैदिंद्रो
रारहाण आसां परि सूर्यस्य परिधीँरपश्यत् ॥४॥ विश्वावसुरभि
तन्नो गृणातु दिव्यो गंधर्वो रजसो विमानः । यद्वा घा सत्यमुत
यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः ॥५॥ सस्निमविंद-
च्चरणे नदीनामपावृणोद्दुरो अश्मव्रजानां । प्रासां गंधर्वो अमृ-
तानि वोचदिंद्रो दक्षं परि जानादहीनां ॥६॥२७॥

॥१४०॥ १—६ अग्निः पावकः ॥ अग्निः ॥ १ विष्टारपंक्तिः । २—४ सतोबृहती ।
५ उपरिष्टाज्ज्योतिः । ६ त्रिष्टुप् ॥

॥१४०॥ अग्ने तव श्रवो वयो महि भ्राजंते अर्चयो विभा-
वसो । बृहद्भानो शवसा वाजमुक्थ्यं१ दधासि दाशुषे कवे
॥१॥ पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥२॥ ऊ-
र्जो नपाज्जातवेदः सुशस्तिभिर्मंदस्व धीतिभिर्हितः । त्वे
इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥३॥ इर-
ज्यन्नग्ने प्रथयस्व जंतुभिरस्मे रायो अमर्त्य । स दर्शतस्य व-

पुषो वि राजसि पृणक्षि सानसिं क्रतुं ॥४॥ इष्कर्तारमध्वरस्य प्र-
चेतसं क्षयंतं राधसो महः । रातिं वामस्य सुभगां महीमिषं द-
धासि सानसिं रयिं ॥५॥ ऋतावानं महिषं विश्वदर्शतमग्निं
सुम्नाय दधिरे पुरो जनाः । श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मा-
नुषा युगा ॥६॥२८॥

॥ १४१ ॥ १–६ अग्निस्तापसः ॥ विश्वे देवाः ॥ अनुष्टुप् ॥

॥१४१॥ अग्ने अच्छा वदेह नः प्रत्यङ्नः सुमना भव । प्र नो यच्छ
विशस्पते धनदा असि नस्त्वं ॥१॥ प्र नो यच्छत्वर्यमा प्र भगः प्र
बृहस्पतिः । प्र देवाः प्रोत सूनृता रायो देवी ददातु नः ॥२॥ सोमं
राजानमवसेऽग्निं गीर्भिर्हवामहे । आदित्यान्विष्णुं सूर्यं ब्रह्माणं
च बृहस्पतिं ॥३॥ इंद्रवायू बृहस्पतिं सुहवेह हवामहे । यथा नः
सर्व इज्जनः संगत्यां सुमना असत् ॥४॥ अर्यमणं बृहस्पतिमिंद्रं
दानाय चोदय । वातं विष्णुं सरस्वतीं सवितारं च वाजिनं ॥५॥
त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय । त्वं नो देवतातये रायो
दानाय चोदय ॥६॥२९॥

॥ १४२ ॥ १–८ शार्ङ्गाः । १. २ जरिता । ३. ४ द्रोणः । ५. ६ सारिसृक्वः । ७. ८ स्तंबमित्रः ॥
अग्निः ॥ १. २ जगती । ३–६ त्रिष्टुप् । ७. ८ अनुष्टुप् ॥

॥१४२॥ अयमग्ने जरिता त्वे अभूदपि सहसः सूनो नह्य१न्य-
दस्त्याप्यं । भद्रं हि शर्म त्रिवरूथमस्ति त आरे हिंसानामप
दिद्युमा कृधि ॥१॥ प्रवत्ते अग्ने जनिमा पितूयतः साचीव
विश्वा भुवना न्यृंजसे । प्र सप्तयः प्र सनिषंत नो धियः पुर-
श्चरंति पशुपा इव त्मना ॥२॥ उत वा उ परि वृणक्षि बप्स-
द्बहोरग्न उलपस्य स्वधावः । उत खिल्या उर्वराणां भवंति
मा ते हेतिं तविषीं चुक्रुधाम ॥३॥ यदुद्वतो निवतो यासि

बप्सत्पृथंगेषि प्रगर्धिनीव सेना। यदा ते वातो अनुवाति शो-
चिर्वप्तेव श्मश्रु वपसि प्र भूम॥४॥ प्रत्यस्य श्रेणयो ददृश्र एकं नि-
यानं बहवो रथासः। बाहू यदग्ने अनुमर्मृजानो न्यङ्ङुत्तानामन्वे-
षि भूमिं॥५॥ उत्ते शुष्मा जिहतामुत्ते अर्चिरुत्ते अग्ने शशमानस्य
वाजाः। उच्छ्वंचस्व नि नम वर्धमान आ त्वाद्य विश्वे वसवः स-
दंतु॥६॥ अपामिदं न्ययनं समुद्रस्य निवेशनं। अन्यं कृणुष्वेतः
पंथां तेन याहि वशाँ अनु॥७॥ आयने ते परायणे दूर्वा रोहंतु
पुष्पिणीः। ह्रदाश्च पुंडरीकाणि समुद्रस्य गृहा इमे॥८॥३०॥७॥

॥१४३॥ १–६ अत्रिः सांख्यः॥ अश्विनौ॥ अनुष्टुप्॥

॥१४३॥ त्यं चिदत्रिमृतजुरमर्थमश्वं न यातवे। कक्षीवंतं
यदी पुना रथं न कृणुथो नवं॥१॥ त्यं चिदश्वं न वाजिनमरेण-
वो यमत्नत। दृळ्हं ग्रंथिं न वि ष्यतमत्रिं यविष्ठमा रजः॥२॥
नरा दंसिष्ठावत्रये शुभ्रा सिषासतं धियः। अथा हि वां दिवो
नरा पुनः स्तोमो न विशसे॥३॥ चिते तद्वां सुराधसा रातिः सु-
मतिरश्विना। आ यन्नः सदने पृथौ समने पर्षथो नरा॥४॥
युवं भुज्युं समुद्र आ रजसः पार ईंखितं। यातमच्छा पतत्रि-
भिर्नासत्या सातये कृतं॥५॥ आ वां सुम्नैः शंयू इव मंहिष्ठा वि-
श्ववेदसा। समस्मे भूषतं नरोत्सं न पिप्युषीरिषः॥६॥१॥

॥१४४॥ १–६ सुपर्णस्तार्क्ष्यपुत्र ऊर्ध्वकृशनो वा यामायनः॥ इंद्रः॥ १.३.४ गायत्री।
२ बृहती। ५ सतोबृहती। ६ विष्टारपंक्तिः॥

॥१४४॥ अयं हि ते अमर्त्य इंदुरत्यो न पत्यते। दक्षो विश्वा-
युर्वेधसे॥१॥ अयमस्मासु काव्य ऋभुर्वज्रो दास्वते। अयं
बिभर्त्यूर्ध्वकृशनं मदमृभुर्न कृत्व्यं मदं॥२॥ घृषुः श्येनाय कृ-
त्वन आसु स्वासु वंसगः। अव दीधेदहीशुवः॥३॥ यं सुपर्णः

परावतः श्येनस्य पुत्र आभरत्। शतचक्रं यो३ह्यो वर्तनिः ॥४॥
यं ते श्येनश्चारुमवृकं पदाभरदरुणं मानमंधसः। एना वयो वि
तार्यायुर्जीवस एना जागार बंधुता ॥५॥ एवा तदिंद्र इंदुना देवेषु
चिद्धारयाते महि त्यजः। क्रत्वा वयो वि तार्यायुः सुक्रतो क्रत्वा-
यमस्मदा सुतः ॥६॥२॥

॥ १४५ ॥ १–६ इंद्राणी ॥ उपनिषत्सपत्नीबाधनं ॥ १–५ अनुष्टुप्। ६ पंक्तिः ॥

॥ १४५ ॥ इमां खनाम्योषधिं वीरुधं बलवत्तमां। यया सप-
त्नीं बाधते यया संविंदते पतिं ॥१॥ उत्तानपर्णे सुभगे देवजूते
सहस्वति। सपत्नीं मे परा धम पतिं मे केवलं कुरु ॥२॥ उत्तरा-
हमुत्तर उत्तरेदुत्तराभ्यः। अथा सपत्नी या ममाधरा साधराभ्यः
॥३॥ नह्यस्या नाम गृभ्णामि नो अस्मिन्रमते जने। परामेव
परावतं सपत्नीं गमयामसि ॥४॥ अहमस्मि सहमानाथ त्वम-
सि सासहिः। उभे सहस्वती भूत्वी सपत्नीं मे सहावहै ॥५॥ उप
तेऽधां सहमानामभि त्वाधां सहीयसा। मामनु प्र ते मनो वत्सं
गौरिव धावतु पथा वारिव धावतु ॥६॥३॥

॥ १४६ ॥ १–६ देवमुनिरैरंमदः ॥ अरण्यानी ॥ अनुष्टुप् ॥

॥ १४६ ॥ अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि। कथा
ग्रामं न पृच्छसि न त्वा भीरिव विंदती३ँ ॥१॥ वृषारवाय
वदते यदुपावति चिच्चिकः। आघाटिभिरिव धावयन्नर-
ण्यानिर्महीयते ॥२॥ उत गाव इवादंत्युत वेश्मेव दृश्यते।
उतो अरण्यानिः सायं शकटीरिव सर्जति ॥३॥ गाम-
ङ्गैष आ ह्वयति दार्वङ्गैषो अपावधीत्। वसन्नरण्यान्यां
सायमक्रुक्षदिति मन्यते ॥४॥ न वा अरण्यानिर्हन्त्यन्यश्चे-

न्नाभिगच्छति। स्वादोः फलस्य जग्ध्वाय यथाकामं नि पद्यते
॥५॥ आंजनगंधिं सुरभिं बह्वन्नामकृषीवलां। प्राहं मृगाणां
मातरमरण्यानिमशंसिषं ॥६॥४॥

॥ १४७ ॥ १–५ सुवेदाः शैरीषिः ॥ इंद्रः ॥ १–४ जगती । ५ त्रिष्टुप् ॥

॥१४७॥ श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्वृत्रं नर्यं विवे-
रपः। उभे यत्त्वा भवतो रोदसी अनु रेजते शुष्मात्पृथिवी चिद-
द्रिवः ॥१॥ त्वं मायाभिरनवद्य मायिनं श्रवस्यता मनसा वृत्र-
मर्दयः। त्वामिन्नरो वृणते गविष्टिषु त्वां विश्वासु हव्यास्विष्टिषु
॥२॥ ऐषु चाकंधि पुरुहूत सूरिषु वृधासो ये मघवन्नानशुर्मघं।
अर्चंति तोके तनये परिष्टिषु मेधसाता वाजिनमह्रये धने ॥३॥
स इन्नु रायः सुभृतस्य चाकनन्मदं यो अस्य रंह्यं चिकेतति। त्वा-
वृधो मघवन्दाश्वध्वरो मक्षू स वाजं भरते धना नृभिः ॥४॥ त्वं
शर्धाय महिना गृणान उरु कृधि मघवञ्छग्धि रायः। त्वं नो
मित्रो वरुणो न मायी पित्वो न दस्म दयसे विभक्ता ॥५॥५॥

॥ १४८ ॥ १–५ पृथुर्वैन्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१४८॥ सुष्वाणास इंद्र स्तुमसि त्वा ससवांसश्च तुविनृम्ण
वाजं। आ नो भर सुवितं यस्य चाकन्त्मना तना सनुयाम
त्वोताः ॥१॥ ऋष्वस्त्वमिंद्र शूर जातो दासीर्विशः सूर्येण स-
ह्याः। गुहा हितं गुह्यं गूळ्हमप्सु बिभृमसि प्रस्रवणे न सोमं
॥२॥ अर्यो वा गिरो अभ्यर्च विद्वानृषीणां विप्रः सुमतिं
चकानः। ते स्याम ये रणयंत सोमैरेनोत तुभ्यं रथोळ्ह भ-
क्षैः ॥३॥ इमा ब्रह्मेंद्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः।
तेभिर्भव सक्रतुर्येषु चाकन्नुत त्रायस्व गृणत उत स्तीन् ॥४॥

श्रुधी हवमिंद्र शूर पृथ्या उत स्तवसे वेन्यस्यार्कैः। आ यस्ते यो-
निं घृतवंतमस्वारूर्मिर्न निम्नैर्द्रवयंत वक्वाः॥५॥६॥

॥१४९॥ १—५ अर्चन्हैरण्यस्तूपः॥ सविता॥ त्रिष्टुप्॥

॥१४९॥ सविता यंत्रैः पृथिवीमरम्णादस्कंभने सविता द्या-
मदृंहत्। अश्वमिवाधुक्षद्धुनिमंतरिक्षमतूर्ते बद्धं सविता समुद्रं
॥१॥ यत्रा समुद्रः स्कभितो व्यौनदपां नपात्सविता तस्य वेद।
अतो भूरत आ उत्थितं रजोऽतो द्यावापृथिवी अप्रथेतां॥२॥
पश्चेदमन्यदभवद्यजत्रममर्त्यस्य भुवनस्य भूना। सुपर्णो अंग स-
वितुर्गरुत्मान्पूर्वो जातः स उ अस्यानु धर्म॥३॥ गाव इव ग्रामं
यूयुधिरिवाश्वान्वाश्रेव वत्सं सुमना दुहाना। पतिरिव जाया-
मभि नो न्येतु धर्ता दिवः सविता विश्ववारः॥४॥ हिरण्यस्तूपः
सवितर्यथा त्वांगिरसो जुह्वे वाजे अस्मिन्। एवा त्वार्चन्नवसे
वंदमानः सोमस्येवांशुं प्रति जागराहं॥५॥७॥

॥१५०॥ १—५ मृळीको वासिष्ठः॥ अग्निः॥ १—३ बृहती। ४ उपरिष्टाज्ज्यो-
तिर्जगती वा। ५ उपरिष्टाज्ज्योतिः॥

॥१५०॥ समिद्धश्चित्समिध्यसे देवेभ्यो हव्यवाहन। आदित्यै
रुद्रैर्वसुभिर्न आ गहि मृळीकाय न आ गहि॥१॥ इमं यज्ञ-
मिदं वचो जुजुषाण उपागहि। मर्तासस्त्वा समिधान हवा-
महे मृळीकाय हवामहे॥२॥ त्वामु जातवेदसं विश्ववारं गृणे
धिया। अग्ने देवाँ आ वह नः प्रियव्रतान्मृळीकाय प्रियव्र-
तान्॥३॥ अग्निर्देवो देवानामभवत्पुरोहितोऽग्निं मनु-
ष्या३ऋषयः समीधिरे। अग्निं महो धनसातावहं हुवे मृ-
ळीकं धनसातये॥४॥ अग्निरत्रिं भरद्वाजं गविष्ठिरं प्रावन्नः

कण्वं त्रसदस्युमाहवे। अग्निं वसिष्ठो हवते पुरोहितो मृळीकाय
पुरोहितः ॥५॥८॥

॥ १५१ ॥ १—५ श्रद्धा कामायनी ॥ श्रद्धा ॥ अनुष्टुप् ॥

॥१५१॥ श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः। श्रद्धां भ-
गस्य मूर्धनि वचसा वेदयामसि॥१॥ प्रियं श्रद्धे ददतः प्रियं श्रद्धे
दिदासतः। प्रियं भोजेषु यज्वस्विदं म उदितं कृधि॥२॥ यथा देवा
असुरेषु श्रद्धामुग्रेषु चक्रिरे। एवं भोजेषु यज्वस्वस्माकमुदितं कृ-
धि॥३॥ श्रद्धां देवा यजमाना वायुगोपा उपासते। श्रद्धां हृद-
य्य१ याकूत्या श्रद्धया विंदते वसु॥४॥ श्रद्धां प्रातर्हवामहे श्रद्धां
मध्यंदिनं परि। श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः
॥५॥९॥११॥

॥ १५२ ॥ १—५ शासो भारद्वाजः ॥ इंद्रः ॥ अनुष्टुप् ॥

॥१५२॥ शास इत्था महाँ अस्यमित्रखादो अद्भुतः। न यस्य
हन्यते सखा न जीयते कदा चन॥१॥ स्वस्तिदा विशस्पतिर्वृत्रहा
विमृधो वशी। वृषेंद्रः पुर एतु नः सोमपा अभयंकरः॥२॥ वि
रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज। वि मन्युमिंद्र वृत्रहन्न-
मित्रस्याभिदासतः॥३॥ वि न इंद्र मृधो जहि नीचा यच्छ पृत-
न्यतः। यो अस्माँ अभिदासत्यधरं गमया तमः॥४॥ अपेंद्र द्वि-
षतो मनोऽप जिज्यासतो वधं। वि मन्योः शर्म यच्छ वरीयो
यवया वधं॥५॥१०॥

॥ १५३ ॥ १—५ इंद्रमातरो देवजामयः ॥ इंद्रः ॥ गायत्री ॥

॥१५३॥ ईंखयंतीरपस्युव इंद्रं जातमुपासते। भेजानासः
सुवीर्यं॥१॥ त्वमिंद्र बलादधि सहसो जात ओजसः। त्वं
वृषन्वृषेदसि॥२॥ त्वमिंद्रासि वृत्रहा व्य१ंतरिक्षमतिरः। उ-

द्यामस्तभ्ना ओजसा ॥३॥ त्वमिंद्र सजोषसमर्कं बिभर्षि बाह्वोः। वज्रं शिशान ओजसा ॥४॥ त्वमिंद्राभिभूरसि विश्वा जातान्योजसा। स विश्वा भुव आभवः ॥५॥११॥

॥ १५४ ॥ १–५ यमी ॥ भाववृत्तं ॥ अनुष्टुप् ॥

॥१५४॥ सोम एकेभ्यः पवते घृतमेक उपासते। येभ्यो मधु प्रधावति तांश्चिदेवापि गच्छतात् ॥१॥ तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः। तपो ये चक्रिरे महस्तांश्चिदेवापि गच्छतात् ॥२॥ ये युध्यंते प्रधनेषु शूरासो ये तनूत्यजः। ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात् ॥३॥ ये चित्पूर्व ऋतसाप ऋतावान ऋतावृधः। पितॄन्तपस्वतो यम तांश्चिदेवापि गच्छतात् ॥४॥ सहस्रणीथाः कवयो ये गोपायंति सूर्यं। ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥५॥१२॥

॥ १५५ ॥ १–५ शिरिंबिठो भारद्वाजः ॥ अलक्ष्मीघ्नं । २. ३ ब्रह्मणस्पतिः । ५ विश्वे देवाः ॥ अनुष्टुप् ॥

॥१५५॥ अरायि काणे विकटे गिरिं गच्छ सदान्वे। शिरिंबिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि ॥१॥ चत्तो इतश्चत्तामुतः सर्वा भ्रूणान्यारुषी। अराय्यं ब्रह्मणस्पते तीक्ष्णशृंगोदृषन्निहि ॥२॥ अदो यद्दारु प्लवते सिंधोः पारे अपूरुषं। तदा रभस्व दुर्हणो तेन गच्छ परस्तरं ॥३॥ यद्ध प्राचीरजगंतोरो मंडूरधाणिकीः। हता इंद्रस्य शत्रवः सर्वे बुद्बुदयाशवः ॥४॥ परीमे गामनेषत पर्यग्निमहृषत। देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ॥५॥१३॥

॥ १५६ ॥ १–६ केतुराग्नेयः ॥ अग्निः ॥ गायत्री ॥

॥१५६॥ अग्निं हिन्वंतु नो धियः सप्तिमाशुमिवाजिषु। तेन

जेष्म धर्नंधनं ॥१॥ यया गा आकरामहे सेनयाग्ने तवोत्या। तां
नो हिन्व मघत्तये ॥२॥ आग्ने स्थूरं रयिं भर पृथुं गोमंतमश्विनं।
अङ्धि खं वर्तया पणिं ॥३॥ अग्ने नर्क्षत्रमजरमा सूर्यं रोहयो दि-
वि। दधज्ज्योतिर्जनेभ्यः ॥४॥ अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उ-
पस्थसत्। बोधा स्तोत्रे वयो दधत् ॥५॥१४॥

॥१५७॥ १—५ भुवन आप्त्यः साधनो वा भौवनः ॥ विश्वे देवाः ॥ द्विपदा त्रिष्टुप् ॥

॥१५७॥ इमा नु कं भुवना सीषधामेंद्रश्च विश्वे च देवाः ॥१॥
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिंद्रः सह चीक्लृपाति ॥२॥ आ-
दित्यैरिंद्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनां ॥३॥ हत्वाय
देवा असुरान्यदायन्देवा देवत्वमभिरक्षमाणाः ॥४॥ प्रत्यंचमर्क-
मनयञ्छचीभिरादित्स्वधामिषिरां पर्यपश्यन् ॥५॥१५॥

॥१५८॥ १—५ चक्षुः सौर्यः ॥ सूर्यः ॥ गायत्री ॥

॥१५८॥ सूर्यो नो दिवस्पातु वातो अंतरिक्षात्। अग्निर्नः पा-
र्थिवेभ्यः ॥१॥ जोषा सवितर्यस्य ते हरः शतं सवाँ अर्हति। पाहि
नो दिद्युतः पतंत्याः ॥२॥ चक्षुर्नो देवः सविता चक्षुर्न उत प-
र्वतः। चक्षुर्धाता दधातु नः ॥३॥ चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै
तनूभ्यः। सं चेदं वि च पश्येम ॥४॥ सुसंदृशं त्वा वयं प्रति पश्येम
सूर्य। वि पश्येम नृचक्षसः ॥५॥१६॥

॥१५९॥ १—६ शची पौलोमी ॥ शची पौलोमी ॥ अनुष्टुप् ॥

॥१५९॥ उदसौ सूर्यो अगादुदयं मामको भगः। अहं
तद्विद्वला पतिमभ्यसाक्षि विषासहिः ॥१॥ अहं केतुरहं
मूर्धाहमुग्रा विवाचनी। ममेदनु क्रतुं पतिः सेहानाया
उपाचरेत् ॥२॥ मम पुत्राः शत्रुहणोऽथो मे दुहिता वि-

राट्। उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः॥३॥ येनेंद्रो ह-
विषा कृत्व्यभवद्युम्न्युत्तमः। इदं तदक्रि देवा असपत्ना किला-
भुवं॥४॥ असपत्ना सपत्नघ्नी जयंत्यभिभूवरी। आवृक्षमन्यासां
वर्चो राधो अस्थेयसामिव॥५॥ समजैषमिमा अहं सपत्नीर-
भिभूवरी। यथाहमस्य वीरस्य विराजानि जनस्य च॥६॥१७॥

॥१६०॥ १—५ पूरणो वैश्वामित्रः॥ इंद्रः॥ त्रिष्टुप्॥

॥१६०॥ तीव्रस्याभिवयसो अस्य पाहि सर्वरथा वि हरी इह
मुंच। इंद्र मा त्वा यजमानासो अन्ये नि रीरमन्तुभ्यमिमे सुता-
सः॥१॥ तुभ्यं सुतास्तुभ्यमु सोत्वासस्त्वां गिरः श्वात्र्या आ ह्वयंति।
इंद्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमं॥२॥ य
उशता मनसा सोममस्मै सर्वहृदा देवकामः सुनोति। न गा
इंद्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति॥३॥ अनु-
स्पष्टो भवत्येषो अस्य यो अस्मै रेवान्न सुनोति सोमं। निररत्नौ
मघवा तं दधाति ब्रह्मद्विषो हंत्यनानुदिष्टः॥४॥ अश्वायंतो ग-
व्यंतो वाजयंतो हवामहे त्वोपगंतवा उ। आभूषंतस्ते सुमतौ
नवायां वयमिंद्र त्वा शुनं हुवेम॥५॥१८॥

॥१६१॥ १—५ यक्ष्मनाशनः प्राजापत्यः॥ राजयक्ष्मघ्नं॥ १—४ त्रिष्टुप्। ५ अनुष्टुप्॥

॥१६१॥ मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मा-
दुत राजयक्ष्मात्। ग्राहिर्जग्राह यदि वैतदेनं तस्या इंद्राग्नी
प्र मुमुक्तमेनं॥१॥ यदि क्षितायुर्यदि वा परेतो यदि
मृत्योरंतिकं नीत एव। तमा हरामि निर्ऋतेरुपस्थाद-
स्पार्षमेनं शतशारदाय॥२॥ सहस्राक्षेण शतशारदेन श-

तायुषा हविषाहार्षमेनं। शतं यथेमं शरदो नयातींद्रो विश्वस्य
दुरितस्य पारं॥३॥ शतं जीव शरदो वर्धमानः शतं हेमंताञ्छ-
तमु वसंतान्। शतमिंद्राग्नी सविता बृहस्पतिः शतायुषा हवि-
षेमं पुनर्दुः॥४॥ आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव। सर्वांग
सर्वं ते चक्षुः सर्वमायुश्च तेऽविदं॥५॥१९॥

॥१६२॥ १–६ रक्षोहा ब्राह्मः॥ गर्भसंस्रावे प्रायश्चित्तं॥ अनुष्टुप्॥

॥१६२॥ ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः। अ-
मीवा यस्ते गर्भं दुर्णामा योनिमाशये॥१॥ यस्ते गर्भममीवा
दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीन-
शत्॥२॥ यस्ते हंति पतयंतं निषत्स्नुं यः सरीसृपं। जातं यस्ते जि-
घांसति तमितो नाशयामसि॥३॥ यस्त ऊरू विहरत्यंतरा दंप-
ती शये। योनिं यो अंतरारेळ्हि तमितो नाशयामसि॥४॥
यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते। प्रजां यस्ते जिघां-
सति तमितो नाशयामसि॥५॥ यस्त्वा स्वप्नेन तमसा मोहयित्वा
निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि॥६॥२०॥

॥१६३॥ १–६ विवृहा काश्यपः॥ यक्ष्मघ्नं॥ अनुष्टुप्॥

॥१६३॥ अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते॥१॥ ग्रीवा-
भ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मं दोषण्य१ मं-
साभ्यां बाहुभ्यां वि वृहामि ते॥२॥ आंत्रेभ्यस्ते गुदाभ्यो वनि-
ष्ठोर्हृदयादधि। यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो वि वृहामि ते
॥३॥ ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां। यक्ष्मं श्रो-

णिभ्यां भासदाङ्ग्संसो वि वृहामि ते ॥४॥ मेहनाद्वनंकरणाल्लो-
मभ्यस्ते नखेभ्यः। यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥५॥
अंगादंगाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि। यक्ष्मं सर्वस्मादा-
त्मनस्तमिदं वि वृहामि ते ॥६॥२१॥

॥१६४॥ १–५ प्रचेताः ॥ दुःस्वप्नघ्नं ॥ १. २. ४ अनुष्टुप्। ३ त्रिष्टुप्। ५ पंक्तिः ॥

॥१६४॥ अपेहि मनसस्पतेऽप क्राम परश्चर। परो निर्ऋत्या
आ चक्ष्व बहुधा जीवतो मनः ॥१॥ भद्रं वै वरं वृणते भद्रं युंजंति
दक्षिणं। भद्रं वैवस्वते चक्षुर्बहुत्रा जीवतो मनः ॥२॥ यदाशसा
निःशसाभिशसोपारिम जाग्रतो यत्स्वपंतः। अग्निर्विश्वान्यप
दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु ॥३॥ यदिंद्र ब्रह्मणस्पतेऽभिद्रोहं
चरामसि। प्रचेता न आंगिरसो द्विषतां पात्वंहसः ॥४॥ अजै-
ष्माद्यासनाम चाभूमानागसो वयं। जाग्रत्स्वप्नः संकल्पः पापो
यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु ॥५॥२२॥

॥१६५॥ १–५ कपोतो नैर्ऋतः ॥ कपोतोपहतौ प्रायश्चित्तं वैश्वदेवं ॥ त्रिष्टुप् ॥

॥१६५॥ देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या
इदमाजगाम। तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु
द्विपदे शं चतुष्पदे ॥१॥ शिवः कपोत इषितो नो अस्त्वना-
गा देवाः शकुनो गृहेषु। अग्निर्हि विप्रो जुषतां हविर्नः परि
हेतिः पक्षिणी नो वृणक्तु ॥२॥ हेतिः पक्षिणी न दभात्यस्मा-
नाष्ट्र्यां पदं कृणुते अग्निधाने। शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु
मा नो हिंसीदिह देवाः कपोतः ॥३॥ यदुलूको वदति मोघ-
मेतद्यत्कपोतः पदमग्नौ कृणोति। यस्य दूतः प्रहित एष ए-
तत्तस्मै यमाय नमो अस्तु मृत्यवे ॥४॥ ऋचा कपोतं नुदत प्र-

णोद्मिषं मर्दतः परि गां नयध्वं। संयोपयंतो दुरितानि विश्वा हित्वा न ऊर्जं प्र पंतात्पतिष्ठः ॥५॥२३॥

॥ १६६ ॥ १–५ ऋषभो वैराजः शाक्वरो वा ॥ सपत्नघ्नं ॥ १–४ अनुष्टुप् । ५ महापंक्तिः ॥

॥१६६॥ ऋषभं मां समानानां सपत्नानां विषासहिं। हंतारं शत्रूणां कृधि विराजं गोपतिं गवां ॥१॥ अहमस्मि सपत्नहेंद्र इवारिष्टो अक्षतः। अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ॥२॥ अत्रैव वोऽपि नह्याम्युभे आर्त्नी इव ज्यया। वाचस्पते नि षेधेमान्यथा मदधरं वदान् ॥३॥ अभिभूरहमागमं विश्वकर्मेण धाम्ना। आ वश्चित्तमा वो व्रतमा वोऽहं समितिं ददे ॥४॥ योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीं। अधस्पदान्म उद्वदत मंडूका इवोदकान्मंडूका उदकादिव ॥५॥२४॥

॥ १६७ ॥ १–४ विश्वामित्रजमदग्नी ॥ १. २. ४ इंद्रः । ३ लिंगोक्तदेवताः ॥ जगती ॥

॥१६७॥ तुभ्येदमिंद्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि। त्वं रयिं पुरुवीरामु नस्कृधि त्वं तपः परितप्याजयः स्वः ॥१॥ स्वर्जितं महि मंदानमंधसो हवामहे परि शक्रं सुतां उप। इमं नो यज्ञमिह बोध्या गहि स्पृधो जयंतं मघवानमीमहे ॥२॥ सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि। तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयं ॥३॥ प्रसूतो भक्षमकरं चरावपि स्तोमं चेमं प्रथमः सूरिरुन्मृजे। सुते सातेन यद्यागमं वां प्रति विश्वामित्रजमदग्नी दमे ॥४॥२५॥

॥ १६८ ॥ १–४ अनिलो वातायनः ॥ वायुः ॥ त्रिष्टुप् ॥

॥१६८॥ वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्न-

स्य घोषः। दिविस्पृग्यात्यरुणानि कृण्वन्नुतो एति पृथिव्या रेणु-
मस्यन् ॥१॥ सं प्रेरते अनु वातस्य विष्ठा ऐनं गच्छंति समनं न
योषाः। ताभिः सयुक्सरथं देव ईयतेऽस्य विश्वस्य भुवनस्य रा-
जा ॥२॥ अंतरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः।
अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव ॥३॥
आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः। घोषा
इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ॥४॥२६॥

॥ १६९ ॥ १—४ शबरः काक्षीवतः ॥ गावः ॥ त्रिष्टुप् ॥

॥१६९॥ मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधी-
रा रिशंतां। पीवस्वतीर्जीवधन्याः पिबंत्ववसाय पद्वते रुद्र
मृळ ॥१॥ याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या ना-
मानि वेद। या अंगिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म
यच्छ ॥२॥ या देवेषु तन्व१मैरयंत यासां सोमो विश्वा रूपाणि
वेद। ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिंद्र गोष्ठे रिरी-
हि ॥३॥ प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संवि-
दानः। शिवाः सतीरुप नो गोष्ठमाकस्तासां वयं प्रजया सं स-
देम ॥४॥२७॥

॥ १७० ॥ १—४ विभ्राट् सौर्यः ॥ सूर्यः ॥ १—३ जगती। ४ आस्तारपंक्तिः ॥

॥१७०॥ विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता-
वविह्रुतं। वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष
पुरुधा वि राजति ॥१॥ विभ्राड्बृहत्सुभृतं वाजसातमं धर्म-
न्दिवो धरुणे सत्यमर्पितं। अमित्रहा वृत्रहा दस्युहंतमं
ज्योतिर्जज्ञे असुरहा सपत्नहा ॥२॥ इदं श्रेष्ठं ज्योतिषां

ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् । विश्वभ्राड्भ्राजो महि
सूर्यो दृश उरु पप्रथे सह ओजो अच्युतं ॥३॥ विभ्राजञ्ज्योतिषा
स्व१रगच्छो रोचनं दिवः । येनेमा विश्वा भुवनान्याभृता वि-
श्वकर्मणा विश्वदेव्यावता ॥४॥२८॥

॥ १७१ ॥ १–४ इटो भार्गवः ॥ इंद्रः ॥ गायत्री ॥

॥१७१॥ त्वं त्यमिटतो रथमिंद्र प्रावः सुतावतः । अशृणोः सो-
मिनो हवं ॥१॥ त्वं मखस्य दोधतः शिरोऽव त्वचो भरः । अगच्छः
सोमिनो गृहं ॥२॥ त्वं त्यमिंद्र मर्त्यमास्त्रबुध्नाय वेन्यं । मुहुः श्रथ्ना
मनस्यवे ॥३॥ त्वं त्यमिंद्र सूर्यं पश्चा संतं पुरस्कृधि । देवानां चि-
त्तिरो वशं ॥४॥२९॥

॥ १७२ ॥ १–४ संवर्तः ॥ उषाः ॥ द्विपदा ॥

॥१७२॥ आ याहि वनसा सह गावः सचंत वर्तनिं यदूधभिः
॥१॥ आ याहि वस्व्या धिया मंहिष्ठो जारयन्मखः सुदानुभिः ॥२॥
पितुभृतो न तंतुमित्सुदानवः प्रति दध्मो यजामसि ॥३॥ उषा
अप स्वसुस्तमः सं वर्तयति वर्तनिं सुजातता ॥४॥३०॥

॥ १७३ ॥ १–६ ध्रुवः ॥ राज्ञः स्तुतिः ॥ अनुष्टुप् ॥

॥१७३॥ आ त्वाहार्षमंतरेधि ध्रुवस्तिष्ठाविचाचलिः ।
विशस्त्वा सर्वा वांछंतु मा त्वद्राष्ट्रमधि भ्रशत् ॥१॥ इहैवैधि
माप च्योष्ठाः पर्वत इवाविचाचलिः । इंद्र इवेह ध्रुवस्तिष्ठेह
राष्ट्रमु धारय ॥२॥ इममिंद्रो अदीधरद्ध्रुवं ध्रुवेण हविषा ।
तस्मै सोमो अधि ब्रवत्तस्मा उ ब्रह्मणस्पतिः ॥३॥ ध्रुवा द्यौ-
र्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो
राजा विशामयं ॥४॥ ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्प-

तिः। ध्रुवं त इंद्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवं ॥५॥ ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि। अथो त इंद्रः केवलीर्विशो बलिहृतस्करत् ॥६॥३१॥

॥१७४॥ १-५ अभीवर्तः ॥ राज्ञः स्तुतिः ॥ अनुष्टुप् ॥

॥१७४॥ अभीवर्तेन हविषा येनेंद्रो अभिवावृते। तेनास्मान्ब्रह्मणस्पतेऽभि राष्ट्राय वर्तय ॥१॥ अभिवृत्य सपत्नानभि या नो अरातयः। अभि पृतन्यंतं तिष्ठाभि यो न इरस्यति ॥२॥ अभि त्वा देवः सविताभि सोमो अवीवृतत्। अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ॥३॥ येनेंद्रो हविषा कृत्व्यभवद्द्युम्न्युत्तमः। इदं तदक्रि देवा असपत्नः किलाभुवं ॥४॥ असपत्नः सपत्नहाभिराष्ट्रो विषासहिः। यथाहमेषां भूतानां विराजानि जनस्य च ॥५॥३२॥

॥१७५॥ १-४ ऊर्ध्वग्रावार्बुदिः ॥ ग्रावाणः ॥ गायत्री ॥

॥१७५॥ प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा। धूर्षु युज्यध्वं सुनुत ॥१॥ ग्रावाणो अप दुच्छुनामप सेधत दुर्मतिं। उस्राः कर्तन भेषजं ॥२॥ ग्रावाण उपरेष्वा महीयंते सजोषसः। वृष्णे दधतो वृष्ण्यं ॥३॥ ग्रावाणः सविता नु वो देवः सुवतु धर्मणा। यजमानाय सुन्वते ॥४॥३३॥

॥१७६॥ १-४ सूनुरार्भवः ॥ १ ऋभवः। २-४ अग्निः ॥ १.३.४ अनुष्टुप्। २ गायत्री ॥

॥१७६॥ प्र सूनव ऋभूणां बृहन्नवंत वृजना। क्षामा ये विश्वधायसोऽश्नन्धेनुं न मातरं ॥१॥ प्र देवं देव्या धिया भरता जातवेदसं। हव्या नो वक्षदानुषक् ॥२॥ अयमु ष्य प्र देवयुर्होता यज्ञाय नीयते। रथो न योरभीवृतो घृणीवांश्चेतति

त्मना ॥३॥ अयम॒ग्निरु॑रुष्यत्य॒मृता॑दिव॒ जन्म॑नः। सह॑सश्चि॒त्सही॑यान्दे॒वो जी॒वात॑वे कृ॒तः ॥४॥३४॥

॥ १७७ ॥ १-३ पतंगः प्राजापत्यः ॥ मायाभेदः ॥ १ जगती । २.३ त्रिष्टुप् ॥

॥१७७॥ प॒तं॒गम॒क्तमसु॑रस्य मा॒यया॑ हृ॒दा प॑श्यंति॒ मन॑सा वि॒पश्चि॑तः। स॒मु॒द्रे अं॒तः क॒वयो॒ वि च॑क्षते॒ मरी॑चीनां प॒दमि॑च्छंति वे॒धसः॑ ॥१॥ प॒तं॒गो वाचं॒ मन॑सा बिभर्ति॒ तां ग॑ंध॒र्वो॑ऽवद॒द्गर्भे॑ अं॒तः। तां द्योत॑मानां स्व॒र्यं॑ मनी॒षामृ॒तस्य॑ प॒दे क॒वयो॒ नि पा॑ंति ॥२॥ अप॑श्यं गो॒पामनि॑पद्यमान॒मा च॒ परा॑ च प॒थिभि॒श्चर॑ंतं। स स॒ध्रीचीः॒ स विषू॑ची॒र्वसा॑न॒ आ व॑रीवर्ति॒ भुव॑नेष्वं॒तः ॥३॥३५॥

॥ १७८ ॥ १-३ अरिष्टनेमिस्तार्क्ष्यः ॥ तार्क्ष्यः ॥ त्रिष्टुप् ॥

॥१७८॥ त्यमू॒ षु वा॒जिनं॑ दे॒वजू॑तं स॒हावा॑नं तरु॒तारं॒ रथा॑नां। अरि॑ष्टनेमिं पृत॒नाज॑मा॒शुं स्व॒स्तये॒ तार्क्ष्य॑मि॒हा हु॑वेम ॥१॥ इंद्र॑स्येव रा॒तिमा॒जोहु॑वानाः स्व॒स्तये॒ नाव॑मि॒वा रु॑हेम। उर्वी॒ न पृथ्वी॒ बहु॑ले॒ गभी॑रे॒ मा वा॒मेतौ॒ मा परे॑तौ रिषाम ॥२॥ स॒द्यश्चि॒द्यः शव॑सा॒ पंच॑ कृ॒ष्टीः सूर्य॑ इव॒ ज्योति॑षा॒पस्त॒तान॑। स॒ह॒स्र॒साः श॑त॒सा अ॑स्य॒ रंहि॒र्न स्मा॑ वरंते युव॒तिं न शर्या॑ ॥३॥३६॥

॥ १७९ ॥ १ शिबिरौशीनरः । २ प्रतर्दनः काशिराजः । ३ वसुमना रौहिदश्वः ॥ इंद्रः ॥ १ अनुष्टुप् । २.३ त्रिष्टुप् ॥

॥१७९॥ उत्ति॑ष्ठ॒ताव॑ पश्य॒तेंद्र॑स्य भा॒गमृ॒त्विय॑ं। यदि॑ श्रा॒तो जु॒होत॑न॒ यद्यश्रा॑तो मम॒त्तन॑ ॥१॥ श्रा॒तं ह॒विरो॒ ष्विंद्र॒ प्र या॑हि ज॒गाम॒ सूरो॒ अध्व॑नो॒ विम॑ध्यं। परि॑ त्वासते नि॒धिभिः॒ सखा॑यः कुल॒पा न व्रा॒जप॑तिं॒ चर॑ंतं ॥२॥ श्रा॒तं मन्य

ऊर्धनि आतमग्नौ सुश्रातं मन्ये तहतं नवीयः। माध्यंदिनस्य सवनस्य दध्नः पिबेंद्र वज्रिन्पुरुकृज्जुषाणः ॥ ३ ॥ ३७ ॥

॥ १८० ॥ १-३ जय ऐंद्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ १८० ॥ प्र ससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु। इंद्रा भर दक्षिणेना वसूनि पतिः सिंधूनामसि रेवतीनां ॥ १ ॥ मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगंथा परस्याः। सृकं संशाय पविमिंद्र तिग्मं वि शत्रून्ताळ्हि वि मृधो नुदस्व ॥ २ ॥ इंद्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनां। अपानुदो जनममित्रयंतमुरुं देवेभ्यो अकृणोरु लोकं ॥ ३ ॥ ३८ ॥

॥ १८१ ॥ १ प्रथो वासिष्ठः। २ सप्रथो भारद्वाजः। ३ घर्मः सौर्यः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥ १८१ ॥ प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत्। धातुर्द्युतानात्सवितुश्च विष्णो रथंतरमा जभारा वसिष्ठः ॥ १ ॥ अविंदन्ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत्। धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ॥ २ ॥ तेऽविंदन्मनसा दीध्याना यजुः ष्कन्नं प्रथमं देवयानं। धातुर्द्युतानात्सवितुश्च विष्णोरा सूर्यादभरन्घर्ममेते ॥ ३ ॥ ३९ ॥

॥ १८२ ॥ १-३ तपुर्मूर्धा बार्हस्पत्यः ॥ बृहस्पतिः ॥ त्रिष्टुप् ॥

॥ १८२ ॥ बृहस्पतिर्नयतु दुर्गहा तिरः पुनर्नेषदघशंसाय मन्म। क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥ १ ॥ नराशंसो नोऽवतु प्रयाजे शं नो अस्त्वनुयाजो हवेषु। क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥ २ ॥ तपुर्मूर्धा तपतु रक्षसो ये ब्रह्मद्विषः शरवे

हंतवा उं। क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥३॥४०॥

॥१८३॥ १-३ प्रजावान्प्राजापत्यः ॥ अन्वृचं यजमानपत्नीहोत्राशिषः ॥ त्रिष्टुप् ॥

॥१८३॥ अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतं। इह प्रजामिह रयिं रराणः प्र जायस्व प्रजया पुत्रकाम ॥१॥ अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये नाधमानां। उप मामुच्चा युवतिर्बभूयाः प्र जायस्व प्रजया पुत्रकामे ॥२॥ अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वंतः। अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान् ॥३॥४१॥

॥१८४॥ १-३ त्वष्टा गर्भकर्ता विष्णुर्वा प्राजापत्यः ॥ लिंगोक्तदेवताः। गर्भार्थाशीः ॥ अनुष्टुप् ॥

॥१८४॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आ सिंचतु प्रजापतिर्धाता गर्भं दधातु ते ॥१॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजा ॥२॥ हिरण्ययी अरणी यं निर्मंथतो अश्विना। तं ते गर्भं हवामहे दशमे मासि सूतवे ॥३॥४२॥

॥१८५॥ १-३ सत्यधृतिर्वारुणिः ॥ अदितिः। स्वस्त्ययनं ॥ गायत्री ॥

॥१८५॥ महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य ॥१॥ नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः ॥२॥ यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय। ज्योतिर्यच्छंत्यजस्रं ॥३॥४३॥

॥१८६॥ १-३ उलो वातायनः ॥ वायुः ॥ गायत्री ॥

॥१८६॥ वात आ वातु भेषजं शंभु मयोभु नो हृदे। प्र न आयूंषि तारिषत् ॥१॥ उत वात पितासि न उत भ्रातोत

नः सखा। स नो जीवातवे कृधि ॥२॥ यद्दो वात ते गृहे३ऽमृतस्य निधिर्हितः। ततो नो देहि जीवसे ॥३॥४४॥

॥१८७॥ १–५ वत्स आग्नेयः ॥ अग्निः ॥ गायत्री ॥

॥१८७॥ प्राग्नये वाचमीरय वृषभाय क्षितीनां। स नः पर्षदति द्विषः ॥१॥ यः परस्याः परावतस्तिरो धन्वातिरोचते। स नः पर्षदति द्विषः ॥२॥ यो रक्षांसि निजूर्वत्यग्निस्तिग्मेन शोचिषा। स नः पर्षदति द्विषः ॥३॥ यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पर्षदति द्विषः ॥४॥ यो अस्य पारे रजसः शुक्रो अग्निरजायत। स नः पर्षदति द्विषः ॥५॥४५॥

॥१८८॥ १–३ श्येन आग्नेयः ॥ अग्निर्जातवेदाः ॥ गायत्री ॥

॥१८८॥ प्र नूनं जातवेदसमश्वं हिनोत वाजिनं। इदं नो बर्हिरासदे ॥१॥ अस्य प्र जातवेदसो विप्रवीरस्य मीळ्हुषः। महीमियर्मि सुष्टुतिं ॥२॥ या रुचो जातवेदसो देवत्रा हव्यवाहनीः। ताभिर्नो यज्ञमिन्वतु ॥३॥४६॥

॥१८९॥ १–३ सार्पराज्ञी ॥ सार्पराज्ञी सूर्यो वा ॥ गायत्री ॥

॥१८९॥ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः ॥१॥ अंतश्चरति रोचनास्य प्राणादपानती। व्यख्यन्महिषो दिवं ॥२॥ त्रिंशद्धाम वि राजति वाक्पतंगाय धीयते। प्रति वस्तोरह द्युभिः ॥३॥४७॥

॥१९०॥ १–३ अघमर्षणो माधुच्छंदसः ॥ भाववृत्तं ॥ अनुष्टुप् ॥

॥१९०॥ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥१॥ समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥२॥ सूर्याचं-

द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्ष
मथो स्वः ॥३॥४८॥

॥ १९१ ॥ १–४ संवननः ॥ १ अग्निः । २–४ संज्ञानं ॥ १. २. ४ अनुष्टुप् । ३ त्रिष्टुप् ॥

॥१९१॥ संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ। इळस्पदे स-
मिध्यसे स नो वसून्या भर॥१॥ सं गच्छध्वं सं वदध्वं सं वो मनां-
सि जानतां। देवा भागं यथा पूर्वे संजानाना उपासते ॥२॥
समानो मंत्रः समितिः समानी समानं मनः सह चित्तमेषां।
समानं मंत्रमभि मंत्रये वः समानेन वो हविषा जुहोमि ॥३॥
समानी व आकूतिः समाना हृदयानि वः। समानमस्तु वो
मनो यथा वः सुसहासति ॥४॥४९॥८॥८॥१२॥१०॥

॥ इति दशमं मंडलं समाप्तं ॥

॥ इति शार्मण्यदेशोत्पन्नेनेंगलंडदेशनिवासिना भट्टमोक्ष-
मूलरेण द्वितीयवारं श्रेष्ठादर्शैकमत्येन परिशो-
धितर्ग्वेदसंहिता समाप्ता ॥

00046251

Digitized with financial assistance from
Hermès India

a project facilitated by the Rotary Club of Bombay

on 10 August, 2018